चौखम्बा-संस्कृत-ग्रन्थमाला।

(ग्रन्थसंख्या १३)

—:०:—

विधिरसायनम्।

सर्वतन्त्रस्वतन्त्रश्रीमदप्पयदीक्षितविरचितम्।

अडकरोपनामक-श्रीमुकुन्दशास्त्रिणा परिशोधितम्।

काश्याम्।

विद्याविलास-नाम्नि यन्त्रालये, श्रीयुतबाबूहरिदासगुप्तेन,

मुद्रयित्वा प्रकाशितम्।

सन् १९०१ ईस्वी

वैक्रम सम्वत् १९५८

शुभम्।

॥ श्रीः ॥

विधिरसायनभूमिका ।

इह खलु संसारचक्रे विपरिवर्तमानानां चत्वारः पुरुषार्थाः धर्मार्थकाममोक्षाख्याः सकलश्रुतिस्मृतीतिहासपुराणादिषु श्रूयन्ते जनैः सेव्यत्वेन च तथा च महाभारते भीमसेनवचो युधिष्ठिरं प्रति ।

धर्मं चार्थं कामं च यथावद्वदतांवर ।
विभज्य काले कालज्ञःसर्वान्सेवेत पण्डितः ॥
मोक्षो वा परमं श्रेय एषां राजन्सुखार्थिनाम् ।

इति तत्र निरतिशयानन्दलक्षणस्य मोक्षस्यैव मुख्यं पुरुषार्थत्वम् धर्मादीनां तु तत्साधनतामात्रेण तत्रापि धर्ममात्रं यथायोगं सर्वेषां साधनं स च चोदनालक्षणस्तमेव मीमांसाशास्त्रं वक्ति तदुक्तं भट्टपादैः ।

धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम् ॥

इति स च प्रवृत्तिनिवृत्त्यात्मकतया द्विविधः द्विविधस्याप्यस्य पुरुषार्थसाधनतोक्ता वृद्धैः ।

प्रवृत्तिसंज्ञके धर्मे फलमभ्युदयो मतः ।
निवृत्तिसंज्ञके धर्मे फलं निःश्रेयसं मतम् ॥

इति द्विविधोऽप्ययं त्रिविधः अपूर्वविधिर्नियमविधिः परिसंख्याविधिश्चेति तदुक्तम् ।

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥

इति सोऽयं भाष्यवार्तिकादिग्रन्थैर्निरूपितोऽपि तेषु मन्दमतीनां व्युत्पित्सूनां दुरवगाहतामवलोक्य स्वल्पीयसा अनेहसा करतलामलकवद्विधिस्वरूपं बोधयितुं सञ्जातकरुणः पदवाक्यप्रमाणपारावारीणः श्रीमदप्पयदीक्षितः सिद्धान्तभावनापूर्णं विधिरसायनं निर्ममे ।

तदेतच्चिरकालमन्वेषयद्भिर्गोविन्ददासमहाशयैः ।

काशी–दरभङ्गा–कलकता–तञ्जोर–पद्दकोटा-

—:o:—

अनन्तशयनप्रभृतिनगरेभ्यो महता प्रयासेन द्वादशपुस्तकानि संपाद्यापि पूर्त्तिमगच्छतो ऽपि अस्य ग्रन्थस्य परीक्षकजनसन्तोषाय प्रकाशनाय प्रोत्साहितः खण्डितत्वं चास्य अन्ते २२१ पृष्ठे पङ्क्तौ २३ अन्यदिह वक्तव्यशेषं लक्षणत्रयसाधारणमग्रे वक्ष्यत इत्युल्लेखात् अग्रे च तस्य निर्दुष्टपरिसंख्याविधिलक्षणस्य चानुपलम्भादवगम्यते । एतत्पुस्तकं मुद्रणावशिष्टं येषां महाशयानां समीपे विद्यते ते एतत्पुस्तकमुद्रणाभिलाषिगोविन्ददासमहाशयसमीपे मुद्रणार्थं प्रेषयेयुरिति भूयोभूयः प्रार्थये

एतद्ग्रन्थकर्तुरप्पयदीक्षितस्य कालदेशवंशवर्णनविस्तरस्तु तत्कृतसिद्धान्तलेशभूमिकायामस्मद्गुरुचरणैः सुनिरूपित इति तत एव विभावनीयः ॥

शोधने चास्य एकं पुस्तकं किञ्चिन्न्यूनं शुद्धमतिदुर्लभसंस्कृतपुस्तकसंग्रहशीलानां श्रीगोविन्ददासमहाशयानाम् अपरं च एतदपेक्षया न्यूनं शुद्धं प्राचीनं च धर्माधिकार्युपाहूपण्डितनागेश्वरशास्त्रिणां चावलम्ब्य चौखम्बासीरीजाध्यक्षश्रीयुत बाबूहरिदासगुप्तमहाशयानुमत्या तदीयविद्याविलासयन्त्रालये मुद्रणकार्यं समापयम् आयासपुरःसरं शोधिते ऽपि या नैसर्गिकप्राणिदोषमूलाः मुद्रणादिदोषजाश्चाशुद्धयस्ताः संशोधयन्तु गुणैकपक्षपातिनो विद्वांसः सफलयन्तु च मत्परिश्रमम् प्रसीदतु चानेनव्यापारेण सर्वान्तर्यामी नारायण इति शम् ।

अडकरोपनामकमुकुन्दशास्त्री ।

शुद्धिपत्रम् ।

पृ०	पं०	शु०	अ०
६	२	प्राप्त	प्राऽप्त
१४	१	तस्मात्	तस्मा
१६	२५	व्रीह्यः	व्रीह्यः
२२	३	गुण्यं	गुण्य
२२	८	मान्त्य	मन्त्य
२६	१०	ऽग्नीषोमीय	ऽग्नषो
२७	१८	ह्रोत्रं	ह्रोत्र
२८	१२	नेक	नक
२८	१३	सायं	मायं
२९	२	भेदा	भदा
३३	१३	ष्वावि	ष्वावि
४५	५	॥९॥	॥८॥
६९	११	पूर्वक	पुक
७१	३	दण्डं	दण्डः
७९	५	पञ्चाणि	ञ्चाणौ
८२	४	पितत्वात्	तत्वत्
८५	२१	त्रेधातण्डु	लधातण्डु
८७	२	सान्नाय्ये	न्नाय्ये
८८	११	मननुष्ठान	ममनुष्ठान
८९	१४	क्लृप्त	क्लप्त
९०	७	लभ्यते	लभ्यत
१००	१८	प्राप्त	प्रप्ता

पृ०	पं०	शु०	अ०
१०१	७	दृष्टि विशेषं	दृष्टिं विशेषं
१०३	२५	नावस्थान	नावनांस्थ
११२	९	बृहद्रथ	हथ
११५	२५	दर्शितत्वात्	दर्शित्वा
११६	७	स्यवमान	पमान
११८	२३	ष्यवमान	ष्वबमान
१२६	६	सत्त्वेन	सत्त्वन
१४९	१८	दर्शं	हर्शं
१५३	२४	विध्यभाव	विध्याभाव
१५५	१३	विध्यन्वय	विध्यन्वव
१५५	२४	विध्यर्थं	विध्यय
१५८	२२	पश्चादावपि	पश्चादपि
१५९	८	कथं	कथ
१५९	१८	शाक्या	शात्क्या
१६१	२४	प्रजापत्ति	प्रजाति
१६५	२	त्वाय	त्वय
१७४	१४	॥ ३१ ॥	॥
१७५	५	॥ ३२ ॥	॥
१८१	२०	देशिक	देषिक
१९२	१४	अत: फलान्तरेण	अतफला
१९३	३३	क्रतु	क्रुत
१७७	७	३९	३७
१९९	१६	४०	३९
२००	२१	४१	४०

पृ०	पं०	शु०	अ०
२०१	२०	देवता	दवता
२०४	११	स्थिरौ	स्थीरौ
२०८	८	त्वेन	त्वन
२०९	२१	येष्ट्यां	यष्ट्यां
२१०	२	सत्यंतत्र	सत्यंतत्र
२१०	२५	हविषां	हविषा
२११	१२	॥ ४२ ॥	॥ ४१ ॥
२११	१५	॥ ४३ ॥	॥ ४२ ॥

श्रीगणेशाय नमः ।

विधिरसायनम् ।

श्रीमदप्पयदीक्षितविरचितम् ।

उद्घाट्य योगकलया हृदयाब्जकोशम्
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥ १ ॥

जन्मस्थेमलयं समस्तजगतां यस्यैव लीलायितं
यस्मिन्नायतते भवस्थिरमहापाशक्षयः प्राणिनाम् ।
तद्ब्रह्मादिभिरप्यगम्यविभवं विश्वाधिकं शाश्वतं
साम्बं ब्रह्म रसालमूलरसिकं पश्येयमन्तर्दृशा ॥ २ ॥

यत्कुमारिलमतानुसारिणा
निर्मितं विधिरसायनं मया ।
पद्यरूपमनतिस्फुटाशयं
तत्सुखावगतये विविच्यते ॥ ३ ॥

प्रारिप्सितप्रकरणाविघ्नसमाप्तये सूत्रकारस्य महर्षेरनुस्मरणरूपं मङ्गलमाचरन्नेव प्रकरणारम्भं[1] तावदाक्षिप्य समाधत्ते ।

---

१ शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम् ।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चित इति प्रकरणलक्षणम् ॥

विख्याता मुनिवर्य्यसूक्तिषु विधा
स्तिस्रो विधिस्रोतसाम्
आचार्य्यैर्विशदं विविक्तविषया-
स्ताश्च व्यवस्थापिताः ।
किं तत्रास्ति विचार्य्यमार्य्यमथिते
मार्गे निसर्गोज्ज्वले
नानोदाहरणैस्तु ताः
प्रविशदीकर्त्तुं प्रवर्त्तामहे ॥ १ ॥

मुनिवर्य्यस्य भगवतो जैमिनेः सूत्रेषु विधिर्वा स्यादपूर्वत्वात् । नियमार्थो वा श्रुतिरुच्यते । परिसंख्या इत्येवमादिषु त्रयो विधिप्रकाराः प्रसिद्धाः । अपूर्वविधिर्नियमविधिः परिसंख्याविधिश्चेति । ते च भट्टपादैः परस्परासंकीर्णविषयतया स्पष्टमेवोपपादिताः । तत्र स्वत एव निरवद्ये ग्रन्थकारैश्च बहुभिर्निष्कर्षं प्रापिते ऽपूर्वविध्यादिविभागे नूतनं किं चिद्विचारणीयं नास्त्येव यद्यप्येवं तथाप्यपूर्वविध्यादीनां द्वादशस्वप्यध्यायेषु विप्रकीर्णैरिहापूर्वविध्यादिलक्षणविचारव्याजेन तत्रतत्र प्रदर्शनीयैरुदाहरणविशेषैस्तमेवार्थमतिस्पष्टीकर्त्तुं प्रकरणमिदमारभ्यत इत्यर्थः । अथ,

विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते॥

इति श्लोकेनाचार्यैरपूर्वविध्यादीनां लक्षणमुखेन विभागः कृतः। तत्र व्रीहीन् प्रोक्षतीत्यत्रापूर्वविधिः। एतदभावे हि दर्शपौर्णमासिकेषु व्रीहिषु प्रोक्षणं कथमपि न प्राप्नोति व्रीहीनवहन्तीति नियमविधिः। एतदभावे पुरोडाशार्थमुपात्तेषु व्रीहिषु तुषविमोके लोकसिद्धकारणत्वात्तदाक्षिप्ततया[१]ऽवघातः प्राप्नोत्येव किं तु लोकसिद्धकारणत्वाविशेषात्कदाचिन्नखविदलनमपि प्राप्नोतीति पाक्षिकी तस्याक्षेपतः प्राप्तिः। इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त इतिपरिसंख्याविधिः। एतदभावे ऽग्रभ्णन् रशनामितिलिङ्गादग्निचयनप्रकरणाम्नातो मन्त्रस्तत्राश्वरशनाग्रहणे नियतमेव प्राप्नोति किं तु लिङ्गाविशेषात्तत्रत्यगर्दभरशनाग्रहणे ऽपि प्राप्नोतीति तत्र चान्यत्र च प्राप्तिः। यद्यपि नियमपरिसंख्योदाहरणयोः पाक्षिकी नियता च प्राप्तिर्वस्तुतो नास्त्येव तुषविमोकेन कार्येणाक्षिप्ततया ह्यवघातस्य पाक्षिकी प्राप्तिर्वक्तव्या आक्षेपात्प्रागेव व्रीहीनवहन्तीति प्रत्यक्षशास्त्रं झटिति प्रवर्त्तते तदनन्तरं प्रत्यक्षशास्त्रसिद्धेनैकेनोपायेन नैराकाङ्क्षादनियतोपायाक्षेप एव न प्रवर्त्तते। एवं प्रत्यक्षशास्त्रेणाश्वरशनाग्रहणे झटिति विनियुक्तस्य मन्त्रस्य तेनैव नैराकाङ्क्षाद्रशनाद्वयसाधारण्येन लैङ्गिकविनियोगक-

१ तुषविमोकाक्षिप्ततयेत्यर्थः।

ल्पनं न प्रवर्त्तते । एवं च नियमपरिसंख्ययोरप्यपूर्वविधिवद्दस्तुतो ऽत्यन्ताप्राप्त एव विषयस्तथापि नियमपरिसंख्याशास्त्रयोरप्रवृत्तौ अर्थाक्षेपेण नखविदलनस्यापि कदा चित्प्राप्त्यावघातस्यापि पाक्षिक्येव प्राप्तिः स्यात् । मन्त्रस्य लिङ्गाविशेषेण गर्द्दभरशनाग्रहणे ऽपि विनियोगः स्यात् । तयोः प्रवृत्तौ त्वाक्षेपमन्त्रलिङ्गावतारप्रतिबन्धद्वारावघातस्य नियतता मन्त्रस्य गर्द्दभरशनातो निवृत्तिश्च लभ्यते इति नियमपरिसंख्याविध्योः प्रवृत्तावपूर्वविध्यविशेषेऽप्याक्षेपमन्त्रलिङ्गावतारप्रतिबन्धद्वारा ऽवघातनियमेन गर्द्दभरशनायां मन्त्रवर्जनेन च फलवत्त्वात्फलतो नियमपरिसंख्याव्यपदेश इत्यपूर्वविधितस्तयोर्भेदः । यद्यपि नियमे नखविदलनादिनिवृत्तिः परिसंख्यायां गर्द्दभरशनादिनिवृत्तिरितीतरनिवृत्तिलाभ उभयत्राप्यविशिष्टः । अवघातेनैव तुषविमोकः कार्यः अश्वरशनायामेव मन्त्रः कार्य इत्येवकारेण फलविवरणमप्यविशिष्टं तथाप्यवघातशास्त्रेणावघातनियमस्याक्षेपतो ऽवघाताऽप्राप्यव्रीहिष्ववघातप्रापणरूपस्याकरणे उपायान्तरसाधारणेनाक्षेपेणापातत उपायान्तरस्य निराकर्त्तुमशक्यतया तन्निवृत्त्यसम्भवेन नियमस्य प्रथमोपस्थितत्वाद्विधेयगतत्वेन प्रत्यासन्नत्वाच्चाप्राप्तांशप्रापणरूपो नियम एव फलम् । उपायान्तरनिवृत्तिस्तु चरमोपस्थितत्वादविधेयगतत्वेन विप्रकृष्टत्वाच्च तदनुनिष्पादिनी न फलम् । परिसंख्योदाहरणे तु द्वयोरपि नित्यप्राप्तिसंभवेन स्वरूपप्राप्तेर्नियमस्य वा फलत्वायोगादितरनिवृत्तिरेव फलम् । एवं नियमपरिसंख्याविध्योः फलभेदे

स्थिते सति एवकारेण फलविवक्षामेकत्वायोगव्यवच्छेदा-
र्थं मन्यता ऽन्ययोगव्यवच्छेदार्थमिति विशेषो द्रष्टव्यः॥१॥

एवमाचार्यश्लोकार्थं मनसि निधाय तत्र कांश्चिद-
र्थानाक्षेपसमाधानाभ्यां विचारयितुं तदुक्तमपूर्वविधि-
लक्षणं तावदाक्षिपति ॥

अत्यन्ताप्राप्तियुक्ते विधिरिति-
विषये सप्तमी वर्ण्यते चेत् अ-
व्याप्तिः प्राप्तियुक्तं विषयमुपग-
तेष्वग्निविध्यादिषु स्यात् ॥ अ-
ग्रे हृष्टैव सप्तम्यविषमगतये यो-
ज्यते चेत् त्वनीकाभाजोरग्र-
त्वविध्योः प्रथमपदजुषोः स्या-
त्तदा ऽव्याप्तिदोषः ॥ २ ॥

अत्यन्तमप्राप्ते विधिरित्यपूर्वविधिलक्षणमयुक्तम् । तत्र ह्यप्राप्त इति विषयसप्तमी, सति सप्तमी वा स्यात्, आद्ये यो विधिविषयत्वेनान्वेति तस्यैवाप्राप्तिर्वक्तव्या द्वितीये विधिविषयस्य प्राप्तिसत्वे ऽपि तदन्यस्य यस्य कस्यचिदप्राप्त्या लक्षणमुपपद्यत इति विशेषः । तत्र विषयसप्तमीप-क्षे विधिविषयत्वेनाभिमतस्य सर्वथा ऽप्राप्तिर्विवक्षिता उ-द्देश्यसम्बन्धित्वेन वा । आद्ये "य एवं विद्वानग्निं चिनुते"

"अग्निहोत्रं जुहोति" "दधि मधु घृतं पयो धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्य"मित्यादिविधिभिः स्वरूपेण प्राप्तानामग्न्यग्निहोत्रप्राजापत्ययागादीनां क्रतुनिमित्त-फलादिसम्बन्धार्थेषु "अथातो ऽग्निमग्निष्टोमेनानुयजन्ति" "यावज्जीवमग्निहोत्रं जुहोति" "चित्रया यजेत पशु-काम" इत्यादिविधिषु लोकतः स्वरूपेण प्राप्तानां राज-सूयादिसम्बन्धार्थेषु "अक्षैर्दीव्यती"त्यादिविधिषु चाव्या-प्तिः स्यात् । द्वितीये वैकृतेष्वग्निविधिष्वतिग्राह्यविधिषु चाव्याप्तिः स्यात् । तथा हि "य एवं विद्वानग्निं चिनुत" इति प्रकृत्य श्रूयते "अथातो ऽग्निमग्निष्टोमेनानुयजन्ति तमुक्थ्येन तमतिरात्रेण तं द्विरात्रेण तं त्रिरात्रेणे"त्यादि । तत्राग्निं चिनुत इति चयनेनाग्निं संस्कुर्यादित्यर्थः । च-यननिष्पादिते स्थण्डिले ऽग्निं स्थापयेदिति यावत् । स्थ-ण्डिलनिष्पादकस्य चयनस्य साक्षादग्निसंस्कारकत्वायो-गादथातो ऽग्निमित्यादेश्चयननिष्पादिते स्थण्डिले आहव-नीयाग्निस्थापनानन्तरं तस्मिन्नग्नावग्निष्टोमादिभिर्यजे-तेत्यर्थः । तथातिग्राह्या नाम केचन ग्रहाः तानधिकृत्य श्रूयते उक्थ्ये गृह्णीयाद्विश्वजिति ग्राह्या इत्यादि । तत्रा-ग्निस्तावत्प्रकृतावप्यस्ति । अग्निष्टोमेनानुयजन्तीति वि-धानात् । न च प्रकृतेः प्राकरणिकोत्तरवेद्यवरोधात्तत्रा-नारभ्य विहितो ऽग्निर्न निवेष्टुमीष्ट इति तत्राग्निष्टोम-पदं विकृत्यग्निष्टोमपरं स्यादिति वाच्यम् । प्रकरणेन वाक्यबाधायोगात् । न च यथा साप्तदशसामिधेनीरनु-ब्रूयादित्यनारभ्याधीतं साप्तदश्यं प्राकरणिकपाञ्चदश्या-वरोधात्प्रकृत्योदर्शपूर्णमासयोर्निवेशमलभमानं मित्रवि-

न्द्रादिविकृतिगामिजातमेवमग्निरपि स्यादिति वाच्यम् । सान्तद्ब्यस्य हि सामिधेनीमात्रसंबन्धो वाक्येनावगम्यते क्रतुसंबन्धस्तु तस्य वैयर्थ्यपरिहारार्थमव्यभिचरितक्रतुसंबन्धिसामिधेनीलिङ्गेन क्रतुं हृदयमागमय्य कल्पयितव्यः । पान्तद्ब्यस्य तु प्रकरणवशात्स्वत एव बुद्धौ विपरिवर्त्तमानेन क्रतुना संबन्धः कृत इति युक्तमेव तत्र प्राकरणिकस्य बलवत्वम् । इह तु अग्निष्टोमशब्दः क्रतुमेवाभिधत्त इति तत्संबन्धे वाक्येन कृते प्रकरणेन बाधो न युक्तः । तस्मादनारभ्याधीतो ऽयग्न्याधारस्थण्डिलरूपो ऽग्निः प्रकरणाम्नातयोत्तरवेद्या विकल्पितः प्रकृतौ निविशत इत्यस्ति तत्र स्थापनेन संस्कृत आहवनीयाग्निः प्रकृतौ । एवमतिग्राह्या अप्युपस्तम्भनं वा एतद्यज्ञस्य यदतिग्राह्या इति प्रकृतौ विहिताः सन्ति प्रकृतौ सन्तश्चाग्न्यतिग्राह्याः सर्वासु विकृतिष्वतिदेशेनैव प्राप्नुवन्तीति कासु चित्तेषां श्रवणं न तत्प्राप्त्यर्थं किं तु तदाश्रितगुणकामप्राप्त्यर्थम् । अग्न्याद्याश्रिता हि गुणकामाः श्रूयन्ते । "श्येनचितं चिन्वीत स्वर्गकाम" इत्यादयस्ते चोदकान्न प्राप्नुवन्ति । अङ्गस्य हि सतस्तोदकात्कथंभावाकाङ्क्षाकल्प्यात्प्राप्तिः न त्वङ्गाश्रितानां फलार्थगुणानां । तथा निर्णीतं चाष्टमाध्याये गुणकामेष्वाश्रितत्वात्प्रवृत्तिः स्यात् निवृत्तिर्वा कर्मभेदादितिपूर्वोत्तरपक्षसूत्राभ्याम् । एवं चाग्न्यतिग्राह्याणां प्रकृतौ कासु चिद्विकृतिषु च उपदेशेन तासां प्रकृतेश्च सामानविध्ये सति तदाश्रिताः फलार्थगुणाः प्रकृताविव तासु विकृतिष्वपि प्राप्नुवन्ति । न च प्रकृतावग्नेरुत्तर-

वेद्या सह विकल्पितत्वात्कासु चिद्विकृतिष्वग्न्युपदेशस्त-न्नियमार्थो ऽस्त्विति वाच्यम् । अनारभ्याधीतमग्निं प्रकृत्याथातो ऽग्निमग्निष्टोमेनेत्यादिवाक्यैस्तस्य प्रकृतिविकृतिरूपक्रतुसंबन्धः क्रियते न तु तत्तत्क्रतुप्रकरणे । ततश्च विकृतिष्वग्न्युपदेशस्य प्रयोजनाकाङ्क्षायामग्निप्रकरणाम्नाततया सन्निहितानां तदाश्रितगुणकामानां प्रवृत्तिः प्रयोजनमित्येवं कल्पयितुमुचितं नत्वसन्निहित-तत्तद्विकृतिप्रकरणाव्यवस्थिताच्चोदकगणात्प्राप्तयोत्तरवेद्याग्नेः पाक्षिकत्वप्रसक्त्यपेक्षस्तन्नियमः प्रयोजनमिति कल्पयितुमुचितम् । न च वाच्यमुत्तरे ऽहनि द्विरात्रस्य गृह्यत इति सर्वेषां द्विरात्राणामतिरात्रसंस्थे द्वितीये ऽहनि षोडशिग्रहनियमविधिस्तत्तद्विरात्रप्रकरणाव्यवस्थितचोदकगणप्राप्त्येन षोडशिग्रहाभावेन षोडशिग्रहस्य पाक्षिकत्वप्रसक्त्यपेक्षो दृष्टस्तथेहापि स्यादिति तत्र सन्निहितप्रयोजनालाभेनागत्या तथा कल्पनात् इह सन्निहितबुद्धिविपरिवर्तमानप्रयोजनसम्भवे दूरस्थितं बुद्धावविपरिवर्त्तमानं विप्रकलितानेकचोदकानुसन्धानसापेक्षमर्थं हृदयमागमय्य प्रयोजनकल्पनानौचित्यात् एतेन[१] द्विरात्रादिषु चोदकेन प्राप्तानामङ्गान्तराणां निवृत्त्यर्थं द्विरात्रादिष्वग्निरेव नाङ्गान्तराणीति वा द्विरात्राद्यतिरिक्तविकृतिषु चोदकात्प्राप्तस्याग्नेर्निवृत्त्यर्थं द्विरात्रादिष्वेवाग्निर्नान्यासु विकृतिष्विति वा परिसंख्याविधिरस्त्वित्यपि[२] शङ्का निरस्ता प्रकरणसन्निधापितप्रयोजनसम्भवे द्विरात्रादिचोदक पर्यालोचनालभ्यस्य

१ वक्ष्यमाणेन प्रकरणेत्यादिहेतुना सहा निरस्तेत्यन्वयः ।

विकृत्यन्तरचोदकपर्यालोचनालभ्यस्य वा प्रयोजनत्वक-ल्पनायोगात् । प्रकृति समानविधानस्य चोदकप्रा-प्तपरिसंख्यात्वानुपपत्तेश्च । तथा हि न तावदङ्गान्त-रपरिसंख्योपपद्यते । सा हि गृहमेधीयपञ्चमपञ्चन्या-याच्चोदकप्राप्तपरिसंख्या वा स्यात्तदष्टमपञ्चन्याया-च्चोदकपरिलोपकत्वेनाप्राप्तपरिसंख्या वा । नाद्यः । वैकृताग्निविधानकाल एव प्राकृताग्निविधेर्निष्पद्यमा-नतया तत्पूर्वकस्याग्न्यङ्गान्तरसाधारणस्य चोदकस्य तदानीमात्मलाभाभावेन ततः प्राप्त्यभावात् । प्रा-प्तपरिसंख्यात्वे स्वार्थत्यागः परार्थग्रहणं प्राप्तबाध-श्चेति दोषत्रयापत्तेश्च । प्रागेव चोदकतः प्राप्तत्वे ह्य-ग्निर्न विधातव्यः चोदकतः प्राप्तानि त्वङ्गान्तराणि स्व-यमेव न निवर्त्तन्त इति प्रतिषेध्यानि । अतो वैकृता-ग्निश्रवणस्याग्निविधिरूपस्वार्थपरत्वं त्यक्तव्यम् अङ्गान्तर-निवृत्तिरूपपरार्थलक्षकत्वं चाङ्गीकरणीयं । चोदकप्राप्ता-नि चाङ्गान्तराणि बाधितव्यानि । यदि हि रशनादान-परिसंख्याविधिवदप्राप्तपरिसंख्या स्यात्तदैव विधिश्रव-णस्य प्रागप्राप्तस्वार्थविधायकस्य तेनैव नैराकाङ्क्ष्यमा-पाद्य ग्राह्यपरिसंख्येयसाधारणप्रमाणप्रवृत्तिप्रतिबन्धक-तया फलतः परिसंख्यात्वमिति त्रैदोष्यं नोपपद्येत । अ-प्राप्तपरिसंख्येति द्वितीयपक्षो ऽपि नोपपद्यते । गृहमेधीये ह्याज्यभागौ यजतीति दार्शपौर्णमासिकयोराज्यभाग-योश्चोदकात्सम्भवत्प्राप्तिकयोः पुनः श्रवणं क्लृप्तोपकारा-ऽऽज्यभागसंबन्धेन गृहमेधीयप्रयोगविधेर्नैराकाङ्क्ष्यमा-पाद्य चोदककल्पनाप्रतिबन्धकत्वेन गृहमेधीयस्य प्रकृ-

तिराहित्यरूपापूर्वतापरमित्यङ्गीकृतम् । न चेह प्रकृताव-
ग्निविधेः कृतोपकारतास्ति । प्राकृताग्निविधेरपि वै-
कृताग्निविधानकाल एव निष्पद्यमानत्वात् । अत एव
क्रत्वन्तरपरिसंख्येति पक्षो ऽपि नोपपद्यते हिरावा-
दिष्वग्निविधानसमये तत्समयविधानस्य प्राकृतस्या-
ग्नेर्विकृत्यन्तरे चोदकतः प्राप्त्यभावात् । न च तत्रा-
प्राप्तपरिसंख्यात्वं शङ्कितुं शक्यम् हिरावादिष्वग्निविधा-
नेन विकृत्यन्तरप्रयोगविधीनां नैराकाङ्क्ष्यापादनासम्भ-
वात् । न च चोदकसत्त्वे कासु चित्पुनः श्रवणं व्यर्थं मा-
भूदिति अग्निविषयं चोदकाभावज्ञापकं सदर्थतः परि-
संख्या स्यादिति वाच्यम् । अग्न्यङ्गान्तरसाधारणस्य चो-
दकस्य निवारयितुमशक्यत्वात् अग्निमात्रे प्रत्येकं चोद-
काभावात् । तस्मात्प्रकृतौ विकल्पितमग्निं यथा प्रकृत्ये-
व हिरावादिषु विदधानानां हिरावादिष्वङ्गान्तराणि
विकृत्यन्तरेष्वग्निं चापरिसञ्चाराणां वैकृतानामग्नि-
विधीनामतिग्राह्यविधीनां च गुणकामप्राप्तिरेव प्रयो-
जनं तथा व्यवस्थापितं चाग्न्यतिग्राह्यस्य विकृतावुपदे-
शादप्रवृत्तिरिति दार्शमिकाधिकरणे ततश्चातिदेशप्राप्त-
विषयत्वेनाप्राप्तविषयत्वाभावात्तेषु लक्षणस्याव्याप्तिः ।
न च ते माभूवन्नपूर्वविधय इति वाच्यम् । अप्राप्तांश-
परिपूरणेतरनिवृत्तिफलरहितानामप्राप्तगुणकामप्राप्ति-
फलानां तेषामपूर्वविध्यन्तर्भावावश्यम्भावादन्यथा तेषां
नियमपरिसंख्ययोरप्यनन्तर्भावेन विधित्रैविध्यभङ्गापत्तेः ।
नन्वस्तु सतिसप्तमीति द्वितीयः पक्षः । नियमः पाक्षिके-
सतीत्यग्रेतनसप्तम्यवैरूप्यलाभात् । तथा सति नोक्ता-

व्याप्त्यवकाशः। न च वाच्यमग्न्यादिविधिषु विधिविषयस्य प्राप्तत्वे ऽपि श्येनाकृत्यादिगुणो न प्राप्त इति खल्वव्याप्तिपरिहारं मन्यसे तद्भ्रान्तिविलसितं तस्यापि "श्येनचितं चिन्वीत स्वर्गकाम" इत्यादिवाक्यैः स्वरूपेण स्वस्वोद्देश्यस्वर्गादिसंबन्धित्वेन च प्राप्तत्वादिति। ततो ऽप्यन्यस्य यस्य कस्यचित्तत्संभावितामप्राप्तिमादाय लक्षणानुगमनोपपत्तेः। लक्षणीयविध्युद्देश्यसंबन्धित्वेनाप्राप्तिविवक्षायां तस्याप्यप्राप्तिसम्भवाच्च। न च प्रकृतेर्विकृतिसंबन्धोपदेशाभावे तदाश्रितगुणकामानां विकृतिमध्ये ऽनुष्ठानप्रसक्तिरस्तीति चेत्। उच्यते यस्य च भावेन भावलक्षणमिति सूत्रानुशिष्टया सतिसप्तम्या यस्याप्राप्तिर्विधिप्रवृत्तावुपलक्षणत्वेन निर्दिष्टा तत्प्राप्तिफलकत्वपर्यन्तलक्षणमिति विवक्षितं, न वा। तद्विवक्षायां इन्त्यादिनियमविधिष्वतिव्याप्तिप्रसङ्गः। दार्शपौर्णमासिककृत्स्नाङ्गकलापोपदेशोपजीविपाशुकचोदकाधीनप्रसक्त्यपेक्षे "न तौ पशौ करोती" त्याज्यभागनिषेधे उक्तचोदकाधीनप्रयाजादिप्राप्त्यपेक्षे "एकादशप्रयाजान्यजती" त्यादिशास्त्रविहिते प्रयाजैकादशत्वादिगुणे च स्वस्वोद्देश्यमप्राप्त एवाज्यादिधर्मे विलापनादौ प्रकृतविध्युद्देश्यमप्राप्ते एव ब्रीहीनवहन्तीत्यादिनियमविधिप्रवृत्तेः। अतस्तत्परिहाराय तत्प्राप्तिफलकत्वपर्यन्तमवश्यं विवक्षणीयम्। तथा सति चनीकाभाजोराद्ययोरग्रताविध्योरव्याप्तिः। तथा हि द्वादशाहे चनीकाम्नाता। ऐन्द्रवायवाग्रौ प्रायणीयोदयनीयौ दशमं चाहुरथेतरेषां नवानामन्त्यामैन्द्रवायवाग्रं प्रथममहरथशुक्राग्रमथाग्रय-

ण्याग्रमथैन्द्रवायवाग्रमथ शुक्राग्रमथाग्रयणाग्रमथैन्द्रवाय-वाग्रमथ शुक्राग्रमथाग्रयणाग्रमिति। अत्रैतेषां नवाना-मक्ष्णामग्रतास्वनीका इत्युच्यन्ते। त्रयाणामैन्द्रवायवाग्रःशुक्राग्रयणाग्रतारूपाणामनीकानां समाहार इति व्युत्प-त्तेः। अत्र त्र्यनीकायामाद्ये ऽहनी रथन्तरबृहत्सामनी। तथा च तयोरैन्द्रवायवाशुक्राग्रते प्रकृतितो ज्योतिष्टो-मादेव प्राप्तः। ज्योतिष्टोमे "यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयात् यदि बृहत्सामा शुक्राग्रानिति" रथन्तरसामत्वेन बृहत्सामत्वेन च नि-मित्तेन तयोरग्रतयोर्विहितत्वात्। एवमतिदेशप्राप्त-योरपि[१] विधानमनैमित्तिकत्वार्थं तस्य प्रयोजनं तद्विकृ-तित्वसत्यपि रथन्तरबृहत्सामत्वे निमित्ते ऐन्द्रवायवशु-क्राग्रत्वप्राप्तिः। तद्यथा गर्गत्रिरात्रे द्वितीयमहर्वामदेव्य-पृष्ठं तत्र बृहत्सामत्वाभावे ऽप्यनैमित्तिकी शुक्राग्रता द्वादशाहतोऽतिदेशात्प्राप्नोति। तदेतत्सर्वं त्र्यनीकायां न्यायोक्तत्वात्स्नानं गुणार्थं स्यादिति दाशमिकाधिकरणे निरूपितम्। एवं च सत्यैन्द्रवायवशुक्राग्रतारूपे विधेये प्र-कृतविध्युद्देश्यं द्वादशाहिकमाद्यमहर्द्वयमप्राप्ते सति तत्र तत्प्राप्त्यर्थमैन्द्रवायवशुक्राग्रताविध्योः प्रवृत्तिर्न भवती-त्यनिवार्या तयोरव्याप्तिः। तथा गवामयने आद्ययो-रह्नोरैन्द्रवायवाग्रत्वविधी श्रूयेते तयोरप्यव्याप्तिस्तथा-हि गवामयने ऽप्युक्तरूपा त्र्यनीका सा चैकषष्ट्यधिक-त्रिशतसुत्यात्मकस्य गवामयनस्य पूर्वस्मिन्पक्षस्याशी-त्युत्तरशतसुत्यात्मके तदवान्तरप्रकरणबलादङ्गत्वेन नि-विशते। एकया च त्र्यनीकया पूर्वपक्षो न पूर्यत इत्याव-

नीया सा तदावृत्तिश्च द्वेधा सम्भवति दण्डकलितवदावृत्तिः स्वस्थानविवृद्धिश्च। यथा चेवमाने कर्त्तव्ये क्वचित्कृत्स्नं मानदण्डं निवेश्य तदनन्तरदेशे ऽपि कृत्स्न एव मानदण्डो निवेश्यते। एवं प्रथममहरैन्द्रवायवाग्रं द्वितीयं शुक्राग्रमित्येवं प्रकारेण कृत्स्नां त्र्यनीकामनुष्ठाय तथैव सा पुनः पुनरनुष्ठीयते चेत्पूर्वस्मिन्पक्षसि विंशतिवारं त्र्यनीकाया दण्डकलितवदावृत्तिर्भवति। अथ पूर्वपक्षो नवधा विभज्य आद्ये विंशतिसुत्यात्मके भागे ऐन्द्रवायवाग्रता द्वितीये भागे शुक्राग्रतेत्येवमेकवारमेव सानुष्ठीयते चेत् तदन्तर्गता स्वस्थानएव विवृद्धिः। यदैन्द्रवायवाग्रं प्रथममहरित्यादावहर्ग्रहणं विवक्षितं तदा दण्डकलितवदावृत्तिर्भवति। अहरपूर्वप्रयुक्ताश्च तत्तदग्रता भवन्ति। तदविवक्षायां तु स्वस्थानविवृद्धिर्भवति। अहः संघातरूपपक्षभागगताश्चाग्रता अहर्धर्मत्वाभावाद्गवामयनिकपरमापूर्वप्रयुक्ता भवन्ति। एवं स्थिते दाशमिके एकादशिनीवत् त्र्यनीकापरिवृत्तिस्यादित्यधिकरणे ऽहःशब्दस्य श्रूयमाणत्वाद्दण्डकलितवदावृत्तिरितिपूर्वपक्षं कृत्वा प्रथमभागस्योद्दिश्यमानस्याह्नो अन्ह उद्दिश्यमानस्य प्राथम्येन वा विशेषणायोगाद् ग्रहैकत्ववदेकत्वमविवक्षितं कृत्वा प्रथममहरिति चोदृदेष्टव्यम्। तत्राङ्गरूद्रदेशेऽङ्गां धर्मा उपदिष्टाः स्युरित्यथेति निर्देशानुपपत्तिः। अतः प्रथममैन्द्रवायवाग्रमथ शुक्राग्रमित्येतावदेव विवक्षितम्। अहःशब्दस्तु द्वादशाहिकत्र्यनीकायां प्रथमादिभागानां वस्तुगत्या ऽह्नोरूपत्वादनुवादः गवामयनिकत्र्यनीकायामहः संघातपरो ऽनुवादः। त-

स्यात्स्वस्थानविवृद्धिरिति सिद्धान्तितम् । एवं च त्र्यनीका-
विधिबलादैन्द्रवायवाग्रायामङ्गामाद्यायां विंशतौ तद-
न्तर्गतयोराद्ययोरन्होः पुनरैन्द्रवायवाग्रत्वविधानं तत्तदह-
रपूर्वप्रयुक्तत्वसिद्ध्यर्थं तत्फलं तत्तद्विकारेष्वेकाहक्रतुषु र-
थन्तरसामत्वाभावे ऽप्यैन्द्रवायवाग्रत्वप्राप्तिरिति प्रतिपा-
दितं तन्त्ररत्ने । ततश्च तयोरप्यैन्द्रवायवाग्रत्वविध्योरनि-
वार्यैवाव्याप्तिः । न चावोदाहृतेषु विधिषु विधेयानाम-
ग्रतानामुक्तेष्वेषु द्वादशाहिकगवामयनिकेष्वहःसु चो-
दकत्र्यनीकोपदेशाभ्यां प्राप्तिसत्त्वे ऽपि तदन्येषां केषां
चिदप्राप्त्या तेषु लक्षणं समर्थनीयमिति शङ्कितुं शक्यम् ।
तेषां विधीनां तत्प्राप्तिफलकत्वाभावात् । अत्र विषय-
सप्तमीपक्षे विकल्पद्वयस्यापि दूषणमव्याप्तिः प्राप्तियुक्त-
मित्यादिना दर्शितम् । तत्राद्यविकल्पदूषणे अग्निर्विधि-
शब्देन प्रकृतिविकृतिसाधारणमग्नेः क्रतुसंबन्धविधि-
मात्रं ग्राह्यम् । आदिशब्देन चाग्निहोत्रप्राजापत्ययाग-
विदेवनादिविधिर्ग्राह्यः । द्वितीयविकल्पदूषणे ऽग्निवि-
धिशब्देनाग्नेर्विकृतिसंबन्धविधिर्ग्राह्यः । आदिशब्देन त्व-
तिग्राह्यविधिः । सतिसप्तमीपक्षे तत्प्राप्तिफलकत्वावि-
वक्षायां यद्दूषणं तत्पञ्चमश्लोके प्रदर्शयिष्यमाणत्वा-
दिह न प्रदर्शितं तद्विवक्षायां यदव्याप्तिद्वयं तत्त्र्यनीका-
भाजोरित्यादिना दर्शितम् । तत्राद्याव्याप्त्युदाहरणे त्र्य-
नीकाभाजोर्द्वादशाहिकत्र्यनीकान्तर्गतयोरैन्द्रवायवाग्र-
त्वशुक्राग्रत्वविध्योरव्याप्तिरित्यर्थः । द्वितीयाव्याप्त्युदा-
हरणे यत्र गवामयनिको त्र्यनीका तत्रैव स्वयं प्रव
र्तमानतया त्र्यनीकाभाजोरैन्द्रवायवाग्रताविध्योरव्या-

प्तिरित्यर्थः ॥ २ ॥ स्यादेतत्सतिसप्तमीपक्षे प्रथमविकल्पे उद्भावितमिदमव्याप्तिद्वयं न प्रसज्यते तथा हि द्वादशाहव्यनीकान्तर्गतमगृताद्वयं परमापूर्वसाधनत्वोपहितयोराद्ययोरह्नोर्विधीयते । न च तथाभूतयोस्तयोः प्रकृतितस्तदगृताद्वयं प्राप्तं किं तु अवान्तरापूर्वसाधनत्वोपहितयोरेव द्वादशानां सोमयागानामेकफलावच्छिन्नानां सहानुष्ठानेऽपि प्रतिसोमयागं चोदकस्य पृथक् प्रवृत्तेः । तथा गवामयनिकयोराद्ययोरह्नोरवान्तरापूर्वसाधनत्वोपहितयोरैन्द्रवायवागृताद्वयं विधीयते । न च तथाभूतयोस्तत्प्राप्तं किं तु परमापूर्वसाधनत्वोपहितयोरेव । इदं च तत्तदव्याप्त्युद्भावनस्थले स्पष्टीकृतम् । तथा चोद्देश्यतावच्छेदकरूपेणाप्राप्तिसत्त्वादुद्भाविताव्याप्त्योर्नावकाश इत्याशङ्क्याह ।

अप्राप्तिं प्राप्तिभाजामपि यदि परमावान्तरापूर्वकृत्यव्यावृत्तोद्दे-
श्यधर्मैः सृजसि विघटयन्नेनमव्याप्तिदोषम् । तस्मादादाय लक्ष्मद्वयकृतिनिहितं स्यादति-
व्याप्तिवक्त्रं व्रीह्युद्देशोऽपि हन्तौ नियमविधिपदे खल्वपूर्वावलीढः ॥ ३ ॥

यद्यप्याप्तिं परिहर्त्तुं प्राप्तानामप्यगृतानामपूर्वविशेष-साधनत्वोपाधिभेदेनाप्राप्तिं लक्षणार्थत्वेन कल्पयन्ति त-दा केषांचिदेव प्रसिद्धानामपूर्वविधीनां संग्राहकमिदं लक्षणमुक्तमिति लक्ष्यसंकोचविवक्षया सुपरिहराद्व्या-प्तिदोषादादाय लक्षणहानिकरस्य नियमविध्यतिव्या-प्तिदोषव्याघृस्य वदने इदं लक्षणं त्वया निश्चितं स्यात् । व्रीहीनवहन्तीति नियमविधावपि व्रीहीणामपूर्वसाधन-त्वोपहितानामेवोद्देश्यतया उद्देश्यतावच्छेदकरूपेणा-प्राप्तिसत्त्वात् । तत्र हि द्वितीयाश्रुत्या व्रीहीणामवघात-साध्यत्वमस्ति प्रागेव सिद्धत्वात् नापि व्रीहीनवहन्तीति लौकिकव्रीह्यवहननानुवादवाक्य इवात्र तुषविमोकवि-शिष्टत्वेन रूपेण तत्साध्यत्वं द्वितीयार्थ इति वक्तुं शक्यम् । विदलनेनापि सम्भवति तस्मिन्नत्र विवक्षितस्यावघातनि-यमस्यानुपयोगात् । तस्मादपूर्वसाधनत्वाकारेणैव तेषां तत्साध्यत्वं वाच्यम् । न च यथाग्नीनादधीतेत्यत्राग्नीनां स्वरूपेणाधानसाध्यत्वं तथेहापि स्यादिति वाच्यम् । तत्र "वहनीये जुहोति""गार्हपत्ये हवींषि श्रपयन्ति""दक्षि-णाग्नावान्वाहार्यं पचतीति" वाक्यान्तरैर्होमादिषु वि-नियुक्तानां संस्कारविशेषविशिष्टाग्निरूपाणामाहवनीया-दीनां साधनाकाङ्क्षायामाधानविधानात् । तेषां संस्कार-विशेषावच्छिन्नत्वेन रूपेणाग्निपदोपात्तानामाधानसाध्य-ता युक्ता । न चेह व्रीहयः संस्कारविशिष्टाः क्रतौ वि-नियुक्ताः येनावहननवाक्ये ऽपि तेषां तद्विशिष्टतयोपादा-नात् तेन रूपेणावहननसाध्यता युक्ता स्यात् । व्रीहिभि-रेति जातिमात्रेण हि व्रीहयः क्रतौ विनियुक्ताः ।

न चात्र सक्तुन्यायेन विनियोगभङ्गः[१] कल्पयितव्यः अपूर्वसाधनत्वलक्षणामात्रेण प्रधानद्वितीयाश्रुतिनिर्वाहे चाकाङ्क्षितदृष्टफलत्वे नियममात्रविषयतया विधिलाघवे च सम्भवति द्वितीयाश्रुतिबाधस्यानाकाङ्क्षितादृष्टफलकल्पनस्यात्यन्ताप्राप्तिप्रापकापूर्वविधिगौरवाभ्युपगमस्य[२] चायुक्तत्वात्। न चैवमपूर्वसाधनत्वलक्षणायामाज्यसान्नाय्यजुहूस्रुवादीनामप्यवघातप्रसङ्गः। व्रीहीणां ह्यवगतमपूर्वसाधनत्वं लक्षणीयम्। तेषां चाग्नेयाद्यपूर्वसाधनत्वं तण्डुलनिर्वृत्त्यादिद्वारकं व्रीहिभिर्यजेतेत्यादिशास्त्रेणावगतमिति तल्लक्षणायां यवसाधारण्यमात्रलाभे ऽपि नान्यत्रातिप्रसङ्गः तथैवावश्यलक्षणीयमवघातस्य दृष्टफलत्वनिर्वाहाय। तदेतत्सर्वं तेषामर्थेन संबन्ध इति तार्त्तीयाधिकरणे द्रव्यसंख्याहेतुसमुदायं वा श्रुतिसंयोगादिति नावमिकाधिकरणे च स्पष्टमिति भावः॥ २॥ एवं प्राप्तानामपि रूपभेदाश्रयणेनाप्राप्तिमपेक्ष्य लक्षणानुगमने व्रीहिपदलक्षिताकाराश्रयणेनावघातनियमविधावतिव्याप्तिरुक्ता इदानीं शङ्काकाराश्रयणेनान्यत्र नियमविधावतिव्याप्तिमुदाहरति॥

यूपः[३] सर्वो ऽप्यपूर्वः स्वयमपि विविधादृष्टसंस्कारयोगात् तस्मिन् दैवे ऽपि दृष्टं खदिरनि-

---

१ सक्तून् जुहोतीत्यत्र यथासक्तुभिर्यजेतेति।

२ अपूर्वविधित्वाभ्युपगमस्येति १ पु० पा०।

३ नियमविधिरयम् सर्वे द्रव्यविधयो नियमविधय इति वचनात्।

यमनं तत्र कार्य्याप्तिर्वार्ता। तस्मात्तत्तत्स्वरूपे परमनवगतं रूपभेदं विहाय प्राप्त्यप्राप्ती विचार्य्यं कथमपि तदिहाव्याप्ति-दोषान्न मुक्तिः ॥ ४ ॥

यूपः प्राकृतो वैकृतः सर्वोऽपि तावदाहवनीयादिवदलौकिकः प्रोक्षणजन्यादृष्टच्छेदनतक्षणाष्टाश्रीकरणादिजन्यनियमादृष्टरूपानेकादृष्टसंस्कारविशिष्टस्यैव यूपशब्दार्थत्वात्[1] । तत्र प्रकृतिद्रव्यनियमविधिः श्रूयते खादिरो यूपो भवतीति । तत्राऽलौकिकयूपत्वावच्छेदेन खादिरप्राप्त्यभावादपूर्वविधिलक्षणस्य तत्राव्याप्तिः स्यात् । नन्वाहवनीयाद्युद्देशेनाधानविधिवद्यूपोद्देशेन खदिरविधिरपूर्वविधिरस्तु । यूपाहवनीययोरलौकिकत्वाविशेषात् । खदिरादिविधेर्नियमविधित्वप्रसिद्धिस्तु वैकृतविधिविषया स्यात् विकृतावपि हि तत्र तत्र श्रूयते खादिरो यूपो भवतीति । तस्य प्रकृतौ विकल्पितानां खदिरपलाशादीनां विकृतावपि तथैव चोदकतः प्राप्तौ खदिर एव तत्र ग्राह्य इति नियमविधित्वमुपपद्यतइति चेत् । उच्यते । दैक्षे दीक्षासु यूपं छिनत्तीति दीक्षाकालकर्त्तव्यच्छेदने प्राकृतयूपे खदिरविधिरपि नियमविधिरेव । तदभावे[2] तक्षणादिवाक्यपर्यालोचनया दारु-

१ प्राप्नोति २ पु० पा० ।

२ खादिरो यूपो भवतीति विध्यभावे ।

मयत्वेनावगतस्य यूपस्य प्रकृत्याकाङ्क्षायामनियतानेक-द्रव्याक्षेपस्यानिवार्यत्वात्। तक्षणाष्टाश्रीकरणादिविशिष्टे यूपस्य दृष्टरूपे खदिरादीनां प्रकृतित्वयोग्यताया लोकतोऽवधारितत्वात्। आधानं त्वाहवनीयादीनां दृष्टे ज्वलनाकारे न निष्पादकं किं तु तन्निष्ठापूर्वसंस्कारमात्र इति युक्तं तद्विधेः प्रोक्षणादिविधेरिवापूर्वविधित्वम्। तस्मात्प्राकृतखदिरादिनियमविधावतिव्याप्तिरप्यनिवार्यैव। एवमुद्देश्यगतविवक्षितरूपभेदाश्रयणेनाप्राप्तिसमर्थनस्यातिव्याप्तिदुष्टत्वात्तत्परिहाराय यथा वार्त्तिकं तत्तद्विध्यभावे विधेयत्वाभिमतस्य प्राप्त्यप्राप्तिविवेचनेनैव नियमापूर्वविधिव्यवस्थोपपादनीया। तथा सति द्वादशाहे व्यनीकाविध्यभावेऽपि आद्ययोरह्नोरश्वोदकादैन्द्रवायवाग्रताऽऽप्नुतः। गवामयने चाद्ययोरह्नोः प्रातिस्विकविध्यभावेऽपि स्वस्थानविहितद्विमत्‌व्यनीकाविधिबलादैन्द्रवायवाग्रते प्राप्नुतः इत्युदाहृताग्रताविधिचतुष्टयाव्याप्त्या सतिसप्तमीपक्षे प्रथमविकल्पो दुष्ट एवेत्यर्थः। अस्मिन्नेव विकल्पे स्थलान्तरेऽप्यव्याप्तिं रूपभेदविवक्षया निरसितुमशक्यामुदाहरति।

अव्याप्तिः पौर्णमास्यामपि यजनविधावत्र कल्पे प्रसर्पेत् प्राप्तोहेष्वयस्य तेन ह्यधिगतफलतोपांशुयाजस्य लभ्या॥ स्यात्किं

चैषा पराग्न्याहुतिषु फलसमायोजनार्थप्रवृत्तेर्निष्प्रत्यूहाग्निहोत्राहुतियुगलमिताधारसंकीर्तने ऽपि ॥५॥

दर्शपूर्णमासप्रकरणे श्रूयते । तावब्रूतावग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्निति । अत्र वाक्ये कीर्त्तितानां यागतदपेक्षिताग्नीषोमदेवताऽऽज्यद्रव्योपांशुत्वगुणपौर्णमासीकालानां मध्ये कालव्यतिरिक्तानां तत्तद्विधयनुगुणशब्दाभावादन्यतः सम्भवत्प्राप्तिकानां तेषां पुनः श्रवणस्य निष्फलत्वाच्च कालस्यैव विधिः । न ह्यग्नीषोमवक्तृकवाक्यगतस्य यजन्नित्यस्य यागविधौ षष्ठीचतुर्थीसाधारणस्य नावित्यस्य देवताविधाऽऽवाज्यस्येति षष्ठ्यन्तस्य द्रव्यविधौ प्रागेवानुगुण्यमवगम्यते । सम्भवति चोपांशुयाजमन्तरा यजतीति स्पष्टविधिना यागस्य यष्टव्यदेवताप्रकाशनैकप्रयोजनकेनाग्नीषोमीययाज्यानुवाक्यायुगलेन देवतायाः सर्वस्मै वा एतद्यज्ञाय गृह्यत इत्यादिना द्रव्यापेक्षायां सर्वयागार्थताविधायकतया क्लृप्तेन ध्रौवाज्यविनियोजकवचनेन द्रव्यस्य प्राप्तिः उपांशुत्वस्यापि[१] यागोत्पत्तिवाक्यत एव प्राप्तिः सम्भवति । अतो ऽत्र पुराकल्परूपाऽर्थवादेन कल्प्यः कालस्यैव विधिः तदनुगुणसप्तमीविभक्तिश्रवणात् । तद्विधानस्य फलत्वाच्च । तथा हि यद्यपि तद्विधानमुपांशुयाजस्य पौ

१ उपांशु याज मन्तरा यजतीतिवाक्यतः ।

र्णमासीकालसिद्ध्यर्थं न भवति तस्योपांशुयाजमन्तरा यजतीत्युत्पत्तिवाक्येनैव पौर्णमासीकर्त्तव्याग्नेयाग्नीषोमीययागद्वयान्तराले उपांशुयाजं विदधानेनार्थतः सिद्धत्वात्तथापि उपांशुयाजस्य दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यधिकारवाक्योद्देश्यफलसम्बन्धसिद्ध्यर्थं भवेदेव। एतदभावे विद्वद्वाक्यस्थेनाधिकारवाक्यस्थेन च दर्शपूर्णमासपदेन यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति अग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छदित्युत्पत्तिवाक्येनावगतपौर्णमासीकालयोराग्नेयाग्नीषोमीययागयोरेव झटिति प्रवृत्तिनिमित्तावगत्या प्रथमगृहीतयोः फलसम्बन्धकरणादर्थावगम्यपौर्णमासीसम्बन्धस्योपांशुयाजस्य विलम्बितप्रवृत्तिनिमित्तप्रतीतिकतया विद्वद्वाक्याधिकारवाक्यगतपौर्णमासीपदागृहीतस्य फलसम्बन्धो न सिद्ध्येदिति। अस्तु भवदेवेनास्य विधेः प्रयोजनमुक्तं यदन्तरालविध्यर्थं लब्ध एवोपांशुयाजे पौर्णमासीकालः स्यात्तदानीमाग्नेयो वै ब्राह्मणो देवतया स सोमेनेष्ट्वा अग्नीषोमीयो भवतीति श्रुतेः। असोमयाजिनोऽग्नीषोमीयपुरोडाशाभावेन तदीयायामेकपुरोडाशायां पौर्णमास्यां पुरोडाशद्वयान्तराभावादुपांशुयाजो न प्राप्नुयात् प्रातिस्विककालविधिसद्भावे त्वन्तरालानपेक्ष्यैव पौर्णमास्युपांशुयाजाङ्गमितिसिद्धेस्तदनुसारेणान्तरालश्रवणमाग्नेयोत्तरकालमात्रोपलक्षणं भवेदित्येकपुरोडाशायामप्युपांशुयाजः प्राप्नोति। अतस्तस्यामुपांशुयाजप्राप्त्यर्थः पौर्णमासीविधिरिति। तदसारम्। उपलक्षणापायेऽप्युपलक्ष्यानपायन्यायादेवैक-

पुरोडाशायामपि तत्प्राप्तिसम्भवेन तदर्थं विध्यन्तरानपेक्षणात्। उपलक्षणं हि पुरोडाशद्वयमुपांशुयाजाङ्गभूतस्य कालस्य न तु स्वयमुपांशुयाजाङ्गं येन तदभावे तद्वैगुण्य स्यात्। न च तदभावे ऽन्तरालस्याङ्गस्यालाभाद्वैगुण्यम्। उपलक्षणापाये ऽप्युपलक्ष्यानपायस्य प्रतिदिनं शङ्खवेलायामागन्तव्यमित्यादौ प्रसिद्धत्वात्। न हि काले विशेषोपलक्षणतयोपात्ते शङ्खध्वनौ क्वचिद्दिवसे दैवादकृते सति तदुपलक्षितः कालो नास्तीति नावगम्यते। ननु द्विपुरोडाशायां स्यादन्तरार्थत्वादिति दाशमन्याधिकरणे अन्तरालश्रुतिबलाद्विपुरोडाशायामेवोपांशुयाज इति पूर्वपक्षे प्राप्ते उभयोस्तुविधानादितिसिद्धान्तसूत्रेणोपांशु पौर्णमास्यां यजन्निति पौर्णमासीविधानमेव हेतूकृत्य द्विपुरोडाशायामेकपुरोडाशायाञ्चोपांशुयाजः समर्थितः सत्यम्। उत्पत्तिशिष्टान्तरालकालवैगुण्ये सति हेतुरसाधक इत्यस्वारस्यादेव तदनन्तरमनपायो हि कालस्य लक्षणं हि पुरोडाशाविति सूत्रान्तरेण तथैव पूर्वहेतुस्वारस्यं वर्णयता तद्भाष्येण च लक्ष्यानपायन्यायमेव हेतूकृत्य कालवैगुण्याभावः समर्थितः। तन्न्यायापेक्षणे च तत एवैकपुरोडाशायामप्युपांशुयाजप्राप्तिर्भवतीति न सा पौर्णमासीविधानमपेक्षते। अवश्यं चोपलक्ष्यानपायन्यायमात्राद्विध्यन्तरमनपेक्ष्यैवोपलक्षणाभावे ऽपि प्राप्तिर्भवतीति त्वयापि स्वीकरणीयम्। अन्यथा पौर्णमासीविधिबलादेकपुरोडाशायां प्राप्नुवन्नप्युपांशुयाजो ऽग्नीषोमदेवत्यएव प्राप्नुयात्। विष्णुदेवत्यः प्रजापतिदेवत्यश्च न प्राप्नुयात्। पौर्णमासीविधौ तावब्रूतावग्नीषोमाविति श्रव-

णात्। एकपुरोडाशायामुपांशुयाजसामान्यप्रापकविध्य-न्तराभावाच्च। तस्मात्त्वाग्नीषोमयोरुपलक्षणत्वाद्देवता-न्तरवतोऽप्युपांशुयाजस्याग्नीषोमोपलक्षितयागत्वानपा-यादेवैकपुरोडाशायां प्राप्तिः समर्थनीयेति तत एव लक्षणा-नपायन्यायादुपांशुयाजमन्तरा यजतीति विधिनापेक्षि-तादेकपुरोडाशायामपि तत्प्राप्तिः सिद्धेति न पौर्ण-मासीविधेः प्रयोजनमिति प्रागुक्तोपांशुयाजस्य फलसि-द्धिः प्रयोजनम्। तदेव प्रयोजनमुपांशुयाजाधिकरणे प्रा-योवचनाच्चेति सूत्रेण तद्वार्त्तिकेन च स्पष्टीकृतम्। तत्र ह्यधिकरणे "विष्णुरुपांशुयष्टव्योऽजामित्वाय" "अग्नी-षोमावुपांशुयष्टव्यावजामित्वाय" "प्रजापतिरुपांशुयष्टव्यो ऽजामित्वायेति" त्रयाणां यागानां विधयः। अन्तरावाक्यं तु तत्समुदायानुवादो विद्वद्वाक्यवदितिपूर्वपक्षनिराकर-णार्थं सूत्रं[1] प्रायोवचनादिति। शिरो वा एतद्यज्ञस्य य-दाग्नेयः हृदयमुपांशुयाजः पादावग्नीषोमीय इत्युपांशु-याजस्य प्रधानप्रायपाठात्प्राधान्यावगतेर्विष्ण्वादिवाक्यै-स्त्रयाणां यागानामुपांशुयाजशब्दपरामृष्टानां विधावुपां-शुयाजमात्रप्राधान्यावगतिबाधप्रसङ्गादन्तरावाक्यविधेय एकएवोपांशुयाजस्तदर्थवादा विष्ण्वादिवाक्यानीति सूत्र-स्यास्य भाष्ये तात्पर्यमुक्तम्। कथं यागत्रयविधिपक्षे तत्प्रा-धान्यबाधः स्यादित्याशङ्क्योपपादितं वार्त्तिके। विष्णुप्र-जापत्यग्नीषोमदेवत्ययागत्रयविधिपक्षे तावद्भूतावग्नी-षोमावित्यादिनाग्नीषोमदेवत्यस्यैव यागस्य पौर्णमासी-विधिरिति स्यात्। तथा च तस्यैव विद्वद्वाक्यफलवाक्य-

[1] गुणसूत्रमिति २ पु॰ पा॰।

स्यपौर्णमासीपदगृहीतस्य फलसंबन्धेन प्राधान्यं सिद्ध्येत् न तु तदगृहीतयोर्विष्णुप्रजापतिदेवत्ययागयोः । अन्तरावाक्ये नैकस्यैव यागस्य विधिस्तत्रैव शाखाभेदेनाम्नातैर्याज्यानुवाक्यायुगलैः प्रापिता विष्ण्वादिदेवता विकल्प्यन्त इति । सिद्धान्तपक्षे तु विष्णुप्रजापतिदेवत्यस्याप्येकत्वेनाग्नीषोमोपलक्षितत्वानपायादुपांशुयाजसामान्यस्य पौर्णमासीकालसंबन्धलाभेन सिद्ध्यति प्राधान्यमित्यनेन पौर्णमासीविधिनैव लभ्यः फलसंबन्धो नान्तरालविधिलभ्य इत्याशयः स्पष्ट एव । अन्यथा विष्णुप्रजापतिदेवत्ययोराहत्य पौर्णमासीविध्यभावेऽप्यन्तरालकालतयार्थप्राप्तपौर्णमासीसंबन्धेनैव फलविधिगृहीतयोः प्राधान्यं सिद्ध्येदिति तत्प्राधान्यावगतिबाधप्रसङ्गदूषणमसमञ्जसं स्यात् । नन्वन्तरावाक्यं यागत्रयसमुदायानुवादकमिति पूर्वपक्षेऽन्तराले यागविधायकं किंचिद्वाक्यं नास्तीति विष्णुप्रजापतिदेवत्ययोः फलसंबन्धार्थं पौर्णमासीविधिरेव शरणीकरणीयः । अतो यागभेदे तस्याग्नीषोमीयमात्रविषयत्वेन तयोः फलसंबन्धो न सिद्ध्येदिति तद्दूषणासामञ्जस्यमिति चेत् । न । अन्तरावाक्यमनुवाद इति पक्षेऽपि[1] दोषपरिहारार्थमन्तरास्तुतेरनालम्बनत्वपरिहारार्थं च त्रिष्वपि यागेष्वन्तरालप्राप्तेरवश्यवक्तव्यत्वात् । भवदेवेनैवोपांशुयाजाधिकरणपूर्वपक्षे कथमन्तरावाक्यस्य सर्वात्मनानुवादकत्वमन्तरालस्यैवा-

---

१ जामितादोषपरिहारार्थमित्यर्थः तथा च जामितादोषोपक्रमोपसंहाराभ्यामेवान्तरालप्राप्त्यातद्द्वारा पौर्णमासीसम्बन्धसिद्धौ न पौर्णमासीविधिः शरणकरणीय इतिभावः एवं च तद्व्यामपाश्यन्यायं प्रागुक्तमवलम्ब्यैव प्राधान्यावगतिबाधप्रसङ्गदूषणं वार्त्तिकोक्तं समञ्जसमिति द्रष्टव्यम् अप्रमाणार्थकवाक्यस्यानुवादत्वानुपपत्तिरूपो दोष इत्यन्यत् ।

ऽप्राप्तस्य विधेयत्वादित्याशङ्क्य जामितादोषोपक्रमेण विष्णवादिवाक्येषु प्रत्येकमजामित्वानुवादेन च तेष्वन्तरालप्राप्तिरुक्ता भवति चानुवादतोऽपि स्थाननियमो यथा न गिरागिरेति ब्रूयादिति गिरापदनिषेधानुवादबलादिरापदस्य गिरापदस्थाननिवेशित्वम् इति सदृष्टान्तमुपपादितत्वात्। केचित्तु विष्णवादिवाक्यानि यागविधय इति पक्षे तत्प्राधान्यबाधमन्यथा समर्थयन्ते। विष्णवादिवाक्येषु तव्यप्रत्ययात्प्रथमं गुणकर्मत्वधीर्भवति। कर्मान्तरानुपयोगानुसंधानेन तु प्रधानकर्मतावगन्तव्या। अतः शीघ्रावगतप्रधानकर्मणामेवाधिकारानुप्रवेशादुपांशुयाजस्य तदननुप्रवेशेन प्राधान्यावगतिर्विहन्येत। अन्तरावाक्यं यागविधिरिति पक्षे तु तत्र तव्यप्रत्ययाभावेन गुणकर्मत्वधीकृतविलम्बाप्रसक्तेराग्नेयादिवदेवाधिकारानुप्रवेशात्प्राधान्यावगतिर्न विहन्यतइति तेषामप्यधिकारानुप्रवेशोपयोग्यर्थप्रतीतिशैघ्र्यमान्द्यकृततदनुप्रवेशाननुप्रवेशन्यायस्य संमतत्वादुपांशुयाजस्य आहत्य पौर्णमासीविध्यभावे तु श्रुतपौर्णमासीकालयोराग्नेयाग्नीषोमीययोरेवाधिकारानुप्रवेशः स्यादित्युपांशुयाजस्य तदनुप्रवेशलाभफलक एव पौर्णमासीविधिः सिद्ध्यति। स्यादेतत्। यदि पौर्णमासीसंबन्धप्रतीतिशैघ्र्यमान्द्याभ्यामधिकारानुप्रवेशाननुप्रवेशौ स्यातां तदोपांशुयाजस्योत्पत्तिवाक्यप्रवृत्तिसापेक्षेण वाक्यान्तरेण पौर्णमासीसंबन्धलाभे ऽप्युत्पत्तिवाक्यावगतपौर्णमासीसंबन्धयोराग्नेयाग्नीषोमीययोरिव तदनुप्रवेशः स्यादिति स दोषस्तदवस्थः। न च वाच्यमनन्यप्रयोजनः पौर्णमासीविधिर्वि-

लम्बितो ऽपि तस्याधिकारसंबन्धमापादयिष्यति । अन्यथा तद्वैयर्थ्यप्रसङ्गात् । एकपुरोडाशायामुपांशुयाज प्राप्तेर्लब्धानपायन्यायलभ्यतयैतद्विधिप्रयोजनत्वाभावा-दिति । अमावास्यायामुपांशुयाजव्यावर्तनेनापि पौर्णमा-सीविधेश्चारितार्थ्यात् । उपांशुयाजोत्पत्तिवाक्यपर्यालो-चनया ह्यमावास्यायामपि स प्राप्नोति । यथा पौर्णमास्या-माग्नेयाग्नीषोमीयौ पुरोडाशौ तथा ऽऽमावास्यायामाग्ने-यैन्द्राग्नौ स्त इति पुरोडाशद्वयान्तरालस्य द्वयोरपि स-त्त्वादमावास्यायां सोमयाजिन ऐन्द्राग्नाभावेनैव पौर्ण-मास्यामसोमयाजिनो ऽग्न.षोमीयाभावेन पुरो.डाशद्वया-सार्वत्रिकत्वस्य तयोरविशिष्टत्वात् । तस्मात्पौर्णमासी-विधिरमावास्याव्यावर्त्तनेन चरितार्थः स्यादेव । अत एव दशमे अपि वा पौर्णमास्यां स्यात्प्रधानशब्दसंयोगान्मन्त्रो यथा प्रधानं स्यादितिसूत्रेण प्रधानस्योपांशुयाजस्यो-पांशु पौर्णमास्यां यजन्निति शब्देन पौर्णमासीकालसंयो-जनात् पौर्णमास्यामेवोपांशुयाजः कार्य इति पौर्णमासी-विधिबलादेवामावास्याव्यावर्तनं कृतमिति[1] चेत् । उच्यते उपांशुयाजमन्तरा यजतीति उत्पत्तिवाक्यं पौर्णमासी-रूप एवान्तरालकाले उपांशुयाजं विदधाति । उपांशुपौ-र्णमास्यां यजन्निति प्रकृत्यजामि वा एतदित्याम्नानादि-ति दशमान्त्याधिकरणे भाष्यटुप्टीकयोरुक्तम् । अत उपां शुयाजस्योत्पत्तिवाक्यावगतपौर्णमासीकालत्वाविशेषान्न कश्चिदधिकारानुप्रवेशे ऽन्तरायः[2] । एवं च यद्यप्यत्र पौर्ण-

---

१ तस्मात्परिसंख्याविधिरितिनोक्ता व्यार्थ्यमितिभावः ।

२ फलसंबन्धीविघ्न इति २ पु० पा० ।

मासीविधिरमावास्याव्यावर्त्तनेन परिसंख्यारूपस्तथापि तदनन्तराम्नातोत्पत्तिवाक्यश्रुतमन्तरालकालं पौर्णमासीरूपतां नयन् उपांशुयाजस्य फलसंबन्धार्थोऽपि भवतीति अपूर्वविधिरूपताप्यस्यावश्यं भाविनी। ततश्चावानुपादेयत्वेनोद्देश्ये पौर्णमासीकाले विधेयस्य यागस्य प्राप्तिरेतदभावे ऽप्युत्पत्तिवाक्यपर्यालोचनयार्थाल्लभ्यतइति तस्याः फलत्वाभावात्तां[1] विहाय विधेयस्य[2] अनुद्देश्याधिकारवाक्योपात्तस्वर्गप्राप्तिफलत्वेनोपाददाने ऽस्मिन्विधौ रूपभेदविवक्षायामप्यव्याप्तिरनिवार्या। न ह्यत्र पौर्णमासीत्वोपहिते[3]उपांशुयाजस्याप्राप्तिरस्ति। अन्तरालविधिसामर्थ्येन तत्प्राप्तिसम्भवान्न वा तदन्येन केन चित् रूपेणोपहिते तत्र तस्याप्राप्तिमुपपाद्य तत्प्रापणार्थमिदं वचनमिति कल्पने किं चित्प्रयोजनमस्ति। पौर्णमासीत्वोपहितएव तद्विधानस्य फलसंबन्धसिद्ध्या प्रयोजनवत्त्वात्। तस्मात् रूपभेदविवक्षायामप्युक्तविधावव्याप्तिः स्यादेव। अपि च द्वे आहवनीये चतस्रो गार्हपत्ये चतस्रो ऽन्वाहार्यपचने दश संपद्यन्ते दशाक्षरा विराट्रूप एवं विद्वान्विराट्संपन्नमग्निहोत्रं जुहोतीत्यत्र द्वे आहवनीये इत्यस्मिन्द्वयोरग्निहोत्राहुत्योर्यदाहवनीये जुहोतीतिसामान्यशास्त्रप्रमिताहवनीयरूपाधारसङ्कीर्त्तने ऽप्यव्याप्तिः। इदं हि नाहवनीयस्याहुतिद्वयसंबन्धप्राप्त्यर्थं सामान्यशास्त्रेणा[4]प्राप्तत्वात्। नापि तदन्यस्य यस्य कस्य चित्संब-

---

१ पौर्णमासीप्राप्तिम्।

२ उपांशुयागस्य।

३ पौर्णमासीत्वावच्छिन्ने तु प्राप्तिर्नास्ति।

४ यदाहवनीयेजुहोतीत्यनेन।

न्धप्राप्त्यर्थमनेन कस्यापि तत्संबन्धप्राप्त्यलाभात् । नापि विराट्संपत्तिवाक्यानुसारेण दशसंख्यानामग्निहोत्राहुतीनां मध्ये द्वे एवाहवनीये न त्वष्टावितरा इति परिसंख्यार्थमष्टानां गार्हपत्यान्वाहार्यपचनरूपाधिकरणान्तरविधानादेवाहवनीयव्यावृत्तिसिद्धेः । किं तु तासामष्टानामाहुतीनामाहुतिद्वयवदग्निहोत्रं जुहुयात्स्वर्गकाम इत्यधिकारवाक्यबोध्यफलसंबन्धप्राप्त्यर्थम् । तथा हि । द्वे आहवनीय इत्येतदभावे चतस्रो गार्हपत्ये चतस्रोऽन्वाहार्यपचन इति वाक्ये संख्याधिकरणविशिष्टकर्मविधायके स्याताम् । न त्वग्निहोत्रं जुहोतीत्युत्पत्तिवाक्यविहितकर्मानुवादेन गुणविधायके प्राप्ते कर्मणि संख्याधिकरणरूपानेकगुणविधाने वाक्यभेदापत्तेः । न च यथा यदग्नये च प्रजापतये च सायं जुहोति यत्सूर्याय च प्रजापतये च प्रातरिति वाक्ययोः कालदेवतारूपानेकगुणश्रवणेऽप्यग्निहोत्रवाक्योत्पन्नहोमानुवादेन गुणमात्रविधानमिति तस्यैकस्यैव होमस्य सायंप्रातःकालयोरग्निप्रजापतिसूर्यप्रजापतिरूपदेवताभेदेन द्विर्द्विरभ्यास इत्यभ्युपगम्यते । एवमिहाप्यनेकगुणश्रवणेऽपि तस्मिन् होमे गुणमात्रविधानमिति तस्यैवाधिकरणभेदेन चतुश्चतुरभ्यासोऽप्यभ्युपगम्यतामिति वाच्यम् । सायं जुहोति प्रातर्जुहोतीतिविधिभ्यां सायंप्रातःकालयोरग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति तत्तत्कालाग्निहोत्रमन्त्राभ्यामग्निसूर्ययोश्च प्राप्तत्वेन यदग्नये यत्सूर्यायेतिवाक्ययोः कालद्वयेऽपि प्रजापतिमात्रविधिसंक्रान्ततया तयोर्गुणमात्रविधानेऽपि वाक्यभे-

दाप्रसङ्गात्। इह संख्याधिकरणयोरियं गयनन्यलभ्यत्वे-न गुणमात्रविधाने वाक्यभेदानिवारणात्। एवं च गार्हपत्यान्वाहार्यपचनवाक्ययोः संख्याधिकरणविशिष्टहोमविध्यवश्यंभावे ऽष्टावपि होमा अग्निहोत्रवाक्यविधेयात्सायंप्रातःकालयोर्देवताभेदेन द्विहिरण्यमनीयाद्धोमादन्य एव सुविहितस्य विधानायोगादिति न तेषामग्निहोत्रमिति नाम सिद्ध्यति किं त्वग्निहोत्रवाक्यविधेयस्यैकस्यैव होमस्य तन्नामेति प्राप्नोति तदुत्पत्तिवाक्यगतत्वात्। अग्निहोत्रवाक्यविहितस्य साभ्यामस्य होमस्य गार्हपत्यान्वाहार्यपचनवाक्यविहितानां होमानामनुवादके विराट्सम्पत्तिवाक्ये तावत्साधारण्येनाग्निहोत्रशब्दप्रयोगसत्त्वे ऽपि तस्य छत्रिन्यायेन लक्षणयोपपत्तेः। अग्निहोत्रवाक्यविहिते कर्मणि प्रथमावगते शक्त्यवश्यम्भावेन तत्सम्बन्धादितरेषु लक्षणोपपत्तावनेकत्र शक्तिकल्पनस्यान्याय्यत्वात्। अत एव रथन्तरं पृष्ठं भवति बृहत्पृष्ठं भवतीत्युत्पत्तिवाक्ययोर्माहेन्द्रस्तोत्रनामत्वेन प्रथमावगतपृष्ठशब्दस्य सप्तदशानि पृष्ठानीत्यनुवादवाक्ये माहेन्द्रादिषु चतुर्षु स्तोत्रेषु प्रयोगो लाक्षणिक इति प्रकृतौ पृष्ठबहुत्वं नास्तीति प्रपञ्चितं सप्तमे विश्वजिति सर्वपृष्ठे तत्पूर्वकत्वात् ज्योतिष्टोमिकानि पृष्ठान्यस्ति च पृष्ठशब्द इत्यधिकरणे एवं चाधिकारवाक्यस्थेनाग्निहोत्रनाम्ना ऽग्निहोत्रवाक्यविहितस्यैव होमस्य ग्रहणात्[1] तस्यैव फलसम्बन्धः स्यान्न तु चतस्र इत्यादिवाक्यविहितानामष्टानां होमानां द्वे आहवनीये इति वाक्यसत्त्वे तु विरा-

---

१ समर्पणादिति २ पु॰ पा॰।

द्सम्पत्तिवाक्यानुसारेण दशधाऽभ्यसनीयस्याग्निहोत्रम-
स्य दशानामभ्यासानां मध्ये द्वे आहवनीये इत्यनेन
परिसंख्यातानामष्टानामपेक्षितमधिकरणमेवं चतस्र इ-
त्यादिवाक्याभ्यां विधीयते । तयोश्चतुःसंख्याश्रवणन्तु
समं स्यादश्रुतत्वादिति न्यायप्राप्तानुवादकमिति लभ्यते
एवम् अग्निहोत्रवाक्यविहितस्यैव होमस्य देवताभेदेना-
धिकरणभेदेन च सायं प्रातश्च दशदशाभ्यासाः न तु
तद्व्यतिरेकेण होमान्तराणि सन्तीति पर्यवसाने ऽधिकार-
वाक्यगतमग्निहोत्रनाम सर्वविधाभ्याससहितस्याग्निहो-
त्रस्य समर्पकमिति सर्वसाधारण्येन फलसम्बन्धः प्राप्नो-
ति । यथा सोमेन यजेतेति वाक्योत्पन्नस्यैन्द्रवाय्वादिदे-
वताभेदेनाभ्यसनीयस्य सोमयागस्य ज्योतिष्टोमपदं ना-
म्नेति सर्वाभ्याससहितस्य सोमयागस्याधिकारवाक्येन[1]
फलसम्बन्धः । न च द्वे आवहनीय इति वाक्याभावे
ऽपि विराट्सम्पत्तिवाक्यमग्निहोत्रहोमस्य दशधाभ्या-
सविधायकमभ्युपगम्यतां तथा सति तत्र त्वदुक्तरीत्या
ऽष्टानामभ्यासानामधिकरणमात्रविधायकयोर्गार्हपत्या-
न्वाहार्यपचनवाक्ययोः संख्याश्रवणं न्यायप्राप्तानुवादकं
भविष्यतीत्यापराग्निकहोमानामग्निहोत्रहोमाभ्यासरू-
पत्वेन फलसम्बन्धः सिद्ध्येदिति वाच्यम् । यदि ह्या-
हवनीयवाक्यं न स्यात्तदा गार्हपत्यान्वाहार्यपचन-
वाक्ययोस्तदधिकरणविधायकत्वे दशानामपि तद-
भ्यासानामधिकरणविधायकत्वापत्त्या चतुःसंख्यानुवादा-
संभवेन तयोः संख्याधिकरणविशिष्टकर्मान्तरविधा-

१ ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यनेन ।

यकत्वस्यावश्यंभावितया विराट्संपत्तिवाक्यमग्निहोत्रा-नग्निहोत्रहोमानां प्रचयशिष्टसंख्यानुवादकमित्यकामे-नापि स्वीकरणीयम्। तस्मादाहवनीयवाक्यप्रवृत्त्यधीन एवापराग्निकहोमानां फलसंबन्धः। एवं चास्मिन्नाहवनीय इति विधौ अविधेयानामापराग्निकहो-माभ्यासानां तदनुद्देश्यस्वर्गसंबन्धप्रापणमेव फलमि-त्ययं विधिरुद्देश्ये विधेयस्य नित्यप्राप्तत्वात्तस्यान्यत्र त-त्रान्यस्य वा प्राप्तस्य नियमस्य निवर्त्यस्य वा भावाच्च केवलं परफलसंबन्धबोधनार्थः। अत्रायं संग्रहः।

द्वे आहवनीय इति श्रुतो विधिरग्निहोत्रमधिकृ-त्य परसंबन्धविधानं विनास्य न स्यात्फलं किंचित्।
प्राप्तं तत्प्रापणीयं किल यदिह क्रियान्पूरणीयोऽस्ति नांशो नानिष्टं वा निवर्त्यं निजविषयतया दृश्यते किंचिदस्य।
किं तु व्यापारमेव प्रथयति फलसंयोजनार्थं परेषां।
प्राप्तः पुण्यैरगण्यैरिव विबुधगणो वेंकटक्षोणिपालम्॥

तस्मादस्मिन्नपि विधावव्याप्तिरनिवार्येति भावः। अ-थान्यत्राप्यव्याप्तिमुदाहरति।

आकाङ्क्ष्यादर्थवादादुपनमति फले कर्मणो यद्विधानम्। त-त्राप्येषा तदङ्गीभवनकृति भवे-त्सन्निधानश्रुतानाम्। यत्कि-ञ्चिद्यच्च क्वचाप्यनधिगतवतो-

त्येव लक्ष्यस्थितिश्चेद्वन्त्यादेषु प्रसिद्धो नियमविधिरपि स्यादपूर्वं विधानम् ॥ ६ ॥

वैश्वदेवीं सांग्रहणीं निर्वपेद्ग्रामकामो वैश्वदेवा वै सजाता विश्वानेव देवान्स्वेन भागधेयेनोपधावति त एवास्मै सजातान् प्रयच्छन्ति ग्राम्येव भवतीति श्रूयते । तत्र सांग्रहणीष्टेर्ग्रामफले यद्विधानं तत्र तस्यास्तत्प्राप्त्यर्थं रात्रिसत्रन्यायेन समनन्तरपठितार्थवादादेव तत्प्राप्तिसंभवात् । आकाङ्क्षा ह्यत्र विधिनार्थवादः स्तुतिलाभाय विशिष्य चाऽत्र ग्रामशब्दोऽयं बह्वर्थ इति महाभाष्योक्तेरनेकार्थस्य फलसमर्पकस्य ग्रामशब्दस्य विवक्षितार्थनिर्णयलाभाय किं तु सांग्रहण्यास्तदर्थवादात् फलकल्पनायामामनमस्यामनमस्य देवा इति तिस्र आहुतीर्जुहोति एतावन्तो वै सजाता ये महान्तो ये क्षुल्लका याः स्त्रियस्तांस्तानेवावरुन्धेत एनमवरुद्धा उपतिष्ठन्तीति तत्सन्निधिपठितानामामनहोमानामपि तदर्थवादात्फलार्थत्वकल्पनाप्रसक्त्या तेषां सांग्रहण्यङ्गत्वं न प्राप्नुयादिति तत्प्राप्त्यर्थम् । एतत्सत्त्वे हि प्रत्यक्षेण विधिना सांग्रहण्याः शीघ्रं फलसंबन्धे ऽवगते फलवत्फलन्यायादामनहोमानां तदङ्गत्वं प्राप्नोति । एवं चात्र विधेयायाः सांग्रहण्याः केनापि रूपेणोद्देश्यग्रामसंबन्धाप्राप्तिर्नास्तीत्यव्याप्त्यव्याप्तिरनिवार्या । ननु लक्षणे प्रकृतविध्युद्देश्यसमप्राप्ते सतीति न विशेष्यते किं तु विधिविषये ऽन्यस्मिन्वः

प्रकृतविध्युद्देश्यमन्यद्वा किञ्चिदप्राप्ते सतीति । तथा च नैतासामव्याप्तीनामवकाश इति चेत् । एवं व्रीहीनवहन्तीत्यादिषु प्रसिद्धो नियमविधिरप्यपूर्वविधिः स्यात् । दार्शपौर्णमासिके प्रयाजादौ सौर्यादिविकृतिमप्राप्ते सति तद्विधिप्रवृत्तेरतस्तथाविवक्षणौचित्यादव्याप्तिः स्यादेवेति भावः । स्यादेतत् । विधिरत्यन्तमप्राप्त इत्यस्य तद्विध्यप्रवृत्तावप्राप्तिः प्रसक्तिमतीतिपर्यवसितो ऽर्थस्तस्य श्लोकस्य व्याख्यानसमये सूचितस्तेन तस्य विधेस्तत्प्राप्तिफलकत्वमर्थाल्लभ्यते । अतो यस्मिन्कस्मिंश्चिद्यत्किञ्चिदप्राप्ते सतीति विवक्षायामपि तस्य तत्प्राप्तिफलक इत्यधिकांशस्य लक्षणे निवेशान्नावहनननियमविधावतिव्याप्तिप्रसङ्गः । तस्य सौर्यादिषु प्रयाजादिप्राप्तिफलकत्वाभावात् । एवं च वैकृताग्न्यतिग्राह्यविधिष्वाविधेयानामपि गुणकामानां तत्तद्विध्युद्देश्यासु विकृतिषु प्राप्तेर्द्वादशाहिकगवामयनिकव्यनीकान्तर्गततदनन्तर्गतविधिषु[1]विधेयानामेवाग्रतानां तत्तद्विध्यनुद्देश्यासु द्वादशाहविकृतिषु प्राप्तेः । "उपांशु पौर्णमास्यां यजन्ति"ति विधौ अविधेयस्योपांशुयाजस्य तद्विध्यनुद्देश्ये स्वर्गे प्राप्तेः द्वे आवहनीय इति विधानविधेयानामापराग्निकहोमानामनुद्देश्ये स्वर्गे प्राप्तेः सांग्रहणीफलविधावविधेयानां तत्सन्निधिपठितानामनुद्देश्य तद्विधेये कर्मणि प्राप्तेश्च फलस्य सद्भावान्न क्वाप्यव्याप्तिशङ्कावकाशो ऽपीत्याशङ्क्याह ।

---

[1] द्वादशाहिकगवामयनिकपदाभ्यां व्यनीकान्तर्गततदनन्तर्गतपदयोर्यथाक्रमं संबन्धः ।

उद्देश्ये ऽन्यत्र वा यद्विधिपदमि-
तरद्वापि न प्राप्तिमत्स्यात् त-
त्प्राप्तिं तत्त्वतन्त्वनिवधिरितिकरणे
ऽप्येवमव्याप्तिरेव। ज्योतिष्टोमा-
दिकानां त्रिदिवगतिफले सर्व-
कामोक्तिसिद्धे किं प्राप्यं धर्म-
जाते प्रकरणगमिते स्वर्गकाम-
श्रुतिभ्याम् ॥ ७ ॥

"ज्योतिष्टोमेन स्वर्गकामो यजेत" "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते"ति श्रूयते। इदं वाक्यद्वयं ज्योतिष्टोमशब्दगृहीतस्य सोमयागस्य दर्शपूर्णमासशब्दगृहीतानामाग्नेयादियागानां च न स्वरूपप्राप्त्यर्थं "सोमेन यजेते"तिवाक्येनाग्नेयादिवाक्यैश्च तेषां प्राप्तत्वादिति तावत्स्पष्टमेव। नापि तेषां स्वर्गफलसंबन्धप्राप्त्यर्थम्। "एकस्मै वा अन्ये यज्ञक्रतवः कामायाह्रियन्ते सर्वेभ्यो ज्योतिष्टोमः"। "एकस्मै वा अन्ये यज्ञक्रतवः कामायाह्रियन्ते सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविति" वचनाभ्यां तेषां पश्वादिफलकत्ववत्स्वर्गफलकत्वस्यापि प्राप्तिसम्भवात्। नापि अङ्गसंबन्धबोधनार्थं प्रकरणकल्प्येन वाक्येन तत्प्राप्तिसम्भवात्। न हि स्वर्गकामवाक्ययोरङ्गसंबन्धबोधकत्वमपि तदुचितशब्दकल्पनां विना सम्भवति। तयोरङ्गसमर्पकशब्दाभावात्। न च दीक्षणीयादिसमि-

दादिवाक्याविशेषितयोस्तयोस्तत्संबन्धबोधकत्वं सम्भवतीति वाच्यम्। दीक्षणीयादिवाक्येष्वपि यच्छब्दोपबन्धरहितत्वतन्त्राख्यातसत्त्वेन स्वतस्तेषामन्यविशेषणत्वालाभात्। तस्मात्स्वर्गकामवाक्ययोरङ्गसंबन्धबोधकत्वाङ्गीकारेऽपि तयोर्दीक्षणीयादिसमिदादिवाक्यानां चाप्रत्यक्षमप्येकवाक्यत्वं प्रकरणबलेनैकवाक्यतापादकशब्दकल्पनयोपपादनीयम्। तथा हि ज्योतिष्टोमेन दर्शपूर्णमासाभ्यां वा स्वर्गापूर्वं भावयेदित्युक्ते भवति प्रकाराकाङ्क्षा कथं तेन ताभ्यां वा तद्भावनीयमिति अनिर्ज्ञातप्रकारत्वात्। न हि गोधूमैर्मण्डकाः कार्या इत्युक्ते तत्प्रकारानभिज्ञस्य नियोज्यस्याकाङ्क्षा न भवति कथं गोधूमैर्मण्डकाः कर्त्तव्या इति कुठारेण वृक्षं छिन्धीत्युक्ते तत्प्रकारानभिज्ञस्य भवत्येव तदाकाङ्क्षा तं प्रतिहस्ताभ्यां कुठारं गृहीत्वा तदुद्यमननिपातनव्यापारावर्त्तनेनेतिवक्तव्यमेव। एतत्प्रकारस्य लोकप्रसिद्धतरत्वात्प्रायेण तत्र न भवत्याकाङ्क्षा। इह तु ज्योतिष्टोमादिभिः स्वर्गापूर्वसम्पादनस्यात्यन्तालौकिकत्वात्प्रकाराकाङ्क्षावश्यम्भाविनी। तथा दीक्षणीयादीनामप्यस्ति प्रयोजनाकाङ्क्षा। तदिह परस्पराकाङ्क्षालक्षणं प्रकरणे सति रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेतेतिवत् दीक्षणीयादिवाक्यानां प्रत्यक्षे ज्योतिष्टोमादिवाक्यैकवाक्यत्वे चासति येन शब्देन दीक्षणीयादिव्यापाराणां ज्योतिष्टोमादिविशेषणतोच्यते तादृक्शब्दकल्पनेनाप्रत्यक्षमेकवाक्यत्वं प्रकरणबलेन कल्पनीयम्। यथा कीदृशं देवदत्तगृहमिति

प्रकाराकाङ्क्षाया द्वारोपान्तलिखितशङ्खपद्मनिधिबहुचम्पकालङ्कृतनिष्कुटं देवदत्तगृहमित्यभिधानतो विशेषणामनुक्त्वा इह देवदत्तगृहं वर्त्तते द्वारोपान्ते लिखिते शङ्खपद्मे स्तः निष्कुटे चम्पकाः सन्तीत्येतावत्युक्तेऽपि गृहस्य प्रकाराकाङ्क्षया प्रकारोपदेशस्य प्रयोजनाकाङ्क्षया च तदुचितशब्दकल्पनया एकवाक्यत्वं कल्प्यत इत्येवमेवोपपादितं तन्त्ररत्ने। तथा च सर्वकामवाक्ययोरङ्गसंबन्धबोधकत्वानङ्गीकारेण प्रकरणबलात्तद्बोधकं वाक्यं कल्पयितुं शक्यम्। तथा हि यद्यपि सर्वकामवाक्ययोराख्यातरहितयोर्योगभावना न श्रूयते तथापि चतुर्थ्या ज्योतिष्टोमस्य दर्शपूर्णमासयोश्च सर्वकामार्थत्वप्रतिपादनात् ज्योतिष्टोमेन दर्शपूर्णमासाभ्यां च स्वर्गपशुपुत्रहिरण्याद्यपूर्वं भावयेदित्यर्थतो लाभात्स्यादेव तत्प्रकाराकाङ्क्षा दीक्षणीयादीनां समिदादीनाञ्च पूर्ववत्प्रयोजनाकाङ्क्षा स्थितैव एवमुभयाकाङ्क्षालक्षणेन प्रकरणेन दीक्षणीयादिभिः समिदादिभिश्चोपकृत्य ज्योतिष्टोमेन दर्शपूर्णमासाभ्यां च स्वर्गपश्वाद्यपूर्वं भावयेदिति वाक्यं किमिति कल्पयितुं न शक्यम्। एवं स्वर्गसंबन्धस्याङ्गसंबन्धस्य चान्यलभ्यत्वेऽपि[1] के चन स्वर्गसंबन्धे सर्वकामवचनलभ्ये स्वर्गकामवाक्ययोरकृतार्थत्वं मन्यमानास्तयो रङ्गसंबन्धबोधनार्थत्वमित्याहुः। अन्ये तु सर्वकामश्रुत्यविरोधेन स्वर्गकामवाक्ययोरेव स्वर्गसंबन्धबोधनार्थत्वं सर्वकामवाक्ययोस्तु सामान्यमुखप्रवृत्तयोः स्वर्गेतरसंबन्धबोधनार्थत्वमित्याहुः। उभयोरप्यन्यतः

१ सर्वेभ्योदर्शेत्यादिना प्रकरणेन च।

प्राप्तिसम्भवात्तद्व्यतिरेकेण च क्वचित्कस्य चित्प्रापणी-
यस्यादर्शनात्स्वर्गकामवाक्ययोरुक्तलक्षणाव्याप्तिः सर्वथै-
वानिवार्येति भावः। अथ प्रकारान्तरेणोदाहृततदि-
तरापूर्वविधिष्वव्याप्तिमुदाहरति।

नाना शाखाग्निहोत्रप्रभृतिवि-
धिषु चाव्याप्तिरेवं सति स्यात्
तत्तद्विध्यप्रवृत्तावपि तदधिग-
तिः स्याद्धि विध्यन्तरेण। सासा
प्राप्तिस्तु नैवाभ्युदयफलवतो-
त्येवमप्राप्तिसत्त्वं कृत्वाव्याप्ते-
र्निरासे नियमपरिसंख्यानुवृत्ते-
र्निवृत्तिः ॥ ८ ॥

अग्निहोत्रादिविधयस्तावन्नानाशाखासु श्रूयन्ते। तेन
तत्तच्छाखाम्नातविध्यभावे नानाशाखासु विप्रकीर्णा-
नामङ्गानामिवाग्निहोत्रादीनामपि शाखान्तरतः प्राप्ति-
स्यादेव। ततश्च तत्तद्विध्यभावे ऽन्यतः प्राप्त्यसम्भवरूप-
स्याप्राप्तविशेषणार्थस्याभावात्सर्वेष्वपि नानाशाखाम्ना-
तापूर्वविधिष्वव्याप्तिरनिवार्या। ननु शाखान्तराधि-
करणे तेषां तत्तच्छाखाध्यायिनं प्रति स्वस्वशाखाध्ययन-
प्राथम्येनाज्ञातज्ञापकत्वं समर्थितम्। सत्यम्। न त्वज्ञा-
तज्ञापकत्वसिद्धिमात्रेणाप्राप्तविशेषणार्थो विवक्षितो

लभ्यते। न चाज्ञातत्वमेवाप्राप्तशब्दार्थः। तथा सति नियमपरिसंख्ययोरपि अर्थाक्षेपमन्त्रलिङ्गाभ्यां प्रागेव प्रवृत्तयोरज्ञातज्ञापकत्वसत्त्वेन तयोरतिव्याप्त्यापत्तेः। नन्वभ्युदयशिरस्कप्राप्तिसम्भवराहित्यमप्राप्त इत्यनेन विवक्षितम्। ततश्च स्वाध्यायो ऽध्येतव्य इति नियमविधिबलादध्ययनगृहीतस्य स्वशाखान्तर्गतवाक्यजन्यतदर्थज्ञानस्यैवाभ्युदयकारित्वेन स्वशाखोन्तर्गतवाक्यसद्भावे शाखान्तर्गतवाक्यजन्यज्ञानस्याभ्युदयकारित्वस्याभावात्तच्छाखाध्यायिपुरुषापेक्षया सर्वेषामग्निहोत्रादिविधीनामज्ञातज्ञापकत्ववदप्राप्तप्राप्तिफलकत्वमपि विवक्षितरूपमस्त्येवेति न नानाशाखाग्निहोत्रादिविधिष्वव्याप्तिर्नापि स्वर्गकामवाक्येष्वव्याप्तिस्तेष्वपि साप्तदश्यवाक्यन्यायेनाभ्युदयफलकप्राप्त्यभावसत्त्वात्। तथा हि सप्तदशसामिधेनीरनुब्रूयादित्यनारभ्य श्रूयते। अत्र विधीयमानस्य साप्तदश्यस्य न सामिधेनीद्वारा प्रकृतौ निवेशः प्राकरणिकतत्पाञ्चदश्यावरुद्धत्वात्। किं तु विकृतिष्वेव। तत्रापि श्रुतसाप्तदश्यासु मित्रविन्दादिष्वेव निवेशो न सर्वासु विकृतिषु। अनारभ्यश्रुतं हि साप्तदश्यं यावत्सामिधेनीद्वारा सकलविकृत्यङ्गं कल्प्यते तावत्प्राकरणिकैर्वाक्यैर्मित्रविन्दादिसंबन्धे कृते क्षीणार्थापत्तिर्न क्रत्वन्तरसंबन्धं कल्पयति। तेनानारभ्याधीतस्य साप्तदश्यस्योपसंहारार्थानि तत्प्रकरणाधीतानि साप्तदश्यवचनानि ततश्च प्राकरणिकवचनैः साप्तदश्यस्य क्रतुसंबन्धसिद्धिरनारभ्याधीतवाक्येन सामिधेनीसंबन्धसिद्धिरिति मीमांसकमर्यादा। अत्रानारभ्य विधानाभावे

ऽपि साप्तदश्यस्य क्रतुसंबन्धवत्सामिधेनीसंबन्धो ऽपि प्राकरणिकवचनैरेव सिद्ध्यतीति अनारभ्यविधानस्य वैयर्थ्यशङ्का प्राप्नोति। अत्रोक्तं तन्त्ररत्ने। यद्यपि प्राकरणिकेनैव क्रतुसंबन्धः सामिधेनीसंबन्धश्च सिद्ध्यति। तथापि वाक्यद्वयाम्नानादेवं विज्ञानमभ्युदयकारीति विज्ञायते अर्थवादप्ररोचितवदिति। ततश्चास्य न्यायस्य सार्वकाम्यवाक्यप्राप्त्यर्थं स्वर्गकामवाक्यसाधारण्यात्तत्राप्यभ्युदयशिरस्कप्राप्त्यभावो वक्तुं शक्यत इति चेत्। तथा सति नियमपरिसंख्याविध्योरत्यन्तमप्राप्त इति विशेषणाभ्यां निवृत्तिर्न स्यात्। तत्रापि स्वाध्यायनियमविधिबलादेवार्थाक्षेपमन्त्रलिङ्गाभ्यामवघातादिप्राप्तेरभ्युदयकारित्वाभावस्य वक्तुं शक्यत्वात्। तस्मादन्यतः प्राप्त्यभावमात्रमिहाप्राप्तिरिति वक्तव्यमित्युदाहृतस्थलेष्वव्याप्तिः सुदृढैवेति भावः॥ ७॥ नन्वस्त्वन्यतः प्राप्त्यभावमात्रमप्राप्तविशेषणार्थः। प्राप्त्यभावस्तु तत्तद्विधिमात्राप्रवृत्ताविति नेष्यते किं तु विध्यन्तराप्रवृत्तिसहितायां केवलायां वा तत्तद्विध्यप्रवृत्तौ यः प्राप्त्यभावः स सर्वो ऽप्यप्राप्तविशेषणार्थ इतीष्यते। ततश्च तत्तच्छाखागताग्निहोत्रादिविध्यप्रवृत्तौ तदन्यसकलशाखागततत्तद्विध्यप्रवृत्तिसहितायां तदप्राप्तिरस्त्येवेति न नानाशाखागताग्निहोत्रादिविधिष्वव्याप्तिः। नापि स्वर्गकामविध्योरव्याप्तिस्तदप्रवृत्तौ सार्वकाम्यविध्यप्रवृत्तिसहितायां ज्योतिष्टोमादीनां स्वर्गसंबन्धाप्राप्तिसत्त्वात्। "वसन्ते वसन्ते ज्योतिषा यजेते"ति "यावज्जीवं दर्शपूर्णमासाभ्यां यजेते"ति विधिभ्यां तेषां प्रत्यवायपरि-

हारार्थत्वावगमेन तत एव फलाकाङ्क्षाशान्तेर्विश्वजिन्न्यायाविषयतया ततः स्वर्गसंबन्धप्राप्तेरनाशङ्कनीयत्वात् । अवश्यं च क्वचित्क्वचिन्नियमविधौ तत्तद्विध्यप्रवृत्तेर्विध्यन्तराप्रवृत्तिसाहित्यन्यायो ऽयमनुसरणीयः । अन्यथा व्रीहिभिर्यजेतेतिनियमविधौ तल्लक्षणस्याव्याप्तिः स्यात् । व्रीहिशास्त्राभावे यवशास्त्रेण यवानामेव नियतप्राप्त्या व्रीहीणां पक्षप्राप्त्यभावात् । एवं यवैर्यजेतेतिनियमविधावपि तदव्याप्तिः स्यात् । तदभावे व्रीहिशास्त्रेण व्रीहीणामेव नियतप्राप्त्या यवानां पक्षप्राप्त्यभावात् । तथा औदुम्बरो यूपो भवतीत्यादिवैकृतद्रव्यविधिष्वपि सर्वे द्रव्यविधयो नियमविधय इति मीमांसकमर्यादया नियमविधित्वेन समर्थनीयेषु तदव्याप्तिः स्यात् । वैकृतविध्यभावे प्राकृतेन खादिरो यूपो भवतीत्यादिशास्त्रेण चोदकतः खादिरादीनामेव नियतप्राप्त्या उदुम्बरतादीनां पक्षप्राप्त्यभावात् । ततश्च व्रीहियवशास्त्रयोर्द्वयोरप्यभावे पुरोडाशप्रकृतिद्रव्याकाङ्क्षया व्रीहियवनीवारादीनां पक्षप्राप्त्या प्राकृतवैकृतविधीनामभावे यूपादिप्रकृतिद्रव्याकाङ्क्षायां धवखदिरपलाशोदुम्बरादीनां पक्षप्राप्त्या च व्रीहियवोदुम्बरादीनां पक्षप्राप्त्या च व्रीहियवोदुम्बरादिशास्त्रेषु नियमविधिलक्षणं समर्थनीयम् । तथा परिसंख्यालक्षणे ऽपि न्यायो ऽयमनुसरणीयः । अन्यथा मित्रविन्दाध्वरकल्पावैमृधचातुर्मास्यपक्षाग्रयणादिनानाकर्मसमाम्नातसाप्तदश्यविधिष्वनारभ्यविहितशास्त्रस्योपसंहारार्थत्वेन तदितरविकृतीनां साप्तदश्यसंबन्धव्यावृत्तिफलकतया परिसंख्यारूपेषु

तल्लक्षणाव्याप्तिः स्यात् । मित्रविन्दागतविध्यभावे ऽध्वरकल्पागतविधेर्मित्रविन्दासाधारण्येनाध्वरकल्पेतरसकलविकृतीनां साम्नाय्यसंबन्धव्यावृत्तिफलकतया मित्रविन्दायामन्यतः साम्नाय्यप्राप्त्यभावात् । एवमुक्तन्यायेनाध्वरकल्पादिष्वपि तत्प्राप्त्यभावात् । तथा गृहमेधीयगतेऽवाज्यभागौ यजति अग्नये स्विष्टकृते समवद्यति इडामुपह्वयते इत्यादिप्रकृताङ्गपुनर्विधिषु चोदकलोपकत्वेन तदितराङ्गानां गृहमेधीयसंबन्धव्यावृत्तिफलकतया परिसंख्यारूपेषु तल्लक्षणाव्याप्तिः स्यात् । आज्यभागविध्यभावे स्विष्टकृद्विधेराज्यभागसाधारण्येन स्विष्टकृदितरसकलचोदकप्राप्याङ्गानां गृहमेधीयसंबन्धव्यावृत्तिफलकतया आज्यभागयोरन्यतो गृहमेधीये प्राप्त्यभावात्[1] । उक्तन्यायेनैव स्विष्टकृदादीनामपि तत्प्राप्त्यभावात् । ततश्च मित्रविन्दादिप्रकरणगतसकलसाम्नाय्यविध्यभावेनारभ्याधीतसाम्नाय्यविधिना प्रकृतितः प्राप्त्यवरोधान्निवृत्तेनाविशेषात्सर्वासु विकृतिषु साम्नाय्यप्राप्त्या गृहमेधीयप्रकरणगतसकलप्राकृताङ्गपुनर्विध्यभावे चोदकात्सर्वेषामाज्यभागादीनां गृहमेधीये प्राप्त्या च तेषु परिसंख्यालक्षणं समर्थनीयम् । तद्वत्सकलशाखागताग्निहोत्रादिविध्याद्यभावे ऽग्निहोत्राद्यप्राप्त्या तेष्वपूर्वविधिलक्षणं समर्थयितुं शक्यमेव । अतो न क्वाप्यव्याप्तिदोष इत्याशङ्क्याह ।

तत्तद्विध्यप्रवृत्तौ सुलभमितर-

---

[1] संबन्धप्राप्त्यभावादिति २ पु॰ पा॰ ।

विध्यप्रवृत्त्या युतायाम् तेषाम-
प्राप्तिमत्त्वं नियमपदयवव्रीहि-
पच्चाप्तितावत्। नानाकर्मोपसं-
हृत्युचितनियतसत्साप्तदप्रया-
प्तिवच्चेत्येवं सृष्टौ तु पृष्ठस्तुति-
नियममुखातिप्रसक्तिः प्रसर्पेत्॥ ८॥

एवमव्याप्तिपरिहारार्थमनियमेनैकानेकविध्यप्रवृत्त्यावप्राप्तेरपूर्वविधिलक्षणानिविष्टत्वकल्पनायामुपहव्यादिविकृतिषु प्रकृतितो विकल्पेन प्राप्तयोर्बृहद्रथन्तरयोरन्यतरनियमार्थं बृहत्पृष्ठं भवति रथन्तरं पृष्ठं भवतीति विधौ विकृत्यतिरात्रे प्रकृतितो विकल्पेन प्राप्तयोः षोडशिग्रहतद्वर्जनयोः षोडशिग्रहनियमार्थं उत्तरेऽहन् द्विरात्रस्य गृह्यत इति विधौ गृहमेधीये प्रकृततः समुच्चित्य प्राप्ताज्यभागतदितराङ्गकलापमध्ये चोदकलोपकतया तदितराङ्गपरिसंख्यारूपे आज्यभागौ यजतीतिविधौ चातिव्याप्तिः स्यात् । बृहद्रथन्तरपृष्ठयोः षोडशिग्रहस्याज्यभागयोश्च प्राकृतवैकृतविध्यभावे सर्वथैवाप्राप्तिमत्त्वात् । व्रीहियवविध्योर्वैकृतद्रव्यविधिषु प्राकरणिकसान्तदध्यविधिषु गृहमेधीयस्विष्टकृदादिविधिषु चानेकविधप्रवृत्त्यपेक्षया पाक्षिकीं नियतां च प्राप्तिं सम्भाव्य नियमपरिसंख्याविधित्वेन समर्थितेषु तत्तद्विधप्रवृत्त्यपेक्षया सर्वथैवाप्राप्तेरपि सत्त्वेन तेष्वप्यतिव्याप्तिः स्यात् ।

न ह्यनेकविधाप्रवृत्त्यपेक्षैवाप्राप्तिरपूर्वविधिलक्षणे निवेश्यत इति नियन्तुं शक्यते तथा सति व्रीहीन्प्रोक्षतीत्याद्यपूर्वविधावप्राप्तेस्तद्विधिमात्राप्रवृत्त्यपेक्षत्वेन तत्राव्याप्तिः स्यादिति तत्परिहारार्थमनियमेनैकानेकविधाप्रवृत्त्योस्तल्लक्षणे निवेशनीयत्वात्। तथा चतुर्जुह्वां गृह्णाति अष्टावुपभृति चतुर्ध्रुवायामिति कार्यविशेषासंयुक्ततयोत्पन्नानां जौहवाज्यादीनां विनियोगविधिषु यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तत् यदुपभृति प्रयाजानुयाजेभ्यस्तत्। सर्वस्मै वा एतत् यज्ञाय गृह्यते[१] यत् ध्रुवायामाज्यमित्येवं रूपेषु मध्ये जौहवौपभृताज्यविनियोगविध्योर्नियमविधित्वेनाभ्युपगतयोर्नियमविधित्वं त्रयाणामेवैतेषां विधीनामप्रवृत्त्यपेक्षया जौहवाज्यादीनां द्रव्याकाङ्क्षेषु प्रयाजादिषु पक्षे प्राप्तिं सम्भाव्य समर्थनीयम्। तत्तद्विध्यप्रवृत्त्यपेक्षया विधेययोर्जौहवौपभृताज्ययोः प्रयाजानुयाजेष्वप्राप्तिरपि सम्भवति। तथा सर्वयज्ञार्थध्रौवाज्यान्वयेन निराकाङ्क्षेभ्यः प्रयाजानुयाजेभ्यः परावृत्त्य तयोरयज्ञरूपेष्वाज्यापेक्षसदनकरणादिकार्येष्वेव प्राप्तेरिति तयोरपि विध्योरतिव्याप्तिः स्यात् एवमनियमेनैकानेकविधाप्रवृत्त्यपेक्षया पाक्षिकनियतप्राप्त्योर्नियमपरिसंख्यालक्षणनिविष्टत्वकल्पनायां तयोरपि लक्षणयोरतिव्याप्तिः स्यात्। तथा हि ध्रौवाज्यविनियोगविधेर्द्रव्यविषयत्वेऽपि नियमविधित्वं न सम्भवति जौहवौपभृताज्ययोः प्रयाजानुयाजार्थत्वे सति परिशेषादेव ध्रौवाज्यस्य तदतिरिक्तद्रव्यापेक्षसर्वयज्ञार्थत्वनियमसिद्धेः। न च स्थाल्या-

---

१ द्रव्याकाङ्क्षितप्रयाजेष्वर्थः।

जारस्यापि तेषु पक्षप्राप्त्या परिशेषासिद्धेर्नियमविधित्वं सम्भवतीति वाच्यम । श्रौद्‌वाद्याजारस्य ग्रहणे विनियोगेन निराकाङ्क्षस्य स्याल्याजारस्य स्वतस्तेषु प्राप्त्यसम्भवात् तस्मात् द्रव्यापिचसर्वयज्ञेष्वयज्ञरूपेषु सदनकरणादिषु च श्रौवाजारस्य समुच्चित्य प्राप्तौ सदनकरणादिव्यावृत्त्यर्थं तस्य परिसंख्याविधित्वमेव युक्तं तत्र चयाणामेतेषां विधीनामप्रवृत्तौ श्रौवाजारस्य तत्तद्विनियोगविधिसंग्राह्येषु याजाभागादिषु च पक्षप्राप्तिः सम्भवतीति तत्र नियमविधिलक्षणस्यातिव्याप्तिः । तथा रथन्तरं पृष्ठं भवतीति वैकृतो विधिर्नियमविधिस्तस्य प्राकृतबृहद्रथन्तरविकल्पविधेराप्रवृत्तौ प्रकृतितो बृहद्रथन्तरयोः समुच्चित्य प्राप्तिः सम्भवतीति तत्र परिसंख्यालक्षणस्यातिव्याप्तिः पृष्ठाः षडहो बृहद्रथन्तरसामा कार्यं इति । गवामयनिके षडहे रथन्तरबृहत्पृष्ठविधिरपूर्वविधिः तदन्तर्गतेषु तृतीयादिष्वहःसु तत्प्रकृतिभूतात् द्वादशाहिकात्नानापृष्ठषडहात् क्रमेण वैरूपवैराजशाक्वररैवतपृष्ठानामेव प्राप्तत्वेन तृतीये रथन्तरं चतुर्थे बृहत् पञ्चमे रथन्तरं षष्ठे बृहदित्यस्यार्थस्य कथंचिदपि प्राप्त्यभावात् । द्वादशाहिकनानापृष्ठविध्यभावे तस्मिन् गवामयनिकषडहे ज्योतिष्टोमात् बृहद्रथन्तरपृष्ठयोरनियता प्राप्तिः सम्भवतीति तत्र नियमविधिलक्षणस्यातिव्याप्तिः । आज्यभागपुनर्विधानेन गृहमेधीयवदपूर्वे ऽवभृथे प्रयाजानुयाजप्राप्त्यभावात् तत्रापबर्हिषः प्रयाजान्यजति अपबर्हिषो ऽनुयाजान्यजतीति बर्हिर्व्यतिरिक्तप्रयाजानुयाजप्राप्त्यर्थो ऽपूर्वविधिः । तत्राज्यभागपुनर्विधानाभावे

बर्हिः संस्कृप्रयाजानुयाजयोस्तद्व्यतिरिक्तप्रयाजानुयाजानां च समुच्चित्य प्राप्तिः सम्भवतीति तत्र परिसंख्यालक्षणस्यातिव्याप्तिः। एवमतिव्याप्त्याविहत्वादनियमेनैकानेकविध्यप्रवृत्त्योरपूर्वविध्यादिलक्षणानुप्रवेशकथनमयुक्तमितिभावः॥ ८॥ स्यादेतत्। वैकृतरथन्तरपृष्ठादिविधिष्वपूर्वविध्यादिलक्षणानुगतेर्नातिव्याप्तिर्नानालक्षणसमावेशानुसारेणानेकविधिरूपत्वाङ्गीकारे दोषाभावात् तावता रथन्तरपृष्ठादिष्वनुष्ठानभेदासाङ्कर्यात् उपधेयसङ्करेऽपि तत्तल्लक्षणोपाधीनामसाङ्कर्याच्च। एकैकस्मिन्वाक्ये विषयभेदेनापूर्वविध्यादिलक्षणानामुपजीव्योपजीवकभावेन तत्फलानां च साङ्कर्यस्य संप्रतिपन्नत्वेन तन्न्यायादेकानेकविध्यप्रवृत्तिभेदेनापि तदुभयसाङ्कर्याभ्युपगमसम्भवाच्च। तथा हि उपांशु पौर्णमास्यां यजन्निति वाक्ये उपांशुयाजाप्राप्तफलसंबन्धप्रापकत्वेन तस्मिन्पौर्णमास्या सह प्राप्तामावास्यासंबन्धव्यावर्त्तकत्वेन चापूर्वविधिपरिसंख्याविधिलक्षणयोः साङ्कर्यं तावदङ्गीकृतं चतुर्थश्लोकव्याख्याने सायं जुहोति प्रातर्जुहोतीति विध्योर्नियमपरिसंख्याविधिलक्षणसाङ्कर्यं दृश्यते तौ खल्वग्निहोत्रं जुहुयात्स्वर्गकाम इति विहितकाम्याग्निहोत्रप्रयोगस्यानियतकालत्वप्राप्तौ सायंप्रातःकालविशेषनियमार्थौ। यावज्जीवमग्निहोत्रं जुहोतीति विहितनित्याग्निहोत्रप्रयोगस्य सातत्येन सार्वकालत्वप्राप्तौ सायंप्रातःकालावच्छिन्नमेव जीवनं निमित्तमिति निमित्तविशेषसमर्पणेनान्यकालव्यावर्त्तकौ च। यद्वा अश्वः श्यावो दक्षिणेति उपहव्यदक्षिणाविधिरिहोदाहरणं स हि गौश्चाश्वस्येत्या-

दिज्यौतिष्टोमिकदक्षिणाविधिनाश्वस्य गवादिभिः समुच्चित्य प्राप्तौ गवादिपरिसंख्यार्थः । तस्यानियतत्वप्रा-प्तौ श्यावनियमार्थश्च । यद्योन्यां तदुत्तरयोर्गायतीति विधावपूर्वनियमविधिलक्षणमाङ्क्यं दृश्यते कथं क्रतौ स्तोत्रसाधनानां साम्नां यथाध्ययनमेकस्यामृचि गान प्राप्तौ एकं साम तृचे क्रियते स्तोत्रीयमितिवचनात् तृचे तानि गातव्यानीति स्थापितमेकर्चस्थानि यज्ञे स्यु.न्न स्वा-ध्यायवत् । तृचे वा लिङ्गदर्शनादिति पूर्वोत्तरपक्षसूत्राभ्यां-दशमाध्याये । ततश्च तेषां स्वयोनिषु गीयमानानां क्रतु-ष्वन्ययोरपि ययोः कयोश्चिदृचोर्गेयत्वे प्राप्ते संशरविले-शपरिहारार्थं योनिसमच्छन्दस्कयोरेव गातव्यमितिनि-र्णीतं तदभ्यासः समासु स्यादिति नावमिकाधिकरणे तत्रेदं वचनं प्रवर्त्तते यद्योन्यां तदुत्तरयोर्गायतीति ।

अत्र योनिग्रन्थपठितयोर्योन्युत्तरयोर्गानं न विधीयते किं तूत्तराग्रन्थपठितयोस्तदुत्तरयोस्तत्रैवोत्तराशब्दस्य पदा-न्तरसन्निधाननिरपेक्षया रूढ्या प्रसिद्धेरिति निर्णीतं नै-मित्तिकं तूत्तरात्वमिति नावमिकाधिकरणे । उत्तराग्र-न्थपठिते चोत्तरे रथन्तरादियोनीनां तद्विषमच्छन्दस्के वामदेव्यादियोनीनां तत्समच्छन्दस्के । एवं च रथन्तरा-दिसाम्नां संशरविलेशपरिहारार्थमुत्तराव्यतिरिक्तयोरेव कयोश्चिद्योनिसमच्छन्दस्कयोरृचोर्गानप्राप्तावप्राप्तो-त्तराप्रापणार्थम् उत्तराविधिः । वामदेव्यादिसाम्नामुत्तर-योरन्ययोर्वा कयोश्चिद्योनिसमच्छन्दस्कयोर्गानप्राप्तावु-त्तरानियमार्थं इति । कौ पुनः संशरविलेशदोषौ । सं-शरः साम्नो हिंसा विलेशस्तस्य ऋगपेक्षयाल्पत्वं यद्य-

धिकच्छन्दस्कायामृच्युत्पन्नं साम न्यूनच्छन्दस्कायामृचि गीयेत तदा केन चिदेव सामभागेन ऋक्पूर्त्तेरवशिष्ट-सामभाग आश्रयाभावाद्विंस्येत। यदि न्यूनच्छन्दस्काया-मुत्पन्नमधिकच्छन्दस्कायां गीयेत तदाल्पं साम ऋक्परि-पूर्णाक्षमं स्यात्। तथा स्वयमातृण्णामुपदधातीत्यादिविधौ त्रि-विधविधिलक्षणानां सङ्करो दृश्यते। कथं स्वयमातृण्णादिश-ब्देन सृष्टिशब्दादिमन्त्रोपधेया इष्टका उच्यन्ते तद्वानासा-मुपधानो मन्त्र इतीष्टकासु लुक् च मतोरिति पाणिनि-स्मरणात्। अत्र न तावदुपधानं विधीयते इष्टकाभिरग्निं चिनुत इत्यनेनैवार्थप्राप्तत्वात्। इष्टकानामनुपधाने च-यनानिर्वृत्तेः। ननु तथापीष्टकाङ्गत्वेन तद्विधाने समु-दितानामपीष्टकानां कदाचिदुपधानं प्राप्नुयात्तन्माभू-त्प्रत्येकमेवोपधानमस्त्वित्येतदर्थमिष्टकाङ्गत्वेन तद्विधानं स्यात्। तथा सति हि प्रतिप्रधानमङ्गावृत्तिन्यायात्प्रत्ये-कमुपधानं सिध्यतीति। नैतद्युक्तम्। एकेनोपधानविधि-नास्य प्रयोजनस्य लाभेन स्वयमातृण्णामुपदधाति प्राणभृत उप-दधाति चित्रिणीरुपदधातीति वाक्येष्वसकृदुपधानवि-धानवैयर्थ्यापत्तेः। न च तेष्वेकत्रोपधानविधिरन्यत्र नेति शक्यं वक्तुं विनिगमनाविरहात्। नापि सर्वेषु तेषु तत्तदिष्टकाविशेषविधिः। इष्टकाभिरग्निं चिनुत इति वि-धिनैव सर्वासामिष्टकानां प्राप्तत्वात्। ननु तथापि मध्य-मचिति लाभार्थं विशिष्य कासां चिद्विधानं स्यादसत्सु हि तेष्वविधिषु स्वयमातृण्णादिशब्दोदितानां मध्यमचिति प्रकर-णाम्नातानामिष्टकानां मध्यमचितावुपधानं न लभ्य-ते सत्सु तु तेषु विधिषु लभ्यते मध्यमायां तु वचनाद्वा-

ह्मणवत्य इति पञ्चमाध्यायसूत्रेण यां वै कां चन ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चितावुपदध्यादितिवचनबलेन प्रत्यक्षज्ञानवाच्यभिपूर्वजानातिवशात्प्रत्यक्षब्राह्मणविहितानामिष्टकानां मध्यमचितावेवोपधानं न त्वन्ते तु बादरायण इति न्यायाच्चित्यन्तर इतिनिर्णीतत्वादिति चेत्। नैतदपि युक्तम्। कासामिष्टकानां सृष्टिमन्त्रादिभिरुपधानमिति प्रागनवगततया सृष्ट्यादिशब्दोक्तानां सृष्टिशब्दादिवन्मन्त्रोपधेयाष्टकाविशेषाणां बुद्ध्यनारोहेण विधातुमशक्यत्वात्। तस्मात्तन्मन्त्रविशेषा एवेष्टकोपधाने विधीयन्त इति युक्तम् तेषां च विधिर्नोपधानप्राप्त्यर्थः प्रकरणादेव प्राप्तिसम्भवात्। नापि लिङ्गविनियोज्यमन्त्रान्तरपरिसंख्यार्थः। मन्त्रान्तराम्नानवैयर्थ्यापत्तेः। किं त्वेकया स्तुवते प्रजा अधीयन्त प्रजापतिरधिपतिरासीत्तिसृभिरस्तुवत ब्रह्म असृज्यत ब्रह्मणस्पतिरधिपतिरासीदित्यादीनामुपधानैकान्तिकलिङ्गविशेषरहितानां मन्त्राणामिष्टकाग्रहणादिष्वपि विनियोगप्रसक्तौ तत्परिसंख्यार्थः। प्रत्येकोपधाननियमार्थश्च। समुदितोपधाने तत्तदिष्टकोपधानस्य क्रमोच्चार्यव्यवस्थिततत्तन्मन्त्रकरणकत्वायोगात्। मध्यमचिति प्राप्त्यर्थश्च। मन्त्रव्यतिरेकेणेष्टकासु विशेषान्तरानिरूपणेन मन्त्रविनाकृतेष्टकानियमविधेरशक्यतया यां वै कां चनेतिविधेरपीष्टकाविशेषणमन्त्रविध्यवलम्बनत्वात् एवं तावदपूर्वविध्यादिलक्षणानामाश्रयभेदेन सङ्करो दर्शितः। तथैव तत्फलानामपि प्रथमचरमभावेन सङ्करो दृश्यते किं तु केषु चित्किञ्चित्फलमनन्यल-

ष्यत्वे ऽप्यनुनिष्पादित्वादन्येष्वननुनिष्पादित्वे ऽप्यन्यलभ्यत्वादपरेष्वनन्यलभ्यत्वेऽप्यननुनिष्पादित्वे ऽप्यनुष्ठानविशेषालाभात् फलत्वेन न व्यपदिश्यते । तत्रानुनिष्पादिसङ्करो यथा । "अथातो ऽग्निष्टोमेनानुयजती"ति विधितः प्रकृत्यग्निष्टोमे ऽग्निप्राप्तिस्तदनुनिष्पादिनी तस्मिन्नग्न्याश्रितगुणकामानां प्राप्तिः । यद्यग्नेः सौमिकाङ्गकलापसंवलितप्रयोगस्य सोमप्रयोगाद्बहिः सम्पादयितुमशक्यत्वेन तत्प्रयोगमध्यपातित्वावश्यम्भावाग्निष्फलस्याग्नेः फलवत्सोमाङ्गत्वमनुष्ठानसादेश्यरूपेण स्थानप्रमाणेन सिध्यति तथा ऽपि तेनानारभ्याधीतस्य प्राकरणीकोत्तरवेद्यवरुद्धप्रकृतिव्याहतस्य विकृत्यङ्गत्वमेव सिध्यति । अतः प्रकृतावप्राप्तस्याग्नेः प्रथमश्लोकव्याख्यानदर्शितरीत्यानेनैव वाक्येन प्राप्तिः । तत्प्राप्त्या च तदाश्रितानां[1] श्येनाकृत्यादि । फलार्थगुणानां[2] प्रकृतिमध्ये ऽनुष्ठानप्राप्तिः । ततो बहिरनुष्ठातुमशक्यत्वात् । आग्रयणे "द्यावापृथिव्य एककपाल" इति विधित एककपालयागस्यप्राप्तिः । तदनुनिष्पादी प्रसूनबर्हिर्नियमः । प्रसूनं पुष्पितम् । लूनशेषान्मूलात्पुनरुत्पन्नं वा । एककपालविध्यभावे त्वाग्रयणे प्रसूनमप्रसूनं वा बर्हिरनियतमैन्द्राग्नादियागानुसारेण प्राप्नोति ऐन्द्राग्नादिषु प्रसूननियमाश्रवणात् । एककपालविधिसत्त्वे तु तस्य वैश्वदेविकैककपालप्रकृतिकत्वात् । ततो ऽतिदेशेन प्रसूननियमः प्राप्नोति । यद्यप्येककपालो जघन्यत्वेनैकत्वेन चैन्द्राग्ना-

---

१ तदाश्रितगुणकामानामि॰ २ पु॰ पा।

२ अ॰ २ पु॰ पा॰।

दपेक्षया दुर्बलस्तथापि प्रसूनबर्हिर्ग्रहणे ऽप्यनियतबर्हिषा-मैन्द्राग्नादीनां विरोधाभावात्कांस्यभोजिन्यायेनैककपा-लानुवर्त्तनमुपपद्यत एव । यत्र शिष्यस्य कांस्यभोजननि-यमो ऽस्ति गुरोर्नास्ति तत्र तयोरेकपात्रभोजने क्वचित्प्र-सक्ते गुणभूतमपि शिष्यमनुसृत्य गुरुणापि हि कांस्यभो-जनमेवाद्रियते। "अतिहायेडो बर्हिः प्रतिसमानयति जुह्वा-मौपभृतमि"ति बर्हिःप्रयाजोपक्रमे जुह्वां प्रयाजार्थौपभृ-ताज्यसमानयनप्राप्तिः तदनुनिष्पादिनी । नौहवाज्य-मादिप्रयाजत्रयार्थमौपभृताज्यमुपरितनप्रयाजद्वितयार्थ-मिति परिसंख्या । यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तदुपभृ-ति प्रयाजानुयाजेभ्यस्तदितिविधिभ्यां हि तयोरविशेषेण सर्वप्रयाजार्थत्वं प्राप्तम् । प्रथमप्रयाजोपक्रम एव प्रया-जार्थस्यौपभृताज्यस्य जुह्वां समानयनमपि प्राप्तं तस्य तस्मात्कालादाच्छिद्य बर्हिः प्रयाजोपक्रमकाले विधा-नादाज्यद्वयमपि प्रयाजविशेषविषयतया व्यवतिष्ठ-ते । एवं चात्र प्राप्तपरिसंख्याने ऽपि न त्रैदोष्य-मन्यानुष्पादित्वेन शब्दव्यापाराविषयत्वात् । "ऋत्वि-ग्भ्यो दक्षिणां ददाति अग्नीधे ददाति ब्रह्मणे ददा-ती"त्यादिविध्यधीनऋत्विगानमनार्थदक्षिणादाननिय-मानुनिष्पादिनी ऋत्विजां कर्मसु कर्तृत्वप्राप्तिः । स्व-र्गकामो यजेतेति सामानाधिकरण्यादात्मनेपदेन कर्त्तु-रेव फलावगमाच्च फलार्थिनो यजमानस्यैव साङ्गे ज्यो-तिष्टोमादिकर्मणि साक्षात्कर्तृत्वे प्राप्ते तत्राप्राप्तमृ-त्विजां कर्तृत्वं दक्षिणादाननियमेन प्राप्यते । दक्षि-णादानविधिर्हि ऋत्विगानमनरूपदृष्टार्थत्वे सम्भवति-

नादृष्टार्थः कल्पयितुं युक्त इति दक्षिणादानेनैवर्त्विज आनयितव्या न तु सामाद्युपायान्तरेणेति नियमविधिः सम्पद्यते। ततश्च तेषां दक्षिणया परिक्रीतानां क्वचिद्विनियोगापेक्षायां वस्तुसामर्थ्यरूपाल्लिङ्गाद्भवस्थाग दक्षिणादानादेर्द्रव्योत्सर्गादन्यत्र कर्मणि कर्तृत्वेन विनियोगः तत्प्रयोजकत्वेन प्रधानशाक्यावगतं यजमानस्य तत्र कर्तृत्वमिति संपद्यते। राजन्यवासिष्ठादीनां नाराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषामिति विधयधीननाराशंसादिनियमानुनिष्पादितुल्यकल्पानामेव सत्रे ऽधिकार इति नियमः। नाराशंसतनूनपान्मन्त्रयोर्द्वितीयप्रयाजस्थानपठितयोरव्यवस्थितविकल्पे प्राप्ते पुरुषभेदेन व्यवस्थार्थौ राजन्यवासिष्ठादीनामिति विधिस्तावन्नियमविधिस्ततश्च सर्वे ऽपि नाराशंसकल्पा इति वा सर्वे ऽपि तनूनपात्कल्पा इति वा तुल्यकल्पा एव सर्वे सत्रे ऽधिकुर्वन्ति न भिन्नकल्पा अपीति नियमो लभ्यते। भिन्नकल्पानां सत्रे संभूय प्रवृत्तौ तदन्तर्गतप्रयाजेष्वन्यतरकल्पस्यैवाश्रयणीयतया केषां चित्क्रतुवैगुण्यप्रसङ्गात्। दज्जुह्वा गृह्णाति प्रयाजेभ्यस्तदिति विधयधीनप्रयाजनियमानुनिष्पादिनी तत्समुच्चयप्राप्तकार्यान्तरपरिसंख्या। अत्र हि यथा द्रव्यापेक्षाणां प्रयाजानां पाक्षिकानेकद्रव्यप्राप्तौ जौहवाज्येनैव प्रयाजाः कर्त्तव्या इत्युपाय नियमोऽस्ति तथा कार्याकाङ्क्षस्य जौहवाज्यस्य पाक्षिकानेककार्यप्राप्तौ जौहवाज्येन प्रयाजा एव कर्त्तव्या इति कार्यनियमो ऽप्यस्ति प्रत्यक्षश्रुत्या जौहवाज्यस्य प्रयाजानां च परस्परान्वये कृते प्रयाजानां द्रव्याकाङ्क्षाया जौहवस्य का-

र्थाकाङ्क्षायाश्च शान्त्या लिङ्गात्प्रयाजानामनियतद्रव्याक-
ल्पनस्येव जौहवाज्यस्यानियतकार्यकल्पनस्याप्यप्रवृत्ते-
स्तेन च कार्यनियमेन परिसंख्यापि लभ्यते । प्रयाजानु-
याजाज्यभागोपांशुयाजपार्वणहोमनारिष्टहोमानां द्रव्या-
काङ्क्षाणामुपस्तरणाभिघारणकपालाञ्जनसदनकरणा-
लङ्करणानां चाज्याकाङ्क्षाणां कार्याकाङ्क्षेषु जौहवाज्या-
दिषु त्रिष्वेव प्रवर्त्तमानानां मध्ये प्रयाजेषु जौहवाज्यं
प्राप्नुवत्सु अन्येषामपि केषां चित्तैः समुच्चित्य प्राप्तेरव-
श्यं भावात् । ननु एवं सति कार्यांशे यदि संख्येव स्यात्
उच्यते । समुच्चयः कार्यविशेषनियतो न भवति न हि
जौहवाज्ये एतेषां कार्याणां समुच्चितानां प्राप्तिः औ-
पभृताज्ये एतेषामिति कार्यविशेषनियते समुच्चये किं
चिन्नियामकमस्ति । अतो यान्येव कानि चित्कार्याणि
जौहवाज्ये समुच्चित्य प्राप्नुवन्ति तान्येव ततोऽन्येषां केषां
चित् कार्याणां तत्र समुच्चित्य प्राप्तौ न प्राप्नुवन्तीति ।
कस्यापि कार्यस्य प्रयाजाज्ये नियतप्राप्त्यभावात्तत्र प्रया-
जानामप्राप्तांशपूरणं तावदवश्यं कर्त्तव्यम । तस्मिन्कृते नै-
राकाङ्क्ष्येण लैङ्गिककल्पनाप्रतिबन्धाद्भवन्ती पक्षे प्रया-
जैः सह समुच्चित्य प्राप्तिमतामन्येषां कार्याणां निवृ-
त्तिः नखविदलनादिनिवृत्तिवत्तदनुनिष्पादिनीत्यवहितेन
मनसालोचनीयम् । आतिथ्यायां चतुर्गृहीतान्याज्यानि
भवन्तीति विध्यधीना तत्र प्रकृतिप्राप्तौपभृतचतुर्गृही-
तान्तरपरिसंख्यातदनुनिष्पादिनी प्रकृतौ बर्हिः प्रया-
जोपक्रमे प्रयाजार्थमौपभृताज्यादर्धं समानेतव्यमित्य-
स्यार्थस्य प्राप्तिः । तस्य विधेरभावे हि यदुपभृति प्रया-

जानुयाजेभ्यस्तदिति विधिवशादौपभृताज्यं सर्वमपि प्रयाजानुयाजसाधारणं स्यादिति समं स्यादश्रुतत्वादिति न्यायेनौपभृते ऽनुयाजत्रयार्थमर्द्धाधिकमवशेषणीयमिति प्रयाजाद्वयार्थमर्थोन्यूनमेव समानेतव्यं प्राप्नुयात्। ननूभृत्यष्टगृहीतमेकहविर्न भवति किं तु चतुर्गृहीतं हविर्द्वयं तच्चतुर्गृहीतं जुहोतीति विधिना चतुर्ग्रहणसंस्कृतस्याङ्गत्वावगमादिति निर्णीतं चतुर्थे तथा च यदुपभृतीतिविधिः प्रयाजार्थमेकं चतुर्गृहीतमनुयाजार्थमपर मित्यस्मिन्नर्थे पर्यवस्येदतः समानयनविधिनार्धमेव समानेतव्यमिति प्राप्नुयादिति चेत्। मैवम्। तथा व्यवस्थापकविध्यन्तराभावे यदुपभृतीत्यविशेषविधानेन चतुर्गृहीतद्वयस्यापि प्रयाजानुयाजार्थत्वप्राप्तेरनिवार्यत्वात्। न चैकस्मिन् यागे हविर्द्वयं नान्वेतीति शङ्क्यम्। वचनबलादेकैकस्य चतुर्गृहीतस्य हविषो ऽनेकप्रयाजार्थत्ववदनेकानुयाजार्थत्ववच्चतुर्गृहीतद्वयरूपस्य हविर्द्वयस्यैकैकयागार्थत्वस्याप्युपपत्तेः। पशुयागएकस्मिन् हृदयजिह्वाद्येकादशहविरन्वयदर्शनाच्च। चतुर्गृहीतान्याज्यानि भवन्तीत्यनुयाजरहितायामातिथ्यायां विधेः सत्त्वे तु तेन चतुर्गृहीतान्तरपरिसंख्याबलात्तदुपभृति प्रयाजार्थमेकं चतुर्गृहीतमनुयाजार्थमपरमिति व्यवस्थावगत्यार्धमेव समानेतव्यमिति सिध्यति। ननु चतुर्गृहीतवचनमातिथ्यायां प्रयाजार्थमेव चोदकाच्चतुर्गृहीतद्वयप्राप्तौ तत्रैकमेव चतुर्गृहीतं हविरिति प्रयाजार्थं हविषि वैकृतविशेषवचनतयाप्युपपन्नं नोक्तव्यवस्थां गमयेदिति चेत्। सत्यमुभयथाप्युपपन्नस्य तस्य न ध्रुवानुयाजा इज्यन्त

इतिवाक्यशेषवशात् व्यवस्था भविष्यति । अनेन हि वाक्यशेषेणोपभृति द्वितीयचतुर्गृहीताभावे ऽनुयाजानामभावो हेतूकृतः । ततश्च तत्रैव हेतौ साध्यभूतायामातिथ्यायामुपभृति द्वितीयचतुर्गृहीतस्य परिसंख्यामुपनयन् विधिस्तस्य केवलानुयाजार्थत्वं प्रथमचतुर्गृहीतस्य केवलं प्रयाजार्थत्वं च व्यवस्थापयति । अतस्तदनुनिष्पादिन्यङ्गसमानयनप्राप्तिर्भवति । एवं "त्रीणि ह वै यज्ञस्योदराणि गायत्रीबृहत्यनुष्टुबत्र ह्येवावपन्त्यत एवोद्वपन्ती"त्यत्र परिसंख्यानुनिष्पादी नियमः । कथं सति विवृद्धस्तोमकाः क्रतवः एकविंशेनातिरात्रेण प्रजाकामं याजयेदित्यादिभिर्विहिताः तेषु क्रतुषु बहिष्पवमानादिषु सर्वेष्वपि स्तोत्रेषु एकविंशादिस्तोमविवृद्धिसिद्ध्यर्थं प्राकृतेभ्यो ऽधिकावापे प्राप्ते ऽत्र ह्येवावपन्तीत्युदाहृतवाक्येन पवमानगायत्र्यादिभ्यो ऽन्यत्रावापः परिसंख्यायते । तेनावापस्य पवमानातिरिक्तेभ्यः स्तोत्रेभ्यो ऽनिवर्त्तितत्वात्तद्व्यतिरिक्तेष्वाज्यपृष्ठादिस्तोत्रेष्वगत्याभ्यासेनैव संख्यापूरणं कार्यमिति सिध्यति । अनया चावापसामान्यस्य स्तोत्रान्तरेभ्यः परिसंख्यया येषु विवृद्धस्तोमकेषु क्रतुषु प्रत्यक्षश्रुतिविहितान्यपि कानि चित्सामानि सन्ति तेषामपि स्तोमविवृद्धये सर्वस्तोत्रेषु सामान्तरावापे कर्त्तव्ये प्रत्यक्षश्रुतिविहितानां साम्नामनियमेन यत्र क्वचित्स्तोत्रे प्राप्तावापः पवमानविषयो व्यवतिष्ठते । तथा ऽविवृद्धस्तोमकेषु क्रतुषु प्रत्यक्षश्रुतिविहितानां साम्नां स्तोमाधिक्यपरिहाराय प्राकृतसामोद्वापेन तत्स्थानेष्वावप्तव्यानामनियमेन यत्र क्वचित्स्तोत्रे प्राप्तः आवा-

पस्तद्विषयो व्यवतिष्ठत इत्येवमत्र परिसंख्यानुनिष्पादी नियमः "हृदयस्याग्रे ऽवद्यत्यथ जिह्वाया अथ वक्षस" इत्यादिविधिषु परिसंख्यानुनिष्पादिनी परिसंख्या । तथा हि पशुनां यजेतेति श्रुतं पशोर्यागसाधनत्वं विशसनादिवाक्यबलादवयवद्वारेणेति तावद् व्यवतिष्ठते । यथा सोमेन यजेतेति श्रुतं सोमस्य यागसाधनत्वमभिषवादिवाक्यबलाद्रसद्वारेणेति व्यवतिष्ठते । ततश्च पश्ववयवानां सर्वेषामविशेषाद्धविष्ट्वेनावदानप्राप्तौ हृदयादिभ्यो ऽन्येषामवयवानामवदानपरिसंख्यार्थानि हृदयस्याग्रे वद्यतीत्यादीनि । तया चावदानपरिसंख्ययावयवान्तराणां हविष्टपरिसंख्यापि लभ्यते । एवं यदुपभृतीति सामान्यविधिना चतुर्गृहीतद्वयस्याप्यविशेषेण प्रयाजानुयाजार्थत्वप्राप्तावातिथ्यायामुपभृति चतुर्गृहीतान्तरपरिसंख्यार्थवादसमर्पितानुयाजाभावहेतुसमभिव्याहृतया लभ्या प्रथमं चतुर्गृहीतं प्रयाजार्थं द्वितीयमनुयाजार्थमिति व्यवस्थापि परिसंख्यानुनिष्पादिनी परिसंख्यैव । तत्र तदनुनिष्पादिनी समानेतव्यस्यार्थत्वप्राप्तिरप्यस्तीति सैव प्रागुदाहृता । एवमनुनिष्पादिफलस्याप्यनुनिष्पादिफलान्तरमन्यत्राप्यूहनीयम् । इत्थमनुनिष्पादिफलसङ्करो दर्शितः । अन्यलभ्यफलसङ्करो यथा । सांग्रहण्यां रात्रिसत्रन्यायलभ्यफलप्राप्तिमूला तत्सन्निधिसमाम्नातानामामनहोमानां तदङ्गत्वप्राप्तिरन्यथा तेषामपि रात्रिसत्रन्यायेनैवार्थवादिकफलकल्पनया नैराकाङ्क्ष्येण तदङ्गत्वं न सिद्ध्येत् । "उरु प्रथस्वेति पुरोडाशं प्रथयती"त्यत्रान्यलभ्यप्रथनप्राप्तिमूलस्तस्याध्वर्युकर्तृक-

त्वनियमः । अप्रथितं हि पिष्टं स्वयमेव पुरोडाशाकृतिशालितया न प्रथते। अतः पुरोडाशान्यथानुपपत्तिलभ्यमेव प्रथनं । तत्राध्वर्युकर्तृकत्वनियमः परं न लभ्यः । तस्मादाध्वर्यवसमाख्यालम्भनेन प्रथने कर्तृनियमसिद्ध्यर्थोऽपि प्रथनविधिः । वाग्वा एषा यदैन्द्रवायवाग्रा ग्रहा गृह्यन्ते वाचमेवानुप्रयन्तीत्यत्रान्यतलभ्यप्राप्तिपूर्विका परिसंख्या । अत्र ग्रहाणामैन्द्रवायवाग्रता न विधीयते। सा हि विधीयमाना धाराग्रहाणामेव विधीयेत न त्वधाराग्रहयोरुपांश्वन्तर्यामयोरपि । "अदाभ्या धारया गृह्णाती"त्येतत्सन्निधौ श्रवणेन धाराग्रहाणामेव गृह्णाति नोपादानात् । तेषां च पाठत एव प्राप्ता ऐन्द्रवायवाग्रता । किं त्वत्र पाठप्राप्ताग्रतानुवादेनैन्द्रवायवादयो ग्रहा एव विधीयन्ते । यद्यपि ते ऽथैन्द्रवायवं गृह्णाति मैत्रावरुणं गृह्णातीत्यादिक्रमेण पठितैः प्रातिस्विकविधिभिर्लभ्यास्तथापि तेषामिह पुनर्विधानं परिसंख्यार्थं । कथमेतत्सन्निधौ शुक्राग्रान् गृह्णीत प्रतिष्ठाकामः मन्थ्यग्रानभिचरन्नित्यादिवाक्यैर्ग्रहानाश्रित्य शुक्राग्रतादयो गुणाः कामाय विधीयन्ते । तेषां गुणानां धारग्रहवदधाराग्रहावप्याश्रयत्वेन प्राप्नुत इति तत्तत्कामनायां शुक्रादय उपांश्वन्तर्यामाभ्यामपि प्रागपकृष्टव्याः स्युः । अस्मिन्विधाने सति तु कामाय विधीयमाना गुणा अनेन विधिना प्राकृतानैन्द्रवायवादिग्रहानेवाश्रित्य विधीयेरन्निति तयोराश्रयत्वव्यावृत्त्या शुक्रादयः कामनायामैन्द्रवायवादेव प्रागपकृष्टव्या इति लभ्यते। तदेतत्सर्वं दशमे ऐन्द्रवायवस्याग्रवचनादादितः प्रतिकर्षः स्यादिति पे-

टिकायां निरूपितम् । ननु नैतदुदाहरणं युक्तं । गृहाणां क्रत्वर्थत्वस्यान्यतः प्राप्त्यसम्भवात् । न चैन्द्रवायवमैत्राव-रुणादिग्रहविधीनां ज्योतिष्टोमप्रकरणाम्नातत्वात्प्रकर-णेनैव तेषां तदर्थत्वप्राप्तिः "ऐन्द्रवायवाग्रान् गृह्णीयाद्यः कामयेत यथा पूर्वं प्रजाः कल्पेरन्नि"तिवाक्येन प्रकरणं बाधित्वा तेषां पुरुषार्थत्वस्यैव प्रापणात् । न च शुक्रा-ग्रादिवाक्येष्विवाग्रताया एव फले विधानमिति शक्यम् । शुक्राग्रतादीनां पाठतो ऽप्राप्तत्वादनुवादासम्भवेन वि-धेयत्वे ऽप्यत्र पाठप्राप्तैन्द्रवायवाग्रतानुवादेन धात्वर्थभू-तानां ग्रहणामेव फले विधानात् श्रुत्यर्थविधानसम्भवे वाक्यार्थविधानाङ्गीकारस्यायुक्तत्वात् । कामसंयोगे तु व-चनादादितः प्रतिकर्षः स्यादिति दाशमिकाधिकरणे तथैव निर्णीतत्वाच्च । तथा चेतद्विषयभावे प्रातिस्विक-विधिभिरुत्पन्नानामैन्द्रवायवादिग्रहाणां प्राकरणिकं क्र-त्वर्थत्वं बाधित्वा कामसंयुक्तं वाक्यं पुरुषार्थत्वमेव प्राप-येदित्यप्राप्तक्रत्वर्थत्वप्रापणार्थो ऽयं वाग्वा एषेत्यादि-विधिस्तथा च वाक्यद्वयबलादैन्द्रवायवादीनां खादिरा-दिवदुभयार्थता भवति । एवं चानेनविधिना ग्रहाणां बाधकबाधनेन क्रत्वर्थत्वे प्राप्यमाणे कामसंयुक्तवच-नोपक्रमे समाम्नानबलात्तदाश्रयान्तरपरिसंख्याप्यनुनि-ष्पद्यतइत्यनुनिष्पादिपक्षर एवैतदुदाहरणं युक्तं न त्वन्यलभ्यमङ्कुरे । तत्रापि वा नोदाहरणम् । ऐन्द्र-वायवाग्रानधिकारादेवाश्रयान्तरपरिसंख्यालाभादिति चे-त् । एवं तर्हि माभूत्तद्विषोदाहरणम् । कपालेषु श्रपयतीत्येतदुदाहरिष्यामः । अत्र न तावत्कपालवि-

धियैंदाग्नेयो ऽष्टाकपाल इत्याद्युत्पत्तिवाक्यत एव तत्प्राप्तेः अष्टसु कपालेषु संस्कृतो ह्यष्टाकपालशब्दार्थः । उक्ततद्धितार्थविवक्षया कपालशब्दस्याष्टशब्देन तद्धितार्थोत्तरपदसमाहारे चेति समासे कृते ऽष्टाकपालप्रातिपदिकात्संस्कृतमित्यर्थे विहितस्याणप्रत्ययस्य द्विगोर्लुगनपत्यइति लुक्स्मरणात् । नापि अपणविधिः । अपश्यन् पुरोडाशं कूर्मभूतं सर्पन्तमित्यादिवाक्यशेषेण कपालेषु संस्कार्यस्य पुरोडाशत्वावगत्या ऽपूपविशेषरूपस्य पुरोडाशस्य अपणं विना निष्पत्त्यसम्भवेन स्वरूपेण अपणस्यार्थसिद्धत्वात् । नापि अपणस्य क्रत्वङ्गप्राप्त्यर्थो विधिः प्रयोजनाभावात् । न च पुरोडाशविकारेषु चरुकरम्भादिषु अपणस्यातिदेशेन प्राप्तिः प्रयोजनम् । तेषामपि अपणं विना निष्पत्त्यसंभवेनार्थतस्तल्लाभसंभवात् । ननु अपणस्य प्रयोगमध्ये ऽनुष्ठानलाभार्थो विधिः स्यात् । विधाने हि सति प्रकरणगृहीतत्वेनाङ्गस्य सतस्तस्य प्रयोगमध्ये ऽनुष्ठानं लभ्यते । अन्यथा ह्याज्यवत्पुरोडाशोऽपि बहिःअपणसिद्ध एव गृह्येत । न च कपालेषु संस्कारविधानादन्तः अपणसिद्धिः बहिःअपणसिद्धस्यैव पुरोडाशस्याजस्य गार्हपत्याहवनीययोरिव कपालेष्वधिअपणस्यादृष्टार्थत्वोपपत्तेः । न चाङ्गाराध्यूहनादिविधिभिस्तत्सिद्धिः तेषामप्यदृष्टार्थत्वोपपत्तेः । तथापि व्रीहीन्निर्वपति व्रीहीन्प्रोक्षति व्रीहीनवहन्तीति व्रीहीणां निर्वापादिसंस्कारविधानात्तेषां प्रयोगमध्ये पुरोडाशप्रकृतितयोपादानं लभ्यत इति तत एव तन्मध्ये अपणस्याप्यनुष्ठानं लभ्यत इति चेत् । न। तेषां व्रीहिसाधनकनि-

र्वोपादानार्थकर्मविधायकत्वेनाप्युपपन्नतया नान्यथासिद्ध-प्रकृत्युपादानालम्भकविध्यभाव पुरोडाशस्याप्याज्यदार्श-पूर्णमासिकजःघन्यादिवत्स्वरसतो यथासिद्धस्यैव हवि-ष्ट्वेन ग्राह्यत्वप्राप्तेः। अत एव पशुसोमाधिकरणे "ऐन्द्र-वायवं गृह्णाती"त्यादयो यागविधयस्तेषु गृह्णातिकर्मभूतं हविरपव्याधारया गृह्णातीति सन्निहितं वाक्ये श्रुतं धारासमर्थं द्रवद्रव्यं तच्च सोमं क्रीणाति सोममभिषु-णोति सोमं पावयतीत्यादिसोमसंस्कारवाक्यपर्यालोच-नया सोमप्रकृतिकमवसीयते। "अतः सोमेन यजेते"त्य-त्र सोमशब्दस्तत्प्रख्यन्यायेन तेषां यागानां नामधेयम्। यजेतेति तत्समुदायानुवाद इति पूर्वपक्षे अपव्याधारया गृह्णातीत्यनेनोदकादिसाधारणस्य यथासिद्धद्रवद्रव्य-मात्रस्य हविष्ट्वप्राप्तेरनन्यथासिद्धप्रकृत्युपादानलम्भकवि-ध्यभावेन क्रयादिवाक्यान्यर्थकर्मविधायकान्येव स्युर्न तु संस्कारकर्मविधायकतया हविषः सोमरसत्वापादकानि। अतस्तत्प्रख्यन्यायो ऽत्र नावतरतीति दूषणमुक्तम्। तथा-पि व्रीहिभिर्यजेतेतिविधिना प्रकृत्युपादानं लभ्यतइति तत एव प्रयोगान्तःअपणां सिद्धिरिति चेत् न। तस्य या-गद्रव्यविधायकतया पुरोडाशप्रकृतिद्रव्यविधायित्वाभा-वात्। तस्मात्कपालेषु श्रपयतीतिविधिः श्रपणस्यान्तःप्र-योगकर्त्तव्यतासिध्यर्थः स्यादिति चेन्मैवम्। यागोद्देशेन द्रव्यविधायकस्यापि व्रीहिभिर्यजेतेतिवाक्यस्य पुरोडाशा-वरुद्धे यागे व्रीहीणां साक्षात्करणत्वासम्भवेन तत्प्रकृति-त्वविषयत्वपर्यवसायितया निर्वापप्रोक्षणादिविधीनामपि तद्विषयत्वलाभेन तत एव श्रपणस्य प्रयोगमध्यकर्त्तव्य-

तासिद्धेः । नन्वेवं सति तस्य अपणस्य कपालाधिकरणासिद्ध्यर्थो विधिः स्यात् । न स्यात् । उक्तरीत्या अपणस्य प्रयोगमध्यकर्त्तव्यतासिद्धावुत्पत्तिवाक्यावगतस्य कपालेषु संस्कारस्य अपणरूपतासिद्धेः । दृष्टासंभवे हि तस्यादृष्टार्थोविधिअपणमात्ररूपता प्राप्नुयात् । ननु तथापि अपणस्य समाख्याबललभ्याध्वर्युकर्तृकत्वनियमार्थस्तद्विधिः स्यादिति चेत् न । अविदहन्तःअपयतेतिप्रैषबलादध्वर्योरिष्टिकहविःअपणेषु प्रयोजककर्तृत्वेन प्रैषेषु च पराधिकारादितिन्यायेन प्रेषितुरध्वर्योरन्यस्यैव पुरोडाशअपणे ऽपि साक्षात्कर्तृत्वात् । प्रयोजककर्तृत्वस्य च मन्त्रवर्णादेव लाभात् । तस्मादन्यलभ्यअपणविधानेन प्रकृत्युपादानमाक्षिप्याक्षिप्तोपादानापेक्षितप्रकृतिद्रव्यनियममात्रपरत्वं ब्रीहिशास्त्रस्यापाद्य तद्द्वारा चित्रेष्टिगततण्डुलद्रव्यकयागात्प्रकृत्युपादाने ब्रीहिनियमव्यावर्त्तनार्थो ऽयं विधिः । असति ह्यस्मिन्विधौ ब्रीहिशास्त्रमेव जात्यवस्थाविशेषविशिष्टप्रकृतिद्रव्योपादानपर्यन्तमिति तण्डुलयागादर्थलोपेन अपणनिवृत्तावपि ब्रीहिशास्त्रस्य अपणमुखप्रवृत्तिकत्वाभावेन चोदकादङ्गान्तरैः सह ब्रीहिरूपप्रकृतिद्रव्योपादानमपि प्राप्नुयात् । सति त्वस्मिन्विधौ विहितस्य अपणस्य प्रयोगमध्ये ऽनुष्ठेयतया तत्र तत्प्रकृत्युपादाने तत एवार्थतः सिद्धेः । ब्रीहिशास्त्रं प्रकृतिद्रव्ये जात्यवस्थाविशेषनियममात्रार्थं भवति । प्रयोगमध्ये अपणार्थं प्रकृतिद्रव्याण्युपाददीतेति यत्तद्व्रीहिजातीयानि सतुषावस्थानीति । तथा च ब्रीहिशास्त्रस्य प्रकृत्युपादानप्रापकत्वे अपणविध्यपेक्षत्वे सत्येवं व्यवस्था सिध्यति ।

वैकृते यत्र हविषि अपणमपेक्षितं तत्र तस्य प्रयोगमध्ये ऽनुष्ठानं यत्र च तत्तत्र प्रकृत्युपादानं यत्र प्रकृत्युपादानं तत्र व्रीहिनियमः। एवं च सति तण्डुलयागादर्थलोपेन अपणनिवृत्तौ तन्मूलकं व्रीहिनियमपर्यन्तं निवर्त्ततएव तदाहुः।

तण्डुलेभ्यो ऽर्थलोपेन अपणं विनिवर्त्तते।
अपणस्य निवृत्तस्य स्वयं कर्तृकता कथम्॥
तदधीनमुपादानं प्रकृतेः स्यात्कथंतराम्।
तद्वशाद्व्रीहिनियमस्तदभावे कथंतमामिति॥

नन्वस्त्वेवं कपालेषु अपयतीतिविधिरेवोदाहरणम्। अत्र यदुक्तं तदाक्षिप्तप्रकृत्युपादानापेक्षितव्रीहिनियमार्थं व्रीहिशास्त्रमिति। तदयुक्तम्। व्रीहिनियमस्य निर्वापादिसंस्कारविधिभिरेव लाभसंभवात्। प्रकृत्युपादानलक्षकविध्यभावे हि प्रकृतिद्रव्यानपेक्षणेनानपेक्षितसंस्कारायोगात् निर्वापादान्यर्थकर्माणि स्युरिति ततः प्रकृतिद्रव्यनियमो न सिध्यति। कपालेषु अपयतीति विधिनाक्षिप्ते प्रकृत्युपादाने सत्युपादेयप्रकृतिद्रव्यविशेषाकाङ्क्षायां निर्वापादिसंस्कार्यत्वेन श्रुतानां व्रीहीणां च क्वचिद्विनियोगाकाङ्क्षायां कथं व्रीहीणामेवापेक्षितप्रकृतिद्रव्यत्वेनान्वयात्तन्नियमो न सिद्ध्येत्। संस्कार्यद्रव्यापेक्षस्य हि कस्य चिदभावे वरं सक्तून् जुहोतीतिवत् द्वितीयाद्यवगतगुणकर्मत्वपरित्यागेनार्थकर्मत्वाङ्गीकारः प्राप्नुयात्। तत्सत्त्वे तु नार्थकर्मत्वप्राप्तिः। अत एवोपनयनसंस्कृतस्य माणवकस्य विनियोगाका-

ङ्चायामुपनयनप्रक्रमाधीतस्याध्ययनस्य कर्त्रपेचासत्त्वा-त्तत्कर्तृत्वेनान्वय इत्युपनयनस्य नार्थकर्मत्वप्राप्तिः । उक्तं ह्यपशूद्राधिकरणे । स्वाध्यायविधिरनिर्दिष्टकर्तृकत्वेन कर्त्तारमपेचमाणः प्रकृतोपनयनसंस्कृतान् किमर्थं वयमाचार्यनिकटं नीता इत्येवं प्रयोजनमपेचमाणान् ब्राह्मणादीनेव कर्तृत्वेन स्वीकुर्वन् तेषामेवाध्ययनं विधत्ते न शूद्रस्येति । अपि च अपणविध्याचेपतः प्रकृत्युपादाने प्रसक्ते सत्यनियतप्रकृतिद्रव्योपादानप्राप्तौ "तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध: सुमनस्यमान" इति पुरोडाशप्रतिष्ठापनमन्त्रवर्णादेव छागो वा मन्त्रवर्णादिति न्यायेन व्रीहिजातीयं प्रकृतिद्रव्यमित्ययमर्थो लभ्यते । किं तु लाघवात्तस्य पिष्टावस्थायामुपादानं प्राप्नोतीति सतुषावस्थोपादानं परं ततो न प्राप्नुयात्तदपि प्रागुक्तरीत्या निर्वापादिसंस्कारकैमर्थवाक्यापेचया लभ्यत इति न काचिदनुपपत्तिः । ननु यवैर्यजेतेत्याहत्य विहितैर्यवैः प्रकृतिद्रव्याकाङ्चाशान्तेर्मन्त्रप्रकाश्यत्वसंस्कार्यत्वान्यथानुपपत्त्या व्रीहीणां प्रकृतिद्रव्यत्वं न सिध्येदतस्तत्सिध्यर्थं व्रीहिशास्त्रमपेचितमिति चेत् । मैवम् । न खलु यवानामपि साचात्प्रकृतित्वं श्रुतं किं तु श्रुतपुरोडाशावरुद्धयागकरणत्वान्यथानुपपत्त्या कल्पनीयम् । व्रीहीणां तु मन्त्रप्रकाश्यत्वसंस्कार्यत्वान्यथानुपपत्त्येति को विशेषस्तस्मादनर्थकं व्रीहिशास्त्रमिति चेत् । उच्यते । व्रीहिशास्त्राभावे व्रीहिगतापूर्वीयत्वरूपाप्रतिपत्तेः संस्कारवाक्यगतेषु व्रीहिपदेष्वपूर्वीयत्वलचणा न लभ्येतेति संस्काराणां यवसाधारण्यं न स्यात् । सति व्रीहिशास्त्रे

तेन व्रीहीणां यागापूर्वीयत्वावगतेस्तल्लक्षणायाः संभवात्संस्काराणां यवसाधारण्यं सिध्यति। एवं च यद्यपि व्रीहिशास्त्रं व्रीहिनियमार्थं न स्यात् तस्यान्यलभ्यत्वात्तथाप्यन्यलभ्यनियमद्वारा यवेषु प्रोक्षणादिप्राप्त्यर्थमवहननादिनियमार्थं च स्यादित्यनन्तरप्रदर्शनीययोरन्यलभ्यनियममूलकप्राप्त्यन्यलभ्यनियममूलकनियमयोरिदमुदाहरणं भविष्यतीति। ननु नैतदपि युक्तम्। व्रीहिशास्त्रप्रवृत्त्यधीनव्रीहिपदगतापूर्वीयत्वलक्षणाभावेऽपि यवसाधारण्यलाभसम्भवात्। द्वितीयाश्रुत्या प्रोक्षणावहननादिसाध्यत्वेन श्रुतानां व्रीहीणां प्राक्सिद्धेन स्वरूपेण तत्साध्यत्वासंभवात्तत्क्रियाजन्यदृष्टादृष्टसंस्कारविशिष्टतया तत्साध्यत्वसंभवेऽपि तावता फलपर्यवसानाभावादानर्थक्यापत्तेः। फलपर्यवसायिनो रूपान्तरस्य च प्रोक्षणादिसाध्यताऽर्हस्य व्रीहिष्वनुपस्थितेः प्रोक्षणादिभ्य एव स्वतन्त्रफलकल्पनागौरवापत्तेः। श्रुतविनियोगभङ्गापत्तेश्च। प्रोक्षणादिसाध्यत्वनिर्वाहार्थमेव संस्कृतानां व्रीहीणां अपणविध्याक्षिप्तप्रकृत्युपादानापेक्षितप्रकृतिद्रव्यतयान्वयः कल्प्यते। एतावतापि तन्निर्वाहः कथं स्याद्यदि कल्प्यमानपुरोडाशप्रकृतिभावलभ्यापूर्वसाधनत्वाकारेण व्रीहीणां प्रोक्षणादिसाध्यत्वमित्येतावत्पर्यन्तं न कल्पयेत। तथा कल्पने च प्रोक्षणादीनां यवसाधारण्यं तत एव लभ्यते। इयांस्तु विशेषो व्रीहिशास्त्रप्रवृत्तौ लक्षितापूर्वसाधनत्वेन यवसाधारण्यं तदप्रवृत्तौ कल्पितापूर्वसाधनत्वेन उभयथापि यवसाधारण्यं लभ्यतएवेति चेत्। न लभ्यत इति ब्रूमः। व्रीहि-

शास्त्रसद्भावे संस्कारवाक्यश्रुततत्क्रियासाधारत्वनिर्वाहाय व्रीहिपदानां व्रीहिशास्त्रसमर्पितापूर्वसाधनत्वलक्षणया प्रवृत्तावपूर्वसाधनत्वस्यावहननानपेक्षस्रुवादिसाधारण्येन स्रुवादिव्यावर्त्तनाय तस्मिन् विशेषणीये व्रीहिगतत्वेन तद्विशेषणे व्रीह्यंशे शक्तिरपूर्वसाधनत्वांशे लक्षणेति वृत्तिद्वयविरोधप्रसङ्गात्तण्डुलप्रणालिकात्वेन तद्विशेषणीयम् । तण्डुलप्रणाड्यापूर्वसाधनत्वं च यवानुगतमिति तद्रूपोद्देशेन विधीयमानानां संस्काराणां यवसाधारण्यं लभ्यते । व्रीहिशास्त्राभावे तु व्रीहीणामपूर्वसाधनत्वस्य प्रागनुपस्थितत्वेन तत्तत्क्रियासाधारत्वानुपयोगिनापि व्रीहित्वेनैवोपरक्तेषु व्रीहिषु भाविविनियोगमूलकतत्तत्क्रियासाधारत्वोपयोगिरूपसम्भावनया संस्कारवाक्येषु प्रवृत्तेषु तन्निर्वाहार्थं पुरोडाशप्रकृतिद्रव्यत्वकल्पनया यद्व्रीहीणामपूर्वसाधनत्वमवगम्यते तत्स्रुवादिष्वतिप्रसङ्गवारणायोपस्थितेन व्रीहिगतत्वेनैव विशेषयितुं शक्यम् । शब्दसमर्पणीयदिव कल्पनीये तस्मिन् वृत्तिद्वयविरोधाभावात् । तद्विशेषितं च स्रुवादिभ्य इव यवेभ्यो ऽपि व्यावृत्तमिति संस्काराणां यवसाधारण्यं न लभ्यते । तथा वैकृतेषु नीवारादिषु तेषामतिदेशेन प्राप्तिरपि न लभ्यते व्रीहिरूपद्वाराभावादतो व्रीहिशास्त्रमन्यलभ्यनियमद्वारा यवेषु प्रोक्षणादिप्राप्त्यर्थमवहननादिनियमार्थं च पर्यवस्यतीति समनन्तरप्रदर्शनीययोर्द्वयोरपि तदुदाहरणमितियुक्तमेव । अपि चास्ति व्रीहिशास्त्रस्यान्यदपि प्रयोजनम् । अष्टशफपरिमाणाय शेषकार्यैभ्यश्चापर्याप्तानां पुरोडाशजातिमात्रसम्पादनस-

समर्थानामल्पानां व्रीहीणां लाभे तत्पर्याप्तानपि व्रीहिप्रतिनिधीन्नीवारानपहाय मुख्यानां व्रीहीणामुपादानं तदभावे हि पुरोडाशश्रपणव्रीहीसंस्कारविधिसामर्थ्यात्पुरोडाशप्रकृतित्वेन कल्प्यमाना व्रीहयः पुरोडाशाङ्गत्वमेव प्रतिपद्येरन्न यागाङ्गत्वम् ततश्चाश्वशफपरिमाणस्विष्टकृदिडाप्राशित्रचतुर्धाकरणभक्षणादीनां व्रीहीणां च पुरोडाशाङ्गत्वाविशेषेण तावत्पर्याप्तव्रीह्यलाभे बहूनां तेषामङ्गानां बाधादरमेकस्य व्रीहिरूपाङ्गस्य बाध इति-नीवारोपादानं प्रसज्येत । व्रीहिशास्त्रसद्भावे तु तेन व्रीहीणां यागाङ्गत्वे बोधिते पुरोडाशावरुद्धे यागे हविष्ट्वेन साक्षाद्यागसाधनत्वमलभमानानां तेषामरुणाधिकरणन्यायेन श्रपणविध्याक्षिप्तप्रकृत्युपादानापेक्षितप्रकृतिद्रव्यतया पार्ष्णिकान्वयकल्पने ऽपि यागाङ्गत्वमेवावतिष्ठते न तु तदपहाय पुरोडाशाङ्गत्वं श्रुतयागाङ्गत्वनिर्वाहायैव पार्ष्णिकान्वयकल्पनात् । अत एवारुण्यस्य पार्ष्णिकान्वयकल्पने ऽपि क्रयएवाङ्गत्वं न तु द्रव्य इति प्रतिपादितमरुणाधिकरणे *ततश्च बहुभ्यो यागाङ्गभूतेभ्योऽश्वशफपरिमाणशेषकार्येभ्यो व्रीहीणां प्रधानाङ्गतयाङ्गगुणविरोधाधिकरणन्यायेन भाष्यकारोक्तगुणमुख्यव्यतिक्रमाधिकरणन्यायेन च प्राबल्यात्तद्बाधनमनुचितमित्यल्पानामपि व्रीहीणामुपादानं प्रतिनिधिपादान्याधिकरणोक्तं लभ्यते एवं च व्रीहिशास्त्रमुत्पत्तिशिष्टपुरोडाशेन निराकाङ्क्षयागे प्राप्तिरहितानां व्रीहीणां प्राप्तिं कुर्वत् तन्निर्वाहायान्यलभ्यपुरोडाशप्रकृतिद्रव्यनि-

* ततश्च बहुभ्योऽप्यङ्गभूतेभ्यो इ० २ पु० पा० ।

यमावतरणे ऽपि यागाङ्गत्वापरित्यागात् । व्रीहीणां पुरोडाशपरिमाणशेषकार्यपर्याप्तावयुपादानं प्रापयतीति प्राप्त्यनुनिष्पादिन्यां प्राप्तावप्येतदुदाहरणं भविष्यतीत्यलं प्रसक्तानुप्रसक्त्या । प्रकृतमनुसरामः । उपांशु पौर्णमास्यां यजन्नित्यत्रान्तरालविधिसामर्थ्यलभ्यपौर्णमासीकालनियमपूर्विकामावास्यापरिसंख्या । तत्र हि पौर्णमासीकालविधिनोपांशुयाजस्य फलसंबन्धप्राप्तिवदमावास्यापरिसंख्यापि लभ्यतइति समर्थितं चतुर्थश्लोकव्याख्याने हे आहवनीय इत्यत्रान्यालभ्यपरिसंख्यामूला पराग्निकहोमानां फलसंबन्धप्राप्तिः । इयमपि तत्रैव समर्थिता । एकादशपशोरवदानानि तानि द्विर्द्विरवद्यतीत्यत्रान्यलभ्यपरिसंख्यामूलो नियमः । कथं दर्शपूर्णमासयोर्द्विर्हविषो ऽवद्यतीति तावत्परिसंख्या । तदभावे हि चतुरवत्तं जुहोतीतिविधिबलाद्धोतव्याद्धविष एव चतुरवदानं प्राप्नुयात्तत्सद्भावे तु हविषो द्विरेवावदानमित्युपस्तरणाभिघारणाद्यवदानविधिप्राप्तप्रचयशिष्टसंख्यानुवादश्चतुःशब्दः सिद्ध्यति । इदं च द्यवदानं पाशुकेषु हृदयादिष्वपि चोदकतः प्राप्नोत्येव तथापि तानि द्विर्द्विरवद्यतीति श्रवणमनियमप्राप्तौ नियमार्थं पशुप्रकरणे हि यद्यपि चतुरवत्तो यजमानः पञ्चावत्तैव वपा कार्येत्यपि श्रूयते तत्र पाशुकावदानमात्रमुद्देश्यं न तु वपावदानमेव हविरार्त्यधिकरणन्यायेन उद्देश्ये वपाविशेषणस्याविवक्षितत्वात् । ततश्च सर्वेष्वपि पाशुकावदानेषु हविरवदानद्वित्वेनोपस्तरणद्वयाभिघारणद्वया वपायामिव हिरण्यशकलेन वा पञ्चसंख्या सम्पादनीयेति प्राकृतस्य द्य-

वदानस्यानियमः प्राप्तस्तत्र नियमः क्रियते। हवींषि यथाप्रकृति द्विरेवावद्येयानि पञ्चसंख्या तु प्रकारान्तरेण सम्पादनीयेति। "अग्निहोत्रं जुहुयात्स्वर्गकाम" इत्यत्रान्यलभ्यपरिसंख्यापूर्विका परिसंख्या। इदं हि नाग्निहोत्रस्य स्वर्गार्थत्वप्राप्त्यर्थमेतदभावे ऽपि तत्स्वर्गार्थमनादेशादिति विश्वजिदधिकरणपूर्वपक्षन्यायेनानिर्दिष्टफलस्याग्निहोत्रस्य विनिगमनाविरहेण सर्वफलार्थत्वं प्रापयता स्वर्गार्थत्वस्यापि प्राप्तिसम्भवात्। नापि स्वर्गेतरफलपरिसंख्यार्थः तस्या अपि सः स्वर्गः स्यात्सर्वान्यविशिष्टत्वादिति तत्सिद्धान्तन्यायलभ्यत्वात्। अतो ऽग्निहोत्रस्यान्यलभ्यस्वर्गसंबन्धबोधनद्वारा तत्संनिधिसमाम्नातानामनिर्दिष्टफलानां कर्मणां फलवदफलन्यायेन तदङ्गत्वप्राप्त्यर्थमेतदभावे हि अग्निहोत्रस्य विश्वजिन्न्यायेन फलकल्पने विनिगमनाविरहात्तेषामपि तेनैव न्यायेन फलकल्पना स्यादिति तेषामग्निहोत्राङ्गत्वं न प्राप्नुयात्। एवं चानेन विधिनाग्निहोत्रस्यान्यलभ्यस्वर्गार्थत्वप्राप्तिनान्तरीयकतया विश्वजिदधिकरणपूर्वपक्षन्यायप्रसक्तस्य फलान्तरस्य परिसंख्या तत्सिद्धान्तन्यायलभ्या प्राप्यते अग्निहोत्रसन्निधिसमाम्नातकर्मणामनन्यलभ्यतदङ्गत्वप्राप्तिनान्तरीयकतया तेषामपि स्वर्गफलार्थत्वस्य तत्सिद्धान्तन्यायप्रसक्तस्य परिसंख्यानन्यलभ्या च प्राप्यत इत्येवमत्रान्यलभ्यपरिसंख्यापूर्विकानन्यलभ्या परिसंख्या। यद्यग्निहोत्रस्य यावज्जीववाक्येन प्रत्यवायपरिहारार्थत्वावगत्या तस्य तत्सन्निधिसमाम्नातानां कर्मणां च फलाकाङ्क्षाशान्तेर्विश्व-

जिदधिकरणापूर्वपक्षसिद्धान्तन्याययोरुभयोरपि तत्र तेषु चानवतारादिदं वाक्यमभिहोत्रस्य स्वर्गसंबन्धप्राप्त्यर्थमेव न त्वन्येषां तदङ्गत्वप्राप्त्यर्थम् । नापि तदनुनिष्पादित्वेनान्यलभ्या तेषां स्वर्गार्थत्वपरिसंख्यास्तीति मतम् । तदा केवलकाम्यकर्मणोर्यः स्वर्गसंबन्धविधानं तद्विश्वजिन्न्यायलभ्यस्वर्गसंबन्धमतिक्रम्य तत्संनिधिपठितकर्मणां तदङ्गत्वप्राप्तिपर्यवसायीति तत्रान्यलभ्यानन्यलभ्यपरिसंख्याफलसंकर उदाहर्तव्यः । एवमन्यलभ्यफलसंकरो दर्शितः । अप्रवृत्तिविशेषकरफलसंकरोऽपि दिङ्मात्रेणोदाह्रियते । द्वादशाहिकयोर्व्यनीकान्तर्गतयोर्गवामयनिकयोस्त्र्यनीकास्थानगतयोश्चादिमाग्रतावैध्योरप्रवृत्तिविशेषकरप्राप्तिपूर्विका प्राप्तिः । तैर्विधिभिः परमापूर्वसाधनत्वावच्छेदेनावान्तरापूर्वसाधनत्वावच्छेदेन च अग्रतानां प्राप्तिरनन्यलभ्या क्रियते न तया प्रवृत्तिविशेषः कश्चित् द्वादशाहगवामयनयोरनन्यलभ्यः प्राप्यते तैः प्रापणीयस्य द्वादशाहिकदशरात्रान्तर्गतयोराद्ययोरह्नोरैन्द्रवायवशुक्राग्रत्वानुष्ठानस्य चोदकात् गवामयनिकयोराद्ययोरह्नोरैन्द्रवायवाग्रत्वानुष्ठानस्य त्र्यनीकाविधानाच्च लाभसम्भवात् । किं तु तया तया प्राप्त्या तत्तद्विकारेषु प्रवृत्तिविशेषपर्यवसायिनी प्राप्तिः क्रियते । एतच्च प्रथमश्लोकव्याख्याने स्पष्टमुक्तम् । साम्ना स्तुवीतेत्यत्राप्रवृत्तिविशेषकरप्राप्तिपूर्वको नियमः कथम् ऋगक्षरारूढगीतिक्रियारूपस्य साम्नः केवलम् ऋगक्षराभिव्यक्त्यर्थत्वमेव प्राप्तं न तु ऋक्साध्यगुणिनिष्ठगुणाभिधानात्मकस्तुत्यर्थत्वमपि । तदनेनैव विधिना प्रा-

प्यते। तत्प्रापणेन च तत्र कश्चिदनुष्ठाने विशेषो लभ्यते गीतिक्रियया स्तुतेः साक्षान्निर्वर्त्तयितुमशक्य-त्वादतः क्रमप्रकरणाभ्यां स्तोत्राङ्गत्वेनावगतानामृचा-मभिव्यक्तिं कुर्वत्साम तद्द्वारा स्तुतिं निर्वर्त्तयितुं शक्तमि-ति श्रुतस्तुत्यर्थत्वनिर्वाहकानुष्ठानविशेषलाभाय पाक्षि-कान्वयन्यायेन स्तुत्यर्थासु ऋक्षु अवतरति ऋगभिव्यक्त्य-र्थत्वं तु साम्नः प्रत्यक्षावगतमिति न तत्राप्राप्तप्रापणं विधिना कार्यमपि तु ऋचामभिव्यक्तौ साम्नश्चातुःस्व-र्याद्युपायान्तराण्यपि सन्तीति पक्षे ऽप्राप्तस्य साम्नो नि-यमः कार्यः अतो ऽत्रापवृत्तिविशेषकरस्तुत्यर्थत्वप्राप्तिपू-र्वकः स्तुत्यर्थऋगक्षराभिव्यक्त्युपायत्वेन साम नियमः। यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयादित्यत्राप्रवृत्तिविशेषकरप्राप्तिपूर्विका परिसंख्या इदं हि न तावद्रथन्तरसाम्नि ज्योतिष्टोमे ऐन्द्रवायवाग्र-त्वस्य प्राप्त्यर्थं पाठक्रमादेव तत्र तत्प्राप्तेः सिद्धत्वात् नापि बृहत्साम्नि ज्योतिष्टोमे तन्माभूदित्येवमर्थं यदि बृहत्सामा शुक्राग्रानिति बृहत्सामत्वपक्षे शुक्राग्रत्वविधानादेव ततो व्यावृत्तिसिद्धेः। किं तु नैमित्तिकत्वार्थं तस्येदं पुनर्विधान-म्। पाठादैन्द्रवायवाग्रत्वमनैमित्तिकं प्राप्नोति तदेव रथ-न्तरसामत्वनिमित्तकं क्रियते एवं प्रकृतौ पाठप्राप्तस्यैन्द्र-वायवाग्रत्वस्यानेन विधिना नैमित्तिकीकरणादेव द्वादशा-हे त्र्यनीकायामाद्यस्याह्नश्चोदकप्राप्यमनैमित्तिकमैन्द्रवा-यवाग्रत्वं नास्तीति तत्र तद्विधानं विकृतग्रपेक्षितं विध्यन्त-रेण कृतं तेन च नैमित्तिकीकरणेन ज्योतिष्टोमेन कश्चिद-नुष्ठाने विशेषो लभ्यते किं तु तस्मिन्पाठप्राप्तस्यैन्द्रवाय-

वायत्वस्याविशेषेण सर्वासु विकृतिषु चोदकाप्राप्तौ बृह-द्रथन्तरान्यसामभ्रस्तदुभयसामभ्रश्च विकृतिभ्यो निमि-त्तराहित्येन तद्यावृत्तिर्लभ्यत इत्येवमत्वाप्रवृत्तिविशेष-करनैमित्तिकत्वप्राप्तिपूर्वकैन्द्रवायवायत्वस्य निमित्तर-हितविकृतिभ्यः परिसंख्या । अप्रवृत्तिविशेषकरनियम-पूर्विकाः प्राप्तिनियमपरिसंख्याः यथा । यस्य ऋग्वेद-यजुर्वेदयोः श्रूयमाणस्य सोमविकारस्यान्यतरत्राङ्गभू-यस्त्वाभावेन भूयस्त्वेनोभयश्रुतौ त्यक्तविनिगमनाविरहा-दुभयत्रापि विधिः स्वीकर्त्तव्यस्तत्र "उच्चैरृचा क्रियते" "उपांशु यजुषे"ति विहितयोर्वेदस्वरयोर्विकल्पे प्राप्ते त-स्मिन्प्रकृतितः प्राप्नुवन् यत्किञ्चित्प्राचीनमग्नीषोमीया-त्तेनोपांशु चरन्तीति यज्ञभागस्वरविधिर्नियमविधिराप-द्यते । स च कर्मणि साक्षात्स्वरस्यानुष्ठातुमशक्यत्वात् पार्ष्णिकान्वयेनोपांशुत्वस्य कर्माङ्गत्वं निर्वोढुं तदङ्गभाने-ष्ववतरतीति । तेन ये केवलमृग्वेदे सामवेदे वा विहि-तास्तन्मन्त्रास्तेषूच्चैस्त्वस्यैव प्राप्तत्वेनाप्राप्तस्योपांशुत्वस्य प्राप्तिर्भवति । ये तु मन्त्रा यजुर्वेदे ऽपि विहितास्तेष्वनि-यतप्राप्तस्योपांशुत्वस्य नियमो ऽपि भवति । तेनैत्रोपांशु-त्वनियमविधिना दीक्षणीयादिषु चोदकप्राप्तानामैष्टि-कानां मध्ये मन्द्रमध्यमोत्तमस्वराणां परिसंख्यापि ल-भ्यते इत्येवमप्रवृत्तिविशेषकरनियमपूर्वकप्राप्तिनियम-परिसंख्यानां तिसृणामपि विकृतिविशेषप्राप्तयज्ञभाग-स्वरविधिरेवोदाहरणम् । इदं च सर्वमनुपदमेव स्फुटी-करिष्यते । अप्रवृत्तिविशेषकरपरिसंख्यापूर्विकाः प्राप्ति-नियमपरिसंख्याः यथा दीक्षाः सोमस्य दक्षिणाः सोम-

स्येति कर्तृसंस्काररूपाया दीक्षायाः कर्तृद्वारा प्रयोगा-ङ्गत्वाद्दक्षिणायाः साक्षात्प्रयोगाङ्गत्वाच्च। प्रयोगान्तर्गते प्रधाने सोमयागे तदङ्गकलापे च ज्योतिष्टोमप्रकरणविहितस्य दीक्षादक्षिणस्य शेषिणि प्राप्ते वचनद्वयमिदमङ्गकलापस्य तच्छेषित्वव्यावर्त्तनार्थमिति तावदुभयत्र परिसंख्या निर्विवादा सा च न ज्योतिष्टोमे प्रवृत्तिविशेषकरी। दीक्षादक्षिणस्याङ्गप्रधानार्थत्वे केवलप्रधानार्थत्वे च क्रत्वङ्गभूतयमनियमसंकल्परूपदीक्षानुष्ठाने "आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणः" इति तदर्थविहितदीक्षणीयानुष्ठाने दण्डेन दीक्षयतीत्यादिवचनविहिततदभिव्यञ्जकदण्डधारणाद्यनुष्ठाने द्वादशशतदक्षिणादाने च विशेषाभावात्। न च दक्षिणाऽङ्गप्रधानार्थत्वेऽङ्गप्रधानकर्तृभ्यो देया केवलप्रधानार्थत्वे प्रधानकर्तृभ्य एवेति विशेषो वक्तुं शक्यते। यतः केवलप्रधानार्थत्वेऽप्यङ्गकर्तृभ्य ऋत्विग्भ्य एव देया न तु प्रधानकर्त्रे यजमानाय तस्य स्वत एव फललाभाय प्रधानानुष्ठाने प्रवृत्तस्य दक्षिणादानेनाऽऽनानमयितव्यत्वात्। यजमानेनात्मनि संकल्प्यमानस्य दक्षिणाद्रव्यस्य स्वत्वत्यागासम्भवाच्च। किं तु सोमाङ्गविकारेषु काम्यपश्वादिष्वतिदेशेन दैक्षपशुधर्मातिदेशप्राप्तौ दीक्षा दक्षिणान्तेभ्यो व्यावर्त्तयन्ती तेष्वेवानुष्ठानविशेषोपयोगिनी। अतोऽत्राप्रवृत्तिविशेषकरी सोमाङ्गेषु दीक्षादक्षिणापरिसंख्या मुखीकृत्य प्रवृत्ता सोमाङ्गविकारेषु तत्परिसंख्या। नन्वत्र सोमाङ्गविकारेषु दक्षिणापरिसंख्योक्तिरनुपपन्ना सोमाङ्गस्याग्नीषोमीयपशो-

विकारेष्वनुक्तदक्षिणेषु काम्यनैमित्तिकादिषु पशुषु ऋत्विगानमनाय दक्षिणापेक्षायां स्वप्रवृत्तावङ्गभूतदक्षिणायां चासत्यां तत्र प्रसङ्गादुपकारकत्वं प्रतिपन्नायाः सोमाङ्गदक्षिणाया एव ग्राह्यत्वादिति चेत् । नैवम् । तथा सति दक्षिणाः सोमस्येत्यस्यात्यन्तवैयर्थ्यप्रसङ्गात्। साक्षात्प्रकृतावदृष्टमपेक्षितं मूलप्रकृतितो ग्राह्यमिति अतोऽश्वादिषु दृष्टत्वेन तद्दर्शेष्टितोऽन्वाहार्यदक्षिणाग्रहणोपपत्तेश्च । एवं चानुक्तदक्षिणकाम्यादिपशुभ्यः सौमिकदक्षिणापरिसंख्यया प्राकृतोऽन्वाहार्यनियमः प्राप्यते। ततश्च दृष्टादृष्टोपकारार्थं तदीयं धर्मजातमपि प्राप्यतइति अप्रवृत्तिविशेषकरपरिसंख्यामूलप्राप्तिनियमयोरप्येतदेवोदाहरणम् । ननु विधीनामप्रवृत्तिविशेषकरे फले न पर्यवसानमिति ततोऽन्यत्फलं यदि मृग्यं तदोपांशुपौर्णमास्यां यजन्नित्याद्युदाहरणेषूपांशुयागादीनां स्वर्गसंबन्धादिना प्राधान्यप्राप्तिः फलं न स्यात्। तेषां प्राधान्ये पराङ्गत्वे चानुष्ठाने विशेषाभावादिति चेन्नैवम् । प्राधान्ये सति तदपचारे प्रधानविस्मरणादिप्रायश्चित्तप्राप्तिर्विकृतिषु चातिदेशनिवृत्तिरित्यादिफलान्तरपर्यवसानस्य तदापि वक्तुं शक्यत्वात् । एवमाश्रयभेदेन विधिनियमपरिसंख्यालक्षणानामाश्रयभेदे प्रथमचरमभावाभ्यां तत्फलानां च संकरो दर्शितः। विनैव त्वाश्रयभेदं तत्रैवोद्देश्ये तस्यैव विधेयस्याप्राप्तिपक्षप्राप्तिभ्यामपूर्वविधिनियमविधिलक्षणसांकर्यमपि ज्योतिष्टोमगते यजुर्भागस्वरविधौ दृश्यते । तथा हि । यद्यपि ज्योतिष्टोमस्य याजुर्वेदिकत्वात्साङ्गस्य तस्य

यजुर्वेदविहितत्वोपाधिना उपांशुस्वरत्वमुपांशु यजुषेति वेदस्वरविधिनैव सिद्धं तथा ऽग्नीषोमीयात्प्राचीनेषु तदङ्गेषु यजुर्वेदविहितत्वोपाधिमनपेक्ष्य स्वरूपेणोपांशुत्वस्य प्राप्त्यर्थो ऽयं यज्ञभागस्वरविधिस्तस्य ऋग्वेदेन सामवेदेन वा विहितं ज्योतिष्टोमविकारं प्राप्नुवत्स्वपि तेष्वयं विधिः प्रवर्त्तते न तु याजुर्वैदिकस्वरविधिरिव न प्रवर्त्तते। यजुर्वेदविहितत्वोपाध्यनपेक्षत्वात्तेषु च प्रवर्त्तमानोऽयमपूर्वविधिः सम्पद्यते। ऋग्वेदसामवेदविहितकर्माङ्गभावमापन्नेषु तेषु तत्तद्वेदविहितत्वोपाधिकोच्चैस्त्वस्य प्राप्त्या कथं चिदप्युपांशुत्वस्य प्राप्त्यभावात् यजुर्वेदेन वेदान्तरेण च विहितं ज्योतिष्टोमविकारं प्राप्नुवत्सु तु तेषु प्रवर्त्तमानो ऽयं विधिर्नियमविधिः सम्पद्यते। तेषु यजुर्वेदविहितत्वोपाधिकस्योपांशुत्वस्यापि पक्षे प्राप्तिसत्त्वात्। तदेवमस्मिन् यज्ञभागस्वरविधौ विकृतिविशेषप्राप्ते सत्यन्तरेणैवाश्रयभेदमपूर्वनियमविधिसङ्करो जायते यद्यप्ययं विधिरग्नीषोमीयात्प्राचीनेष्वपि प्रवर्ग्यतदङ्गेषु न प्रवर्त्तते"उच्चैः प्रवर्ग्येण चरन्ती"ति तेषामुच्चैस्त्वविधानात्। दीक्षणीयादिप्रधानेष्वपि न प्रवर्त्तते।"यावत्या वाचा कामयेत तावत्या दीक्षणीयायामनुब्रूयान्मन्द्रं प्रायणीयायां मन्द्रतरमातिथ्यायामि"ति तेषामपि स्वरान्तरविधानात् तथापि प्रवर्ग्यतदङ्गेभ्यो दीक्षणीयादिप्रधानेभ्यश्च व्यतिरिक्तेष्वग्नीषोमीयात्प्राचीनेष्वङ्गेषु प्रवर्त्तत एव। ननु प्रवर्ग्याङ्गवद्दीक्षणीयादीनामङ्गानि किमिति न पर्युदस्तानि। उच्यते। प्रवर्ग्येणेति तृतीयासंयोगात्प्रवर्ग्यकरणिकायां भावनायामुच्चैस्त्वस्य

विधिस्तदन्तर्गतानि चाङ्गानीत्युच्चैस्त्वस्याङ्गप्रधानार्थता । यथा ऽप्सुवभृथेन चरन्तीत्यवभृथकरणिकायां भावनायां विधीयमानानामपां न तथेह तृतीयासंयोगो ऽस्ति अतो यथा"यज्ञाथर्वणं वै काम्या इष्टयस्ता उपांशु कर्त्तव्या" इत्यत्र श्रुतमुपांशुत्वं काम्यशब्दोक्तानां प्रधानानां विधीयमानं तेषामेव भवति एवं दीक्षणीयादीनां विधीयमानः स्वरो ऽपि दीक्षणीयादिशब्दोक्तानां प्रधानानामेव भवति । इयांस्तु विशेषः वैशेषिके स्वरे प्रधानमात्रविषये सति काम्येष्ट्यङ्गेषु दर्शपूर्णमासयोः प्राक् स्विष्टकृतः प्रथमस्थानेन मध्यमेनेडायाः शेषं तृतीयस्थानेनेति विहितं स्वरवैचित्र्यं चोदकात्प्राप्नोति दीक्षणीयाद्यङ्गेषु तु तदपि बाधित्वा वैशेषिको यज्ञभागस्वरविधिः प्राप्नोतीति । एवं च प्रवर्ग्यतदङ्गदीक्षणीयादिप्रधानव्यतिरिक्तेष्वग्नीषोमीयात्प्राचीनेष्वङ्गेषु प्रवर्त्तमानो यज्ञभागस्वरविधिः प्रकृतिविकृतिरूपयाजुर्वैदिकक्रतुगतेषु याजुर्वैदिकत्वोपाधिना प्राप्तमप्युपांशुत्वं स्वरूपेण प्रापयन्नपूर्वविधिर्भवति ऋग्वेदसामवेदविहितक्रतुगतेषु तेषु कथमप्यप्राप्तं तत्प्रापयन्नपूर्वविधिर्भवति । यजुर्वेदतदितरवेदविहितक्रतुगतेषु पक्षप्राप्तं नियच्छन्नियमविधिर्भवतीति वक्तव्य एवात्रापूर्वनियमविधिसंकरः । स्यादेतत् दीक्षणीयादीनामङ्गेषु चोदकानीतेनैष्टिकस्वरेण तद्गुणविप्रयोगवचनाश्रयस्य वेदस्वरस्यापवादे प्रसक्ते तत्प्रतिप्रसवार्थो यज्ञभागस्वरविधिः । न तु याजुर्वैदिकत्वानपेक्षोपांशुत्वविधानार्थः । अत्यन्ताप्राप्तविधानात्प्राप्तप्रतिप्रसवविधानस्य लघु

त्त्वात् । अत एव कृष्णले श्रपणविधिः प्राकृतश्रपणस्य चोदकात् प्राप्यमाणस्य प्रयोजनाभावान्निवर्त्तमानस्य प्रतिप्रसवार्थः न त्वत्यन्ताप्राप्तश्रपणविधानार्थो विधिः गौरवापत्तेरिति प्राकृतश्रपणधर्माणां तत्र प्राप्तिरुक्ता तन्त्ररत्ने । नन्वेवं सति यज्ञभागस्वरविधिरैष्टिककर्ममात्रविषयः स्यात्तत्रैवापवादप्राप्तेरग्नीषोमीयप्राचीनसमस्ताङ्गविषयो न स्यादिति चेत् । माभूद्विधिलाघवानुसारेण तन्मात्रविषयो ऽस्तु । अङ्गीकृतं हि निगदाधिकरणे नियमविधिलाघवानुसारात् उपांशु यजुषेति वाक्यं निगदातिरिक्तयजुर्विषयमिति । अङ्गीकृतं च पत्नीसंयाजाधिकरणे पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्त इति द्वादशाहिकं[1] वाक्यं नियमविधिलाघवानुसारात्प्रागुत्तमादह्नः पत्नीसंयाजान्तत्वविधायकमिति । तस्माद्यज्ञभागस्वरविधेरैष्टिककर्मव्यतिरिक्तेषु प्राप्त्यभावात्तेषु प्रवर्त्तमाने तस्मिन्विधिनियमलक्षणसांकर्यमित्युक्तमयुक्तमिति चेदुच्यते । यत्किञ्चिदिति यदादितिशब्दवद्वीप्सायां प्रसिद्धः वीप्सा च व्याप्तुं साकल्येन संबद्धुमिच्छा तथा च यत्किञ्चिदित्यनेनाग्नीषोमीयप्राग्भाववर्त्तिनः सकलस्याप्यङ्गस्योपांशुत्वसंबन्धे तात्पर्ये ऽवसीयमाने कथं किं चिद्विषयतया सङ्कोचः क्रियेत । यद्यप्युच्चैः प्रवर्ग्येण चरन्तीत्यादिनिरवकाशविध्यन्तरबलात्सङ्कोचो ऽस्ति तथापि लाघवमात्रानुसारात्स न युक्तः । न हि लाघवमस्तीति श्रुतं हातुं शक्यम् । ननु यत्किञ्चिच्छब्दो वीप्सितार्थं द्रुवाणो ऽपि प्राग्भवीयप्रत्ययवत्प्रसिद्धः

[1] द्वादशाहेन प्रजाकामं याजयेदिति विहितद्वादशाहयागभवम् ।

अस्तित्वात्र प्राग्भागवर्त्तिनामङ्गानां विशिष्याज्ञातत्वं प्राचीनमिति शब्देन प्राग्भागस्यैव तद्वर्त्तिनामङ्गानाम-निर्द्दिष्टत्वात् । तथा च यत्किञ्चिदित्यस्याज्ञातार्थकत्वो-पपत्तेर्नात्र वीप्सानिश्चय इति चेत् । नैवम् । किमिदमि-त्यादिप्रश्नोत्तरे यत्किञ्चिदित्यवाज्ञातत्वानादरणीय-त्वादिबोधनइवावाज्ञातत्वबोधने प्रयोजनाभावेन प्र-वृत्तिविशेषकरस्य साकल्यार्थकत्वस्यैव ग्राह्यत्वात् । य-त्किञ्चिदादीनां साकल्यार्थकत्व एव "यच्च किञ्चिज्जगत्य-स्मिन् दृश्यते श्रूयते ऽपि वा" "प्राप्यान्तं कर्मणस्तस्य यत्किं चेह करोत्ययमित्यादौ तत्पदेन प्रतिनिर्द्देशस्य दर्शनाच्च अविशेषज्ञातविशेषानादरणादिमात्रपरत्वे यत्किञ्चिदिदं यत्किञ्चिद्दानयेत्यादौ तदो ऽप्रयोगात् अतः प्रवर्ग्यत-दङ्गदीक्षणीयादिव्यतिरिक्तसकलप्राग्भागवर्त्त्यङ्गसाधा-रणायाजुर्वैदिकत्वानपेक्षोपांशुत्वविधिरेवात्र स्वीकर्त्तव्यः । नन्वस्त्वेतदेवं तथाप्यस्य विधेः प्रकृत्यन्वयप्रयुक्तमपूर्ववि-धित्वमेव भवति न तु विकृतिविशेषान्वयप्रयुक्तं निय-मविधित्वमपि प्रकृतिप्रकरणाम्नातस्यास्य प्रकृतिविकृ-तिसाधारणत्वाभावात् इति चेत् । सत्यमुपदेशतस्तथैव अतिदेशतस्तूपकारमुखेनाङ्गतदङ्गशास्त्राणामपि वि-कृतिप्राप्तौ विकृतिविशेषं प्रतिपद्यमानस्यास्य विधेर्निय-मविधित्वमापतत्केन वार्यते । यो हि सौर्यादिषु विकृ-तिष्वितिकर्त्तव्यताकाङ्क्षया प्रकृतिवच्छब्दः कल्प्य इत्यु-च्यते स एवातिदेशाद्वैकृतवाक्यशेषतामापन्नः प्राकृता-ङ्गशास्त्रसमूहः स एव लाघवार्थं प्रकृतिवदितिसंग्रहेण निर्दिश्यते । तस्य स्वरूपतः क्लृप्तत्वे ऽपि तत्तद्दृष्टादृष्टोप-

कारवाचिपदयोगस्य वैकृतविधिवाक्यशेषतायाश्च कल्प्यत्वेन कल्प्यत्वव्यपदेशः। अतएवोक्तं तन्त्ररत्ने समिधो यजति व्रीहीनवहन्तीति प्रकृतावयमर्थः समिदुपकृतोवघातवितुषीकृतव्रीहिसम्पादितपुरोडाशसाधनकश्च दर्शः कार्य इति ततश्च सौर्यो ऽपि तद्वत्कर्त्तव्य इत्युक्ते समिदुपकृतावघातवितुषीकृतव्रीहिसम्पादितचरुसाधनकश्च सौर्यः कार्य इत्युक्तं भवति। ततश्च समिदादिशास्त्रं सौर्यशास्त्रस्य वाक्यशेषः सम्पद्यते। अनेनाभिप्रायेण भाष्यकारेण पौरोडाशिकं ब्राह्मणं सौर्यादीनां वाक्यशेष इत्युक्तमध्याहारादुत्प्रेक्षितकल्पना ज्यायसीति। यद्येवमपि प्रकृतिवच्छब्दः प्राकृताङ्गशास्त्रसमूहादन्य एव समानार्थकः कल्प्यः शब्दो न तु स एवा ऽन्यत्र निबद्धस्य शब्दस्य कार्यमुखेनाप्यन्यत्रान्वयासम्भवादिति विचिकित्स्येत तदा यज्ञभागस्वरविधिराश्रयभेदरहिते ऽपूर्वनियमविधिलक्षणसाङ्कर्येण भवत्युदाहरणम्। किं त्वाश्रयभेदपौर्वापर्यसहितापूर्वनियमविधिसाङ्कर्ये[1] तथा हि प्रकृतौ दीक्षणीयादीनामङ्गेषु बाधकबाधनेन प्रवृत्तिविशेषकरो ऽपि यज्ञभागस्वरविधिस्तद्व्यतिरिक्तेषु प्राचीनपदार्थेषु प्रकृतौ न प्रवृत्तिविशेषकरः याजुर्वेदिकत्वोपाधिकेन वेदस्वरविधिनैव तेषु उपांशुत्वानुष्ठानसिद्धेः। किं तु वेदान्तरविहितविकृतिगतेषु उपांशुत्वप्रापणेन यजुर्वेदवेदान्तरविहितविकृतिगतेषु तन्नियमेन च सफल इति अप्रवृत्तिविशेषकरप्राप्तिपूर्वक-

---

१ आश्रयभेदेसत्यपि पौर्वापर्यसहितोयोऽपूर्वनियमविधिस्तत्साङ्कर्ये।

२ स्वदस्वरस्य बाधकमैष्टिकं वैस्वर्यं तद्बाधनेन।

प्राप्तिनियमयोरिदमुदाहरणं स्यात् । ननु विकृतिगतेष्वपि कर्मसु स्वरप्राप्तिनियमनाभ्यां न प्रवृत्तिविशेषलाभः कर्मसु साक्षात्स्वरस्यानुष्ठातुमशक्यत्वात् । सत्यम् । तत्राप्यन्ततस्तदङ्गमन्त्रावतरणेन सफलता । अत एव प्राक् ऋग्वेदयजुर्वेदविहितासु विकृतिषु नियमविधिरूपयजुर्भागस्वरविधिमुदाहृत्य तत्रापवृत्तिविशेषकरनियमपूर्वकप्राप्तिनियमपरिसंख्याः प्रदर्शिताः । तदेवमाश्रयभेदे सत्यसति च विधिलक्षणानामाश्रयभेदपौर्वापर्ययोश्च सतोरसतोस्तत्फलानां साङ्कर्यस्य बहुलमुपलम्भात् । तथैव प्रागुदाहृतेषु रथन्तरादिविधिषु एकानेकविध्यप्रवृत्तिभ्यां विधिनियमादिलक्षणसङ्करो न दोषायेत्याशङ्क्याह ।

यद्येकानेकविध्यप्रसृतिमुखभवः सङ्करो लक्षणानामिष्येतान्याश्रयत्वं प्रथमचरमताद्युक्थसाङ्कर्यरीत्या । दैक्षादन्योऽपि दण्डः प्रकृतिजुषि भवेत्प्रैषकार्ये प्रशास्तुः स्यात् पक्षे स्तोत्रसामां क्रतुनिकरजुषामुत्तरास्वेव गानम् ॥ १४ ॥

सत्यमेकानेकविध्यप्रवृत्तिभ्यां लक्षणसङ्करोपगमे रथन्तरपृष्ठादिनियमविधिष्वनिष्टं नापद्यत इति क्वचि-

ष्कचिदनिष्टमथापद्यते तथा हि दण्डी प्रैषानन्वाहेत्यत्र तद्विधिमात्राप्रवृत्तौ परिसंख्यालक्षणं प्रवर्त्तते तदा हि क्रीते सोमे मैत्रावरुणाय दण्डः प्रयच्छतीतिविधिना मैत्रावरुणार्थत्वेन सिद्धस्य दीक्षितदण्डस्य प्रयोजनाकाङ्क्षायां तदीयानि दण्डापेक्षाणी सर्वाणि कार्याणि समुच्चित्य प्राप्नुवन्ति क्रीते सोमइत्यादिविधेरप्यप्रवृत्तौ न तल्लक्षणं प्रवर्त्तते तदा दीक्षाव्यञ्जकस्य दण्डस्य यावद्दीक्षानुवृत्ति दीक्षितेनैव धारणीयतया प्राप्तेः। किं तु तदा नियमविधिलक्षणं प्रवर्त्तते स्थित्योच्चैरनवानं कर्त्तव्ये प्रैषानुवचने किं चिदालम्बनं सौकर्यापेक्षायामनियमेन यस्य कस्यचिदालम्बनस्य प्राप्तेः। ततश्च तत्र तद्विधिमात्राप्रवृत्त्यपेक्षया परिसंख्यालक्षणानुगमने दीक्षितदण्ड एव प्रैषानुवचने योजनीयः क्रीते सोमइतिविधेरप्यप्रवृत्त्यपेक्षया नियमविधिलक्षणानुगमने निरूढपशाविव दैक्षपशावपि दीक्षितदण्डादन्य एव कश्चिद्दण्डो योजनीयः। न चैतदुपपद्यते। न चोभयमपि विकल्पेन योजयितुं शक्यमिति वाच्यम्। वस्तुतः क्रीते सोम इति विधेः सत्त्वेन तद्वशान्मैत्रावरुणार्थत्वेन सिद्धस्य प्रयोजनाकाङ्क्षस्य दीक्षितदण्डस्यैव तत्र योजनीयत्वात्। अतस्तत्र तद्विधिमात्राप्रवृत्त्यपेक्षया परिसंख्यैव केवलमेष्टव्येति। तत्र क्रीते सोमइतिविधेरप्यप्रवृत्त्यपेक्षया समापतन्नियमविधिलक्षणसाङ्कर्यमनिष्टमेव। तथा स्वयोनिषु गीयमानानां क्रतुसाम्नामेकं साम तृचे क्रियते स्तोत्रीयमिति विध्यनुसारेण कयोश्चिदन्ययोरप्यृचोर्गाने कर्त्तव्ये प्राप्ते यद्योन्यां तदुत्तरयोर्गायतीतिवचनं क्वचिदुत्तरयोः प्राप्त्यर्थं क्वचि-

त्तयोर्नियमार्थमिति प्रागुक्तम् । तत्रैकं सामेति विधेराय-प्रवृत्तौ यद्योन्यामिति वचनं क्रतुसाम्नां तद्योनेराच्छिद्योत्तरयोरेव गानप्राप्त्यर्थमिति प्रसज्येत । न चैतदिष्टम् । वस्तुतस्तृचगानप्रापकविधिबलाद्यद्योन्यामिति विधानस्य योनेरनाच्छिद्य क्रतुसाम्नामुत्तरयोरपि प्राप्तिनियमार्थत्वात् : इदमुपलक्षणम् । व्रीहिशास्त्रस्यपणविध्याद्यप्रवृत्त्यपेक्षायामवहननादिविधयो ऽर्थकर्मविधय: प्रसज्येरन्नित्यादीन्यपि दूषणानि द्रष्टव्यानि । तस्मादाश्रयभेदेन प्रथमचरमभावेनान्यथा वा विधिनियमपरिसंख्यालक्षणफलसाङ्कर्यवदेकानेकविध्यप्रवृत्त्यपेक्षया तल्लक्षणसाङ्कर्यं न युक्तमभ्युपगन्तुमिति तत्तद्विध्यप्रवृत्त्यपेक्षयैव लक्षणान्युपपादनीयानि । ननु तथा सति नियमपरिसंख्यालक्षणयोर्व्रीहियवसात्तदश्यादिशास्त्रेष्वव्याप्तिः स्यादित्युक्तमिति चेत् किं कुर्मस्तत्संग्रहार्थमेकानेकविध्यप्रवृत्त्यपेक्षायां हि बलवन्त्यनिष्टानि दर्शितानि । तस्मादपूर्वविधिलक्षणस्य स्वर्गकामवाक्याद्यव्याप्तिवन्नियमपरिसंख्यालक्षणयोरपि तदव्याप्तिरनिवार्यैव । अतः सति सप्तमीपक्षो ऽपि न युक्त इति भावः । किं चाप्राप्ते इत्यस्य सतिसप्तमीपक्षे परिसंख्यानिवर्त्तकत्वं न लभ्यत इति दूषणान्तरमाह ।

किं चाप्राप्ते सतीति प्रभवति
परिसंख्यानिवृत्तिं न कर्तुम् नि-
त्याप्राप्तां निवृत्तिं घटयति खलु

सा ऽप्यत्र को वा विशेषः ॥ भावाप्राप्तिनिषेधात्मकविधिनिकरव्यापकाव्याप्तिदुष्टा सत्यप्येवं निषेधश्रुतिमुखपरिसंख्यासु चातिप्रसक्तिः ॥ ११ ॥

अप्राप्ते सतीतिविशेषणं परिसंख्यानिवृत्तिं कर्त्तुं न प्रभवति । यतः परिसंख्याप्यत्यन्तमप्राप्तामितरनिवृत्तिं प्रापयत्येव । तथा च "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त" इति परिसंख्याविधिः प्राप्तविषयो ऽपि गर्दभरशनातो निवृत्तौ मन्त्रमप्राप्तायाः तस्यास्तत्प्राप्तिफलको भवतीति कथं विषयसप्तमीपक्षइव सतिसप्तमीपक्षे तद्व्यावृत्तिरप्राप्तिविशेषणेन लभ्येत । न ह्यपूर्वविधितः परिसंख्याविधेरप्राप्तप्राप्तिफलकत्वे ऽस्ति कश्चिद्विशेषः । नन्वयमस्ति विशेषः । यत्परिसंख्याविधौ निवृत्तिरूपस्याभावस्याप्राप्तस्य प्राप्तिः फलम् । अपूर्वविधौ तु भावस्येति भावाप्राप्तिरेव चेह्राप्राप्तिरित्यनेन विवक्षिता । लोके प्राप्तिशब्दस्य निवृत्तिप्रतिभटवाचित्वेन प्रसिद्धतया भावशब्दाप्रयोगे ऽपि तद्विषयत्वलाभादिति चेत् । एवं सति निषेधात्मकेषु "दीक्षितो न जुहोति" "न तौ पशौ करोति" "नातिरात्रे षोडशिनं गृह्णाति" इत्यादिसर्वेष्वप्यपूर्वविधित्वव्याप्तिः स्यात् । तेषां दीक्षामध्यपश्वतिरात्राद्यप्राप्तपुरुषार्थहोमाज्यभागषो-

ङ्शिनिवृत्त्यादिरूपाभावप्राप्तिफलकत्वात् । न च निषेधस्य विषयो न भवन्तीति वाच्यम् । दर्शपूर्णमासिके "नानृतं वदेदि"ति निषेधे सूत्रकृतैव विधित्वस्य व्यवस्थापितत्वात् । नन्वनुवादप्रतियोगिविधित्वं तत्र तस्य व्यवस्थापितम् । तत्र हि तस्य दर्शपूर्णमासप्रकरणे श्रुतस्य "नानृतं वदेदि"तिनिषेधस्य स्मृतिदृष्टपुरुषार्थनिषेधानुवादकत्वमाशङ्क्य क्रत्वङ्गत्वेनानृतवदनवर्जनविधिरयं तेन क्रतुमध्येऽनृतवदने पुरुषार्थनिषेधातिक्रमात् प्रत्यवायवत् क्रत्वर्थनिषेधातिक्रमात् क्रतुवैगुण्यं च भवतीत्युक्तम् । इह तु निषेधप्रतियोगिविधित्वं लक्ष्यरूपम् । अतो न तदव्यापनं दोष इति चेत् । मैवम् । इहाप्यनुवादप्रतियोगिविधेरेव लक्ष्यत्वात् । अपूर्वविध्याद्युदाहरणेषु विधित्वसमर्थनाय प्राप्त्यप्राप्तिविवेचनवन्नोवाभावविवेचनादर्शनात् । भवतु वा विधिमुखप्रवृत्तापूर्वविधीनामेवात्र लक्ष्यत्वाङ्गीकारेण कथं चिदव्याप्तिपरिहारस्तथाप्युक्तविवक्षायां निषेधमुखप्रवृत्तपरिसंख्यातिव्याप्तिरनिवार्या तत्राप्राप्तत्वेन प्रापणीयाया इतरनिवृत्तेर्भाववरूपत्वात् । यथा शंय्वन्ता प्रायणीया सन्तिष्ठते न पत्नीः संयाजयतीति अत्र प्रायणीयायाः शंय्वन्तसमापनविधानात्तत उदीच्यानां सर्वेषामङ्गानामकरणे प्राप्ते न पत्नीः संयाजयतीतिवचनं पत्नीसंयाजानेव न कुर्यादङ्गान्तराणि तु कुर्यादितिपरिसंख्यारूपेण प्रायणीयायामङ्गान्तरप्राप्त्यर्थं यथा वा शङ्खस्मृतौ तैजसद्रव्यशुद्धिप्रकरणे ।

सूतिकोच्छिष्टभाण्डस्य सुरामद्याहतस्य च ।
त्रिःसप्तमार्जनाच्छुद्धिर्न तु कांस्यस्य तापनम् ॥

इति अत्र मार्जनवत्तापनस्य विधानाभावात्सर्वेषां तैजसान्तराणां तापनाकरणे प्राप्ते न तु कांस्यस्येति वचनं कांस्यस्य च तापनं न कार्यमन्यस्य तु कार्यमिति परिसंख्यारूपेण तैजसान्तराणां तापनप्राप्त्यर्थं तथैव व्याख्यातमपरार्केण तैजसानां सूतिकोच्छिष्टादिके स्वल्पोपघाते यवचूडादिभिरेकविंशतिकृत्वो मार्जनाच्छुद्धिर्न तु कांस्यस्य तापनमर्थात्कांस्यव्यतिरिक्तस्य तापनमपि कार्यमिति गम्यतइति यद्यप्यत्रोदाहरणे वस्तुतः परिसंख्या नेष्यते शंय्वन्तसंस्थायाः परिसंख्यायाश्च विधिद्वयेन वाक्यभेदस्य तुल्यबलविधिद्वयप्राप्तयोः शंय्वन्तसंस्था पत्नीसंयाजवर्ज्जं कृत्स्नसंस्थयोर्विकल्पस्य प्राप्तविषयत्वेन चिदोषायाः परिसंख्यायाश्च परिहाराय न पत्नीः संयाजयन्तीति शंय्वन्तसंस्थाविधेरर्थवादः पत्नीसंयाजाननुष्ठानलाघवेन तत्प्रशंसार्थ इति शंय्विडान्तत्वे विकल्पः स्यादिति दाशमिकाधिकरणे निर्णीतत्वात्। तथापि पूर्वपक्षरीत्या तदुदाहरणं यत्रैवं विध्यन्तरशेषत्वं न सम्भवति तत्र तदधिकरणपूर्वपक्षरीत्या परिसंख्यैवावतिष्ठतइति तथाभूतमुदाहरणमिहान्वेषणीयम्। प्रसिद्धा चान्यत्रापि न निलीवसनं धार्यं न भूपालैरनुत्सवइत्यादिषु स्मृतिषु यज्ञदत्तदेवदत्तविष्णुमित्रा न भोजनीया उत्सवेऽपि विष्णुमित्रो न भोजनीय इत्यादिलोकव्यवहारेषु च विशेषनिषेधः शेषाभ्यनुज्ञापर इति निषेधमुखपरिसंख्या। अतस्तत्रातिव्याप्तिः स्यादेवेतिभावः। एवमप्राप्तविशेषणविचारमुखेन लक्षणस्य दोषा दर्शिताः। अथात्यन्त-

विशेषणार्थविचारमुखेनापि तस्य दोषान्दर्शयति ।

येनातिव्याप्तिभङ्गः क्लिनियम-
विधौ किं तदात्यन्तिकत्वम्
सर्वोद्देश्यानुवृत्तिर्यदि पुनरुदि-
ता व्याप्तयः स्युर्विकल्पे । प्रा-
प्तोद्देश्यैकदेश्या अपि खलु कु-
हचिद्वारितार्थं भजन्तः श्रूयन्ते
सार्वकाम्यप्रभृतिषु विधयस्तेषु
चाव्याप्तयः स्युः ॥ १२ ॥

येन विशेषणेन नियमविधौ लक्षणस्यातिव्याप्तिनिरासोऽभिमतस्तदप्राप्तेरात्यन्तिकत्वं किं नाम यद्युच्यते सर्वोद्देश्यानुवृत्तिरप्राप्तेरात्यन्तिकत्वम् अवघातस्य च न सर्वेषु व्रीहिष्वप्राप्तिः केषुचिद्दर्शपूर्णमासप्रयोगगतेषु व्रीहिष्ववघातस्य स्वत एव प्राप्तेरन्येषु विदलनप्राप्तिस्तेष्वेव तदप्राप्तिसत्त्वादिति एवं तर्हि प्रथमश्लोकोद्भाविताऽव्याप्तयः प्राक् समाहिताः पुनरपि विकल्पमुखेनोन्मज्जेयुस्तथा हि सर्वोद्देश्यानुवृत्तिरित्यत्रोद्देश्यपदेन प्रायणीयोद्देश्यं विवक्षितं, प्रकृतिविध्युद्देश्यं वा, आद्ये विषयसप्तमीपक्षोद्भावितवैकृताग्न्यादिविध्यव्याप्तेर्द्वितीये सतिसप्तमीपक्षोद्भाविताग्रताविध्यव्याप्तेश्च पुनरुन्मज्जनापातः । "श्ये-

नचितं चिन्वीत स्वर्गकाम" इत्यादिवाक्यैः स्वस्वोद्देश्येषु स्वर्गादिषु श्येनाकृत्यादिगुणानां प्राप्तौ सत्यामेव स्वर्गाद्युद्देशेन तेषामनुष्ठानं वैकृतप्रयोगमध्ये परं न प्राप्तमिति विकृतिष्वग्न्यादिपुनर्विधीनां तत्प्रापणं फलमित्युपेयते एवमग्रताविध्युद्देश्येषु द्वादशाहिकगवामयनिकेषु आद्यद्वितीयेष्वहःसु प्राप्तानामेवाग्रतानां तद्विकृतिषु प्राप्तिर्विधिफलमित्युपेयते। तत्र विकृतिषु प्रापणीयानां श्येनादिगुणानां स्वस्वोद्देश्येषु स्वर्गादिष्वग्रतानां च विध्यन्तरोद्देश्ये द्वादशाहिकगवामयनिकेष्वहःसु क्वाचित्कप्राप्तिर्नास्ति कथं सा सार्वत्रिकी समर्थ्येत अपि चोद्देश्यैकदेशे प्राप्तिमन्तोऽपि तदेकदेशान्तरे चरितार्था विधयो दृश्यन्ते यथा "एकस्मै वा अन्ये यज्ञक्रतवः कामायाक्रियन्ते सर्वेभ्यो ज्योतिष्टोमः सर्वेभ्यो दर्शपूर्णमासावि"ति अत्र ज्योतिष्टोमदर्शपूर्णमासानां स्वर्गार्थत्वं प्रातिस्विकविधिना प्राप्तमिति फलान्तरेष्वेव विधिचारितार्थ्यं यथा वाभ्युदयेष्ट्यां तण्डुलान्विभजेदिति तण्डुलदधिश्रितानां पूर्वदेवतापनयो वक्ष्यमाणदेवताभ्यो त्रिभागो वा मध्यमादिवाक्यैस्तेषां देवतान्तरविधानेनैव प्राप्त इति उपांशुयाजाज्यएव विधिचारितार्थ्यं तथा हि "विवा एत प्रजया पशुभिरर्द्धयति वर्द्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति स त्रेधा तण्डुलान्विभजेद्ये मध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधञ्श्चरुं येऽणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुमिति श्रूयते अत्र चतुर्दश्याममावास्याभ्रान्त्या दर्शोपक्रमं कृतवतस्त-

प्रायश्चित्तविधाने त्रेधा तण्डुलानां मध्यमादिभावेन त्रेधा विभागो न विधीयते ये मध्यमा इत्यादिवाक्यैस्तत्सिद्धेः किं तु सर्वेषां दार्शिकहविषां पूर्वदेवताभ्योऽपनयो विधीयते विभजेदित्युक्ते ह्ययमर्थोऽवगम्यते यानि संयुक्तानि तानि विभजेदिति । तण्डुलादीनि हवींषि च देवताभिः संयुक्तानि अतस्तण्डुलशब्दो विभागकर्मत्वेनार्थप्राप्तदार्शिकहविर्मात्रोपलक्षक इति तेषां पूर्वदेवतापनयो विधीयतइति युक्तम् । अथ वा मनुः पुत्रेभ्यो दायं व्यभजेदिति प्रयोगदर्शनादिह दार्शिकहविषां वक्ष्यमाणदातृत्वादिगुणकाग्न्यादिदेवताभ्यो विभजनं विधीयते पूर्वदेवतापनयस्त्वर्थसिद्ध इत्येवमस्य वाक्यस्यार्थद्वयं भाष्यटुप्टीकयोर्दर्शितम् । तत्रार्थद्वयेऽपि तण्डुलदधिसृतेषु न विधेश्चारितार्थ्यं देवतान्तरसंयोजनेन पूर्वदेवतापनयस्य विशेषतो विभजनेन सामान्यविभागस्याप्यर्थप्राप्तत्वात् । किं तु तण्डुलशब्देन दार्शिकहविर्मात्रोपलक्षकेन लक्ष्यमाणे उपांशुयाजाज्ये तस्य चारितार्थ्यम् उपांशुयाजाज्यस्याग्रे देवतान्तरसंयोजनाभावेन पूर्वदेवतापनयस्य सामान्यविभजनस्य चार्थप्राप्त्यभावात् । अत एव पूर्वदेवतापनयपक्षे उपांशुयाजाज्यस्य पूर्वदेवताया अपनयात् देवतान्तरस्य चाविधानात् देवतान्तरेण यष्टुमशक्यत्वात् उपांशुयाजस्य लोपः । सामान्यविभजनपक्षे उपांशुयाजाज्यस्यापि सामान्येन वक्ष्यमाणदेवताभ्यो निर्दिष्टत्वादग्रे देवतान्तरविशेषस्य चानिर्देशाद्वक्ष्यमाणाभ्यः सर्वाभ्यो देवताभ्यो विभज्य दातव्यमिति भाष्यटुप्टीकयोरुपांशुयाजे वचनाद्यथाप्रकृतीत्येतदधिकरणे बहृच-

ब्राह्मणानुसारेणामावास्यायामुपांशुयाजसत्तामभ्युपेत्य निरूपितम् । ननु तण्डुलशृतसान्नाय्येष्वपि पूर्वदेवतापनयसामान्यविभागौ नार्थसिद्धौ त्रेधा तण्डुलानित्यत्र तदन्यतरविध्यभावे दार्शिकहविषां प्रकृतदेवतातिरिक्तदेवताविशेषाकाङ्क्षाविरहेण मध्यमादिवाक्यानि तेषां अपूर्वदेवताविशेषसंयोजनपराणीत्यत्र निर्णायकाभावात् न हि तदा मध्यमादिशब्दानां प्रकृततण्डुलादिपरत्वे नियामकमस्तीति चेत् । न । यच्छब्दोपबन्धबलात् तण्डुलानां प्रकृतानां ग्रहणे तत्समभिव्याहाराद् दधिशृतयोरपि प्रकृतयोर्ग्रहणमित्युपपत्तेः । न चानपनीतपूर्वदेवातानां तेषां देवतान्तराकाङ्क्षाविरहेण तत्संयोजनानुपपत्तिः । पूर्वदेवतापनयाकाङ्क्षाविरहेऽपि तदपनयवद् देवतान्तरसंयोजनस्याकाङ्क्षाविरहे तत्संयोजनस्य वचनबलादुपपत्तेः । सामान्यतो विभजनपक्षे विनैव पूर्वदेवतापनयं देवतान्तरसंयोजनस्य तत एव पूर्वदेवतापनयस्यार्थसिद्धतायाश्च संप्रतिपन्नत्वेश्च । अतस्त्रेधा तण्डुलानिति विधेरप्युद्देश्यैकदेशएवचारितार्थ्यं तस्मात्सर्वोद्देश्यानुवृत्तिप्राप्तिरहितेषूदाहृतविधिष्वव्याप्तिः स्यादित्यर्थः । स्यादेतत्सर्वोद्देश्यानुवृत्तिरिह न सर्वासूद्देश्यव्यक्तिष्वप्राप्तेरनुवृत्तिर्विवक्षिता किंत्वेकस्याप्युद्देश्यव्यक्तौ सर्वात्मनानुवृत्तिस्तद्व्यापित्वरूपा एवं च सार्वकाम्यविध्यादिषु नाव्याप्तिः तेषु स्वर्गातिरिक्तफलोपांशुयाजद्रव्यादिरूपकिंचित्किंचिदुद्देश्यव्यापकाप्राप्तेः सत्त्वात् । नापि नियमव्यावृत्त्यलाभः नियमविधौ क्वचिदुद्देश्ये व्यापिकायोरप्राप्तेरभावात् सर्वेष्वपि दर्शपूर्णमासिकेषु व्रीहिष्वाक्षेपादवहननस्य पाक्षिक

प्राप्तिसत्त्वात् न । हि व्रीहीनवहन्तीति नियमविध्यभावे केषु चिद्व्रीहिष्ववहननं केषुचिद् विदलनादिकं च व्यवस्थितमाक्षेपतः प्राप्यते येन क्व चिदप्युद्देश्ये तदप्राप्तिर्व्यापिका स्यात् किं तु सर्वेष्वपि व्रीहिष्ववहननेन वा वैतुष्यं कार्यं विदलनादिना वेति तदुभयमपि पक्षे प्राप्यते नचैकत्रोभयानुष्ठानस्य विरुद्धत्वादुभयोः प्राप्तिर्नास्तीति शङ्कनीयं न हि प्राप्तिर्नामानुष्ठानमेव तथा सति क्वचिद्दर्शपूर्णमासप्रयोगे विदलनस्याप्यनुष्ठाने नियमविधिविरोधापत्तेः । किं तु नियमविध्यभावे लोकसिद्धवैतुष्यकारणत्वात्तदर्थमवहननं विदलनादिकं वानुष्ठीयेतेत्येवममनुष्ठानतर्कणमात्रं प्राप्तिः तच्चैकत्रापि न विरुद्धं न ह्यविरोधे ऽपि नियमविध्यभावे क्वचित्प्रयोगे ऽवहननं प्रयोगान्तरे विदलनादिकं चानुष्ठीयेतेत्येव तर्कः प्रवर्त्तत इति नियन्तुं शक्यते.क्वं चित्प्रयोगविशेषमेवाधिकृत्य नियमशास्त्राभावे इहावहननं विदलनादिकं वानुष्ठीयेतेत्येवमपि तर्कप्रवृत्तिसम्भवात् तस्मादुक्तविवक्षायां न कश्चिद्दोष इत्यत आह ।

उद्देश्यव्यापिका सा यदि भवति तदा ऽप्यादिमाव्याप्तिबन्धः स्यादव्याप्तिश्च गावामयनिकषडहे पृष्ठसाम्नोर्विधाने । अन्यार्थप्रापणोक्तन्नियमहरणयोरप्य-

तिव्याप्तिरित्थम् तच्चेत् नैका-
लिकत्वं न विधिरपवादापवा-
दस्तथा स्यात् ॥ १३ ॥

एवं विवक्षायामपि प्रथमश्लोकोक्ताग्निविध्याद्यव्याप्ति-पुनरुन्मज्जनरूपः प्रागुक्तदोषः स्यादेव तदुदाहरणेषु क्वचिदपि तत्तदुद्देश्ये ऽप्राप्तेरभावात् अन्यच्च चाव्याप्ति-रधिका स्यात् तथा हि द्वादशाहे पृष्ठ्यः षडह उत्पन्नः स च क्रमेण रथन्तरबृहद्वैरूपवैराजशाक्वररैवताख्यपृष्ठ-स्तोत्रसाधनसामवतां षण्णामह्नां समाहारः गवामयने पुनः श्रूयते पृष्ठ्यः षडहो बृहद्रथन्तरसामा कार्य इति तेन गवामयनिकषडहस्य बृहद्रन्तरे एव पृष्ठसामनी इति वैरूपादीनि निवर्त्तन्ते। ततश्च षडहोद्देशेन बृहद्रथन्तरविधौ आद्यस्याह्नो रथन्तरसामत्वं द्वितीयस्य बृहत्सामत्वं च द्वादशाहिकषडहे क्लृप्तमिहापि प्राप्त-मित्युद्देश्यव्यापकाप्राप्तेरभावादव्याप्तिः। नन्विहैकैक-स्याह्नो बृहद्रथन्तरसामत्वं विधीयते संसव उभे कुर्यात् गोसव उभे कुर्यादित्यादौ यथा तत्तु क्वचिदप्यहनि न प्राप्त-मिति चेत्। न। प्रकृतौ बृहद्रथन्तरयोः परस्परनैरपे-क्ष्येण पृष्ठस्तोत्रसाधनत्वात्तथैव प्राकृतनैरपेक्ष्याबाधेन क्वचित् बृहत् क्वचिद्रथन्तरमिति विधानोपपत्तौ तद्बाध-नायोगात्। न च वाच्यं बृहच्च रथन्तरं च बृहद्रथन्तरे बृहद्रथन्तरे सामनी अस्येति बृहद्रथन्तरसामेति द्वन्द्व-गर्भो ऽत्र बहुव्रीहिस्ततश्च द्वन्द्वावगतसाहित्यबलादेकैक-

स्यात् उभयसामत्वं विधेयमिति अकृत्वैव द्वन्द्वसमासं बृहत्सामास्य रथन्तरं सामास्येत्यनेकपदबहुव्रीहिस्वीकारसम्भवात् । न च द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनमिति कात्यायनवचनादिह द्वन्द्वसमासो नियत इति वाच्यम् । यत्र द्वन्द्वतत्पुरुषयोः सतोरन्यच्छब्दरूपमसतोश्चान्यद्भवति तत्र समासकृतरूपनियमार्थं तद्वार्त्तिकप्रवृत्तेः । यथा वाक्त्वचप्रियः पञ्चगवधन इति । अत्र हि द्वन्द्वतत्पुरुषयोरकरणे द्वन्द्वाच्चुदषहान्तात्समाहार इति गोरतद्धितलुकीति समासान्तप्रत्यययोरप्राप्तेर्वाक्त्वक्प्रियः पञ्चगोधन इतिरूपं सिद्ध्येत् इह तु द्वेधापि रूपस्याभेदान्न्यायतोऽर्थे निर्णेतव्ये प्रत्येकप्राप्तिचोदकानुग्रहायानेकपदबहुव्रीह्याश्रयणमेव युक्तम् । यद्यपि द्वन्द्वगर्भ एवात्र बहुव्रीहिः स्यात्तथापि प्रकृततः प्राप्तं नैरपेक्ष्यं न बाधितव्यम् । षडहापेक्षया साहित्यस्यार्थप्राप्तस्य तद्विषयत्वोपपत्तेः । अन्यथा बृहद्रथन्तरयोः षडहसंबन्धस्य तयोरेकैकस्मिन्नेवाहनि साहित्यस्य च विधेयत्वे बृहद्रथन्तरे एवास्य षडहस्य सामनी ते चैकैकस्मिन्नहनि परस्परसहिते कर्त्तव्ये इत्यनेकार्थविधानेन वाक्यभेदप्रसङ्गात् । न ह्यत्र संस्थवादिवच्चोदकप्राप्तयोर्बृहद्रथन्तरयोः साहित्यमात्रविधानं शक्यम् । तृतीयादिष्वहःसु तयोरपि प्रापणीयत्वात् तस्मादिह नोभयसामत्वविधानं तथैव व्यवस्थापितं पृष्ठस्य युगपद्विधेरेकाहवद् द्विसामत्वमिति दाशमिकाधिकरणे । नन्वस्त्वेकैकस्याहन् एकैकसामविधानं तथाऽपि बृहद्रथन्तरसामेति पाठक्रमादाद्यस्याह्नो बृहत् द्वितीयस्य रथन्तरमित्यनेन क्रमेण बृह-

द्रथन्तरसामत्वं विधेयं तत्तु क्वचिदपि न प्राप्तमित्युद्दे-
श्यव्यापिकाप्राप्तिरस्तीति चेत् न। प्राकृतप्राप्तबाधेनाद्य-
स्याह्नो रथन्तरं द्वितीयस्य बृहदित्यनेन क्रमेण विधाने
सम्भवति अल्पाच्तरपूर्वनिर्देशार्थतया अन्यथासिद्धेन
बृहद्रथन्तरपाठक्रमेण प्रकृतिप्राप्तबाधनायोगात् जगतीं
वै छन्दांसि प्रत्यवरोहन्ति आग्रयणं ग्रहा बृहत्पृष्ठा-
नीति गवामयनस्योत्तरे पक्षसि षाडहिकस्य पञ्च-
मस्याह्नो बृहत्पृष्ठत्वलिङ्गेनाद्यस्य रथन्तरं द्वितीय-
स्य बृहदित्यादिक्रमस्यैव निर्णयाच्च। बृहद्रथन्तर-
सामा कार्य इत्यादिविधयो हि गवामयनस्य पूर्व-
स्मिन्पक्षस्यवान्तरप्रकरणे न निविशन्ते पूर्वस्मिन्पक्ष-
स्यनुष्ठिताश्च छन्दोनीकपृष्ठसामस्तोमगणा उत्तरे प-
क्षसि प्रातिलोम्येनानुष्ठेयाः। प्रत्यवरोहिणो मासा भव-
न्ति उत्तरे पक्षस्यावृत्ता गणा इत्यादिदर्शनात्। ततश्च
यदि पूर्वस्मिन्पक्षसि अयुग्मस्याह्नो रथन्तरं युग्मस्य बृ-
हदिति नियमः स्यात्तदैवोत्तरे पक्षस्ययुग्मस्य पञ्चमस्या-
ह्नो बृहत्पृष्ठतादर्शनमुपपद्यते तस्मात् बृहद्रथन्तरसामा
कार्य इत्यवाद्यस्याह्नो रथन्तरं द्वितीयस्य बृहदित्यादि-
क्रमेणैव षडहोद्देशेन बृहद्रथन्तरसामत्वं विधीयते त-
स्य च षडहरूपोद्देश्यव्यापिका प्राप्तिर्नास्तीति अव्याप्ति-
रनिवार्या। अपि च यैर्विधिभिः स्वोद्देश्ये विधेयस्या-
प्राप्तस्य प्रापणं क्रियमाणमपि तत्प्रवृत्तिविशेषकरत्वा-
दन्यार्थत्वं वाच्यमिति। तेन कस्य चित्प्रापणं नियमनं
परिवर्जनं वा समुदेति तेषां नवमश्लोकावतारिकोदाहृ-
तानां मध्ये यावदन्यार्थप्रापणोद्यन्नियमपरिवर्ज्जनविधी-

साम्ना स्तुवीत यदि रथन्तरसामा सोमः स्यादिति त-
योर्विध्योरतिव्याप्तिरप्येवं स्यात् । विषयशुद्ध्यर्थमन्यदपि
नियमविधिरूपमतिव्याप्तिस्थलमुदाह्रियते । प्रजापति-
र्वा इदमेक आसीदित्यादिना प्रजापतेः सृष्टाग्निवाय्वा-
दित्येभ्योत्पन्नत्वेन वेदानां प्रशंसयोपक्रम्य श्रूयते तस्मादु-
च्चैरृचा क्रियते उपांशु यजुषा उच्चैः साम्नेति अत्रोप-
क्रमे वेदानां प्रशंसया वेदविषये किं चिद्विधास्यत इत्य-
वगमात्तदनुरोधेन ऋगादिशब्दा ऋगादिप्रायऋग्वेदादि-
पराः । तथा च ऋग्वेदेन यत् क्रियते विधीयते तदुच्चै-
रित्यादिप्रकारेण ऋग्वेदादिविधेयकर्मोद्देशेनोच्चैस्त्वा-
दिविधय । इति स्थितमुपक्रमाधिकरणे । कर्मसु च सा-
ध्यान्निवेशमुच्चैस्त्वादयो न लभन्ते अतस्ते तदङ्गमन्त्रेष्व-
वतरन्त ऋग्वेदादिविधेयकर्माङ्गमन्त्राणामनियतस्वर-
प्राप्तौ स्वरविशेषनियमार्था एते विधयः पर्यवस्यन्ति ।
ततश्चैतेषु विधिषु विधेयानामुच्चैस्त्वादीनां पाक्षिका-
न्वयविषयेषु मन्त्रेषु पाक्षिकप्राप्तिसत्त्वे ऽप्युद्देश्येषु क-
र्मसु कथमपि प्राप्त्यभावात्तेष्वपि लक्षणस्यातिव्याप्तिः
स्यात् । ननु कर्मोद्देशेनोच्चैस्त्वादिविधयो ऽप्राप्तवि-
षयत्वादपूर्वादिविधय एव युक्ताः कथमतिव्याप्तिरिति
चेत् । उच्यते । यत्र यदनुष्ठानं यस्य विधेः फलं तत्र त-
दनुष्ठानप्राप्त्यप्राप्तिविवेचनेनैव नियमापूर्वविधित्वव्यव-
स्था कार्या । ननु यत्र यच्छेषत्वं विधिबोध्यम् तत्र तच्छे-
षत्वप्राप्त्यप्राप्तिविवेचनेन तथा सत्यवघातगतापूर्वीयत्व-
शेषत्वाप्राप्त्या तद्विधेरप्यपूर्वविधित्वप्रसङ्गात् । न हि तत्रो-
द्देश्यतावच्छेदकावच्छेदेनाप्राप्तिरिद्देश्यस्वरूपएवाप्रा-

प्तिरित्येतावता कश्चिद्विशेषोऽस्ति विवक्षितरूपभेदेनात्यन्ताप्राप्तेरुभयत्राप्यविशिष्टत्वात्। न च केनापि रूपेण प्राप्त्यभाव एवात्यन्ताप्राप्तिः स्वर्गादिगतयागकार्यत्वादेरपि सामान्यतो दृष्टानुमानात्प्राप्तिसम्भवेन तत्रापूर्वविध्यभावापत्तेः। ततश्च यथापूर्वीयोद्देशेनावघातविधानेऽपि व्रीहिष्ववघातानुष्ठानमेव विधेः फलं तत्तु पक्षे प्राप्यत इतिनियमविधिराश्रितः। एवमिह ऋग्वेदादिविधेयकर्मोद्देशेन स्वरविशेषविधानेऽपि तदङ्गमन्त्रेषु स्वरविशेषानुष्ठानमेव विधेः फलं तत् पक्षे प्राप्यत इति नियमविधिरेवाश्रयितुं युक्तः। अनेनैव न्यायेन पूर्वोदाहृतविध्योरपि नियमपरिसंख्यात्वमुपपादनीयम् ननु गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग इत्यधिकरणे भाष्यकारेण याजुर्वेदिकस्याधानस्य सामवेदे वारवन्तीयमङ्गं विहितं तत्र वारवन्तीयस्य किं स्वविधिनिबन्धनं सामवेदिकमुच्चैस्त्वं कार्यमुत प्रधानविधिनिबन्धनं याजुर्वेदिकमुपांशुत्वमिति सन्देहे प्रधानविधिनिबन्धनस्य स्वरस्य प्रधानैकवाक्यतापेक्षित्वेन विलम्बितत्वात्तदनपेक्षतया शीघ्रं प्रतीयमानमुच्चैस्त्वं कार्यमिति प्रापय्य राद्धान्तितम् विलम्बितप्रतीतिकमप्युपांशुत्वं प्रधानधर्मत्वाद्बलीयः प्रधाने साक्षान्निवेशमलभमानतयाङ्गावतीर्णमपि हि तत्प्रधानस्यैव धर्मः अतोऽङ्गधर्मं उच्चैस्त्वं बाधित्वा प्रधानधर्मं उपांशुत्वं कार्यमन्यथा प्रधानवैगुण्यापत्तेरिति। एवं च प्रधानकर्मोद्देशेन स्वरविशेषविधानानां न केवलं तदङ्गमन्त्रेष्वनियतस्वरप्राप्तिमत्सु प्रधानस्वरनियममात्रं फलं किं तु नियतस्वविधिनिबन्धनस्वरप्राप्ति-

मन्त्रु वारवन्तीयादिषु तद्यावर्त्तनेनाप्राप्तप्रधानस्वरप्रा-
पणमपि फलम् । अतश्चापूर्वविधित्वं युक्तमिति चेत् । अस्तु
नामैवं तथापि अनियतस्वरप्राप्तिमन्त्रमन्त्राश्रे नियमवि-
धित्वमपि वक्तव्यं विनिगमनाविरहादित्यतिव्याप्तिरनि-
वार्यैव । न च्चावहननो नियमविधिरेव न परिसंख्येत्यत्रावन-
हननियमस्य विदलनादिनिवृत्तिं प्रत्युपजीव्यत्वमिव
रशनादानमन्त्रविधिः परिसंख्यैव न नियमविधिरित्यत्र
गर्दभरशनानिवृत्तेरनन्यलभ्यत्वमिव चेह विधिरेव न
नियम इत्यत्र किं चिद्विनिगमकमस्ति इह तयोरुपजी-
व्योपजीवकभावाभावात् द्वयोरप्यनन्यलभ्यत्वाच्च । न चैक-
स्यैव विषयभेदेन विधिनियमरूपत्वे कश्चिद्दोषः विधित्रै-
रूप्याभावेन पूर्वश्लोकोदाहृतसार्वकाम्यादिवाक्यानां वि-
ध्यनुवादरूपत्ववदेतेषां विधिनियमरूपत्वस्याप्युपपत्तेः ।
अत एव प्रागाश्रयविषयभेदेन विधिनियमपरिसंख्यानां
संकरो दर्शितः ॥ स्यादेतन्माभूत्सर्वैषूद्देश्येष्वनुवृत्तिरूपा
वा सर्वात्मना क्वचिदप्युद्देश्ये ऽनुवृत्तिरूपा वा सर्वोद्दे-
श्यानुवृत्तिरात्यन्तिकत्वं किं तु त्रैकालिकत्वं त्रिकाला-
यामप्राप्तौ विधिरिति प्रसिद्धेरिति चेदेवं सति अपवा-
दापवादविधिर्न स्यात् । तस्य प्राप्तापोदितपुनः प्रा-
प्त्यर्थत्वात् । तथा हि कृष्णलचरोः अपणं श्रूयते हुते
अपयतीति । नेदमपूर्वश्रपणं विधीयते किं तु दार्शपूर्ण-
मासिकश्रपणं विक्लित्तिरूपप्रयोजनाभावान्निवर्त्तमानं प्र-
तिप्रसूयते अतः प्राकृताः श्रपणधर्माः कर्त्तव्या इति
स्थापितं दशमे । ननु तत्र प्रतिप्रसवरूपस्य श्रपणविधेर-
पूर्वविधित्वं नास्तीत्यङ्गीकृतं टुप्टीकायां तत्र ह्युक्तं त-

स्यात्पाकान्तरं नैतदपूर्वविधिदोषता प्राप्तिप्रसवमात्रं तु लाघवादिष्टितं वरमिति । सत्यमुक्तं तस्य अपवादान्तरं न विधेयमत्यन्तमबुद्धिस्थस्य विधौ तस्य बुद्ध्यारोहणकल्पनागौरवात् । किं तु चोदकानीततया स्वत एव बुद्ध्यारूढमर्थाभावान्निवर्त्तमानं प्राकृतमेव अपवां विधेयमित्यत्र तात्पर्यं न तु न प्रतिप्रसवविधिरपूर्वविधिरित्यत्र तात्पर्यं तदभावे अपवादस्यापोदितस्य प्राप्त्यसम्भवेन तस्यापूर्वविध्यन्तर्भावौचित्यात् । अन्यथा नियमपरिसंख्यानन्तर्भूतस्य विध्यन्तरत्वापत्त्या विधित्रैविध्यभङ्गप्रसङ्गात् । एवं पूषा प्रपिष्टभाग इति पौष्णचरौ चोदकतः प्राप्तस्य प्राकृतस्य पेषणस्य प्रयोजनाभावान्निवर्त्तमानस्य विधिरपि प्रतिप्रसवविधिः । एतादृशाप्राप्तस्यापवादे प्रसक्ते तदपवादार्था विधयः एतेषु प्राक्प्राप्तिसत्त्वात् त्रैकालिकाप्राप्तिर्नास्तीत्यव्याप्तिः । केचित्पुनः प्रसक्तप्राप्तिकस्य प्रागेवापवादे प्रसक्ते सन्ति विधयः अपबर्हिषः प्रयाजान्यजति अपबर्हिषो ऽनुयाजान्यजतीत्यादयः । तथा हि अवभृथस्तावद्गृहमेधीयवदपूर्वः तत्राप्सुमन्तावाज्यभागौ यजतीत्याज्यभागपुनःश्रवणेनावभृथप्रयोगविधेः क्लृप्तोपकारप्राकृताज्यभागनैराकाङ्क्षतया चोदकस्याकल्पनीयत्वात् । न च तदप्सुशब्दोपेतस्याप्सु मे सोमो ऽब्रवीदित्यादियाज्यानुवाक्यामन्त्रद्वयस्य विधानार्थम् । लिङ्गक्रमाभ्यामेव मन्त्रप्राप्त्या तदनुवादेन तस्याज्यभागविधिपरत्वात् । एवं चाज्यभागविधिना चोदककल्पनाप्रतिबन्धेन ततः प्रसक्तायां प्रयाजादिप्राप्तौ निवारितायां बर्हिर्व्यतिरिक्तप्रयाजादिप्राप्त्यर्थमपबर्हि-

ष इति श्रवणम् । एतादृशेषु नियमविध्यभावे ऽवहननं विदलनादीनामाक्षेपादिवापूर्वतापराज्यभागादिविध्यभावे प्रयाजादीनां चोदकात्प्राप्तिर्भवेदिति भविष्यत्प्राप्तिसत्त्वेन त्रैकालिकाप्राप्त्यभावादव्याप्तिः । एवमथातो ऽग्निमग्निष्टोमेनानुयजन्तीत्यादिविधिष्वव्याप्तिः दर्शितं हि नवमश्लोकावतारिकायामथातो ऽग्निमित्यादिविधेरर्थवादापवादत्वम् । तस्मात्त्रैकालिकत्वमात्यन्तिकत्वमित्यपि न युक्तमिति भावः । ननु तर्ह्यपाक्षिकत्वमात्यन्तिकत्वमस्तु युज्यते च नियमविधिव्यावृत्त्यर्थस्य तस्य तथा निर्वचनम् । नियमः पाक्षिके सतीति नियमविधिलक्षणादित्याशङ्क्याह ।

युज्येतापाक्षिकत्वं तदिति यदि निरुच्येत तत्पाक्षिकत्वं प्राप्त्या किर्मीरितत्वम् कथिततदधिकाव्याप्तिदुष्टं न युक्तम् । त्यक्तावच्छेदभेदं तदति तु नियमातिप्रसक्त्या निरास्यं तत्रोपायान्तरं तद्विरह इति तयोर्ह्यस्त्यवच्छेदभेदः ॥ १४ ॥

युज्येत तथा निर्वचनं यदि तत्प्रतियोगिपाक्षिकत्वं निरुच्येत । प्राप्तिशबलत्वं पाक्षिकत्वमिति न युक्तं पूर्व-

श्लोकयोर्दर्शिताभिः सार्वकाम्यादिविधिषु बृहद्रथन्तरसामत्वविधौ वाज्योप्तिभिस्ततोऽधिकाभिः प्रागुदाहृतेषूपदेशाख्यां प्रकृतिविकृतिसाधारणेषु द्वादशाहिकगवामयनिकाश्रुतयज्ञभागस्वरविधिषु व्याप्तिभिश्चाक्रान्तत्वात् स्यादेतत् अवच्छेदभेदं विना प्राप्तिशबलत्वमप्राप्तेः पाक्षिकत्वं सार्वकाम्यादिविधिषु स्वर्गत्वाद्यवच्छेदेन प्राप्तिस्तदितरफलत्वावच्छेदेनाप्राप्तिरित्यवच्छेदभेदसत्त्वान्नाव्याप्तिरिति चेत् एवं तर्हि विशेषणफलं नियमविधिव्यावर्त्तनं न लभ्यते एकस्मिन्नपि व्रीह्यादिद्रव्ये ऽवहननादीनामुपायान्तरप्राप्त्यवच्छेदेन प्राप्तिः तद्विरहावच्छेदेनाप्राप्तिरिति प्राप्त्यप्राप्त्योरवच्छेदभेदसत्त्वादित्यर्थः। ननु तर्ह्यवच्छेदभेदे उपायान्तरप्राप्तितद्विरहभिन्नत्वं विशेषणं निवेश्यते तथा चोपायान्तरप्राप्तितद्विरहभिन्नावच्छेदभेदं विना प्राप्तिशबलत्वं पाक्षिकत्वमिति पर्य्यवसानात्पाक्षिकत्वविशेषणेनावहननादिनियमविधिव्यावृत्तिलाभः तत्र निरुक्तपाक्षिकत्वसत्त्वात् सार्वकाम्यादिविध्यनुगमश्च तत्रोपायान्तरप्राप्तितद्विरहभिन्नस्वर्गत्वतदितरफलत्वाद्यवच्छेदभेदेनैव प्राप्त्यप्राप्त्योः करम्बिततया निरुक्तपाक्षिकत्वाभावसत्त्वादतो नात्र कश्चिद्दोष इत्याशङ्क्याह।

तद्भिन्नत्वं निवेश्यं यदि खलु तदवच्छेदभेदे ततो न व्यावृत्तिः कार्य्यपोऽप्यनुगमनबृहत्संस्त्रि-

ताया नियत्याः ॥ स्थाने वैकल्पिकोक्तिः क्रियत इति मतं यद्यपापान्तराणाम् तद्वाच्यं पाक्षिकत्वव्यतिकररहितं किन्तु वैकल्पिकत्वम् ॥ १५ ॥

एवं विवक्षया उपायविषयनियमविधिव्यावृत्तिलाभे ऽपि कार्यादिविषयतद्व्यावृत्तिर्न लभ्यते । तथा हि । यद्योन्यां तदुत्तरयोर्गायतीति विधिर्योनिसमच्छन्दस्कयोरुत्तरयोर्नियमार्थ इत्युपपादितं नवमश्लोकावतारिकायाम् । अयं च कार्यनियम एव । ऋचोः सामसंस्कार्ययोः तत्कार्यत्वात् । ततश्चोपायान्तरप्राप्तितद्विरहभिन्नकार्यान्तरप्राप्तितद्विरहरूपावच्छेदभेदेनैव प्राप्तिश्चलत्वमिति विशेषणाभावप्रयुक्तविशिष्टाभावरूपपाक्षिकत्वसत्त्वात्तेन विशेषणेनास्य व्यावृत्तिर्न लभ्यत इति तत्रातिव्याप्तिः स्यात् । तथा प्रकृत्यतिरात्रे विकल्पितस्य षोडशिग्रहस्योत्तरे ऽहन्यतिरात्रस्य गृह्यत इति विकृतिविशेषे नियमो ऽप्युपायद्वयप्राप्तौ नियमो न भवति । षोडशिग्रहाभावे ऽपि क्रतोरवैगुण्ये षोडशिग्रहोपदेशो निरर्थकः स्यादिति तत्सार्थकत्वाय षोडशिग्रहसाध्यतया कल्पनीये फलभूम्नि तदभावस्योपायान्तरत्वाभावात् अतस्तत्रापि पूर्ववदतिव्याप्तिः स्यात् । ऋतावुपेयादिति ऋतुगमननियमे यदा चिदृतावनिच्छया अनुपगमन-

मपि प्राप्नुयादिति तदर्थं प्रवृत्ते ऽनुपगमनस्योपगमन-साध्यं पुत्रोत्पादनं प्रत्युपायान्तरत्वाभावादतिव्याप्तिः स्पष्टैव। तथा ज्योतिष्टोमे "बृहत्पृष्ठं भवति" "रथन्तरं पृष्ठं भवती" ति बृहद्रथन्तरसाधनके पृष्ठाख्ये द्वे स्तोत्रे विहिते तयोः स्तुतशस्त्राधिकरणन्यायेनादृष्टार्थतया प्रयाजानुयाजवद्भिन्नकार्ययोरपि वचनबलाद्विकल्पो न तु व्रीहियवादिवदेककार्यत्वात्। अत एव व्रीहिधर्माणामवघातादीनां यवेष्विव बृहद्धर्माणां बृहति प्रस्तूयमाने समुद्रं मनसा ध्यायेदित्यादिना विहितानां रथन्तरे वा रथन्तरधर्माणां रथन्तरे प्रस्तूयमाने नेत्रे संमीलयेदित्यादिना विहितानां बृहति वा न सङ्करः। तदेतदेककार्यत्वादविभागः स्यादिति च नावमिकाधिकरणे प्रपञ्चेन व्यवस्थापितम्। ज्योतिष्टोमविकृतिषु चोपहव्यादिषु बृहत्पृष्ठनियमः श्रूयते तत्रापि तत्कार्यमदृष्टं प्रति रथन्तरपृष्ठस्योपायान्तरत्वाभावादतिव्याप्तिः। स्यादेतत् उपायान्तरस्थाने वैकल्पिकविशेषणं निवेशयिष्यामः। तथा च वैकल्पिकप्राप्तिरहितभिन्नावच्छेदभेदं विना प्राप्तिशबलत्वं पाक्षिकत्वमिति पर्यवसानादुदाहृतनियमविधिषु चाप्राप्तेरुक्तरूपपाक्षिकत्ववत्त्वान्नातिव्याप्तिरिति चेत्। एवं हि वैकल्पिकत्वं पाक्षिकत्वानुप्रवेशरहितं निर्वक्तव्यम्। अन्यथात्माश्रयादिदोषापत्तेः तत्तु न सम्भवति विधित्सितेन सह पाक्षिकत्वं विधित्सितस्य पाक्षिकत्वापादकत्वमित्यादिरूपेणैव तस्य निर्वक्तव्यत्वादितिभावः। स्यादेतत्। अवच्छेदभेदं विनेतिस्थाने आश्रयभेदं विनेति करिष्यामः। ततश्च नियम्याप्राप्तेरेकस्मिन्नप्याश्रये प्राप्ति-

कस्मिंश्चित्तथा पाक्षिकत्वान्न नियमविधिष्वतिव्याप्तिः । नापि सार्वकाम्यादिविधिष्वव्याप्तिः, तेषु सर्वेष्वपि स्वर्गाद्याश्रयव्यक्तिभेदेनैव प्राप्त्यप्राप्त्योः कस्मिंश्चित्त्वादित्याशङ्क्याह ।

यद्युच्येतान्तरेण त्वधिकरणभिदा प्राप्तिसंमेलनं तत् तच्चापि प्राक्षु पक्षेष्वपि समुदयते तावदव्याप्तिरेका कार्त्स्न्येनैवोपहव्यप्रभृतिभृतिहविःशेषयोर्ब्राह्मणोक्तौ पूतीकाधारमन्त्रान्तरमुखनियमातिप्रसक्तिस्तथा स्यात् ॥ १६ ॥

इत्थं विवक्षायामव्याप्तिरेको दोषः स्यात्, अतिव्याप्तिरपरो दोषस्तथा हि उपहव्यनामकक्रतावश्वः श्यावो दक्षिणेति दक्षिणां विधाय श्रूयते "स ब्रह्मणे देय" इति तथा ऋतपेयस्य क्रतोरौदुम्बरः सोमचमसो दक्षिणेति दक्षिणां विधाय श्रूयते "स प्रियाय सगोत्राय ब्रह्मणे देय" इति अत्र क्रतुदक्षिणात्वेन विहितयोरश्वचमसयोर्ब्रह्मणः संबन्धः प्राप्त एव किं त्वन्येषामप्यृत्विजां तयोः संबन्धः प्राप्त इति तदंशे ब्रह्मसंबन्धाप्राप्तेः कार्त्स्न्येन ब्र-

ह्मसंबन्धप्राप्त्यर्थमिदं वचनद्वयं तेनार्थादृत्विगन्तरेभ्यस्त-योरपनीतत्वात्तेषामानतिर्विनैव श्रुतिं सामाद्युपायैः क-रणीया तदेतत्सर्वं धेनुवच्चाश्वदक्षिणेति तथा सोमचमस इति च दाशमिकाधिकरणयोर्निरूपितम्। एवं चैकस्या-मेवाश्वव्यक्तौ चमसव्यक्तौ च ब्रह्मणः प्राप्त्यप्राप्त्योर्मेल-नात्तद्विध्योरव्याप्तिः। तथा "प्राजापत्यं घृते निर्वपेच्चरुं श-तकृष्णलमायुष्काम" इति इष्टिं विशेषं विधाय तत्संनि-धावाम्नायते "तत्सर्वं ब्रह्मणे परिहरती" ति अत्र हविःशे-षस्य सर्वेभ्य ऋत्विग्भ्यो भक्षणाय परिहरणीयत्वे प्राप्ते। कार्त्स्न्येन ब्रह्मसंबन्धार्थमिदम् अतोऽत्राप्येकस्यामेव ह-विःशेषव्यक्तौ ब्रह्मणः प्राप्त्यप्राप्त्योर्मिलितत्वादव्याप्तिः। नन्विडाप्राशित्रं चतुर्धाकरणं चेति त्रिविधमपि हविः शेषं ब्रह्मणे परिहरणीयं तच्च सर्वं युगपदेव प-रिहरणीयम् एकधा ब्रह्मण उपहरतीतिवचनात् यु-गपदुपहृतमपि तत्सर्वं चोदकप्राप्ततत्तद्भक्षणकालाबाधेन यथाकालमेव लक्षणीयमिति निर्णीतं दशमे कृष्णलपे-टिकायाम्। ततश्च प्राशित्रे कार्त्स्न्येन ब्रह्मसंबन्धस्य प्रा-प्तत्वात् कथं तत्र विधानमिति चेत् माभूदिडायां, चतु-र्धाकरणार्थे च विधानमुपपद्यत एव। तथा च परिह-रणीयस्य सर्वस्य कार्त्स्न्येन ब्रह्मसंबन्धविधिः सार्वकाम्य-विधिः स्वर्गइव प्राशित्रे ऽनुवादो भविष्यति तथाप्यव्या-प्तिर्विषययोर्द्वयोः सुदृढैव एकैकस्यामेवेडारूपहविःशे-षव्यक्तौ चतुर्धाकरणार्थहविःशेषव्यक्तौ च प्राप्त्यप्राप्त्यो-र्मिलितत्वात्। एवं सत्यव्याप्तिः समर्थिता अतिव्याप्ति-स्तु पूतीकादिनियमविधिषु। कथं "यदि सोमं न वि-

51528

न्देत पूतीकानभिषुणुयादि"ति श्रूयते । अयं सोमालाभे सत्यभावविधिरूपः पूतीकानां यागसाधनत्वविषयको ऽपूर्वविधिर्न भवति किं तु श्रुतिप्रमाणत्वाच्छिष्टाभावेनागमो ऽन्यस्याशिष्टत्वादित्यधिकरणोक्तन्यायेन नित्यस्य प्रारब्धकाम्यस्य च सोमयागस्य सोमाभावे ऽपि यथाशक्त्यवश्यानुष्ठेयतया कर्मचोदनाचिप्ते यस्मिन् कस्मिंश्चित् द्रव्ये ऽवश्यमुपादेये तत्रापि सामान्यं तच्चिकीर्षा हीत्यधिकरणोक्तन्यायेन सोमविधानस्यापि किं चिदनुग्रहसिद्धये कतिपयसोमावयवानुप्रवेशवति सोमसदृशद्रव्य एवोपादेये बहुषु च सोमसदृशद्रव्येषु सत्सु नियमविधिरयं यः सोमलताया अभावे सोमजातिपरिच्छिन्नाम् सकलावयवानुपादातुमशक्तस्तत्सदृशेषु स्थितान्विकलानवयवानुपादातुमिच्छति स पूतीकगतानेवोपाददीतेति । एवं नियमविधिरिति निर्णीतम् । नियमार्था पुनः श्रुतिरिति तृतीयाध्यायाधिकरणे वचनाच्च न्याय्यं भवेदिति षष्ठाध्यायाधिकरणे च । अयं च सोमलतया सुसदृशानामन्येषां सत्त्वात्तेषामेव बह्वयवानुग्रहानुरोधेन प्रतिनिधितया प्राप्तेरीषत्सोमसदृशानां पूतीकानां तत्प्राप्तिकोटितया पाचिकप्राप्तिरहितानामेव विधिः । अत एवोक्तं शास्त्रदीपिकायाम् । मुख्याभावे प्रतिनिधेः प्राप्तिः तस्यां चावस्थायां यावन्न्यायेन सुसदृशं नियन्तुमुपक्रम्यते तावत् वचनेन मन्दसदृशाः पूतीका नियम्यन्ते अतः प्रतिनिधिनियमो ऽयमिति । एवं पूतीकानामप्राप्तेः प्राप्तिकरम्बितत्वाभावादतिव्याप्तिः । तथा वायव्यपशौ श्रूयते।"हिरण्यगर्भः समवर्त्तताग्र"इत्याघारमाघार-

यतीति । अयं प्राजापत्ये पूर्वाघारे मन्त्रविधिर्न भवति किं त्वैन्द्र उत्तराघार इति निर्णीतं दशमे, हिरण्यगर्भे पूर्वस्य मन्त्रलिङ्गात् । उत्तरस्य वा मन्त्रार्थवत्त्वात् इति पूर्वोत्तरपक्षसूत्राभ्याम् । तत्रायं सिद्धान्तन्याय उक्तः मन्त्रविधौ मन्त्रजन्यं नियमादृष्टमपेक्षणीयम् अन्यथा ब्राह्मणकल्पसूत्रोपदृष्टवचनादिभिरप्यनुष्ठेयार्थस्मरणसंभवेन मन्त्रनियमवैयर्थ्यात् । तत्तु नियमादृष्टं प्रकृतौ पूर्वाघारे न क्लृप्तं तत्र तस्यामन्त्रकत्वात् इति पूर्वाघारे मन्त्रविधिपक्षे ऽत्रैव तत्कल्पनीयमुत्तराघारे तु तत्क्लृप्तं तस्य प्रकृतावपि समन्त्रकत्वात् । अतः क्लृप्ते नियमादृष्टे मन्त्रविशेषमात्रविधानं लघ्वित्युत्तराघारएव मन्त्रविधिर्युक्त इति । उक्तं च टुप्टीकायाम् । मन्त्रनियमादवश्यमदृष्टं कल्पनीयं पूर्वाघारे । तत्तु क्लृप्तमुत्तराघारे तस्मिन्मति कल्पयितुं न शक्यत इति । एवं चात्र नियमविधित्वेनाङ्गीकृते आघारमन्त्रान्तरविधौ चोदकादिन्द्र ऊर्ध्वो ऽध्वर इति प्राकृतमन्त्रस्यैव प्राप्तिरस्ति न विधेयमन्त्रस्येत्यत्राप्यतिव्याप्तिः । न च विकृतौ मन्त्रान्तरविधानसमये प्राप्त्यभावे ऽपि प्रकृताविन्द्र ऊर्ध्वो ऽध्वर इति मन्त्रविधानसमये सर्वेषामुपायान्तराणां पक्षे प्राप्तिरस्ति सैवार्थतो विकृतावपि प्राप्तिरिति वाच्यम् । तदानीमपि ब्राह्मणकल्पसूत्रादीनामिन्द्रप्रकाशकमन्त्रान्तराणां च पक्षे प्राप्तावपि प्रजापतिलिङ्गकस्यास्य मन्त्रस्य प्राप्त्यभावात् । न च लिङ्गमिन्द्रे ऽप्यविशिष्टमिति भाष्ये समर्थितमिति वाच्यम् । तत्र हि विहितविनियोगनिर्वाहायेन्द्रे ऽपि कथंचिन्मन्त्रं योजयितुं तस्मिन्नपि स्रष्टेः प्रागेकत्वेनावनास्य

मन्त्रान्तरे वर्णितमस्तीत्येतावदुदाहृतं न तु हिरण्यगर्भशब्दस्य तत्र स्वारसिकं लिङ्गं समर्थितम् । न वा तत्समर्थनं शक्यम् । तस्य प्रजापतावेव रूढत्वात् । प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वायेति वाक्यशेषाच्च । हिरण्यगर्भं पूर्वस्य मन्त्रलिङ्गादितिसूत्रकृतापि प्रजापतावेव लिङ्गसद्भावस्योक्तत्वाच्च । एवमन्येष्वप्येतादृशेषु नियमविधिष्वतिव्याप्तिरूहनीया । इयं चाव्याप्तिरतिव्याप्तिश्च प्राचीनेष्वप्यात्यन्तिकत्वनिर्वचनपक्षेषु समाना तस्मादप्राप्त्यात्यन्तिकत्वयोरनिर्वचनादयुक्तमपूर्वविधिलक्षणम् ॥

इति श्रीमदद्वैतविद्याचार्यश्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमद्विश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पदीक्षितस्य कृतौ विधिरसायने सुखोपयोजनायामपूर्वविधिलक्षणाक्षेपः समाप्तः ॥

अथ नियमविधिलक्षणमाक्षिपति ।

हेतुः कुत्रापि कार्यं क्वचन तदुभयं कुत्र चिद्विध्युपात्तम् । विध्यस्पृष्टं नियम्य क्वचिदुभयविधं पाक्षिकत्वेन दृष्टम् ॥ तस्यैव प्रत्यनीकं क्वचिदपि कुहचित्पाक्षिकं नैव दृष्टम् नानारूपं तदित्थं नियमविधिगतं दुर्ग्रहं लक्षणेन ॥ १७ ॥

नानाप्रकारस्तावन्नियमविधिर्दृश्यते स सर्वोऽपि नियमः पाक्षिके सतीत्यनेन लक्षणेन संग्रहीतुं न शक्यः । तथा हि । क्वचिदेकस्मिन्कार्येऽनियतानेकोपायप्राप्तावेकोपायनियमः यथा व्रीहीनवहन्तीति । क्वचिदेकस्योपायस्यानियतानेककार्यप्राप्तावेककार्यनियमो । यथा "यद्योन्यां तदुत्तरयोर्गायती"ति । इदं नवमश्लोकावतारिकायामुपपादितम् । क्वचिदुभयनियमः यथा यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तदिति । इदमपि तत्रैवोपपादितम् । ननु तत्रोक्तया रीत्या यद्योन्यामित्यत्राप्युभयनियमो लभ्यते तथा च कथं कार्यमात्रनियमे तदुदाहरणं यथा हि स्तोत्राङ्गत्वेनावगतस्य साम्नस्तृचगानानिर्वाहाय तत्सं-

स्कार्यत्वेनानियतानेकर्गद्वयप्राप्तावुत्तरयोर्नियमस्तथा स्तोत्राङ्गत्वेनावगतयोरुत्तरयोश्छन्दसो: संस्कारकत्वेनानियतानेकसामप्राप्तौ योनिसाम्नो नियम: सम्भवति स्तोत्रस्य प्रगीतमन्त्रसाध्यस्तुतिरूपत्वेन सामापेक्षावश्यंभावात् विशिष्य सामापेक्षाभावे ऽपि सामसाधारणस्वरगभिव्यञ्जकापेक्षावश्यम्भावाच्चेति चेत् सत्यं, यत्र साम्न इव छन्दसामपि स्तोत्राङ्गत्वं प्रकरणपाठादिनावगतं तत्र तथैव यत्र तु विकृतिविशेषे वामदेव्यादिष्टविधौ साममात्रस्य स्तोत्राङ्गत्वावगतौ तत्प्रकरणपाठादिरहितापि तत्संस्कार्या योनि: प्रकृतौ बृहद्योनिवत् वैश्यस्तोमे कण्वरथन्तरयोनिवच्च साम्न: स्तोत्राङ्गत्वनिर्वाहाय स्वयमपि तदङ्गत्वमर्थादापद्यते । तत्र तत्र, तदुत्तरयो: प्रागवगतं स्तोत्राङ्गत्वं नास्तीति तन्निर्वाहायानियतसामप्राप्त्यभावान्न तत्र सामनियम: । किं तु साम्न एव स्तोत्रीयस्य तृचगाननिर्वाहाय संस्कार्यर्ग्विशेषनियम इति केवलं कार्यनियम एव । अतो यद्योन्यां तदुत्तरयोर्गायतीति अयं योनिविषमच्छन्दस्कयोरुत्तरयोरपूर्वविधि: । योनिसमच्छन्दस्कयोस्तु क्रमप्रकरणावगतविनियोगयो: कार्योपायद्वयनियमविधि: सामविनियोगाक्षिप्तविनियोगयो: कार्यमात्रनियमविधिरिति युक्तं कार्यनियमे ऽपि तदुदाहरणम् ॥ एवं वाजपेयदक्षिणात्वेन देयानां रथानां मध्ये इन्द्रस्य वज्रो ऽसि वार्त्रघ्न इत्यादि याजुर्वैदिकमन्त्रै: सञ्ज्ञीकृतं रथमधिकृत्य प्रवृत्तैर्यजुर्युक्तं रथमध्वर्यवे ददातीति वाक्ये । "यो वृष्टिकामो यो ऽन्नाद्यकामो य: स्वर्गकाम: स सौभरेण स्तुवीते" ति फलार्थत्वेन विहितं ब्रह्म

सामस्तोत्राश्रयं सौभरमधिकृत्य प्रवृत्तेषु हीषिति वृष्टिकामाय निधनं कुर्यादूर्गित्यन्नाद्यकामाय ऊ इति स्वर्गकामायेति वाक्येषु चोभयनियमो द्रष्टव्यः। एषूदाहरणेषु समप्राधान्येनोभयनियतो नियमलाभः। उपजीव्योपजीवकभावेनापि स सम्भवति। यथा याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेदित्यत्र याजनादिषु कृष्यादिषु च धनार्जनोपायेषु अनियमेन प्राप्तेषु ब्राह्मणस्य याजनादय एव तदुपाया नियम्यन्ते तेन ब्राह्मणानामेव याजनादयस्तदुपाया इत्यपि नियमो लभ्यते। एतद्विध्यभावे हि यज्ञदानाध्ययनविधिभिर्याजकाध्यापकप्रतिग्रहीतृसाकाङ्क्षैरार्त्विज्यादिसमर्था ये केचिद्याजकादय आक्षिप्येरन्। एतद्विधिसत्त्वे त्वस्मदीयोऽयं धनार्जनोपाय इति याजनादिषु स्वत एव प्रवृत्तानां ब्राह्मणानां सत्त्वेन तत एव निराकाङ्क्षतया यत्किञ्चिदनियतयाजकाद्याक्षेपो नावतरतीति। एवं तावन्नियम्ये तत्प्रतिसंबन्धिनि च विधिवाक्येनोपात्ते क्वचिदुपायनियमः क्वचित्कार्यनियमः क्वचिदुभयनियम इति त्रैविध्यं दर्शितं नियम्ये तत्प्रतिसंबन्धिन्युभयस्मिन्नपि वा तदनुपात्तेऽपि स दृश्यते तद्यथा पुरोडाशं प्रथयतीत्यत्रानुपात्ते कर्तरि नियम्ये नियमः। उच्चैरृचा क्रियत इत्यत्रानुपात्ते नियम्यप्रतिसंबन्धिनि मन्त्रे नियमः व्रीहिभिर्यजेतेत्यत्र नियम्येऽवहनने तत्प्रतिसंबन्धिषु यवेषु चानुपात्तेषु नियमः। एवमुपात्तमनुपात्तमिति द्विविधमप्युदाहृतं नियम्यजातं पक्षप्राप्तिमदृष्टं क्वचिन्नियम्यस्य पक्षप्राप्त्यभावेऽपि तत्प्रतिद्वन्द्विनां पक्षप्राप्तिमा-

वेण नियमो दृश्यते । यथा"यदि सोमं न विन्देत्पूतीकानभिषुणुयादि"ति अत्र हि सुसदृशानां बहूनामनियतप्राप्तौ मन्दसदृशानां पूतीकानामप्राप्तानामेव नियमः क्वचिन्नियमविधौ किमपि पक्षप्राप्तौ न दृश्यते यथा"हिरण्यगर्भः समवर्त्ततागृ"इत्याघारमाघारयतीति । तत्र नियमतश्चोदकादिन्द्र ऊर्ध्वोध्वरइति मन्त्रप्राप्ताविन्द्रलिङ्गरहितत्वादत्यन्ताप्राप्तमेव तन्त्रान्तरमैन्द्राघारे नियम्यते । एतान्युदाहरणानि प्राक् तत्र तत्राविष्कृतानीति नेह प्रपञ्चितानि । एवं न्यायतौल्यादिषेत्वेतिशाखामाच्छिनत्ति उत्करे वाजिनमासादयति परिधौ पशुं नियुञ्जीतेतिवाक्येष्वपि नियमविधिरङ्गीकरणीय इति तान्यपि पक्षप्राप्तिरहितोदाहरणानि । यथा खलु हिरण्यगर्भमन्त्रस्य प्रजापतिलिङ्गस्यैन्द्राघारे स्वयमप्राप्तस्यैव विनियोगानन्तरं तन्निर्वाहाय कथं चिदिन्द्रप्रकाशत्वस्य कल्पनीयत्वे ऽपि दृष्टार्थत्वान्नियमादृष्टकल्पनावश्यंभावाच्च नियमविधित्वमभ्युपगम्यते । तथैषेत्वेतिमन्त्रस्य शाखाच्छेदने तीक्ष्णाग्रस्योत्करस्य वाजिनासादने तनीयसः परिधेः पशुनियोजने च विनियोगानन्तरमेव तन्निर्वाहाय मन्त्रे छिनद्मीत्यध्याहारस्य उत्करे पृथ्वग्रत्वस्य परिधौ प्रथिम्नश्चापेक्षणीयत्वे ऽपि न्यायसाम्यान्नियमविधित्वमभ्युपगन्तव्यमेव इत्थं नानारूपा नियमविधयः कथमनेन संग्रहीतुं शक्याः । पाक्षिकत्वे सतीत्यस्य कार्योपायद्वयपाक्षिकत्वपरत्वे एकैकनियमाव्याप्तेः कार्यस्यैवोपायस्यैव वा पाक्षिकत्वपरत्वे तदन्यतरनियमाव्याप्तेः । कार्योपायद्वयमनुगमय्य विध्युपात्तस्य पाक्षिक-

त्वपरत्वे विध्यनुपपत्तिनियमाव्याप्तेः उपात्तमनुपात्तं वा नुगमय्य नियमस्य पाक्षिकत्वोक्तौ नियम्यप्रतिद्वन्द्विना-मेव पाक्षिकत्ववन्नियमविधावव्याप्तेः नियम्यस्यान्यस्य वा यस्य कस्य चित्पाक्षिकत्वपरत्वोक्तावपि पाक्षिकत्व-मात्ररहितेषु नियमविधिष्वव्याप्तेरित्यर्थः । श्लोके त-स्यैव प्रत्यनीकं क्व चिदपीत्यत्र पाक्षिकत्वेन दृष्टमित्यनु-षङ्गः ॥ १७ ॥ एवं लक्षणस्याव्याप्तिमुक्त्वाऽतिव्याप्तिमाह ।

तच्चातिव्याप्तमग्नेर्विकृतिशुषि-विधौ मीलनस्याग्रताया नैमि-त्तिक्याश्च विध्योरखिलविधिषु च प्रापकावर्त्तकेषु ॥ अप्रामांश-स्य पूर्तिः फलमपि यदि तत्रा-धिकं योजनीयं शेषांशव्यर्थता स्यादखिलफलकताविध्यति-व्यापनं च ॥ १८ ॥

यदि पाक्षिके सतीत्यत्र विधिविषयस्य पाक्षिकत्वं विवक्षितं तदा वैकृताग्निविधावतिव्याप्तिः तद्विषयस्या-ग्नेरुत्तरवेद्या विकल्पितस्य पाक्षिकत्वात् । यदि विध्यु-द्देश्यस्य तदा रथन्तरे प्रस्तूयमाने संमीलयेदितिविधा-वतिव्याप्तिः । तदुद्देश्यरथन्तरस्य ज्योतिष्टोमे पाक्षि-

कत्वात् । यद्युभयोस्तदा "यदि रथन्तरसामा सोमः स्या-
दैन्द्रवायवाग्रान् ग्रहान् गृह्णीयादि"ति प्रागुदाहृतपरि-
संख्यायामतिव्याप्तिः तत्रोद्देश्यरथन्तरसामत्वस्य तन्नि-
मित्तकस्य विधेयस्यैन्द्रवायवाग्रत्वस्य च प्रकृतौ पाक्षिक-
त्वात् । यदि विधेयोद्देश्यसाधारण्येन विध्युपात्तस्य पा-
क्षिकत्वं विवक्षितं तदोदाहृतेषु त्रिष्वपि विधिष्वति-
व्याप्तिः । यदि विध्युपात्ततदनुपात्तसाधारण्येन नियम-
स्य पाक्षिकत्वं विवक्षितं तदा नियमविधिलक्षणे नियम-
प्रवेशे आत्माश्रयापत्तेः । यदि नियम्यशब्देन प्रकृतिवि-
धिफलाश्रयमात्रं विवक्षणीयं तथा सति उदाहृते नैमि-
त्तिकाग्रताविधावतिव्याप्तिः । तत्र विकृतिविशेषव्याप्तु-
क्तिफलाश्रयस्यैन्द्रवायवाग्रत्वस्य पाक्षिकत्वात् यदि निय-
म्यानियम्यसाधारण्येन यस्य कस्य चित्पाक्षिकत्वं विव-
क्षितं तदा सर्वेष्वप्यपूर्वविधिपरिसंख्याविधिषु अतिव्या-
प्तिः । स्यादेतत् यस्य कस्यचित्पाक्षिकत्वे सति तदप्रा-
प्तांशपूरणफलो नियम्यविधिरित्यधिकं योज्यते । तथा
सति न क्वाप्यतिव्याप्तिरिति चेत् । एवं तर्हि लक्षणे
श्रुतांशो व्यर्थः स्यात् । अप्राप्तांशपूरणफलो नियमवि-
धिरित्येतावत एव विशिष्टलक्षणपूर्वत्वात्[1] । न चैवमे-
वास्त्विति वाच्यम् । "सर्वेभ्यो ज्योतिष्टोम" इतिसर्वफलक-
त्वविधावतिव्याप्तेः । प्रातिस्विकवाक्येन स्वर्गार्थत्वप्राप्त-
स्य तदप्राप्तफलान्तराप्राप्तांशपूरणार्थत्वादित्यर्थः । स्या-
देतत् । अप्राप्तांशपूरणफलको नियमविधिरितिलक्षणे
अप्राप्तत्वं विरोध्याक्रमणप्रयुक्तं विवक्षितम् । अतो नो-

१ पूर्वकत्वादिति २ पु० पा० ।

त्यातिव्याप्तिः। सार्वकाम्यविधौ स्वर्गांशः प्राप्तः तद-न्यफलांशस्याप्राप्तेः प्रापकप्रमाणाभावप्रयुक्तत्वेन विरो-ध्याक्रमणप्रयुक्तत्वाभावात्। न चासम्भवः। नियमवि-ध्युदाहरणे अवहननादिप्रापकलौकिकप्रमाणादिसत्त्वे ऽपि तदप्राप्तेर्विदलनादिविरोध्याक्रमणप्रयुक्तत्वात्। यद्वा अनिर्द्धारितत्वम् अप्राप्तांशस्य विशेषणं क्रियते। तथा च सार्वकाम्यविधौ स्वर्गांशः प्राप्तः तदन्यफलांशस्तु अ-प्राप्त इति निर्द्धारणसद्भावात् नातिव्याप्तिः। नाप्यस-म्भवः। व्रीह्यादिषु अवहननाद्यप्राप्तांशस्येदन्तया नि-र्द्धारणाभावात् इत्याशङ्क्याह।

अप्राप्तत्वं विरोध्याक्रमणात्कृत-
मिह्याक्षेपतो यद्यथापि स्याद्दो-
षो ऽयं द्विपृष्ठः षडह इतिविधा-
वप्ययं निर्विरोधः॥ अप्राप्तांशं
विशेष्टुं क्रियतइतिमतं यद्य-
निर्धारितत्वम् प्रयावाश्वब्राह्म-
णोक्तिप्रभृतिविधिगणातिप्रस-
क्तिस्तथापि॥ १६॥

प्रथमविवक्षायां कृतायामपि उद्भावितसार्वकाम्यवि-ध्यतिव्याप्तिदोषस्तदवस्थ एव विश्वजिदधिकरणपूर्वपक्ष-

न्यायस्य स्वर्गान्यफलानामपि प्रापकप्रमाणस्य सत्त्वेन तदप्राप्तेस्तथाचापवादकस्वर्गकामविधिप्राप्तितद्विरोध्याक्रमणाप्रयुक्तत्वात् । ननु अप्राप्तिकरम्बितविरोध्याक्रमणाप्रयुक्तत्वं विवक्षितम् । अस्ति च व्रीह्यादिषु अवहननाद्यप्राप्त्याक्षेपकताप्राप्तिकरम्बितप्राप्तिकविदलनादिरूपविरोध्याक्रमणाप्रयुक्तत्वम् । एवं च न सार्वकामग्रविधावतिव्याप्तिस्तदभावे स्वर्गान्यफलाप्राप्तेः स्वर्गकामवाक्यकृतनियतप्राप्तिकस्वर्गरूपविरोध्याक्रमणाप्रयुक्तत्वादिति चेत् एवमपि पृष्ठ्यः षडहो बृहद्रथन्तरसामा कार्य इति पृष्ठ्यषडहोद्देशेन बृहद्रथन्तरपृष्ठविधावतिव्याप्तिरनिवार्या । षडहांशेषु तृतीयादिष्वहस्सु बृहद्रथन्तराप्राप्तेरप्राप्तिककरम्बितप्राप्तिकवैरूपवैराजादिरूपं विरोध्याक्रमणाप्रयुक्तत्वात् द्वितीयविवक्षायां यद्यपि नोक्तातिव्याप्तिः बृहद्रथन्तराद्यप्राप्तांशस्तृतीयसुत्यादिरूप इति निर्द्धारणासम्भवात् । तथाप्यश्वः श्यावो दक्षिणेत्युपहव्यदक्षिणां विधाय श्रावित "स ब्रह्मणे देय" इति विधौ औदुम्बरश्चमसो दक्षिणेति दक्षिणां विधाय ऋतपेये श्राविते स प्रियाय सगोत्राय ब्रह्मणे देय इति विधौ आयुःकामेष्टिप्रकरणश्रुते सर्वं ब्रह्मणे परिहरतीति विधौ चातिव्याप्तिः, सर्वर्त्विक्साधारणोऽश्वश्चमसश्च हविःशेषश्चायं ब्रह्मणोंऽशः अयमन्येषामिति निर्द्धारणासम्भवात् । तस्मादव्याप्त्यतिव्याप्तिग्रस्तत्वान्नियमविधिलक्षणमपि न युक्तमिति भावः ॥

इति नियमविधिलक्षणाक्षेपः॥१८॥

परिसंख्यालक्षणमाक्षिपति ।

तत्रान्यत्रेति[1] राशिद्वितयमभिहितं लक्षणे पारिसंख्ये पश्यामस्तन्न लक्ष्योपगतमनुगतं भिन्नधर्मोपगूढम् ॥ पाठप्राप्ताग्रताविध्यनुगतिरहितं विध्युपात्तानुपात्तं ग्राह्यं व्यावर्त्तनीयं तदपि च न भजत्त्यावपन्तीति लक्ष्यम् ॥ २० ॥

तत्र चान्यत्र च प्राप्त इतिपरिसंख्यालक्षणमित्थं पक्षेषु योज्यते। "इमामगृभ्णान् रशनामृतस्येत्यश्वाभिधानीमादत्ते" इति लक्ष्ये तत्राश्वरशनाग्रहणे गर्दभरशनाग्रहणे च शेषिण्येकस्मिन्मन्त्ररूपे शेषे मन्त्रलिङ्गाविशेषात्प्राप्ते सति गर्दभरशनाग्रहणरूपशेष्यन्तरपरिसंख्या ॥ "दण्डी प्रैषानन्वाहे"ति लक्ष्ये तत्र प्रैषानुवचने अन्यत्र रात्रिप्रचारादिके च स्थित्वोच्चैरनवानकरणाय तमोवगाहनादिसौकर्याय च किं चिदवलम्बनापेक्षे मैत्रावरुणकार्ये शेषिणि मैत्रावरुणगृहीतदीक्षितदण्डरूपे एकस्मिन् शेषे प्राप्ते रात्रिप्रचारादिशेष्यन्तरपरिसं-

१ तत्रान्यत्रेति इ० १ पु: पा२ ।

ख्या । "शंखन्ता प्रायणीया सन्तिष्ठते" इतिलक्ष्ये प्रा-
यणीयायामेकस्यां शेषिण्यां शंखन्ताङ्गकलापरूपे तदु-
परितनाङ्गकलापरूपे च शेषे प्राप्ते तदुपरितनाङ्ग-
कलापरूपशेषान्तरपरिसंख्या । एवं "मिडान्तातिथ्या स-
न्तिष्ठत" इत्यादावपीति । एवं चाश्वरशनाग्रहणे प्रैषा-
नुवचनशंरिवडान्ताङ्गकलापादिकमेकराशिं गर्द्दभरशना-
ग्रहणोपरितनप्रचारशंखिडोपरितराङ्गकलापादिकमप-
रं च राशिं कृत्वा तद्राशिद्वयं लक्षणागताभ्यां तदन्य-
शब्दाभ्यामभिधातव्यं समभिव्याहृतपरस्यापि सर्वना-
म्नस्तेन रूपं रागात् तद्वति तत्प्रकारकं ज्ञानं प्रमे-
त्यादाविव किञ्चिद्रूपक्रोडीकृतराश्यन्तर्गतपरत्वावश्यं-
भावात् । अन्यथा तस्य तत्तत्र व्यवस्थितार्थबोधकत्व-
नियमानुपपत्तेः । तत्तु राशिद्वयं लक्ष्यप्राप्तं सर्वलक्ष्या-
नुगतं परस्परव्यावृत्तधर्मावच्छिन्नं न पश्यामः । अथो-
च्येत विध्युपात्तमश्वरशनादितच्छब्देनाभिधीयते तदनुपा-
त्तं गर्द्दभरशनाद्यन्यशब्देनेति नैतद्युक्तम् । "यदि रथन्तर-
सामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयादि"ति
परिसंख्यायामव्याप्तिप्रसङ्गात् । रथन्तरसामस्वरथन्त-
रसामसु ज्योतिष्टोमविकृतिषु चोदकादैन्द्रवायवाग्रतायां
शेषतया प्रसक्तायां अरथन्तरसाम्नां परिसंख्यार्थं ज्यो-
तिष्टोमे पाठप्राप्तायास्तस्या नैमित्तिकत्वकरणमिति हि
प्रागुक्तम् । एवं "दीक्षाः सोमस्य दक्षिणाः" सोमस्येत्या-
दिपरिसंख्यास्वपरव्याप्तिर्द्रष्टव्या । ननु माभूद्विध्युपात्तं
तदनुपात्तमिति राशिद्वयं ग्राह्यं व्यावर्त्तनीयमिति रा-

१ पर्यं पा० २ पु० मा० ।

श्चिदयं तदन्यशब्दाभिधेयं भविष्यति। तदपि न युक्तम्। "त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप् च अत्र ह्येवावपन्त्यत एवोद्वपन्तीति परिसंख्यायामव्याप्तिप्रसङ्गात्। अत्र हि विवृद्धस्तोमक्रतुगतेषु सर्वेष्वपि स्तोत्रेषु स्तोमविवृद्ध्यर्थं प्राकृतेभ्यो ऽधिकावापे प्राप्ते ऽत्र ह्येवावपन्तीत्यनेन पवमानगतगायत्र्यादिभ्यो ऽन्यत्सर्वं परिसंख्यायत इति प्रागुक्तम्। अत्र परिसंख्यायामावापस्य व्यावर्त्तनीयेषु स्तोत्रान्तरेष्वेव प्राप्तिरस्ति न तु ग्राह्येषु पवमानगतगायत्र्यादिषु। यद्यपि स्तोत्रान्तरेष्विव पवमानेष्वपि स्तोमविवृद्ध्यर्थमावापप्राप्तिरस्ति तथापि न सामान्तराणामावापप्राप्तिः। किं तु सामसहितानामृगन्तराणामेव स्तोत्रीयत्त्वगतसंख्याधिक्यरूपस्तोमविवृद्धेर्ऋगन्तरावाप एवातिसामञ्जस्यात्। येषु तु विवृद्धस्तोमकेषु क्रतुषु प्रत्यक्षविहितानि सामानि सन्ति तेष्वपि तानि कवतीषु रथन्तरन्यायेन स्वयोनौ स्वयोन्युत्तरयोश्च गेयानि प्राप्नुवन्ति न प्राकृतीषु ऋक्षु उत्तराग्रन्थे तत्तद्योनेः तत्तदुत्तरयोश्च पाठस्य कृत्स्नार्थतया ताभिरतिदेशप्राप्तप्राकृतर्ग्बाधात्। अतस्तेष्वपि तत्तत्सामसहितानामृगन्तराणामेव प्राप्तिः। एवं च गायत्र्यादिषु प्राप्तिर्न्न शक्यशङ्का ऋचामृगन्तरेष्वावापसम्भवात्। येषां प्रत्यक्षविहितानां वैकृतसाम्नामुत्तराग्रन्थे योनिर्न पठिता अत एव तदुत्तरे अपि न स्तस्तेषामावापस्य प्राकृतत्वेन प्राप्तावपि न गायत्र्यादिषु प्राप्तिः। किं त्वन्त्यतृच एव आगन्तूनामन्ते निवेश इतिन्यायसंस्थान्ते तु बादरायण इति पञ्चमे दर्शितत्वात्। ततश्चात्र ह्येवावप-

न्ति इति वाक्येनैवकारश्रुतिबलात्पवमानगतगायत्र्यादिभ्योऽन्यत्र सर्वत्राप्यावापं परिसङ्ख्यानेन स्तोत्राणां पवमानगतानां सतृचानां च निवृत्तौ सत्यामर्थादावापः पवमानगतगायत्र्यादिष्वेव व्यवतिष्ठते, स च गायत्र्याद्याधारत्वसामर्थ्यात् साम्नामेव नर्चामित्यपि व्यवतिष्ठते । न च गायत्र्यादिभ्यो ऽन्यत्रावापपरिसंख्याने ऽपि गायत्र्यादिषु आवापाविधाने तास्वावापो न प्राप्नोति स्तोत्रान्तरेष्विवावश्यकेनाभ्यासेन संख्यापूरणसम्भवात् । ततश्च गायत्र्यादिष्वावापमिच्छता तद्विधानार्थमेवेदं वाक्यं न तु स्तोत्रान्तरपरिसंख्यार्थमित्यङ्गीकरणीयम् । एकस्य वाक्यस्योभयत्र व्यापारायोगादितिवाच्यम् । एवकारोपहृतविधिशक्तिकस्यास्य परिसंख्यापरत्वावश्यम्भावात् स्तोत्रान्तराणामगत्याभ्यासेनैव संख्यापूरणे ऽपि पृथक्त्वनिवेशिन्याः संख्यायाः सम्भवत्यामङ्गस्यापरित्यागाय न्यायप्राप्तस्य क्वचित् क्वचित् द्वात्रिंशत्पवमानो ऽभिषेचनीयं इत्यादौ प्रत्यक्षविहितराजसामाद्यपेक्षितस्य चावापस्यार्थाद्गायत्र्यादिषु व्यवस्थासिद्धेः । ततश्चात्र परिसंख्यैव वाक्यार्थः । इयांस्तु विशेषः । इमामगृभ्णन् इत्यादिपरिसंख्यायामश्वरशनाग्रहणे मन्त्रप्राप्तिः श्रौती । आर्थी गर्दभरशनाग्रहणपरिसंख्या । इह त्वेवकारश्रवणादावापे शाब्दी । गायत्र्याद्यतिरिक्तपरिसंख्यार्थी तस्य गायत्र्यादिषु प्राप्तिः । तत्सामर्थ्याच्च तस्य ऋग्विषयत्वं परित्यज्य सामविषयप्राप्तिः । एवं चात्र स्तोत्रान्तरपवमानगतान्यतृचेषु वर्जयितव्येष्विव गायत्र्येषु गायत्र्यादिष्वेवं तद्वाक्योपजीवनमन्तरेणावापस्य प्राप्त्यभावात् । अत्रातिव्या-

प्तिरनिवार्य्या। इयं चावगाप्तिर्विध्युपात्तानुपात्तं राशिद्वयमितिपक्षे तत्र चान्यत्र चेति पदद्वयस्वारस्यानुरोधेन राशिद्वयकरणावगमनं परित्यज्य द्वयोः समुच्चित्य प्राप्तिमात्रं तत्र चान्यत्र प्राप्त इत्यनेन विवक्षितमिति पक्षान्तर[1]परिग्रहे चाविशिष्टैव। तदेवमत्र द्वेवावपन्तीति परिसंख्यायां लक्षणस्यावगाप्तिः स्थिता। अथान्यत्रापि अवगाप्तितत्परिहारार्थविवक्षाप्रसक्तामतिवगाप्तिं च दर्शयति।

प्राप्तिः शेषिद्वये चेदिह विवक्षितागेषयुग्मेन सा स्यात्
अव्याप्तिस्त्वाश्रयादिद्वितयजुषि भवेच्छेषशेषित्वतश्चेत् यत्किञ्चिद्योगतश्चेत् बहुपडहगतोक्थादिविध्या क्रमः स्यात् सर्वत्र ब्राह्मणोक्तिप्रमुखविधिषु चातिप्रसक्तिः समाना ॥ २१ ॥

यदि तत्र चान्यत्र च प्राप्तइत्यनेन शेषिद्वये एकस्य शेषस्य प्राप्तिर्विवक्षिता तदानीमेकस्मिन् शेषिणि शेषद्वयप्राप्तौ या परिसंख्या शंखिडोत्तराङ्गकलापादिविषया

---

१ पक्षान्तर इ० २ पु० पा०।

तस्यां लक्षणं न स्यात् । यदि त्वेकस्मिन् शेषिणि शेषद्वयप्राप्तिर्विवक्षिता तदा शेषिद्वये एकस्य शेषस्य प्राप्तौ या परिसंख्या गर्दभरशनाग्रहणादिविषया तस्या लक्षणं न स्यात् यद्युच्येत उभयसंग्रहाय शेषशेषिभावसंबन्धेन प्राप्तिर्विवक्षितेति तथापि तदुभयसंग्रहालाभस्तदवस्थ एव यतस्तत्र चान्यत्र चेति सप्तम्योः प्राप्तइति सप्तम्याश्च सामानाधिकरण्यविवक्षायां गर्दभरशनाग्रहणादिपरिसंख्यायामेव लक्षणं न [1]स्याद्वैयधिकरण्येनान्वयविवक्षायां शंखिडोत्तराङ्ककपालादिपरिसंख्यायामेव न स्यात्[2] । प्राप्तिर्हि शेषिणि शेषस्य व्यवह्रियते न तु शेषे शेषिणः । अत एव न्यायसुधायां तत्र चान्यत्र च प्राप्त इत्यस्य शेषान्तरपरिसंख्यायां सामानाधिकरण्येन शेष्यन्तरपरिसंख्यायां वैयधिकरण्येन च योजना दर्शिता । एवं योजनया द्विलक्षणस्य शेषशेषिपरिसंख्ययोरननुगम एव ख्यापितः । अथाननुगमपरिहाराय सामानाधिकरण्यवैयधिकरण्ययोरेकपक्ष आश्रीयते न चैवं सति सामानाधिकरण्यपक्षे शेष्यन्तरपरिसंख्यायां वैयधिकरण्यपक्षे शेषान्तरपरिसंख्यायां चाव्याप्तिः । न हि प्राप्तिः शेषस्यैवेति नियमः । शेषस्य किंचिच्छेषिसंबन्धित्वेनावगतेरिव शेषिणोऽपि किंचिच्छेषसंबन्धित्वेनावगतेः प्राप्तिरिति व्यपदेष्टुं शक्यत्वात् । तथा च सामानाधिकरण्यपक्षे ऽश्वगर्दभरशनाग्रहणयोः शेषशेषिभावेन मन्त्रसंबन्धितया प्राप्तिरविकला वैयधिकरण्यपक्षे ऽपि गृह-

---

१ लक्षणमप्राप्तं स्यादिति २ पु० पा० ।

१ लक्षणमव्याप्तं स्यादिति २ पु० पा० ।

मेधीयस्य शेषशेषिभावेनाज्यभागतदितराङ्गकलापसंबन्धितया प्राप्तिरविकलेति पक्षद्वयेऽपि न क्वाप्यव्याप्तिरिति चेत्। अस्तु नामात्रैवमव्याप्तिपरिहारस्तथाप्याश्रयान्तरनिमित्तान्तरपरिसंख्ययोरव्याप्तिः स्यात्। आश्रयाश्रयिणोर्निमित्तनिमित्तिनोश्च शेषशेषिभावाभावात्। दर्शितं च नवमश्लोकावतारिकायां "वाग्वा एषा यदैन्द्रवायवाग्रा ग्रहा गृह्यन्ते" इतिविधेराश्रयान्तरपरिसंख्यार्थत्वं"सायं जुहोति" "प्रातर्जुहोती"ति विध्योर्निमित्तान्तरपरिसंख्यार्थत्वं च माभूत्तर्हि शेषशेषिभावेनेति विवक्षा, प्रयोजनाभावादव्याप्त्यावहत्वाच्च शेषशेषिभावेनाश्रयाश्रयिभावेन निमित्तनिमित्तिभावेनान्येन वायेन केनचित्सम्बन्धेन तत्र चान्यत्र प्राप्तइत्येतावदेव लक्षणमस्त्विति चेत्। एवं सति षडहा भवन्ति (चत्वारो भवन्ति[1] शतोक्थं भवति शताग्निष्टोमं भवति सर्वस्मिन्द्दङ्गवति सर्वः पञ्चदश इत्यादिविधिषु अतिव्याप्तिः स्यात्। नन्वेकत्र समुच्चित्य प्राप्तिरिह विवक्षिता, न चोदाहृतस्थलेषु सास्ति षट्त्रिंशद्रात्रे ह्यादितः षट्स्वहःसु षडहधर्मजातस्य चोदकात्प्राप्तिः। ततश्चतुर्षु छन्दोगधर्मजातस्य। नन्वेकत्र उभयोः समुच्चित्य प्राप्तिरस्ति तथा शतोक्थ्ये शताग्निष्टोमे चाद्ये ऽहन्यग्निष्टोमसंस्थाया द्वितीयतृतीययोरुक्थसंस्थाया इत्येवं प्रकारेण चोदकाद्भिन्नविषया प्राप्तिः। एवमेकस्तोमकक्रतुषु बहिष्पवमाने त्रिवृत्स्तोमस्याज्येषु माध्यंदिनपवमाने पञ्चदशस्तोमस्येत्येवं रूपेण चोदकाद्भिन्नविषयैव प्राप्तिरतो न क्वाप्यति-

१ अयं पा॰ २ पुना॰।

व्याप्तिरिति चेत् न । षडहधर्मोक्थ्यादिसंस्था त्रिवृदादिस्तोमशेषिणामहःस्तोत्राणां भेदसत्त्वेऽप्येकैकस्मिन्षट्त्रिंशद्रात्रशतोक्थ्यशताग्निष्टोमैकस्तोमक[1]क्रतुप्रयोगाणामभिन्नत्वेनैकैकस्मिन् क्रतुप्रयोगे षडहच्छन्दोगधर्मादीनां समुच्चित्य प्राप्तिसत्त्वात्तेषामहरादिशेषत्वेऽपि प्रयोगेणापि सह तदन्तर्गतत्वलक्षणसंबन्धसत्त्वाच्छेषशेषिभावसंबन्धविशेषस्याविवक्षितत्वात् । अपि च शेषत्वादिविषयासु सर्वास्वपि विवक्षासु "सर्वं ब्रह्मणे परिहरति" स ब्रह्मणे देयः स प्रियाय सगोत्राय ब्रह्मणे देय इतिविधिष्वतिव्याप्तिः समाना ब्रह्मणस्तदतिरिक्तर्त्विग्वर्गस्य चैकस्मिन्हविःशेषे अवाधाख्ये सोमचमसे च प्राप्तिसत्त्वात् । एवमग्निष्टुत्याग्नेया गृहा भवन्ति इति विधौ चातिव्याप्तिः । तस्याग्निष्टुतीन्द्रवाय्वाद्यनेकदेवताप्राप्तौ चाग्निविधानार्थत्वात् । तस्मादतिव्याप्तत्वादपि नेदं लक्षणं युक्तमिति भावः । अप्राप्तविषयेष्विव पक्षप्राप्तविषयेष्वपि विधिष्वतिव्याप्तिरस्तीत्याह ।

तत्रान्यत्रापि चाप्तिर्नियमविधिषु चास्तीत्यतिव्याप्तिरेवं नित्यप्राप्तिर्विवक्षा न खलु विरहतः कूर्मकोशादिभक्ष्ये नित्यानित्यापि चास्मिन्कथमपि

---

१ स्तोमकेति २ पु० पा० ।

च समुच्चित्य चेत्प्राप्तिरिष्टा पत्नीयागाङ्गतायां नियमकृतिविधौ सा तथाप्यप्रणोद्या ॥२२॥

अवहननादिविधयो ऽप्यवहननविदलनादिषु पक्षप्राप्तेषु प्रवर्त्तन्त इति तेष्वतिव्याप्तिः स्पष्टैव। ननु तत्र चान्यत्र च प्राप्त इत्यत्र नित्यप्राप्तत्वं विवक्षितमिति चेत्। नैवं विवक्षितुं शक्यते। पञ्च पञ्चनखा भक्ष्या इति प्रसिद्धपरिसंख्यासंग्रहाभावप्रसङ्गात्। न हि कूर्मशशशल्यकश्वाविङ्गोधानां वानरशृगालादीनां च भक्षणं पुरुषे नित्यप्राप्तं तेषां भक्षणेनेव कदा चित्तद्वर्ज्जनेनापि पुरुषस्येप्सितसंभवेन तद्वर्जनस्यापि क्व चिद्रागतः प्राप्तिसत्त्वात्। ननु तर्हि नित्यानित्यत्वानादरेण समुच्चित्य प्राप्तिरत्र विवक्ष्यते। तथा च सति न नियमविधिष्वतिव्याप्तिरवहननविदलनादीनां परस्परप्रतिक्षेपकत्वेन समुच्चित्य प्राप्त्यसंभवात्। नाप्युदाहृतपरिसंख्यायामव्याप्तिः, कूर्मादिवानरादिभक्षणयोः परस्परप्रतिक्षेपकत्वाभावेन समुच्चित्य प्राप्तिसंभवात्। इति चेत्। एवमपि "पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्त" इति नियमविधावतिव्याप्तिः। इदमिह वाक्यं शंखिडान्तवाक्यरीत्या द्वादशाहिकानामङ्गां पत्नीसंयाजान्तत्वविधानेन तदुत्तराङ्गकलापपरिसंख्यार्थं न भवति किं तु "द्वादशाहेन प्रजाकामं याजयेद्" इत्यहःशब्दोदितानां द्वादशानां यागानां प्रजाकामार्थेन चोदितानामेकफलत्वेन प्रयोगैक्ये सति त-

न्निर्वाहाय पूर्वंपूर्वमङ्गः क्व चित्पदार्थे ऽवस्थाप्य परस्पर-मुपक्रमितव्यमित्यनियमेन पत्नीसंयाजरूपे तत्प्राचीने त-दुपरितने वा क्व चिदङ्गे ऽवस्थाने प्राप्ते पत्नीसंयाजेष्व-वस्थापननियमार्थमित्युपपादितं नवमे पत्नीसंयाजा-न्तत्वं सर्वेषामविशेषादित्यधिकरणे । ततश्च पत्नीसंया-जान्तानां तदुपरितनानां चाङ्गानां कदा चित्समुच्चि-त्य प्राप्तिरप्यस्तीत्यतिव्याप्तिरनिवार्या । एवं "यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तदि"ति नियमविधावतिव्याप्तिर्द्रष्ट-व्या । उपपादितं च जौहवाज्ये प्रयाजानामन्येषां च क-दा चित्समुच्चित्य प्राप्तिसत्त्वमथापि नियमविधित्वं च न-वमश्लोकावतारिकायाम् । स्यादेतत्तत्र चान्यत्र च प्राप्ते-तदन्यतरनिवृत्तिफलको विधिः परिसंख्येति फलमप्य-धिकं लक्षणे योजयिष्यामः । तथा चोदाहृतेष्वप्राप्तवि-षयेषु चतुष्षडष्टादिविधिषु तत्तत्प्राप्तेरेव फलत्वेन प-क्षप्राप्तविषयेष्ववहननादिविधिषु तत्तन्नियमनस्यैव फ-लत्वेन निवृत्तेरानुषङ्गिकत्वान्नातिव्याप्तिरित्याशङ्क्याह ॥

योज्यस्तत्रैव बाधः फलमपि य-दि तद्वार्थ एवावशिष्टः तस्याप्यु-क्त्या निषेधात्मकविधिनियमा-तिप्रसक्तेरवरोधात् ॥ प्राप्तं सर्वत्र किं चित्खलु सुलभतरं वर्ज्जनी-येन साकम् गृह्यन्ते ते ऽपि ल-

क्षया यदि तदपि विधौ सर्वथा-तिप्रसक्तिः ॥ २३ ॥

यदि लक्षणे निवृत्तिफलकत्वमप्यधिकं निवेश्यते तर्ह्यवशिष्टः श्रुतांशो व्यर्थः, विधिनियमयोः प्राप्तिपूर्त्ति-फलकयोर्निवृत्तिफलकत्वाभावेन तावतैव सर्वातिव्याप्तिवारणात्। स्यादेतत् निषेधात्मका अपि सन्ति विधयो नियमाश्च, यथा"दीक्षितो न जुहोति""न तौ पशौ करोति""नातिरात्रे षोडशिनं गृह्णाति" इत्यादयो विधिप्राप्तानां निषेधानां विषयः दीक्षामध्ये ऽग्निहोत्रहोमानां पशावाज्यभागयोरतिरात्रे षोडशिग्रहस्य च वर्जनानामत्यन्ताप्राप्तत्वात् "न हिंस्यात्""नानृतं वदेत्" इत्यादयो रागप्राप्तानां निषेधा नियमाः। हिंसादिनेव कदा चित्तद्वर्जनेनापि पुरुषस्येप्सितसंभवेन तस्यापि पक्षे प्राप्तत्वादिति चेत् नैवम्। तच्चतिव्याप्तेः। तस्य विशेषणांशस्योक्त्यापि निरोधासम्भवात्। सर्वत्र हि किञ्चित्किञ्चिद्वर्ज्जनीयं वर्जनीयेन सह समुच्चित्य प्राप्तं सुलभमेव यथा दीक्षामध्ये क्रत्वर्थहोमाः पुरुषार्थहोमैरग्निहोत्रादिभिः सह प्राप्ताः पशावाज्यभागव्यतिरिक्ताङ्गान्याज्यभागाभ्यां सह प्राप्तानि अतिरात्रे षोडशिग्रहव्यतिरिक्ताङ्गानि षोडशिग्रहेण सह प्राप्तानि पुरुषे भोजनादीनि हिंसादिभिः सह प्राप्तानि। ननु तत्र चान्यत्र च प्राप्तद्रव्यैकरूपसंबन्धेन प्राप्तिर्विवक्षिता अस्ति च प्रागुदाहृतेषु सर्वेषु परिसंख्योदाहरणेषु शेषत्वेन शेषित्वेनाश्रयत्वेन निमित्तत्वेन वा येन केन चिदेकरूपेणैव

संबन्धेनोभयोः प्राप्तिः। तथा च "दीक्षितो न जुहोती" त्यत्रापूर्वविधौ नातिव्याप्तिः, दीक्षामध्ये क्रत्वर्थहोमानां क्रतुशेषत्वेन प्राप्तिः पुरुषार्थहोमानां कालैक्येनेति संबन्धभेदात्। "नतौ पशौ करोति" "नातिरात्र" इति निषेधयोरुक्तलक्षणानुसारेण परिसंख्यात्वमेवास्तु। न चैवमपि न हिंस्यादिति नियमविधावतिव्याप्तिः पुरुषं प्रतिशेषत्वेनैव भोजनादीनां हिंसादीनां च प्राप्तिसत्त्वादिति वाच्यम्। अत्यन्ताप्राप्तनिवृत्तिफलकत्वस्य लक्षणे विवक्षितत्वादिति चेन्नैवम्। दृष्टार्थानां कण्डूयनादीनामदृष्टार्थानां च हरिहरस्मरणादीनां पुरुषार्थहोमैः सह क्रतौ कालैक्यसंबन्धेन प्राप्तिसत्त्वेन दीक्षितो न जुहोति इत्यपूर्वविधावुक्तविवक्षयाप्यतिव्याप्त्यनिरासात्। निवृत्तावत्यन्ताप्राप्तत्वविशेषणविवक्षायां शशादिपञ्चकव्यतिरिक्तपञ्चनखलक्षणनिवृत्तेरत्यन्ताप्राप्तत्वाभावेन पञ्चपञ्चनखा भक्ष्या इति परिसंख्यायामव्याप्तिप्रसक्त्या तस्य विशेषणस्याविवक्षणीयतया न हिंस्यादिति नियमविध्यतिव्याप्त्यनिरासाच्च। ननु "यदि दीक्षितो न जुहोती"त्यादिषु सर्वेषु निषेधेषु लक्षणमस्ति तदा सन्तु ते ऽपि परिसंख्या इति चेत्। तथाप्यपूर्वविधावतिव्याप्तिः। यदि निवृत्तिफलको विधिरित्येतावदेव लक्षणं क्रियते यदि वानेकस्य समुच्चित्य प्राप्ताविति विशिष्यते सर्वथाप्यग्निहोत्रादिविधावस्त्येवेदं लक्षणम्। श्रमपरिहाराद्यर्थं लौकिककर्मणामग्निहोत्रादिकर्मणां चाकरणयोः समुच्चित्य प्राप्तौ "यावज्जीवमग्निहोत्रं जुहोति" इत्यादिविधेरग्निहोत्राद्यकर-

णनिवृत्तिरूपतदनुष्ठानफलकत्वात्। न चात्र निवृत्ति-पदेन भावरूपैव निवृत्तिर्विवक्षितेति शक्यं वक्तुम्। प्रागुदाहृतनिषेधपरिसंख्यास्वनुष्ठानफलास्वव्याप्तिप्रसङ्गात्। तस्मात्परिसंख्यालक्षणमपि न युक्तमिति भावः। इति परिसंख्यालक्षणाक्षेपः समाप्तः।

विलक्षणान्यप्युदितानि
लक्षणान्यपूर्वविध्यादिविभागसिद्धये।
भजन्ति भूम्नेह कृतां पदावलिं
परस्परामप्यपरस्परामिमाम्॥

एवं संक्षिप्तमाक्षेपातिदेशम् एततप्रपञ्चनहेतूपन्यास-व्याजेन सामान्यतः प्रदर्शयति।

पूर्वाक्षेपप्रकारः प्रभवति परमप्यात्मवश्यं विधातुम् प्रायः सूक्ष्मं विभागं विधिषु गमयतां लक्षणानाममीषाम्। शक्यं तन्न्यायसाध्यप्रणिहितमतिभिर्बोद्धुमित्यप्रदर्श्य क्षिप्स्वप्येतेषु भिन्नस्थितिषु नवनवो वर्णितस्तत्प्रकारः॥ २४॥

अपूर्वविध्यादिविभाजकानामुदाहृतलक्षणानां मध्ये

पूर्वस्यापूर्वविधौ लक्षणस्य य आक्षेपप्रकारः स प्रायेण परं नियमविधिलक्षणमप्यास्कन्दितुं प्रभवति । तद्यथा पाक्षिके सतीत्यत्र विधिविषयस्य पाक्षिकत्वं विवक्षितं, यस्य कस्य चिद्वा । आद्ये सर्वत्र पाक्षिकत्वविवक्षायां विकृतिविशेषगतरथन्तरपृष्ठनियमविधावव्याप्तिः, विकृत्यन्तरे ऽपि तथैव नियमविधिसत्त्वेन तद्विध्यभावे रथन्तरपृष्ठस्य सार्वत्रिकपाक्षिकत्वाभावात् ; प्रकृतिविध्युद्देश्ये पाक्षिकत्वविवक्षायामपि पुरोडाशे कर्तृनियमार्थं प्रथनविधावव्याप्तिः विधिविषयस्य प्रथनस्योद्देश्ये पुरोडाशे नित्यप्राप्तत्वात् । द्वितीये सतिसप्तम्या यस्य पाक्षिकत्वमुपलक्षणत्वेन निर्दिष्टं तन्नियमफलकत्वपर्यन्तलक्षणं विवक्षितं, न वा । अन्त्ये साग्रहिण्यां चोदकाद्व्रीह्यादौ पक्षप्राप्ते सति तदङ्गानामामनहोमानामपूर्वविधावतिव्याप्तिः । आद्ये मन्त्रगतस्वरनियमार्थेषूपांशु यजुषेत्यादिषु कर्मगतस्वरविधानेष्वव्याप्तिः । यस्य स्वरस्य नियमो विधेः फलं तस्योद्देश्ये यजुर्वेदादिविहिते ज्योतिष्टोमादिकर्मण्यत्यन्ताप्राप्तत्वेन पाक्षिकत्वाभावात् । यस्य तच्च विकल्पितस्य दीक्षापरिमाणादेः पाक्षिकत्वमस्ति तन्नियमस्यैतद्विधिफलत्वाभावात् । यवेष्ववहननियमार्थं व्रीहिभिर्यजेतेति नियमविधौ चाव्याप्तिः । तत्र नियम्यस्यावहनस्य प्रकृतविध्युद्देश्ये यागे पक्षप्राप्त्यभावात् । यद्युच्येत प्रकृतोद्देश्ये पाक्षिकत्वं न विवक्षितं किं तु यत्र क्वचित् तथा चोद्देश्ये ऽन्यस्मिन्वा यस्मिन्कस्मिंश्चिद्विधिविषयस्यान्यस्य वा पाक्षिकत्वे सति तन्नियमफलको विधिरिति लक्षणमतो नोक्तातिव्याप्तिरिति । एवमपि

मन्त्रार्थवादसामर्थ्यादिलब्धद्रव्यगुणसंस्कारादिनियमफलकेषु नानाशाखादिगतेषु च नियमविधिष्वव्याप्तिः । भूयांसो ह्यजो ऽग्नीषोमीय इत्यादयो मन्त्रार्थवादसामर्थ्यादिलब्धविषया नानाशाखागताश्च नियमविधयः मन्त्रार्थवादसामर्थ्यादिकल्प्यशाखान्तरगतविधीनामप्यप्रवृत्त्यपेक्षया तेषु पाक्षिकत्वसमर्थने "दण्डी प्रैषानन्वाह" इत्यादिविधिषु नानेकविध्यप्रवृत्त्यपेक्षया नियमपरिसंख्यालक्षणसाङ्कर्यापत्त्यानिष्टं प्रसज्येतेत्युक्तम् । अपि च पञ्च पञ्चनखा भक्ष्या इति परिसंख्यायामतिव्याप्तिः । तत्फलभूतायाः शशादिपञ्चकव्यतिरिक्तपञ्चनखलक्षणनिवृत्तेः पक्षे रागत एव प्राप्तिसम्भवात् । भावस्य पाक्षिकत्वविवक्षायां न हिंस्यात्सर्वाभूतानीत्यादिनियमविधावव्याप्तिः, क्वचिद्व्रतविशेषे कांश्चिन्नियमान्विधाय तद्विकृतौ व्रतान्तरे तन्नियमाभावमुक्त्वा पुनस्तद्वत्कर्त्तव्यत्वेन विहिते व्रतान्तरे विशिष्य किंचिन्नियमाभावो यत्रोपदिश्यते तत्र परिसंख्याविधया तदन्यनियमाः प्राप्यन्तइति तस्यां परिसंख्यायामतिव्याप्तिश्च । तत्र भावरूपनियम्यगतपाक्षिकत्वसत्त्वात् । किं च किं पाक्षिकत्वं विवक्षितम् । यदि सर्वोद्देश्यानुवृत्तप्राप्तिमत्त्वं तदा सार्वकाम्यविधावतिव्याप्तिः । ज्योतिष्टोमप्राप्तेः स्वर्गान्यफलेष्वनुवृत्त्यभावात् । असम्भवश्च । अवघननादीनामुद्देश्येषु सर्वेष्वपि व्रीह्यादिषु प्राप्तेः समर्थितत्वात् । उद्देश्याव्यापकप्राप्तिमत्त्वं तदिति चेत् । तर्ह्युद्देश्येष्वप्राप्तिकरम्बितप्राप्तिमत्त्वम् । तदुद्देश्यप्राप्तिरहितेषु "साम्ना स्तुवीते" त्यादिनियमविधिष्वव्याप्तम् । उद्देश्येष्विति विशेषाविवक्षायामपि षाड-

ष्टिकब्रह्रद्रथन्तरपृष्ठत्वादिविध्यतिव्याप्तम्। तत्राह भेदा-
दिह्वपावच्छेदे भेदो ऽस्तीति चेत्। किं विनैवावच्छेदभेद-
मप्राप्तिकरम्बितप्राप्तिमत्त्वं विवक्षितम्। ॐ मिति चेत्।
तह्र्यसम्भवः, अवहननादिप्राप्त्योरपि उपायान्तरतद्विरह-
रूपावच्छेदभेदनियतत्वात्। उपायान्तरतद्विरहभिन्नाव-
च्छेदभेदं विनेति विवक्षायामपि कार्यषोडश्यनुगमनर-
थन्तरादिनियमाव्याप्तिः। वैकल्पिकतद्विरहभिन्नावच्छे-
दभेदं विनेति विवक्षायां वैकल्पिकत्वस्य पाक्षिकत्वानुप्र-
वेशरहितस्य निर्वक्तुमशक्यत्वादात्माश्रयः। आश्रयभेदं
विनेति विवक्षायामपि श्यावाश्वब्रह्मत्वोक्तिप्रमुखापूर्ववि-
धिषुतिव्याप्तिः। पूतीकाऽन्यलिङ्गमन्त्रउत्करपरिध्यादिनि-
यमाव्याप्तिश्च। कादाचित्कप्राप्तिमत्त्वं पाक्षिकत्वमिति
विवक्षायामपि चोदकप्राप्तापोदितकृष्णलश्रपणादिवि-
ध्यतिव्याप्तिरिति। एवं नियमविधिलक्षणाक्षेपप्रकारः
प्रायेण परिसंख्यालक्षणमप्यास्कन्दितुं प्रभवति। तद्यथा
प्रायणीयादिषूपायपरिसंख्या रशनादानादिषूपेयपरिसं-
ख्या हृदयस्याग्रे ऽवद्यतीत्यादिषूपायोपेयपरिसंख्या। त्रि-
विधायामप्यस्यां परिसंख्यायां कस्य चिदुपेयस्य कस्य चिदु-
पायस्य तत्तत्प्रतियोगिनश्च विध्युपात्तत्वमस्ति। ननु हृ-
दयस्याग्रे ऽवद्यतीत्यादिषु हृदयाद्येकादशातिरिक्तपश्वव-
यववर्गस्यावदानोपेयत्वपरिसंख्यायामेव प्रतियोगिनो
ऽवदानस्य विध्युपात्तत्वमस्ति न तु तस्य पशुयागोपाय-
त्वपरिसंख्यायां प्रतियोगिनः पशुयागस्येति चेत्। न।
तत्राङ्गवाक्यानां प्रधानवाक्यैकवाक्यताकल्पने सति तस्य
विध्युपात्तत्वलाभात्। क्व चित्क्व चिदुपेयतत्प्रतियोगि-

नोरुपायत्प्रतियोगिनोश्च मध्ये एकस्य द्वयोर्वा विध्यनुपात्तत्वमपि दृश्यते । यथा "यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान्ग्रहान् गृह्णीयादि"त्यत्र रथन्तरसामारथन्तरसामविकृतिरूपस्योपेयस्यैकस्य विध्यनुपात्तत्वम् ।"कपालेषु श्रपयती"त्यत्र चित्रेष्टिव्रीहिनियमयोरुभयोरपि विध्यनुपात्तत्वं तदेवमुपात्तानुपात्तरूपे द्विविधेऽप्युदाहरणे ग्राह्यव्यावर्त्तनीययोर्नियतप्राप्तिरस्ति । क्वचिद्व्यावर्त्तनीयमात्रप्राप्तावपि परिसंख्या दृश्यते । यथा"ऽत्र ह्येवावपन्ती"ति । क्वचित्तु परिसंख्यायां नियतप्राप्तमेव न दृश्यते । यथा"पञ्च पञ्चनखा भक्ष्या"इति । एवं नानाप्रकारः परिसंख्याविधिर्नियमविधिवदेव लक्षणेन संग्रहीतुं शक्यः । अयं तु प्रकारः । परिसंख्याविधिलक्षणाक्षेपे प्रदर्शितप्राय इति नेह प्रपञ्च्यते । एवमपूर्वविधिलक्षणाक्षेपप्रकारोऽपि परिसंख्याविधिलक्षणमवस्कन्दितुं प्रभवति । तथा हि प्राप्तइति विषयसप्तमीति पक्षे तत्र चान्यत्र चेति सप्तम्योस्तया सामानाधिकरण्ये लक्षणस्यासम्भव एव स्यात् । ग्राह्यव्यावर्त्तनीययोरुभयोरपि विधिविषयत्वाभावात् । वैयधिकरण्ये तु सार्वत्रिकोभयप्राप्तिविवक्षायां गृहमेधीयगताज्यभागद्वयविधावव्याप्तिः । अवभृथेऽपि तथैवाज्यभागविधिसत्त्वेन तद्विध्यभावे सर्वविकृतिगताज्यभागतदितराङ्गकलापरूपोभयप्राप्त्यभावात् । प्रकृतिविधावुद्देश्यत्वेन विधेयत्वेन वान्वयिन्युभयप्राप्तिविवक्षायामपि कपालेषु श्रपयतीति परिसंख्याविधावव्याप्तिः । सतिसप्तमीपक्षे यस्य ययोरुभयोः प्राप्तिरुपलक्षणत्वेन निर्द्दिष्टा तस्य तदन्य-

तरसंबन्धव्यावर्त्तनफलकत्वपर्यन्तं लक्षणं न विवक्षितं चे-त्तर्ह्याग्नेयाद्यां चोदकादनेकस्मिन्नङ्गकलापे प्राप्ते सत्याम-न्त्रहोमविधावतिव्याप्तिः । तथा विवक्षितं चेत्कपालश्र-पणविध्याद्यव्याप्तिः यद्युच्येत प्रकृतविध्युपात्तगतोभ-यप्राप्तिर्न विवक्षिता किं तु यस्य कस्य चिद्यत्किञ्चिदु-भयप्राप्तिः । तथा च तस्य तदन्यतरसंबन्धनिवृत्तिफ-लको विधिः परिसंख्येति विवक्षितत्वान्नोक्ताव्याप्तिर्ना-प्यतिव्याप्तिरिति चेत् । एवमपि मन्त्रार्थवादसामर्थ्यल-भ्यप्रयोजनेषु नानाशाखागतेषु च परिसंख्याविधिषु अ-व्याप्तिरित्यादिप्रागुक्तमेवानुवर्त्तत इति । एवं यद्यपि पूर्वाक्षेपप्रकारः परत्रापि प्रवर्तते तथापि स धीमद्भिः सं-चारयितुं शक्य इति नियमपरिसंख्ययोर्भिन्नभिन्न आक्षे-पप्रकारो दर्शितः । तथा चैते त्रयो ऽपि विधयस्तुल्य-स्थितय इत्युत्तरोत्तरस्मिन्वर्णिताक्षेपप्रकारो ऽपि पूर्वपू-र्वस्मिन्संभवन्सञ्चारणीय इति भावः ॥

इति त्रिविधविधिलक्षणाक्षेपपरस्परातिदेशः समाप्तः ।

एवमपूर्वनियमपरिसंख्यानामुदाहरणेष्वथाक्षेपसमा-
धानं क्रियते । तत्राक्षेपः ।

उत्पश्यामो न चोदाहरणमपि
पराप्राप्तरूपं विधीनाम् प्राप्तं ख-
ल्वग्निदीक्षाहवनमिव हविःप्रो-
क्षणं मन्त्रलिङ्गात् ॥ नैय्यत्यं
सोमपात्रग्रहण इव ततः प्राप्त-
मेवावहन्तौ प्राप्तं तद्दृष्टकार्या-
न्वयपरमुसलोलूखलाम्नानतश्च२५

व्रीहीन्प्रोक्षतीतिविधिरित्युदाहृतं वार्त्तिके । तत्ता-
वदयुक्तम् । दर्शपूर्णमासप्रकरणेन तदपूर्वार्थत्वेनावगत-
स्याग्नये त्वा जुष्टं प्रोक्षाम्यग्नीषोमाभ्यामित्यादिमन्त्रस्य
देवतार्थद्रव्यप्रोक्षणलिङ्गबलाद्धविःप्रोक्षणद्वारेण तादर्थ्यं
स्यादिति तत एव हविःप्रोक्षणकर्त्तव्यता प्राप्यते किमत्र
व्रीहीन्प्रोक्षतीति विधिना । अङ्गीकृता खलु दशमे ष-
ड्भिर्दीक्षयतीत्यग्निप्रकरणगतविधिना दीक्षार्थतयाऽवग
तानामाकूतिमग्निं प्रयुजं स्वाहेत्यादिमन्त्राणां स्वाहाका-
रलिङ्गबलाद्धोमद्वारेण तादर्थ्यसिद्धेस्तत एव होमकर्त्त-
व्यता प्राप्यतइति, तथा व्रीहीनवहन्तीतिविधिर्नियम-
विधिरित्युदाहृतमप्ययुक्तम् । दर्शपूर्णमासप्रकरणेन त-
दपूर्वार्थत्वेनावगतस्यावरक्षो दिवः सपत्नं वध्यासमितिम-

न्तस्यावहननलिङ्गबलादवहननद्वारेण तादर्थ्यं स्यादिति तत एव पुरोडाशीयद्रव्यवितुषीकरणार्थत्वेनानियतप्राप्तस्यावहननस्य नियमलाभात् । अयमपि न्यायस्तृतीये संप्रतिपन्नः। तत्र हि मन्त्रानुवाकसमाख्यया मन्त्रसंबन्धित्वेनावगतयोर्मन्त्रानुवाकमध्यपठितयोरश्विनोस्त्वा बाहुभ्यां सध्यासं नृचक्षसं त्वा देवसोमसुचक्षा अवख्येषमिति मन्त्रयोर्ग्रहणावेक्षणलिङ्गबलात्तद्द्वारेण मन्त्रसंबन्धित्वं स्यादिति। तत एव परहस्तगतं सोमपात्रमगृहीत्वाप्यनवेक्ष्यापि लक्षयितुं शक्यत्वेनानियतप्राप्तयोर्ग्रहणावेक्षणयोर्नियमो ऽङ्गीकृतः। किं च वारणो यज्ञावचरो वैकङ्कतो यज्ञावचर इति वारणवैकङ्कतपात्राणां यज्ञसाधनत्वं विदधता वाक्येनोलूखलमुसलयोरपि वारणपात्रयोर्यज्ञसाधनत्वमवगतम्। तच्च तयोरुत्पत्तिशिष्टपुरोडाशाद्यवरुद्धेष्वाग्नेयादियागेषु साक्षात्साधनत्वासम्भवात्किंचिद्द्वारेण निर्वहणीयमिति तद्द्वारत्वेन नित्यकर्त्तव्यमवहननं प्राप्यते। न च वाच्यम् स्फ्यश्च कपालानि चेत्याद्यनुक्रम्यैतानि वै दशयज्ञायुधानीति यज्ञसाधनत्वेनाम्नातानां स्फ्यादीनां यज्ञायुधानि सम्भरन्तीति सादनविधानात्तदन्तर्गतयोरुलूखलमुसलयोः सादनद्वारेणैव यज्ञसाधनत्वं स्यादिति। अग्रे तयोर्दृष्टकार्याभावेन तत्प्रत्यासत्तिसंपादकस्य सादनस्यादृष्टार्थतापत्तेर्दृष्टार्थत्वे सम्भवति तस्यादृष्टार्थत्वायोगात् । स्फ्येनोद्धन्तीत्यादिभिरुद्धननादिषु विनियुक्तानां स्फ्यादीनां सादनं दृष्टार्थमुलूखलमुसलयोस्तददृष्टार्थमिति सादनविधिवैरूप्यापत्तेश्च । अतस्तदुलूखलमुसलद्वन्द्वं दृष्टकार्यविनियोगमाकाङ्क्षं सत्सामर्थ्याद्-

र्थप्राप्तावहननार्थं सम्पद्यते अवहननस्य चूर्णीकरणादिवद् दृषदुपलादिसाधनान्तरसाध्यत्वाभावेन नियमतस्तदुभयापेक्षत्वादिति नित्यवदाम्नातोलूखलमुसलकार्यत्वेनान्वयबलादप्यवहननस्य नियमो लभ्यते किमत्र व्रीहीनवहन्तीतिविधिना। तस्मात् व्रीहीन् प्रोक्षति व्रीहीनवहन्तीति अपूर्वनियमविध्युदाहरणमयुक्तमितिभावः। नन्वनन्यलभ्ययोरपि प्रोक्षणावहननियमयोरभ्युदयार्थौ वर्ती विधी स्यातां गत्यन्तराभावात् स्वर्गकामसाम्नदृश्यादिविधिवदित्याशङ्क्य परिसंख्यार्थत्वेन तयोश्चारितार्थ्यमाह॥

तस्मादत्तोभयस्मिन् यवपरिहृतये पारिसंख्यो विधिः स्यात् नो चेत्प्राप्त्यै नियत्यै कथमपि च भवन्न प्रसिद्धो ऽपि सः स्यात् यद्वापूर्वो विधिः स्यान्नियमपर इहाध्वर्यवत्वं नियच्छन् अन्यस्मिन्द्वंद्वसंपादनविधिवशगे तत्प्रयच्छन्नपूर्वः॥ २६॥

मन्त्रलिङ्गात्प्राप्तवदाग्नेयाग्नीषोमीयपुरोडाशार्थद्रव्यविषयं प्रोक्षणं मन्त्रलिङ्गोलूखलमुसलाम्नानाभ्यां प्राप्त-

वन्नवहननियमश्च व्रीहीणामिव यवानामपि प्राप्नुयात्। तन्निवर्तकतया परिसंख्याविधित्वेन सम्भवत्यनयोश्चा-रितार्थ्येनानन्यगतिकमभ्युदयार्थापूर्वनियमविधित्वं क-ल्पनीयम्। यदि तु नित्यप्राप्तबाधकपरिसंख्यापेक्षया नित्यप्राप्तमभ्युदयार्थं प्रापयन्नियच्छन्वा विधिः श्रेयानि-त्येवं प्रोक्षणावहननवाक्ययोरपूर्वनियमविध्यभ्युपगमो न त्वनन्यगतिकतयेति मन्यसे तदानीमश्वाभिधानीमा-दत्त इत्यत्र प्रसिद्धो ऽपि परिसंख्याविधिर्न सिद्ध्येत् किं तु तत्र मन्त्रप्राप्तौ मन्त्रनियमे वाऽन्यलभ्ये ऽप्यभ्युदयशिर-स्कतया मन्त्रस्य प्राप्तिं नियमं वा कुर्वन्नपूर्वविधिर्नियम-विधिर्वा स्यात्, शक्यते ह्येवं वक्तुम् अश्वरशनाग्रहणप्रका-शने मन्त्रं प्रापयन्नयमपूर्वविधिस्तत्र कल्पसूत्रोपदृष्टव-चनात्मीयग्रहणकवाक्यरूपानियतानेकोपायप्राप्तौ म-न्त्रं नियच्छन्नियमविधिर्वेति। अत्रेदं वक्तव्यम्। मन्त्रलि-ङ्गबलादेव तत्र मन्त्रस्य तावत्प्राप्तिर्लभ्यते सा च तस्य नित्यवदाम्नानबलान्नियतैव लभ्यते तथा च प्राप्तिनिय-मयोरन्यलभ्यत्वेनापूर्वनियमविध्योरसम्भवात्परिसंख्या-विधिरभ्युपगत इति। कथमेतदुपपद्यते। यद्यन्यलभ्य-योरपि प्राप्तिनियमयोरभ्युदयशिरस्कत्वेनानन्यलभ्यत्व-मुपपाद्य प्रोक्षणावहननविध्योरपूर्वनियमविधित्वमिति परिसंख्यार्थत्वं प्रतिक्षिप्येत तथा ह्यत्रापि तथैवापूर्ववि-धित्वं नियमविधित्वं वा सम्भवतीति परिसंख्यार्थत्वं न सिध्येत्। अथापि तत्र परिसंख्यार्थत्वाभ्युपगमे तथैव प्रोक्षणावहननविध्योरपि तादर्थ्यमभ्युपगन्तुं युक्तम्। अ-थोच्येत व्रीहीनवहन्तीत्ययं परिसंख्याविधिरित्यभ्युपगमे

ऽवहननपरिसंख्या तन्नियमपरिसंख्या वेति निर्धारणं न सम्भवति नियामकाभावात् अतस्तत्र यथा कथं चिन्नियमविधिरेवाश्रयणीय इति अत्रापि चोद्ये प्रसिद्धो ऽप्येवं सति परिसंख्याविधिर्न स्यात् । तत्रापि कथं चिदपूर्वविधिर्नियमविधिरेव वाश्रयणीयः स्यादित्येवोत्तरम् । तत्रापि मन्त्रपरिसंख्या तन्नियमपरिसंख्या वेति निश्चयो न सम्भवत्येव । यद्युच्येत मन्त्रस्य विधिबोधितेनाश्वाभिधानीग्रहणसंबन्धमात्रेण तस्याग्निप्रकरणाम्नानस्चरितार्थमिति नैराकाङ्क्ष्येण तत्र गर्दभरशनाग्रहणसाधारणस्य लैङ्गिकविनियोगकल्पनस्याप्रवृत्तेर्मन्त्रो गर्दभरशनाग्रहणं न स्पृशत्येव । अतो मन्त्रपरिसंख्येयं न तन्नियमपरिसंख्या । अश्वरशनायां मन्त्रनियमे विधिना प्रतिपादिते ह्यन्यत्र तन्नियमपरिसंख्या स्यान्न त्वत्राश्वरशनामन्त्रेणैवादद्यादिति मन्त्रनियमो विधिना प्रतिपादितः । स तु नियमः परिसंख्यावदर्थोल्लभ्यते अश्वरशनाग्रहणे मन्त्ररूपोपायसंबन्धे विधिना बोधिते तावता नैराकाङ्क्ष्येण पाक्षिककल्पसूत्रादिसाधारणलौकिकोपायकल्पनाऽप्रवृत्तेः । किं तु प्रकरणसनाथमन्त्रलिङ्गपर्यालोचनयापि लब्धुं शक्यत्वात्सोमस्य विधेः फलत्वेन नाद्रीयते इति । सर्वमेतदवहननविधावपि समानम् । अथैवमुच्येत तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयत इति परिसंख्यालक्षणं तत्र चान्यत्र च नित्यप्राप्त इत्येवं परमन्यथा नियमविधिरपि तत्र चान्यत्र च पक्षप्राप्ते प्रवर्त्तत इति तत्रातिव्याप्तिप्रसङ्गात् । ततश्च रशनाग्रहणे मन्त्रविधेः परिसंख्यात्वम्

श्वगर्दभरशनाग्रहणयोर्मन्त्रस्य नित्यप्राप्तिमपेक्ष्योपपादनीयम् । नित्यप्राप्तिश्च तस्य तयोः प्रकरणानुगृहीतमन्त्रलिङ्गकल्प्यविधिलभ्या न तु अनियतानेकोपायकल्पनालभ्या प्रकरणानुगृहीतमन्त्रलिङ्गकल्प्यस्य विधेरश्वगर्दभरशनाग्रहणयोर्मन्त्रकल्पसूत्राद्यनियतानेकोपायप्राप्तौ नियमविध्यात्मक इति नियमविधिलभ्यामश्वगर्दभरशनाग्रहणयोर्मन्त्रनियमरूपां प्राप्तिमपेक्ष्य प्रवर्तमाना परिसंख्या मन्त्रनियमपरिसंख्या पर्यवस्यतीति गर्दभरशनाग्रहणान्मन्त्रनियम एव व्यावर्त्तते न तु कल्पसूत्रादिवदनियमेन प्राप्नुवन्मन्त्रो ऽपि । अत एव वैखानसं पूर्वेऽहन्साम भवति षोडश्युत्तर इत्यत्र परिसंख्येति वृत्तिकारपक्षे प्रकृत्यतिरात्रतश्चोदकात्पाक्षिकी षोडशिग्रहस्य या प्राप्तिस्तामपेक्ष्य नेयं परिसंख्या परिसंख्याया नित्यप्राप्त्यपेक्षत्वात् चोदकाधीनपाक्षिकप्राप्त्यपेक्षत्वे नियमविधित्वप्रसङ्गात् । किं तूत्तरे ऽहन् द्विरात्रस्य गृह्णात इति द्विरात्रसामान्यस्योत्तरे ऽहनि यः षोडशिग्रहनियमविधिश्चोदकाधीनपाक्षिकषोडशिग्रहप्राप्त्यपेक्षस्तल्लभ्यामङ्गिरसां द्विरात्रस्य द्विरात्रान्तराणां चोत्तरे ऽहनि समुच्चित्य प्राप्तं षोडशिग्रहनियममपेक्ष्येयं परिसंख्येति द्विरात्रान्तराणामुत्तरादह्नो नियमविध्यधीनः षोडशिग्रहनियम एव व्यावर्त्तते न तु चोदकलभ्यः पाक्षिकः षोडशिग्रहो ऽपीत्युपपादितं तन्त्ररत्ने । ननु सर्वद्विरात्रविषयं प्रत्यक्षं सामान्यशास्त्रं प्रथमप्रवृत्तमिति तेन सर्वद्विरात्रेषु प्राप्तं षोडशिग्रहनियममपेक्ष्य द्विरात्रान्तरेभ्यस्तत्परिसंख्या युज्यते । इह मन्त्रलिङ्गव-

त्वाद्श्वगर्दभरशनाग्रहणयोर्मन्त्रनियमकल्पनं प्रथमं न प्रवृत्तमिति कथं तल्लभ्यं तयोर्मन्त्रनियममपेक्ष्य गर्दभरशनातो मन्त्रनियमपरिसंख्या घटते । न च वाच्यं तत्रापि हिराक्षसामान्यविषयतया सामान्यद्वारेणाङ्गिरसां हिराक्षतदितरहिराक्षरूपेषु विशेषेषु प्रवर्त्तमानादुत्तरेऽहन् हिराक्षस्य गृह्णतइति शास्त्रादङ्गिरसां हिराक्षरूपविशेषविषयमेव शास्त्रं प्रथमं प्रवर्त्तते आहवनीयशास्त्रादिव पदशास्त्रमिति । सामान्यशास्त्रे हिराक्षमात्रमपि वर्णोपात्तमस्ति तदपि नास्ति षोडश्युत्तर इति शास्त्रे किं तु प्रकरणपर्यालोचनया तस्याङ्गिरसां हिराक्षसंबन्धोऽवगन्तव्य इति तत्र सामान्यशास्त्रस्यैव प्रथमप्रवृत्तिमत्त्वादिति चेत् । मैवम् । षोडश्युत्तरइति शाब्दनियमपरिसंख्यायां परिसंख्येयनियमप्रापकप्रमाणस्य प्रथमप्रवृत्त्यपेक्षणेऽप्यत्रार्थनियमपरिसंख्यायां तदपेक्षाभावात् । तर्कितां नियम्यप्रापकप्रमाणप्रवृत्तिमपेक्ष्यार्थनियमशास्त्रप्रवृत्तिवत्तर्कितां परिसंख्येयप्रापकप्रमाणप्रवृत्तिमपेक्ष्यार्थपरिसंख्याशास्त्रप्रवृत्तिसम्भवात् । कपालेषु श्रपयतीत्यत्रान्यलभ्यपुरोडाशश्रपणविषयतत्प्रवृत्त्यधीनप्रवृत्तिकत्रीह्यादिनियमशास्त्रप्रवृत्तिमपेक्ष्य चित्रेष्टावर्थाद्व्रीहिनियमपरिसंख्यालाभस्य नवमश्लोकावतारिकायां प्रदर्शितत्वाच्च । न च वाच्यं परिसंख्यामात्रस्य नियतप्राप्त्यपेक्षत्वात्सर्वापि परिसंख्या नियमपरिसंख्यैव स्यादिति । यत्रानियतप्राप्तस्याऽनियामकतया प्रवृत्तं निवृत्तं वा प्रमाणमपेक्ष्य परिसंख्या । यत्र त्वनियतप्राप्तिरहितस्य नियतप्रापकतया प्रवृत्तं तर्कितं वा प्रमाणमपेक्ष्य परिसंख्या तत्राज्यभागौ यजती-

त्यादौ स्वरूपपरिसंख्येति व्यवस्थोपपत्तेः। अतः स्वरूपपरिसंख्या नियमपरिसंख्येति परिसंख्याया द्वैविध्यं लभ्यत एव। नियमे ऽप्येवं द्वैविध्यं दृश्यते । स्वरूपनियमः परिसंख्यानियम इति।व्रीहिभिर्यजेतेत्यादावनियतप्राप्तस्य व्रीह्यादिस्वरूपस्य नियमः।"पत्नीसंयाजान्तान्यङ्गानि सन्तिष्ठन्त" इत्यादावनियतप्राप्तायाः प्राकृताङ्गपरिसंख्याया नियम इति तस्मादिह नियमपरिसंख्येति निर्द्धारणमुपपद्यत इति । इदमपि सर्वमवहननविधिसाधारणम्। एवमेव हि तस्याप्यवहनननियमपरिसंख्यात्वमुपपद्यते । ननु व्रीहीनवहन्तीत्यत्रावहननरूपपरिसंख्या तन्नियमपरिसंख्या वेत्युपन्यस्ते ऽस्मिन्पक्षद्वये ऽप्ययं विधिरनन्यलभ्यां परिसंख्यामिवान्यलभ्यमपि नियमं स्पृशत्येवं तत्रावहननस्वरूपपरिसंख्यापक्षे नियमपरिसंख्ययोरेकदृष्टान्तगतफलद्वयन्यायेन परस्परानपेक्षयोर्व्रीहिष्ववहननसंबन्धकरणेनार्थाल्लाभः। तन्नियमपरिसंख्यापक्षे व्रीहिष्ववहननसंबन्धो बोधयन्विधिस्तस्य लोकतः पाक्षिकीं प्राप्तिं परामृश्य तन्नियमे ऽवतरन्नियम्यस्यापि मन्त्रसामर्थ्यादिलभ्यत्वं परामृश्य नियमपरिसंख्यायां पर्यवस्यतीति नियमतत्परिसंख्ययोः पौर्वापर्येण लाभ इत्येवविशेषः । एवं पक्षद्वये ऽपि नियमस्पर्शावश्यम्भावे सति यवपरिसंख्या न सम्भवति व्रीहिस्वरूपतद्गतवैतुष्यानुपयोगिनो नियमस्यानर्थक्यपरिहाराय व्रीहिगतापूर्वीयत्वरूपोपयोगितासिद्धये व्रीहिपदे ऽपूर्वीयत्वरूपलक्षणावश्यम्भावेनावहनननियमे यवसाधारण्यस्यावर्जनीयत्वात् इति चेत् । इदमपि चोद्यमेवं सति प्रसिद्धो ऽपि परिसंख्याविधिर्न स्यादित्यने-

नैव दत्तोत्तरं इत्यश्वाभिधानीमादत्त इति प्रसिद्धपरिसंख्याविधिर्मन्त्रलिङ्गप्राप्तं मन्त्रादानसंबन्धमनूद्य मन्त्रस्याश्वाभिधानीसंबन्धं प्रापयन् गर्दभरशनातस्तं व्यावर्त्तयतीति हि भाष्यकारेणोक्तम्। अयमश्वाभिधान्यां मन्त्रनियममप्युक्तेन न्यायेन स्पृशेदेव। ततश्चाश्वाभिधानी तत्स्मरणानुपयोगिनो नियमस्यानर्थक्यपरिहारायाश्वाभिधानीगतापूर्वीयत्वोपयोगित्वसिद्धये ऽश्वाभिधानीपदे ऽपूर्वीयत्वलक्षणावश्यमापतति अपूर्वीयत्वं च गर्दभाभिधानीसाधारणमिति कथं ततो मन्त्रो व्यावर्त्तताम्। न हि बृहद्रथन्तरयोरिवाश्वगर्दभरशनयोर्भिन्नापूर्वानुप्रवेशो ऽस्ति येन बृहद्धर्माणां रथन्तर इवापूर्वीयत्वलक्षणाभ्युपगमे ऽप्यश्वाभिधानीधर्माणां गर्दभाभिधान्या सांकर्यं न स्यात्। यद्यप्यत्र।

तस्मान्नादत्त इत्येतद्रूपात्प्राप्तमनूद्यते।
न चेत्यश्वाभिधानीमित्येतदेवं विधीयते॥
किं त्वश्वरशनामन्त्रधात्वर्थैर्युगपत्त्रिभिः।
विशिष्टाभावनैवैका प्रत्ययेन विधीयते॥

इति वार्त्तिकोक्तं विशिष्टविधिपक्षमवलम्ब्याश्वाभिधान्युद्देशेन मन्त्रस्याविधानात् नाश्वाभिधानीपदे ऽपूर्वीयत्वलक्षणाप्रसक्तिरिति परिहर्तुं शक्यं तथाप्ययं परिहारो न सार्वत्रिकः। तथैव व्रीहीनवहननविशिष्टभावनाविधिरिति प्रकृते ऽपि वक्तुं शक्यत्वात्। विशिष्टविधिपक्षे ऽपि फलतः परिसंख्याप्रयोजनं विधेः किं स्यादस्येति सुनिरूपणेन गर्दभाभिधानी-

तः फलमन्यन्निवर्त्तनादिति तत्र वार्त्तिकोक्तया रीत्यापि सुलभैव । तस्मात्प्रोक्षणावहननविध्योर्यवपरिसंख्यार्थत्वे न काचिदनुपपत्तिः । नन्वेवं सति व्रीहिभिर्यजेतेतिविधिर्व्रीहिसंस्काराणां यवसाधारण्यापादनार्थ इति त्वया व्यवस्थापितं न सिद्ध्येदिति चेत् । एवं तर्हि प्रोक्षणावहननविधी यवपरिसंख्यार्थौ माभूतां, प्रोक्षणविधिः प्रोक्षणस्याध्वर्युकर्तृकत्वं नियच्छन्नियमविधिरवहननविधिरवहननस्य तदेव प्रयच्छन्नपूर्वविधिरस्तु, प्रोक्षणस्य हि मन्त्रलिङ्गकल्प्यश्रुतिविधेयत्वे कल्प्यश्रुतावाध्वर्यवादिसमाख्यानाभावात्तत्रानियमेन यः कश्चित् ऋत्विक् कर्त्ता प्राप्नुयात् प्रत्यक्षश्रुतिविधेयत्वे तु तत्राध्वर्यवसंज्ञककाण्डाम्नानेनाध्वर्यवसमाख्यालाभादध्वर्युरेव कर्त्तेति नियमो लभ्यते । तथावहननस्य मन्त्रलिङ्गादिकल्प्यश्रुतिमूलत्वे द्वन्द्वसंपादनविधिवशात्तत्र यजमान एव कर्त्ता प्राप्नुयात् । तथा हि याजमानकाण्डे वत्सं चोपावसृजत्युखाञ्चाधिश्रयत्यवहन्ति दृषदौ च समाहन्तीत्याद्यनुकीर्त्य एतानि वै द्वादशद्वन्द्वानि दर्शपूर्णमासयोस्तानि संपाद्य यजेतेति श्रूयते । तत्र द्वन्द्वसंपादनं नाम क्रियाविशेषेण द्वयोः प्रत्यासन्नत्वसंपादनम् । यथा वत्सोपावसर्जनक्रियया धेनुवत्सयोर्यथा वावहननक्रियया मुसलोलूखलयोः, ताश्च द्वन्द्वसंपादिन्यो द्वादशापि क्रियाः समाख्यावशाद्यजमानेन कर्त्तव्याः प्राप्ताः । आध्वर्यवकाण्डेऽपि वत्समुपावसृजत्युखामधिश्रयति व्रीहीनवहन्तीत्यादिश्रवणात् अध्वर्युणा कर्त्तव्याः प्राप्ताः । न चासां द्याम्नातानामपि वाजस्य मा प्रसवेनेत्यादिमन्त्रोच्चारणवदुभय-

कर्तृकत्वं सम्भवति एकेन कृतानामितरेण कर्तुमशक्य-त्वात् । अत एकः कर्त्तेति स्थिते कः कर्त्तेति विशेषाका-ङ्क्षायामाध्वर्यवकाण्डमध्ये याजमानकाण्डाम्नानेन वि-शेषसमाख्यानाद्यजमानः कर्त्तेति प्राप्ते तासां क्रिया-णां स्वरूपेणाध्वर्यवकाण्डे विधानादध्वर्युरेव साक्षात्क-र्त्ता । याजमानकाण्डे इन्दुसंपादनात्मना यजमानः स्मा-रकतया प्रयोजको भविष्यतीत्यविरोध इति समर्थितं याजमाने समाख्यानात्कर्माणि याजमानानि स्युरिति तार्त्तीयाधिकरणे । तत्र यथाध्वर्यवकाण्डे वत्समुपावसृ-जतीत्यादिवद्व्रीहीनवहन्तीति विधिरपि नाश्रोष्यत् तदा-क्रियान्तरेषु विध्यन्तरानुसारेण यजमानस्य प्रयोजक-त्वेऽप्यवहनने याजमानविधिसारस्यभङ्गायोगात्तत्र त-स्य साक्षात्कर्तृत्वमापत्स्यत् । अतो व्रीहीनवहन्तीति विधिना तत्राप्राप्तमध्वर्योः कर्तृत्वं लभ्यते । एवं च प्रोक्षणविधिरन्यलभ्यं प्रोक्षणं द्वारीकृत्य कर्तृनियमे पर्यवसानान्नियमविधिरवहननविधिलभ्यमवहननियमं द्वारीकृत्य कर्तृप्राप्तौ पर्यवसानादपूर्वविधिरित्येव परि-णमेत् । सर्वथापि प्रोक्षणविधिरपूर्वविधिरवहननविधि-र्नियमविधिरित्युदाहरणमयुक्तमिति भावः । उक्तन्यायेन परिसंख्योदाहरणमपि कर्तृनियमार्थमेव स्यान्न तु परि-संख्यार्थमिति तदुदाहरणमप्ययुक्तमित्याह ।

एवं चाश्वाभिधानीग्रहविधिर-
पि तत्कर्तृनैयत्यमात्रप्राप्त्यर्थः
पर्यवस्योत्प्रथनविधिरिव प्राप्त-

मन्त्रानुवादी ॥ मन्त्रेऽप्यन्या-
प्रसक्तौ विधिरिह सगुणप्राक्त-
ताङ्गोक्तनीतिः न ह्यास्येन्मन्त्र-
मात्रे सति विधिविषये स्या-
द्विशिष्टानुवादः ॥ २७ ॥

विध्यन्तरावकाशसत्त्वे जघन्यपरिसंख्यार्थत्वं न स्वीकर्त्तव्यमिति प्रागुक्तम्। प्रोक्षणावहननविध्योस्तु कर्तृनियमप्राप्त्यर्थतया चारितार्थ्यमुक्तं तेन न्यायेन परिसंख्योदाहरणे ऽपि कर्तृनियमार्थतैव स्यात्। अर्थप्राप्ते ग्रहणे ऽध्वर्योः पाक्षिकत्वेन नियमविध्यवकाशसत्त्वात्। तत्र मन्त्रग्रहणं कर्तृनियमार्थं प्रथनविधाविव लिङ्गप्राप्तस्य मन्त्रस्यानुवादकं स्यात् "उरु प्रथस्वेति पुरोडाशं प्रथयती"ति विधिर्न प्रथनविधिः प्रथनस्य पुरोडाशान्यथानुपपत्तिलभ्यत्वात्। नापि तत्रोरु प्रथस्वेति मन्त्रविधिस्तस्य मन्त्रलिङ्गादेव प्रथने प्राप्तिसत्त्वात्, किं त्वन्यलभ्यप्रथनविधानद्वारा ऽऽध्वर्युकर्तृकत्वनियमार्थस्तत्र मन्त्रग्रहणं लिङ्गप्राप्तानुवाद इति ह्युक्तं मन्त्राधिकरणे। ननु प्रथनविधौ लिङ्गप्राप्तस्य मन्त्रस्य विधाने प्रयोजनाभावादस्त्वनुवादः। इह तु लिङ्गात्प्राप्नुवन्मन्त्रो गर्दभरशनायामपि प्रसज्येतेति तद्व्यावर्त्तनेन मन्त्रविधेः प्रयोजनवत्त्वादिह मन्त्रांशे ऽपि विधिः स्यात्। तल्लभ्य-परिसंख्यायाः समाख्यालभ्यकर्तृनियमाविरोधित्वेन

तदर्थत्वे परिसंख्यार्थत्वं नाभ्युपगन्तव्यमिति निर्बन्धाभावादिति चेत्। सत्यमिदम् परिसंख्यालाभार्थं मन्त्रस्यापि विधानं विकृतिषु सगुणप्राकृताङ्गपुनःश्रवणान्यधिकृत्य विकृतौ शब्दवत्त्वात्प्रधानस्य गुणानामधिकोत्पत्तिसन्निधानादिति दाशमिकाधिकरणे प्रदर्शितन्यायो न सहते। एकादशप्रयाजान्यजति हिरण्यगर्भः समवर्त्तताग्र इत्याघारयतीत्यादौ यत्र प्राकृतं प्रयाजाघारादिकमङ्गं वैकृतसंख्यामन्त्रादिगुणयुक्तं श्रूयते तत्र गुणमात्रविधाने प्राकृतगुणस्य स्थाने वैकृतगुणनिवेशमात्रं लभ्यते। यथेहाश्वाभिधानीग्रहणमात्रविधाने तत्र कर्तृनियममात्रप्रयाजादिप्राकृताङ्गस्यापि विधाने गृहमेधीयाज्यभागविधानन्यायेन तस्य चोदकलोपकतया प्राकृताङ्गान्तरपरिसंख्यापि लभ्यते। यथेह मन्त्रस्यापि विधाने गर्दभरशनाग्रहणपरिसंख्यापि लभ्यते। अथापि तस्मिन्नधिकरणे विशिष्टविधिगौरवपरिजिहीर्षया गुणमात्रविधिमङ्गीकृत्य परिसंख्या निवारिता। एवमिहापि विशिष्टविधिगौरवपरिहाराय कर्तृनियमार्थमश्वाभिधानीग्रहणमात्रविधानमङ्गीकर्त्तव्यं न तु परिसंख्यार्थं मन्त्रविधानमपीति तेनैव न्यायेन प्राप्नोति। ननु तर्हि तत्र संख्यादिवदिह मन्त्र एव विधीयताम्। एवमपि विशिष्टविधिगौरवपरिहारलाभात् चोदकप्राप्तप्रयाजादिवदर्थप्राप्तस्य ग्रहणस्यानुवादसम्भवादिति चेत्। किं तदा ग्रहणमात्रे मन्त्रविधिरश्वाभिधानीग्रहणे वा। आद्ये मन्त्रलिङ्गादेव प्राप्तिसम्भवाद्विधिवैयर्थ्यम्। द्वितीये विशिष्टानुवादः स्यात्तथा च विशेषणांशाविवक्षया

पुनरपि तदैव विधिवैयर्थ्यम् । अश्वाभिधानीमादत्त इत्यत्र मन्त्र-विधिरित्यभ्युपगमे ऽप्युक्त एव दोषः । विशिष्टानुवादप-रिहाराय तत्राप्ययस्त्रविशेषणस्याविवक्षणीयत्वात् तस्मा-दाश्वमभयं हविरार्त्तिमार्छेत्तरसमयाः सवनीयाः पुरोडा-शाः ऐन्द्रवायवाग्रं प्रथममहरित्यादिष्विव वाक्यभेदाप्र-सङ्गाय विशिष्टानुवादस्य परिहरणीयत्वादेकादश प्र-याजान्यजतीत्यादिष्विव सतिसम्भवे विशिष्टविधिगौर-वस्यापि परिहरणीयत्वादिह चार्थप्राप्तग्रहणविधानेन कर्तृनियमार्थतया विधिचारितार्थ्यसम्भवाच्चात्र नियम-विधित्वमेव न्याय्यं न तु परिसंख्याविधित्वम् । नन्वेका-दशप्रयाजान्यजतीत्यादिषु प्रयाजानुवादस्याश्रितविधी-यमानगुणाश्रयसमर्पकतयोपयोगः । इह त्विमामगृभ्णन्र-शनामिति मन्त्रानुवादस्य न तथा ऽप्युपयोगः । न च परिसं-ख्यार्थत्वेनोपयोगसम्भवे प्रथनमन्त्रवन्निष्फलानुवादत्व-कल्पनं युक्तमिति चेन्नैवम् । ब्रह्मसाम्न्यालभत इत्यत्र द्रव्यदेवताविशिष्टयागविधिगौरवपरिहाराय तत्पर्यग्नि-कृतानुत्सृजतीति पृथगाख्यातद्युक्तस्य वाक्यस्य तद्वाक्य-विधेयप्राजापत्यपशवालम्भनोत्कर्षार्थप्राप्ततद्विषयव्यापा-रोपरमानुवादत्वकल्पनायाः संप्रतिपन्नत्वेनात्र मन्त्रवि-शिष्टग्रहणविधिगौरवपरिहाराय परिसंख्यापरिहाराय च मन्त्रप्रतीकोपादानमात्रस्यानुवादकत्वकल्पनायामन-नुपपत्त्यभावात् । तस्माद्विशिष्टविधिगौरवस्य विशिष्टा-नुवादस्य च परिहाराय रशनाग्रहणविधिरेव, तस्या-ध्वर्युकर्तृकत्वनियमफलको ऽभ्युपेय इति भावः । स्या-देतन्माभून्मन्त्रस्याश्वाभिधानीविशिष्टग्रहणविधिरश्वाभि-

धानीगृह्णोद्देशेन मन्त्रविधिरश्वाभिधान्युद्देशेन मन्त्रविधिर्वा। अथमात्रोद्देशेन मन्त्रविधिस्तु स्यात् तत्र विशिष्टविधिगौरवस्य विशिष्टानुवादकृतवाक्यभेदस्य चाप्रसक्तेः। रशनागृहणप्रकाशकस्य मन्त्रस्य साक्षादश्वार्थत्वासम्भवात्तदीयरशनागृहणद्वारकत्वं पर्यवस्यतीत्यर्थः सिद्धार्थानुवादः परमभिधानीमादत्तइति फलं चास्य विधेर्गर्दभरशनातो मन्त्रपरिसंख्यैव। रशनागृहणप्रकाशनद्वारकमन्त्राश्वसंबन्धस्य मन्त्रलिङ्गतः प्राप्तुं शक्यत्वेन विधिफलत्वायोगादित्याशङ्क्याह।

उद्देश्योऽथाश्व एवेत्यपि न फलवती स्पष्टलभ्ये विधेये भावार्थे
को हि विद्वान्विधिमिह तमुपेक्ष्यान्यसंक्रान्तमिच्छेत्। कर्त्तुर्नैयत्यमेतत्फलमपि परिसंख्यावसाय्यस्तु नामस्पृष्टा नैषा हि
दोषैर्न च भवति विधेर्विध्यनर्होपयानम् ॥ २८ ॥

अयमपि पक्षो न समञ्जसः समानपदोपात्तधात्वर्थविधाने श्रुतिप्रमाणके सम्भवति वाक्यप्रमाणकभिन्नपदोपात्तमन्त्रविध्यङ्गीकारस्यान्याय्यत्वात्। मन्त्रवि-

धिफलात्परिसंख्यानाद्ग्रहणविधिफलस्य कर्तृनियमस्याभ्यर्हितत्वाच्च । ननु च ग्रहणविधिलभ्यः कर्तृनियमोऽपि परिसंख्यापर्यवसाय्येव । तथा हि अश्वगर्दभरशनयोर्ग्रहणमन्त्रागृहीताभ्यां ताभ्यामश्वगर्दभयोर्बन्धुमशक्यत्वादर्थप्राप्तं न तु प्रत्यक्षश्रुतिविहितम् । अर्थप्राप्तेषु च नाध्वर्यवादिसमाख्यास्तीति समाख्यातः कर्तृनियमालाभादध्वर्योरुभयत्रापि पाक्षिकाप्राप्तिरूपा नियमप्राप्ताप्राप्तांशपरिपूरणरूपो नियमः क्रियमाणः स्वयमेव तावत्परिसंख्यात्मना पर्यवस्येत्तदनुनिष्पादिनी पक्षप्राप्तकर्त्रन्तरनिवृत्तिरपि परिसंख्यात्मना पर्यवस्येत् । उभयत्र पक्षप्राप्तानां कर्त्रन्तराणामेकत्र निवृत्तिरूपत्वादिति चेत्, अस्तु नामैवं, कर्तृनियमोऽपि परिसंख्यापर्यवसायी, तथापि सा परिसंख्या न दोषत्रयग्रस्ता, नापि विध्यन्तरविधिमूला, गर्दभरशनातो मन्त्रपरिसंख्या तु दोषत्रयग्रस्तेति दर्शयिष्यते । विध्यन्तरविधिमूले तु स्पष्टमेव क्रियामनन्तर्भाव्य मन्त्राश्वसंबन्धस्य विधातुमयोग्यत्वात् । तस्मादुदाहृतविधेः कर्तृनियमफलकत्वमेव युक्तम् । न तु मन्त्रपरिसंख्याफलकत्वमिति भावः । नन्विमामगृभ्णन्निति मन्त्रस्याध्वर्यवसमाख्यानेनैव तत्प्रकाश्यस्य ग्रहणस्याध्वर्युकर्तृकत्वनियमः सिद्ध्यति । अतस्तदर्थमर्थप्राप्तग्रहणविधेरनपेक्षितत्वाद्दाक्ष्यस्याध्वर्यवत्वाय परिसंख्याविधिरेवाङ्गीकरणीय इति चेन्नैवम् । अध्वर्यूच्चारितमन्त्रेणान्यस्याप्यनुष्ठेयार्थस्मरणसम्भवेन तावता ग्रहणस्याध्वर्युकर्तृकत्वासिद्धेः । अत एव प्रथनमन्त्रस्याध्वर्यवत्वेऽपि प्रथनस्याध्वर्यवत्वसिद्ध्यर्थं प्रथने विधिरङ्गीकृतो मन्त्रा

धिकरणे । अत एव मन्त्रकल्पसूत्रादितौल्येनोपदृष्टवचनस्यानुष्ठेयार्थस्मरणोपायत्वेन पक्षप्राप्तिरपि दर्शिता । ननु माभून्मन्त्रयोः समाख्यया प्रथनरशनाग्रहणयोरध्वर्युकर्तृकत्वसिद्धिः प्रोक्षणावहननयोस्तु स्यादेव । प्रोक्षामि वध्यासमित्युत्तमपुरुषेण प्रतीयमानस्य मन्त्रोच्चारयितृकर्तृकत्वस्य बाधकाभावेन त्यागायोगादिति चेत् । एवं तर्हि प्रोक्षणावहननविध्योः प्रथमसुपपादितं यवपरिसंख्यार्थत्वमेवास्तु माभून्नियमापूर्वविधित्वम् । न च तथा सति व्रीहिशास्त्रं व्यर्थं स्यात् । प्रोक्षणावहननविध्योर्व्रीहिपदस्यापूर्वीयत्वलक्षणया यवसाधारण्यापादनेनैव तस्य फलवत्त्वादितिवाच्यम् । तस्याश्वशफपरिमाणपुरोडाशोत्पादनासमर्थाल्पव्रीहिलाभे प्रतिनिध्यनुपादानार्थतया चारितार्थ्यसंभवेन यवसाधारण्यापादनफलकत्वस्यानभ्युपगन्तव्यत्वात् । अपि च व्रीहिशास्त्रेणापि प्रोक्षणावहननयोर्यवसाधारण्यं कर्त्तुं न शक्यमिति तस्य तत्फलत्वाभ्युपगम एव न युक्त इत्यभिप्रेत्याह ॥

यद्व्रीहिप्रोक्षणादेर्यवमपि विषयं
तन्वते तच्च चिन्त्यं युक्तापूर्वेण
दध्यानयनविधिनयादर्थवत्ता-
विधीनाम् ॥ नो चेन्नैमित्तिको
ऽपि प्रतिनिधिवदियात्सोमध-
र्मोपदेशान्नचक्रेत्संमीलनादीन-

पि च पृथगपि स्तुत्यपूर्वाविभेदात् ॥ २६ ॥

व्रीहीन् प्रोक्षति व्रीहीनवहन्तीति अपूर्वनियमविध्युदाहरणयोर्व्रीह्युद्देशेन विधीयमानं प्रोक्षणमवहननं च यवसाधारणं, व्रीहिपदस्यापूर्वीयपरत्वादिति सिद्धान्तमर्यादा ऽप्यनुपपन्ना । व्रीहिपदस्य मुख्यार्थपरत्वं परित्यज्यापूर्वीयाकरलक्षकत्वं किमर्थं कल्पनीयम् । न तावत्तदर्थस्य द्वितीयाश्रुत्यवगतप्रोक्षणावहननसाध्यत्वनिर्वाहार्थं व्रीहीन्प्रोक्षति व्रीहीनवहन्तीति लौकिकप्रोक्षणावहननविषयपौरुषेयवाक्यइव तस्य जलसंयोगतुषविमोकरूपलौकिकफलविशिष्टतया तत्साध्यत्वोपपत्तेः । नापि तस्य प्रोक्षणजन्यादृष्टसंस्कारावहननियमसाध्यत्वनिर्वाहार्थं तत्साध्यत्वस्याश्रुतत्वात् । क्रियासाध्यत्वरूपमात्रं हि द्वितीयाश्रुत्यवगतं कर्मत्वम् । न तु क्रियाजन्यातिशयतन्नियमसाध्यत्वपर्यन्तम्। ननु तथापि प्रोक्षणजन्यसंस्कारावहननियमयोर्वैफल्यपरिहाराय तत्साध्यत्वं व्रीहिशब्दसमर्पितस्यैव वक्तव्यमिति तदर्थमपूर्वीयाकरलक्षणेति चेन्न, यदर्था व्रीहयस्तस्मिन्नपूर्वएव तयोरप्युपयोगसम्भवात् । "प्राङ्मुखो ऽन्नानि भुञ्जीत" इत्यत्र हि प्राङ्मुखत्वनियमो भोजनस्वरूपानुपयोगी भोजनस्यापूर्वार्थत्वाभावेन तद्गतापूर्वीयत्वरूपोपयोगीत्यपि समर्थयितुमशक्यः सन्नक्लृप्तापूर्वोपयोगी कल्प्यते । इह क्लृप्ते दार्शपौर्णमासिके प्रकरणिन्यपूर्वे विपरिवर्त्तमाने तयोस्तदुपयोगित्वं कथं न कल्प्येत । ननु च प्रोक्षणावहननयोरपूर्वीयव्री-

ह्यर्थत्वाभावे तद्वाक्यगतव्रीहिपदं लौकिकापूर्वीयसाधारण्येन व्रीहिमात्रपरं वा स्यात्, लौकिकव्रीहिपरं वा। आद्ये विधिवैरूप्यापत्तिः, अपूर्वीयव्रीहिषु प्रोक्षणावहननयोर्विनियुक्तसंस्कारतया गुणकर्मत्वस्य लौकिकव्रीहिषु भूतभाविविनियोगरहितेष्वर्थकर्मत्वस्य च प्राप्तेः। द्वितीये द्वितीयाश्रुत्यवगतद्रव्यप्राधान्यभङ्गापत्तिः। तस्माद्विधिवैरूप्यपरिहाराय श्रुतगुणप्रधानभावनिर्वाहाय प्रोक्षणावहननयोः सामवायिकाङ्गत्वलाभाय च व्रीहिपदस्यापूर्वीयव्रीहिपरत्वावश्यंभावे सति तत्र लौकिकव्रीहिव्यावर्त्तकस्यापूर्वीयत्वस्यावश्यं विवक्षणीयत्वाद्व्रीहित्वस्यापि विवक्षायां विशिष्टानुवाददोषापत्तेः अपूर्वीयत्वस्य च यवसाधारणत्वात्प्रोक्षणावहननयोर्यवसाधारण्यमवर्जनीयमिति चेत् मैवम्। व्रीहिपदस्य व्रीहिमात्रपरत्वेऽपि तत्र लौकिकव्रीहिव्यावर्त्तकस्यापूर्वीयत्वस्यार्थाल्लाभसम्भवेन विशिष्टानुवाददोषाप्रसङ्गात्। तथा हि अधिकारवाक्यस्य प्रकाराकाङ्क्षायामवहननवाक्यस्य फलाकाङ्क्षायां चावहननवाक्यस्यापि समिदादिवाक्यवदधिकारवाक्येनैकवाक्यता कल्पनीया। ततश्च तस्यैवमर्थः संपद्यते। अवहननेन व्रीहिद्वारेण स्वर्गार्थदर्शपूर्णमासयागापूर्वं प्रतिव्याप्रियेतेति। न चाऽतत्साधनभूतव्रीहिद्वारा तत्प्रतिव्यापर्त्तुं शक्यते। तेनार्थाद्य एव यागार्थं निरुप्ता व्रीहयः स्तेषामेवावहननमिति व्यवस्था सिद्ध्यति। एतेन प्रोक्षणमपि व्याख्यातम्। एवमर्थाल्लभ्ये प्रोक्षणावहननयोरपूर्वसाधनव्रीहिविषयत्वे व्रीहिपदस्य श्रुतव्रीहित्वपरित्यागेनापूर्वसाधनत्वेन लक्ष-

णा कल्पयितुमुचिता । अवश्यं च लौकिकमाधारणे-नाकारेण शब्दसमर्पित एवापूर्वीयपदार्थे संस्कारकर्मा-न्वयबोधने सति तदनन्तरं तस्यापूर्वीयत्वावगतावर्थात्सं-स्कारस्यापूर्वीयविषयत्वपर्यवसानमित्ययं न्यायस्तप्ते प-यसि दध्यानयतीत्यत्राङ्गीकरणीयः । तत्र हि पयः संस्कारतया दध्यानयनं विधीयते नयतेर्द्विकर्मकत्वेन पयसः कर्मत्वावश्यम्भावात् । पयोदध्यानयनेन व्याप्यं प्रधानकर्मेति तद्गतस्य दध्यानयनाधारत्वस्य सप्तम्या नि-र्देशः । तत्तु दध्यानयनसंस्कृतं पयः सा वैश्वदेव्यामिक्षे-ति तदनन्तरवाक्ये प्रधानपरामर्शिना तच्छब्देन परामृश्य देवतासंयुक्तं क्रियते । तद्वाक्यसिद्धेन च द्रव्यदेवतासंयो-गेन यागो ऽनुमीयते । तत्र संस्कारवाक्यप्रवृत्तिवेलायां पयसो ऽनुमास्यमानयागापूर्वार्थत्वानवगतेः । पयस्त्वेन श-ब्दसमर्पित एव पयसि संस्कारदध्यानयनान्वयबोधः, त-दनन्तरं संस्कृतस्य पयसो देवतासंयोजने सति द्रव्यदे-वतासंयोगानुमितयागापूर्वार्थत्वे ऽवगते संस्कारस्यार्थाद-पूर्वीयविषयत्वपर्यवसानम् । एवमिहापि प्रोक्षणावहन-नवाक्यश्रवणदशायां केवलं व्रीहित्वेन शब्दसमर्पितेषु व्रीहिषु प्रोक्षणावहननान्वयबोधः । तदनन्तरवाक्ययोर-धिकारवाक्यैकवाक्यतादशायां प्रोक्षणावहननयोरपूर्वा-र्थत्वे ऽवगते तयोरर्थादपूर्वीयविषयत्वपर्यवसानमिति यु-ज्यतएव । अपि च तयोरप्यपूर्वार्थत्वावगत्यनपेक्षायामप्य-पूर्वीयव्रीहिविषयत्वमर्थाल्लभ्यते । यस्योभावनुगतावग्नी अभिनिम्लोचेदभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्ति-रित्यत्र हविरार्त्यधिकरणन्यायेन श्रुतस्याग्न्युभयत्वस्या-

विवक्षयान्यतराग्न्यनुगमनेऽपि पुनराधानप्रसक्तौ शाब्दान्वयबोधवेलायामुभयत्वप्रहाणेनाग्न्यनुगममात्रस्य निमित्तत्वावगतावपि निमित्ते विधीयमानमाधानं सहितयोरेवाग्न्योरुत्पादनक्षमम्। न त्वेकैकस्याग्नेरिति विधेयसामर्थ्यादुभयाग्न्यनुगमस्य निमित्तत्वलाभः एवमिहापि द्वितीयाश्रुतिनिर्दिष्टव्रीहिगुणतया विधीयमानं प्रोक्षणमवहननं च भूतभाव्युपयोगरहितलौकिकव्रीहिविषयं भवितुं न योग्यमिति विधेयसामर्थ्याच्छाब्दान्वयबोधानन्तरमपूर्वीयव्रीहीणां विषयत्वलाभः संभवतीति किमनुपपन्नम्। अवश्यं चात्राप्येवमेवोपपादनीयम्। अन्यथा शाब्दान्वयबोधवेलायामपूर्वीयत्वविवक्षायां तस्य जुह्वादिसाधारण्याज्जुह्वादिष्ववहननस्य कृष्णलश्रपणवददृष्टार्थताया वक्तव्यत्वाच्च। विधिवैरूप्यापत्तिं तण्डुलश्रपणाडिकापूर्वीयत्वविवक्षायां विशिष्टानुवाददोषापत्तिं वा को वारयिता। अपि च यदा व्रीहिषु विहितमवहननादिकमपूर्वीयत्वलक्षणया यवेष्वपि स्यात् तदा सोमे विहितं क्रयादिसंस्कारजातं फलचमसेऽप्युपदेशत एव स्यात्। हविःप्रकृतित्वेन सोमयागापूर्वसाधनत्वस्य तत्रापि सत्त्वात्। ननु नित्यस्य क्रयादिसंस्कारजातस्याधिकारान्वये नैमित्तिकत्वादनित्यः फलचमसोद्वारं भवितुं नार्हति स्वयं च विशेष्यतया तेनान्वेतुं नार्हति। न खल्वभिषवेन नित्यं ज्योतिष्टोमस्योपकुर्यादनित्यफलचमसद्वारेति युज्यते। नापि नित्याभिषवविशिष्टेन फलचमसेन निमित्तवान्यजेतेति युज्यते। तस्मान्नित्यानित्यसंयोगविरोधान्न फलचमसस्य

सोमसामानविध्यमिति चेन्न्यादेतदेवम् । यदि फलचमसत्वाकारेण स वाक्यार्थान्वयी स्यात् सोमं क्रीणातीत्यादिसंस्कारवाक्येषु सोमपदलक्षितापूर्वसाधनत्वाकारेण स वाक्यार्थान्वयी चेत्कः प्रसङ्गो नित्यानित्यसंयोगविरोधस्य सर्वत्रापि हि ज्योतिष्टोमप्रयोगे हविःप्रकृतित्वेन तदपूर्वसाधनीभूतः फलचमसः सोमो वास्त्येव । यद्येवमपि फलचमसस्यासाधारणरूपेण नित्यत्वमालोच्य नित्यानित्यसंयोगविरोधः शङ्क्येत तदा व्रीहिसोमादिप्रतिनिधिनीवारपूतीकादीनामपि तत्तत्संस्कारोपदेशेषु सामानविध्यं न सिद्ध्येत् । ननु व्रीहिसोमादिमुख्यालाभे नीवारपूतीकाद्याः स्वयमेव तत्तत्स्थानेनोपादीयन्ते येन तदुपादानस्य मुख्यालाभनिमित्तकत्वेनानित्यत्वान्नित्यसंस्कारान्वये नित्यानित्यसंयोगविरोधो भवेत् किं तु व्रीह्यादिसदृशेषु नीवारादिषु ये व्रीह्याद्यवयवास्त एवोपादीयन्ते ते च व्रीह्याद्यनुप्रविष्टतत्तदवयवव्रीह्यादिशास्त्रमुख्यार्था एवेति । न नित्यानित्यसंयोगविरोधप्रसक्तिरिति चेत् । एवं तर्हि मुख्यप्रतिनिध्युभयलाभे कदा चिदिच्छया प्रीतिनिध्युपादानमपि प्रसज्येत व्रीह्यादिशास्त्रमुख्यार्थत्वाविशेषात् । ननु मुख्यप्रतिनिध्योर्व्रीह्याद्यवयवभूयस्त्वाल्पत्वाभ्यामस्ति विशेषः । तथा च व्रीह्यादिगतसमग्रावयवोपादानसम्भवे नीवारादिगतविकलावयवोपादानं न प्रसज्येत इति चेत्, तर्हि व्रीह्यादिगतसमग्रावयवालाभनिमित्तमेव नीवारादिगतविकलावयवोपादानमिति कथं नित्यानित्यसंयोगविरोधो न भवेत् । किं च सोमाभावे पूतिकानभिषुणुयादिति विधिना स्प-

ष्टमेव पूतीकानां सोमाभावनिमित्तकत्वमसीयते। नन्वत्र सोमाभावे निमित्ते पूतीका न विधीयन्ते किं तु सोमाभावे तत्सदृशानामन्येषामेव बह्ववयवलिप्सयोपादाने प्राप्ते तेन मन्दसदृशाः पूतीका नियम्यन्त इति तृतीयषष्ठयोरुक्तमिति चेत् किं ततस्तेनापि नैमित्तिकत्वमेवायाति सप्तमीश्रुतिप्राप्तं सोमाभावस्य निमित्तत्वं पूतीकानां तद्गतसोमावयवानां वा साधनत्वे किंचिदपि न भिद्यते। तस्मात्तत्रैवं नित्यानित्यसंयोगविरोधः परिहरणीयः। यद्यपि नीवारपूतीकादिगतव्रीहिसोमाद्यवयवास्तदसाधारणरूपेण मुख्यालाभनिमित्तकत्वादनित्यास्तथापि प्रोक्षणादिशास्त्रगतव्रीह्यादिपदतात्पर्यविषयेण साधारणरूपेण नित्या एवेति। अयं परिहारो नैमित्तिके फलचमसादावपि समानः। एवमेव हि "यदाहवनीये जुहोती"त्यादिष्वपि नित्यानित्यसंयोगविरोधः परिहरणीयः। अन्यथा तत्राप्याहवनीयस्यैष्टिकसौमिकाद्यपूर्वार्थत्वं नित्यवदाम्नातं नारिष्टहोमादिद्वारैव स्यादिति भेदनादिनिमित्तहोमानामाहवनीयाधारत्वं न सिद्ध्येत्। क्व तर्हि नित्यानित्यसंयोगविरोधः। यत्रानित्यमेकमेव द्वारं भवति तत्रैव यथा "भिन्ने जुहोती"ति। अत्र हि होमो भिन्नाधिकरणकस्तत्संस्कार इति पूर्वपक्षे भिन्न इत्यस्य संस्कार्यपरतया निमित्तपरत्वाभावेन होमो नित्यः स्यात्तद्द्वारं तु भिन्नमनित्यमेवेति नित्यानित्यसंयोगविरोधः। तस्मात्प्रतिनिधीनां मुख्यसामानविध्यं नैमित्तिकानां नित्यसामानविध्याभावं च व्यवस्थयाभ्युपगच्छद्भिर्मीमांसकैः संस्कारवाक्यगतव्रीहिसोमादिपदानामपू-

वीयत्वलक्षणां परित्यज्य मुख्यार्थपरत्वमेवाभ्युपेत्य प्रतिनिधिगतमुख्यावयवानां व्रीह्यादिगततदवयवानामिव व्रीह्यादिपदमुख्यत्वान्मुख्यसामानविध्यं,फलचमसस्य सोमपदविषयत्वाभावान्न सोमसामानविध्यमित्येव सा व्यवस्थोपपादनीया । प्रतीयते च तत्तदधिकरणपर्यालोचनया तथैवाभ्युपेत्य सा व्यवस्थोपपादितेति कथमिति चेत् । उच्यते । नैमित्तिकमतुल्यत्वादसमानविधानं स्यादिति तार्तीयाधिकरणे "यदि राजन्यं वैश्यं वा याजयेत्स यदि सोमं बिभक्षयिषेन्न्यग्रोधस्तिभिनीराहृत्य ताः संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेन्न सोममि"ति वाक्यमुदाहृत्यात्र राज्यन्यवैश्यनिमित्तेन सोमस्थाने विधीयमानः फलचमसः संस्कारवाक्येषु सोमेन समानविधानः स्यादुतासमानविधान इति संशय्यापूर्वीयत्वाविशेषात्समानविधान इति पूर्वपक्षं कृत्वा नित्यमभिषवे सा ज्योतिष्टोमस्योपकुर्यान्नैमित्तिकफलचमसद्वारेत्येवमन्वये नित्यानित्यसंयोगविरोधान्न समानविधान इति सिद्धान्तितम् । अनेनापूर्वीयत्वमर्थाल्लभ्यं न सोमपदविषयः इति पूर्वपक्षबीजमाभासं मत्वा फलचमसस्य फलद्रव्याकारेण संस्कारवाक्येषु सोमपदविषयत्वं न सम्भवतीति दूषणं च स्पष्टत्वादुपेक्ष्य तस्य तथा तद्विषयत्वसम्भवेऽपि नित्यानित्यसंयोगविरोधादुपदेशतः संस्कारान्वयो न युज्यतइति प्रतिपादितमित्यवसीयते । अन्यथाऽपूर्वीयत्वाकारेण फलचमसस्य संस्कारवाक्यानुप्रवेशव्याशङ्कितत्वन्तं प्रति फलचमसत्वाकारेण नित्यानित्यसंयोगविरोधोद्भावनायोगात् । तथा प्रतिनिधेस्त-

इष्टिरिति तदनन्तराधिकरणे व्रीह्यादिप्रतिनिधयो नीवारादयो ऽपि व्रीह्यादिभिर्न समानविधाना व्रीह्याद्यभावे निमित्ते उपादीयमानत्वेन नैमित्तिकतया फलचमसतुल्यत्वादिति पूर्वपक्षं कृत्वा मुख्याभावे नीवाराद्या न यागसाधनत्वेनोपादीयन्ते तद्गता व्रीह्यवयवा एव तु सकलासम्भवाद्विकला उपादीयन्ते नीवारावयवोपादानं त्वनुषङ्गादवर्जनीयतया व्रीह्यवयवाश्च व्रीहिगता इव नीवारगता अपि व्रीहिशब्दविषयतया संस्कारविध्यन्विता एव । अतः समानविधाना इति तद्वत्प्रयोजनैकत्वादितिसूत्रेण सिद्धान्तितम् । अनेनापि संस्कारवाक्येषु व्रीह्यादिशब्दानां मुख्यार्थविवक्षा स्पष्टमेवावसीयते अपूर्वीयत्वाविवक्षायां नीवारादिकस्याप्यपूर्वीयत्वेन संस्कारविध्यन्वयस्य सूपपादतया तेषां साधनत्वनिराकरणेनानुपयोगप्रसङ्गात् । स्यादेतन्नैमित्तिकप्रतिनिध्योर्नित्यसंयोगविरोधप्रसङ्गतदप्रसङ्गौ न मूलयुक्तित्वेनासामानविध्यसामानविध्यव्यवस्थापकौ किं तु द्विरुक्तिप्रसङ्गतदप्रसङ्गौ । तथा हि नित्यं नैमित्तिकं च न युगपद्विधेयं किं तु नित्यं सोमादिद्रव्यं सामान्येन विधाय सर्वत्र तस्यैव प्राप्तौ राजन्यादिनिमित्ते सति विशेषरूपेण नैमित्तिकं फलचमसादिविधेयम् । तत्रास्यां वेलायां स्वाभाविकनित्याङ्गविधेयं तस्यामेव संस्कारविधयस्तन्मात्रविशेषणत्वेन स्वार्थं विधाय निवृत्तव्यापारा न भूयः शक्नुवन्ति नैमित्तिकविशेषणत्वेनापि स्वार्थं विधातुमावृत्तिप्रसङ्गादित्येवं द्विरुक्तिप्रसङ्गो नैमित्तिकस्यासामानविध्यव्यवस्थापकः । तदप्रसङ्गः प्रतिनिधेः सामानविध्यव्यवस्था-

पकः । न हि सामान्यविशेषरूपेण भिन्नविधिविधेययो-र्नित्यनैमित्तिकयोरिव मुख्यप्रतिनिध्योर्व्रीह्यादिपदविषयत्वाविशेषाद्व्रीहिभिर्यजेतेत्याद्येकविधिविधेययोर्विधानायौगपद्यमस्ति येन द्विरुक्तिराशङ्क्येतेति । एवं द्विरुक्त्यापादकं विध्ययौगपद्यमेवातुल्यत्वादिति नैमित्तिकाधिकरणसिद्धान्तहेतुपरशब्देन विवक्षितम् । द्विरुक्तिशङ्कापलापकं विधानैक्यमेव च प्रयोजनैकत्वादिति प्रतिनिध्यधिकरणसिद्धान्तहेतुपरशब्देन विवक्षितम् । विधानं हि वाक्यस्य प्रयोजनमिति चेत् उच्यते । एवमपूर्वीयत्वविवक्षाविरोधो नापैत्येव । यस्यां वेलायां व्रीहिभिर्यजेतेत्यादिशास्त्रं प्रवर्त्तते तस्यामेव वेलायां व्रीह्यादिविशेषणत्वेन संस्कारवाक्यैरवहननादीनि समर्प्यमाणानि व्रीहित्वादिनैव तदन्वयं लभेरन्नापूर्वीयत्वेन । तस्य व्रीहिशास्त्रादिप्रवृत्तेः पूर्वमनवगमात् । ननु तर्हि व्रीहिशास्त्रादिप्रवृत्त्यनन्तरमेवावहननादीनां तदन्वयो ऽस्तु । तथा च व्रीहिशास्त्राद्यवगतापूर्वीयत्वाकारेण तेषां व्रीह्याद्यन्वय उपपद्यते । यवशास्त्रस्याप्यनैमित्तिकत्वेन व्रीहिशास्त्रसमकालप्रवृत्तिकतया यवानामप्यपूर्वीयत्वेन क्रोडीकाराद्यवसाधारण्यमपि तेषामुपपद्यते । नैमित्तिकशास्त्राणां तु नित्यशास्त्रप्रवृत्त्यनन्तरभावित्वेन संस्काराणां नित्यान्वयवेलायां नैमित्तिकगतापूर्वीयत्वानवगत्या तत्साधारण्याभावश्चोपपद्यते इति सर्वं समञ्जसमिति चेत् । एवं ह्यनैमित्तिकत्वेन स्वशास्त्रवदेव व्रीहिशास्त्रसमकालं प्रवृत्तियोग्यानामवहननादिशास्त्राणां यवसाधारण्यार्थमेव यवशास्त्रस्या-

पि प्रवृत्त्यनन्तरं प्रवृत्तिरभ्युपगम्यतइत्यायातम्। तथा नित्यधर्माणां नैमित्तिकसाधारण्यार्थं नैमित्तिकशास्त्रस्यापि प्रवृत्त्यनन्तरं संस्कारवाक्यानां प्रवृत्तिरित्यपि कुतो नाभ्युपगम्यते। वस्तुतस्तु व्रीहिभिर्यजेतेत्यादिशास्त्रैर्मुख्यानां व्रीह्यादीनामिव नीवारादिगतव्रीह्याद्यवयवानां नापूर्वीयत्वं सिद्ध्यति। व्रीहित्वादिजातिवाचिनां व्रीह्यादिशब्दानां तदवच्छिन्नव्रीह्यादिलक्षकत्वस्येव तदनवच्छिन्ननीवारादिगतव्रीह्यादिभावयोग्यावयवलक्षकत्वस्यासम्भवात्। किं तु व्रीहिशास्त्राद्यनुसारेण मुख्येष्वेव व्रीह्यादिष्ववश्यमुपादातव्येषु नित्यमारब्धकार्य्यं च कदाचिद्व्रीह्याद्यलाभेऽप्यवश्यमनुष्ठेयमिति प्रधानानुसारेण यत्किञ्चिद्द्रव्याक्षेपे च प्रसक्ते व्रीहित्वादिजात्यवच्छिन्नत्वेऽपि तदवच्छेद्यत्वयोग्यतया मुख्यसन्निकृष्टानां नीवारादिगतव्रीह्यादिभावयोग्यावयवानां सम्भवे विप्रकृष्टद्रव्यान्तरोपादानायोगात्तएवोपादेया इत्येवंरूपादाक्षेपात्तेषामपूर्वीयत्वं सिद्ध्यति। सोमाभावे तु भूयोऽवयवलिप्सया सुसदृशाक्षेपे प्रसक्ते पूतीकोपादानमाक्षेपस्याप्यपवादकेन वचनान्तरेण सिद्ध्यति। ततश्च यदि मुख्यशास्त्रप्रवृत्त्यनन्तरमेव संस्कारशास्त्राणि प्रवर्त्तेरंस्तदा मुख्याभावे निमित्ते सत्याक्षेपवचनान्तरावगम्यापूर्वीयभावानां प्रतिनिधीनामुपदेशतः संस्कारान्वयो न सिद्ध्येदिति तत्सिद्ध्यर्थं मुख्यशास्त्रप्रवृत्त्यनन्तरभाविनामाक्षेपवचनान्तराणामपि प्रवृत्तिमपेक्ष्यैव संस्कारशास्त्रप्रवृत्तिरेष्टव्या। तथा सति नैमित्तिकानामपि नित्यसामानविध्यमपि निवारयितुं न शक्यते। नन्वेवं सत्यपूर्वीयत्वलक्षणापत्ते

नैमित्तिकानां नित्यसामानविध्यं स्यादिति दूषणमिव मुख्यार्थविवक्षापक्षे प्रतिनिधीनां मुख्यसामानविध्यं न स्यादिति दूषणमापतेत् व्रीहिसोमादिविधायकशास्त्रस्थितानामिव तत्संस्कारविधायकशास्त्रस्थितानामपि व्रीहिसोमादिशब्दानां मुख्यमात्रपरत्वेन प्रतिनिधिसाधारण्याभावादिति चेत्। उच्यते। व्रीहिसोमादिसंस्काराणां द्वितीयाश्रुत्यादिभिर्व्रीह्याद्यर्थत्वेनावगम्यमानानां प्रकरणलभ्यतत्तदधिकारापूर्वार्थत्वस्य व्रीह्यादिद्वारैव निर्वहणीयत्वादपूर्वसाधनेतरव्रीह्यादीनां च तत्र द्वारत्वायोगात्। अपूर्वसाधनव्रीह्यादिगवेषणायां व्रीहिभिर्यजेत सोमेन यजेतेत्यादिशास्त्रैर्व्रीह्यादय इव न्यायेन वचनान्तरेण च नीवारपूतिकादिगतव्रीहिसोमादिभावयोग्यावयवा अपि तत्साधनत्वेनावगम्यन्त इति तेषामपि संस्कारान्वयितया द्वारत्वनिर्वाहाय संस्कारवाक्यगतव्रीह्यादिशब्दानां व्रीहित्वादिजातिवाचिनां साक्षात्तदवच्छिन्नव्यक्तिमात्रलक्षणामपहाय साक्षात्परम्परया तदवच्छेद्यत्वयोग्यमात्रे लक्षणा कल्प्यते नीवारादिगतव्रीहिभावादियोग्यावयवास्च व्रीह्यादिगतावयवा इव व्रीह्यादिव्यक्तिद्वारा तदवयवत्वयोग्या एवेति प्रतिनिधीनां मुख्यसामानविध्ये न काचिदनुपपत्तिः। यद्यपि प्रथमोपस्थितव्रीह्यादिव्यक्तिद्वारैव संस्काराणामधिकारापूर्वार्थत्वं निर्वहति तथापि पश्चादपि न्यायादिनापूर्वसाधनत्वेनावगम्यमानानां नीवारादिगतव्रीहिभावादियोग्यावयवानामवहननादिनियमे सम्भवत्यनियमस्यान्याय्यत्वादवहननादिनियमाकाङ्क्षायां तत्साधारणलक्षणा-

था तेषामपि संस्कारान्वयः कल्प्यते । तथा प्रथमप्रवृत्तोपदेशलब्धप्रकृत्यन्वयनिराकाङ्क्षाणां प्रयाजादीनां सौर्यचर्वाद्याकाङ्क्षानुसारात्प्राप्त्येनातिदेशेन तदन्वयोऽपि कल्प्यते। नचैवं यवफलचमसाद्याकाङ्क्षानुसारात्तत्साधारणलक्षणया व्रीहिसोमादिसंस्काराणां तदन्वयोऽपि कल्प्यः स्यादिति वाच्यम्। व्रीहिसोमादिशब्दानां नीवारपूतीकादिगतव्रीहिसोमाद्यवयवेष्विव या फलचमसादिलक्षणा हेतोः प्रसिद्धसंबन्धस्याभावात् यथा कथ चिदप्रसिद्धेन संबन्धेन लक्षणाकल्पनादनियतैर्लौकिकसिद्धावहननखविदलनादिभिस्तदाकाङ्क्षापूरणस्यैव युक्तत्वात्। अत एव"तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेधः सुमनस्यमान" इति पुरोडाशप्रतिष्ठापनमन्त्रगतव्रीहिपदस्य व्रीहिप्रतिनिधिकृतपुरोडाशेषु लक्षणा हेतोः प्रसिद्धसंबन्धस्य सत्त्वात्तस्य मन्त्रस्य प्रवृत्तिर्न तु यवमयपुरोडाश इति तस्मिन्ननुष्ठेयार्थप्रकाशनमनियतेन लौकिकोपायेनेत्यङ्गीकृतम्। "धान्यमसि धिनुहि देवानिति" मन्त्रेण च सतुषद्रव्यवाचिनो धान्यशब्दस्य वितुषावस्थायां प्रसिद्धसंबन्धसत्त्वेन लक्षणया प्रवृत्तिमङ्गीकृत्य शाक्यानामयने तरसमयपुरोडाशेषु प्रसिद्धसंबन्धाभावाल्लक्षणा न सम्भवतीति मासमसीत्यूह एवोक्तः। प्रयाजादीनामपि प्रसिद्धदर्शपूर्णमाससंबन्धवत्सु सौर्यचर्वादिष्वेवान्वयः कल्प्यते न तु तद्रहितेषु दर्विहोमादिष्वपि यथा कथं चिदप्रसिद्धसादृश्यान्वेषणेन दर्विहोमादीनामिति कर्त्तव्यताकाङ्क्षा त्वर्थलभ्यस्वरूपनिष्पादनादिनैव पूर्यते। तस्मादवहननादिवाक्यगतव्रीह्यादिशब्दानां व्रीह्यादि-

स्वरूपपरत्वपक्षे प्रतिनिधिनैमित्तिकयोः समानविषया-सामानविषयव्यवस्थापनं कथं चिन्मीमांसकरीत्योपपद्यते । तेषामपूर्वीयलक्षणापक्षे तु कथमपि सा नोपपद्यत इतिविशेषो विद्वद्भिः परिभावनीयः । अपि च यदि व्रीहिषु विहितप्रोक्षणावहननमपूर्वीयत्वलक्षणया यवेष्वपि स्यात्तदा पृष्ठस्तुत्यपूर्वीयसाधने रथन्तरे विहितं मीलनादिकं तदपूर्वसाधने बृहत्यपि प्रसज्येत । ननु रथन्तरे प्रस्तूयमाने संमीलयेत् बृहति प्रस्तूयमाने समुद्रं मनसा ध्यायेदिति संमीलनादिषु समुद्रध्यानादिषु रथन्तरबृहन्निर्देशभेदान्मीलनादयो रथन्तरस्यैव धर्माः समुद्रध्यानादयो धर्मा बृहत एवेति धर्मव्यवस्था भवति । उक्तं च नवमे सूत्रकृता निर्देशाद्व्यवतिष्ठेरन्निति न तथेह व्रीहीणां यवानां च व्यवस्थया धर्मविधानमस्ति येन व्रीहिधर्मा यवेषु न स्युरितीति चेत् । मैवम् । निर्देशभेदे सत्यपि तत्रापूर्वीयत्वलक्षणावश्यंभावेन मीलनसमुद्रध्यानादिधर्मसांकर्यस्य प्रतिक्षेप्तुमशक्यत्वात्, तत्र निर्देशभेदस्वारस्यनिर्वाहार्थमपूर्वीयत्वलक्षणां विनापि धर्मविधानोपपादने तथैव प्रोक्षणादिविधानस्याप्युपपादनसम्भवेन व्रीहिपदानां मुख्यार्थत्यागायोगात् । न चापूर्वीयत्वलक्षणायां सत्यामपि निर्देशभेदनिर्वाहार्थं रथन्तरत्वादिकमपि विवक्षितुं शक्यम् । वाक्यभेदावहस्य विशिष्टानुवाददोषस्यावश्यपरिहरणीयत्वात् । स्यादेतदग्नये च प्रजापतये च सायं जुहोति यत्सूर्याय च प्रजापतये च प्रातर्जुहोतीति निर्देशभेदादेव सायंप्रातर्होमयोरग्निसूर्यव्यवस्था दृष्टा न हि तत्र होमयोः सायंप्रातर्विशेषणो

विवक्षितुं शक्यं विशिष्टानुवाददोषापत्तेः। न च सायंप्रातःशब्दाभ्यां लक्षितयोर्होमयोस्तत्राग्निसूर्यविधानं जुहोतीति तल्लक्षितहोमानुवादमात्रं नोद्देश्यसमर्पकम्। तथा च सायंप्रातःशब्दौ स्वार्थसंबन्धिनोरेव होमयोर्लक्षकौ भवतो न तु होमान्तरयोरिति नाग्निसूर्ययोरव्यवस्थाप्रसङ्ग इति वाच्यम्। सायंप्रातःकालयोरेकस्यैव होमस्याभ्यस्यमानतया होमभेदाभावेन सायंप्रातःकालोपलक्षितस्याग्निहोत्रहोमस्य प्रातःसायंकालयोरप्यनपायितया ऽनपायी हि कालस्य लक्षणं हि पुरोडाशाविति न्यायादापततो ऽग्निसूर्यसांकर्यस्यानिवार्यत्वात्। सायंप्रातःकालविशिष्टहोमलक्षणायामपूर्वीयत्रीहिलक्षणायामिव विशिष्टानुवाददोषापत्तेः। तस्मान्निर्देशभेदमात्रमेवावलम्ब्य तत्र व्यवस्थोपपादनीया एवमिहापि भविष्यतीति चेन्नैवम्। न ह्यग्निसूर्यवाक्ययोरग्निसूर्यविधानं तत्र प्रजापतेरेव विधेयत्वात्। "अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहे"ति सायं जुहोति "सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहे"ति प्रातरिति वचनविनियुक्तमन्त्रवर्णप्राप्ताग्निसूर्यानुवादेन प्रजापतिमात्रविधाने सम्भवति तयोरप्यत्रैव विधानस्वीकारे गौरवात्। तथा च प्रजापतेः कालद्वये ऽपि सत्त्वेनाग्निसूर्यवत्कालव्यवस्थानपेक्षणान्निर्देशभेदेन व्यवस्थायां नेदमुदाहरणम्। न च वाच्यं होममात्रानुवादेन प्रजापतेरेकस्यैवात्र विधेयत्वे वाक्यद्वयं व्यर्थमिति। अग्निवाक्येन प्रजापतिविधाने तत्रत्याग्निसायंपदयोरग्निसायंकालसंबन्धेन प्रजातिस्तुत्यर्थतावत्सूर्यवाक्यस्यापि सूर्यप्रातःकालसंबन्धेन तत्स्तुत्यर्थतोप-

पत्ते: । एवमपि सूर्यवाक्यमर्थवादरूपमनर्थकप्रायं स्या-
दिति चेत् । न । अग्निसूर्यवाक्याभ्यां सायंप्रातर्होमयो-
र्व्यवस्थया ऽग्निसूर्यविधाने ऽग्निसूर्यमन्त्रौ लिङ्गादेव सायं-
प्रातःकालयोर्व्यवतिष्ठेते इति तद्व्यवस्थापकवचनयोरन-
पेक्षणात्तयोरुभयोरप्यर्थवादो वेति मन्त्राधिकरणसूत्रो-
क्तरीत्यार्थवादताया वक्तव्यत्वेन तदपेक्षयाग्निसूर्यवाक्य-
योरन्यतरस्यार्थवादताभ्युपगमस्यैव युक्ततरत्वात् । न च
वाच्यमग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेत्येव सायं होतव्यं
सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातरिति मिश्रलि-
ङ्गविधिपर्युदस्तयोः शुद्धलिङ्गमन्त्रयोः प्रतिप्रसवार्थं तद्वि-
धायकवचनद्वयमिति अग्निवाक्येनाग्नेः सायंहोमे सूर्यस्य
प्रातर्होमे च व्यवस्थया विधाने सति शुद्धलिङ्गवचनद्व-
यमेव सायंप्रातर्होमयोर्लिङ्गाद्व्यवस्थया प्राप्नोति न तु
मिश्रलिङ्गवचनद्वयं लिङ्गाविशेषादित्यपेक्षिततद्व्यवस्थार्थ-
त्वेन सप्रयोजनस्य मिश्रलिङ्गविधिद्वयस्यानपेक्षिते
ऽग्निहोत्रप्रकरणाम्नायावगततदङ्गभावस्य शुद्धलिङ्गम-
न्त्रद्वयस्य पर्युदासे व्यापाराभावे तत्प्रतिप्रसवानपेक्षणात् ।
एवं तर्हि मिश्रलिङ्गमन्त्रविधिद्वयं शुद्धलिङ्गमन्त्रविधि-
द्वयं च तत्रोदाहरणं स्यादिति चेत् नैवम् । तेषां मन्त्राणां
स्वाहाकारलिङ्गेन होमाङ्गतयाऽवगतानाम् आज्यभाग-
क्रमाम्नातानां याज्यानुवाक्यानामिव केवलं कालयोरेव
व्यवस्थापनस्यापेक्षितत्वेन तस्माद्वार्त्रघ्नी पौर्णमास्यामनू-
च्येते वृधन्वती अमावास्यायामितिवत् मिश्रलिङ्गशुद्ध-
लिङ्गमन्त्रविधीनां तत्तत्कालसंबन्धमात्रपरतया तत
एव मन्त्रलिङ्गव्यवस्थासिद्धेः । तस्माद्विशिष्टानुवादान-

पेक्षाया व्यवस्थाया निर्देशभेदमात्रात्सिद्धौ भेदमप्युदाहरणम्। ननु निर्देशभेदमात्राद्व्यवस्था सिद्ध्यसम्भवे ऽपि अपूर्वभेदात् बृहद्रथन्तरधर्माणां व्यवस्था सिध्येत् अपूर्वभेदस्य बृहत्पृष्ठं भवती रथन्तरं पृष्ठं भवतीत्युत्पत्तिवाक्यभेदेन स्वरत्वचित्वत्वादिस्तुतिप्रकारभेदेन च बृहद्रथन्तरसाधनकपृष्ठस्तोत्रभेदसत्त्वात् अपूर्वसाधनकर्मभेदे सत्यपूर्वभेदावश्यम्भावात्। नचैवं सत्यदृष्टार्थयोर्बृहद्रथन्तरपृष्ठयोः प्रयाजादिवत्समुच्चयापत्तिः। वचनबलाद्विकल्पोपपत्तेरिति चेत् मैवम्। पृष्ठैः स्तुवतइत्येतदेव माहेन्द्रादीनां चतुर्णां स्तोत्राणामुत्पत्तिवाक्यं बृहद्रथन्तरवाक्यद्वयं तु माहेन्द्रस्तोत्रे साधनमात्रविधायकमित्युपपत्तौ विशिष्टविधिगौरवस्य माहेन्द्रस्तोत्रतदपूर्वभेदकल्पनागौरवस्य चाभ्युपगन्तुमयुक्तत्वात्। ननु पृष्ठैः स्तुवतइत्येतदुत्पत्तिवाक्यमङ्गीकृत्य माहेन्द्रादीनां चतुर्णां स्तोत्राणां पृष्ठशब्दवाच्यत्वमुच्यतइति चेत्प्रकृतौ पृष्ठबहुत्वं नास्तीति साप्तमिकसूत्रभाष्यविरोधः प्रसज्येत। अतो बृहद्रथन्तरवाक्यद्वयमेवोत्पत्तिवाक्यं तदुत्पन्नं वचनवशाद्विकल्पितं स्तोत्रद्वयमेव पृष्ठशब्दवाच्यमित्यङ्गीकर्त्तव्यम्। पृष्ठैः स्तुवतइति मैत्रावरुणस्तोत्रादिसाधारण्येन प्रयोगाच्छत्रिवदजहल्लक्षणयानुवादरूप इति चोपपादनीयमिति चेत् मैवम्। यथा खल्वाज्यैः पञ्चदशान्याज्यानि पञ्चदशं होतुराज्यं सप्तदशं मैत्रावरुणस्यैकविंशं ब्राह्मणाच्छंसिनः पञ्चदशमच्छावाकस्येत्यादिप्रयोगाद्बहिःपवमानानन्तरभावीनि चत्वार्यपि स्तोत्राण्याज्यशब्दवाच्यानि एवं पृष्ठैः स्तुवते सप्तदशानि पृष्ठानि एकविंशं होतुः पृष्ठ

त्रिणवं मैत्रावरुणस्य सप्तदशं ब्राह्मणाच्छंसिनः पञ्चदश-मच्छावाकस्येत्यादिप्रयोगान्माध्यंदिनपवमानानन्तरभा-वीनि चत्वार्यपि स्तोत्राणि पृष्ठशब्दवाच्यानि । क्व चित्क-चित्कण्वरथन्तरं पृष्ठं सदोविंशायं ब्रह्मसामेत्यादौ होतुः पृष्ठे विशिष्टपृष्ठशब्दप्रयोगस्तु धने द्रव्यशब्दप्रयोगवत् अ-र्जुने पार्थशब्दप्रयोगवदापो वा कत्वियमाच्छंन्तासां वायुः पृष्ठे व्यवर्त्ततेत्यादिश्रुतौ पृष्ठशब्दस्य प्रवृत्तिनिमित्तत्वेन विवक्षितामपां पृष्ठादुत्पत्तिमव्यवहितां वामदेवो वा-मदेव्यादुत्पन्नत्वेन व्यवहितां रथन्तरादिषु प्रदर्श्यापि त-दनन्तरं पिता वै वामदेव्यं पुत्राः पृष्ठानीति रथन्तरादि-ष्वेव पृष्ठशब्दप्रयोगवच्च निरूढिवशादितिकल्पनौचित्येन पृष्ठैः स्तुवतइतिश्रुतेरनुवादत्वलाघविकत्वकल्पनस्य बृ-हद्रथन्तरवाक्ययोर्विशिष्टविध्यादिकल्पनस्य चायुक्तत्वा-त् । प्रकृतौ पृष्ठबहुत्वं नास्तीति साप्तमिकव्यवहार-स्य विश्वजिति विधानयोग्यं चोदकाप्राप्तं पृष्ठबहुत्वं ना-स्तीत्येवमर्थतोपपत्तेः । अत एव तत्र ज्योतिष्टोमिकपृ-ष्ठचतुष्टयस्य चोदकप्राप्तस्यानुवादे वैयर्थ्यमपि ग्रन्थकारै-र्दर्शितं वैयर्थ्यमप्यविगणयन्तं प्रतिरथन्तरं पवमाने कुर्या-त् आर्भवे बृहन्मध्यत इतराणि वैरूपं होतुः पृष्ठं वैराजं ब्रह्मसाम शाक्वरं मैत्रावरुणसाम रैवतमच्छावाकसामेति षाडहिकपृष्ठविधित्वज्ञापकलिङ्गविरोधो ऽपि सूत्रकारे-ण दर्शितः । ननु पृष्ठस्तोत्रभेदाभावे विकल्पवचनवैयर्थ्यं स्यात् । बृहद्रथन्तरवाक्ययोरेकस्मिन्पृष्ठे बृहद्रथन्तरमा-त्रविधायकतायां तयोरक्षराभिव्यक्तिरूपदृष्टप्रयोजननि-र्वर्त्तने परस्परनिरपेक्षयोर्न्यायत एव विकल्पप्राप्तेः, वि-

कल्पवचनं च बृहद्रथन्तरं वा पृष्ठं कार्यमित्येवरूपमस्ति इति ग्रन्थकारा व्यवहरन्ति। अतस्तत्साधकत्वाय बृहद्रथन्तरवाक्यद्वयविधेयं पृष्ठद्वयमङ्गीकर्त्तव्यमिति तदपूर्वभेदोऽवश्यम्भावीति चेत्। नैवम्। पृष्ठैः स्तुवत इति विहितेषु स्तोत्रेषु रथन्तरबृहद्वामदैव्यनौधसकालेयानां पञ्चानां साम्नामुपदेशात्पृष्ठैः स्तुवतइत्यत्र पञ्चस्तोत्राणि विहितानीति शङ्कावारणार्थमेकस्मिन्नेव प्राथमिके पृष्ठस्तोत्रे बृहद्रथन्तरयोर्विकल्प इति वचनस्यापेक्षितत्वात् द्वादशस्तोत्राणि द्वादशशस्त्राणि तस्य नवतिशतं स्तोत्रीया इत्यादिलिङ्गादधिकस्तोत्रसद्भावशङ्कानिराकरणासम्भवेऽप्यधिकसामाम्नानादवश्यं यत्र क्वचित्कल्पनीयस्य विकल्पस्य बृहद्रथन्तरयोरेव नियमार्थतया वचनस्यार्थवत्त्वोपपत्तेः। अन्यथा बृहद्रथन्तरवाक्यविधेयपृष्ठद्वयाभ्युपगमेऽपि उक्तलिङ्गादेव तत्समुच्चयनिराकरणसम्भवेन विकल्पवचनवैयर्थ्योपपत्तेरपरिहार्यत्वात्। तस्मादप्रमाणको बृहद्रथन्तरसाध्यपृष्ठस्तोत्रापूर्वभेदः। ननु तथापि बृहद्रथन्तरगतस्तोभापूर्वभेदोऽस्त्येव स्तोभात्मकगक्षराभिव्यक्तिरूपदृष्टफलाभावाददृष्टार्थाः। ततश्च स्तोभापूर्वभेदादेव धर्माणां व्यवस्था सिध्येदिति चेन्नैवम्। धर्माणां बृहद्रथन्तरशब्दवाच्यऋगक्षराभिव्यञ्जकगीत्यर्थत्वेन तेषामुक्तरूपगीत्यङ्गस्तोभानां च गुणानां च परार्थत्वादसम्बन्धः समत्वात्स्यादिति न्यायेनाङ्गाङ्गिभावाभावात्। तेषां साक्षाद्बृहद्रथन्तरान्वयसम्भवेनारुणैकहायनीन्यायलभ्यपार्ष्णिकस्तोभान्वयकल्पनस्याप्यनपेक्षणात्। न च स्तोभानामपूर्वार्थकल्पनमपि युक्तम्। तेषां गीतिकालपू-

रिच्छेदद्वपदृष्टप्रयोजनसम्भवात् । ननु माभूदपूर्वभेदात्क- र्मणां व्यवस्था स्तुतिप्रकारभेदात्तु भविष्यति चित्रत्वा- दिप्रकारिका हि बृहत्साध्या स्तुतिः रथन्तरसाध्या तु शूरत्वादिप्रकारिका । सत्त्वं नश्चित्रवज्रहस्तधृष्णुया अभि- त्वा शूर नोनुम इत्याद्यृगनुरोधादिति चेन्नैवम् । स्तुतिप्र- कारभेदसत्त्वे ऽपि धर्मविधिषु बृहद्रथन्तरपदयोरपूर्वसा- धनत्वलक्षणाभ्युपगमे बृहत्साध्यं पृष्ठस्तोत्रापूर्वं प्रतिसा- धनत्वस्य रथन्तरे रथन्तरसाध्यक्तदेवं प्रतिसाधनत्वस्य बृहति चाविशिष्टत्वेन धर्मसांकर्यस्यानिवार्यत्वात् । तत्त- द्धर्मविधौ चित्रत्वशूरत्वादिप्रकारकस्तुतिजन्यापूर्वसाधन- त्वविवक्षायां विशिष्टानुवाददोषापत्तेः । चित्रत्वशूरत्वादि- प्रकारकस्तुत्योः पुनानः सोम धारयेदित्यादिरथन्तराद्रू- ढकण्वरथन्तरादिष्वभावेन तेषु बृहद्रथन्तरधर्मातिदेशा- भावद्वपदोषप्रसङ्गाच्च । न चेष्टापत्तिः । अप्राकृते तद्विका- रविरोधाद्व्यवतिष्ठेरन्निति नावमिकाधिकरणे भाष्यकृता कण्वरथन्तरे समुच्चितबृहद्रथन्तरधर्मप्राप्तेर्वार्त्तिककृता च विकल्पिततद्धर्मप्राप्तेर्व्यवस्थापितत्वात् । ननु तत्र ना- वमिके कण्वरथन्तराधिकरणे भाष्यकारसिद्धान्तितां स- मुच्चितधर्मप्राप्तिमुच्चैर्गेयमिति बृहद्धर्मस्य नोच्चैर्गेयमिति र- न्तरधर्मस्य च विरोधात्समुच्चयो न सम्भवतीति हि प्र- तिक्षिप्य वार्त्तिककारो विकल्पितधर्मप्राप्तिं सिद्धान्त- यामास, तथैव प्रकृतावपि बृहद्रथन्तरधर्माणां व्यवस्था भविष्यति प्रकृतावपि उच्चैस्त्वतदभावयोर्मेलनासम्भवस्य तुल्यत्वादिति चेत् । न । अपूर्वीयत्वलक्षणाया धर्माणां साधारण्ये सत्यतिरात्रषोडशिग्रहतदभावयोरिवाधाने

सामगानतदभावयोरिव च बृहति रथन्तरे चोच्चैस्त्वत-दभावयोर्वैकल्पिकत्वाङ्गीकारेण समाधातुमुचितत्वा-त् कण्वरथन्तराधिकरणे तु वार्त्तिककृता विरोधो मू-लयुक्तित्वेन नोक्तः किं तु तद्विकारादितिहेतुरेव। तस्य चायमर्थः ज्योतिष्टोमविकारो हि वैश्यस्तोमः तत्र प्रकृ-तिवदेव बृहद्रथन्तरसामद्वयस्य विकल्पेन प्राप्तौ तदुभ-यकार्ये विधीयमानतया तदुभयस्थानापन्नं कण्वरथन्तरं एकस्मिन्नेव प्रयोगे तदुभयस्थानापन्नं न भवति। तस्य प्रयोगभेदेनैव प्राप्तेः, किं त्वेकस्मिन्प्रयोगे बृहत्स्थानाप-न्नं, प्रयोगान्तरे रथन्तरस्थानापन्नं च भवति, अतः प्र-योगभेदेनैव तस्य तदुभयधर्मग्राहित्वमिति। विरोधस्त्व-भ्युच्चयत्वेन सूत्रवार्त्तिकयोरुक्तः। तस्माद्बृहद्रथन्तरपृष्ठ-स्तोत्रापूर्वभेदाभ्युपगमस्य गौरवपराहतत्वात्स्तोभापूर्वा-णामपूर्वीयत्वलक्षणायामप्रवेशात्स्तुतिप्रकारभेदस्योच्चै-र्गेयत्वादिधर्मविरोधस्य चापूर्वीयत्वलक्षणापतितमील-नसमुद्ध्यानादिसङ्करनिवारणक्षमत्वाच्चापूर्वीयत्वलक्ष-णां परित्यज्यैव धर्मव्यवस्थोपपादनीया। तद्वदिहाप्यपू-र्वीयत्वलक्षणा परित्यक्तव्येति भावः। एवमपूर्वनियम-विध्युदाहरणयोरपूर्वीयत्वलक्षणया व्यवसाधारण्याभ्यु-पगमः प्रतिक्षिप्त इदानीं परिसंख्योदाहरणे नैर्दोष्याभा-वसमर्थनमाक्षिपति।

मन्त्रेणाश्वस्य रज्जोर्ग्रहणविधि-फलं मन्त्रबाधोऽन्यरज्जौ नैदो-

ष्यं प्राप्तबाधे प्रसरणमयते न त्विहेत्यप्ययुक्तम् । आग्नेयीन्यायतस्तामपि पुनरुपयत्केन मन्त्रो निवार्यः तैर्दोषयं चाप्यकार्यान्तरमुखपरिसंख्यासु केनोपपाद्यम् ॥ ३० ॥

स्वार्थत्यागः परार्थग्रहणं प्राप्तबाध इति परिसंख्यासु प्रसिद्धं दोषत्रयं अप्राप्तपरिसंख्यासु न भवति, किं तु प्राप्तपरिसंख्यास्विति मीमांसकप्रवादः, यथेमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त इति तावदप्राप्तपरिसंख्या अनया प्रत्यक्षया श्रुत्या मन्त्रस्याश्वरशनायां झटिति विनियोगे कृते सति तावता मन्त्राम्नानस्य चरितार्थतया अश्वगर्दभरशनासाधारणविनियोजकश्रुतिकल्पकस्य लिङ्गस्याप्रवृत्त्या फलतो मन्त्रस्य गर्दभरशनातो व्यावृत्तिलाभात् । ततश्चानेन विधिना मन्त्रस्याश्वरशनायां विनियोगरूपः स्वार्थो न त्यक्तव्यः, तद्विधानात्यागप्रवृत्तेः । तस्य गर्दभरशनातो व्यावृत्तिरूपः परार्थश्च न ग्राह्यः । अर्थाल्लभ्ये तत्र शब्दव्यापारानपेक्षणात् । प्राप्तं च किंचिन्न बाधितव्यं प्रत्यक्षश्रुतेः प्राग्गर्दभरशनासाधारणविनियोजकलिङ्गाप्रवृत्तेः । एतादृशेषूदाहरणेषु निर्दोषा परिसंख्या प्रवर्त्तते । प्रपञ्चितं चैतद्वार्त्तिककारैः ।

सामान्यप्रापणाशङ्का वाक्याद्यैवानुमानिकात्।
श्रुत्या प्राप्तिविशेषे च परिसंख्या तदाश्रया॥
निर्दोषत्वं हि तत्रास्या विधाने सति लभ्यते।
रूपप्रकरणद्वारा श्रुतिर्यावत्तु कल्प्यते॥
तावत्प्रत्यक्षया श्रुत्या विधिः शीघ्रं समाप्यते।
अप्राप्तविधिरेवायमतो मन्त्रस्य निश्चितः॥
परिसंख्याफलेनोक्ता न विशेषः पुनः श्रुतेः।
अश्वश्रुत्यैव शीघ्रत्वान्मन्त्रो प्राग्विहिते सति॥
निराकाङ्क्षीकृताम्नाये तथा प्रकरणान्यपि।
लिङ्गप्रकरणद्वारा श्रुतिर्नैवाभिधीयते॥
तस्यामप्रमितायाञ्च मन्त्रप्राप्तिर्न गर्दभे।
सो ऽयमाभाणको लोके यदश्वेन हृतं पुरा॥
तत्पश्चात् गर्दभः प्राप्तुं केनोपायेन शक्नुयात्।
प्रयोजनं विधेः किं स्यात् अस्येति तु निरूपणे॥
न गर्दभाभिधानोतः फलमन्यन्निवर्त्तनात्।
यद्यश्वरशनाप्राप्तिं केवलामानुमानिकीम्॥
प्रत्यक्षश्रुतिवत्कुर्यात्ततः सा स्यादनर्थिका।
लिङ्गानुमितया श्रुत्या प्राप्नुयाद्रशनाद्वये॥
समाप्रापत्तयेत्येवं प्रत्यक्षा त्वरते श्रुतिः।

इति प्राप्तपरिसंख्यायां निर्दोषत्वनियमस्य वार्त्तिककारैरत्रैवोदाहरणे स्थित्वा व्यतिरेकमुखेन प्रदर्शितः।

यद्यस्य विनियुक्तस्य प्रत्यक्षा स्यात्पुनः श्रुतिः।
ततश्च परिसंख्यानात्प्रसज्येत निर्दोषता॥
यदि तु प्रतिबद्धत्वात्सामान्यविनियोगकृत्।
नैवास्ति श्रुतिरत्रेति न प्राप्नोति निर्दोषता॥

इतिषोडश्युत्तर इत्येतत्प्राप्तपरिसंख्योदाहरणम् । अत्र हि स्वार्थबोधनं नापेक्षितम् अङ्गिरसां द्विरात्रस्योत्तरे ऽहनि षोडशिग्रहनियमरूपस्य तदर्थस्योत्तरे ऽहन् द्विरात्रस्य गृह्यतइति द्विरात्रमात्रस्योत्तरे ऽहनि तन्नियमं बोधयता प्रत्यक्षशास्त्रेण प्राप्तत्वात्तस्य द्विरात्रान्तरेभ्यो निवृत्तेर्बोधनं त्वपेक्षितं सामान्यशास्त्रेण द्विरात्रमात्रे प्राप्तस्य तस्य निवर्त्तकशास्त्रं विना विशिष्य क्व चिद् द्विरात्रे संबन्धबोधनमात्रेण द्विरात्रान्तरेभ्यो निवृत्त्यलाभात्, अतः षोडश्युत्तर इत्यनेनाङ्गिरसां द्विरात्रे षोडशिग्रहनियमरूपः स्वार्थः परित्यक्तव्यः । द्विरात्रान्तरेभ्यस्तन्निवृत्तिरूपः परार्थश्च परिगृहीतव्यः । द्विरात्रान्तरेषु सामान्यशास्त्रेण प्राप्तस्य षोडशिग्रहनियमो बाधितव्य इति दोषत्रयमनिवार्यम् ।

अत एव परिसंख्यासूत्रे रशनादानमन्त्रपरिसंख्यामङ्गीकृतवता ऽपि भाष्यकारेण षोडश्युत्तरइत्यत्र वृत्तिकाराभिमता परिसंख्या दोषत्रयापत्त्या दशमे प्रतिक्षिप्ता इत्थं सिद्धान्तसंप्रतिपन्ना प्राप्ताप्राप्तपरिसंख्ययोस्तैदोष्यतदभावव्यवस्थेहाक्षिप्यते । अप्राप्तपरिसंख्योदाहरणे त्रैदोष्यं न प्रसज्यतइति तावदनुपपन्नम्, अश्वरशनायां विनियोगेन मन्त्रस्य निराकाङ्क्षत्वे ऽपि गर्दभरशनाया मन्त्राकाङ्क्षया तत्रापि मन्त्रसंबन्धस्य निवर्त्तकं शास्त्रं विना वारयितुमशक्यत्वात् दृष्टं ह्यग्न आयाहि वीतय इत्यादीनां ज्योतिष्टोमप्रकरणाम्नातानामाग्नेयीनामृचां स्तोत्रादिषु विनियोगेन निराकाङ्क्षत्वे ऽपि आग्नेय्याग्नीध्रमुपतिष्ठत इति विहितस्याग्नीध्रोपस्थानस्याग्नेय्याकाङ्क्षया तत्संबन्धः । न च गर्दभरशनाग्रहणानुष्ठानं ध्यानो-

पदृष्टवचनादिनापि सम्भवन्न मन्त्राकाङ्क्षमिति वाच्यम्। आग्नीध्रोपस्थानमध्यप्रकरणाम्नातयत्किञ्चिदाग्नेयीसंबन्धेन सम्भवन्न प्रकृताग्नेय्याकाङ्क्षमिति वक्तुं शक्यत्वात्। अथोच्येताग्नेय्याग्नीध्रमित्यत्राग्नेयीशब्दस्याप्रकृताग्नेयीपरत्वे तस्याः क्रत्वपूर्वसंबन्धे तद्द्वारभूताग्नीध्रोपस्थानसंबन्धे च विधिव्यापारः कल्पनीय इति गौरवम्। प्रकृताग्नेयीपरत्वे तु तस्याः क्रत्वपूर्वसंबन्धस्य क्लृप्तत्वादाग्नीध्रोपस्थानसंबन्धमात्रे विधिव्यापारः कल्पनीय इति लाघवमस्ति। अतो लाघवानुसारादाग्नेयीशब्दो निराकाङ्क्षामपि प्राकृतामेवाग्नेयीं गृह्णातीति कल्प्यत इति। एवं तर्हि गर्दभरशनाग्रहणे तत्तत्पुरुषबुद्ध्याचित्तध्यानाद्यनियतानेकोपायग्रहणे गौरवाल्लाघवानुसारेण निराकाङ्क्षमपि मन्त्ररूपम् एकमेवोपायं लिङ्गसमर्पितं गर्दभरशनापि गृह्णातीति तुल्यम्। अत एव वैकृतः सौर्यादिविधिः प्रकृतिद्रव्यतदवघातादिजन्योपकाराकाङ्क्षः सन्ननियतयत्किञ्चित्प्रकृतिद्रव्ययत्किञ्चित्तुषविमोकादिसाधनजन्योपकारग्रहणेन निराकाङ्क्षो कर्तुं शक्योऽपि नियमे सम्भवत्यनियमगौरवमयुक्तमिति दार्शपौर्णमासिकमितिकर्तव्यताकलापं दर्शपूर्णमासापूर्वसंबन्धेन निराकाङ्क्षमपि स्वप्रकरणाम्नानेन क्लृप्तस्वापूर्वसंबन्धमपि गृह्णातीत्यङ्गीक्रियते। तस्मादश्वाभिधान्यादानवाक्यं स्वार्थपरत्वे तद्यान्यतः प्राप्तिसम्भवं गर्दभरशनातो मन्त्रनिवृत्तिमेव स्वप्रवृत्तिफलं चालोच्य स्वार्थविधानपरत्वे तत्फलं लम्भयितुं न शक्यत एवेत्येतदप्यालोच्य विलम्बितप्रवृत्तिकेनापि लिङ्गेन कर्तव्यं सा-

मान्यविनियोगं परीक्ष्य ततो विधिरूपमर्थं परित्यज्य प्राप्तनिषेधरूपमर्थं गृह्णातीत्येव वक्तव्यम् । अतः कथमिहापि वैदोष्यं नापद्यते यद्युच्येतान्यतः सम्भवत्प्राप्तिकस्याश्वरशनायां मन्त्रविनियोगस्य विधिरनर्थकः सन् गर्दभरशनातस्तस्य निवृत्तिं ज्ञापयेदिति । एवं तर्हि षोडश्युत्तर इत्यत्रापि तथैव द्विरात्रान्तरेभ्यः षोडशिग्रहनियमनिवृत्तिज्ञापनं भविष्यतीति तत्रापि वैदोष्यं नापद्यतइति स्यात् । तस्माद्वाक्यस्य स्वार्थपरतायामानर्थक्ये सति तन्मात्रेणाभिमतार्थान्तरालाभात्तत्र वाक्यस्यैव स्वार्थं विहायाभिमते ऽर्थान्तरे प्रवृत्तिरेष्टव्येति नियममाहत्यैव षोडश्युत्तर इत्यत्र वैदोष्यमापादनीयं, तथा सति तथैवात्रापि तदापत्तिर्निवारयितुं न शक्यते । नचैवं सत्यन्यलभ्यप्राप्तिनियमपरिसंख्याद्वारा तत्तदर्थप्राप्तिनियमपरिसंख्यानां लाभं प्राग्दर्शितान्युदाहरणानि प्रत्युद्धृतानि स्युः । तदुदाहरणेष्वप्यन्यलभ्यं स्वार्थं विहायाभिमतार्थान्तरेषु शब्दवृत्तिप्रसङ्गादिति वाच्यम् । येषु वाक्येष्वन्यलभ्यस्यापि स्वार्थस्य प्रतिपादनएवाभिमतार्थप्राप्त्यादिकं लभ्यते न त्वन्यथा तथाभूतवाक्यानामेव तदुदाहरणत्वात् । तथाभूतानामेव सांग्रहण्यादिवाक्यानां प्रागुदाहृतत्वात् । तस्मादप्राप्तपरिसंख्योदाहरणे वैदोष्यं नापद्यतइति तावदनुपपन्नम् । तदुदाहरणे अप्राप्तपरिसंख्यात्वस्यैवानुचितत्वात् । तथा प्राप्तपरिसंख्यायां वैदोष्यं नियतमित्येतदप्यनुपपन्नम् । यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तद्यदुपभृति प्रयाजानुयाजेभ्यस्तदित्यविशेषप्रवृत्तेन प्रत्यक्षशास्त्रेण सर्वेषां प्रयाजानां

जौहवौपभृताज्यकार्यत्वप्राप्तावतिहायेडइत्याद्यौपभृता-ज्यसमानयनकालविध्यधीनायां जौहवौपभृताज्याभ्या-मुपरितनप्रयाजद्वयप्राचीनप्रयाजत्रयपरिसंख्यायां प्राय-णीयातिथ्ययोश्चोदकादविशेषेणेष्टिकाङ्गकलापप्राप्तौ-शंय्वन्ता प्रायणीया सन्तिष्ठते इडान्तातिथ्या सन्तिष्ठते इति शंय्विडान्तोपरमविध्यधीनायां शंय्विडोपरितनाङ्गपरिसंख्यायाम् अन्यस्यामप्येवंविधायाम् अन्यविध्यर्थलभ्यप्राप्तपरिसंख्यायां त्रैदोष्यासंस्पर्शात् एवं सर्वविधीनां लक्षणान्युदाहरणानि वा समञ्जसानीव प्रतिभान्ति।

इति अपूर्वनियमविध्युदाहरणाक्षेपपूर्वपक्षः समाप्तः।

एवमपूर्वविध्यादिलक्षणोदाहरणगणमाक्षिप्य प्रदर्शितेष्वपि केचिदाक्षेपाः शास्त्रमर्यादामात्रमाश्रित्य प्रदर्शिताः। न तु न्यायमाश्रित्य न्यायान्वेषणे तु ते ऽपि शिथिला इत्याक्षेपाक्षेपव्याजेन तत्तदाक्षेपोपजीव्यशास्त्रमर्यादाक्षेपं कृत्स्नस्यापि शास्त्रस्य परस्परविरुद्धार्थत्वशङ्कावहं स्थालीपुलाकन्यायेन प्रदर्शयिष्यामीति प्रतिजानीते।

अत्राप्याक्षेपवर्गे कतिचन शिथिलाः शास्त्रमर्यादया ते दोषाः स्युर्लक्षणोदाहरणगण इति प्रत्ययाद्यन्तपूर्वम्। तत्र स्थालीपुलाकप्रथितनयदिशा केषु चिद्दर्शयामः। शैथिल्यं तद्विरुद्धं सकलमिव भवेद्येन दृश्येत तन्त्रम्॥

तत्र तावदपूर्वविधिलक्षणस्य वैकृताग्निविध्यव्याप्तिरूपं प्रथमाक्षेपमाक्षिपति।

पश्वाद्यर्थो हि नैव प्रकृतिषु विकृतिष्वध्वरेष्वग्निरङ्गं का तत्रामूलभग्नात्कथय विकृतिषु

प्राप्तिवार्तातिदेशात्। अग्निष्टोमादिवाक्यानि तु फलजननापाश्रयार्थानि लिङ्गात् तत्प्राप्तिर्न प्रकृत्या न च विकृतिषु सा तद्विधौ तत्र वृत्तेः॥

प्रकृतावङ्गस्याग्नेर्विंष्वतिदेशतः प्राप्तिसम्भवात्तास्वग्निविधयो न तत्प्राप्त्यर्था किं तु तदाश्रितश्येनाकृत्यादिफलार्थगुणप्राप्त्यर्था इति दशमाध्याये अग्न्यतिग्राह्यस्य विकृतावुपदेशादप्रवृत्तिः ग्रहणे समानविधानं स्यादिति पूर्वोत्तरपक्षसूत्राभ्यां व्यवस्थापितमर्थमुपजीव्य तेष्वपूर्वविधिलक्षणस्याव्याप्तिरिति यत्तावदुक्तं तदयुक्तम्। फलार्थगुणप्राप्त्यर्थानां वैकृताग्निविधीनामेव शशशृङ्गायमाणत्वात्, तथा हि पशुकामश्चिन्वीतेत्यादिवाक्यैरग्निः फलार्थ इत्यर्थवादाधिकरणे अभागिप्रतिषेधसूत्रे वार्त्तिककारन्यायसुधयोरुक्तं, तथा च फलार्थस्याग्नेः प्रकृतिरूपेषु विकृतिरूपेषु च क्रतुष्वङ्गत्वमेव नास्तीत्यतिदेशमूलाङ्गत्वाभावेनातिदेशमुन्मेषादतिदेशतो विकृतिष्वग्निप्राप्तिसम्भव एवासिद्धः तस्मादतिदेशतः सम्भवत्प्राप्तिकाग्निविधयः फलार्थगुणप्राप्त्यर्था इति दशमाध्याये व्यवस्थापितमयुक्तम्। ननु य एव विद्वानग्निं चिनुत इतिवाक्योत्पन्नस्याग्नेः पशुकामादिवाक्यैः फलार्थत्वे ऽपि अग्निष्टोमादिवाक्यैः क्रत्वर्थत्वमपि स्यात् ऐन्द्रवायवं गृह्णाति

मैत्रावरुणं गृह्णातीत्यादिवाक्योत्पन्नानामैन्द्रवायवादिग्रहाणामैन्द्रवायवाग्रान् गृह्णीयाद्यः कामयेत । यथापूर्वं प्रजाः कल्पेरन्निति वाक्येन फलार्थत्वे ऽपि वाग्वा एषा यदैन्द्रवायवाग्रा गृह्यन्ते वाचमेवानुप्रयन्तीतिवाक्येन क्रत्वर्थत्वमिवेति चेत् । न । सिद्धरूपस्यानारभ्याधीतस्याग्नेः स्वतः फलार्थत्वासम्भवेनाग्निष्टोमादिवाक्यानां तदपेक्षिताश्रयक्रियासमर्पकतयानपेक्षितक्रत्वङ्गतापरत्वायोगात् ऐन्द्रवायवादिग्रहाणां तु ज्योतिष्टोमादिप्रकरणादेवाश्रयो लभ्यत इति युक्तं वाग्वा एषेत्यस्य क्रत्वङ्गतापरत्वं स्यादेतदग्नेः प्रकरणाभावे ऽपि दीक्षणीयादिसोमप्रयोगसङ्कीर्णसावित्रहोमोखासम्भरणदीक्षणीयाविशेषिकगुणरुक्मप्रतिमोचनादिकाङ्गकलापरूपाल्लिङ्गादाश्रयो लभ्यत इत्यत्राग्निष्टोमादिवाक्यानामपि क्रत्वङ्गतापरत्वं युक्तमिति चेन्मैवं कथं लिङ्गात्प्राप्नुवन्ननारभ्याधीताग्निः सान्तपनीयन्यायेन विकृतिष्वेव प्राप्नुयान्न प्रकृतौ । उत्तरवेद्यविरोधात् अतो ऽत्राग्निष्टोमोक्थ्यातिरात्रवाक्यानि तावदग्नेः प्रकृत्याश्रयत्वप्राप्त्यर्थान्येव भवन्ति अग्निष्टोमादिशब्दानां प्रकृतिविकृतिसाधारणत्वे ऽपि विधेरप्राप्तपक्षपातित्वेनात्र प्रकृतिपरत्वौचित्यात् । एवं च शीघ्रप्रवृत्तवचनसमर्पितप्रकृतिरूपाश्रयेण तदाकाङ्क्षाशान्तेर्दीक्षणीयासंबन्धलिङ्गादिकृत्याश्रयत्वकल्पना न प्रवर्त्तत इति द्विरात्रादिवाक्यान्यपि तत्तदाश्रयत्वप्राप्त्यर्थान्येव पर्यवस्यन्ति । आश्रयप्रापकविधिप्रायपाठादिति कुतो ऽत्र क्रत्वर्थतापरत्वकल्पनाशङ्कावकाश इति भावः । यद्यप्यग्निष्टोमादिवाक्यानां फलार्थाग्न्या-

श्रयसमर्पणार्थत्वे सति द्विरात्रादिवाक्यानां तदीयक्रत्वर्थतापरत्वे ऽपि प्रकृतावग्नेरङ्गत्वाभावेन तेषामतिदेशसम्भवत्प्राप्तिकाग्निविधित्वाभावादव्याप्त्याक्षेपो भवेदेव तथापि प्रायपाठानुरोधेनौचित्यमनुसृत्य तेषामाश्रयविधिपरत्वमुक्तमिति द्रष्टव्यम्। स्यादेतल्लिङ्गादेवाग्नेः प्रकृत्याश्रयत्वमपि प्राप्नोति पुरुषार्थसमासत्तेः काम्यं नित्यस्य बाधकमितिन्यायेन फलार्थतया बलवतस्तस्योत्तरवेदिबाधकत्वात्, पुरुषार्थप्रयुक्ता हि सर्वस्य प्रवृत्तिरतः काम्यो ऽग्निः फलस्य प्रत्यासन्नः शीघ्रं प्रयुज्यते उत्तरवेदिस्तु क्रत्वर्थाविलम्बेन अत्तत्स्योत्करप्रवृत्तिविषयः स तस्या बाधकः। न च चमसगोदोहनवदेकप्रकरणगतयोरेव नित्यकाम्ययोः काम्यबलवत्त्वन्यायः प्रकरणाम्नातानारभ्याधीतयोस्तु तयोर्नित्यमपि प्रकरणम्नातमेव बलवत् अनारभ्याधीतस्य विकृतिष्वपि सावकाशत्वेन दुर्बलत्वादिति वाच्यम्। सामान्यत इष्वधिकृतमात्रविषये चमसः विशिष्य पशुकामविषये गोदोहनमिति सामान्यविशेषन्यायेन पशुकामातिरिक्तविषये चमसः सावकाशो गोदोहनं निरवकाशमिति सावकाशनिरवकाशन्यायेन च बलवतो गोदोहनस्यासङ्कीर्णकाम्यबलवत्त्वन्यायानुदाहरणतया सामान्यविशेषभावादिन्यायाविषयस्याग्न्यादेरेव सकलमीमांसकप्रसिद्धकाम्यबलवत्त्वन्यायोदाहरणतौचित्यात्। अपि च काम्येनाग्निनोत्तरवेद्या बाधे ऽपि नात्यन्तबाधः, उत्तरवेद्यां ह्यग्निश्चीयत इतिश्रुतिबलादुत्तरवेद्यैष्टिकस्थण्डिलयोरग्निनिधाने "वेद्यां हवींष्यासादयति" "बर्हिषि हवींष्यासादयती" तिश्रुतयो-

र्वेदिर्बर्हिषोर्हविरासादन इव समुच्चयावगमात् । तस्मात्फलार्थस्याग्नेराश्रयाकाङ्क्षायां लिङ्गादेव विकृतिवत्प्रकृतावेव प्राप्तिसम्भवादग्निष्टोमादिवाक्यानि सर्वाण्यपि क्रत्वङ्गत्वपराण्येव वाच्यानि तेषु वैकृताग्निविधीनामतिदेशतः सम्भवत्प्राप्तिकविषयाणां श्येनाकृत्यादिफलार्थगुणप्रापणार्थत्वस्यावश्यवाच्यतया युक्तैव प्रागुक्ताविताव्याप्तिः । ननु तथाप्येतान्यग्निष्टोमादिवाक्यानि परिसंख्यार्थानीतियुक्तमनारभ्याधीतेषु काम्यगुणेषु पर्णतादिष्विव प्रकृतौ वा द्विरुक्तत्वादिति न्यायानवतारेणाग्नेः समुच्चित्य प्रकृतिविकृतिरूपेषु सर्वेषु सोमेषु प्राप्तिसत्त्वादिति चेन्नैवम् । तेषां प्राप्तापोदितक्रत्वङ्गत्वप्रतिप्रसवार्थत्वस्यैव लाघवेन युक्तत्वात् । तथा हि "य एवं विद्वानग्निं चिनुत" इत्यनारभ्याधीतवाक्येनाग्नेश्चयनसंस्कार्यत्वं श्रुतं तच्च चयनप्रकरणोक्तचयननिर्वर्त्यस्थण्डिलोपरिदेशस्थापनद्वारकं पर्यवस्यति । स्थण्डिलनिर्वर्त्तकेन चयनेन साक्षादग्नेः संस्कार्यत्वायोगात् । तेन संस्कार्यत्वं चायतनविशेषनिहितेषु सम्भारेषु निधानरूपेणाधानेन संस्कार्यत्ववदग्नेराहवनीयात्मनोत्पाद्यत्वरूपं न भवति । आधाने पवमानेष्टिभ्यामेव तदुत्पत्तेः । अन्यथा चयननिर्वर्त्तिते स्थण्डिलेऽग्निस्थापनात्प्राचीनेषु अग्निहोत्रदर्शपूर्णमासादिष्वग्निमति क्रतौ स्थण्डिलनिर्वृत्तेः प्राचीनेषु दीक्षणीयादिषु चाहवनीयाभावप्रसङ्गात् । एवं चाहवनीयस्य सतश्चयनसंस्कारस्य कैमर्थ्याकाङ्क्षायामाहवनीयः सामान्येन क्रत्वर्थतया यदाहवनीये जुहोतीतिवाक्येन सिद्धो विशिष्य यस्य क्रत्वपूर्वस्योपयोगी स्थण्डि-

ले निर्धार्यते तादर्थ्यमेकतद्द्वारा पर्यवस्यति। किं च सो-
मप्रयोगसंकीर्णप्रयोगस्य चयनस्य सोमप्रयोगाद्बहिरनु-
ष्ठातुमशक्यतया तन्मध्यत एवानुष्ठातव्यत्वे पाशुकध-
र्मजातस्याग्नीषोमीयपश्वङ्गत्वमिवानुष्ठानसादेश्यरूपेण
स्थानप्रमाणेनापि क्रत्वर्थत्वं प्राप्नोति। एवं प्राप्नुवतश्च
क्रत्वर्थस्य पशुकामादिवाक्यैश्चयनसंस्कृतस्याग्नेः फलसं-
योजनं कुर्वद्भिरपवादः प्राप्नोति वाचनिकफलेन फला-
काङ्क्षाशान्त्या क्रतूपकारस्य फलस्याकल्पनीयत्वात्।
एवं क्रत्वर्थत्वापवादे प्राप्ते तत्प्रतिप्रसवार्थान्यग्निष्टोमा-
दिवाक्यानीति युक्तम्। प्रतिप्रसवेऽपि विधिलाघवस्य
प्रागुपपादितत्वात्। तस्माद्यथा "य एवं विद्वान् षोडशिनं
गृह्णाती"ति ज्योतिष्टोमप्रकरणाम्नातवाक्योत्पन्नस्य "षो-
डशिना वीर्यकामः स्तुवीते"ति फलविनियोगवचनायो-
दितप्रकरणलब्धज्योतिष्टोमाङ्गभावस्य षोडशियागाभ्या-
सस्यात्यग्निष्टोमे राजन्यस्य गृह्णीयादप्युक्थ्ये ग्राह्योऽति-
रात्रेण ब्राह्मणस्य उत्तरेऽहन् द्विरात्रस्य गृह्णते मध्यमे
त्रिरात्रस्य चतुर्थे चतुर्थेऽहन्यहीनस्य गृह्णातद्गतिवाक्यैः
क्रत्वर्थतासिद्धिरेवमग्नेरप्यग्निष्टोमादिवाक्यैः क्रत्वर्थता-
सिद्धिः स्यादेवेत्याशङ्क्याह।

नित्यात्काम्यस्य शैघ्र्यात्प्रकृति-
मपि समापद्यतां लिङ्गतो
ऽग्निः सोऽङ्गं सचाद्यवाक्यैः प्रकृ-
तिविकृतिषु स्याद् द्विराचादि-

गो ऽपि ॥ तद्वाक्यान्न्यायवा-
क्यैस्त्रिभिरपि निखिलाङ्गगणा-
न्प्रापिते ऽग्नौ किं वा कुर्वन्त्व-
वगत्या प्रकृतिमिह विधिव्रात-
मग्नेः स्तुवन्तु ॥ ३३ ॥

एवमग्निष्टोमादिवाक्यानां क्रत्वर्थत्वविधिरूपतामुपपादयता कस्मिन्विधावव्याप्तिरिष्यते । न तावदग्निष्टोमेनानुयजन्तीति विधौ, तस्य प्रकृत्यग्निष्टोमे ऽग्निप्राप्त्यर्थत्वात् । न च वाच्यमग्निष्टोमशब्दो विकृत्यग्निष्टोमस्यापि साधारणः । अतस्तत्रातिदेशतो ऽग्निप्राप्तिः सम्भवतीति तदीयाग्निविध्यंशे ऽव्याप्तिरिति । प्रकृतिविकृत्यग्निष्टोमयोर्विधेरेकत्वेन तद्विध्यप्रवृत्तावग्नेः प्रकृत्यग्निष्टोमाङ्गत्वासिद्धा ऽन्यत्र तदतिदेशे ऽस्यासम्भवात् । नापि तमुक्थ्येन तमतिरात्रेणेति विध्योरव्याप्तिः तयोरप्यग्निष्टोमवाक्यवत्प्रकृतिविकृतिसाधारणत्वात् । ननु प्रकृतिभूतयोरप्युक्थ्यातिरात्रसंस्थावतोः क्रत्वोः अग्निष्टोमविकारत्वात्ततश्चोदकात्सम्भवत्प्राप्तिकस्याग्नेः तयोः पुनर्विधानं गुणकामप्राप्त्यर्थमिति तद्विध्योरव्याप्तिः स्यादेवेति चेदुच्यते, न तावदग्निष्टोमविकारे, तयोरप्यग्निष्टोमवत्प्रकृतिभूतज्योतिष्टोमात्मकत्वात् ज्योतिष्टोमस्यैव खल्वग्निष्टोमोक्थ्यषोडश्यतिरात्रसंज्ञकास्चतस्रः संस्थाः । तत्राग्निष्टोमसंस्था चमसवत्क्रत्वर्था उक्थ्यं गृह्णीयात्षोडशिना वो-

र्थकामः स्तुवीतातिरात्रेण प्रजाकामं याजयेदिति ज्योतिष्टोममाश्रित्य फलार्थतया विहिता गोदोहनवत्पुरुषार्था इति विशेषः। अग्निष्टोमादिसंस्था इति चाग्निष्टोमादिसंज्ञकैः स्तोत्रैः क्रतोः समाप्तय उच्यन्ते संपूर्वस्य तिष्ठतेर्धातोः समाप्तिवाचित्वात्। ततश्च यथा फलाय गोदोहनग्रहणे ऽपि तदाश्रयैदर्शपूर्णमासौ प्रकृतिभूतौ एवं फलार्थमुक्थ्यादिसंस्थानुष्ठाने ऽपि तदाश्रयो ज्योतिष्टोमः प्रकृतिभूत एव भवति। प्रकृतौ च तत्र नातिदेशादग्नेः प्राप्तिर्नाप्यग्निष्टोमवाक्यरूपादुपदेशात्। तेनाग्निष्टोमसंस्थावत्येव हि तस्मिन्नग्निः प्राप्यते न तु संस्थान्तरवत्यपि। यथाग्रवती बृहत्पृष्ठस्येति वाक्येनाग्रवती बृहत्साम्न्येव तस्मिन्प्राप्यते न तु रथन्तरसाम्न्यपि ततश्चोक्थ्यसंस्थस्यातिरात्रसंस्थस्य च ज्योतिष्टोमस्याङ्गत्वेनाप्राप्तो ऽग्निरुक्थ्यातिरात्रवाक्याभ्यां विधीयते। उक्थ्यातिरात्रशब्दयोरुक्थ्यातिरात्रसंस्थविकृतिसाधारण्ये ऽप्यग्निष्टोमवाक्योक्तन्यायेन विकृतिष्वप्यग्नेरप्राप्तस्य विधौ भवत इति न तयोरव्याप्तिशङ्कावकाशः नापि द्विरात्रादिवाक्येष्वव्याप्तिः। द्विरात्रादिष्वग्निष्टोमोक्थ्यातिरात्रसंस्थानाम् अङ्गानां सत्त्वेन तेषु प्रकृतिविकृतिसाधारणाग्निष्टोमादिवाक्यैरेवाग्नेरौपदेषिकत्वस्य तदधीनगुणकामप्राप्तेश्च सम्पन्नतया तेषां गुणकामप्राप्त्यर्थाग्निविधिरूपत्वस्य वक्तुमशक्यत्वात्। न च तेषु षोडशिसंस्थस्याप्यङ्कः सम्भवेन तस्मिन्नहनि षोडशिसंस्थे प्रकृतिभूतज्योतिष्टोम इवाग्नेरौपदेशिकत्वं तेभ्यो न लभ्यत इति तदर्थं द्विरात्रादिवाक्यं स्यादिति वाच्यम्। तेष्वग्नि-

ष्टोमादिसंस्थानामप्यङ्गं सत्त्वेनाग्निस्तेषामप्यङ्गं स्या-
दिति तदङ्गभूताग्न्याश्रितगुणकामप्रवृत्त्युपपत्त्या षोड-
शिसंस्थे स्तुगणौपदेशिकत्वसंपादनस्य निष्फलत्वात् ।
औपदेशिकाङ्गानुष्ठानमेव हि तदाश्रितगुणकामप्रवृत्ति-
प्रयोजकं न तु यत्र तस्याङ्गस्योपदेशेन न प्रवृत्तिस्तदुपका-
रकत्वाभावो ऽपि गौरवात् । किं तर्हि द्विरात्रादिवाक्या-
नि कुर्वन्तु । अग्निष्टोमादिवाक्यैः सर्वेष्वहर्गणेषु प्रा-
प्तस्याग्नेर्द्विरात्राद्यतिरिक्तेभ्यः प्रतिक्षेपरूपां परिसंख्यां
कुर्वन्तु । षोडशिग्रहविषयद्विरात्रादिवाक्यानीवाहरन्तरे-
भ्यः प्रतिक्षेपरूपां परिसंख्याम् अत एव षोडशिनो वै-
कृतत्वं तत्र कृत्स्नविधानादित्यधिकरणे षोडशिग्रहस्या-
ग्निष्टोमादिष्वङ्गत्वेन विधानादतिदेशतः सम्भवत्प्राप्ति-
कस्य द्विरात्रादीनां तत्र तत्राहनि पुनर्विधानं परिसंख्या-
र्थमित्युक्तम् । आम्नानं परिसंख्यार्थमिति सूत्रेण । ननु
षोडशिग्रहणवाक्येष्वग्निष्टोमादिशब्दानां प्रकृतिमात्र-
परत्वात् द्विरात्रादिष्वतिदेशतः प्राप्तिः तर्कणमात्रमिति
भवत्वप्राप्तिः परिसंख्या इह त्वग्निवाक्येषु तेषां प्रकृ-
तिविकृतिपरत्वाभ्युपगमादुपदेशत एव द्विरात्रादीना-
महरन्तरेष्वपि प्राप्तिरस्तीति प्राप्तपरिसंख्यायां त्रैदो-
ष्यं स्यादिति चेत् तर्ह्येव द्विरात्रादिवाक्यानि समनन्त-
रविधीनां स्तुतिं कुर्वन्तु । एवमेते ऽग्निष्टोमादिष्वग्निविधयः
प्रशस्ता यत्तेष्वग्निविधानमात्रेण द्विरात्राद्यहर्गणेष्वप्यग्नि-
र्लभ्यत इति इत्थमेव ह्याङ्गिरसां द्विरात्रे षोडश्युत्तर-
इति वचनमुत्तरे ऽहन् द्विरात्रस्य गृह्यत इति द्विरात्रसा-
मान्यवचनप्राप्तस्य षोडशिनो द्विरात्रान्तरेभ्यः प-

रिसंख्यार्थमिति वृत्तिकारमते प्राप्तपरिसंख्यार्थत्वेन त्रै-दोष्यं स्यादित्यपरितुष्यता भाष्यकृता तस्य वैखान-सपूर्वे ऽहन् साम भवतीति समनन्तरविधिस्तावक-त्वमुक्तं पूर्वस्याह्नो वैखानसाख्यवैशेषिकगुणविधिर्यु-क्तः। यदुत्तरस्याप्यह्नः षोडश्याख्यो वैशेषिको गुणो वर्त्तनइत्यौचित्येन स्तौतीति। तस्मात् द्विरात्रादि-वाक्येष्वपि नाव्याप्तिशङ्कावकाशइतिभावः। नन्वत्रा-ग्निष्टोमादयः षोडशिग्रहाग्निष्टोमादिवाक्येष्विव प्र-कृतय एव गृह्यन्तां न विकृतयो ऽपि, ततश्च द्विरात्रा-दिगतेष्वग्निष्टोमोक्थ्यातिराचसंस्थेष्वहःसु प्रकृतिभूतेभ्यो ऽग्निष्टोमादिभ्यश्चोदकात्सम्भवत्प्राप्तिकस्याग्नेर्विधानं गुणकामप्राप्त्यर्थमेव भवेन्न तु स्तुत्यर्थं परिसंख्यार्थं वा स्तुतेर्व्यर्थप्रायत्वात्। आतिदेशिकपरिसंख्यायाश्चाप्राप्त-विषयत्वेन त्रैदोष्याभावे ऽप्यग्निप्रकरणसंनिहितगुण-कामप्राप्त्यर्थत्वसंभवे ऽसंनिहितद्विरात्रादितदतिरिक्ता-नेकाहर्गणप्रकरणगततत्तच्चोदकवाक्यानुसन्धानलभ्या-ग्निव्यावर्त्तकत्वकल्पनस्यायुक्तत्वात्। तर्हि षोडशिग्र-हविषयद्विरात्रादिवाक्यान्यपि पूर्ववाक्यसंनिहितराज-न्यादिनिमित्तप्राप्त्यर्थान्येव स्युः न तु द्विरात्राद्यहरन्त-रचोदकपर्यालोचनालभ्यषोडशिग्रहपरिसंख्यार्थानीति चेत्तथैव सन्तु अत एव शास्त्रदीपिकायां षोडशिग्रहवि-षये द्विरात्रादिवचनमनैमित्तिकत्वार्थमित्युक्तम्। तस्मा-दुक्तमिह द्विरात्रादिवाक्येष्वव्याप्तिकथनमित्याशङ्क्याह।

अग्निष्टोमादयश्चेत्प्रकृतय इह

न स्यात्समानं विधानम् सङ्कोचश्च श्रुतीनां क्व चन नयविदां निर्निमित्तो न युक्तः । तस्माद्व्याप्तिरग्नेर्विधिषु न घटते वर्णिता वैकृतेष्वित्याक्षेपे ऽस्मिन् प्रवक्तुं नयसरणिचणैः शक्यमेतावदेव ॥ ३४ ॥

यद्यत्राग्निष्टोमादिशब्दाः प्रकृतिमात्रपराः स्युः तदा ग्रहणे समानविधानं स्यादिति सूत्रोक्तं प्रकृतिविकृतिषुग्नेः सामानविध्यं न सिध्येत् । एकविधिविधेयत्वं हि सामानविध्यम् । नन्वत्रोपदेशरूपतयैकरूपैर्विधिभिः विधेयत्वमात्रं तद्विवक्षितं तावतैव विकृतिषु गुणकामप्राप्तिफलस्य लाभात् । न त्वेकविधिविधेयत्वपर्यन्तं विवक्षितं तावत्पर्यन्तविवक्षायां फलाभावात् । अपि चाहर्गणेष्वग्निश्चेत्समानविधानं स्यादिति दशमाध्यायसूत्रेण तथैव तत्तात्पर्यस्य स्पष्टीकरणाच्च । तत्र हि द्वादशाहे व्यनीकायां रथन्तरबृहत्साम्नोराद्ययोरह्नोश्चोदकादैन्द्रवायवशुक्राग्रत्वप्राप्तिसम्भवे किमर्थं तयोः पुनर्विधानमित्याशङ्कायां सामानविध्यर्थमिति तत्फलमुक्त्वाग्निवदिति दृष्टान्त उपन्यस्तः तत्र दार्ष्टान्तिके प्रकृतिविकृत्योर्न विध्यैकरूप्यमस्ति प्रकृतौ यदि रथन्तरसामा सोमः

इत्यादिविधिर्विकृतावैन्द्रवायवाग्रं प्रथममहरित्यादिविधिरिति तद्भेदात्, किं तूपदेशरूपतया प्राकृतवैकृतविध्योरैकरूप्यमात्रं तथैव तद्दृष्टान्ते ऽग्नावपि सामानविध्यं भवितुमर्हतीति चेत्। भवत्येवमग्न्यतिग्राह्याधिकरणासूत्रसङ्गतिस्तदीयतन्त्ररत्नसङ्गतिस्तु न स्यात्। तत्र हि वैकृताग्निविधीनां परिसंख्यात्वमाशङ्क्य सामानविध्येन निराकृतम्। तदस्माभिः 'प्रथमश्लोकव्याख्याने स्पष्टीकृतम्। तत्तु तदा सङ्गच्छते यदि प्रकृतिविकृतिष्वग्न्येकविधिविधेयत्वं स्यात्। भिन्नविधिविधेयत्वे हि प्राकृतविधिना क्लृप्तोपकारस्याग्नेर्विकृतिविशेषेषु पुनर्विधानं गृहमेधीयाज्यभागविधानवत्परिसंख्यार्थमस्त्विति शङ्का सामानविध्येन निराकर्तुमशक्यैव स्यात्। अत एवास्माभिः पूर्वं श्लोके प्राकृताग्निविधिभ्यो भिन्नानां द्विरात्रादिष्वग्निविधीनां परिसंख्यात्वपक्षो ऽपि दर्शितः। नन्वस्तु वैकृताग्निविधीनां परिसंख्यात्वनिराकरणे हेतुविशेषनिर्देशकतन्त्ररत्नमात्रस्यासङ्गतिस्तथापि सूत्रादिसामञ्जस्यावैकल्यादग्निष्टोमादिशब्दानां प्रकृतिमात्रपरत्वाभ्युपगमे को दोष इति चेत्तेषामविशेषप्रवृत्तस्मृतिरूपाणां निर्निमित्तः प्रकृतिषु सङ्कोच एव दोषः, तं हि न्यायविदो नानुमन्यन्ते। न हि षोडशिग्रहवाक्यगताग्निष्टोमादिशब्दानां ज्योतिष्टोममहाप्रकरणमिवाभिक्रामं जुहोतीत्यत्र जुहोतिरिति कर्तव्यताकाङ्क्षप्रयाजावान्तरप्रकरणमिव चेहानारभ्याधीताग्निष्टोमादिशब्दानां किं चित्सङ्कोचकमस्ति सङ्कोचकाभावे च यदाहवनीये जुह्वतीत्यनारभ्यवादगतजुहोतेः।

प्राकृतवैकृतसकलहोमपरत्वमिवेहाग्निष्टोमादिशब्दानां प्रकृतिविकृतिरूपसकलाग्निष्टोमादिपरत्वमेव न्याय्यम् । तस्मात्प्रकृतिसाधारणैरग्निष्टोमादिवाक्यैरेव द्विरात्रादिष्वग्निप्राप्त्या प्रकृतिवत्तेष्वपि तदाश्रितगुणकामलाभाद् द्विरात्रादिवाक्यानां पूर्वश्लोकोक्तरीत्या परिसंख्यार्थत्वं स्तुत्यर्थत्वं वानन्यगत्या स्वीकरणीयमिति तेष्वपि नास्त्यव्याप्तिः । अतो विषयसप्तमीपक्षे वैकृताग्निविधिष्वव्याप्तिरित्युक्तिर्निरालम्बनेति स्थितमेवमाक्षेपे मीमांसान्यायविद्भिरेतावदेवोत्तरं वक्तुं शक्यं किं तदिति चेत्तत्राह ।

अग्निष्टोमादिशब्दाः प्रकृतिविकृतिसंस्पर्शिनस्सन्तु नाम प्राप्यत्वाम्नातसंस्थान्प्रथममथ नते यान्त्यनाम्नातसंस्थान् । तत्त्रयक्तां द्विरात्रप्रभृतिषु विधयश्चोदकप्राप्तमग्निं प्रयेनाकृत्यादिलब्ध्यै विदधत इति ते त्वन्वताव्याप्तिरिति ॥ ३५ ॥

पूर्वश्लोकोक्तरीत्या सङ्कोचे कारणाभावादिमे ऽग्निष्टोमादिशब्दाः प्रकृतिविकृतिगामिनः सन्तु नाम अत एव प्रकृतिसामानविध्यात्परिसंख्यात्वमनुपपन्नमिति तत्वरनवचनमप्यग्निष्टोमादिवाक्यत्रयाभिप्रायेण युज्यते, तथा-

पि विकृतिरूपान् सर्वानग्निष्टोमादीन्न स्पृशन्ति किं त्वग्निष्टोमादिसंस्थावतः क्रतुविशेषानन्विच्छन्तो येषु क्रतुषु प्रत्यक्षश्रुत्याम्नातास्तत्तत्संस्थाः सन्ति तेषु शीघ्रं बुद्ध्युपारूढेषु प्रथममवतरन्ति। तावता नैराकाङ्क्ष्यात् शब्दानां विरम्य व्यापाराभावाच्च तदनन्तरं विलम्बितोपस्थितिकेषु चोदकप्राप्यसंस्थेषु क्रतुषु नावतरन्ति पर्णामय्यादिवाक्यस्थितजुह्वादिशब्दइव चोदकप्राप्तासु वैकृतजुह्वादिषु"उपांशु पौर्णमास्यां यजन्ति"ति वाक्याभावे दर्शपूर्णमासाधिकारवाक्यस्थपूर्णमासपदमिवान्तरालविधिसामर्थ्यलब्धपौर्णमासीकाले उपांशुयाजे आहवनीयवाक्यगतजुहोतेरप्यगुणस्य स्वकालत्वादित्यधिकरणे सर्वहोमविधिसाधारण्यं नाङ्गीकृतं किं तु ये विकृतिष्वाम्नहोमादय उपदिष्टा न त्वतिदिष्टास्तत्साधारण्यमेवाङ्गीकृतम्। तन्मात्रसाधारण्ये ह्यतिदिष्टसाधारण्य इव न विरम्य व्यापारप्रसक्तिरस्ति। अत एवातिदेशप्राप्येषु होमेष्वाहवनीयस्याप्यतिदेशेनैव प्राप्तिस्तदधिकरणवार्त्तिके दर्शिता। ततश्चाहवनीयेन सहैवास्यातिदेशनात्। प्रकृतौ वा द्विरुक्तत्वादित्ययं निश्चयो भवेदिति। एवं च प्रकृतानामग्निष्टोमादिशब्दानां प्रत्यक्षाम्नाततत्तत्संस्थावन्मात्रविषयतया तेष्वेवाग्नेरुपदेशतः प्रवृत्तिः येषु तु द्विरात्रादिषु प्रत्यक्षाम्नातसंस्थाविशेषरहितेषु चोदकात् द्वादशाहिकमध्यमदशरात्रिगततत्तत्संस्थाविशेषलाभः तेष्वग्निष्टोमादिवाक्यरूपोपदेशपरित्यक्तेष्वतिदेशत एवाग्नेः प्राप्तिरिति तेषु गुणकामा न प्राप्नुयुः, अतस्तेषु सामानविध्येन गुणकामप्राप्त्यर्थमग्निविधिपराणि द्विराला-

दिवाक्यानीति तेष्वव्याप्तिकथनं युक्तमित्येतावदिह वक्तुं शक्यम् । नन्वेवमेव समाधानमुच्यतां को दोष इति चेत्तत्राह ।

तत्रैतद्दूषणं स्यान्न गुणफलविधिष्वत्र वान्यत्र व्याप्तिः प्राक्किञ्चित्क्रत्वपूर्वान्वयमुपगतवानाश्रयो ऽत्रानुवाद्यः ॥ किन्त्वग्निष्टोममुख्यक्रतुसमधिगमात्प्रागनारभ्यवादे शुद्धो ऽग्निस्तस्य नैव क्वचिदपि विकृतावाश्रयत्वे ऽस्ति भेदः ॥ ३६ ॥

स्यादिदमुत्तरं यद्यग्न्याश्रितफलविधिषु अन्यत्रैवाग्निप्रकरणे ऽन्येषु वा क्रतुप्रकरणेषु किं चित्क्रत्वपूर्वान्वयित्वेन सिद्धो ऽग्निराश्रयत्वेनानुवाद्यः स्यात् । तथा हि यदि प्रागेवाग्न्याश्रितगुणफलविधिप्रवृत्तेः केषु चित्क्रतुप्रकरणेषु उपदेशेन केषु चिदतिदेशेन च तत्तत्क्रत्वपूर्वान्वयो ऽग्नेः सिद्धः स्यात्तद्व्यतिरेकेण चात्र गुणफलविधिष्वाश्रयानुवादार्थं शुद्धाग्निसमर्पकपदोनुवादो न स्यात् तदानीमौपदेशिकजुहून्यायेन प्रथमबुद्धिमवतरत्यौपदेशिके ऽग्नावाश्रयत्वेनान्विते चरममातिदेशिकस्याग्नेर-

न्वयो न भवेदिति तस्यापि तदाश्रयत्वेनान्वयार्थमुपदेशः सफलः स्यात्। यदि वा तत्रैव प्रकरणे किं चित्क्रत्वपूर्वान्वयित्वेन सिद्ध एवाग्निरप्रणयनवद्गुणफलविध्यन्वयी स्यात् तदा गोदोहनवदग्न्याश्रितगुणफलविधिस्तत्रैव क्रतौ व्यवतिष्ठेतेति क्रत्वन्तरगताग्नेरपि तदाश्रयत्वसिद्ध्यर्थं यत्नान्तरं कर्त्तव्यं स्यात्। नन्वेवमनारभ्यवादरूपे ऽग्निप्रकरणे ऽग्निष्टोमादिवाक्यैः क्रत्वन्वयकरणात् प्रागेव य एवं विद्वानग्निं चिनुतइत्युत्पन्नः शुद्धो ऽग्निः श्येनाकृत्यादिगुणफलविधिष्वाश्रयत्वेनान्वेति सोमप्रयोगाद्बहिः केवलस्याग्नेरनुष्ठातुमशक्यत्वादग्निष्टोमादिवाक्यैस्तस्य क्रतुषु संयोजनाच्च यत्राग्निस्तत्रैव तदाश्रिता गुणफलविधय इत्यर्थादेव तेषामपूर्वीयाग्निसंबन्धः सिध्यति अर्थात्सिध्यच्चापूर्वीयस्याश्रयत्वं येष्वग्नेरौपदेशिकमपूर्वीयत्वं येषु चातिदेशाधीनं तेषु सर्वेष्वप्यविशेषेण सिध्यति। न ह्यत्र अतिदिष्टस्याग्नेराश्रयणे दार्शपौर्णमासिकाप्प्रणयनाश्रितत्वेनावगतस्य गोदोहनस्येष्ट्यन्तरातिदिष्टप्रणयनाश्रयणे वैगुण्यवदिह किं चिद्वैगुण्यमस्ति एतादृग्विषयाभिप्रायेणैवातिदिष्टाश्रयणेनापि गुणकामप्रवृत्तिरङ्गीकृता। अवैगुण्ये तु भवतु कामस्यापि प्रवृत्तिरिति तदभिप्रायेणैव भाष्यकारो ऽप्याह तस्मिन्प्रवर्त्तमाने कामो ऽपि प्रवर्त्तत इति तस्मादतिदिष्टाग्न्याश्रयणेनापि गुणकामप्राप्तिसम्भवान्न तदर्थं द्विरात्रादिवाक्यापेक्षेति भावः। का तर्हि द्विरात्रादिवाक्यानां गतिः स्तावकतैवेत्युक्तमिति चेन्न। अग्निष्टोमोक्थ्यातिरात्रवाक्यसरूपतया तद्विधायकतया प्रतीयमानानां व्यर्थप्रायस्तुतिपरत्वक-

त्वनायोगात् । तस्मात्तद्विधित्वनिर्वाहाय्यथानुपपत्त्यैवा-तिदिष्टाश्रयणेन गुणकामा न प्रवर्त्तन्तइति कल्पयिष्या-मः । तथा सति हि गुणप्राप्त्यर्थता तेषां भवेदित्यनुश्र-यानं प्रत्याह ॥

वाचस्त्वग्नेर्द्विराज्यप्रभृतिषु प-रिसंचक्षतामन्यतो ऽग्निम् ते-ष्वन्याङ्गानि यद्वा नियमनमथ वा तेषु कुर्वन्तु तस्याः ॥ येष्वे-ताः क्लिष्टगत्या गुणफलभवन-प्रापणार्था भवेयुः षोडश्यर्थे-ष्विव स्यात्तदपि विधिफलं ते-ष्ववश्यं तथापि ॥ ३७ ॥

यदि द्विरात्रादिवाक्यानां केन चित्प्रकारेण विधा-यकत्वं वाच्यमिति निर्बन्धस्तदा तान्यङ्गगणान्तरेभ्यो ऽग्नेः परिसंख्यां कुर्वन्तु । यदि प्राप्तपरिसंख्या त्रिदोषा तदपेक्षया व्यर्थप्रापि स्तुतिरेव वरमिति उक्तमिति त-त्रापरितोषस्तर्हि द्विरात्रादिष्वेव गृहमेधीयाज्यभाग-विधिन्यायेन चोदकप्राप्ताङ्गान्तरपरिसंख्यां कुर्वन्तु। यदि च द्विरात्रादिष्वतिदेशप्राप्ताङ्गसद्भावेति लिङ्गानि स-न्तीति तद्विरोधात्तत्राप्यपरितोषस्तर्हि द्विरात्रादिषूक्त-

रवेद्याः पत्नप्राप्तावग्नेर्नियमनं कुर्वन्तु हिराबादिचोद-
कपर्यालोचनालभ्योत्तरवेदिप्राप्त्यपेक्षाग्निनियमापेक्षया-
ऽग्निप्रकरणाम्नाततदाश्रितगुणकामप्राप्तिर्बुद्धिसंनिहिते-
ति तादर्थ्यमेव हिराबादिवाक्यानां कल्पयितुमुचितमिति
प्रथमश्लोकव्याख्याने प्रतिपादितमिति चेदिदमपि तत्र
षोडशिहिराबादिवचनमुदाहृत्य प्रतिपादितमेव संनि-
हितफलालाभे प्रकरणान्तरस्थचोदकाधीनप्राप्तिसा-
पेक्षो नियमोऽपि फलं भवितुमर्हतीति इह चान्यतः
सम्भवन्ती गुणकामप्राप्तिः फलं न भवतीत्युक्तमेव यद्यपि
क्लिष्टगत्या हिराबादिवाक्यानां गुणकामप्राप्त्यर्थत्वं सम-
र्थ्यते तथाप्यग्नेर्नियमनमपि फलं सम्भवन्न निवारयितुं
शक्यम्। न ह्येकस्य वाक्यस्य प्राप्तिनियमपरिसंख्या-
स्वेकमेव फलमिति नियमः अनेकफलसङ्करस्य तत्र तत्र
वाक्ये बहुशः प्रागुदाहृतत्वात्। किं च हिराबादिवा-
क्येष्वेव षोडशिग्रहविषयेष्वनेकफलसङ्करः सिद्धान्ता-
भिमतो दृश्यते। तथा हि उत्तरेऽहन्हिराबस्य गृह्यते
इत्यादिवाक्यानि तत्प्राचीनवाक्यसङ्कीर्त्तितं ब्राह्मणत्व-
राजन्यत्वरूपनिमित्ताभावेऽपि षोडशिनः प्रापणार्था-
नीति तावत् शास्त्रदीपिकाकृतोक्तम्। तेनैवोत्तरेऽहन्नि-
तिवाक्यं प्रकृत्यतिरात्रे विकल्पितस्य षोडशिनः तथैव
हिरात्रस्योत्तरेऽहनि प्राप्तौ तन्नियमार्थमिति। तन्त्र-
रत्ने प्रतिपादितम्। सूत्रकृता तु षोडशिनो वैकृतत्वं तत्र
कत्स्नविधानादित्यधिकरणे उत्तरेऽहन्नित्यादिवाक्यानि
परिसंख्यार्थानीति प्रतिपादितं तत्र हि षोडशी प्रकृतौ
ज्य तिष्टोमे न ग्राह्यस्तस्य मध्यमेऽहन्नित्यादिवाक्यैः का-

तस्न्यैन विकृतिसंबन्धित्वावगमात्तदनुसारेणाग्निष्टोमो-
क्थ्यातिरात्रशब्दानां विकृत्यग्निष्टोमादिपरत्वौचित्यात्
अन्यथा प्रकृत्यग्निष्टोमादिषु सतस्तस्यातिदेशाद्विकृति-
षु प्राप्तिसम्भवेन मध्यमादिवाक्यवैयर्थ्यप्रसङ्गादिति
प्रापय्य ज्योतिष्टोमप्रकरणगतानां षोडशिविषयाग्नि-
ष्टोमादिवाक्यानां द्वादशोपसत्तादिवाक्यवत्तदनन्वयि-
पदरहितानां प्रकरणादुत्कर्षायोगात् प्रकृतावपि षो-
डशी ग्राह्य इति सिद्धान्तिते किमर्थानि तर्हि मध्यमादि-
वाक्यानीत्याकाङ्क्षायामाम्नानं परिसंख्यार्थमिति सूत्रेणा-
तिरात्रोक्थ्याग्निष्टोमसंस्थेष्वहर्गणामामहरन्तरेष्व-
पि ब्राह्मणराजन्ययोः षोडशिनः प्राप्तौ तत्परिसंख्या-
र्थानीत्युक्तं किमसत्फलं प्रत्याख्यातव्यं तस्मात् षोडशि-
विषयद्विरात्रादिवाक्यैरप्यित्राग्निविषयद्विरात्रादिवाक्ये-
ष्वप्यनिवार्यः फलान्तरसङ्करः । अत फलान्तरेण तेषां
विधित्वनिर्वाहादतिदिष्टाश्रयणेन गुणकामा न प्रवर्तन्त
इति परिभाषानाश्रयणेनेति कथमपि द्विरात्रादिवाक्ये-
ष्वव्याप्तिरवकाशं न लभत इति भावः । एवं द्विरात्रा-
दिवाक्येष्वव्याप्तेरनवकाशत्वं सप्रपञ्चमुपपादितम् ।
"पशुकाम उक्थ्यं गृह्णीयात्" "षोडशिना वीर्यकामः
स्तुवीत" "अतिरात्रेण प्रजाकामं याजयेदि"ति वा-
क्यानि पश्वादिफलार्थं ज्योतिष्टोमाश्रितोक्थ्यादिसं-
स्थारूपगुणविधायकानीति मतमाश्रित्योक्थ्यातिरात्र-
वाक्ययोरप्यव्याप्तेरनवकाशत्वं प्रागुपपादितम् ये तु म-
न्यन्ते पशुकामादिवाक्यानि पश्वाद्यर्थमुक्थ्याद्यधिका-
रवत्तियुक्तप्रकृतसोमयागविधायकानि न तु तदाश्रि-

तोक्थ्यादिसंस्थामात्रविधायकानि यत्र हि लोकतः क्रतोर्गुणान्वयो लभ्यते तत्रैव फलाय गुणमात्रस्य विधिर्युज्यते यथा गोदोहनादेः यत्र तु शास्त्रादृते न तत्सिद्धिस्तत्र न स युज्यते गुणाश्रयसंबन्धे गुणफलसंबन्धे च शास्त्रव्यापारायोगात्, किं तु तत्र गुणविशिष्टक्रतोरेव फलाय विधानं वाच्यम् अत एव "दाक्षायणयज्ञेन स्वर्गकामो यजेते"त्यादिष्वप्यावृत्तिगुणविशिष्टस्य क्रतोरेव फलाय विधानमभ्युपगम्यते एवं च फलकामनानिमित्तकतदधिकारावृत्तियुक्तोक्थ्यादिसंस्थः सोमयागो नित्यवदाम्नाततदनावृत्तियुक्तस्याग्निष्टोमसंस्थस्य "वसन्ते वसन्ते ज्योतिषा यजेत" "ज्योतिष्टोमेन स्वर्गकामो यजेते"ति विधिद्वयप्राप्तनित्यकाम्योभयावस्थस्य सोमयागस्य विकार इति तत्र दीक्षणीयादेरङ्गकलापस्यातिदेशेनैव प्राप्तिर्न तूपदेशेन नित्यवदाम्नातदीक्षणीयाद्युपदेशस्य शीघ्रोपस्थितिकनित्यवदाम्नाताग्निष्टोमनित्यकाम्यक्रतुप्रयोगान्वयेन चरितार्थस्य विलम्बितोपस्थितिकनैमित्तिकोक्थ्यादिग्रहाद्येऽप्याधिकारावृत्तियुक्तप्रयोगान्तरान्वयकल्पने द्विरुक्तिप्रसङ्गादिति तन्मताश्रयणेनोक्थ्यातिराात्राग्निवाक्ययोरतिदेशतः सम्भवत्प्राप्तिकाग्निविधिद्वपयोरव्याप्तिर्वक्तुं शक्यते इत्यत आह ।

उक्थ्यादिस्पृक्फलानां क्रतुसमधिगतिं मन्वतां केऽपि तेषाम् । तेनाग्निष्टोमसंस्थक्रतुविकृ-

तितयोक्थ्यादिसंस्था न सिध्ये-
त् । किं तु स्यात्सर्वकाम्योत्तयु-
दितफलभिदा साधिकायां प्रकृ-
त्यामुक्थ्यादीनां व्यवस्था प्रक-
रणपठनात्सर्वतस्तत्प्रसक्तौ ॥३८॥

पशुकाम उक्थं गृह्णीयादित्यादिवाक्येषूक्थ्यादिश-
ब्दवाच्यमुक्थ्यादिस्तोत्रैः क्रतुसमाप्तिरूपामुक्थ्यादिसं-
स्थामतिलङ्घ्योक्थ्यादिपदलक्ष्यस्योक्थ्यादिसंस्थाविशिष्ट-
स्य क्रतोः पश्वादिफलसङ्गतिरङ्गीक्रियते चेत्पशुका-
मादिवाक्यानि क्रतुफलविधयो न भवेयुः सर्वेभ्यः
कामेभ्य इतिवाक्यान्तरेणैव क्रतोः पश्वादिसकलफ-
लान्वयसिद्धेः । ततश्चोक्थ्यादिसंस्थे क्रतौ फला-
र्थस्य विध्यन्तरस्याभावात्तद्विधिविधेय उक्थ्याद्यधिका-
वृत्तियुक्तः क्रतुरग्निष्टोमसंस्थस्य क्रतोर्विकृतिरित्येवं
न सिध्येदेव किं तर्हि पशुकामादिवाक्यैः सिध्येदि-
ति चेदुच्यते वसन्तादिवाक्येन जीवदधिकारतया स-
र्वकामवाक्येन तत्तत्फलकामाधिकारतया चावगते प्र-
कृतिभूते ज्योतिष्टोमे तत्प्रकरणोत्पन्नानामुक्थ्यादीनाम-
विशेषेण संबन्धे प्राप्ते पशुकामादिवाक्यैरुक्थ्यस्य पशुफ-
लार्थं तस्मिन्संबन्धः षोडशिनो वीर्यफलार्थं इत्यादिरूपा
व्यवस्था परं तैर्वाक्यैः सिध्यति यथा इष्ट्यादिफलत्रयार्थं-
विहितसौभरपठितानां त्रयाणामपि ह्रीषीत्येवमादीनां

निधनानामविशेषेण तत्संबन्धे प्राप्ते हीषिति इष्टिकामाय निधनं कुर्यादुगित्यन्नाद्यकामाय ऊदिति स्वर्गकामायेत्यादिवाक्यैर्वृष्ट्यर्थं हीषिति निधनमित्यादिव्यवस्था सिध्यत्येवं दाक्षायणयज्ञसाकंप्रस्थायीयादावपि दार्शपौर्णमासिकसार्वकाम्यवाक्यलब्धस्वर्गपश्वादिफलविशेषे क्रतावावृत्तिसहप्रस्थानादिगुणव्यवस्थैव सिध्येन्न तु गुणविशिष्टस्य क्रतोः सार्वकाम्यवाक्योदितफलात्फलान्तरेणान्वयः तस्मादुक्थ्यादिवाक्योदितफलानां क्रतुसङ्गतिस्वीकारे ऽप्युक्थ्यादीनामग्निष्टोमविकारत्वासिद्धेस्तन्मताश्रयणे ऽप्युक्थातिरात्राग्निवाक्ययोरव्याप्तेर्नावकाश इति भावः। वस्तुतस्तु तेषां क्रतुसङ्गतिस्वीकार एवायुक्तः संस्थाविशेषविशिष्टेषु क्रतुषूक्थ्यादिशब्दप्रयोगस्य विशिष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणादितिन्यायेन लाक्षणिकत्वात्, उक्थ्यादिफलवाक्येषु च लक्षणाकल्पने प्रमाणाभावात् । न च तेषां गुणाश्रयसंबन्धे गुणफलसंबन्धे च व्यापारायोगाल्लक्षणाकल्पनं प्रकरणादेव गुणानामाश्रयसंबन्धलाभात् तस्मादुक्थ्यादिफलवाक्येषु स्तोत्रविशेषैः क्रतुसमाप्तय एवोक्थ्यादिशब्दवाच्याः फलाय विधीयन्ते गृह्णीयात्स्तुवीत याजयेदिति तु सौर्यादिषु निर्वपत्यादिवदनुवादमात्रं तदेतत्सर्वं शास्त्रदीपिकादिष्वेव स्पष्टम्। एवमत्रास्वरसो मन्वते के ऽपीत्युक्त्यासूचितः संस्थास्तु समानविधानाः प्रकरणाविशेषादितिसंस्थाधिकरणे किं सर्वसंस्थं ज्योतिष्टोमं प्रकृत्य दीक्षणीयादयो धर्मा उताग्निष्टोमं प्रकृत्येत्यादिभाष्यवचनं तु ज्योतिष्टोमस्यैवाग्निष्टोमसंस्थोक्थ्यादिसंस्थस्य च

सामानविध्यासामानविध्यविचारपरं न ग्राह्यं किं तु ज्योतिष्टोमेन तदाश्रितानामुक्थ्यादिसंस्थानां पृथक् फलवत्त्वेनेतिकर्त्तव्यतापेक्षिणीनां सामानविध्यासामानविध्यविचारपरं नेतव्यम् । अत एव यत्र यत्र गुणकामा भवन्ति तत्र तत्र क्रियायां साध्यमानायां नान्यथा तत्रेतिकर्त्तव्यतायामन्तिकमुपनिपतेत्सा साधनस्य वा साध्यस्य वेति सन्दिह्यमाना साध्यस्य भवितुमर्हति नासौ साध्यस्याभवन्ती साधनेन संबध्यतइति सिद्धान्तभाष्यवचनं सङ्गच्छते । इदं हि क्रतोः क्रत्वाश्रितगुणकामानां च फलार्थत्वेनेतिकर्तव्यताकाङ्क्षालक्षणप्रकरणाविशेषाद्दीक्षणीयादिषु सामानविध्यमितिपूर्वपक्षे प्राप्ते सिद्धान्तयुक्तिप्रदर्शनपरम् । अस्य चेदं तात्पर्यं गुणः फलाय चोद्यमानः पूर्वप्राप्तां परप्रयुक्तक्रियामाश्रित्य पश्चाच्चोद्यते व्यंशयुक्ता च क्रिया प्रयुज्यते ततश्च प्राक्तनस्तत्कर्त्तव्यरूपक्रियाविधिसमयएवाङ्गविधीनां व्यापारो न पश्चात् गुणफलविधाने ऽपि विरम्य व्यापारयोगादिति तस्मादयुक्तं वैकृताग्निविधिष्वपूर्वविधिलक्षणस्याव्याप्तिकथनमित्येवं प्रथमाक्षेपः प्रपञ्चेनाक्षिप्तः । अथाक्षेपान्तराण्यपि यथा सम्भवमाक्षिप्यन्ते । यदुक्तं साप्तदश्यवाक्यवदभ्युदयार्थत्वाङ्गीकारेण स्वर्गकामादिवाकेऽष्वपूर्वविधिलक्षणाव्याप्त्युद्धारे तस्य नियमपरिसंख्याविध्योरतिव्याप्तिः स्यादिति तत्र साप्तदश्यवाक्यदृष्टान्तकथनमयुक्तमित्याक्षिपति ।

तासु स्यात्सामदश्यं प्रकरण-

हितं यासु न श्रूयते तत्तास्व-
स्य स्याद्विकल्पो विकृतिषु कथि-
ते चोदकात्पाञ्चदश्ये । सत्येवं
मित्रविन्दादिषु नियमविधि-
स्तस्य भूयो विधिः स्यात् सार्थ-
क्ये सम्भवत्यभ्युदयफलकता
केवलं नैव कल्प्या ॥ ३७ ॥

अनारभ्याधीतसाप्तदश्यवाक्यस्यापि प्राकरणिकसाप्तदश्यवाक्यवन्मित्रविन्दादिमात्रशरणत्वे स्यादेवमगत्याभ्युदयार्थत्वकल्पनं तदेवासिद्धान्तुरस्य प्रवृत्तिविशेषकरत्वपर्यवसायी गत्यन्तरसम्भवात् । तथा हि । यासु सौर्यादिविकृतिषु साप्तदश्यं न श्रूयते तास्वनारभ्यवादप्राप्तसाप्तदश्यस्यातिदेशप्राप्तेन पाञ्चदश्येन विकल्पं प्राप्नोतु मित्रविन्दादिषु पुनः साप्तदश्यविधानं विकल्पापवादरूपं साप्तदश्यनियमार्थमस्तु । एवं सर्वस्यापि साप्तदश्यवाक्यस्य प्रवृत्तिविशेषकरत्वसम्भवे किमित्यन्यतः सिद्ध्यत्यर्थे केवलादृष्यर्थविधित्वमभ्युपगम्यते । नन्वनारभ्य
धीतसाप्तदश्यस्य सौर्यादिगामित्वे सौर्यादिष्वतिदे
त्पाञ्चदश्यं न प्राप्नुयात् उपदेशेनातिदेशबाधात्
चेत्सत्यमन्यत्र तथैव इह तु सौर्यादिषु साप्तदश्यं पा
श्यातिदेशबाधनेन स्वयं नियतत्वं प्राप्नोति चेन्मि

न्दादिषु पुनः साम्नाय्यविधानं व्यर्थं स्यात्तथैव मित्रविन्दादिष्वपि सान्नाय्यनियमलाभोपपत्तेः । अतो ऽनारभ्याधीतं सान्नाय्यवाक्यं स्वस्य मित्रविन्दादिगतौ स्ववैयर्थ्यं सौर्यादिगतौ पाञ्चदश्यातिदेशबाधेन प्राकरणिकसान्नाय्यवाक्यवैयर्थ्यं चालोच्य सौर्यादिकं गत्वा तत्र पाञ्चदश्यातिदेशं च सोढ्वा तेन सह विकल्पमनुमन्यते यथा न तौ पशौ करोतीति पशावाज्यभागप्रतिषेधस्तच्च चोदकादाज्यभागयोरप्राप्तावप्रसक्तप्रतिषेधतया स्ववैयर्थ्यं चोदकात्तयोः प्राप्तौ सर्वथा तयोः प्रतिषेधे च तत्प्रापकस्य चोदकस्याप्रामाण्यापत्तिं चालोच्याज्यभागातिदेशं सोढ्वा तदनुष्ठानेन सह विकल्पमङ्गीकरोति । एवं हि तत्र चोदकनिषेधशास्त्रयोरिवात्रापि प्राकरणिकाप्राकरणिकसान्नाय्यवाक्ययोः प्रवृत्तिविशेषकरतया साफल्यं भवति तस्मात् केवलादृष्टार्थत्वे सान्नाय्यवाक्योदाहरणमयुक्तमिति भावः । यदुक्तमपूर्वविधिलक्षणे सर्वोद्देशेनानुवृत्तिरप्राप्तेरात्यन्तिकत्वमिति पक्षे त्रेधा तण्डुलान्विभजेदिति विधावव्याप्तिस्तत्र दार्शिकहविषां पूर्वदेवताभ्यो ऽपनयस्य वक्ष्यमाणदेवताभ्यो विभागस्य वा विधौ तेषां मध्ये तण्डुलदधिशृतेषु देवतापनयविभागयोरर्थसिद्धत्वेनोपांशुयाजाज्यमात्रे विधेश्चारितार्थ्यं स्यात्स्यादिति तदाक्षिपति ।

नास्त्येवोपांशुयाजोदधिशृतसहितः पौर्णमास्यां विधानात्

तद्वश्यं दर्शतन्त्रे पठितमपि ऋगाम्नातयाज्यानुवाक्यम्। कृत्वा चिन्तैव तस्य क्व चिदधिकरणे दार्शिकेष्वस्तितोक्तिस्तत्त्वेधा तण्डुलानित्यनुवदनमतस्तत्र नाव्याप्तिरस्ति॥ ३९॥

दधिशृतवत्याममावास्यायामुपांशुयाजो नास्त्येव उपांशु पौर्णमास्यां यजन्निति पौर्णमास्यां तद्विधानात्। न च वाच्यम् बह्वृचब्राह्मणे अमावास्याप्रकरणे उपांशुयाजयाज्यानुवाक्यायुगलपाठात्तस्यामपि सोऽस्तीति प्रधानस्योपांशुयाजस्य पौर्णमासीकालत्वे तदङ्गतया तत्परतन्त्रस्य मन्त्रस्यान्यत्र पठितस्यापि तद्गामित्वात्। अयं चार्थः सूत्रकृतैव दशमाध्याये ऽमावास्यायामुपांशुयाजः स्यादुपांशुयाजमन्तरा यजतीत्यविशेषश्रवणादिति पूर्वपक्षं कृत्वापि वा पौर्णमास्यां स्यात्प्रधानशब्दसंयोगान्मन्त्रो यथा प्रधानं स्यादिति सिद्धान्तसूत्रेण स्पष्टीकृतः। प्रपञ्चितं चैतच्चतुर्थश्लोकव्याख्याने। नाप्येतच्छङ्कनीयम् अमावास्यायामुपांशुयाजमङ्गीकृत्यापि उपांशुयाजोवचनाद्यथाप्रकृतीत्याद्यधिकरणप्रवृत्तिर्दृश्यत इति तस्य न्यायव्युत्पादनार्थं कृत्वा चिन्तारूपतया नेतव्यत्वात्। अन्यथा पौर्णमास्यां यजन्नित्याहत्य पौर्णमासीकालत्वविधायकश्रुतिव्याकोपप्रसङ्गात्। उदाहृतश्रुत्यवलम्बनानु-

पादोदाहृतदाशमिकाधिकरणविरोधप्रसङ्गाच्च । तस्मात् त्रेधा तण्डुलान्विभजेदित्ययं वक्ष्यमाणस्य तण्डुलानां मध्यमादिभावेन विभागस्यानुवाद इत्येव युक्तम् आकरग्रन्थेषूक्तरीत्यानुवादत्वपरिहाराय दार्शिकहविःसामान्ये लक्षणामङ्गीकृत्य पूर्वदेवतापनयनस्य वक्ष्यमाणदेवताभ्यो विभागस्य वा विधेयत्वाभ्युपगमेऽपि तस्य तण्डुलदधिशृतेष्वर्थसिद्धत्वेनोपांशुयाजाज्यस्याभावेन च विधेयालाभेनानुवादत्वापरिहाराच्च । तस्मात् त्रेधा तण्डुलानिति विधौ सर्वोद्देश्यानुष्ठानप्राप्तभावेनाव्याप्तिवर्णनमयुक्तमिति भावः । एवमभ्युदयेष्टिवाक्ये दार्शिकहविषां पूर्वदेवताभ्योऽपनयस्यापेक्षामङ्गीकृत्य तस्यार्थसिद्धत्वाद्विधिवैयर्थ्यमुक्तम् इदानीन्तदपेक्षैव नास्तीति नितरां तस्य वैयर्थ्यमाह ।

प्रत्येकं द्रव्ययुग्मे न पटु घटयितुं देवतां वाक्यमेकम् सारूप्यस्यापि भङ्गः पशुफलवचसा केवलं तद्विधाने तस्मात्तावद्विशिष्टानपि नियतिविधावार्त्तिवाक्योक्तरीत्या वक्तव्यो देवतानामपनयनविधिः कल्पनं क्वापि युक्तम् ॥४०॥

भवेदिह दार्शिकहविषां पूर्वदेवतापनयापेक्षा यदि तेषां देवतान्तरसंयोजनपराणि मध्यमादिवाक्यानि स्युः तदेवासिद्धं तथात्वे हि वाक्यभेदः प्रसज्येत तथा हि मध्यमादिवाक्यानां देवतान्तरसंयोजनपरत्वे द्रव्येष्वग्न्यादिदेवताविधानं देवतासु दातृत्वादिगुणविधानं चेति त्रिष्वपि वाक्येषु तावदेको वाक्यभेदः, दधिशृतवाक्ययोः स्थविष्ठानां दध्यणिष्ठानां शृतं चाधिकरणं विधेयम् इत्यपरो वाक्यभेदः, तथा स्थविष्ठानामणिष्ठानां चरुभावोऽपि विधेय इति अन्यो वाक्यभेदः। स्यादेतन्नैते वाक्यभेदाः प्रसरन्ति। तथा हि दातृप्रदातृशिपिविष्टशब्दानां श्रुत्यैवाग्न्यादिपदसामानाधिकरण्यात् पदद्वयप्रतिपादितं विशिष्टदेवताकारकमेकमेव विधेयं न तु देवतास्तद्गुणाश्च प्रत्येकं विधेयाः। अभ्युदयेष्टिप्रकरणे सह श्रपयतीतिवचनमस्ति तदेतद्देवतैक्याद्दधिस्थविष्ठयोः शृताणिष्ठयोश्च सहपाकविषयं, ततश्च स्थविष्ठानामणिष्ठानां च तण्डुलानामल्पत्वाद्दधिशृतयोर्भूयस्त्वाच्च तण्डुलानां चरुत्वं दधिशृतयोरधिकरणत्वं चार्थात्प्राप्नोति। अर्थप्राप्तं च तत्सर्वमनूद्यते तत्तद्गुणविशिष्टमेकदेवताकारकं विधीयते मध्यमानां तण्डुलानामग्निर्दाता देवता स्थविष्ठानां दध्नश्चेन्द्रः प्रदाता अणिष्ठानां शृतस्य च विष्णुः शिपिविष्ट इति। अतो नैवं वाक्यभेदावकाश इति चेत्सत्यमित्थं सह श्रपणे वाक्यान्तरमङ्गीकृत्य कल्पने उक्तप्रकारेण वाक्यभेदो नास्तीति तथापि प्रकारान्तरेण वाक्यभेदः स्यादेव दधिवाक्येन दध्नि स्थविष्ठेषु शृतवाक्येन शृते चाणिष्ठेषु च प्रत्येकं

देवतासंयोजनात्। इयांस्तु भेदः पूर्वस्मिन्पक्षे स्थविष्ठे देवता प्रणीताकार्ये च दधिविधेयमिति चोदिष्टेषु देवता प्रणीताकार्ये शृतं च विधेयमितिच विधेयभेदाद्वाक्यभेदः। द्वितीयपक्षे स्थविष्ठेषु दध्नि च चोदिष्टेषु शृते च देवताविधेयेत्युद्देश्यभेदाद्वाक्यभेद इत्युभयत्राप्यविशिष्टो विध्यावृत्तिलक्षणो वाक्यभेदः। अपि चात्र मध्यमादिवाक्येषु दार्शिकहविषां देवतान्तरसंयोजनविधिरिति पक्षे पशुकामार्थमध्यमादिवाक्यसारूप्यभङ्गः प्रसज्येत। एवं हि काम्येष्टिकाण्डे श्रूयते। "यः पशुकामः स्यात्सो ऽमावास्यामिष्ट्वा वत्सानपाकुर्याद्ये मध्यमास्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधञ्चरुं ये ऽणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुमि"ति तत्र पशुकामेष्टिविधौ मध्यमादिवाक्येषु द्रव्यदेवताविशिष्टकर्मविधिरङ्गीकृतो नवमे। तथात्रापि तथाभूतकर्मविध्यङ्गीकारे तत्सारूप्यं समञ्जसं भवति न तु देवतामात्रविध्यङ्गीकारे तस्मादिहाप्यवाक्यभेदाय पशुकामेष्टिवाक्यसारूप्यसामञ्जस्याय च तत्तद्द्रव्यविशेषविशिष्टकर्मविधिरेवाङ्गीकर्त्तुं युक्तः। ननु तत्र प्रकृतकर्मप्रत्यभिज्ञानाभावादगत्या विशिष्टविधिरङ्गीकृतः इह प्रकृते दर्शः कर्मणि प्रत्यभिज्ञायमाने नैमित्तिकदेवतान्तरमात्रविधानेन लाघवे सम्भवति विशिष्टविधिगौरवमङ्गीकर्त्तुं युक्तमिति चेन्न। आर्त्तिवाक्यन्यायेन प्रकृतकर्मप्रत्यभिज्ञानमनादृत्याप्यवाक्यभेदाय विशिष्टकर्मान्तरविधेरेवाङ्गीकर्त्तुमुचितत्वात्। तथा हि दर्शप्रकरणएव श्रूयते "यस्योभयं हविरार्त्तिमा-

क्षैन्द्रं पञ्चशरावमोदनं निर्वपेदि"तिवाक्ये आर्त्तदोह प्रतिनिधित्वेन पञ्चशरावद्रव्यमात्रं कर्मणः साधनं विधीयते न द्रव्यदेवताविशिष्टकर्मान्तरं गौरवादिति षष्ठे पञ्चशरावस्तु द्रव्यश्रुतेः प्रतिनिधिः स्यादिति सूत्रेण पूर्वपक्षं कृत्वा सिद्धान्तितं प्राप्ते कर्मणि पञ्चशरावद्रव्यमिन्द्रो देवतेति द्वयं विधातुं न शक्यते वाक्यभेदप्रसङ्गात्। न चसान्नाय्यप्रतिनिधौ पञ्चशरावे सान्नाय्यदेवताया इन्द्रस्य स्थानापत्त्याप्राप्तिसम्भवादिन्द्रशब्दो ऽनुवाद इति वाच्यम्। सान्नाय्ये माहेन्द्रस्यापि कदा चित्सम्भवेनेन्द्रस्य नित्यप्राप्त्यभावात् तस्मान्नित्यतयेन्द्रस्यापि विधेयत्वाद्वाक्यभेदः स्यादित्यवाक्यभेदाय द्रव्यदेवताविशिष्टदोहार्त्तिनिमित्तकर्मान्तरविधिरेवाङ्गीकर्त्तव्य इति एवं च द्रव्यार्त्तौ प्रकृतस्य सान्नाय्ययागस्य द्रव्यापेक्षायां स्फुटायामपि यदि सत्राय दीक्षितानां साम्युत्तिष्ठासेत्सोममपभज्य विश्वजिता यजेतेतिवाक्ये संकल्पमध्ये सत्रान्यतरस्योत्तिष्ठासोः सोमक्रयात्पूर्वं पश्चाच्चाविशेषेण प्रायश्चित्तविधायकमिति साम्युत्थाने विश्वजित्क्रीते विभागसंयोगादित्यधिकरणे निर्णीते सोमविभागवचनस्य सोमक्रयानन्तरकालोत्तिष्ठासुयजमानकर्तृकस्वकीयसोमांशविभागानुवादकत्ववदैन्द्रशब्दस्यैन्द्रयाजियजमानोद्देश्यदेवतानुवादकत्वमिति पक्षप्राप्तानुवादत्वाभ्युपगमेन कथं चिद्वाक्यभेदस्य परिहर्त्तुं शक्यत्वे ऽप्यैन्द्रपदस्य विधेयसमर्पकत्वे सम्भवति निरर्थकपाक्षिकानुवादत्वं न कल्पनीयमिति न्यायमात्रमवलम्ब्यावाक्यभेदाय कर्मान्तरविधावङ्गीकृते किमु वक्तव्यमभ्युदयेष्टिवाक्ये कर्मान्तरवि-

धिरङ्गीकर्त्तव्य इति, न हि तत्रेन्द्रसंबन्धस्येवात्र यत्कि-ञ्चिद्द्रव्यदेवतासंबन्धस्य पक्षे प्राप्तिरस्ति । येन दधिवा-क्यभेदः कथं चिदपि परिह्रीयेत न वा तत्र द्रव्यमा-त्रविधिपक्षोत्थापकप्रकृतकर्मगतद्रव्याकाङ्क्षानिमित्तद्रव्या पचारानुकीर्त्तनवदिह देवतामात्रविधिपक्षोत्थापकदेव-ताकाङ्क्षानिमित्तदेवतापचारानुकीर्त्तनमस्ति । न च त्रे-धा तण्डुलानितिवाक्यस्य देवतापनयविधिपरत्वं स्पष्टं येन तद्विधिबलादपनीतपूर्वदेवतानां हविषां देवताका-ङ्क्षास्तीति समर्थ्येत, किं तु तण्डुलशब्दस्य दार्शिकहविः सामान्यलक्षकत्वकल्पनया तद्विभागप्रतियोगिनीनां श-ब्दानुपात्तानां देवतानां कथं चिद्बुद्धिस्थीरीकरणेन चा-तिक्लिष्टं कल्पनीयम् । न चैवं कल्पनायां किं चित्कल्पक-मस्ति मध्यमादिवाक्येषु प्रकृतहविषां देवतान्तरविधिरेव तदाकाङ्क्षार्थं पूर्वदेवतापनयमपेक्षमाणस्त्रेधा वाक्यस्यापि तद्विधायकत्वकल्पकमिति चेत् । न वाक्यभेदप्रसङ्गेन तेषां प्रकृतहविःसंबन्धिदेवतान्तरविधिपरत्वासिद्धेः । देवतापनयविधिबलादेव तेषां देवतान्तराकाङ्क्षया सोढ्वापि वाक्यभेदं मध्यमादिवाक्येषु देवतान्तरविधिर-भ्युपगम्यत इत्युच्यते चेत्परस्पराश्रयो नातिवर्त्तितुं श-क्यते । ननु मध्यमादिवाक्यानां प्रकृतकर्मसंबन्धिगुणमा-त्रविधायकत्वे सम्भवति प्रकृतहानमप्रकृतकल्पनं वि-शिष्टविधिगौरवमपूर्वकर्मान्तरकल्पनागौरवं चावश्यं प-रिहरणीयम् । सम्भवति चात्र प्रकृतहविःसंबन्धिदेवता-मात्रविधानं यदि तदा दधिघृतवाक्ययोः प्रतिद्रव्यं एको दोषः, न ह्येकस्माद्दोषाद्विभ्यता बहवो दोषाः स्वीक-

रणीयाः। यदि वाक्यभेदो ऽवश्यं परिहरणीयस्तदा मध्यमादिवाक्यानां द्रव्यदेवताविशिष्टैकप्रयोगविधायकत्वमस्तु तत्र चानेकगुणविशिष्टैककर्मविधाविव वाक्यभेदो न प्रसरति। प्रकृतहानमप्रकृतकल्पनमपूर्वकर्मान्तरकल्पनं च न भवति प्रकृतस्यैव दर्शकर्मणो द्रव्यदेवताविकारविशिष्टप्रयोगविधानादिति चेत्तर्ह्यौक्षिवाक्ये ऽप्येवमेव कर्मान्तरविधिर्न स्यात्। वस्तुतस्तु तत्रैवार्जवेन द्रव्यमात्रविधिर्द्रव्यदेवताविशिष्टैकप्रयोगविधिरिति वा कल्पनेन प्रकृतहानादयः परिहर्तुं शक्यन्ते तत्र द्रव्यमात्रविधिपक्षे ऽप्यैन्द्रपदस्य पक्षप्राप्तानुवादकत्वेन वाक्यभेदपरिहारसम्भवात्। इह देवतामात्रविधिपक्षे तत्परिहारासम्भवात्। तत्रैकस्यैव लिङः श्रवणेन विशिष्टैकप्रयोगविधिपक्षस्योपपन्नतरत्वात्। इह मध्यमादिवाक्यत्रये लिङ्त्रयश्रवणेन तावद्विकारविशिष्टैकप्रयोगविधायकत्वसम्भवात्, अत्र तु विधायकानां लिङामनेकत्वाद्विकाराणाञ्चानेकवाक्यगतत्वेन तावद्विकारविशिष्टैकप्रयोगविधायकत्वकल्पनानवकाशात्। न च मध्यमादिवाक्येष्वेकैकवाक्योदितविकारविशिष्टं प्रयोगत्रयं विधीयतइति युक्तम्। न वा सिद्धान्ताभिमतमेकस्मिन्नेव प्रक्रान्ते दर्शप्रयोगे अकालोपक्रमनिमित्तदेवताविकारमात्राभ्युपगमात्। परमार्थतस्तु उभयत्रापि प्रयोगविधिपक्षस्तुच्छः प्रक्रान्तस्य दर्शप्रयोगस्य यावज्जीववाक्येन कामवाक्येन वा विहितस्य विध्यन्तरानपेक्षितत्वात्। प्रयोगान्तरविधेश्चानभिमतत्वात्। अभ्युदयेष्ट्यधिकरणे प्रक्रान्तएव प्रयोगे देवताविकारोपपादनात्। दधिशृत-

विशिष्टप्रयोगस्यासन्नयतानुष्ठातुमशक्यत्वेन सान्नाय्यसंयोगात्सन्नयतः स्यादित्यधिकरणे ऽसन्नयतो ऽप्यभ्युदयेष्टिं व्यवस्थापितवता सिद्धान्तिना मध्यमादिवाक्येषु तत्तद्देवतान्वितदधिशृतविशिष्टप्रयोगविधेरङ्गीकर्त्तुमशक्यत्वाच्च । दधिशृतयोर्दैवतान्तरविधानार्थमनुवाद्यत्वे हि पक्षप्राप्तयोर्यथाप्राप्तिपाक्षिकानुवाद इत्यसन्नयतो ऽपि सा स्यात् न तु विधेयत्वे न, नच वाच्यं विधेयतत्तद्देवतान्विताभ्यां यथाप्राप्त्यनुवादाभ्यां दधिशृताभ्यां विशिष्टः प्रयोगो विधेयः स्यादिति । विधिविषयविशिष्टान्तर्गतस्य विधेयसंदष्टस्य दध्नः शृतस्य सोमारौद्रं चरुं निर्वपेच्छुक्लानां व्रीहीणामित्यत्र व्रीहिविशेषणस्येवानुवाद्यत्वायोगात् । तस्मान्मध्यमादिवाक्येषु प्रक्रान्ते दर्शकर्मणि गुणविधिर्द्रष्टव्यः । ननु तर्हि गुणविधिरेवास्तु यस्य हविर्निरुप्तमित्याद्यधिकारिविशेषणादकालोपक्रान्तप्रकृतकर्मप्रत्यभिज्ञाने जाग्रति तत्र गुणमात्रविधानमतिलङ्घ्य गुणविशिष्टकर्मान्तरविधिकल्पनायोगात् । ज्ञाते चैवं प्रत्यभिज्ञाबलाद्गुणविधितात्पर्ये तदनुरोधेनापतन्नानेकद्रव्योद्देशेन देवतागुणविधानप्रयुक्तो वाक्यभेदो न दोष इति चेदेवं तर्ह्यार्त्तिवाक्येष्वेवमेव गुणमात्रविधिः स्यात् तत्रापि यस्योभयं हविरित्यधिकारिविशेषणात: सान्नाय्यहविष्कप्रकृतकर्मप्रत्यभिज्ञानात् । यत्तु हविर्नाशे कर्मण एव नाशात्तत्र प्रकृतकर्मप्रत्यभिज्ञा नास्तीति । तत्तुच्छम् । उपात्तहविर्नाशे हविरन्तरोत्पादनेन कर्मानुष्ठानस्य शेषादवदाननाशे स्यात्तदर्थत्वादित्यधिकरणे व्यवस्थापितत्वेन यस्य सर्वाणि हवींषि नश्येयुर्दुष्येयुर्-

प्रहरेयुर्वा आग्नेयेन ता देवताः परिसंख्याय यजेतेतिश्रवणेन च कर्मलोपाप्रसक्तेरकालकृतमकृतमिति प्रसिद्धेश्चाव्यकालोपक्रान्तकर्माभावेन प्रत्यभिज्ञानाभावस्य वक्तुं शक्यत्वात्। तस्मादार्त्तिवाक्यइव मध्यमादिवाक्येष्वपि कर्मान्तरविधिरेव वक्तव्य इति नास्ति तव दार्शिकहविषां पूर्वदेवतापनयस्योपयोगः कर्मान्तरविधौ तण्डुलादीनामुपादेयत्वेन प्रकृतग्रहणे कारणाभावात्। ये मध्यमा इति यच्छब्दस्य सतोऽपि द्रव्यदेवताविशिष्टकर्मविधौ तण्डुलानामुद्देश्यत्वापादनासमर्थतया पशुकामेष्टिगतमध्यमादिवाक्यश्रुतयच्छब्दस्येवाविवक्षितार्थताया एव प्राप्तेः। अत एवातञ्चनाभ्यासलिङ्गसमर्थने कर्मान्तरविधिपक्षे प्रकृतद्रव्यग्रहणाभावोऽभ्युदयेष्ट्यधिकरणएव वर्णितः। एवं हि तत्। यदि बिभियादभिमोदेष्यतीति महारात्रे हवींषि निर्वपेत् फलीकृतैस्तण्डुलैरुपासीतार्धं दधि हविरातञ्चनार्थं निदध्यादर्द्धं न यदाभ्युदियात्सनातञ्च प्रचरेदादिनान्येद्युस्तेन ब्राह्मणं भोजयेदिति। अस्यार्थः यः प्रवृत्तदर्शतन्त्रो यजमानः किमद्य चतुर्दश्यामेवामावास्याभ्रान्त्या दर्शः प्रारब्धः किं चन्द्रमा अभ्युदेष्यतीति शङ्कया भयः प्राप्नुयात्सन्मन्त्यामेव रात्रौ व्रीहीन्निरूप्यावहत्य फलीकृत्योदीक्षमाण आसीत सायन्दोहसंपादितं च दधि द्विधा विभज्य तदर्धं मुख्यकाले करिष्यमाणस्य दर्शस्यार्थे तत्पूर्वदिनसायंदोहं सम्पाद्य दध्यातञ्चनाय निदध्यात् अर्धान्तरं तदर्थं न निदध्यात्। एवं कृते यद्यभ्युदयः स्यात्तदा मुख्यकाले दर्शप्रारम्भानन्तरमातञ्चनार्थं

निहितेनार्थेन दध्ना सायंदुग्धे पयस्यातञ्चनं कृत्वा दध्यन्तरपाद्याग्येदुर्दधियागं निर्वर्त्तयेत् । यदि नाभ्युदयस्तदानीमातञ्चनार्थं विहितादर्थादन्येनार्थेन तदर्थनिर्वृत्तेस्तदर्थं दध्युत्पादनानपेक्षणेनातञ्चनार्थं निहितमर्थं ब्राह्मणभोजनेन प्रतिपादयेदिति । तदेतदातञ्चनाभ्यासदर्शनं सिद्धान्तलिङ्गत्वेन वर्णितम् । यदि कर्मान्तरमभ्युदयेष्टिः स्यात्तदा पशुकामेष्टाविव दधिशृतयोरधिकरणत्वेन प्रणीताकार्यविधानादुपादेयत्वेन च प्रकृतग्रहणे प्रमाणाभावात् लौकिकएव दध्नि पयसि च अपणं कृत्वा सायन्दोहेनाकालकृतेनापि प्रायश्चित्तनिर्हृतकालापराधदोषेण मुख्यकाले दर्शः कर्त्तव्यो न दध्यन्तरमुत्पादनीयम् । यदि त्वकाले प्रक्रान्तमेव दर्शकर्म देवताविकारयुक्तं सदभ्युदयेष्टिः स्यात्तदा तदर्थं कृतेन दध्ना तस्यैवानुष्ठितत्वान्मुख्यकालकर्त्तव्यदर्शार्थमवश्यं दध्यन्तरमुत्पाद्यमिति अर्थवदातञ्चनम् । तत्रामुख्यकालकृतसायन्दोहार्थेनैवातञ्चनं कार्यमित्येतावान्विशेषो विधीयतइति । नन्वेवं सति शान्तिकर्मणि वेतालोदयः कर्मान्तरविधिपक्षे प्रकृतग्रहणप्रमाणाभावप्रदर्शनार्थमातञ्चनाभ्यासलिङ्गमुपवर्णयता त्वयैव कर्मान्तरविधौ लिङ्गानुपपत्तिरुद्घाटिता । अतः कर्मान्तरविध्युपगमो न युक्त इति चेत् । उच्यते । आतञ्चनाभ्यासलिङ्गं समर्थयमानेन सिद्धान्तिना कर्मान्तरविधिपक्षे प्रकृतग्रहणाभावः समर्थित इत्येतावदस्माभिरिहोपन्यस्त नत्वातञ्चनाभ्यासस्य सिद्धान्तलिङ्गत्वमनुमोदितम् । अकालकृतदध्नः कर्मानर्हतयाप्यातञ्चनाभ्यासोपपत्तेः । प्रायश्चि-

स्तेनाकालकृताग्निप्रणयनदेवतापरिग्रहादिप्रामापचार-
निर्हरणवदकालकृतदभः कर्माङ्गत्वमपि तेन कृतमित्यत्र
प्रमाणाभावात् । न हि स्तेयप्रायश्चित्तेन स्तेयदोषनिर्ह-
रणवत्स्तेयलब्धद्रव्यस्य कर्मार्हत्वमपि क्रियते । एवं क-
र्मान्तरविधिपक्षे प्रकृतद्रव्यग्रहणं नास्तीति सिद्धान्त्यभि-
मानमनुसृत्य देवतापनयविधेरनुपयोग उक्तः । वस्तुत-
स्तस्मिन्नपि पक्षे प्रकृतद्रव्यग्रहणनियमोऽस्त्येव यतस्तल्लि-
ङ्गमेव यदि बिभियादित्यादिवाक्ये मध्यमादिवाक्ये च
जागर्त्ति । तथा हि फलीकृतैस्तण्डुलैरुपासीतेति फली-
करणपर्यन्तमेव कृत्वा तण्डुलभावविनाशकं पेषणमकृ-
त्वाभ्युदयसदसद्भावनिर्णयपर्यन्तं प्रतीक्षणविधानादिदं
ज्ञायते मध्यमादितण्डुलविभागापेक्षायामभ्युदयेष्टामे-
तएव तण्डुला इति अन्यथा पेषणात्प्रागेव प्रयोगमव-
स्थाप्य प्रतीक्षणमदृष्टार्थं स्यात् । तथा आतञ्चनार्थस्य
दध्यर्धस्याभ्युदयाभावपक्षइव तदन्यस्य दध्यर्द्धस्याभ्यु
दयपक्षे प्रतिपत्त्यभिधानादिदं ज्ञायते अभ्युदयेष्टां त-
देवान्यदर्धं दधीति । अन्यथाभ्युदयाभावपक्षे दध्यन्त-
रोत्पादनस्यानपेक्षितत्वादातञ्चनार्थं दध्यर्धस्य प्रतिपत्त्य-
पेक्षावदभ्युदयपक्षे तदितरार्द्धस्य लौकिकदधिसाध्या-
यामभ्युदयेष्टां दध्यन्तरोत्पादननिर्वर्त्यमुख्यकालदर्शे
चानुपयोगात्प्रतिपत्त्यपेक्षास्तीति तत्प्रतिपत्तिरप्युपवर्ण्ये-
त । तथा "विष्णवे शिपिविष्टाय शृते चरुमि"ति शृतप-
दप्रयोगात् ज्ञायते ऽभ्युदयेष्ट्यां वैदिकप्रसिद्धया रूढ्या
शृतशब्दवाच्यः प्रातर्दोह एव पयो न तु लौकिकं पय
इति । अन्यथा आदित्यः प्रायणीयः पयसि चरुरित्यत्रेव

पयःशब्द एव प्रयुज्येत। ननु पशुकामेष्टौ लौकिकपयःसाधारण्यामपि शृतपदं श्रूयते। सत्यं तत्र शृतशब्दः श्रपणवतो लौकिकपयसो लक्षणार्थं इति सूत्रकृतैवोक्तं पशुकामेष्ट्यधिकरणे लक्षणार्था शृतश्रुतिरिति। न चेह लक्षणायां प्रमाणमस्ति। प्रकृतस्य शृतशब्दमुख्यार्थस्य सम्भवात्। ननु कर्मान्तरार्थद्रव्याणां कर्मान्तरार्थत्वमयुक्तमिति चेत्। किमेकस्मिन्नपि वा कर्मणि देवतान्तरार्थद्रव्याणां देवतान्तरार्थत्वं युक्तम्। वचनबलाद्युक्तमिति तूभयत्रापि तुल्यम्। एवं च कर्मान्तरपक्षे ऽप्यातञ्चनाभ्यासमुपपन्नः प्रकृतस्य दध्नः कर्मान्तरे विनियुक्तत्वेन मुख्यकालकर्त्तव्यदर्शे दध्यन्तरापेक्षासत्त्वात्। एवं तर्हि देवतापनयविधेरनुपयोगः प्रत्युद्धृतः स्यात् दार्शिकद्रव्याणां कर्मान्तरे ऽभ्युदयेष्टौ विनियोगार्थं दार्शिकदेवतापनयविधेरपेक्षितत्वात्। अर्थसिद्धविधेर्नास्त्युपयोग इति चेत्। एवं पूर्वश्लोकप्रदर्शितार्थसिद्धत्वहेतुनैवात्राप्यनुपयोगवर्णनायामत्र श्लोके समर्थितस्य कर्मान्तरत्वस्याहेतुतया तद्वैयर्थ्यप्रसङ्ग इति चेत्। उच्यते। पूर्वश्लोके तण्डुलादिष्विवोपांशुयाजाद्ये देवतापनयस्यार्थसिद्धत्वाभावात् तत्र तद्विधेरर्थवत्त्वमित्याशङ्काऽमावास्यायामुपांशुयाजाभावसमर्थनेन निराकृता। अत्र तु तस्यामभ्युपगम्याप्युपांशुयाजमभ्युदयेष्टेस्ततः कर्मान्तरत्वसमर्थनेन सा निराक्रियते कर्मान्तरत्वे हि तत्रोपांशुयाजाभावेन तद्विषयतया देवतापनयविधेरर्थवत्ता न भवतीति भावः। एवं तर्ह्यभ्युदयेष्टेः कर्मान्तरत्वे ऽपि तद्देवताभावः प्रकृतहविषा

विभजनविधिः स्यादेव उपांशुयाजाज्ये तस्यार्थवत्त्वात् कर्मान्तराभ्युदयेष्टावुपांशुयाजाभावे ऽपि प्रकृतहविरन्तर्गतोपांशुयाज्यस्याभ्युदयेष्टिदेवताभ्यो विभजनोपपत्ते रित्याशङ्कामुद्भाव्य निराकरोति।

तर्हि स्याद्देवताभ्यः प्रविभजनविधिस्तत्र तद्गामिनीभ्यो न स्यादेवं हि सर्वास्वपि दधिघृतयोर्देवतास्वन्वयः स्यात्। तस्मिन्वाक्ये विधेयं विभजनमिह चेद्वक्ष्यमाणप्रकारं न स्यादौपांशुयाजे हविषि तदिति तत्सर्वथा व्यर्थमेव ॥ ४१ ॥

यदि प्रकृतहविषामविशेषेणाभ्युदयेष्टिदेवताभ्यो विभजनमभिमतं तदा दधिशृतयोरपि सर्वदेवतान्वयः स्यात्। उत्तरच तयोर्विमिश्य सङ्कीर्णनं स्वविष्टैरणिष्ठैश्च तण्डुलैः सह श्रपणनियमार्थं स्यात्। अथ वक्ष्यमाणप्रकारेण विभजनविधिस्त्रेधा तण्डुलान्विभजेदिति वाक्ये ऽङ्गीक्रियते। तथा च दधिशृतयोर्वक्ष्यमाणदेवताविशेषव्यवस्था न भज्यत इति मतं तदौपांशुयाजाज्ये वक्ष्यमाणो देवतान्वयप्रकारो नास्तीति विभजनवाक्यं तद्विषयत्वेनार्थवन्न भवेत्। तण्डुलदधिशृतेषु तु तदान्यैरेव तथा वि-

भजनं सिद्धमिति सर्वथा व्यर्थमेव नेधा तण्डुलानिति वाक्यम् । अतस्तण्डुलशब्दलक्षणाक्लेशे ऽपि तद्वैयर्थ्यानपायात्तस्य तथाश्रुतानुवादकत्वमेव युक्तमिति तत्र विध्यभावात्तद्विध्यव्याप्तिवर्णनमप्यसमञ्जसमिति भावः । एवमाक्षिप्तेष्वपूर्वविध्यादीनां लक्षणेषूदाहरणेषु च लक्षणानि व्यवस्थापयितुं नियमपरिसंख्यालक्षणसंग्राह्यसन्देहपदानि निर्द्धारयन्नेव लक्षणव्यवस्थापनं प्रतिजानीते ।

एवं प्राप्ते भणामस्त्रिविधविधिजुषां लक्षणानां विभागम् दृष्टार्थो यः स सर्वो भवति नियम इत्यभ्युपेत्य व्यवस्थाम् । अर्थाद्वा शब्दतो वा स्वविषयगलितादेवकारान्नृचो वा यः स्यात्कस्यापि बाधः स भवति परिसंख्येति रीतिं च कृत्वा ॥ ४२ ॥

प्रागग्रताग्न्यादिविधीनां दृष्टार्थानामप्राप्तविषयत्वादपूर्वविधित्वमङ्गीकृत्य तेषु लक्षणाव्याप्तिरुक्ता । पूतीकाधारमन्त्रनियमविध्यतिव्याप्त्युद्भावनेन तत्समानन्यायतया सर्वेषामपि दृष्टार्थविधीनां नियमविधीनां नियमविधित्वमपि सूचितम् । तथा निषेधरूपत्रिविधिषु अपूर्वविधि-

लक्षणाव्याख्युद्भावनेन दीक्षितो न जुहोतीत्यादीनामपूर्वविधित्वं सूचितम्। तथा निषेधमात्रस्य परिसंख्यात्वाभ्युपगमो ऽप्यसूचितेनात्र नियमपरिसंख्यालक्षणसंग्राह्यासंग्राह्यसन्देहप्राप्ताविदमुच्यते। अप्राप्तविषयः प्राप्तविषयो वा यो विधिर्दृष्टार्थः स सर्वो ऽपि नियमविधिरित्यभ्युपगच्छामः। अप्राप्तविषये ऽपि तस्मिन्नियमादृष्टाभ्युपगमावश्यं भावात्। तथा हि दृष्टार्थप्राप्तविधिविषयो द्विविधः, विधिं विना स्वतः प्रसिद्धदृष्टप्रयोजनजननसामर्थ्यो, विधिबलप्रसादनियततज्जननसामर्थ्यश्च, तत्रौदुम्बरो यूपो भवतीत्याद्यः प्रकृतौ यूपे पक्षप्राप्तो ऽप्युदुम्बरः खदिरादिनियमविधिना निवर्त्तित इति विकृतावपि चोदकात् खदिरादेरेव प्राप्त्या प्रतिप्रसवविधिविषयन्यायेन सोमापौष्णपशावप्राप्तैवोदुम्बरजातिरष्टास्रत्वादिविशिष्टयूपाकृतिजनने स्वत एव प्रसिद्धिसामर्थ्यो च। उत्तराधारशाखाच्छेदनमन्त्रोत्करपरिध्यादिर्द्वितीयः विधिबलादेव हि हिरण्यगर्भे मन्त्रस्य गौणवृत्तिकल्पनया इन्द्रप्रकाशने इषेत्वेति मन्त्रस्य छिनद्मीत्यध्याहारेण शाखाच्छेदनप्रकाशने उत्तरस्य पृथग्रताकरणेन वाजिनपात्रधारणे परिधेः स्वविभयग्रहणेन पशुनियोजने च सामर्थ्यं प्रसाधनीयम्। ततश्च तद्वैविध्यात्तद्विषयो विधिरपि द्विविधः। एवं द्विविधे ऽप्यप्राप्तफलके दृष्टार्थविधौ नियमादृष्टाभ्युपगम आवश्यकः चोदकप्राप्तखदिरादिनापि सम्भवति यूपादिस्वरूपमात्रे उदुम्बरादिनियमविधानस्यानर्थक्यात्। अत एवाहुः दृष्टार्थेष्वपि सर्वेषु नियमादृष्टमिष्यत इति। अन्यथाऽवहननादिनियमविधावपि

नियमादृष्टकल्पनं न स्यात्। नानोपायसाध्ये दृष्टप्रयोजने विशिष्टस्य कस्य चिन्नियमो ऽनर्थकस्तस्य क्रत्वपूर्वोपयोगित्वमपि तज्जन्यं द्वारं विनानुपपन्नं क्रत्वपूर्वस्य प्रधानानुष्ठानानन्तरभावित्वादित्येतदेव हि तेषु नियमादृष्टकल्पनायां बीजम्। तदिहापि तुल्यम्। नियमादृष्टाभ्युपगमे च नियमविधित्वमेव प्राप्नोति। अत एव पूतीकाविधेः पक्षप्राप्तविषयस्याभावे ऽपि नियमविधित्वम्। सर्वे द्रव्यविधयो नियमविधय इत्याकारेण सकलमीमांसकप्रवादश्च। अपि च नावमिके पत्नीसंयाजाधिकरणे पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्त इत्यस्य भाष्यादिषु यन्नियमविधित्वमुक्तं तदप्यप्राप्तस्यैव पत्नीसंयाजान्तत्वस्य दृष्टार्थतामात्रेण न तु तस्य पाक्षिकप्राप्त्या तदसम्भवात्। तथा हि। यद्यपि द्वादशानामह्नां सहप्रयोगवचनात्पूर्वंपूर्वमहः कस्मिंश्चित्पदार्थेऽवस्थाप्य परम्परमुपक्रमितव्यम्। तथापि पत्नीसंयाजेष्ववस्थापनं पक्षे ऽपि न प्राप्नोति उपांश्वादिहारियोजनपर्यन्तः सोमयागो ह्यहःशब्देनोच्यते। यथोक्तं तन्त्ररत्ने ज्योतिष्टोमे ऽहःशब्देन उपांश्वादिहारियोजनपर्यन्तः सोमयागः परिच्छिन्न इहापि द्वादशाहे एवं द्रष्टव्यमिति। तथा च सहत्वसिध्यर्थं हारियोजनानन्तरमेवावस्थानं प्राप्नोति यदि तु वसतीवरीपर्यन्तानि पूर्वाणि तन्त्रमध्यकालत्वादवभृथादीन्युत्तराणि तस्य दीक्षात्रिसर्गार्थोदिति सूत्रोक्तरीत्या द्वादशाहे वसतीवरीपर्यन्तानां पूर्वेषामवभृथादीनामुत्तरेषाञ्चाङ्गानां तन्त्रत्वे ऽपि भेदस्तु तद्भेदात्कर्मभेदः प्रयोगः स्यात्तेषां प्रधानशब्दादितिसूत्रोक्तन्यायेन प्रधानैरपृथ-

कालान्यङ्गानि तत्तत्प्रधानकाले भेदेनानुष्ठेयानीति तत्तत्तुल्याकालीनानामैष्टिकपाशुककर्मणां साङ्गानां तत्र तत्राहनि भेदेनानुष्ठानं प्राप्नुयात्। तथा कार्त्स्न्येन पाशुकैष्टिकप्रयोगसमाप्त्यनन्तरमेवावस्थानं प्राप्नोति सर्वथापि पत्नीसंयाजानन्तरमवस्थानस्य न पाक्षिकी प्राप्तिरस्ति। तथा च पत्नीसंयाजान्तो ऽग्नीषोमीयः सन्तिष्ठत इतिवदप्राप्तविधिरेवायम्। तथापि सहत्वनिर्वाहकतयादृष्टार्थतासत्त्वात्तावन्मात्रेण नियमविधित्वं भाष्यादिषूक्तमिति समर्थनीयम्। अनियमप्राप्ते पत्नीसंयाजान्ते संस्थातव्यमिति नियम्यत इति भाष्यं च हारियोजनान्तत्वादेरेव प्राप्त्या पत्नीसंयाजान्तनियमस्याभावे प्राप्तइत्येवं योजनीयम्। यस्मिन्कस्मिंश्चिदनियमेनावस्थाने प्राप्ते पत्नीसंयाजान्तता नियम्यत इति तन्त्ररत्नमपि हारियोजनप्रचारे पश्वादिसमापनकर्मणि वा यस्मिन्कस्मिंश्चित्पत्नीसंयाजान्तनियमं विना ऽवस्थाने प्राप्तइति योजनीयम्। न तु यथाश्रुतं ग्राह्यं पत्नीसंयाजान्तताया अनियमतः प्राप्त्यसम्भवस्योक्तत्वात्। परिसंख्यालक्षणाक्षेपे तु यथाश्रुतभाष्याद्यनुरोधादनियमो ऽस्माभिरुपन्यस्तः तस्मादृष्टार्थः सर्वो विधिर्नियमविधिरिति युक्तमेव। न चैवं पुत्रेष्टिकारीर्यादिविधेर्नियमविधित्वप्रसङ्गः। अदृष्टाद्वारकत्वस्यापि विवक्षितत्वात्। तथोर्थाद्वा स्वविषयप्रच्युतात्लक्षणोकशब्दाद्वा एवकाराद्वा नञ्पदाद्वा लब्धो यस्य कस्यापि भावस्याभावस्य वा यो बाधः स सर्वो ऽपि परिसंख्येति मर्यादां कुर्महे। तत्रातिहायेडोबर्हिः प्रतिसमानयति जुह्वा-

ख्यौपभृतमित्यर्थादुपरितनप्रयाजद्वये जौहवाज्यस्य प्राचीनप्रयाजत्रये औपभृताज्यस्य च बाधः हे आहवनीय इत्यत्र यदाहवनीये जुहोतीति सामान्यशास्त्रप्राप्तविधिस्वरूपविषयप्रच्युतादप्राप्तनिषेधरूपार्थान्तरलक्षणा तस्मादेव शब्दादग्निहोत्राहुत्यन्तराश्रयासिद्ध्याहवनीयबाधः। अत्र ह्येवावपन्तीत्यत्रैवकारेण पवमानातिरिक्तस्तोत्रेष्वावापबाधः। न तौ पशौ करोतीत्यत्र नञ्पदेन पशावाज्यभागबाधः। स्यादेतन्न नञ्पदलभ्यः सर्वो ऽपि निषेधः परिसंख्येत्यङ्गीकर्त्तुं युक्तं विधाविव निषेधे ऽपि अपूर्वविध्यादिरूपेण त्रैविध्यसम्भवात्। शक्यते हि दीक्षितो न जुहोतीत्यादिरपूर्वविधिः। न हि स्यादित्यादिर्नियमविधिः नानुयाजानित्यादिः परिसंख्येति वक्तुमिति चेत्। नैवम्। परिसंख्याशब्दार्थवर्जनबुद्धिजनकस्य नञो ऽपि परिसंख्यात्वस्याप्रत्याख्येयतया तद्योगेन जुहोति न हिंस्यादित्यादेरपि परिसंख्यात्वस्यानिवार्यत्वात्। तत्र चान्यत्र च प्राप्त इति लक्षणानुसारेणापि तस्य परिसंख्यात्वप्राप्तिः। तद्व्यावर्त्तनाय तत्र विशेषणान्तरविवक्षायाश्च परिसंख्यालक्षणाक्षेपे दूषितत्वात्। अत्र ह्येवावपन्तीति परिसंख्यायां तत्र चान्यत्र च प्राप्त इति यथाश्रुतलक्षणस्याव्याप्त्यभावाच्च। तस्मादर्थो लक्ष्य एवकारप्रतिपाद्यो नञर्थभूतश्च सर्वो ऽपि निषेधः परिसंख्येति युक्तम्। उक्तं च न्यायसुधायां परिसंख्यावर्जनबुद्धिस्तदर्थो नञादिः परिसंख्याशब्दस्तद्योगाद्ब्राह्मणो न हन्तव्यो नेक्षेतोद्यन्तमादित्यमित्यादीनामेव श्रुत्या परिसंख्यात्वं निषेधपर्युदासविशेषव्यपदेशात्तु व्यवहारसिद्धेर्न परिसं-

ख्याव्यपदेशः । सत्यमेव वदितव्यमित्यादीनामेव श्रुत्या नियमत्वम् । अन्यत्र तु फलेनैव नियमपरिसंख्याव्यपदेश इति । एवं दृष्टार्थः सर्वो ऽपि विधिर्नियमविधिरिति सर्वो ऽपि निषेधः परिसंख्येति चाङ्गीकृत्यापूर्वविध्यादीनां लक्षणानि विभज्य दर्शयिष्यन्त इत्यर्थः । तान्येवाह ।

नित्यौदास्यान्यकिंचिद्विगलि-
तनियतं यस्य तत्प्राप्तिमात्रम्
तत्कालं यस्य बोधःसमुदयति
निवृत्त्यात्मनावश्यमेव ॥ प्राप्तिं
भिन्नस्य ताभ्यां कथमपि विद-
धत्स्यादपूर्वो विधिर्नः कुर्वन्प्रा-
प्तिं तयोः स्यात्सनियमपरिसं-
ख्याभिधानः क्रमेण ॥ ४२ ॥

नित्यं यदौदासीन्यं विपक्षप्राप्तिसाध्यरहिततया नित्यप्राप्तं यदौदासीन्यं तदन्यस्य कस्य चिद्विगलितेन निवृत्त्या नियतं यत्प्राप्तित्वावच्छिन्नं तन्नियमविधिषु नियम्यं कामे तदेकमपूर्वविधिलक्षणे व्यावर्त्यं तथा यस्य तद्विधिकाले निवृत्त्यात्मतया धीर्नियता सा तस्मिन् विधौ परिसंख्या नाम तदपरंतत्र व्यावर्त्यं ताभ्यामुभाभ्यां भिन्नस्य कथमपि प्राप्तिं विदधद्विधिर्नो ऽस्माकं

अपूर्वो विधिः स्यात् । तयोरुभयोर्नियम्यनिवृत्त्योः प्राप्तिं कुर्वन् विधिः क्रमेण नियमपरिसंख्याविधिः स्यात् नियम्यप्राप्तिं कुर्वन्नियमविधिः निवृत्तिप्राप्तिं कुर्वन् परिसंख्याविधिश्च स्यादित्यर्थः। तदेतल्लक्षणत्रयं विविच्य दर्शयामः। नियम्यपरिसंख्यान्यप्राप्तिकारी विधिरपूर्वविधिः। तत्प्राप्तिकारित्वं च यथा कथंचिद्विवक्षितं न तु कश्चित्तत्र विशेषो विवक्षितः। तेन विधिविषयस्यान्यस्य वा प्राप्तापोदितस्यात्यन्ताप्राप्तस्य वा यस्य कस्य चित् स्वरूपेण किं चिद्विशेषणान्तरावच्छिन्नत्वेन येन केन चिद्रूपेण प्रकृतविध्युद्देश्ये ऽन्यत्र वा यत्र कुत्र चित् प्रकृतविध्युद्देश्ये ऽपि सर्वत्र क्व चिदपि वा कियत्यां प्राप्तौ सत्यामसत्यां वा यथा कथं चित्प्राप्तिं कुर्वन्नित्ययमर्थो लभ्यते। तेन पूर्वोद्भावितसर्वाव्याप्तिनिरासः। तथा हि। अग्न्यतिग्राह्यविधिषु तावन्नाव्याप्तिः। तेषां विधिविषयप्राप्तिकारित्वाभावे ऽपि तदाश्रितगुणकामप्राप्तिकारित्वात्। अग्नताविधयस्तु पूतीकादिविधिवन्नियमविधयो वक्तव्या इति न तेष्वव्याप्तिशङ्का भवति। किं तूद्देश्यप्राप्तिकारिणि तावन्नतामग्नीषोमावाज्यस्यैव तावुपांशु पौर्णमास्यां यजन्निति विध्यन्तर एव इयमपि शङ्का लभते। उद्देश्ये ऽन्यत्र वेति विशेषानुपादानात्। स्वर्गायाग्निहोत्रविधिषु नानाशाखाम्नातविधिषु च नाव्याप्तिः, तेषां स्वरूपेण प्राप्तिकारित्वाभावे ऽप्यभ्युदयशिरस्कत्वेन प्राप्तिकारित्वात्। ननु स्वरूपेण यत्प्रापणीयं तदेव प्रापणीयं भवति न तु प्राप्तमप्राप्तविशेषणविशिष्टतामात्रेण स्वयं प्रापणीयतां लभते विवक्षितविवेकि-

न विशेषणमात्रे प्रापणीयत्वपर्यवसानादिति चेन्न । इ-न्द्रैरुपतिष्ठत इत्यत्रोपतिष्ठतिधातुवाच्ये समीपावस्थाने मन्त्रकरणकत्ववाचिन उपान्मन्त्रकरण इतिसूत्रविहित-स्यात्मनेपदस्य निर्वाहार्थं स्वरूपेण मन्त्राकार्यस्याप्यग्निस-मीपावस्थानस्य अग्न्यभिधानशिरस्कत्वविशिष्टत्वेन वि-शिष्टरूपेण मन्त्रकार्यत्वमुपपद्यत इति नवमे समर्थितत्वेन तद्वत् फलभावनायाः यागकार्यत्ववत् स्वरूपेणाप्राप-णीयस्यापि अप्राप्तविशेषणविशिष्टतया प्रापणीयत्वोपप-त्तेः । तथापि स्वरूपेणाप्राप्तप्रापणएव विधिव्यापार इति चेत् । न । तथा नियमाभावात् आघाराग्निहो-त्राधिकरणवार्त्तिके दध्ना जुहोतीत्यादीनां प्राप्तहोमवि-षयत्वे ऽपि दध्यादिविशिष्टस्वरूपेण होमप्राप्तिकारितया विधित्वस्य स्वीकृतत्वात् । अनुपादेयफलकालादिवि-धीनां प्राप्तकर्मविषयत्वे ऽपि फलकालादिसंबन्धिस्वरू-पेण तत्प्राप्तिकारितया विधित्वस्य स्वीकृतत्वाच्च । नि-षेधरूपापूर्वविधिषु अव्याप्तिरिति तु शङ्कानवकाशैव । निषेधानां परिसंख्यारूपत्वस्य समर्थितत्वात् । प्रतिप्र-सवविधिषु च सार्वकाम्यादिविधिषु ब्रह्मसंबन्धविधिषु च नाव्याप्तिः । त्रिकालाप्राप्तस्येति विशेषस्य उद्देश्ये स-र्वत्रेति विशेषस्य क्रियत्यामपि प्राप्तावसत्यामेवेति विशे-षस्य चाविवक्षितत्वात् । एवं च सर्वस्मिन्नियमविधौ प-रिसंख्याविधौ चातिव्याप्तिरापततीत्येतावदवशिष्यते । तन्निरासाय नियम्यपरिसंख्यान्यत्वं प्रापणीयविशेषणं कृतम् । ननु किमेतया कुसृष्ट्या नियमपरिसंख्यान्यो-विधिरपूर्वविधिरित्येव लक्षणमार्जवेन क्रियतामिति चेत् ।

न । तथा सति क्वचिदंशे अपूर्वविधिरूपाणामंशन्तो नियमविधिरूपाणां परिसंख्याविधिरूपाणां च विधीनां नियमपरिसंख्याभिन्नत्वाभावेनासंग्रहप्रसङ्गात् । सन्ति हि तथाभूता विधयः प्रागुदाहृताः ते चानुपदमेव विवेचयिष्यन्ते । ननूक्तलक्षणमनुपपन्नं प्राकृतपृष्ठविध्योरव्याप्तेः ताभ्यां विधिभ्यां प्रापणीययोर्बृहद्रथन्तरसाधनकपृष्ठाख्यस्तोत्रयोर्विकृतिविशेषे उपहव्यादिषु विध्यन्तरैर्नियम्यत्वात् । न च प्रकृतविध्यनियम्यत्वं विवक्षितं प्रकृतपृष्ठविधिनियम्याप्रसिद्धा तदन्यत्वोक्त्यसम्भवेन तथा युक्ताव्याप्तितादवस्थ्यादिति चेन्न । किं चिद्विषयकप्राप्तित्वावच्छिन्नं नित्यप्राप्तौदासीन्यभिन्नकिञ्चिन्निवृत्तिनियतं यस्य भवति तत्र तन्नियम्यमिति विवक्षितत्वात् । अस्ति च प्रकृतौ ज्योतिष्टोमे बृहत्प्राप्तित्वावच्छिन्नस्य रथन्तरप्राप्तित्वावच्छिन्नस्य चौदासीन्यभिन्नविदलननिवृत्त्या नियतेभ्यो ऽवहननप्राप्त्यादिभ्यो ऽन्यत्वम् । ननु च बृहद्रथन्तरयोः प्रकृतौ विकल्पितत्वात्तयोः प्राप्तिरन्योन्यनिवृत्तिनियतैव । अत एव द्वितीये रथन्तराधिकरणे "यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयात्" "यदि बृहत्सामा शुक्राग्रानि" त्यत्र रथन्तरमात्रसामकस्य बृहन्मात्रसामकस्य च गायत्रादिसामरहितस्य क्रत्वन्तरस्य विधिरङ्गीकरणीयः । ज्योतिष्टोमे गायत्र्या मद्दीयवाद्यनेकसामान्तरव्यावर्त्तनाच्चमस्य रथन्तरस्य बृहतश्च विशेषणत्वायोगेन तस्य रथन्तरविशिष्टतया बृहद्विशिष्टतया च निर्देशायोगात् इति पूर्वपक्षे प्राप्ते नीलमुत्पलमित्यादौ सर्वत्र नैल्यादिविशेषणं स-

मानजातीयस्य रक्तिमादेरेव व्यावर्त्तकं न तु गन्धादेरपीति। तद्वदिहापि ज्योतिष्टोमे रथन्तरं बृहच्च पृष्ठस्तोत्रसाधनतया स्वसमानजातीयस्य बृहतो रथन्तरस्य च व्यावर्त्तकमिति तयोर्नैत्यादिवद्विशेषणत्वोपपत्तेर्ज्योतिष्टोमस्यैवाग्रताविशेषं विधातुं बृहत्सामेति रथन्तरसामेति च निमित्ततया निर्देशो न तु सामविशेषविशिष्टयोः क्रत्वन्तरयोर्विधिरिति सिद्धान्तितं दशमे। उभयसाम्नि नैमित्तिकमित्यधिकरणे च येषु संसवादिषु बृहद्रथन्तरपृष्ठसमुच्चयो विहितस्तेषु बृहद्रथन्तरयोः परस्परव्यावर्त्तकत्वाभावेन निमित्तत्वाभावान्नैमित्तिकमग्रताद्वयं उपवन्तौ रथन्तरपृष्ठस्य प्रतिपदं कुर्यादग्रवतीं बृहत्पृष्ठस्येतिविहितं नैमित्तिकं प्रतिपदन्तरं च न कर्त्तव्यमिति सिद्धान्तितमिति चेत्। उच्यते। रथन्तरं पृष्ठं भवतीत्यादिवाक्याभ्यां तयोर्ज्योतिष्टोमे प्राप्तेर्न ते परस्परव्यावर्त्तके। अपूर्वसाधनयोस्तयोः प्रयाजादिवत्समुच्चयस्यैव ततः प्राप्तेः। किं तु विधिवाक्यसिद्धं तदुभयमनूद्य साक्षादेव विकल्पं विदधता वचनान्तरेण रथन्तरपृष्ठं बृहत्पृष्ठं वा कर्तव्यं न तूभयं समुच्चितमिति सिद्धं तदुभयमनूद्य साक्षान्निर्देशा यदि बृहत्सामेत्यादयस्तैरनूद्यमान एव रथन्तरादिसंबन्धः परस्परव्यावर्त्तकः। अतस्तत्र रथन्तरप्राप्तित्वावच्छिन्नस्य बृहत्प्राप्तित्वावच्छिन्नस्य च किंचिन्निवृत्तिनियतत्वाभावान्नाव्याप्तिः। अन्यदिह वक्तव्यशेषं लक्षणत्रयसाधारणमग्रे वक्ष्यते। तस्मादुक्तमपूर्वविधिलक्षणं नित्यप्राप्तौदासीन्यभिन्नकिंचिन्निवृत्तिनियतं यस्य यद्विषयप्रा-

प्तित्वावच्छिन्नं तत्र तत्प्राप्तिकारिविधिर्नियमविधिः । अवहननस्य हि दार्शपूर्णमासिकेषु व्रीहिषु प्राप्तिराक्षेपिकी वैधी वा सा द्विधापि नित्यप्राप्तौदासीन्याद्भिन्नस्य विदलनादेर्नियतया विदलनादिनिवृत्त्या नियता । आक्षेपिकी तु पाक्षिक्येवेति अवहननादिप्राप्तित्वावच्छिन्ने विदलनादिनिवृत्तिनियममात्रमविशिष्टं यद्यप्यत्रावहननप्राप्तित्वावच्छिन्नं विदलनादिनिवृत्तिनियतं न भवति । अग्निचयने औदुम्बरमुलूखलं सर्वौषधस्य पूरयित्वोवहत्यथितउपदधातीत्युपधेयोलूखलसंस्कारत्वेन विहितस्यावहननस्य वैतुष्यार्थत्वाभावाद्विदलनादिप्रसक्त्यभावेन तत्रावहननप्राप्तौ सत्यामपि विदलनादिनिवृत्त्यभावादिति चेत् । सत्यम् । तथापि दार्शपौर्णमासिकव्रीहिविषयकावहननप्राप्तित्वावच्छिन्नस्य विदलनादिनिवृत्तिनियतत्वमस्तीति लक्षणानुगतिः । अत एव किंचिद्विषयकत्वं प्राप्तिविशेषणमर्थवत् । एवं च वैकृतेषु रथन्तरपृष्ठादिनियमविधिष्वपि नाव्याप्तिः, प्राकृतोत्पत्तिवाक्यतः प्राप्तौ व्यभिचारेण रथन्तरप्राप्तिमात्रस्य बृहदादिनिवृत्तिनियतत्वाभावे ऽपि उपहव्यादिविकृतिषु या चोदकात्प्राप्तिकी रथन्तरादिप्राप्तिर्या च वैशेषिकेण नियमविना वैशेषिकी तत्प्राप्तिस्तस्याः द्विविधाया अपि बृहदादिनिवृत्तिनियतत्वात् । न चैवं विकृतिषु बृहदादिनियतप्राप्तिकस्य रथन्तरादेः प्रकृतौ प्राप्तिकारी विधिरपि नियमविधिः स्यादिति वाच्यम् । न हि यस्य किंचिद्विषयप्राप्तित्वावच्छिन्नमुक्तरूपनिवृत्तिनियतं तस्य यत्र क्वचित्प्राप्तिकारित्वं नियमविधिलक्षणमुक्तम् । किं तु-

THE
CHOWKHAMBÂ SANSKṚIT SERIES;
A
COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS
NO. 229.

पूर्वमीमांसा-

अधिकरणकौमुदी ।

श्रीमन्महामहोपाध्याय पं० रामकृष्णभट्टाचार्य-
विरचिता
नेने-इत्युपाह्वगोपालशास्त्रिणा परिशिष्टाधिकरणनि-
रूपणपूर्वकं टिप्पण्या परिष्कृत्य संशोधिता ।
सा च-
बाबू हरिदासात्मजेन जयकृष्णदासगुप्तेन
स्वीये विद्याविलासनाम्नि यन्त्रालये
संमुद्य प्रकाशिता ।

PURVAMÎMÂMSÂ

ADHÎKARANAKOUMUDI

By Mahâmahopâdhyâya Pandit Ramkrishna
Bhttachârya.
Edited by Pandit Gopal Sastri Nene.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE. BENARES.
AGENTS:-
OTTO HARRASSOWITZ, LEIPZIG:
PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY:
PROBSTHAIN & CO; BOOKSELLERS, LONDON.
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press.
BENARES.
1916.

भूमिका ।

—:०:—

ईश्वरकृपया समापत् किल मुद्रणमेतस्य मीमांसाद्वादशलक्षणीसहस्राधिकरणगतधर्मशास्त्राद्युपयुक्ताधिकरणानां संग्राहकस्याधिकरणकौमुद्याख्यस्य ग्रन्थस्य ।

अयं खलु निबन्धो धर्मशास्त्रोपयोगिमीमांसाशास्त्रजिज्ञासूनां तदर्थमधिकरणमालाशास्त्रदीपिकादिबहुग्रन्थान् सप्रयत्नं पठतामपि तेषामतिविस्तृततयाऽभ्यासासौकर्यं पर्यालोच्य तेषामुपकारकरणे कृतमतिभिर्विरचितो महामहोपाध्याय पं० श्रीमद्भिद्रुद्ररामकृष्णभट्टाचार्यमहाशयैः ।

मीमांसादर्शनाभिलाषिणां धर्मशास्त्रिणां झटित्यर्थबोधकं कञ्चिद्ग्रन्थं बहुदिनेभ्यो गवेषयद्भिः काशीस्थराजकीयप्रधानपाठशालातो लब्धव्याकरणाचार्यपदवीकैः श्री १०८ युत पं० नित्यानन्दपन्तैर्गुरुचरणैः प्रेरितेन विविधसंस्कृतपुस्तकसम्पादनरसिकेन श्रीगोविन्ददासमहाशयेन मिथिलातो महता ऽऽयासेन महामहोपाध्याय पं० श्रीगङ्गानाथ झा डाक्तरमहाशयद्वारा ऽऽनायितमेकं खण्डितमपरं जगन्नाथपूरीस्थगोवर्द्धनमठाल्लब्धमशुद्धप्रायं च पुस्तकं वितरता प्रवर्तितो गुरुजनाज्ञया च मुद्रणे कृतमतिरन्यशुद्धपुस्तकसम्पादने कृतबहुलायासोऽपि हताभिलाषः त्रुटिताक्षरस्थलेषु विषमपदस्थलेषु च समपादयं शाबरभाष्यादिपर्यालोचनया टिप्पणीम् ।

अथास्य मुद्रणे प्रवृत्ते प्रमाणतयोपन्यस्तानि सूत्राणि महर्षिजैमिनिकात्यायनादिसूत्रेष्वपश्यन् तत्रतत्राध्यायाङ्कमददानः 'तानि तात्पर्यार्थकानि' इति सूचयन् कांश्च पाठभेदं दर्शयन् एतत्पर्यालोचिनामत्रगमसौकर्याय सूत्राणि स्थूलाक्षरैरस्थापयम् । धर्मशास्त्रादिषु बहुश उपयुक्तान्यत्र चानुक्तानि कतिपयान्यधिकरणानि तन्त्रवार्तिकादिप्राचीनग्रन्थाशयपरिग्रहेण यथामति न्यरूपयंश्च।

तदेवं महान्तमायासमनुभूय सम्पादितेऽस्मिन् कार्ये मीमांसादर्शनदुरूहतायाः सुप्रसिद्धतया मन्मतेरपाटवेन सीसकाक्षरयोजकदोषेण च सुलभानि स्खलितानि क्षाम्यन्तो गुणैकदृशो दर्शनरसिका, आस्वादयन्तु च मीमांसाधिकरणरचनासुगमशैलीसमुत्थं प्रमोदं, प्रसीदतु च भगवाननेन व्यापारेण सर्वान्तर्यामी श्रीकाशीविश्वेश्वर इति शम् ।

नेने-इत्युपाख्यो
गोपालशर्मा.

अधिकरणकौमुद्याम् ।

—:○०○:—

अधिकरणसूचीपत्रम् ।

शुद्धिपत्रम् ।

अशुद्ध.	शुद्ध.	पृ०	पं०
करियते	करिष्यते	२	२४
इष्टत्वन्तु	इष्टन्तु	४	२
समृणमये	स मृन्मये	५	२२
मृणमय	मृन्मय	„	२३
काष्ठपा	काष्ठे पा	६	११
नन्यरं	नन्तरं	११	९
विहितत्वात्	विहितत्वात्	„	१०
निर्वाहः	निर्वाहः	„	१३
बाधका	बोधका	१४	९
यदाह	पदाह	१६	१७
रूप	सूर्य	२३	५
मनोहा	मनोता	२४	५
तस्याधि	तस्य चाधि	२७	५
चेनत्वेन	चेतनत्वेन	३४	२४
वोधना	बोधना	३७	१८
अर्थैकत्वे (इत्यादि)	समुच्चयो वा (इत्यादि)	४२	२४
३—१—६—१२	१२—४—३—६		
रदः	दरः	४४	११
नाशकन	नाशकेन	४६	१३
तेन	तत्र	५४	४
बाधका	बोधका	७३	११
बाधकम्	बोधकम्	„	१३
प्रायश्चित	प्रायश्चित्त	७५	१८
वैश्णव्याविति	वैष्णव्याविति	८१	८
अर्थैकत्वं	अर्थैकत्वे	८७	२१

॥ अधिकरणकौमुदी ॥

श्रीहनुमते नमः ॥ श्रीगुरुभ्यो नमः ।

श्रीगणेशाय नमः ॥

नन्दसूनुं नमस्कृत्य सर्वलोकेश्वरेश्वरम् ॥
निरूप्यते ऽधिकरणं रामकृष्णेन विश्रुतम् ॥ १ ॥

अधिकृत्य क्रियते ऽर्थविचारो यस्मिंस्तदधिकरणं मीमांसासिद्धान्तः । तस्याङ्गानि पञ्च । यथाऽऽह भट्टः—

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
निर्णयश्चेति पञ्चाङ्गं शास्त्रे ऽधिकरणं स्मृतम् ॥

विषयो यमधिकृत्य विचारः । विशयो विप्रतिपत्त्या संशयः । पूर्वस्य वादिनः पक्षो मतं पूर्वपक्षः । वादिनिरासकं वाक्यमुत्तरम् । निरासश्चासदुत्तरेणाप्यप्रतिभस्य वादिनः सम्भवतीत्यत आह—निर्णयश्चेति । प्रमारूप इत्यर्थः ।

१ अथ परिषदधिकरणम्—

यथा "सप्तदशावरा ऋद्धिकामा द्वादशाब्दं सत्रमुपासीरन् , य एव यजमानास्त एव ऋत्विजः" इति श्रूयते । सप्तदश अवरे निकृष्टा येषां ते सप्तदशावरा ऋत्विजः, तेन सप्तदशन्यूनकर्तृकं सत्रं न सम्भवति । य एव यजमाना इति । तथाच सर्वैरेव होतव्यमिति पूर्वपक्षे जैमिनिसूत्रम्—(१) "सत्रे वर्ण्यो होता

(१) अस्मिन् ग्रन्थे प्रमाणतयोपन्यस्तानि सूत्राणीदानीमुपलब्धेषु महर्षिजैमिनिप्रणीतषोडशाध्यायीसूत्रपाठ—तत्सहितशाबरभाष्याधिकरणमालासूत्रवृत्त्यादिपुस्तकेषु नोपलभ्यन्ते । अतः कुत्र-

अन्येषामर्पणम्'' इति। अस्यार्थः—सत्रे स्वीयस्वीयद्रव्याणि मिश्रणेन साधारणानि कृत्वा वर्यं मुख्यं होतारं कृत्वा ऽन्ये ब्रह्मत्वसदस्यत्वादीनि ऋत्विक्कर्माणि कुर्युः। साधारणद्रव्येषु सर्वेषां स्वत्वेन देवोद्देश्यकत्यागात् (१)यजमानत्वमिति। किन्त्वत्राऽऽनतिकरी दक्षिणा नास्ति। सर्वेषां यजमानत्वात्। स्वोद्देश्यक(२)त्यागासम्भवात्। तिर्यगधिकरणविरोधात् अ० ६पा० १ अधि० २। आनतिः प्रीतिः। तथाच स्वत एव स्वस्मिन्प्रीतिरस्ति। नचैकेनान्यस्मै दक्षिणा दीयतामिति वाच्यम्। सत्रस्यैककर्मत्वेनैक एव दक्षिणोत्सर्गः, ज्योतिष्टोमे षोडशर्त्विज उद्दिश्य गोशतदक्षिणोत्सर्गवत्। अत्र सर्वेषामृत्विक्त्वेन स्वोद्देश्यकत्वस्यासम्भवात्। श्राद्धादौ वाचनिको दक्षिणाभेदः। नचोदासीनाय दीयतामिति वाच्यम्। तर्हि नानतिकरी दक्षिणा, तस्यानृत्विक्त्वात्। अदृष्टार्था दक्षिणा तु वाचनिकी। वचनन्त्वत्र नास्त्येवेति सत्रे दक्षिणाभाव एवेति। अत्र च फलस्य न परिषद्वृत्तित्वम् बहुत्वविशिष्टस्याचेतनत्वात्। किन्तु प्रत्येकवृत्तित्वमिति। तथाच फलस्य बहुत्वमेवान्यथाऽनुपपत्तेः। तदुक्तं–''सर्वतो बलवती ह्यन्यथाऽनुपपत्तिः'' इति।

२ अथ रात्रिसत्राधिकरणम्—

''प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति'' इति श्रूयते। प्रतिर्वीप्सायाम्। पुनः पुनर्देहावच्छेदेन तिष्ठन्तीत्यर्थः। चिरंजीविनो भवन्तीति यावत्। एता रात्रीरिति प्रकरणात्। अधिकार्थे उप। यन्तीति इण् धातोः। तथाच अधि-

---

त्यानीति न ज्ञायते। क्वचित्तु पाठभेदेव दृश्यन्ते। स च तत्र तत्र स्पष्टीकरिष्यते।

(१) यागजन्यफलभागित्वमित्यर्थः। (२) स्वमुद्दिश्येति वा पाठः।

कं ध्यायन्तीत्यर्थः। यागे उद्देश्यदेवताध्यानस्य विहितत्वात्। अत्र चास्याः श्रुतेरर्थवादत्वेन प्रतिष्ठाफलं न ग्राह्यम्। किं तु विश्वजिन्न्यायेन स्वर्ग एव फलमिति पूर्वपक्षे सूत्रम्-"फलं सान्निधिकम्" अ० ४ पा० ३ सू० १८ इति(१)। अस्यार्थः-यद्यत्सन्निहितं श्रुतं तदेव फलं ग्राह्यम्। तत्राऽऽदौ विधिश्रुतम्, तत आर्थवादिकम्, तदभावे आनुषङ्गिकम्, तदभावे लिङ्गस्थमिति। अत्र यथापूर्वं सन्निहितं बोध्यम्। तथाच रात्रिसत्रे विध्यभावेनाऽऽर्थवादिकं प्रतिष्ठाख्यं फलमेव ग्राह्यम्। विश्वजित्स्थले तु फलं न श्रुतं किन्तु कल्प्यमिति तस्य दुर्बलत्वम्।

आनुषङ्गिकं यथा-"आरोग्यकामः सौरेण यजेत" इत्यनन्तरं "आश्विनौ यजेत" इति श्रूयते। तत्राप्यनुषङ्गा(२)दारोग्यं फलम्। नचानुषङ्गे तत्पदस्याऽऽवृत्तिरिति वाच्यम्। आवृत्तौ हि तादृशपदान्तरकल्पनम्, अनुषङ्गे तु तस्यैव परवाक्ये समभिव्याहारकल्पनमिति। अयमेवानुषङ्गिकाधिकरणन्यायः। अ० २ पा० १ अधि० १९। अन्वयबोधस्तु क्रमिकः। अतो वाक्यभेद एवेति। अत्र चैकसाधनावरुद्धे साधनान्तरस्य निराकाङ्क्षत्वेन विकल्पः कल्प्यते। सौरेण वाऽऽश्विययागेन वा आरोग्यमिति। सौरस्य बह्वङ्गत्वेन तद्तुल्यार्थो आश्वियाग इति व्यवस्थितो विकल्प इति।

लिङ्गस्थं फलं यथा-लिङ्गं मन्त्रः(३)। "ऐन्द्रं यजेत" इत्यत्र यागे मन्त्रः श्रूयते "इन्द्रो देवः सहस्राक्ष ऐन्द्रदस्तस्मै जुहोमि" इति। अत्रैन्द्रद इति श्रवणादैन्द्रपदं फलमिति।

३ अथ विश्वजिदधिकरणम्-

(१) "फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यात्" इति पाठः।
(२) अनुषङ्गः सामीप्यम्। (३) लिङ्ग्यते ज्ञाप्यतेऽनेनेति व्युत्पत्तेः।

"विश्वजिता यजेत" इति श्रुत्येष्टसाधनत्वं बोधितम् । इष्टत्वन्तु कल्प्यम् । उक्तचतुर्विधफलासम्भवात् । तत्र च ग्रामधनादीनां गौणपुरुषार्थत्वाद्विनिगमनाविरहाच्च न फलत्वम् । मोक्षस्य च तत्त्वज्ञानमात्रसाध्यत्वात्, तत्र ज्ञानस्य च गौणप्रयोजनत्वात्, प्रतियोगिनिरूप्यतया मोक्षस्याभावरूपस्यानुपस्थितेश्चेति, स्वर्गस्याप्यनुपस्थित्या फलत्वेन कल्पने मानाभावादित्यत्र सूत्रम्- "स स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वात्" अ० ४ पा० ३ सू० १५ इति । देशात्मकस्वर्गवारणाय स इति । दुःखासम्भिन्नादिरूप(१) इत्यर्थः । सर्वानिति । वैराग्यरहितानिति शेषः । अविशिष्ट इति-इच्छाज्ञानविषयत्वेन । तथाच ज्ञानं विना इच्छाया असम्भवात् स्वर्गस्योपस्थितिरस्त्येवेति फलं स्वर्ग एव ।

ननु विश्वजयिनो विश्वजिद्यागो नित्य एवास्तु फलाश्रवणात्, कार्तिकामावास्यायामुल्कादानलक्ष्मीपूजनवत्, इति चेन्मैवम् । विश्वजित्सर्वजिद्बहुसुवर्णकराजसूयादिसर्वमेधान्तानां षोडशानामेव विश्वजयिकर्तव्यत्वेन बोधनात् । तथाच विश्वजितो नित्यत्वेन प्रथमकर्तव्यत्वात् तत्र च सर्वस्वदक्षिणया सर्वजिदादिषु धनाभावेनाप्रवृत्त्या तद्विधेरननुष्ठानलक्षणाप्रामाण्यं स्यात् । अतो विश्वजिद्यागो न नित्यः । सर्वजिदादीनान्तु फलश्रुत्या काम्यतैवेति ।

४ अथ सर्वस्वदाक्षिण्याधिकरणम्-

"उद्गातृपूर्वान् विश्वजिति, प्रतिप्रस्थातृपूर्वान् सर्वजि-

(१) यन्न दुःखेन सम्भिन्नं नच ग्रस्तमनन्तरम् ॥ अभिलाषोपनीतञ्च तत्सुखं स्वःपदास्पदम् । इति तन्त्रवार्त्तिकोक्तः स्वर्ग इति यावत् ।

दादौ, सर्वमेधे तूभयम्" इतिश्रुत्या विश्वजित्युद्गातृप्रधा-
नाः षोडशर्त्विजः, सर्वजिदादौ प्रतिप्रस्थातृप्रधानाः षोडश,
सर्वमेधे तूद्गातृप्रधानाः प्रतिप्रस्थातृप्रधानाश्च । तेनात्र गणद्व-
येन द्वात्रिंशदृत्विजो भवन्ति । तथा च "उद्गातृभ्यः सर्वस्वं
दाक्षिण्यं, प्रतिप्रस्थातृभ्यो न" इति श्रूयते। उद्गातृभ्य उद्गात्रा-
दिभ्यः । तेन विश्वजिति सर्वस्वदक्षिणा, सर्वजिदादिषु यत्किञ्चि
त् पारितोषिकं, सर्वमेधे तु सर्वस्वं यत्किञ्चिचेति ।

न च सर्वस्वे दत्ते यत्किञ्चिदिति कथं स्यादिति वाच्यम् ।
सर्वस्वपदेन सर्वं तैजसमुक्तं(१) भूमिवस्त्रादिकं च न सर्वस्वाभ्य-
न्तरीणम् ।

५ अथ होलाकाधिकरणम्—

प्राच्यानां होलाकाऽऽचारदर्शनात्तदर्थं 'होलाका ऽऽचरणी-
या' इति सामान्यविधिः कल्प्यते । न च प्रतीच्यानामनाचर-
णात्प्राच्यैरिति विशेषणपदं देयम् । सामान्यविधिनैव प्राच्या-
ऽऽचारोपपत्तेः । प्रतीच्यानामनाचरणस्येच्छाविरहेणैवोपपत्तेः ।
इच्छाविरहश्च तद्देशीयपूर्वपूर्वाणामनाचारदर्शनात्, प्रतीच्याना-
मुल्कादानाद्याचारविरहवत् । नह्यनाचारार्थं वेदः(२) कल्प्यते ।
तथा च यत्र सामान्यश्रुत्या उपपत्तिस्तत्र विशेषविधिर्न कल्प्यते,
'गुरुरनुगन्तव्यः सदा' इतिवत् । नहि कर्मकाले तदसम्भवात्तदन्य-
काले इति तत्र विशेषणीयमिति ।

६ अथ फलचमसाधिकरणम्—

---

(१) अत एव रघुकाव्ये "सम्मृण्मये वीतहिरण्मयत्वात्' इति ।
अन्यथा मृण्मयमपि कथं तस्य । हिरण्मयं तैजसम् ।

(२) श्रुतिरिति पाठः ।

"मोद्गातॄणां फलचमसं हुतशेषं भक्ष्यं ददाति" इति श्रूयते । मोद्गातॄणामिति बहुवचनात् मोद्गात्रादिऋत्विजां सर्वेषामित्यर्थः ।

यवव्रीहितिलैर्मुद्गैः साधितश्चमसः स्मृतः ॥

फलं नारिकेलं "अनादेशे नारिकेलं फलम्" इति श्रुतेः । तथा च फलसहितश्चमस इत्यर्थः । हुतशेषमिति । तेन होमेऽपि तद्द्रव्यमिति ।

७ अथ सर्वपिष्टाधिकरणम्—

"सर्वपिष्टं मिथुनेन पेषणीयम्" इति श्रूयते । अत्र मिथुनशब्दस्य सपुत्रपाषाणे न लक्षणा । तथा च मिथुनपदेन स्त्रीपुंसावित्युक्तौ । पेषणन्तु यत्र तत्र काष्ठपाषाणादौ वा कर्तव्यमिति पूर्वपक्षे जैमिनिसूत्रम्—"निरूढत्वात्" इति । निरूढलक्षणा शक्तितुल्या, शक्तिवत्तस्या अपि झटित्युपस्थापकत्वात् । मिथुनपदस्य सपुत्रपाषाणे निरूढलक्षणा । तेन सपुत्रपाषाण एव पेषणम् । अन्यथा कुत्र पेषणीयमित्यनध्यवसायेन प्रवृत्तिर्न स्यात् । पेषणे स्त्रिया अप्यन्वये गौरवञ्च स्यादिति ।

८ अथ हविरूभयत्वाधिकरणम्—

पुत्रेष्टियागे श्रुतिः "व्रीहिभिर्यवैश्च प्राजापत्यं पृथक् श्रपयेत्, हविषी संस्कुरुते, आज्येन प्रोक्ष्यावहत्य कपिलाक्षीरेण पचेत्" इति । आज्येनेतिविशेषश्रुतेः सामान्यविधिप्राप्तस्य जलेन प्रोक्षणस्य बाधः । हविषी व्रीहियवौ । अथास्य विकृतौ पुत्रेष्टियागान्तरे श्रुतिः "यवमयश्चरुर्भवति" इति । अत्र च 'प्रकृतिवद्विकृतिः' इतिन्यायेन सर्वधर्मप्राप्तावपि न संस्कारप्राप्तिः । प्रकृतौ हविषी इतिश्रवणात् द्वित्वविशिष्टस्य संस्कारप्राप्तेः ।

अत्र च यवमात्रश्रवणे द्वित्वविशिष्टहविषोऽभावात् तत्मात्रस्यभाव इत्याशयेन नात्र प्रोक्षणं, किन्तु सामान्यप्राप्तजलेनैवेत्यत्र सिद्धान्तसूत्रम्—"द्वित्वमनपेक्षितमप्रधानत्वात्" इति। शाब्दबोधे विधेयं प्रधानम्, उद्देश्यमप्रधानम्। तेनात्रोद्देश्यगतत्वाद्द्वित्वं हविर्गतं लिङ्गञ्च नपुंसकमविवक्षितमिति।

९ अथ ग्रहैकत्वाधिकरणम्—

"ग्रहं संमार्ष्टि" इति श्रूयते। गृह्यते हविरनेनेति ग्रहो यज्ञपात्रम्। स्रुक्स्रुवादयः। "ग्रहैर्जुहोति" "दश ग्रहान् गृह्णाति" इति। तथा च ग्रहमित्येकवचनेनैकपात्रस्य मार्जनप्राप्तौ कस्येत्यनध्यवसायादप्रवृत्त्यापत्तिरिति। अत्र सूत्रम्—"सर्वेषां वा लक्षणत्वादविशिष्टं हि लक्षणम्" अ० ३ पा० १ सू० १४ इति। असंस्कृतेन पात्रेण यज्ञनिषेधात्सर्वेषामेव मार्जनमपेक्षितम्। तेनात्रैकत्वमविवक्षितम्। न च हविरुभयत्वाधिकरणेनेदमन्यथासिद्धम्। तत्र द्वित्वस्यान्वयबोधेऽप्रवेशात्। अत्र चैकत्वस्यावच्छेदकत्वेनानन्वयेऽपि सामानाधिकरण्येनान्वये प्रवेशादिति।

१० अथ तदर्थशास्त्राधिकरणम्—

बार्हस्पत्ययागे श्रूयते "प्रयाजं करोति नानुयाजम्" इति। अत्र नानुयाजमिति श्रवणान्निषेधानुपपत्त्या दर्शधर्मातिदेशः पश्चाद्बाध्यः। तथा च "अनुवादः प्राप्तबोधो विधिरप्राप्तबोधकः" इति सूत्रे ऽप्राप्तेति निष्ठाप्रत्ययश्रुतेः पश्चात्प्राप्त्येऽपि प्रयाजे न विधित्वहानिः। पूर्ववाक्यस्य "प्रयाजं करोति" इति वाक्यस्य सार्थकत्वादादौ प्रयाजाचरणं ततोऽनुयाजं विहायातिदेशप्राप्तव्याश्चतस्र आहुतयः कर्तव्या इति नात्र षडाहुतय इति पूर्वपक्षे सिद्धान्तसूत्रम्—"तदर्थशास्त्रे निष्ठाया अनिष्ठितत्वात्"

इति। स विधिरर्थो ऽभिधेयो यस्य तत्तदर्थशास्त्रम् 'अप्राप्तप्रापको विधिः' इतिसूत्रम्। तत्र निष्ठाप्रत्ययस्यानिष्ठितत्वादविवक्षणादि-त्यर्थः। तेन मानान्तरेण प्राप्तव्यविषयबोधको विधिः। अत्र च प्राप्तरूपत्वेन प्राप्तिविषयत्वात् प्रयाजं करोतीति न विधिः। कि-न्त्वनुयाजस्थाने एव प्रयाजान्तरविधिः। तेनातिदेशप्राप्तरूपस्य प्रयाजस्याऽऽदावाचरणम्, ततो ऽनुयाजस्थले पुनः प्रयाजान्तरा-चरणं, ततश्चतस्र आहुतय इति षडाहुतिसंख्या स्थितेति।

११ अथ निषादस्थपत्यधिकरणम्—

"निषादस्थपतिं याजयेत्, स वै क्षत्त इति स्वयं जुहो-ति" इति श्रुत्या यजमानकर्तृको मन्त्रपाठः प्राप्तः। तथा च नि-षादस्थपतीत्यत्र कर्मधारयसमासे निषादस्य मन्त्रपाठापत्त्या वि-द्याप्रयुक्त्यापत्तिः। निषिद्धस्य पाठनं विद्याप्रयुक्तिः। तथा च निषादः स्थपतिर्यस्येति बहुव्रीहिः, निषादस्य स्थपतिरिति षष्ठीतत्पु-रुषसमासो वा ऽऽश्रयणीयः। तेन त्रैवर्णिकस्यैवम्भूतस्य याजन-मिति न विद्याप्रयुक्तिरिति। अत्र सिद्धान्तसूत्रम्—"शक्टित्युप-स्थापकत्वात्" अ० ६ पा० १ सू० ५१ इति(१)। बहुव्रीहिषष्ठी-तत्पुरुषसमासयोर्लाक्षणिकत्वेनानुपपत्त्यधीनतया विलम्बोपस्थाप-कत्वात्। कर्मधारयस्य तदभावेन शीघ्रोपस्थापकत्वात् तेनैवान्व-यबोधः। फलमुखत्वाद्विद्याप्रयुक्तिर्न दोषायेति॥

१२ अथ रथकाराधिकरणम्—

"वर्षासु रथकार आदधीत" इत्याधानाख्यं कर्म रथ-कारस्य विधीयते। अत्र योगार्थाऽऽदरे त्रैवर्णिकपरत्वं सम्भ-वदपि लाघवाद्रूढस्य जातिविशेषस्यैव ग्रहणम्। यथा—

(१) "शब्दसामर्थ्यात्" इति सूत्रपाठे।

'माहिष्येण करिण्यां तु रथकारः प्रजायते' इति।

योगार्थस्य तु रूढ्यर्थतो गौरवम्। अनेकपदार्थान्वयानन्तरमुपस्थापकत्वादिति। तेन याजनं विना आधानकरणासम्भवात् रथकारस्य ब्राह्मणेन याजनसिद्धिरिति॥

१३ अथ(१) तन्त्रन्यायः—

"असंस्कर्ता पिता बालहा भवति यथासमयम्, तदकरणे क्षामवत्या यजेत, ततश्च संस्करोति" इति श्रुतेः मुख्यकाले जातेष्ट्यादेरकरणे तज्जन्यप्रत्यवायनाशाय क्षामवतीमिष्टिं कृत्वा गौणकालेऽपि संस्कारान् जातेष्ट्यादीन् कुर्यादिति सिद्धम्। तत्र यदि बहुसंस्काराकरणं तदा बहुप्रत्यवायोत्पत्तेः प्रत्येकदोषनाशाय पृथक् क्षामवतीं कुर्यात्। एकया क्षामवत्याऽनेकप्रत्यवायनाशासम्भवात्। प्रत्येकविघ्ननाशाय भिन्नमङ्गलवत्, इत्यत्र सिद्धान्त सूत्रम्—"तन्त्रवत्"इति। यथा तन्त्रस्य दीर्घसूत्रसमुदायमध्ये सर्वसूत्रमुद्दिश्य कृतेन एकेन विस्तरसूत्रप्रक्षेपेण सर्वसूत्रसम्बन्धो, न तु यावन्ति दीर्घसूत्राणि तन्मध्ये प्रत्येकं प्रस्तारसूत्रप्रक्षेपः कुविन्देन क्रियते, तथा एकया क्षामवत्या सर्वमुद्दिश्य कृतया सर्वदोषसम्बन्धात् सर्वेषामेव नाशः। नाशकस्य नाश्यसम्बन्धे सति नाशे ऽन्यानपेक्षणादिति।

एवं दर्शे प्रयाजादिषण्णामङ्गत्वं श्रूयते। दर्शयागश्चाऽऽहुतित्रयरूपः। तथाच तन्त्रन्यायेन सकृत्कृतेन प्रयाजादिनाऽदृष्टनिष्पत्तिर्न तु प्रयाजादीनां त्रिधा आवृत्तिरिति। प्रयोगविध्यैक्ये तन्त्रता। प्रयोगविधिश्च एभिरङ्गैरिदं कर्तव्यमेवंरूपः। तेन समानाङ्गत्वेनैव तन्त्रता। तथाच देवतैक्ये तन्त्रता। कृ-

१ नानाफलकसमानाकारकव्यापाराणां मध्ये नानाफलान्युद्दिश्यैकव्यापारकरणं तन्त्रम्।

चिद् द्रव्यैक्येऽपि। किन्तु काम्ययोर्न तन्त्रतेति। नित्ययोर्नित्यकाम्ययोरङ्गयोश्च तन्त्रता। क्षामवत्याः प्रायश्चित्तरूपत्वेनावश्यकर्तव्यत्वात्। "चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये" इतिवाचनिकनित्यत्वाच्च। काम्यानां तन्त्रत्वे यजमानद्वयस्य शिवलिङ्गसहस्रद्वयसंकल्पे एकसहस्रपूजनेनैव निर्वाहः स्यादिति। अयमेव क्षामवतीष्टिन्यायः।

१४ अथ (१)प्रसङ्गन्यायः—

"पशुं प्रोक्ष्य, तन्मांसैर्जुहुयात्" इति श्रुतिः। अत्र पशुप्रोक्षणेन न मांसस्य प्रोक्षणं सिद्ध्यति, तस्य ततोऽन्यत्वादिति मांसमपि प्रोक्षयेदित्यत्र सिद्धान्तसूत्रम्–"प्रसङ्गात्सिद्धेः" इति। प्रसङ्गो नान्तरीयकत्वम्। तथाच पशुप्रोक्षणेन समन्त्रकेणामन्त्रकं पुरोडाशस्य तन्मांसस्य च प्रोक्षणमपि सिद्धं, तत्र जलसम्बन्धाभावेऽपि पशुघटकत्वेन पुरोडाशस्यापि संस्कारो धान्यराशेरुपरि प्रोक्षणेनाधोवर्तिधान्यानामपि सर्वेषां तद्घटकत्वेन प्रोक्षणवत्॥

'होम्यं यत्काठिनं स्यात्तु पुरोडाश इति स्मृतम्, इति।

तेन मांस-पिष्टकमोदकादीनां होमे विहितानां पुरोडाशसंज्ञेति। तेन समानाङ्गके उद्दिश्य कृते तन्त्रन्यायः। अधिकाङ्गेन न्यूनाङ्गसिद्धौ प्रसङ्गन्यायः। अत्र कुत्रचिदुद्देश्यस्य सिद्धिः, क्वचिदनुद्देश्यस्यापि।

आद्यं यथा–आज्यसंस्कारस्य तद्यागोपयुक्तसर्वाऽऽज्यमुद्दिश्य करणात् कलशस्थाऽऽज्यस्यापि शुद्धिः। नहि राजसूयादियागोपयुक्तं सर्वमाज्यं (२)पात्रे स्थातुमर्हति। नच यदाज्यं ग्राह्यं तद-

---

१ अन्योद्देशेनान्यदीयस्यापि सहानुष्ठानं प्रसङ्गः।

२ आज्यस्थाल्यामित्यर्थः।

पि संस्कार्यं, तत्समयस्य कुशण्डिकान्तर्गतत्वेनातीतत्वात् । एवं संस्कृतस्रुवापचारे नवीनस्रुवे संस्काराभावः ।

द्वितीयं यथा—अधिकपापप्रायश्चित्तेन क्षुद्रपापनाशस्यानुद्देश्यस्यापि सिद्धिः । वृश्चिकनाशाय पाषाणक्षेपे पिपीलिकादिनाशवत् । माधवीये तु पशुयागार्थं प्रयाजाद्यनुष्ठाने कृते पुरोडाशार्थं न पुनः प्रयाजाद्यनुष्ठानं प्रसङ्गेनोभयाङ्गानुष्ठानादित्युक्तम् ।

१५ अथाङ्गस्य प्रधानाऽऽवृत्त्यप्रयोजकत्वन्यायः—

प्रधाननिष्पत्त्यनन्तरं चरोरपचारे ऽङ्गभूतस्विष्टकृद्धोमार्थं न पुनः पाकः । तस्य होमशेषद्रव्येण विहितत्वात् । किन्तु चरुं प्रसाध्य पुनः प्रधानाचरणं स्विष्टकृद्धोमार्थं कार्यमित्यत्र सिद्धान्तसूत्रम्—"अङ्गस्य प्रधानाऽऽवृत्त्यप्रयोजकत्वात्" इति । तेन स्विष्टकृद्धोमं विनैव तत्र कर्मनिर्वाहः । एवमेकोद्दिष्टादौ न पुनः श्राद्धाऽऽवृत्तिः । शेषान्नापचारे पिण्डार्थं न पाकान्तरं कार्यमिति । एवमपिण्डकेन मघाश्राद्धेन पक्षश्राद्धनिर्वाहः । अत एव छन्दोगपरिशिष्टम्—

"प्रधानस्याक्रिया यत्र साङ्गं तत्क्रियते पुनः ।
तदङ्गस्याक्रियायां तु नाऽऽवृत्तिर्नापि तत्क्रिया" इति ॥

१६ अथ योगसिद्ध्यधिकरणम्—

"यः पुत्रकामः स इदं कुर्यात्, यः पशुकामः स इदं कुर्यात्" इत्यादि चतुर्दशतिथियागानुक्त्वा "एकैकस्मै कामायान्ये यज्ञक्रतव उपाह्रियन्ते सर्वेभ्यो दर्शपौर्णमासान्" इति श्रुतावुक्तम् । यज्ञक्रतू भिन्नौ ।

"इष्टिस्तु चरुणा यागो यज्ञस्तु पशुना स्मृतः ।
एतच्छेषः क्रतुः प्रोक्तो होमान्यत्पूजनं स्मृतम् ॥

यज्ञोऽपीष्टिरेव यजधातोः सिद्धत्वात् । एतच्च "क्रतुयज्ञेभ्यश्च" इति अ० ४ पा० ३ सू० ६८ पाणिनिसूत्रे उक्तम् । सर्वेभ्य इति । प्रक्रान्तपुत्रादिचतुर्दशफलान्युद्दिश्येत्यर्थः । तथाचैकदैव पुत्रपश्वादिचतुर्दशफलकामनया दर्शपूर्णमासौ कार्याविति पूर्वपक्षे जैमिनिसूत्रम्—"योगसिद्ध्यसम्भवात्" इति । योगः साहित्यम् । तथाचैकस्मात्कर्मणः साहित्येन फलासम्भवादित्यर्थः । अयम्भावः । यः पुत्रकाम इत्यादिप्रक्रमेण प्रत्येकमधिकारित्वश्रुतेः तेषामेवान्वयबोधो युक्तो, नतु समुच्चितफलकामस्याधिकारित्वम् । फलानां समुच्चयस्याश्रवणात् । कल्पनायां मानाभावात् । तथाच प्रयोगभेदात्सर्वं फलं भवति नत्वेकप्रयोगेणेति । अत्र च बाधकाभावे सतीति बोध्यम् । तेन यत्र समुच्चयेन फलश्रुतिस्तत्र न दोषः । यथा "स्वर्गमाप्नोति मोक्षं च कार्तिके केशवार्चनात्" इति । अत्र चकारेण समुच्चयबोधः । एवञ्च महाभारतादिश्रवणस्य बहुफलश्रवणे ऽप्येकं फलमुद्दिश्य सङ्कल्पः कार्यो न तु समुच्चयेन, तद्बोधकाभावादिति ।

१७ अथ कर्मण्यारम्भाधिकरणम्—

नन्वेकस्माद्दण्डाद्यथा बहुघटोत्पत्तिः । तथैकस्मात् ज्योतिष्टोमाद्बहूनि स्वर्गादिकानि फलानि भविष्यन्तीति किमर्थं पुनः पुनरनुष्ठानाचार इति पूर्वपक्षे सिद्धान्तसूत्रम्—"कर्मण्यारम्भावृत्त्या फलावृत्तिः" इति । अयमाशयः । "ज्योतिष्टोमात्षष्टिवर्षसहस्राणि, स्वर्गो भवति" इति श्रुतौ षष्टिवर्षसहस्राणीति व्यर्थं स्यात् । फलानामानन्त्यादनिर्मोक्षश्च स्यात् । एकयागफलाविच्छेदाद्यागान्तरफलप्राप्तिश्च न स्यात् । सूत्रार्थस्तु एककर्मविषयकाऽऽरम्भ आद्यः प्रयत्नस्तस्याऽऽवृत्तेर्यावती संख्या ता-

वत्संख्यं फलं भवतीति । आद्यप्रयत्नभेदस्तु कर्मभेदादेव । तथा-च प्रधानीभूतादेकस्मात्कर्मण एकमेव भिन्नकालीनं फलं भवतीति । प्रधानीभूतेति प्रयाजादिवारणाय तेषां सकृत्कृतानामेव दर्शत्रयोपकारकत्वात्तत्र त्रयमपि फलं तन्त्रप्रसङ्गाभ्याम । बहुपापनाशककर्मवारणाय, 'कुलकोटि समुद्धरेत्' इत्यत्र तत्तदात्मनिष्ठनानाफलोत्पादककर्मवारणाय च भिन्नकालीनेति ।

१८ अथ शंय्वधिकरणम्-

"सोमयाजी ब्रह्मलोकमाप्नोति" इति श्रुत्या सोमयाजिनो ब्रह्मलोकावाप्तिरुक्ता । अत्र च सोमयागस्य हेतुत्वं न सम्भवति कर्तृविशेषणत्वेनोपस्थितत्वात्कुलालत्ववत् । तथाच ब्रह्मलोकप्राप्तिः कस्य फलमुक्तमित्यत्र जैमिनिसूत्रम्-"शंयुवत्तत्त्वसिद्धेः" इति । अयम्भावः । "देवाः शंयुं बार्हस्पत्यमब्रुवन्, त्वमस्माकमविनाशाय हव्यं वह, ततः शंयुमन्तस्ते ऽरीनजयन्" इति श्रूयते । अत्र शंयुविशिष्टदेवानामरिजयहेतुत्वं प्राप्तम् । बाधकाभावाच्च विशिष्टस्य हेतुत्वबोधे विशेषणस्यापि हेतुत्वम् । कुलालत्वस्य तु न तथा स्वतन्त्रान्वयव्यतिरेकाभावात् । शंयोस्तु तत्सत्त्वाद्धेतुत्वबोधविषयीभूतदेवविशेषणत्वेऽपि हेतुत्वमिति । श्रुत्यर्थस्तु-बृहस्पतिपुत्रं शंयुं देवा अब्रुवन् हव्यं शत्रुनाशकं यागं वह कुरु ततस्तद्यागानन्तरमित्यर्थः । तथा च शंयोः साक्षाज्जनकत्वाभावाद्यथा यागो व्यापारः, तथा सोमयागस्यापि अपूर्वं व्यापारः(१) । एवं "सप्तदश पशूनालभेत" इत्यत्र सप्तदशत्वविशिष्टपशूनामङ्गत्वबोधनात् सप्तदशत्वमप्यङ्गमिति ॥

१९ अथ देवताऽधिकरणम्—

(१) तज्जन्यत्वे सति तज्जन्यजनको व्यापारः ।

ननु देवताप्रीतिरेव यागव्यापारो ऽस्तु किमपूर्वेणेत्यत्र सूत्रम्- "देवता चैतन्यासम्भवात्" इति। चेतने एव प्रीतिर्जायते नत्वचेतने तथा च कथं देवताप्रीतिरिति।

२० अथ परिषदधिकरणम्—

"ब्राह्मणेभ्यो ऽन्नं दद्यात्" इति श्रुत्या बहुत्वविशिष्टमेव सम्प्रदानं तथा चैकमेवोत्सर्गवाक्यमत्र सूत्रम्—"परिषदि दत्तमदत्तम्" इति। परिषदो बहुत्वविशिष्टस्याचैतन्येन स्वीकारासम्भवात् प्रत्येकमेव दानवाक्यम्। तुलापुरुषादिदाने च वाचनिकत्वाद्बहुत्वविशिष्टा एवोद्देश्याः। तेन बाधकाभावे प्रतीति विशेषणं सूत्रे इति॥

२१ अथ कौण्डपायिनामयनाधिकरणम्—

"उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहुयात् तेजस्कामः" इति।

उपसत् कल्प्यते यत्र सतिलैर्व्रीहिभिश्चरुः।

तथा च सतिलैर्व्रीहिभिः चरित्वा—चरुं कृत्वा मासं व्याप्याग्निहोत्रं जुहुयादित्यर्थः। अत्र चाग्निहोत्रान्तरविधौ गौरवात् प्राप्ताग्निहोत्रे एव मासव्याप्त्योपसद्विधिः। तेन प्रकृताग्निहोत्रमेवोपसदा कर्तव्यम्। अन्यथा प्रकृताग्निहोत्रं कृत्वा ऽग्निहोत्रान्तराऽऽचरणे गौरवं स्यादित्यत्र सिद्धान्तसूत्रम्—"वाक्यभेदापत्तेः" इति(१)। प्रकृताग्निहोत्रमुद्दिश्य मासोपसदुभयगुणविधौ वाक्यभेदापत्तेः।

नच मासविशिष्टोपसद्विधिः। "गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्स्यात्" इति न्यायादङ्गानामन्योन्यं विशेष्यविशेषणभावविरहादिति। गु-

(१) वाक्यभेदस्य च दुष्टत्वमुक्तमभियुक्तैः-
'सम्भवत्येकवाक्यत्वे वाक्यभेदो न युज्यते' इति।

णानामङ्गानां परार्थत्वादङ्गत्वर्थत्वादसम्बन्धः परस्परं विशेष्यविशेषणभावविरहः । कुत इत्यत्राऽऽह—समत्वादिति । विनिगमनाविरहादित्यर्थः । तथा च गुणद्रव्यविशिष्टस्याग्निहोत्रान्तरस्यैव विधिः । अग्निहोत्रपदप्रयोगस्तु तद्धर्मप्राप्त्यर्थ इति । कुण्डसम्बन्धित्वात्कौण्डः पिण्डसोमस्तत्पायिनाम् अयनं—कर्तव्यत्वेन ज्ञानं यत्र तत्कौण्डपायिनामयनम् । अलुक्समासात् यागस्य संज्ञा(१) । कृतसोमयागस्य तत्राधिकारात् । केचित्तु कौण्डपायिनां कृतसोमपानानामयनं तदाख्यो यागः । स च द्वादशाहसाध्य इत्यर्थः । षष्ठ्यर्थश्च कर्तृत्वमिति वदन्ति ।

२२ अथ यागदानहोमाधिकरणम्—

बार्हस्पत्ययागे श्रूयते "शरमयं बर्हिरुत्तरतस्त्यजति, तत्र द्रव्याण्यासादयति" इति । अत्र च त्यक्तद्रव्ये कथं द्रव्याऽऽसादनं त्यक्तस्य विनियोगविरहादित्यत्र सूत्रम्—"यागदानहोमान्यत्वे त्यागानुपपत्तेः" इति । अस्यार्थः—या क्रिया यागदानहोमाऽन्या सा न त्यागरूपेति । तथा च शरमयबर्हिषो न त्यागः । तेन त्यजती त्यस्य स्थापयतीत्यर्थः ।

ननु मुख्यशब्दं विहाय लाक्षणिकस्य त्यजतीत्यस्याभिधानं कथम् ? इत्थं, "देवा गातु इति मन्त्रेण बर्हिषो होममाचरेत्" इति पूर्णाहुत्यनन्तरं बर्हिषो होमविधानादत्र शरस्य बर्हिष्ट्वेन होमप्राप्तौ तद्वारणाय त्यजतीति । तेन त्यक्तधर्मातिदेशात्पुनरनुपादानाच्च न शरस्य होम इति । नचोत्सर्गोऽपि त्याग एवेति कथं त्यागस्य त्रितयान्यतमरूपत्वमिति वाच्यम् । उत्सर्गस्यापि त्यागादिरूपत्वात् । तथाहि—तडागोत्सर्गस्य देवतोद्देश्यकत्यागत्वेन

---

(१) संज्ञास्वरूपभङ्गभिया षष्ठ्या अलुगित्यर्थः ।

यागत्वम् । सर्वसत्त्वानां चतुर्थ्यन्तपदनिर्देश्यत्वेन देवतात्वात् । एवं वृषोत्सर्गस्यापि । तत्रापि वत्सतरीणां देवतात्वात् । एवं मठाद्युत्सर्गस्य साक्षादेव यागत्वम् । एवं मनसा ब्राह्मणमुद्दिश्य त्यागस्य दानत्वमेव स्वीकारार्होद्देश्यकत्यागस्य दानत्वात् । नतु स्वीकारोपहितेति वक्तव्यम् गौरवात् । स्वीकारयोग्यता च विशिष्टचेतनत्वेन । शूद्राद्युद्देश्यकत्यागेऽपि दानपदप्रयोगात् ।

नचैवं वैराग्यादिना एवमेव द्रव्यत्यागे कथमुपपत्तिरिति वाच्यम् । तत्रोत्सर्गत्वस्याप्यभावेन उभयसमाधेयत्वात् । तथा च स्नानाद्यङ्गकत्यागस्य त्रैविध्यमिति । एवं 'सर्वं परित्यज्य संन्यसेत्' इत्यत्रापि स्नानाद्यङ्गत्वाभाव इति ।

न च होमोऽपि देवतोद्देश्यकत्यागत्वाद्याग एवेति कथं तस्य पृथगुपन्यास इति वाच्यम् । स्वतन्त्रेच्छस्य मुनेर्नियोगपर्यनुयोगानर्हत्वात् । कर्मणो गुणान्तर्भावसम्भवेऽपि पृथगुपन्यासवत् । तथा च यागे ऽन्यानुपहितत्वं विशेषणं देयम् । होमे त्वग्निप्रक्षेपविधिकेति विशेषणमिति सर्वे पूर्वपक्षाः परास्ताः ।

२३ अथ यदाहवनीयन्यायः—

सोमयागे "पदे जुहोति" इति श्रूयते । तस्य चानुपपत्तिः "यज्जुहोति तदाहवनीये" इतिश्रुतेःसामान्यायाःसङ्कोचापत्तेरित्यत्र सिद्धान्तसूत्रम्–"निरवकाशत्वात्" इति।पदे जुहोतीत्यस्य निरवकाशत्वापत्त्या आहवनीयवाक्यस्य सङ्कोच एव युक्तः । तथाच निरवकाशवचनविषयातिरिक्ते सामान्यवचनस्य प्रवृत्तिरिति । एवं ज्योतिष्टोमे "सोमेन यजेत" इति सामान्यश्रुतिरस्ति, तथा "राजन्यवैश्यौ फलचमसाभ्याम्" इति । तत्र विशेषश्रुत्या सामान्यश्रुतेर्ब्राह्मणमात्रपरत्वं नतु राजन्यवैश्ययोर-

पि सोमसहितफलचमसाभ्यां याग इति ।

२४ अथ पदिन्यायः—

"पद्पांसुना यूपमनक्ति, सप्तमं पदम् गृह्णाति" इति सोमयागे श्रूयते । तत्र कस्य पदं ग्राह्यमिति अनध्यवसाये सूत्रम्—"उपस्थितत्यागायोगात्" इति । प्रकरणादुपस्थितायाः सोमक्रयणार्थमानीताया गोरेव पद्पांसुर्ग्राह्यः । तथाच पदित्वेनोपस्थितायास्तस्या एव सप्तमं पदं पांस्वर्थं ग्राह्यमिति । "ऐशानीतः सम्पूज्य गामग्निं परिक्रमयति" इति । अग्निप्रदक्षिणारम्भार्थकप्रथमपद्चलनावधि सप्तमत्वं बोध्यमिति । एवं "पदे जुहोति" इत्यत्रापि तदेव सप्तमं बोध्यम् । "वर्त्मनि जुहोति" इत्यत्रापि प्रदक्षिणवर्त्म बोध्यमिति ।

२५ अथ स्फ्याश्लिष्टेज्याधिकरणम्—

"यत् स्फ्ये आश्लिष्येत्, तदधो मृज्यात्, उरुविक्रमाय द्वादशकपालश्चरुं निर्वपेत्" इति श्रुतिः ।

'खड्गाकारः खादिरः स्फ्यश्चरोरावर्तनाय सः' ।

यत्—यदि अग्निष्टोमे यागे चरोरावर्तने चरुसंश्लेषः स्फ्ये भवेत्, तत्—तदाऽधो—भूमिभागं मृज्यात्—शोधयेत् । तत्र उरुविक्रमाय—विष्णवे द्वादशकपालं चरुं द्वादशाहुत्यर्थं कुर्यात् ।

'कपालं मृन्मयं पात्रं चक्राघटितमुच्यते ।

आसुरं (१)चक्रघटितं दैवे पित्र्ये च वर्जयेत्'

तथाचाग्निष्टोमे स्फ्याश्लेषे सति तन्निमित्तिकामिज्यां कृत्वा ऽग्निष्टोमयागः कार्य इति । तस्या इज्यायाश्च इष्टित्वेन दर्शधर्मप्राप्तेः—सर्वासामिष्टीनां दर्शपूर्णमासौ प्रकृतिः,'प्रकृतिवच्च विकृ-

---

१ कुलालचक्रेण निर्मितमित्यर्थः ।

तिः' इतिन्यायेन दर्शधर्मस्य पूर्वदिने देवताऽऽवाहनस्य प्राप्तिः । तथा च परदिने स्पर्याश्लेषसंशयेऽपि पूर्वदिने आवाहनं कार्यमेव । अन्यथा मति यागे तत्राङ्गवैगुण्यापत्तेः; इत्यत्र सिद्धान्तसूत्रम्-"न नैमित्तिकत्वात्" इति । नैमित्तिके निमित्तनिश्चयवानधिकारी । तेन पूर्वदिने तदभावान्न यागाधिकारः । प्रधानाधिकाराभावे च कथमङ्गानुष्ठानमिति पूर्वदिने नाऽऽवाहनम् । परदिने स्पर्याश्लेषे सत्यपि नाऽऽवाहनं, तत्र पूर्वदिनस्याङ्गत्वादिति तत्राऽऽवाहनबाध एव । निमित्तनिश्चयश्चासति प्रतिबन्धे अवश्यमेव कर्तव्यमित्येवंरूपः । तेन भविष्यद्विवाहादिनिमित्तकमाभ्युदयिककरणं सिद्ध्यति । अन्यथा भाविनि मानाभावेन(१)तेषामनिश्चयात्तत्रापि वृद्धिश्राद्धं न स्यात् । इज्यायां तु तादृशो निश्चयो नास्ति स्पर्याश्लेषसंशयेन संशयादिति ।

२६ अथ कृष्णलन्यायः—

"कृष्णलान् श्रपयेत्" इति व्रीहिविकृतियागे श्रूयते । कृष्णलश्च कलापाकारः स्वर्णमाषनिर्मितः । तत्र यागे व्रीहिधर्मावघातप्राप्त्या तुषाभावेऽप्यदृष्टार्थं कृष्णले ऽवघातः कार्य इत्यत्र सूत्रम्-"द्वाराऽसम्भवात्" इति । अवघातस्य वैतुष्यं द्वारं, तस्य च तत्र स्वतः सिद्धत्वादवघातो व्यर्थः । नचादृष्टार्थः । दृष्टार्थत्वे सम्भवत्यदृष्टार्थत्वकल्पनाया अयुक्तत्वाद्गौरवादिति कृष्णले ऽवघातबाधः ।

२७ अथ कपालाधिकरणम्—

"व्रीहिभिर्यजेत्, अष्टाकपालं पुरोडाशं करोति, पुरोडाशकपालेन तुषान् उपवपति" इति श्रूयते । अत्र

(१) विवाहादीनाम् ।

यागे शूर्पेण न तुषप्रस्फोटनं किन्तु पुरोडाशकपालेन । तत्र चाष्टानां कपालानां सत्त्वात् केन कपालेनेत्यनध्यवसाये सूत्रम् -"प्रथमोपस्थितिस्तन्त्रम्" इति । अयमाशयः- द्रव्यासादने पश्चिमावधि पूर्वान्तं पंक्तिक्रमेण तत्र कपालस्थापनम् । तथाच यजमानसन्निधौ यत्कपालं प्रथमपुरोडाशार्थमासादितं तस्य सन्निहितत्वेन प्रथमोपस्थितत्वेन च तदेव तुषप्रस्फोटनार्थं ग्राह्यमिति । तथाच लक्षणया प्रथमोपस्थितपुरोडाशकपालेन इत्यन्वयबोधः । अत्र पुरोडाशकपालेत्यत्र लक्षणाया आवश्यकत्वात् । लक्षणया यदि पुरोडाशप्रयोजनकं कपालमित्युच्यते तदा तत्र नोपवापाकाङ्क्षा । प्रयोजनवत्त्वेनोपस्थितस्य प्रयोजनान्तरानाकाङ्क्षत्वात् । तथाच तत्र नोपवापान्वयः स्यात् । तेनाधिष्ठाने लक्षणा कर्तव्या । पुरोडाशाधिष्ठातव्यकपालेनेत्यर्थः । अधिष्ठानन्तु स्थितिरेवेति ।

२८ अथार्थवादाधिकरणम्-

"शम्भुः सर्वदेवेश आशुतोषः सर्वकामफलप्रदश्च" इत्यर्थवादः श्रूयते । कार्यान्वितबोधकत्वन्तु सर्वशब्दानाम् । अर्थवादस्य सिद्धार्थकत्वात् अन्वयबोधाजनकत्वात् व्यर्थमेवाभिधानमित्यत्र सूत्रम्-"विधिशेषत्वात्प्रामाण्यम्" इति । विधिशेषत्वात् विध्येकवाक्यत्वात् । तथाच यस्यार्थवादस्य विधिसमभिव्याहारस्तस्य प्रामाण्यमिति । विधिश्च द्विविधः-क्लृप्तः कल्प्यश्चेति । तथाचात्र विधिः कल्प्यः । तस्मात् 'सर्वकाम्यकामः शम्भुं यजेत' इति । क्लृप्तविधिर्यथा-'वायुर्वै क्षेपिष्ठा(?) देवता' इत्यर्थवादस्य "वायव्यं श्वेतमालभेत" इतिश्रुतविधिनैकवाक्यत्वमिति ।

---

१ शीघ्रफलदात्रीत्यर्थः ।

२९ अथ विरोधाधिकरणम्—

"औदुम्बरीं स्पृष्ट्वोद्गायति" इति ऐन्द्रयागे श्रूयते । तत्रैव यागे 'सर्वा औदुम्बरी वेष्टयितव्या' इति कात्यायनोक्ता स्मृतिः । तथा च स्मृतेरपि श्रुतिमूलकत्वादुभयोः समबलत्वेन स्पृष्ट्वेत्यत्र श्रुतौ (१)उपस्पर्शलक्षणाया अयोगात्, एवं स्मृतावपि सर्वपदसङ्कोचस्यायुक्तत्वादनुपपत्तिरित्यत्र सूत्रम्–"श्रुत्या स्मृतिर्बाध्यते" इति । श्रुतेर्बलवत्त्वादिति भावः । तथा च स्मृतौ सर्वपदे सङ्कोचः–स्पर्शयोग्यभागं विहाय सर्वा वेष्टयितव्येति । नच स्मृतेरपि समानार्थकश्रुतिमूलकत्वमिति वाच्यम् । स्मृत्या ऽनुमीयमाना श्रुतिः प्रत्यक्षश्रुतिविरोधेन स्मृतिसमानार्थिका अनुमातुं न शक्यते किन्तु श्रुत्यनुगुणैवानुमातव्येति । औदुम्बरी—उदुम्बरवृक्षनिर्मिता पशुबन्धनार्थं स्थूणा, तस्या एव यूपसंज्ञेति । माधवीये तु औदुम्बरी उदुम्बरशाखेति व्याख्याता ।

३० अथ प्रतिनिध्यधिकरणम् ।

"व्रीहिभिर्यजेत" इत्यत्र व्रीहेरुपादाने कृते तदपचारे सति यागो न सम्भवति । न च यवोपादानं कार्यं विकल्पे एकोपादाने ऽन्यग्रहणस्य निराकाङ्क्षत्वेनासम्भवेनाशास्त्रार्थत्वादिति पूर्वपक्षे सिद्धान्तसूत्रे—"पूतीकाविधिदर्शनात्" "सारूप्यं तन्त्रम्" इति । तथाच प्रतिनिधिना सदृशेन कर्माऽऽचरणीयम् । अन्यथा "यदि सोमं न विन्देत, पूतीकानभिषुणुयात्' इत्यस्य वैयर्थ्यं स्यात् । अयम्भावः–व्रीहिर्न चरुसाधनं, किन्तु तदवयवस्तण्डुलः । तथाच 'व्रीहिभिर्यजेत' इत्यत्र

---

(१) सर्ववेष्टनस्मृतिबलेन स्पृष्ट्वेति पदस्य वस्त्रव्यवधानेन स्पर्शं कृत्वेत्यर्थे लक्षणाया अयुक्तत्वादित्यर्थः ।

व्रीहिशब्दस्य तदवयवे लक्षणा। तेन व्रीह्यवयवप्रत्यभिज्ञायाः शाल्यवयवेऽपि सदृशत्वदर्शनात् व्रीह्यभावे शालिर्ग्राह्य इति। एतन्न्यायमूलं वचनं।

"यथोक्तवस्त्वसम्पत्तौ ग्राह्यं तदनुकारि यत्।

यवानामिव गोधूमा व्रीहीणामिव शालयः" इति।

अन्यथा प्रतिनिध्यस्वीकारे "मौद्गश्चरुर्भवति, अयज्ञीया वै माषाः" इति माषनिषेधानुपपत्तिरप्राप्तत्वात्। अत्र च माषा इति बहुवचनं माषमिश्रितमुद्गस्यापि निषेधार्थम्। तथाच प्रतिनिधित्वेन प्राप्त्या निषेधः। एवं 'काण्डमूलपत्रपुष्पफलप्ररोहगन्धरसादिना सादृश्येन प्रतिनिधिं कुर्यात्' इति पैठीनसिवचनादपि यथायथं प्रतिनिधिर्बोध्य इति।

अत्र वदन्ति-किं तावत्प्रतिनिधित्वम्?। न हि तत्कार्यकारित्वम्। तत्रैव मुख्ये गतत्वात्। नच तदभावे तत्कार्यकारित्वम्। होमाद्ययोग्येन यजमानेन संकल्प्य यागादौ प्रतिनिधिकरणे यजमानस्य सत्त्वेन तत्प्रतिनिधावगतत्वात्। नच तदभाव इत्यस्य तदयोग्यत्वे इत्यर्थः। विज्ञेनापि यजमानेन वाचानिकप्रतिनिधिकरणे ऽसत्त्वात्। 'होतारं वृणुयात्' इति विधेः। न च तत्र होता न प्रतिनिधिः किन्त्वङ्गमेव, तत्र स्वयं प्रक्षेपस्य विधानात्। होता तु न त्यागकर्ता तस्य द्रव्ये स्वत्वाभावात् किन्तु प्रक्षेप्तोच्यते। मुख्ये यागे त्यागरूपे यजमान एवाधिकारी, अतो लक्षणं युक्तमेवेति वाच्यम्। तथाऽप्यन्यकार्यस्यान्याजन्यत्वात्। व्रीहित्वेन कारणत्वस्य श्रुतत्वात्। अन्यथा व्रीहेर्व्यभिचारेण जनकत्वं न स्यात्। उच्यते। तद्यागत्वेन तत्र विहितचरुत्वेन-एवं तच्चरुत्वेन तत्र विहितद्रव्यत्वेन कार्यकारणभावस्य वाच्यत्वादुक्तमेव लक्षणमिति।

३१ अथ फलभूमाऽधिकरणम्—

आधाने दक्षिणा श्रूयते "एका देया, तिस्रो देयाः, षट् देयाः" इति। अत्र चैकदक्षिणावरुद्धे दक्षिणान्तरस्य निराकाङ्क्षयाऽनन्वयात् वाशब्दः कल्प्यते। तेन एका वा देयेति। तथाच तिस्र इत्यत्राऽऽकाङ्क्षा भवति। वाशब्दस्य कोट्यन्तराकाङ्क्षोत्थापकत्वात्। तथा च "अल्पेनेष्टस्य संसिद्धावधिके कः प्रवर्तते" इति न्यायात् गोत्रयादिदक्षिणायामप्रवृत्तौ तद्विधानामाण्यमित्यत्र सूत्रम्—"यो भूय आरभते, तस्य फले विशेषः" इति। भूय इति बहुशब्दस्य सिद्धम्। तेन भूयः बहूपकारणाङ्गकम्, उत्कृष्टाङ्गकञ्च; एवं बहुकालकृच्छ्रसाध्यं, कृष्टोत्कर्षसाध्यञ्च। आरभते—करोति। तस्य फले विशेषो बहुकालव्यापकत्वम्। फलगतोत्कर्षविशेषश्च भवतीत्यर्थः। तेनाधिकफलार्थिना तिस्रो देया इति।

अत्र वदन्ति। "स्वर्गकामो वसन्ते आदधीत" इत्याधानविधौ स्वर्गकाम इति श्रवणात्तत्कामना—अधिकारः, नतु स्वर्गविशेषकामना। तथा चाधिकारिप्रविष्टकामनायामनुल्लिखितफलस्य यागजन्यत्वेऽतिप्रसङ्गात् कथं फलभूमेति? उच्यते। यथा दीपमात्रार्थी दीपं करोति तत्र च तैलबहुत्वे तस्याधिककालव्यापकत्वं, वर्त्युत्कर्षे दीपोत्कर्षः, कारणवैलक्षण्यात्। तथाऽत्रापि सामान्यकामनाया अधिकारात् सामान्यफलं भवत्येव, विशेषस्तु कारणवैलक्षण्यात्। विशेषफलेऽपि सामान्यधर्मोऽस्त्येव। नचातिप्रसङ्गः। अन्यफलप्रयोजकरूपासत्त्वादिति।

३२ अथानुषङ्गाधिकरणम्—

"पारमेष्ठ्यकामः परमेष्ठिनं यजते भास्वन्तम्" इति श्रु-

त्या परमेष्ठिदेवताविरोधे देवतान्तरं निराकाङ्क्षमिति । तथाच भास्वन्तमित्यत्र पारमेष्ठ्यकाम इत्यस्य यजते इत्यस्य चानुषङ्गात्कर्मान्तरविधिः । तत्कामो भास्वन्तं सूर्यं यजते इत्यत्र सूत्रम्- "वाक्यभेदापत्तेर्विशेषणत्वम्" इति । तथा च भास्वन्तमिति परमेष्ठिविशेषणम्, न तु रूपपरं, वाक्यभेदभिया रूढ्यर्थोऽपि त्यज्यत इति । एवमनुषङ्ग एकत्र समभिव्याहृतस्य पदस्य वाक्यान्तरे समभिव्याहारः । तत्कल्पनञ्च तात्पर्यकल्पनाधीनम् । तत्र च मानाभावः । यत्र तु तत्प्रमाणमस्ति तत्रानुषङ्गाधिकरणन्यायो न प्रवर्तते इति बोध्यम् ।

२३ अथ देवतासाहित्याधिकरणम्—

"अग्नीषोमीयं पशुमालभेत" इत्यत्र "द्वन्द्वात्परो यः श्रूयते स प्रत्येकमभिसम्बध्यते" इति न्यायाच्छप्रत्ययबोध्यदेवतात्वस्य प्रत्येकमन्वयेन प्रत्येकं देवतात्वं युक्तम् । अत एव 'मनोतास्यग्ने मारिरिषस्त्वन्तवे जुषस्व सर्वरीरं नियुङ्क्ष्व वाह" इति मन्त्रेण केवलाग्निप्रकाशकेन होमः सङ्गच्छते । सोमस्य होमस्तु पारिभाषिकेण प्रणवादिचतुर्थ्यन्तनाम्नेत्यत्र पूर्वपक्षे सूत्रम्- "विकल्पापत्त्या अष्टदोषग्रासात्" इति । साहित्यानवच्छिन्नयोः केवलाग्नीषोमयोर्धर्मिणोस्तात्पर्यविषयत्वे विकल्पापत्तेः । एकदेवतावरुद्धे यागे देवतान्तरविधानस्य साकाङ्क्षत्वाय विकल्पः स्यात् । तथा चाष्टदोषग्रासः । ते च वक्ष्यन्ते ।

अत एव 'यदग्नये च प्रजापतये च सायं जुहोति, यत्सूर्याय च प्रजापतये च प्रातः' इत्यत्र प्रत्येकश्रुतावपि साहित्येन देवतात्वमुक्तम् । नच यागे चतुर्थ्यन्तपदप्रयोगे समाहारः प्रयोज्य इतरेतरो वेति वाच्यम् । समाहारे साहित्यस्य विशेष्यत्वात्, तस्य च देवतात्वाभावात् । इतरेतरे तु पदार्था एव

विशेष्या इति स एव आदरणीयः। तेनाग्निप्रजापतिभ्यां स्वाहेति वाच्यम्। "द्वन्द्वात्पर" इति न्यायस्तु यत्र साहित्यान्वयो योग्यस्तत्परः। यथा शस्त्राशस्त्रहतानामित्यादौ। 'इन्द्राग्निलोकमाप्नोति तत्तीर्थे स्नानमात्रतः' इत्यादौ चेन्द्राग्न्योरेकलोकाभावादिति। तथाच मनोहामन्त्रे अग्न इति पदस्य सोमसाहित्ये लक्षणा। नच लक्षणा स्वार्थहानि–परार्थकल्पना–दोषद्वयदुष्टेति वाच्यम्। अनन्यगतिकत्वात्।

अथ विकल्पः—स द्विविधः। ऐच्छिको व्यवस्थितश्च। आद्यो यथा—"व्रीहिभिर्यजेत" "यवैर्वा यजेत" इत्यनेन यागे हेतुत्वमुभयोर्बोध्यते। तत्र चैकसाधनावरुद्धे साधनान्तरविधेर्निराकाङ्क्षतापत्त्या विकल्पार्थे वाशब्दः यवैर्वेति। वाशब्दार्थश्चान्यतरव्यवच्छेदेनान्यतरान्वयः। तेन व्रीहौ यवाभावः। सहकारियवे व्रीह्यभाव इति। नच व्रीह्यभावे यव इति यवस्य पश्चादुपदेशात् प्राप्यते, यवाभावे व्रीहिरिति कुत इति वाच्यम्। व्रीहिजन्यपुरोडाशे यवस्य सहकारित्वे व्रीह्यभावे यव इत्येव न स्यात्। नच समुच्चय एव कथं न कल्प्यते इति वाच्यम्। तर्हि एकस्य यजतिपदस्य वैयर्थ्यापत्तेः। तथाच यजेतेति पदेन प्राधान्येनैवोभयस्य हेतुत्वं बोध्यते। तच्च विकल्पं विना ऽनुपपन्नमिति। तेन यवजन्यपुरोडाशे व्रीह्यभावः कारणमवच्छेदको वा। नच यत्रोभयमस्ति तत्र को ग्राह्य इति वाच्यम्। तत्र यागाभाव एवान्यतराभावविशिष्टस्याऽन्यतरस्याभावात् इति पूर्वपक्षे सूत्रम्—"इच्छातो नियम" इति। तेन तुल्यबलयोर्विकल्प ऐच्छिकः। तथा च यत्र व्रीहिमात्रमस्ति पुरुषस्य तु न तत्रेच्छा, तत्र यागनिवृत्तिरेव। एवं यवेऽपि।

ऐच्छिकविकल्पे ऽष्टौ दोषा यथा—स्वार्थस्य व्रीहेस्त्यागः, प-

रार्थस्य व्रीह्यभावस्य कल्पनं, व्रीहिभिरिति तृतीयार्थस्य साधनत्वस्य प्रकृत्यर्थे ऽनन्वयः, अन्वयश्चाप्रकृत्यर्थे व्रीह्यभावे इति व्रीहिपक्षे चत्वारो दोषाः। एवं यवपक्षेऽपीत्यष्टौ दोषाः।

"स्वार्थत्यागो ऽन्यार्थक्लृप्तिः प्रकृत्यर्थेऽप्यनन्वयः।
अन्वयश्चाप्रकृत्यर्थे द्वयोरित्यष्टदोषकाः" इति।

अत्र वदन्ति। व्रीह्यभावस्य जनकत्वे जनकीभूताभावप्रतियोगित्वेन व्रीहेः प्रतिबन्धकत्वापत्तिः(१)। नच यवजन्ययागे तदस्त्येवेति वाच्यम्। नहि "यवैर्यजेत" इत्यनेन पृथग्यागविधिः, वाक्यभेदापत्तेः। किन्तु प्राप्तपुरोडाशकरणकयागे व्रीहियवयोः साधनत्वविधिः। तथाच यवयजन्ये यागे व्रीहेः फलोपधानाभावेऽपि जननयोग्यताऽस्त्येवेति तस्य प्रतिबन्धकत्वं विरुद्धमेव। तयोर्जनकत्वञ्च तृणारणिमणिन्यायेनेति। अत एव

'सपिण्डीकरणादूर्ध्वं सांवत्सरिकमाचरेत्'।

इत्यनेन प्राप्ते सांवत्सरिके श्राद्धे मृताहविधानम्। तदसम्भवे तत्रैव कृष्णैकादश्यां विधानं, नत्वेकादशीनिमित्तकश्राद्धान्तरं विधीयते। तथा सति तस्य श्राद्धस्य सपिण्डीकरणोत्तरत्वेन मृताहानिमित्तकत्वेन च त्रैपुरुषिकत्वापत्तेरिति। नचैवमपि तस्य मृताहानिमित्तकत्वमेवेति वाच्यम्। 'एकोद्दिष्टं मृताहनि' इत्यस्य मृताहनिमित्तकत्वयोग्यताया आर्थत्वात्। योग्यता च ताद्दशविधिविषयत्वमिति।

अत्राहुः—व्रीह्यभावस्याङ्गत्वं न श्रुतं, किन्तु कल्प्यम्। तथा चावच्छेदकत्वेनोपपत्तौ न तस्य कारणत्वं कल्प्यते। तेन व्रीह्यभावावच्छिन्नत्वेन यवस्य हेतुतेति। अभावस्यावच्छेदकत्वकल्प-

(१) तद्वत्ताबुद्धिं प्रति तदभाववत्ताबुद्धेरिव तुल्यवित्तिवेद्यन्यायात्तदभाववत्ताबुद्धिं प्रति तद्वत्ताबुद्धेः प्रतिबन्धकत्वमिति भावः।

नमेवैको दोषो बोध्यः । केचित्तु व्रीहेर्मुख्यत्वं यवस्यानुकल्पत्वमुभयोपस्थितौ मुख्यत्वाद् व्रीहिरेव ग्राह्य इति वदन्ति । तन्मते—

'वैशाखे पौर्णमास्यां तु नरो भक्तिसमन्वितः ।
शम्भुं हरिं वा सम्पूज्य स्वर्गलोके वसेच्चिरम्' ॥
इत्यैच्छिकविकल्पोदाहरणं बोध्यम् ।

व्यवस्थितविकल्पो द्विविधः । मुख्यकल्पानुकल्पभेदेन शस्ताशस्तभेदेन च । आद्यो यथा—'कुशैः काशैर्भवेच्छ्राद्धम्' इत्यत्र काशे कुशाभावः सहकारी, नतु कुशे काशाभावः । सत्यपि काशे कुशस्यैव ग्रहणान्मुख्यत्वात् । तेनात्र षट् दोषाः । कुशपक्षे स्वार्थहानिः परार्थकल्पना कुशजनकत्वबाधः अभावस्यावच्छेदकत्वम् । काशपक्षे स्वार्थहानिः स्वार्थस्य जनकत्वाभावश्चेति । शस्ताशस्तभेदश्च—क्वचिच्छक्त्यपेक्षः क्वचिदैच्छिक इति यथायथं दोषा बोध्या इति । शस्तत्वमधिकफलजनकत्वमिति ।

३४ अथ यावज्जीवाधिकरणम् ।

"सन्ध्यामुपासते ये तु" इत्याद्यर्थवादोपस्थितफलकामनाया अधिकारत्वबोधात् । अन्यथा ऽर्थवादवैयर्थ्यात् । तथा च फलकामनाविरहे ऽधिकाराभावात्तदकरणे प्रत्यवायो न स्यात् । अशौचकालवदित्यत्र पूर्वपक्षे सूत्रम्—"यावज्जीवश्रुतिविरोधात्"अ० २पा० ४सू० २इति(१)।"यावज्जीवमहरहः सन्ध्यामुपासीत" इति विधिना"शुचिः कुर्यात्"इत्यनेनैकवाक्यतया (२)शौचकालीनजीवनस्य सन्ध्यावन्दनव्याप्तिर्बोधितेति तद्बाधापत्त्या न फलकामना

(१) 'कर्तुर्वा श्रुतिसंयोगात्' इति पाठः ।
(२) 'शुचिश्चकालजीवी कर्माधिकारी' इति सूत्रम् ।

तत्राधिकारः। अर्थवादस्तु विध्यपेक्षया दुर्बलः स्तुतिरूपः कर्तृ-प्रोत्साहार्थम्। तथाचोक्तम्-'प्ररोचना चाङ्गतयोपयुज्यते' इति।

३५ अथ जातेष्ट्यधिकरणम्।

अश्वयुक्कृष्णपक्षश्राद्धादौ पक्षव्यापकश्राद्धस्य प्रशस्तत्वम्। तच्चाधिकफलवत्त्वम्। तेन फलजनकत्वं तस्य सिद्धम्। तथाच फलकामनाया अधिकारत्वे काम्यत्वान्नित्यत्वहानिः स्यादित्यत्र भाष्यम्-'जातेष्टिवत्सम्वलिताधिकारात्'इति। यथा-जातेष्टेरकरणे प्रत्यवायो 'बालहा भवेत्' इतिश्रुतेः। करणे पुत्रपूतत्वं फलम्। तथाच पुत्रोत्पादकस्य तत्संस्कारकामना नियता भवत्येवेति जीवित्वसहिता फलकामना जातेष्टावधिकारः। तथा पक्षश्राद्धप्रवृत्तस्य फलकामना नियताऽस्त्येव। अन्यथा प्रत्यवायपरिहारमात्रस्य चरमकल्पाल्लघूपायादेव सिद्धेः तन्मात्रार्थं बहुवित्तव्ययाऽऽयाससाध्ये पक्षश्राद्धे प्रवृत्तिर्न स्यादिति। तत्प्रवृत्तस्याधिकोद्देश्यताऽस्त्येव। तथाच जीवित्वसहिता फलकामना तत्राधिकार इति काम्यत्वेऽपि नावश्यकरणत्वहानिः।

३६ अथ काम्यस्य नित्यापेक्षया विलम्बिताधिकारः-

"कार्तिक्यामायुष्कामः प्रातर्घृतं दद्यात्" इति श्रुत्या प्रातर्दानं विहितम्। अग्निहोत्रमपि तत्काले कर्तव्यम्। तथा च किमादौ कर्तव्यमिति तत्र सिद्धान्तः-काम्यं हि कामनापेक्षं, सा चेष्टसाधनत्वज्ञानसापेक्षेति विलम्बिताधिकारम्(१)। "यावज्जीवमग्निहोत्रं जुहोति" इति श्रुत्या कृताग्निग्रहणस्याग्निहोत्रं जीवनमात्रापेक्षमिति नित्यं झटित्यधिकारम्। अतो ऽग्निहोत्रमादौ कार्यम्। नन्वेवमुपरागे श्राद्धात्पूर्वं दानं न स्यात्।

(१) विलम्बितो ऽधिकारो यस्मिंस्तदिति बहुव्रीहिः। एवं झटित्याधिकारमित्यत्रापि बोध्यम्।

काम्यत्वेन तत्र विलम्बिताधिकारात् । श्राद्धस्य नित्यत्वेन झटित्यधिकारात् । तत्काले ऽधिकृताकरणेन प्रत्यवायप्रसङ्गात् । श्राद्धानन्तरञ्च दाननिषेधात्तदुत्तरमपि न स्यादिति दानस्य बाध एव स्यात् । नच दानविधिबलाद्भविष्यति दानविधेः श्राद्धानधिकारिजीवत्पितृकादिपरत्वेनोपपत्तेः । उच्यते-

'स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने'

इति वचने, तथा—

'स्नाने दाने तथा जप्ये होमे श्राद्धे सुरार्चने ।
पुण्यः स कालो भविता नित्यमेव सुरेश्वर' ॥

इति वचने च स्नानानन्तरं दानस्य पाठात् श्राद्धात् पूर्वं पाठाच्च दानमेवाऽऽदौ । तदानीं श्राद्धाकरणेन जातस्य प्रत्यवायस्य पश्चात् श्राद्धकरणेन नाशात् । यथा शरदि नवश्राद्धाऽनाचरणजन्यप्रत्यवायस्य गौणकाले वृश्चिके करणेन नाश इति ।

अत्रेदं बोध्यम्—यदि स्वल्प उपरागे कालः तदा श्राद्धमेव कर्तव्यं निरबाधेन काम्यस्यान्याय्यत्वात् । यदि स्नानतर्पणाभ्यामेव कालो गच्छति तदा कालाभावात् श्राद्धं नास्त्येव ।

३७ अथ तदन्तापकर्षन्यायः—

"अनुदिते जुहोति" इत्यनेनारुणोदये होमस्य कर्तव्यता विहिता । स्नानकालोऽपि स एव । तथा च निरवकाशत्वाद्धोम एव कर्तव्यस्तदानीं न स्नानं, तत्पूर्वञ्च न स्नानं रात्रित्वात् । तेन स्नानं विनैव होमः । तेन 'स्नातो अधिकारी भवति' इत्यत्र (१)सङ्कोच इति पूर्वपक्षे सूत्रम्-"तदन्तापकर्षादुपपत्तेः" इति । रात्रावलक्ष्मीः कालकर्त्री । दुःस्वप्नेन्द्रियश्रवणादिना

---

(१) अनुदितहोमकर्त्रतिरिक्ततयेति भावः ।

अशौचं जातम्। नहि सति अशौचे होमः। अतः स्नानं तत्पूर्वं कर्तव्यं सन्ध्यावन्दनञ्च पूर्वं सन्ध्यावन्दनहीनस्य कर्मानर्हत्व-बोधनात्। सूत्रार्थस्तु तदन्तत्वादपकर्षः–तस्य पूर्वकर्तव्यतेति। तथा च स्नानानन्तरकर्तव्यत्वात्स्नानस्यापकर्षः। विहितकालं विनाऽपि पूर्वाचरणमिति। तेनारुणोदयस्नानविधिरनुदितहोमीतरपरः।

३८ अथ तदाद्युत्कर्षन्यायः—

उत्कर्षः स्वकालं विहायोत्तरकालकर्तव्यता। तथा च यत्कर्म तदादिभूतं तत्स्वकाले ऽकृत्वा तदुत्तरकाले कर्तव्यम्। यथा सपिण्डनं स्वकाले ऽपराह्णे कृत्वा तद्दिवसीयं सांवत्सरिकं मध्याह्नाभावेऽपि कर्तव्यं सपिण्डनस्य तदादित्वात्। नच तदन्तापकर्षन्यायात्सपिण्डनं पूर्वाह्णे कृत्वा सांवत्सरिकं मध्याह्ने क्रियतामेकस्य कालत्यागे विनिगमनाभावादिति वाच्यम्। सपिण्डनस्य भावरूपपितृत्वप्राप्तिफलकत्वात्। भावात्मकफलं तु मुख्यकालेनैव भवतीति। सांवत्सरिकस्य प्रत्यवायपरिहारमात्रार्थकत्वेन गौणकालेऽपि सम्भवात्।

अत्र केचित्—

'तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते'

इतिवचनात् सपिण्डनात्पृथक् न सांवत्सरिकं कर्तव्यमिति वदन्ति। तन्न—

'असंक्रान्तेऽपि कर्तव्यमाब्दिकं प्रथमं द्विजैः।
तथैव मासिकं पूर्वं सपिण्डीकरणं तथा'॥

इत्यस्य निर्विषयत्वापत्तेः। तेनैव च सपिण्डत्वमिति वचनस्यानाकरत्वात्। साकरत्वेऽपि एकादश्यादिक्रियमाणपतितसपिण्डनपरमिति।

३९ अथ संयोगपृथक्त्वन्यायः—

"खादिरे पशुं बध्नाति" खादिरं वीर्यकामस्य यूपं करोति" इति श्रुतिभ्यां खादिरस्य नित्याङ्गत्वम्, काम्याङ्गत्वञ्च बोधितम्। काम्यञ्च कामनासापेक्षत्वादनियतम्। तथाच सति अनित्यसंयोगविरोधः। संयोगः सम्बन्धः प्रकृते तादात्म्यमिति यावत्। नच खादिरः काम्य एव। तथा काम्यत्वेन प्राप्ते खादिरे पशुबन्धनाश्रयत्वमात्रं "खादिरे पशुं बध्नाति" इत्यनेन विधीयते। तेन यत्र कामनाविरहाद्यूपाभावस्तत्र पशुबन्धनाभाव एवेति वाच्यम्। खादिरे इत्यस्य सप्तम्यन्तस्य वैयर्थ्यापत्तेः। सान्निध्यादेवाश्रयलाभात्। यस्यानियताङ्गत्वं तत्र नित्याङ्गत्वं नास्त्येव। यथा "चमसेनाऽपः प्रणयेत्, गोदोहेन पशुकामस्य" इति। चमसो—यत्काष्ठनिर्मितं प्रणीतार्थं पात्रं सः। गौर्दुह्यते ऽत्रेति गोदोहो दोहनपात्रम्। गोदोहेनाऽपां प्रणयनं कामनासत्त्वे एवेति तस्यानियताङ्गतेति। तथा च खादिरे नियतत्वमनियतत्वञ्च विरुद्धमित्यत्र सूत्रम्—"एकस्योभयत्वे संयोगपृथक्त्वम्" इति। एकस्याङ्गस्योभयत्वे नित्यत्वकाम्यत्वोभयत्वे संयोगयोः प्रयोजकधर्मसम्बन्धयोः पृथक्त्वं द्वित्वं प्रयोजकमिति। नियताङ्गत्वप्रयोजकं यागं प्रति नियतपूर्वसत्त्वं, काम्याङ्गत्वप्रयोजकं यागं प्रति नियतपूर्वासत्त्वं यस्याङ्गत्वप्रयोजिका कामना। एतदुभयसम्बन्धयोः पृथक्त्वमस्त्येव। खादिर इति। अयम्भावः—यूपे पशुं निबध्याथ प्रोक्षयेदालभेत्। तत्र परिभाषया यूपे पशुनिबन्धनमावश्यकम्। ततः खादिरयूपस्य नियतत्वमेव। तत्रैव यूपे काम्यत्वं बोधितम्। अपिना नियतत्वं कर्तुं समर्थम्। अतोऽत्र न नित्यत्वकाम्यत्वयोर्विरोधः। तेन यस्य न कामना तेनापि खादिरः कर्तव्य एवेति। माधवीये तु "खादिरे पशुं बध्नाति"

इत्यत्र "खादिरो वै यूपो भवति" इति पाठो लिखितः। गोदोहे तु कामनासम्बन्धमात्रम्। अयञ्च न्यायो ऽङ्गविषयो जातेष्टिन्यायस्तु प्रधानविषयः।

४० अथ व्यक्तिवचनन्यायः—

"आग्नेय्या जुहोति" इति श्रूयते। आग्नेयी अग्निप्रकाशिका ऋक्। तस्याश्च स्थाने स्थाने नानाविधायाः श्रुतत्वात् सर्वा एव ग्राह्या इति केचित्, तन्न। प्रच्छन्नवेदवर्त्तितादृशऋक्शङ्कया ऽप्रवृत्तेः। तथा च यस्यामृचि इच्छा तयैव जुहुयादित्यत्र सिद्धान्तसूत्रम्—"व्यक्तिवचनानां सन्निहितविशेषपरत्वात्" इति। व्यक्तिमात्रवाचकपदानां सन्निहिततरसन्निहिततमसन्निहितपरत्वात्। व्यक्तिवाचकास्तु योगार्थमात्रपुरस्कारेण प्रवृत्ताः पाचकादिशब्दाः। पाचकशब्दः पाककर्ममात्रे प्रयुज्यते। पाचकमात्रवृत्तिधर्मश्च न पाककर्तेति न तत्र प्रयोगः। एवञ्चाग्नेयीपदमपि व्यक्तिमात्रवाचकम्। अग्निर्देवता अस्या इति योगार्थत्वात्। तथाच सन्निहितैव ऋक् ग्राह्येति। मीमांसकमते रूढं घटादिपदं जातिवाचकम्। योगार्थप्रवृत्तम्पदं व्यक्तिमात्रवाचकं तत्र समुदायशक्त्यभावादिति। तेन गां दद्यादित्यत्र यत्रेच्छा तां गां दद्यात्। तत्र नायं न्यायः व्यक्तिवाचकत्वाभावादिति।

४१ अथ पणपुराणन्यायः—

"पुराणं षोडश पणा" इत्यत्र षोडशपणघटितं पुराणं श्रुतं तत्र च षोडशत्वं चरमव्यक्तेः। तथाचान्येषां पणानां कथं तद्घटकत्वमिति चेन्न, प्रत्येकापेक्षया सर्वेषां षोडशत्वात्।

४२ अथ दण्डापूपन्यायः—

पिष्टकेषु पाकार्थं स्थाल्यामधिश्रितेषु एकस्मिन् पक्षे तद्बुद्-

रणं सूच्यग्रेण दण्डेन क्रियते । अत्र च अपूपस्योद्धरणे दण्डस्योद्धरणं भवतीति ।

४३ अथ द्यूतपणन्यायः—

द्यूते प्रथमक्रीडायां यः पणः कृतः ततो द्विगुणः पणो द्वितीयवारक्रीडायां पराजयिना दुःखात्क्रियते । एवं तृतीयवारं दारपितृगुणादि । अत एव जिकनभट्टेन प्रथमप्राजापत्यानन्तरं द्वितीयादिप्राजापत्ये दुःखाधिक्यादेकधेनुर्नोचिता किन्तु धेनुद्वयादीत्युच्यते ।

४४ अथ कपिञ्जलाधिकरणम्—

"कपिञ्जलानालभेत" इति श्रुत्या कापिञ्जलगतं बहुत्वं बोधितम् । तच्च विवक्षितं विधेयगतसंख्यात्वात् । कपिञ्जलस्यान्यतो ऽप्राप्तत्वाद्विधेयत्वम् । बहुत्वञ्च त्रित्वमारभ्य परार्द्धपर्यन्तमित्यनध्यवसायेनाप्रवृत्त्या तद्वेदाप्रामाण्यापत्तिरित्यत्र सूत्रम्—"प्रथमोपस्थितेस्तन्त्रत्वात्"अ०११पा०१सू०४३ इति(१)। त्रित्वोत्पत्त्यनन्तरं त्रित्वसहितैकत्वेन चतुष्ट्वं जन्यते इति मते त्रित्वस्य प्रथमोपस्थितत्वात्तदेव बोध्यते । यस्य मते ऽपेक्षाबुद्धिविशेषसहकृतेनैकत्वत्रयेण त्रित्वं जन्यते इति, तन्मते चतुष्ट्वोत्पत्तिकाले त्रित्वस्यानुपस्थितत्वान्न पूर्वव्याख्या समीचीना । किन्तु प्रथमोपस्थितिशब्देन लाघवमुक्तम् । तथाच व्यक्तिलाघवात् त्रित्वमेव बहुत्वमिति । कपिञ्जलो जलचरः पक्षिविशेषः ।

४५ अथ तक्षसूत्राधिकरणम्—

"पर्यङ्कीयतक्षसूत्रे च्छिन्ने आयुषीमिष्टिं निर्वपति" "आश्विन्यां जुहोति" इति श्रुतिः । पर्यङ्कपरिमाणज्ञापनार्थं तक्ष्णा

---

(१) "प्रथमं वा नियम्यते कारणादतिक्रमः स्यात्" इति पाठः ।

यत्सूत्रं पर्यङ्कार्थककाष्ठे ऽर्पितं तस्य दैवाच्छेदे इत्यर्थः । अत्र च इष्टेः प्रधानत्वकल्पने फलकल्पनाऽधिकारकल्पनयोर्गौरवापत्त्या (१)पर्य्यङ्कस्यैवाङ्गित्वं कल्प्यते इति पूर्वपक्षे सूत्रम्—"अलौकिकस्य लौकिकाङ्गत्वायोगात्" इति । अयम्भावः—अङ्गस्य प्रधानविधिसापेक्षत्वं नियतम् । पर्य्यङ्के च प्रधाने विध्यभावादिष्टेर्न तदङ्गत्वं किन्तु सूत्रच्छेदनिमित्तकं तत्सूचितामङ्गलनाशाय कर्मान्तरमेवेति ।

४६ अथ आरम्भणीयन्यायः—

"आग्नावैष्णवमेकादशकपालं निर्वपेत् दर्शपूर्णमासावारिप्समानः" इति श्रुतावारम्भणीयेष्टेर्दर्शपूर्वकाले कर्तव्यता बोधिता । तथा तस्या दर्शाङ्गत्वमेव कल्प्यते कर्मभेदे गौरवादित्यत्र सिद्धान्तः-"तस्या अतः सफलत्वात्" इति(२) । यथा "आग्नावैष्णवमारम्भणीयाख्यं जुहोति वसुकामः" इति श्रुत्या सफलत्वबोधनात्, तदेकवाक्यतया चैकमेव कर्मेति । तथा चारिप्समान इत्यनेन दर्शारम्भकालकर्तव्यत्वमात्रं बोधितं नत्वङ्गत्वमिति ।

४७ अथाङ्गस्य प्रधानकालान्वयाऽनन्वयौ—

शिखाबन्धनस्याङ्गत्वं "विशिखो व्युपवीतश्च यत्करोति न तत्कृतम्"इत्यनेन श्रूयते । कर्मभेदे ऽङ्गानां भेदादङ्गस्य प्रधानकालान्वयनियमात् प्रतिकर्म पृथक् पृथक् शिखाबन्धनं कर्तव्यमि-

(१) पर्यङ्केष्टेरेवेत्यर्थः ।

(२) "सकृद्वा ऽऽरम्भसंयोगादेकः पुनरारम्भो यावज्जीवप्रयोगात्" (अ० ९ पा० १ अधि० ११ सू० ३१) इति सूत्रं भाष्यादिपुस्तकेषु दृश्यते ।

त्यत्र सिद्धान्तः—साधारणे ऽङ्गे प्रधानकालान्वयानियमात् किन्तु असाधारणे प्रधानप्रयोगान्तर्गतेऽङ्गे प्रधानदेशकालान्वयनियमः। श्राद्धादिपूर्वदिनकर्तव्यनिमन्त्रणादिवारणाय प्रधानप्रयोगान्तर्गते इति।

४८ अथ समं स्यादश्रुतित्वादिति न्यायः—

"अश्वं प्रस्तोतृप्रतिहर्तृभ्याम्" इति यागविशेषे एकाश्वद्क्षिणोभयोः श्रूयते। अत्र कीदृशो भाग इत्यत्र सिद्धान्तः-"समं स्यादश्रुतित्वात्" (अ० १० पा० ३ अधि० १३ सू० ५३) इति। समभागकल्पनमित्यर्थः(१)।

४९ अथानेकार्थत्वाकल्पना—

"आदित्यो वै यूपो भवति" इति। अत्राऽऽदित्यपदेन आदित्यवर्ण उच्यते। आदित्यस्य यूपत्वासम्भवात्। तथा च आदित्यपदस्य आदित्यवर्णे शक्तिरेवाऽऽदित्यपदप्रयोगादित्यत्र सूत्रम्-"अन्यायश्चानेकार्थत्वम्" इति। लक्षणयाऽप्युपपत्तौ न शक्तिः कल्प्यते। शक्तिकल्पने नानार्थता स्यात् सा चायुक्ता। अत्र च बोधकाभावे सतीति बोध्यम्। तेन हरिपदादौ न दोषः। तत्र शक्तिग्राहकमानस्य कोशस्य बोधकत्वादिति।

५० अथ प्रक्रमाधिकरणम्—

"मनसा सङ्कल्पयति, वाचा ऽभिलपति, कर्मणा चोपपाद-

---

(१) वस्तुतस्तु इदं सूत्रं पूर्वपक्षसाधकम्। "अतुल्याः स्युः परिक्रये विषमाख्या विधिश्रुतौ परिक्रयान्न कर्मण्युपपद्यते दर्शनाद्विशेषस्य तथाऽभ्युदये" इति सूत्रेण—दीक्षावाक्ये प्रतिहर्तुस्तृतीयित्वसमाख्यानात् प्रस्तोतुश्चार्द्धित्वश्रुतेः समाख्याश्रुतिबलाद्विषमैव दक्षिणेति सिद्धान्तितम्। उभयसमुदायस्याचेतनत्वेन सम्प्रदानत्वासम्भवाद्दक्षिणा विभज्यैव दातव्येति च भाष्यादितोऽवगन्तव्यम्।

यति, प्रक्रमे च सकुशतिलं सलिलं त्यजति" इति श्रुत्या प्रक्रमे कर्मारम्भसमये कुशतिलसहितजलत्यागो विहितः। आरम्भश्च मनसा सङ्कल्पयतीत्यनेन बोधिता कर्मेच्छैव। तथा च कर्मकरणेच्छाकाल एव सलिलत्याग इत्यत्र सिद्धान्तः—"तस्याः प्रक्रमत्वासम्भवात्" इति। इच्छायाः पूर्वमासपूर्वदिनादावपि सम्भवात्तस्या न प्रक्रमत्वं किन्त्वभिलापस्य। तथा चाभिलापनिष्पत्तौ सकुशतिलजलत्यागः कार्य इति।

५१ अथ पृथग्विधौ गुणविधानासम्भवः—

"स्वर्गं नयति चात्मानं तथा पितृगणानपि।
कल्पे यः स्नाति तपसि यत्किञ्चित्सलिलाशये" ॥

इति श्रूयते। कल्पे—उषसि। तपसि—माघे। अत्र च न कर्मान्तरविधिः, किन्तु प्राप्तनित्यस्नाने माघाख्यगुणविधिरिति तेन पृथक् न सङ्कल्प इत्यत्र सिद्धान्तः—"पृथग्विधाने गुणविधानायोगात्" इति। पृथग्विधानं प्रकरणान्तरे विधानम्। नित्यस्नानप्रकरणे माघस्नानाविधानात्कर्मान्तरमेवेति।

५२ अथ सर्वशक्त्यधिकरणम्-

ननु नित्यस्य यथा किञ्चिदङ्गहान्याऽपि सिद्धिस्तथा काम्यस्यापि स्यात् विहितत्वाविशेषादित्यत्र सिद्धान्तसूत्रम्—"काम्ये सर्वशक्तिमानधिकारी" इति। अयमर्थः— काम्यापूर्वं प्रति तत्तदङ्गानां हेतुत्वेनैकस्याप्यभावे काम्यापूर्वानिष्पत्तेः। नित्ये तु काम्यापूर्वं नास्ति, किन्तु नित्यानाचरणस्य प्रत्यवायहेतुत्वम्। तथा च शक्ययावदङ्गसहितप्रधानानाचरणस्य प्रत्यवायहेतुत्वं कल्प्यते नित्ये प्रतिनिध्युपदेशात्। अशक्तावन्नोत्सर्गमात्रेण श्राद्धनिर्वाहविधानाच्च शक्येति विशेषणम्।

एतच्च बोधकाभावे सतीति बोध्यम् । "यदि सोमं न विन्देत्, तदा पूतीकानभिषुणुयात्" इति बोधकम् । तथा च सोमप्राप्त्या सङ्कल्पेन कर्मारम्भे सति यदि सोमापचारस्तदा पूतीको ग्राह्यः । आरब्धसमापनस्याऽऽवश्यकत्वात् । नतु प्रथममेव सोमालाभे पूतीकानादाय सङ्कल्प इति ।

५३ अथ तिर्यगधिकरणम्-

यथा जैमिनिसूत्रम्-"तिर्यक्पङ्ग्वनार्षेयदेवानां कर्मसु नाधिकारः" इति(१) । तिरश्चां विशिष्टज्ञानाभावात्, पङ्गोः प्रचरणशक्त्यभावेन 'उत्थाय पूर्णां जुहोति' इति कर्मणो बाधात्, ऽनार्षेयेति-नत्र आर्षेया ऋषिधर्मा येषां ते ऽनार्षेया अन्धमूकबधिराः । यथा-कश्चिदृषिः परद्रव्यादिवीक्षणे रागोत्पत्तिसम्भवेन नयने निमील्य तिष्ठति न किञ्चित्पश्यति । एवं कश्चिदृषिः परद्रोहमिथ्यावचनसम्भवेन यत्किञ्चिन्न वक्ति, मौनी तिष्ठति । तथा कश्चिदृषिः परनिन्दाश्रवणजन्यदोषपरिहाराय वनान्तं गत्वा तिष्ठति, किञ्चिन्न शृणोतीति । तथाचान्धस्य वीक्षणाभावात् 'यजमानवीक्षितं हविर्जुहोति' इत्यादिबाधात्, मूकस्य मन्त्रोच्चारणासामर्थ्यात्, बधिरस्य श्रोत्राभावेन लौकिकवैदिकव्यवहाराभावात्, देवानान्तु मन्त्रमयत्वेनाचेतनत्वात् । अत एव देवग्रामो हस्तिग्राम इत्यादयो गौणप्रयोगाः ।

अत्र वदन्ति—तिरश्चां विशिष्टज्ञानाभावात्, देवानां विग्रहशून्यत्वेनाचेतनत्वात्प्रसक्तिरेव नास्ति कथमधि-

---

(१) "कर्तुर्वा श्रुतिसंयोगाद्विधिः कार्त्स्न्येन गम्यते" (अ० ६ पा० १ अधि० २ सू० ५) इति पाठोऽन्यपुस्तकेषु ।

कारनिषेधः । अन्यथा (१)घटादीनामपि निषेधो बोध्येत । तत्राहुः–येषां तिरश्चां विशिष्टज्ञानमस्ति वालिसुग्रीवादीनां, तेषामनधिकारबोधनात् । देवानां तु विग्रहसत्त्वेन चैतन्यमस्त्येव "इन्द्रः सहस्राक्षः" इति श्रुतेः । किन्तु तेषामेकदा नानायागसान्निध्यासम्भवेन यागीयदेवतात्वासम्भवात् मन्त्रस्य देवतात्वमुच्यते । तथा च देवानां यागोद्देश्यत्वयागकर्तृत्वविरोधान्न कर्मण्यधिकारः ।

वस्तुतस्तु तिरश्चां वर्णाश्रमाभावादेवानधिकारः प्राप्त एव । देवानान्तु मध्ये यो यष्टा स स्वं विहायान्येषां करणे ऽविरोधात्, यथा कृष्णले ऽवघातबाधः । तथा स्वोद्देश्यकयागबाधेऽपि न कर्मवैगुण्यमिति । यत्र चान्यमात्रदेवतायागस्तत्र स्वाच्छन्द्येनाधिकारः । एवं दानेऽपि । अत एवेन्द्रादीनां महाभारतादौ यागश्रुतिरप्युपपन्नेति ।

५४ अथ पश्वधिकरणम्—

"पशुना रुद्रान् यजेत" इति श्रूयते । अत्र बहुरुद्रोद्देश्यकएकपशुरनुचितोऽतो रुद्रसमसंख्याः पशवो ग्राह्या इतिपूर्वपक्षे जैमिनिसूत्रम्—"असति बाधे वैभक्तिकसंख्याया अत्यागात्" इति(२) । पशोर्विधेयतया तद्गतसंख्या विवक्षिता । रुद्रानिति बहुवचनेन साहित्येन देवतात्वबोधनाच्च प्रोक्षणे नानुपपत्तिः । रुद्रेभ्यः प्रोक्षयामीति सकृदेव प्रोक्षणादिति ।

५५ अथ सहसाहित्यविवेकः—

तुल्यक्रियाणां (रूपाणां) परस्परसापेक्षाणामेकक्रियार्हत्वं

---

(१) घटस्थजलप्रतिमादीनामिति यावत् ।

(२) एतदधिकरणसिद्धान्तसूत्रं-"शब्दवत्तूपलभ्यते, तदागमे हि तद् दृश्यते तस्य ज्ञानं हि यथा अन्येषाम्" (अ० ४ पा० १ अधि० ५ सू० १५) भाष्यादिपुस्तकेषु ।

साहित्यम् । (१)अनेतम्भूत सहत्वमिति । तुल्यरूपत्वञ्च तत्क्रिया-न्वय्येकतरधर्मिविशेषणत्वेनान्यतरस्यानुपस्थितत्वम् । तेन—

"दामोदराय नभसि तुलायां लोलया सह ।
प्रदीपं ते प्रयच्छामि नमो ऽनन्ताय वेधसे" ॥

इत्यत्र सहत्वमेव दामोदरविशेषणत्वेन लोलाया उपस्थितेः । उक्तञ्च तुल्यरूपत्वं 'घटं पटञ्च पश्यति' इत्यत्राप्यस्ति एकस्याः क्रियायाः समूहालम्बनात्मिकाया विषयत्वात्, साहित्यं तु नास्त्यतः परस्परसापेक्षायामिति । तत्क्रियान्वयियावद्धर्मिनिरूप्यधर्मोपस्थितिविषयाणामित्यर्थः । "अग्नीषोमाभ्यां स्वाहा" इत्यादिलक्ष्ये द्वित्वादिः साधर्म्यम् । सहस्थले तु लोलायुतदामोदरत्वम् । तेन धर्मेणोभयोरुपस्थितिविषयत्वञ्च । चैत्रमैत्रौ स्वग्रामौ गच्छत इति वारणाय एकक्रियेति । तत्र गमनक्रियायाः प्रत्येकं समाप्तत्वात् । ननु तथापि द्वन्द्वेन कथं साहित्यबोधः ? वचनक्रियापेक्षया साहित्यात्, क्रियायां शब्दोपात्तत्वविशेषणाभावादिति ।

५६ अथ खलेवालीन्यायः—

सोमयागविकृतौ "खलेवाली यूपो भवति" इति श्रूयते । खलेवाली बलीवर्दबन्धनाय खले निखातस्य मेढिकाष्ठस्य संज्ञा । तथा च यूपधर्मा अष्टाश्रीकरणादयः अत्रापि कार्या इति(२) ।

---

(१) अतुल्यरूपाणामित्यर्थः ।

(२) वस्तुतस्तु खलेवालीस्वरूपभङ्गभिया अष्टाश्रीकरणतक्षणादियूपोत्पत्तिसाधनसंस्काराणां बाध एव । ये तु खलेवालीस्वरूपाविरोधिनो यूपसंस्काराः पर्यूहणादयस्ते एवात्र कार्या इति । स्पष्टञ्चेदं सुबोधिन्यां दशमाध्याये (पा० २ अधि० ३२ सू० ६९)

५७ अथ प्रतिपत्त्यधिकरणम्—

"शकृत्संप्रविध्यति, लोहितं निरस्यति, गुदेनोपयजति, सर्वं जुहोति" इत्यग्नीषोमीयपशौ श्रूयते। शकृत्संप्रविध्यतीति दृष्टान्तार्थम्। यथा पशोरुदरवर्ति शकृत् त्यजति, तथा लोहितमपि त्यजति। अन्यत्र पशौ शीर्षमांसोपक्रमेण होमः। अत्र तु गुदमांसोपक्रमेणेति। तथा च "यज्ञशेषमृत्विग्भ्यो ददाति" इति परिभाषया मांसस्य उत्तरा प्रतिपत्तिः प्राप्ता। अत्र च सर्वप्रहरणेन प्रतिपत्त्यभावात्कर्मवैगुण्यं स्यादित्यत्र सिद्धान्तः—"यदि कारानुपपत्तेः" इति। यदि प्रतिपाद्यं स्यात्तदा प्रतिपत्तिरङ्गमित्यर्थः।

५८ अथ आष्टमिकविकृत्यधिकरणम्-

दर्शदिवसमपेक्ष्याष्टमदिने क्रियते इत्याष्टमिकी विकृतिर्दर्शयागस्य। यथा श्रुतिः—" अष्टमे हि सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः" इति। अस्य यागस्येष्टित्वेन दर्शविकृतित्वम्। तथाच दर्शधर्मातिदेशेन षड्विधहोमद्रव्याङ्गकत्वं प्राप्तम्। तथा चात्र सौर्यमित्येकवचनश्रुतावपि चरुषट्कं कार्यं करणगतषट्त्वस्यापि प्राप्तत्वात् इति पूर्वपक्षे सिद्धान्तः—"एकोद्देश्यकत्वेनाकांक्षितत्वात्" इति। अत्रैकदेवतायाः सूर्यस्योद्देश्यत्वेन एकचरुरेवाकांक्षितः। अतोऽतिदेशप्राप्तस्यापि षट्त्वस्य बाध एव। दर्शे तु षट्द्रव्यस्यैव देवताभिधानादिति।

५९ अथ धान्यमस्यधिकरणम्—

"धान्यमसि, इति तण्डुलानावपति" इति श्रूयते। अत्र मन्त्रलिङ्गेन धान्यप्रकाशनात्तण्डुलशब्दो धान्यपरः। युक्तश्चैतत्। तण्डुलपरत्वे ऽव्यघातबाधापत्तेरित्यत्र सिद्धान्तः—तण्डु-

लानिति द्वितीयया क्रियाजन्यफलस्य संस्कारविशेषस्य तण्डुले बोधनात्। मन्त्रलिङ्गेन चानुमितिद्वारा धान्ये संस्कारबोधः, तस्य च विलम्बितत्वात्। यथा—इदमावपनं धान्यनिष्ठसंस्कारजनकं धान्यप्रकाशकमन्त्रकरणत्वादिति। तथा च श्रौतान्वयबोधबलात्तण्डुलस्य कर्मत्वे प्राप्ते कृष्णलन्यायेनावघातबाधो न दोषाय। तथा च मन्त्रे धान्यपदं लक्षणया तण्डुलपरमिति।

६० अथ ऊहाधिकरणम्—

"अग्नये त्वा जुष्टं निर्वपामि" इति मन्त्रः प्रकृतौ श्रुतः। तथा विकृतौ सौर्यचरावपि अग्नये इत्येव पाठ्यं लक्षणया च सूर्यपरं, न तु सूर्यायेति। वेदे तथाश्रुतेः कल्पने च मन्त्रत्वव्याहतेरित्यत्र सिद्धान्तः—"अतिदेशादेवोपपत्तेः" इति। अयमर्थः—यथा मन्त्रो ऽतिदेशप्राप्तः तथा मन्त्रगतसमवेतार्थत्वमपि प्राप्तं, तच्चोहं विना ऽनुपपन्नम्। तथा च यो मन्त्रः प्रकृतौ समवेतार्थकः स मन्त्रो विकृतौ यद्यसमवेतार्थकः, तदा समवेतार्थकपदप्रक्षेपः प्रयोज्य इति। ऊहश्चासमवेतार्थकपदत्यागपूर्वकसमवेतार्थपदसमभिव्याहारकरणम्। यस्तु प्रकृतावप्यसमवेतार्थकस्तस्य नोहः। यथा 'एतद्वः पितरो वास' इत्यस्य पार्वणप्रकृतावसमवेतार्थकत्वादेकोद्दिष्टेऽपि नोहः।

ननु धान्यमसीति मन्त्रेऽपि तण्डुलपदोहोऽस्तु। न च तत्र लक्षणयैवोपपत्तिरिति वाच्यम्। "अग्नये त्वा जुष्टमित्यत्रापि तथात्वापत्तेरित्यत्र सिद्धान्तसूत्रम्—"न प्रकृतावूहो ऽपूर्वत्वात्" इति। अपूर्वत्वादुपदेशविधिप्राप्तत्वात्। अयम्भावः—प्रकृतावूहे तत्र मुख्यपदं विहाय ऊह्यपदमेव वेदे प्रयुज्येत मुख्यपदस्य निष्प्रयोजनत्वात्। नन्वेवं "शब्दे ऽविप्रतिपत्तिः" इति कात्यायनसूत्रविरोधः। मुख्यशब्दप्रयोगे न कस्यापि विप्रतिपत्तिः—न

वैयर्थ्यमिति तदर्थत्वादिति, नैवम् । तत्सूत्रस्य प्रतिनिधित्वेन गृहीतपदार्थवाचकपदप्रयोगनिषेधार्थकत्वात् । यथा व्रीहिप्रतिनिधिशालिग्रहणे "व्रीहिर्यज्ञेषु कल्पताम्" इति मन्त्रे शालिपदोहाभावः । एतदपि मन्त्रे बोध्यम् । वाक्ये तु प्रतिनिधिर्बोध्यः । यथा मृताहप्रतिनिधावेकादश्यां श्राद्धे एकादशीत्वेन प्रयोगो न तु मृततिथित्वेनेति । अग्नये त्वा ऽजुष्टमिति ।,अग्निमुद्दिश्य त्वा—त्वाम्, अजुष्टम्—अयातयामं, प्रोक्षामीत्यर्थः ।

६१ अथ पाशाधिकरणम्–

दैक्षयागे श्रूयते "पाशेन पशुं बध्नाति, अथ प्रोक्षति, तिष्ठन्तं पशुं प्रयजति,ततः पाशं छिनत्ति, अदितिः पाशं प्रमुमोक्त्वेतम्, अदितिः पाशान् प्रमुमोक्त्वेतान्" इति । ततस्तद्विकृतियागे श्रूयते "पाशाभ्यां पशुं बध्नाति" इति । अत्रातिदेशागतौ पूर्वोक्तपाशच्छेदनमन्त्रौ । ततः प्रथममन्त्रे पाशमित्यत्रैकवचनस्थाने द्विवचनोहः कार्यः । द्वितीयमन्त्रे तु पाशानिति बहुवचनं प्रकृतावप्यसमवेतार्थकम्, अतस्तस्य विकृतियागेऽपि नोहः । अदृष्टार्थकत्वेन पाशानित्येव पाठ्यमिति सिद्धान्तः । वस्तुतस्तु पाशानिति संसारपाशकामक्रोधादिपरमिति । तिष्ठन्तमिति यागान्तरे पशुघातानन्तरं प्रयाजाचरणम् । अत्र तु पशौ जीवति । तथा च प्रयाजापकर्षे तदन्तकर्मकलापापकर्ष इति ।

६२ अथ कालशौचाधिकरणम्—

ननु शौचस्याङ्गत्वेन तदभावेऽपि नित्यानुष्ठानं कर्तव्यमेव । किञ्चिदङ्गहान्याऽपि तस्येष्टत्वात् । एवममावास्यायामतीतायामपि श्राद्धं कार्यममावास्याया अङ्गत्वादङ्गबाधेऽपि नित्यानुष्ठानादित्यत्र सिद्धान्तः-"पुरुषविशेषणत्वान्नैवम्" इति । अयमर्थः-'काले कुर्याच्छुचिः कुर्यात्' इतिश्रुत्या शौ-

चमधिकारिविशेषणं तदभावेऽधिकाराभावान्न कर्माऽऽचरणम् । एवं विहितकालजीवनस्याधिकारिविशेषणत्वात्कालो ऽप्यधिकारसम्पादक इति । एतन्न्यायमूलकमेव 'सन्ध्यां पञ्च महायज्ञान्' इत्यादिवचनमिति ॥

६३ अथ हेतुमन्निगदाधिकरणम्—

हेतुमन्निगदः—सहेतुकं वचनम् । यथा "अग्निं यजेत्, स हि आशुतोषो, यथेष्टदाता" इति । अत्राऽऽशुतोषत्वादिकथनादाशुतोषत्वादिनाऽग्नेर्देवतात्वमन्यथा तद्वचनवैयर्थ्यादित्यत्र सिद्धान्तसूत्रम्—"प्ररोचनायोपपत्तेः" इति(१) । अयमाशयः–स हि आशुतोष इति हेतुमन्निगदः तस्य प्ररोचनार्थेनोपपत्तेः । प्ररोचना स्तुतिः । अग्नियागे झटिति प्रवृत्त्यर्थं हेतुमन्निगदोऽग्निं प्रस्तौतीति ।

६४ अथाऽऽरुण्यान्यायः—

" अरुणयैकहायन्या गवा सोमं क्रीणाति" इत्यनन्तरं "वाससा क्रीणाति " इति श्रूयते । अत्र च विकल्पो युक्तः । गवा वाससा वा सोमक्रयः कार्य इति । अत्र सिद्धान्तः–"गुणत्वेनैककर्म्यसिद्धेः" इति(२) । पूर्ववचनेन प्राप्ते ऽरुणैकहायनगोकरणकसोमक्रये फलाधिक्याय वासोलक्षणगुणविधिरेवेति ॥

६५ अथ सोमयाजिन्यायः—

यागविशेषे श्रूयते "सोमेन दधिपयोभ्याञ्च यजेत" इति । अत्र सोमस्य दधिसहितपयसश्चोभयोरपि प्राधान्यं यद्यप्युचितं तथापि "असोमयाजी न सोमेन " इति श्रुत्यां ऽकृतसोम-

---

(१) "अर्थस्तु विधिशेषत्वाद्यथा लोके" इति सूत्रं (अ० १ पा० २ अधि० ३ सू० २९) इति दृश्यते ।

(२) "अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात्" इति सूत्रं (अ० ३ पा० १ अधि० ६ सू० १२) इति दृश्यते ।

यागस्य सोमनिषेधात् न सोमस्य प्राधान्यमत्र, किन्तु दधिपयसोरेव। अत्र सिद्धान्तः-"निमित्ताद्व्यतिरेके प्राधान्याविरोधात्" इति। सोमयागाकरणनिमित्तात्सोमस्य व्यतिरेकेऽपि न प्राधान्यबाधः। तथा च सोमयाजिनां यागे उभयस्यैव प्राधान्यम्। असोमयाजिनां तु प्रधानीभूतस्य सोमस्य बाधः। नहि बाधेन तस्य प्राधान्यं दूरीक्रियते इति।

ननु सोमस्याङ्गत्वमस्तु, मैवम्। तर्हि तद्विकृतियागेऽतिदेशात्सोमप्राप्तिः स्यात्। प्रधानत्वे तु तस्यातिदेशो न सम्भवति प्रधानातिदेशे तद्यागस्य प्रकृतयागत्वमेव स्यात् वैलक्षण्याभावात्। तथा चाङ्गानामेवातिदेशः। तेषामुपकारकत्वात् प्रधानस्य चोपकार्यत्वात् कथं यजेतेत्याकाङ्क्षायामतिदेशः। तथा च कथमित्यस्य केनाङ्गेनेत्यर्थत्वादङ्गानामेवातिदेश इति। अत एव दीक्षणीयादियागे "अप्रयाजास्ता" इति श्रूयते। तत्र आहुतयोऽप्रयाजाः प्रयाजरहिताः कार्या इत्यप्राप्तप्रयाजनिषेधानुपपत्त्या दर्शधर्माणामतिदेशः कल्प्यते, नतु दर्शप्रधानीभूतानामाग्नेयादीनां त्रयाणामिति॥

६६ अथाक्ताधिकरणम्—

"अक्ताः सिता जुहुयात्" इति श्रूयते। तत्र केनाक्ता इत्याकाङ्क्षायामेतत्प्रकृतियागे 'दध्ना जुहोति' इति श्रुतेर्दध्नैवाक्ताः सिता इति प्राप्यते। अत्र सिद्धान्तः-"वाक्यशेषे घृतस्तुतेः" इति। अस्य यागप्रकरणस्योपसंहारे 'तेजो वै घृतम्" इति घृतस्तुत्यन्यथाऽनुपपत्त्या घृतेनैवाक्ता इति बोध्यते। नच व्याहृतिहोमाद्यर्था घृतस्तुतिः तस्य सर्वत्राऽऽज्यकरणत्वेन स्तुतेर्वैयर्थ्यात्॥

६७ अथाऽऽमिक्षाधिकरणम्—

"तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा भवति, वाजिभ्यो वाजिनम्" इति श्रूयते । अत्युष्णदुग्धे ऽम्लदधियोगेन क्षीरभागः कठिनो भवति, नीरभागश्च भवति । तत्र क्षीरभाग आमिक्षा, सा विश्वेदेवदेवताका । नीरभागो वाजिनं तद्वाजिदेताकम् । वाजं होमद्रव्यमामिक्षारूपमस्तीति वाजी इति योगार्थेन उपस्थिता विश्वेदेवा एव बोध्यन्ते । यथा 'बृहस्पतिर्विश्वेदेवैः' इत्यत्र विश्वशब्दस्य सर्वार्थतयोक्तसर्वदेवैरिति योगार्थाऽऽदरो नतु रूढ्या विश्वदेवगणग्रहणं, तथा ऽत्रापि ।

अन्ये तु योगाद्रूढेर्बलवत्त्वात् वाजिपदेन सूर्याश्वा एवोच्यन्ते । बृहस्पतिर्विश्वेदेवैरित्यत्र प्रकरणाद्योगार्थाऽऽदरः । नचात्र तथा । तथाच कर्मभेद एवेति वदन्ति ।

६८ अथाभ्युदितेष्टिन्यायः—

अभ्युदितेष्टिकालः सूर्योदयकालः । सच मुहूर्तात्मकः । यथा—

सन्धिर्दिनरजन्योश्च उदयास्तमयौ तथा ।
दिवारात्र्योस्तथार्द्धञ्च मुहूर्ताः समुदाहृताः ॥

तथा च मुहूर्तात्मके उदयसमये साङ्गेष्ट्यनिष्पत्तेः कथं तत्र प्रवृत्तिः । अत्र सिद्धान्तः—"**कालस्यारम्भ एवोपयोगात्**" इति । अयम्भावः–विहितकालजीवित्वेनाधिकारित्वात्कालो ऽधिकारसम्पादकः । तथा चाधिकारस्य आरम्भ एवोपयोगः । शुचित्ववत् । अन्यथा आरम्भानन्तरमशौचे कर्मवैगुण्यं स्यात् । 'आरब्धे सूतकं न स्यात्' इत्यपि वचनमेतन्न्यायमूलकमेव । तथा च—

काले खलु समारब्धमकाले ऽपि समापयेत् ' इति ।

केचित्तु प्रधाननिष्पत्तिपर्यन्तं कालापेक्षाऽस्त्येव, उत्तराङ्गे

त्वपेक्षा नास्ति कालस्याधिकारत्वे ऽप्यङ्गत्वात् । अङ्गत्वञ्च प्रधाननिष्पत्त्यैव चरितार्थमिति वदन्ति.।

६९ अथ हविरुपलक्षणाधिकरणम्—

"यस्य निरुप्तं हविश्चन्द्रमा अभ्युदियात्, स त्रेधा तण्डुलान् विभजेत्, व्याहृतिभिर्जुहुयात्" इति दर्शयागे श्रूयते । "आग्नेयोऽष्टाकपालो भवत्यमावास्यायाम्" "ऐन्द्रं दधि" "ऐन्द्रं पयः" इत्यनेनामावास्यायां दध्यारम्भो विहितः । दध्नश्च द्व्यहसाध्यत्वात् यागो नाऽमावास्यायां, किन्तु तदुत्तरदिने । तत्र चापराह्णे द्वितीयावेधे सति न यागः, किन्तु पूर्वदिने एव । तथा च दध्यारम्भोऽपि यागपूर्वदिने । तथा च द्वितीयाविद्धप्रतिपदि यागकरणे प्रायश्चित्तार्थमाह—यस्य निरुप्तमिति । यस्य हविर्निरुप्तं पूर्वाह्णे यागो निष्पन्नः । अथ च दिवा द्वितीयावेधाधीनस्तद्दिने सायं चन्द्रोदयो भवति स महाव्याहृतिहोमरूपप्रायश्चित्ताय चर्वर्थं त्रेधा तण्डुलान् विभजेत् । अत्र च "देवतातो हविर्विभजेत्" इति चोपसंहारे श्रूयते । दर्शे या देवतोद्देश्या तस्या यद्धविस्ताद्विभजेदित्यर्थः । तेन दधिपयसोरपि त्रेधा विभागः प्राप्तः । तथा च तण्डुलानिति पदं हविरुपलक्षणार्थमिति । तथा च कात्यायनः—

पर्वणयोश्चतुर्थांश आद्याः प्रतिपदस्त्रयः ।
यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः ॥

तेन यागपरदिने प्रायश्चित्तार्थं दधिपयस्तण्डुलान् समानीय प्रत्येकं त्रेधा कृत्वा व्याहृतिभिः प्रत्येकं जुहुयादिति ।

७० अथ प्राणाधिकरणम्—

"वेधसे वैधस्या जुहोति" इति श्रूयते । वैधस्या वेधःप्रका-

शिकया ऋत्वेत्यर्थः । वेधःशब्दवाच्यो विरिञ्चिर्विष्णुश्चेति । अत्र सन्देहे प्रवृत्त्यनुपपत्तिरित्यत्र सिद्धान्तः—प्राणशब्दवत् ख्याततत्वात्" इति । अयमर्थः—उपासनाकाण्डे 'प्राणोऽस्मीति त्वं चिन्तयति' इति श्रुतिरस्ति । तत्र प्राणशब्दस्य प्रयोग इन्द्रे इन्द्रिये जीवे वायौ ब्रह्मणि च दृश्यते । यथा—

'इन्द्रेन्द्रियब्रह्मजीववायुषु प्राण इष्यते' इति ।

तत्र बहुप्रयोगो ब्रह्मणि । यथा "सोऽयं प्राणमयः" इति, "प्राणः सर्वं विभावयति" इति, "प्राणो ह्यानन्दमयः" इति । तथा च प्रयोगप्राचुर्यात् प्राणोऽस्मीति ब्रह्मपरम् । तथा वेधःशब्दस्य विरिञ्चौ ख्याततत्वेन बहुप्रयोगाद्विरिञ्चिरेव वेधःशब्दार्थ इति ।

७१ अथ विविदिषदधिकरणम्—

"तमेवात्मानं ब्रह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकन" इतिश्रुत्या आत्मज्ञानफलको ऽग्निहोत्रादिर्यज्ञः प्राप्तः । "यावज्जीवमग्निहोत्रं जुहोति" इतिश्रुत्या नित्यमपि तत्प्राप्तम् । तथा च विविदिषुभिर्गृहस्थैर्वारद्वयमेतत्कर्तव्यम्, मैवम् । ब्रह्मज्ञानार्थं तत्करणेनैव नित्यस्यापि निष्पत्तेः । नच नित्यानित्यवैषम्यम् । काम्यकरणेनैव नित्यस्यापि सिद्धिरिति प्रसङ्गन्याय एवात्र । यथा निमन्त्रितो ब्राह्मणो भुक्त्वा परकीयश्राद्धं, स्वतृप्तिञ्च निष्पादयतीति ।

गुरुमते तु काम्यापूर्वनित्यापूर्वयोरेकविधिबोध्यत्वासम्भवादावृत्तौ वाक्यभेदापत्तेर्नित्यस्य फलश्रुतिः स्तुतिरूपैव, नतु नित्यस्य सकामाधिकारित्वमिति ।

७२ अथ स्मृत्यधिकरणम्—

स्मृतेर्वेदमूलकत्वानुमानादेव निष्कम्पप्रवृत्तिजनकत्वम् ।

अन्यथा पौरुषेयत्वेन भ्रमादिमूलकत्वशङ्कया तन्न स्यात् । तथाहि—इयं स्मृतिः स्वसमानार्थकवेदमूला, असम्भवन्मूलान्तरत्वे सति समूलत्वात्, प्रत्यक्षवेदमूलकस्मृतिवत् । एवञ्च वेदमूलकत्वानुमानादेवावच्छेदकतया वाक्यार्थसिद्धेः श्रुतेर्न प्रमाजनकत्वमित्यत्र सूत्रम्—"अकारणत्वादर्थस्य" इति । कार्येण स्मृत्या कारणस्य वेदस्यानुमाने ऽकारणत्वात् पदार्थस्यैव नानुमानविषयत्वं कुतो वाक्यार्थस्येति । अकारणस्य तद्विषयत्वे ऽतिप्रसङ्गात् ।

नचैवं कुतो विशिष्टप्रतीतिः ?, अर्थविषयकेण तटस्थपूर्वज्ञानेन भेदाग्रहाद्विशिष्टधीव्यवहारः । पाककृतौ मानसप्रत्यक्षायां पाकविशिष्टधीव्यवहारवत् । बहिर्विषयके मनसो ऽस्वातन्त्र्यात् । मीमांसकमते ज्ञानस्याप्रत्यासत्तित्वादिति ॥

७३ अथ ज्योतिरधिकरणम्—

"अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरनेन सहस्रदक्षिणेन यजेत" इति श्रूयते । तेन ज्योतिष्टोमयागस्य त्रैविध्यं नामत्रयविधानात् । 'गोशतं दक्षिणा' इत्यनेन च दक्षिणा विहिता प्राक् । अनेन सहस्रदक्षिणाख्यो गुणो विधीयते । तथा चानेनेतिपदात् त्रयाणामप्युपस्थानात् त्रिष्वेव सहस्रदक्षिणागुण इत्यत्र सिद्धान्तः—"अथ पदेन च्छेदात्" इति(१) । अथैष सर्वज्योतिरित्यत्राथपदेन पूर्वोक्तव्यवच्छेदादनेनेतिपदेन सन्निहितसर्वज्योतिर्याग एवोक्तस्तत्रैव सहस्रदक्षिणेति ।

७४ अथ वैश्वानराधिकरणम्—

" वैश्वानरमुपास्ते विद्युदादित्यवाय्वाकाशोदकपृथिव्या

(१) संज्ञा चोत्पत्तिसंयोगात्" (अ० २ पा० २ अधि० ८ सू० २२) इति सूत्रं सूत्रपाठेऽस्ति ।

त्मकैः षड्भिरुपेतम्" इति । अत्र विद्युदादिरूपेण वैश्वानरस्य चिन्तनमुक्तम् । अत्र किं समुदायरूपेण चिन्तनं प्रत्येकं वा ?, इति संशये सिद्धान्तः—"साहित्यश्रुतेः" इति । बहुवचनेन साहित्यबोधनात् समुदायरूपेणैव चिन्तनमिति । यथाह भट्टः—"साहित्यं द्विवचनबहुवचनाभ्यां द्वन्द्वसमासाच्च"इति । ननु "आदित्येभ्यो जुहोतीत्यादित्यो वै देवता" इति श्रुत्या साहित्येन चतुर्थ्या देवतात्वबोधोऽस्तु, मैवम् । नहि देवतात्वे चतुर्थ्याः शक्तिः किन्तु चतुर्थ्या देवतायामनिराकर्तृकसम्प्रदानत्वान्यथाऽनुपपत्त्या तत् कल्पनीयं, तत्र च बाधकं देवता इति बहुत्वश्रुतिः । तथा च भाष्यम्—'बहुत्वस्य पृथग् निवेशितत्वात्' इति । अस्यार्थः-पृथक्पदं तृतीयान्तं परस्परभिन्नस्वाश्रयार्थकं तेन परस्परभिन्नस्वाश्रयैर्निवेशितत्वात् बुद्धावर्पितत्वात् । प्रकृत्यर्थतावच्छेदकविशिष्टयावत्स्वाश्रयनिरूपितत्वादिति यावत् । तथा च देवता इति बहुवचनेन प्रत्येकं देवतात्वावगम इति । निराकर्तृकं "मा दद्या" इति निषेधवचनं तन्नास्ति यस्य सम्प्रदानस्य तदनिराकर्तृकमिति । अनिराकर्तृकसम्प्रदानस्यार्थः ॥

७५ अथ गुणविकृत्यधिकरणम्—

"एष एव विधिर्यत्र कुत्रचिद्धोमे" इत्यनेन कुशकण्डिकाकर्मातिदेशादग्निष्टोमे 'शरमयं बर्हिर्भवति' इत्यनेन किं विधानम्-अपास्तरणार्थं कुशस्य प्राप्तत्वादित्यत्र सिद्धान्तः—"गुणविकृतिभावात्" इति । अयमर्थः—गुणस्य प्राप्तकुशस्य विकृतित्वं तत्कार्यकारित्वं शरस्य विधीयते । तथा च शरा आस्तरणीया नतु कुशाः । नचैवं "दध्ना जुहोति" इति स्थलेऽपि प्रकृतियागातिदेशप्राप्तचरुस्थाने दधिविधानं स्यादिति वाच्यम् । तत्र 'दध्नेन्द्रियकामस्य' इति श्रवणात् गुणफलत्वं, नतु गुणविकृति-

त्वम्। दध्नो गुणविकृतित्वे कदाचिदपि चरुस्तत्र न स्यादिति॥

७६ अथ क्रमः—

यथाऽऽह भट्टः—

"श्रुत्यर्थपठनस्थानमुख्यप्रावृत्तिकाः क्रमाः" इति।

तत्र श्रौतक्रमो यथा—"त्रिवृता यूपं परिवीय आग्नेयं सवनीयं पशुमुपाकरोति" इत्यत्र क्त्वाश्रुत्या आनन्तर्यं बोध्यते। त्रिवृता—त्रिगुणात्मककुशमेखलया परिवीय—परिवेष्ट्य सवनीयं—सोमाङ्गकम् उपाकरोति—आलभते इत्यर्थः।

अत्र केचित्—क्त्वाप्रत्ययेन परिव्यानस्याङ्गत्वं बोध्यते। तेन पशूपाकरणस्याङ्गं परिव्यानमिति वदन्ति, तन्न। उभयोरपि मुख्ययागाङ्गतया "गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्स्यात्" (अ० ३ पा० १ अधि० १२ सू० २२) इति न्यायात्। अत एवाग्नीषोमीययागे "यूपं परिवीयाग्नीषोमीयं पशुमुपाकरोति, ततः सवनीयम्" इत्यभिधाय तद्विकृतियागे उक्तं "नात्राग्नीषोमीयमालभते, आश्विनग्रहं गृह्णाति" इति। तेनात्र यूपपरिव्यानानन्तरमाश्विनग्रहग्रहणं, ततः सवनीयपशूपाकरणम्। यदि परिव्यानं सवनीयपशूपाकरणाङ्गं स्यात्तदा मध्ये आश्विनग्रहग्रहणं नोच्येत इति।

यथा वा "दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत" इति।

अर्थक्रमो यथा—"अग्निहोत्रं जुहोति" "यवागूं पचति" इति। अत्र पाठक्रमादग्निहोत्रस्य पारिभाषिकस्याऽऽदावनुष्ठाने यवागूपाकस्य निरर्थकत्वं स्यात्। तथा च कथं जुहोतीत्याकाङ्क्षायां यवागूपाकोपदेशः। तेनाऽऽदौ यवागूपाकः कार्यः। ततस्तया होमः। अर्थो युक्तिस्तेन क्रमोऽर्थक्रमः। इदमग्निहोत्रं कर्मान्तरं पूषदेवताकम्, अग्निहोत्रकर्मप्राप्त्यर्थं तत्प्रयोगः। यवागूस्तु

पिष्टचरुरिति ।

पाठक्रमो यथा—"इन्द्राय जुहोति", "अग्नये जुहोति" इत्यादौ । यथा वा मातृपूजानन्तरं वसुधारादानम् । यथा च स्नानतर्पणयोर्मध्ये सन्ध्यावन्दनपाठात् मध्ये एव तदाचरणमिति ।

स्थानक्रमो यथा—एकोद्दिष्टे पार्वणधर्मातिदेशात् कुशासनाद्यनुष्ठानं कर्तव्यम् । तत्र पार्वणे यस्मिन् स्थाने यत् क्रियते एकोद्दिष्टेऽपि तथा । तेन नाऽनध्यवसायः केन क्रमेण कर्तव्यमिति । स्थानपदेनाऽऽदिमध्यावसानमुच्यते ।

मुख्यक्रमो यथा—ग्रहयागे ऽधिदैवतप्रत्यधिदैवतपूजनं केन क्रमेण कार्यमित्याकाङ्क्षायां मुख्यपूजनानन्तरमेव कर्तव्यमुत्पत्तिविधौ मुख्यस्य प्रथमोपस्थितत्वादिति ।

प्रावृत्तिकक्रमो यथा—वाजपेये "सप्तदश प्राजापत्यान् पशूनन्क्ति, आलभेत" इति श्रूयते । तत्र च सप्तदशानामञ्जने इच्छया क्रमो, ऽभ्यञ्जनन्तु अञ्जनप्रवृत्तिक्रमेण कर्तव्यमेवमालम्भनञ्चेति । एवं श्राद्धे पितृपितामहादिपात्रक्रमेण संस्रवग्रहणं पितृपात्रे कर्तव्यम् । एवं बलिच्छेदनमुत्सर्गक्रमेणेति ॥

७७ अथ (१) श्रुतिलिङ्गादिन्यायः-

यथाऽऽह-जैमिनिः "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" (अ० ३ पा० ३ अधि० ७ सू० १४) इति । श्रुत्यादिन्यायानामेकविषये प्रसक्तावुत्तरोत्तरन्यायस्य दौर्बल्यं पूर्वमपेक्ष्योत्तरस्य विलम्बेनार्थोपस्थापकत्वादित्यर्थः । एषां लक्षणमुक्तं भाष्ये । यथा—

(१) क्वचित् समवाये विरोधन्याय इति पाठः ।

श्रुतिर्द्वितीया, (१)क्षमता च लिङ्गं,
वाक्यं पदान्येव तु संहतानि ।
सा प्रक्रिया या कथमित्यपेक्षा,
स्थानं क्रमो, योगबलं समाख्या ॥ १ ॥

कारकविभक्त्यात्मकाद्वितीया(२)श्रुतिः, तया कर्मगतं क्रियाफलाश्रयत्वं बोध्यते । तत्र क्रिया (गमनादिः) शेषः साधनत्वात् (ग्रामप्राप्तिरित्यर्थः०) । क्रियाफलाश्रयः शेषी साध्यत्वात् । तथा च शेषशेषिबोधकत्वाद् द्वितीयाया बलवत्त्वम् । मासमधीते इत्यादिवारणाय कारकविभक्तीति(३) । उपपदविभक्तीनान्त्वन्तर्भावितपदसापेक्षत्वाद् विलम्बितत्वम् । वेदान्तटीकायां वाचस्पतिमिश्रास्तु कारकविभक्तिमात्रं श्रुतिः, सर्वासामेव विभक्तीनां प्रकृत्यर्थस्वार्थबोधे ऽन्यनिरपेक्षत्वाद् बलवत्त्वमिति वदन्ति ।

लिङ्ग्यते ज्ञाप्यते ऽनेनेति लिङ्गं मन्त्रः । बोधकपदघटितमन्त्रस्यार्थप्रकाशनसामर्थ्यं लिङ्गत्वम् । यथा—बर्हिर्देवसदनं दामि" इत्यस्य मन्त्रस्य 'दाप् लवने' इतिधातोर्दामीति सिद्धत्वाद्बर्हिश्छेदनप्रकाशकत्वेन तत्रैव विनियोगः । वाक्यं परस्परसाकाङ्क्षपदकदम्बः । प्रकरणन्तूत्पत्तिविधिना प्रधानबोधानन्तरं केन प्रकारेण कर्तव्यमित्याकाङ्क्षाऽङ्गाभिधानप्रयोजिका । स्थानं क्रमः, स च तत्सान्निध्ये पठितत्वम् । समाख्या योगार्थेन प्रवृत्तं पदम् ।

यथाऽऽह भट्टः—

---

(१) शब्दसामर्थ्यमित्यर्थः ।

(२) यथा "व्रीहीनवहन्ति" इत्यत्र द्वितीयाश्रवणमात्रेण व्रीहीणामवहननक्रियायां विनियोगो ऽवगम्यते ।

(३) "कालाध्वनोरत्यन्तसंयोगे" इति सूत्रविहितद्वितीयाया उपपदविभक्तित्वात् ।

अभिधातुं पदे ऽन्यस्मिन्ननपेक्षो रवः श्रुतिः ।
सर्वत्रावगता शक्तिर्लिङ्गमित्यभिधीयते ॥
संहत्याऽर्थं ब्रुवन्वृन्दं पदानां वाक्यमिष्यते ।
प्रधानवाक्यस्याङ्गोक्त्या ऽऽकाङ्क्षा प्रकरणं मतम् ॥
स्थानं समानदेशत्वं समाख्या यौगिको वरः ।

इति श्रुत्यादिलक्ष्मोक्तं मीमांसापारदर्शिभिरिति । वरः-शब्दः सर्वत्राभिधीयते इत्यन्वयः । समानदेशत्वं–सान्निध्यम् ।

तत्र श्रुतिर्यथा–"ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इति द्वितीयया गार्हपत्याग्निगतं क्रियाजन्यप्रीतिफलाश्रयत्वं साक्षाद् बोधितम्। तथा च तस्य देवतात्वं श्रुतिप्राप्तम् । ऐन्द्र्येति इन्द्रप्रकाशिकाया ऋचः करणत्वं बोधितम् । तथा च विरोधः । नह्यन्योपस्थापकमन्त्रेणा-न्यस्योपस्थानं विहितं, तेनैकलक्षणा ऽऽवश्यकी । तत्र च गा-र्हपत्यपदे नेन्द्रलक्षणा । तद्देवतात्वस्य श्रौतत्वात् । लिङ्गेन तु देवतात्वं विलम्बबोध्यम्—इदमुपस्थानमिन्द्रदेवताकमिन्द्रप्रका-शकमन्त्रकरणत्वात्, ततः श्रुतिकल्पनम् 'ऐन्द्र्या इन्द्रमुपतिष्ठते' इतीत्यनुमानाधीनत्वात् । अत इन्द्रपद एव गार्हपत्यलक्षणा। स च मन्त्रः 'कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे' इति । एवं "पा-यसेन दध्ना जुहोति" इति श्रुतिः । पायसेन–पयः प्रकाशकेन मन्त्रेण, पयः पृथिव्यामित्यादिना । तथा च दधिनिष्ठं करण-त्वं श्रौतं, पयोनिष्ठञ्च लिङ्गादनुमेयमिति लिङ्गं दुर्बलमिति ।

लिङ्गस्य वाक्याद्बलवत्त्वं यथा– "पुरोडाशं श्रपयेत्" इत्यनन्तरमङ्गाकाङ्क्षायां "स्योनं ते सदनं कृणोमि, घृतस्य धा-रया सुषेवं कल्पयामि । तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मे-ध(१) सुमनस्यमान" इति श्रूयते । अत्र कल्पयामीत्यन्तेन पूर्वांशेन

(१) सारभूतेत्यर्थः ।

पुरोडाशसदनकरणस्य प्रकाशः । उत्तरांशेन सादनस्य प्रकाशनम् । तथा च मन्त्रलिङ्गताद्वयप्रकाशः । एवं तस्मिन्निति श्रुत्या यदिति पदं कल्प्यम् । यत्सदनं कल्पयामि, तस्मिन् सीदेत्येकवाक्यतया एक एव मन्त्रः सादनमात्रे वाक्येन विनियुज्यते इति लिङ्गवाक्ययोर्विरोध, इति चेन्न । लिङ्गस्य वाक्यतो बलवत्त्वात् । तथाहि यत्पदं श्रुतं नास्ति, किन्तु तत्कल्पयित्वा एकवाक्यतया लिङ्गं कल्पनीयम् । तत्कल्पने तु प्रमाणाभावः । तद्विना च एकवाक्यता नास्त्येकार्थप्रतिपादकत्वाभावात्, सदनसादनयोः प्रतिपादकत्वात् । अत एव सूत्रम्—"अर्थैक्यादेकं वाक्यं साकाङ्क्षं चेद्विभागः" इति । शीघ्रोपस्थापकं लिङ्गम्" इति च ।

वाक्यप्रकरणयोर्विरोधो यथा-ज्योतिष्टोमप्रकरणे श्रूयते "तिस्रः साह्नाग्यस्योपसदो द्वादशाहीनस्य"इति । अत्र च उपसत्-सतिलव्रीहिचरुः । साह्नायो-ज्योतिष्टोमविशेषः । अत्र च ज्योतिष्टोमप्रकरणीयत्वेनाहीनपदं 'न हीनम्' इतियोगार्थेन साह्नाय्यपरम् । न च तत्रोपसत्त्रयविधिरस्त्येवेति वाच्यम् । एकवाक्यतया पञ्चदशोपसद्विधानात् । एवं वाक्येन चाहीनपदस्य रूढ्या ज्योतिष्टोमविकृतेरहीनाख्ययागस्योपस्थितिः तत्रैव द्वादशोपसदः, इति विरोधे सिद्धान्तः—योगाद्रूढेर्बलवत्त्वेन रूढपदघटितवाक्याच्छीघ्रं यागविशेषस्योपसदङ्गत्वप्राप्तिः, नतु प्रकरणानुरोधात् योगार्थस्याऽऽदरः । अहीनविषये प्रकरणस्य 'ज्योतिष्टोमः कथम्' इत्याकाङ्क्षाकल्पनाधीनप्रवृत्तिकत्वेन विलम्बितत्वादिति । अन्यप्रकरणमध्ये ऽपि प्रसङ्गादन्यनिरूपणं क्रियते इति ग्रन्थरीतिः । यथा छन्दोगपरिशिष्टे आभ्युदयिकप्रकरणे प्रसङ्गात्कतिचित्पार्वणधर्मा उक्ता इति । यथा वा दर्शप्रकरणे

ब्राह्मणावगोरणादेर्दोषमुक्त्वाऽऽह—श्रुतिः—'तस्माद् ब्राह्मणो नावगोरयितव्यो नापि ताड्य' इत्यादि। अत्र प्रकरणाद् ब्राह्मणानवगोरणं तद्हननादि च श्रुत्या दर्शाङ्गतया बोधितम्। तथा चान्यत्र न नियम इति, तेन्न। वाक्यात्प्रकरणस्य दुर्बलत्वात्। तथा च सर्वदैव निषेधः। नच तत्प्रकरणपाठः किमर्थ इति वाच्यम्। प्रसङ्गसङ्गत्या तत्पाठात्॥

प्रकरणस्थानयोर्विरोधो यथा—

राजसूये सर्वे एव इष्टिपशुयागा अङ्गत्वं प्राप्ताः। तत्राभिषेचनीयाख्यस्य सोमयागविशेषस्य सन्निधौ श्रूयते "अक्षैर्दीव्यति, राजन्यं जिनाति, शौनःशेफं शृणोति" इति। शौनःशेफं—शुनःशेफमुनेश्चरितं पुराणोक्तम्। अत्र चाक्षदेवनादि अभिषेचनीयस्थाने श्रवणात् तस्यैवाङ्गं?, किंवा प्रकरणाद्राजसूयस्याङ्गमिति?। नचोभयथापि राजसूये तेषां कर्तव्यत्वाद्विचारो ऽयमनुपयुक्त इति वाच्यम्। देवनादीनामभिषेचनीयाङ्गत्वे यत्र प्रधानीभूतो ऽभिषेचनीययागः स्वतन्त्रस्तत्रापि तेषामनुष्ठानापत्तेः। अत्रोच्यते। कथं राजसूयः कर्तव्य इत्याकाङ्क्षायाः प्रवृत्तत्वात् तेषां राजसूयाङ्गत्वम्। अभिषेचनीयसन्निधिपाठस्तु तदानन्तर्यकरणार्थमात्रमिति।

स्थानसमाख्ययोर्विरोधो यथा—

बहून्मन्त्रानुक्त्वा "एतत्पौराडाशिकम्" इति पठितम्। तन्मन्त्रगणमध्ये 'शुन्धध्वं दैव्याय कर्मणे' इति पठितम्। तथा च सान्नाय्ययागे श्रूयते "सान्नाय्याय ग्रहान् गृह्णाति, शुन्धध्वं दैव्याय कर्मणे, सान्नायेन जुहोति, पुरोडाशग्रहान् गृह्णाति" इति। अत्र च मन्त्रलिङ्गाच्छुन्धध्वमिति मन्त्रः पात्रशोधने विनियुक्तः। सच सान्नाय्यसन्निधौ श्रुतः। तथा च सान्निध्यरूपस्थानबला-

त्साम्नायपात्रशोधने उपयुक्तः।

अथ पौराडाशिकमन्त्रगणमध्यपाठाद्योगार्थबलेन पुरोडाशपात्रक्षालने विनियुक्तः। पुरोडाशस्येदं पौराडाशं पात्रम्। तत्सम्बन्धित्वान्मन्त्रः पौराडाशिक इति योगार्थः। अत्र सिद्धान्तः। साम्निध्यं बलवद् यदा पौराडाशिकपदस्यान्यत्रोपस्थितस्यानुसन्धानं तदा योगार्थस्योपस्थितिस्तत्पूर्वमेव साम्निध्यात्साम्नाय्यपात्रे ऽन्वयादिति। नच पुरोडाशपात्रक्षालनमावश्यकं तत् केन मन्त्रेणेति वाच्यम्। पौराडाशिकमन्त्रगणपठितान्यमन्त्रेण तत्कर्तव्यत्वात्। नचैवं शुन्धध्वमिति मन्त्रस्य पौरोडाशिकमन्त्रमध्यपाठो नोचित इति वाच्यम्। यागान्तरे तस्य पुरोडाशपात्रेषूपयुक्तत्वात्। सान्नाय्यं (१)हविर्विशेषः। ग्रहः पात्रं, गृह्यते ऽत्रेति व्युत्पत्त्या।

समाख्योदाहरणं यथा—"हौत्रमाचरति, औद्गात्रमाचरति" अत्र होतुरिदमिति योगार्थेन हौत्रं होमः। औद्गात्रं गानम्। अत्र बाधकाभावाद्यौगिक एवार्थो ग्राह्य इति। तदुक्तं—

बाधिकैव श्रुतिर्नित्यं समाख्या बाध्यते सदा।
मध्यमानन्तु बाध्यत्वं बाधकत्वमपेक्षयेति॥

७८ अथ विधिनियमादिः-

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते॥ १॥

यद्यपि कार्यत्वप्रमापकः प्रत्ययो विधिः। सच लिङादिः। कार्यादिपदवारणाय प्रत्यय इति। तथापि प्रकृतेऽज्ञातार्थप्रमापको

(१) दधिपयोरूपम्।

वैदिकः शब्दो विधिः। अनुवादकस्य गृहीतग्राहकत्वेनाप्रमापकत्वात्। नच तस्य भ्रमजनकत्वं वाच्यम्। प्रमाभ्रमविलक्षणज्ञानजनकत्वात्। स्मृतिवत् निर्विकल्पकवच्च तन्मते तदुभयविलक्षणज्ञानमस्तीति। नियम आवश्यकत्वम्। अयोगव्यवच्छेद इति यावत्। परिसंख्या ऽन्ययोगव्यवच्छेदः। अत्यन्तप्रमाप्ताविति प्राप्तिसामान्याभावार्थम्। तथा च वेदान्तराद्, अतिदेशाद्, अर्थतो, रागाच्चाप्राप्तावित्यर्थः।

आद्ये यथा—"सोष्णीषा ऋत्विजः प्रचरन्ति" इत्यनेन पूर्वमुष्णीषस्य विहितत्वात् "लोहितोष्णीषा ऋत्विज" इत्यनेनाधिकफलार्थं प्राप्ते उष्णीषे लौहित्यमात्रं विधीयते। अन्यांशोऽनुवादः।

अतिदेशाद्यथा–"एष एव विधिर्यत्र क्वचन होमे" इत्यनेन कुशकण्डिकातिदेशात्पर्युक्षणस्यापि प्राप्तौ वैश्वदेवहोमे "पर्युक्षणस्वाहाकारैर्जुहुयात्" इत्यनेन पर्युक्षणोत्तरसकलकुशकण्डिकाधर्मो निषिध्यते। "आघारमाघारयति" इत्यनेनापि कुशकण्डिकाधर्मत्वेनाऽऽघारस्य प्राप्तत्वादाज्यभागनिवृत्तिर्बोध्यते। यथा वा पार्वणधर्मातिदेशात्सपिण्डने विश्वेदेवप्राप्तौ—

सपिण्डनं तथा श्राद्धं दैवपूर्वं नियोजयेत्।

इति काण्डानुसमयो विधीयते। अनुसमयः अमिश्रणम्। देवकाण्डं समाप्य पितृकाण्डं कर्तव्यमिति।

अर्थतो यथा–एकोद्दिष्टेऽर्थैक्येन पवित्रैक्यस्यार्थतः प्राप्त्या एकं पवित्रमित्यनेन दलैक्यं विधीयते।

रागाद्यथा—ऋतौ भार्यामुपेयात् इत्यत्र नियमो विधीयते उपेयादेवेति। तथा "पञ्च (१)पञ्चनखा भक्ष्या" इत्यत्र परिसंख्या

---

१ "शशकः शल्यकं गोधा कूर्मो खड्गश्च पञ्चमः" इति स्मृत्युक्ता बोध्याः।

विधीयते । पञ्चनखेतरेऽभक्ष्या इति । तथा च कुत्र नियमः कुत्र परिसंख्या रागप्राप्तत्वाविशेषादत आह-नियमः पाक्षिके सतीति । अयं भावः—रागतो-यथा तस्य(१) प्राप्तिः, तथा तदभावस्यापि प्राप्तिरिति पाक्षिको ऽभावः, अयोग इति यावत् । तस्मिन्नयोगे सति अप्रशस्तिनियमः—अयोगस्य व्यवच्छेदः । अप्राशस्त्यञ्च पापजनकत्वं कर्मवैगुण्यञ्च यथासम्भवं बोध्यम् । तत्र चेति । तत्र—अप्रशस्ते । अन्यत्र—प्रशस्ते । तथा च अप्रशस्तान्यविषयकप्राप्तौ परिसंख्या ।

अन्ययोगव्यवच्छेदो यथा—पञ्चनखेतरभक्षणस्याप्रशस्तत्वात्तद्व्यवच्छेदः । तथा च नियमे ऽयोगो दोषः । अतस्तदभावो विधीयते । परिसंख्यास्थले ऽन्ययोगो दोषः । अतस्तदभावो विधीयते इति । तेन नियमे लक्षणया तदभावनिवृत्तिः । तथा च स्वार्थहानिः, परार्थकल्पनेति दूषणद्वयम् । परिसंख्यायान्तु स्वार्थहानिः, परार्थकल्पना, रागप्राप्तपञ्चनखेतरभक्षणबाधश्चेति दोषत्रयमिति ॥

मिश्रास्तु—पाक्षिकत्वं-समुच्चयाभावः । ऋतुकालतदन्यकालयोरुपगमे समुच्चयाभावात् नियमः । पञ्चनखतदन्ययोर्भक्षणे समुच्चयसम्भवात्परिसंख्या । अत एव शेषतदन्ययोर्भक्षणे समुच्चयसम्भवात् "शेषम्भुञ्जीत" इत्यत्र परिसंख्येति, वदन्ति । तच्चिन्त्यम् । "स्वदारनिरतः सदा" "शयनं मध्ययामयोः" इत्यादौ समुच्चयासम्भवेन परिसंख्या न स्यादिति ।

विधिश्चतुर्विधः-उत्पत्तिविधिरधिकारविधिरङ्गविधिः प्रयोगविधिश्चेति । तत्र प्रधानस्वरूपविधिरुत्पत्तिविधिः । यथा-

---

(१) भार्यागमनस्य ।

"अमावास्यायां पितृभ्यो दद्यात्" इति । उत्पत्तिविधेश्च विध्यन्तरापेक्षया बलवत्त्वं निरपेक्षत्वात् ।

द्वितीयो यथा—

"सपिण्डीकरणादूर्ध्वं दर्शश्राद्धादि चेष्यते" इति ।

अनेन कृतसपिण्डीकरणपितृकत्वममावास्याश्राद्धेऽधिकार इति बोध्यते ।

अङ्गविधिर्यथा-प्रधानमुक्त्वा तत्कथमित्याकाङ्क्षायां प्रवृत्तः।यथा-दर्शमुक्त्वा "इडो यजति" "समिधो यजति" "तनूनपातं यजति" "स्वाहाकारं यजति" "बर्हिर्यजति" "हविर्यजति" इति प्रयाजाद्यङ्गषट्कविधिः ।

प्रयोगविधिस्तु कल्प्यः । यथा—अयमधिकारी एभिरङ्गैः कुर्यादिति विशिष्टविधिः । तथा उत्पत्तिविधिरपि द्विविधः—श्रूयमाणः, कल्प्यश्च । आद्यः प्रसिद्ध एव । कल्प्यो यथा-रात्रिसत्रेऽर्थवादाद्विधिकल्पनम्-"प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति" इत्यनेन प्रतिष्ठाकामो रात्रिसत्रं कुर्यादिति कल्प्यते ।

क्वचिदनुवादाद्विधिकल्पनम्। यथा-"चरुं श्रपयति, चतुरवत्तं जुहोति"इति। अनेन चरुहोममनूद्य चरुश्रपणं चतुरवदानं च विधीयते।तेन"चरुहोमं कुर्यात्"इत्यादावेव विधिः कल्प्यते।अवदानं तु जुह्वादौ घृतपूर्णेन स्रुवेण घृतनिधानं, ततश्च तदुपरि चरुः स्थाप्यते, तदुपरि पुनस्तादृशघृतदानमित्युच्यते इति । एवमतिदेशोऽपि क्वचित्कल्प्यः । यथा दीक्षणीयादियागानुक्त्वा "अप्रयाजास्ता" इति श्रूयते । ता आहुतयः प्रयाजरहिताः कार्या इत्यर्थः । तथा च प्रयाजाप्राप्तौ तन्निषेधासम्भवाद्दर्शधर्मातिदेशः कल्प्यः ।

७९ अथ श्रुतशब्दात्यागः-

यथा "तद्विष्णोरिति केशवं यजते"इति श्रूयते। अत्र केशववाचकनाम्नां बहूनां सत्त्वात्केन नाम्ना उल्लेख इत्यत्र सिद्धान्तः 'यथाश्रुतविहारेण वक्तव्यम्' इति। विहारो व्याहारः। तत्राप्युत्पत्तिवाक्यस्य बलवत्त्वात्केशवेत्युल्लेख्यम्, नतु मन्त्रस्थविष्णुरिति। यत्र विधौ नाम नास्ति तत्र लिङ्गस्थं ग्राह्यम्। यथा दामोदराय नमसीति। ननु—

शिवाय पत्रक्षेपेण शिवलोके महीयते।

इत्यत्र क्षेपशब्दो लक्षणया दानपरः। तथाच तत्सङ्कल्पवाक्ये पूर्ववत् क्षेपशब्दप्रयोगः स्यात्। नैवम्। स्वायत्ते वाक्ये लक्षणाध्याहारयोरनुचितत्वात्। अध्याहारेऽपि वाक्यभेद एव श्रुतवाक्यजन्यशाब्दबोधविषयादधिकविषयकबोधजनकत्वादिति।

८० अथ विध्यनुवादवैषम्यम्—

एकविषये वाक्यस्य विधित्वानुवादत्वयोर्विरोध इत्यर्थः। यथा—"वासन्तसितपक्षे वन्ह्यादीन् यजेत, पौर्णमास्यां पौर्णमासेन" इति श्रूयते। तत्र च पौर्णमासेनेत्यंशेऽनुवादत्वं "दर्शपौर्णमासाभ्यां यजेत" इत्यनेन तस्य प्राप्तत्वेन तदंशे विधित्वासम्भवात्। नच तां विहायैव चतुर्दशतिथिषु विधिरस्तु। पक्षमित्यत्यन्तसंयोगे द्वितीयाश्रुतिविरोधात्। तथा चायं पौर्णमासोऽन्य एव विधेयः। पौर्णमासेनेति तद्विधिप्राप्त्यर्थं तत्संज्ञा। यथा इष्टिसंज्ञा अतिदेशप्राप्तेष्टिधर्मकत्वात् पशुयागविशेषस्य। तथा चाऽऽरब्धपक्षयागेन पौर्णमास्यां पौर्णमासद्वयमेव कार्यम्। काम्ययोस्तन्त्रत्वाभावात्। अत एवापरपक्षनिमित्तकममावास्यायां श्राद्धान्तरमेव विधीयते। तत्र तु सामान्यामावास्याश्राद्ध-

तदमावास्याश्राद्धयोस्तन्त्रेणैव निर्वाहो नित्यत्वात्।

८१ अथ नित्यानित्यवैषम्यम्—

यस्य कर्मणो नित्यविधिविषयत्वं तस्य काम्यविधिविषयत्वं नास्ति । एतच्च गुरुमते बोध्यम् । नित्यापूर्वकाम्यापूर्वयोरेकविधिबोध्यत्वासम्भवात् । यथा—

'यस्तु पूजयते नित्यं लिङ्गं त्रैभुवनेश्वरम् ।
स स्वर्गवासमोक्षाणां क्षिप्रं भवति भाजनम्' ॥

इति नित्यशिवपूजनस्य स्तुतिमात्रम् ।

यद्वा विधिकल्पनद्वारा कर्मान्तरमेवानेनार्थवादेन बोध्यते । तथा च काम्येन नित्यस्यापि प्रसङ्गेन सिद्धिर्न तु कर्मैक्यमिति।

८२ अथ सापेक्षत्वनिरपेक्षत्ववैषम्यम्—

"आदित्यपरिवेशे आदित्याय यजेत" इति श्रूयते । तत्र न पूर्वाण्हनियमः आदित्यपरिवेशसमयकर्तव्यत्वादित्यत्र सिद्धान्तः—"बाधसापेक्षत्वापत्तेः" इति । तथा हि—सामान्यप्राप्तपूर्वाण्हबाधं कृत्वा ऽस्य मध्याह्नादौ प्रवृत्तिः । पूर्वाण्हसमये परिवेशे तु बाधनिरपेक्षेति एकविधेरुभयविधत्वं न सम्भवति । तेनास्य यागस्य पूर्वाण्हमात्रपरिवेशे कर्तव्यत्वम् न तु मध्याह्नादौ, निरपेक्षप्रवृत्तेः । यस्य बाधसापेक्षा प्रवृत्तिः । स विधिः कदाचिदपि न निरपेक्ष इति । न चोपरागस्यापराण्हबाधकत्वात्तत्राप्येतादृशं स्यादिति वाच्यम् । सूर्योपरागस्यापराण्हविषयकत्वसम्भवेऽपि चन्द्रोपरागस्य निरवकाशत्वापत्त्या अपराण्हविधेरेवोपरागातिरिक्तविषयत्वं कल्प्यत इति । वस्तुतो 'निशि काम्यव्रतेषु च' इतिवचने (१)पदाहवनीयवद्विरोधापत्त्या

(१) एतद्ग्रन्थस्थ(२३)त्रयोविंशाधिकरणवदित्यर्थः ।

निश्चपीत्यर्थः। तथा दिवा भागान्तरे मध्याह्लादौ (१)दण्डापूपत्वसिद्धिरिति ॥

८३ अथ द्वयोः प्रणयन्तीत्यधिकरणम्-

यथा धातुयागे "तपस्तपस्यौ शैशिरेण, मधुमाधवौ वासन्तेन, शुक्रशुची ग्रैष्मेण, नभोनभस्यौ वार्षिकेण, इषोर्जौ शारदेन, सहःसहस्यौ हैमन्तेन यजते"। "चतुर्षु पर्वसु वेदिं कुर्वन्ति"। "शारदे तु द्वयोः प्रणयन्ति, उपात्र वपन्ति"। "न वैश्वदेवे उत्तरवेदिमुपकिरन्ति, न शुनासीर्ये" इति शतपथश्रुतिः(२)। अस्यार्थः-तपस्तपस्यौ माघफाल्गुनौ व्याप्य शैशिरनाम्ना यागेन यजते। एवमुत्तरत्रापि व्याख्येयम्। धातौ च पौर्णमासीद्वयममावास्याद्वयं च वर्तते। तदेव पर्वचतुष्टयम्। तेषु द्रव्यासादनाय वेदिं कुर्वन्ति। तेन नैतेषु पर्वसु दर्भे द्रव्यासादनम्। शारदधातुयागे तु द्वयोः पर्वणोरेव वेदिं प्रणयन्ति-कुर्वन्ति। पर्वनामान्याह- कर्कभाष्ये।

आग्नेयं प्रथमं प्रोक्तं वैश्वदेवं द्वितीयकम्।
बार्हस्पत्यं तृतीयन्तु शुनासीर्यं तुरीयकम् ॥ १ ॥
आद्ययोः पूर्ववेदिः स्यादुत्तरावेदिरन्त्ययोः।
यागोपयुक्तवस्तूनि स्थापयेत्तत्र याज्ञिक इति ॥ २ ॥

प्रथमं पर्व पौर्णमासी। द्वितीयममावास्या। तृतीयश्च पौर्णमासी। चतुर्थममावास्येति। शुनासीर इन्द्रस्तत्सम्बन्धि शुनासीर्यम्। आद्यपर्वद्वये वेदिः पूर्ववेदिसंज्ञिका। अन्त्ययोरुत्तरवेद्या-

---

(१) अत्रत्य(४२)द्विचत्वारिंशाधिकरणन्यायेनेति भावः।

(२) उक्तानुपूर्वीका श्रुतिः शतपथब्राह्मणे नोपलभ्यते। संहितायां तु 'तपश्च तपस्यश्च शैशिरावृतू' इत्याद्यानुपूर्वीका दृश्यते इति बोध्यम्।

ख्या । वेदिषु किं करणीयं तत्राऽऽह-उपात्र वपन्तीति । अ-त्र-आसु वेदिषु उपवपन्ति-उपरि द्रव्याणि स्थापयन्ति । शारदे द्वयोरित्युक्तं तत्कयोर्द्वयोरित्याह-न वैश्वदेवे उत्तरवेदिमुपकिरन्ति-कुर्वन्ति । एवं शुनासीर्येऽपीति । तेन शारदे पूर्ववेदिद्वयकरणमेव उत्तरवेद्योर्निषिद्धत्वात् । अत्र च शारदेऽपि वेदिचतुष्टयस्य प्राप्त्योत्तरवेदिनिषेधः सङ्गच्छते । तथा चोत्तरवेद्यंशे प्रापकस्य विधेर्बाधं विना न निषेधविधिर्भवतीति, सर्वदैव बाधसापेक्षोऽयं निषेधविधिर्न कदाऽपि बाधनिरपेक्षः । यस्तु निरपेक्षः स कदाऽपि न तत्सापेक्ष इति ।

श्राद्धविवेके तु पर्युदासविधिरयमुक्तः । वैश्वदेवशुनासीर्यभिन्नपर्वणि वेदिं कुर्वन्तीत्यर्थः । तथा 'वेदाविदं पिनाष्टि' इति परिभाषया सोमाङ्गकयागमात्रे सोमपेषणार्थं वेदिर्विहिता । सोमाङ्गकयागविधिश्च द्विविधः-इष्टिः, पशुश्च । चर्वङ्गको याग इष्टिः । तेन दीक्षणीयादिविधिः सोमाङ्गकस्तत्र सोमविधेः । तथा च सर्वासामिष्टीनां दर्शपौर्णमासौ प्रकृतिः । 'प्रकृतिवच्च विकृतिः' इति न्यायेन दर्शधर्मा दीणक्षीयादिष्वतिदिष्टाः । वेदिरपि दर्शधर्मः । यागोपयुक्तं कर्म वेद्यां क्व करणीयमिति दर्शे ऽश्रवणाद्वेदिरप्यतिदेशाद्दर्शे प्राप्ता । एवं सोमाङ्गकत्वेन परिभाषयाऽपि वेद्यन्तरं प्राप्तम् । तथा च वेदिद्वयस्य वैयर्थ्येन शास्त्रार्थत्वाभावादातिदिष्टवेदिं बाधित्वा दीक्षणीयादिषु परिभाषाबोधितवेदिप्रवृत्तिः । परिभाषातो ऽतिदेशस्य दुर्बलत्वात् । सोमयागादौ त्विष्टित्वाभावेन दर्शधर्मानतिदेशाद्बाधनिरपेक्ष एव पारिभाषिकवेदिविधिरिति वैषम्यम् । तथा च वैषम्यपरिहाराय दीक्षणीयादिषु वेद्यतिरिक्तधर्मातिदेश एव । पारिभाषिकवेदिविधिस्तु तत्र निरपेक्ष एव भवतीति स्पष्टं दायभागसंसृष्टिवचन-

द्रव्यप्रकरणे । एवं—

दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणा हविरग्नयः ॥
अयातयामान्येतानि नियोज्यानि पुनः पुनः ।

इतिवचने दर्भपदं केचित् श्रावणामावास्याऽऽहृतदर्भपरं वदन्ति।

मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः ॥
अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः ।

इत्यनेनैकवाक्यत्वादिति, तन्न । वैषम्यात् । दर्भा इत्यस्यैकवाक्यत्वाय वचनान्तरसापेक्षत्वात्, कृष्णाजिनादौ तु निरपेक्षत्वाद्वाक्यभेदः स्यात् । न तु समूहालम्बनरूपैकान्वयबोधः स्यात् । सापेक्षस्य विलम्बेनान्वयबोधजनकत्वादिति—दर्भा इति पदं दर्भसामान्यपरमेव । मासे नभस्यमावास्येति वचनं प्रतिप्रसवरूपम् । यथा—

वार्षिकांश्चतुरो मासान् नाऽऽहरेत् मृत्तिकाः, कुशान् ।
असम्भवे त्वाददीत सद्यो यस्य प्रयोजनम् ।

इत्यनेन कुशाहरणनिषेधे तस्य प्रतिप्रसवरूपत्वादिति ॥

८४ अथ परिभाषाऽधिकरणम्—

'कर्मण्यङ्गवैगुण्ये जुहोति' इति श्रूयते । तत्र द्रव्यमन्त्राकाङ्क्षायां परिभाषा ग्राह्या । यथा ।

'आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ।
मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः' ॥

मन्त्रस्यानादेशे प्रजापतिर्व्याहृतिमन्त्र इत्यर्थः । यथाऽऽह परिशिष्टे—

प्रजानां पतये त्वेता महाव्याहृतयो ऽव्यया इति ।

एवं देवतायाश्चानादेशे व्याहृतिरेव प्रजापतित्वेन पूज्ये-

स्यर्थः। एवञ्च यत्र विशेषपरिभाषा नास्ति तत्रोक्ता सामान्यपरिभाषा ग्राह्या। तथाहि "चतुर्होत्रां पौर्णमासीम्" इति, "पञ्चहोत्राममावास्याम्" इति च श्रूयते। चत्वारो होत्रा होतारो ऽस्यामित्यनेनोपांशुसंज्ञको याग उक्तः। पञ्चहोत्रामित्यनेनाग्नीषोमसंज्ञको याग उक्तः। अनयोर्द्रव्यदेवतासाकाङ्क्षत्वाद्विशेषपरिभाषा ग्राह्या। यथा—

ऐन्द्रं दध्यमावास्यापौर्णमास्योः पयस्तथा।

तथा ऐन्द्रमित्यर्थः। एवम् "आग्नेयेन पक्षान्ते यजेत" इति श्रूयते। आग्नेयेन-आग्नेयाख्ययागेन। पक्षान्ते-तत्तिथिद्वये। तेन पौर्णमास्यामारम्भः, समाप्तिस्त्वमावास्यायामिति। मध्यस्थप्रतिपदादिचतुर्दश्यन्ततिथिव्यवधानं न दोषाय वचनबलात्। एवञ्चाग्नेयेऽपि द्रव्यदेवताकाङ्क्षायां तयैव परिभाषया तिथिद्वये ऐन्द्रदध्यैन्द्रपयसोरेव ग्रहणमिति॥

८५ अथ सर्वनामाधिकरणम्-

बहुष्वपि प्रक्रान्तेषु सर्वनामपदेन शीघ्रोपस्थितिकं ग्राह्यम्। यथा श्रुतिः—'इष्टिपूर्वकमेवादः पौर्णमासं हविः' इति। प्रयाजाद्याहुतित्रयमदः पौर्णमासं हविरिष्टिपूर्वकं कुर्यादित्यर्थः। पौर्णमासयागो द्विविधः-एकोऽग्नीषोमीयपुरोडाशद्रव्यकः, अपर उपांशुयागाख्यो ऽग्नीषोमबृहस्पतीन्द्रादिदेवताऽऽज्यद्रव्यकः। यथा 'अग्नीषोमाभ्यां पुरोडाशेन, उपांशुयाजी त्वग्नीषोमबृहस्पतीन्द्रादिभ्य आज्येन जुहोति' इति। अत्र चादःपदस्य सर्वनामत्वादुभयमेवोपस्थितं हविः-पुरोडाशः, आज्यञ्च वाच्यम्। तथा च पौर्णमासयोर्द्वयोरेवेष्टिपूर्वकता प्राप्तेत्यत्र सिद्धान्तसूत्रम्—"शीघ्रोपस्थितिकेनानुभयम्" इति। उभयत्र नेष्टि-

पूर्वकता प्राप्यते, अग्नीषोमीयपुरोडाशस्याल्पदेवताघटितत्वेन शीघ्रोपस्थितित्वाददःपदेन तदेवोपस्थाप्यते । अतस्तेनैवान्वय इति दायभागे उक्तम् ।

८६ अथ निषेधपर्युदासौ—

तत्रातिदेशाद्रागादर्थतश्च यत्र प्राप्तिस्तत्र न पर्युदासः । किन्तु निषेध एव, श्रूयमाणस्य प्रापकविधेरभावात् । तादृशविध्यभावे च पर्युदासनञा केन सहैकवाक्यत्वं कर्तव्यमिति ।

अतिदेशाद्यथा-"न तौ पशौ करोति" इत्यनेन पशुयागे प्रयाजानुयाजौ निषिध्येते । न च निषेधः प्राप्तिमन्तरेण सम्भवति, इति दर्शधर्मातिदेशः कल्प्यते ।

रागाद्यथा-'पर्वणि मांसं नाश्नीयात्' इत्यादौ ।

अर्थतो यथा—शरद्वसन्तयोर्नवश्राद्धं विहितम् । तत्र शरत्पदेन शरदादिषण्मासा एव गौणमुख्यभावेन विहिताः । तथा च शरदादिषण्मासेषु नवश्राद्धं कर्तव्यमित्यर्थतो विधिः कल्प्यते । तत्र च 'नन्दायां भार्गवदिने' इत्यादिनिषेधः ।

यत्र तु सामान्यरूपेण शास्त्रतः प्राप्तस्य विशेषरूपेण निषेधस्तत्र पर्युदासः—यथा-"यजतिषु येयजामहं करोति, नानुयाजेषु" इति श्रुतिः । अत्र च नानुयाजेषु यजतिष्वित्यन्वयः । एकवाक्यत्वानुरोधात् । निषेधे वाक्यभेदापत्तिः । न चेष्टापत्तिः ।

"सम्भवत्येकवाक्यत्वे वाक्यभेदो न युज्यते"

इति वचनात् । तथा चानुयोगिप्रतियोगिनोः समानविभक्तिकत्वेन यो नञा ऽन्योन्याभावो बोध्यते स एव पर्युदासः । तेनानुयाजभिन्नेषु यजतिष्वित्यर्थः । अत्र यजतिरनुयोगी, अनुयाजः प्रतियोगीति ।

तथा—"अहरहर्ददाति" "दीक्षितो न ददाति" इत्यत्र

पर्युदासेन दीक्षितेतर इत्यर्थः। दीक्षितः कृतयज्ञारम्भः। एककर्ममध्ये ऽन्यकर्मनिषेधाद्दाननिषेधः। ननु पर्युदासनञा दीक्षितेतरोऽहरहर्ददातीति सिद्धम्। तथाचैकस्य ददातिपदस्य वैयर्थ्यम्(१)। नैवम्। निषेधपक्षे वाक्यभेदान्मूलभूतश्रुतेरपि वाक्यभेदापत्तेः। तथा चास्मन्मते सम्भेदे नान्यतरवैयर्थ्यमिति न्यायादरः। सम्भेदे एकपदार्थोपस्थापकबहुपदोपस्थितावित्यर्थः। अयम्भावः—यदि पदोपस्थाप्यपदार्थो नान्वयबोधे निविशते, तदा वैयर्थ्यम्। अत्र तु तन्नास्ति 'बहवो विप्राः सन्ति' इत्यत्र बहव इतिपदवत्। अत एव तत्तत्स्थले एकवाक्यत्वाय दोषद्वयग्रस्ता लक्षणाऽपि समाश्रीयते इति। नचाधिकस्य ददातिपदस्याऽऽकाङ्क्षा नास्ति तत्पदं विनाऽपि तदर्थान्वयबोधादिति वाच्यम्। यत्पदोपस्थाप्यस्यार्थस्य यत्पदोपस्थितिजन्यार्थोपस्थितिं विना अन्वयानुभवविषयत्वाभावस्तत्पदस्य तत्पदे आकांक्षेत्युक्तत्वात्। घटं कलशमानयेत्यादावप्यन्वयबोधो भवत्येव किन्त्वधिककलशपदप्रयोक्तुर्निग्रहमात्रमिति।

यच्चोक्तं—विप्रेभ्यो दधि दातव्यं, कौण्डिन्याय न दातव्यमित्यादौ दातव्यपदस्याऽऽधिक्यापत्त्या निषेध एव न तु पर्युदास इति। तदपि लौकिकवाक्ये। तत्रैकवाक्यताविरहे क्षत्यभावात्। नहि तद्दृष्टान्तेन वेदेऽपि वाक्यभेद आदरणीय इति युक्तमिति। एवं 'रात्रौ श्राद्धं न कुर्वीत' इत्यत्रैकवाक्यत्वानुरोधात्पर्युदासेन रात्रीतरामावास्यायामित्यन्वयः। अमावास्यावचनस्य सावकाशत्वेन पर्युदस्तेतरकर्मसम्भवात्। न चैकवाक्यतायां कुर्वीतेति व्यर्थमुक्तोत्तरत्वात्।

वस्तुतस्तु श्राद्धं कुर्वीतेत्यनेन प्राप्तश्राद्धकरणमुद्दिश्य तत्र

(१) एवञ्च निषेध एवोचित इति।

न रात्रौ इत्यनेन रात्रिभिन्नः कालो विधीयते। अतो ऽनुवादार्थमेव तत्पदम्।

अन्येतु अमावास्यादिश्राद्धविधेः प्रातःकालादिदिवसभागचतुष्टयपरत्वेन रात्रौ प्रसक्त्यभावान्निषेधो ऽनुपपन्न इति पर्युदास आश्रीयते इत्याहुः—

अत्र वदन्ति—प्रत्यक्षे आरोपरूपप्रसक्तिसम्भवेऽपि ह्रदे वह्निर्नास्तीति शाब्दबोधस्थले प्रसक्त्यभावेन निषेधबोधानुपपत्तेः प्रसक्तिर्न तत्र हेतुः। नन्वाऽऽकाशं नखाद्यमित्यपि विधिः कथं न कृतः?, तत्र प्रयोजनाभावात्। अत्र तु तात्पर्यानवधारणनिबन्धनरात्रिश्राद्धकरणवारणस्य प्रयोजनस्य सत्त्वादिति तत्स्वातन्त्र्यम्। नहि विशेषदर्शिभ्रमप्रवृत्तिवारणाय वेद इति युक्तम्। यथा 'दक्षिणामुखः श्राद्धं कुर्यात्' इति विशेषादर्शिनो-देवयागे पूर्वाभिमुखत्वदर्शनाद् भ्रमेण तन्मुखश्राद्धवारणाय तन्निषेधो विधीयते। तथाऽत्रापि रात्रिनिषेधादर्शिनां तत्र प्रवृत्तिः कथं वारणीयेति। उक्ते वाह्निर्नास्तीति शाब्दबोधस्थलेऽपि प्रसक्तिरस्त्येव। लोके निषेधवाक्यं हि सन्दिग्धविपर्यस्तान्यतरं प्रत्येव प्रयुज्यते, न तन्निश्चितार्थकं प्रति। तथा चोद्देश्यस्याश्रोतुः सन्देहविपर्यस्तान्यतररूपा प्रसक्तिरस्त्येव। तथा च व्युत्पन्नं प्रति वेदो विहितः, न विशेषादर्शिनं प्रति। तथाचोक्तम्—

'यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः' इति।

तर्केण विशेषदर्शनप्रयोजकन्यायेन। स धर्मं वेद—व्यवहारप्रयोजकप्रवृत्तिप्रयोजनार्थत्वात् स एवेत्यर्थः।

अन्येतु पर्युदासपक्षे निषेधप्रसक्तस्य नञो लक्षणा स्यात्। न चात्र लक्षणाबीजमनुपपत्तिरस्तीति। अत्र हेतुः-अमावास्यापदात् सामान्यात् रात्रिपरस्यापि प्राप्त्या निषेधो वाच्यः। स

न सम्भवति उपजीव्यबाधापत्तेः। तथा च बाधवारणायोभयविधिसार्थक्याय च विकल्पो वाच्यः। राज्यमावास्याऽवच्छेदेन निषेधेन बाधाद्विकल्पे च तदभावात्। तथा चामावास्याविधेर्दिवांशश्राद्धविधौ निरपेक्षत्वाद् राज्यंशे विधौ विकल्पकल्पनासापेक्षत्वाद्विधेः सापेक्षत्वनिरपेक्षत्वलक्षणं वैषम्यं स्यादिति विधित्वानुपपत्त्या लक्षणेति—

अत्र वदन्ति—नहि सावकाशनिरवकाशविध्योर्विकल्पस्तुल्यबलवत्त्वाभावात्। निरवकाशत्वेन निषेधस्य बलवत्त्वात्। (१)पदाहवनीयस्थले निरवकाशस्य बलवत्त्वेन क्लृप्तत्वात्।

इतरे तु प्राप्तेनेष्टसाधनत्वबोधः। तथा चामावास्यापदस्य दिवारात्रिसामान्यपरत्वे राज्यंशे इष्टसाधनत्वबोधे तज्ज्ञानस्य राज्यंशे भ्रमत्वमापद्येत। तत्र च वेदस्य भ्रमत्वे ऽश्वमेधादिबोधकवेदे ऽनाश्वासापत्त्या ऽननुष्ठापकत्वलक्षणाप्रामाण्यं स्यात्। अतः प्राप्त्यभावार्थं पर्युदासलक्षणेति वदन्ति। तन्न। तात्पर्यभ्रमे वेदस्यापि भ्रमजनकत्वादव्यवस्थादर्शनात्। तथा चाज्ञाततात्पर्यकत्वेन भ्रमजनकत्वं, न वेदत्वेन। अतो वेदत्वेनाऽऽश्वास एव।

अन्येतु अमावास्याविधेर्दिवापरत्वमेवास्तु, किं पर्युदासनिषेधाभ्याम्। तदपि न। दिवापरत्वे तात्पर्यग्राहकप्रकरणाद्यभावात्तात्पर्यग्रहार्थमेव निषेधवचनस्य सार्थक्यात्। दृष्टश्च तात्पर्यग्रहार्थं विशेषवचनम्। यथा—'पायसेन श्रियै जुहोति' इति। श्रीहोमे पायसशब्दस्य श्रीवासाख्यगन्धद्रव्यस्यापि वाचकत्वात्तात्पर्यग्रहाय वाक्यशेष उक्तः—'क्षीरशृतस्तण्डुलः पायसो भवति' इति। यथा वा 'यवमयश्चरुर्भवति' इति। अत्र यवशब्दस्य—

(१) अत्रत्य(२३)त्रयोविंशाधिकरणे।

यत्रेभ्यः स्वाहेति धान्ये निरूढलक्षणया धान्येऽपि यवपदप्रयोगदर्शनात्तात्पर्यग्रहाय वाक्यशेषः—

"वसन्ते सर्वसस्यानां जायते यत्र शातनम् ।
मोदमानाश्च दृश्यन्ते यवाः कणिशशालिनः" इति ॥

ननु पर्युदासपक्षेऽपि कथं लक्षणा ?, अत्यन्ताभाव इव भेदेऽपि नञः शक्तेः । मैवम् । 'अन्याय्यश्चानेकार्थ' इति न्यायेन नानार्थत्वायोगात् । तथात्वे च अन्योन्याभावे लक्षणैव तस्यैवाभेदान्वयात् । तथा चैकवाक्यार्थ एव पर्युदास इति ।

परे तु पर्युदासपक्षे अमावास्यायामित्यत्र यथा रात्रीतरान्वयस्तथा ऽष्टकादावपीति रात्रिश्राद्धनिषेधवचनस्याऽऽवृत्त्यापत्तिरिति, सत्यम् । सति तात्पर्ये आवृत्त्यकल्पना विशेषवचनाविषयसर्वश्राद्धतिथीनामेव दिवापरत्वग्रहस्याऽऽकाङ्क्षितत्वादावृत्तिं विनैव सर्वत्रान्वय इति सर्वत्रान्वये एकवाक्यस्यैव तात्पर्यमिति ।

तुल्यबलवत्त्वे विकल्पो यथा—'अतिरात्रे षोडशिनं गृह्णाति' 'नातिरात्रे षोडशिनं गृह्णाति' इत्यत्र उभयोरेव निरवकाशत्वात्तुल्यत्वम् । षोडशकला अस्य सन्तीति षोडशी सोमः । प्रकृते स ग्रहविशेषः । तथा च प्रकृतियागे सोमग्रहणस्य विहितत्वाद्विकृतियागे ऽतिरात्रे ऽतिदेशेन सर्वदा प्राप्तत्वात्तद्विकल्पार्थं वचनम् । नच यदि षोडशिग्रहणं विना यागसिद्धिस्तदा तद्ग्रहणोपदेशो व्यर्थः । फलभूमार्थं ग्रहणोपदेशात् ।

८७ अथ यद्गुणन्यायः—

ननु तत्तद्देवपूजायामावरणपूजा क्रियते तत्कथम्?। न तत्प्रधानस्वरूपनिर्वाहकं प्रधानस्वरूपस्य गन्धाद्युपचारैरेव सिद्धेः । नाप्यदृष्टद्वारा, मानाभावात् । कदा वा तत्कार्यमत्र सिद्धान्तः—"यो यद्गुणः स तद्बलात्" इति । तद्बलात्प्रधानपूजनात्प-

कबलात् । तथा च प्रधानपूजा तेषां प्रयोजिका । अतः प्रधानपूजानन्तरं तत्कार्यम्। अत एव प्रयोजकत्वात्तदुत्तराङ्गमिति । तेन प्राचीनाङ्गापूर्वसहितं प्रधानं प्रधानापूर्वं (परमापूर्वं) जनयति । चरमाङ्गापूर्वसहितं प्रधानापूर्वं चरमाङ्गापूर्वं जनयति इति । तथा च ग्रहयागे ऽधिदैवतप्रत्यधिदैवते ग्रहपूजानन्तरं पूज्ये । एवं दुर्गापूजायां पश्चादेव योगिन्याद्याः पूज्याः । एवमिष्टदेवतापूजनेऽपि । नच तत्तत्क्रमविधित एव तत्तत्पूजा प्राप्नोति न्यायोऽयं व्यर्थः । एतन्न्यायमूलत्वात्तत्क्रमविधेः । आवरणदेवताज्ञानार्थमेव तद्विधेः । पश्चात्कर्तव्यत्वञ्च न्यायबलादिति ।

८८ अथानुयाजाधिकरणम्—

तत्र परिभाषाश्रुतिः श्रूयते "सूक्तवाकेन्द्रस्तुतिप्राजापत्यसूक्तानि प्रजप्यानुयाजान् करोति, ततः प्रकृतमनुतिष्ठति" इति । तथा चानुयाजाङ्कयागे सूक्तवाकादीन् प्रजप्यानुयाजान् कृत्वैव प्रकृतं कुर्यात् । अयञ्चानुयाजः प्रयाजानुयाजभिन्नः । एवं बहुसुवर्णके श्रूयते "आग्निमारुतादूर्ध्वमनुयाजैश्चरन्ति" इति । आग्निमारुतयागो बहुसुवर्णयागैकदेशः प्रधानीभूतः । तदुत्तरमनुयाजानां विधानादनुयाजानामुत्कर्षो नतु सूक्तवाकादीनां तथाश्रुतेरिति पूर्वपक्षे जैमिनिसूत्रम्—"तदन्तत्वादनुयाजानाम्" इति । अयमर्थः—अनुयाजानां सूक्तवाकोत्तरं कर्तव्यत्वादनुयाजोत्कर्षे सूक्तवाकादीनामप्युत्कर्ष इत्येतदधिकरणं तदाद्युत्कर्षन्यायमूलमिति । एवं सपिण्डनापकर्षे मासिकानामप्यपकर्ष इति श्राद्धचिन्तामणिः ॥

८९ अथ सक्त्वधिकरणम्—

पूषयागे "सक्तुना यजेत" इति श्रूयते । सक्तोस्तु प्रोक्षणं न श्रूयते । अतः सक्तोरप्रोक्षितस्यैव होम इत्यत्र सिद्धान्तसू-

न्नम्— "नियोगसाधनलक्षणया सिद्धेः" इति । अस्यार्थः—व्रीहीन् प्रोक्षतीत्यत्र द्वितीयाबोधितक्रियाजन्यफलाश्रयत्वरूपकर्मत्वानुपपत्त्या व्रीहिनिष्ठः संस्कारः कल्प्यते । अन्यथा प्रोक्षणस्याऽऽशुचिनाशितया प्रोक्षिततुल्यतया प्रोक्षितवदप्रोक्षितस्याऽप्यवघातान्वयापत्तेः । एवं यवे प्रोक्षणं कथम् ? इत्थम् । व्रीहिशब्दस्य नियोगसाधनद्रव्यपरतया यवेऽपि तत्सिद्धेः । अन्यथाऽवघातस्यापि यवे बाधः स्यात् । व्रीहिष्वेव तदुपदेशात् । न च व्रीहीनवहन्तीत्यत्र लक्षणाऽस्तु । अन्यथा यवाऽनवघाते सतुषयवेन पुरोडाशनिष्पत्तिरिति वाच्यम् । व्रीहीन् प्रोक्षति व्रीहीनवहन्तीत्यादौ समानप्रकारतानिर्वाहार्थं सर्वत्रैव लक्षणा । एवं सक्तोरपि नियोगसाधनत्वात् प्रोक्षणान्वयः ।

अन्ये तु अवघातप्रकरणीयत्वाद् व्रीहिपदस्य सक्तौ न प्रोक्षणम् । अत एवाऽऽज्यस्य प्रोक्षणं विनैव होम इति वदन्ति—

तत्र परे वदन्ति । संस्कृतद्रव्यस्य वैदिककर्मणि नियोगादाज्यस्यापि पवित्रोत्पवनेन संस्कृतत्वात् न तत्र प्रोक्षणापेक्षा । सक्तोस्तु प्रोक्षणं विना संस्काराभावात्प्रोक्षणमेव । अत एव—

"नाप्रोक्षितं स्पृशेत् किञ्चिद्दैवे पित्र्ये च कर्मणि" ।

इत्यत्र नियमार्थं नञ्द्वयम् । नन्ववघातरूपः संस्कारस्तर्हि कथं न स्यादित्यत आह—व्रीहीनित्यादि । तत्र विधेरसम्भवान्नासौ संस्कारः । प्रोक्षणे तु नाप्रोक्षितमित्यादिविधिरस्त्येवेति । व्रीहीनवहन्तीति लक्षणया सर्वत्र प्रोक्षणप्राप्तत्वाद्विधेरसम्भवात् ।

परे तु व्रीहावित्यत्रासमानप्रकारकबोधं कल्पयित्वा यवे प्रोक्षणाभाव एव कल्प्यताम् । कल्पनातो जघन्या लक्षणेति न्यायात् । यथा विष्णुधर्मोत्तरे-

ज्येष्ठे मासि सिताष्टम्यां यः पूजयति केशवम् ।
न दुर्गतिमवाप्नोति वाजपेयञ्च विन्दति ॥

शिवरहस्ये—

शुक्लाष्टम्यां शुक्रमासे यः पूजयति शङ्करम् ।
दुर्गतिं न लभेच्चैव वाजपेयफलं लभेत् ॥

अत्र मूलभूतश्रुतिद्वयकल्पनाभिया केशवपदस्य लक्षणया शङ्करपरत्वमेवास्तु । नच विनिगमनाविरहः अष्टमीतिथेः शैवत्वेनोक्तत्वात् । यथा- 'हरस्य तिथिरष्टमी' इति । तथा चात्र लक्षणा न क्रियते, किन्तु मूलश्रुतिद्वयकल्पनैवेति वदन्ति । एवं ते वक्तव्याः—धान्यमसिमन्त्रे धान्यपदेन तण्डुललक्षणा कर्तव्या मन्त्रपाठस्यादृष्टार्थकत्वकल्पनयैवोपपत्तेः । केशवपदे च न लक्षणा लक्षणाबीजस्य मुख्यार्थानुपपत्तेरभावादिति ।

९० अथ गिरगिराऽधिकरणम्—

अग्निष्टोमे "ऋत्विजो देवानामन्त्रयन्ति, यज्ञायज्ञा वो ऽग्नये गिरागिरा च दक्षसे" इति श्रुतिः । अस्यार्थः—वो युष्मभ्यमिन्द्रादिभ्यः अग्नये च यज्ञा यज्ञा यज्ञे यज्ञे गिरा गिरा तत्तन्मन्त्रेण दक्षसे ऽहं यजे। 'दक्ष दाने' इतिधातोर्लेट उत्तमपुरुषैकवचनमिट्, तस्यैत्वं "सिब्बहुलं लेटि"इति सिपि दक्षसे इति । यज्ञायज्ञा इति "सुपां सुलुग्" इति सप्तमीस्थाने आजादेशः । उक्तश्रुत्यनन्तरं "न गिरागिरेति ब्रूयात् । यद्गिरागिरेति ब्रूयादात्मानमेव तदुद्गाता गिरेत् । तस्मादैरं कृत्वोद्गेयम्"इति । अस्यार्थः—ऋत्विजो देवानिति यदुक्तं तत्रोद्गातृव्यतिरिक्ता ऋत्विज इति बोध्यम् । तत्र हेतुमाह—उद्गाता न गिरागिरेति ब्रूयात् यदि वदेत् तदाऽऽत्मानमेव गिरेन्नाशयेत् । तर्हि किं वाच्यम् । तत्राऽऽह— तस्मादिति । ऐरं गिरागिरेतिपदस्थाने इरापदयुक्तं मन्त्रं कृत्वोद्गात्रोद्गेय-

मित्यर्थः । तथा चोद्गात्रैवं पाठ्यम्—"यज्ञायज्ञा वो अग्नये इरा इरा च दक्षसे" इति(१) । इराइरेति-"सुपां सुलुग्" इति तृतीयाया आजादेशः । तेन इरया मन्त्रवाण्या दक्षसे इत्यर्थः । इराशब्देन वाण्युच्यते इति ॥

९१ अथ कलञ्जाधिकरणम्—

'न कलञ्जं(२) भक्षयेत्' इत्यत्र लिङा बोधितङ्कार्यत्वमभावेऽन्वेति । तेन कलञ्जभक्षणाभावविषयकं कार्यमित्यन्वयबोधः । तथा च निषेधापूर्वस्य विहिताद्दृष्टत्वेन संस्कारसापेक्षोत्पत्तिकत्वादनुपनीतानामपरिणीतानां कन्यानाञ्च नैतद्विधिविषयत्वम् । न चाष्टकादिश्राद्धाधिकारोऽनुपनीतानामपि दृश्यते इति नादृष्टे संस्कारापेक्षेति वाच्यम् । बाधकाभावे सतीति विशेषणात् । तत्र च—

'एतच्चानुपनीतोऽपि कुर्यात् सर्वेषु पर्वसु'

इत्येव वचनं बाधकम् । अन्यथा ऽनुपनीतानां दर्शादियागाधिकारोऽपि स्यात् । इत्यत्र सिद्धान्तसूत्रम्- "नैतदन्यनिषिद्धत्वात्" इति । अस्यार्थः-एतद्भवदुक्तं न । कुतः ?, अस्य कलञ्जभक्षणस्य निषिद्धत्वात् । अयम्भावः—कलञ्जभक्षणस्य रागप्राप्तविषयकनिषिद्धत्वेन पापजनकत्वव्याप्तत्वात् । न च पापोत्पत्तौ संस्कारः सहकारी । तथा च असंस्कृतैरपि कलञ्जभक्षणादितो निवर्तितव्यम् । अष्टकादिश्राद्धवदेतदद्दृष्टेऽपि न संस्कारः सहकारी । तत्र वचनवदत्र (कलञ्जभक्षणे) न्यायस्य सत्त्वादिति ।

---

(१) सामगा इरापदगानार्थे गानशास्त्रपरिभाषयेकारस्य स्थाने आकारो यकार ईकारश्चेति त्रीन्वर्णान् प्रयुञ्जते । तत आयीरां इत्येव गातव्यम् ।

(२) विषाक्तशरविद्धपशुमांसं कलञ्जम् ।

९२ अथ लिङ्गसमवायन्यायः—

इष्टकाचयनयागे 'प्राणभृता इष्टकां संस्करोति' इति श्रूयते। प्राणभृता–प्राणभृन्मन्त्रेण। अत्र च दशानामिष्टकानां यागे उपयोगः। तथा श्रुत्यन्तरं "प्राणभृत उपदधाति" इति। अस्यार्थः—प्राणभृन्मन्त्रेण संस्कृता इष्टका अग्निसमीपे दशादिक्षु स्थापयतीति। तथा च सर्वेष्टकानामेव संस्कारः, पूर्वश्रुतौ इष्टकामित्येकवचनस्याविवक्षितत्वात्। अत्र सिद्धान्तसूत्रम्–"लिङ्गसमवायात्" (अ०१पा०४अधि०१८सू०२८) इति। लिङ्ग्यते ज्ञाप्यते ऽनेनेति लिङ्गं, प्राणभृत्पदवाच्याः संस्कृता इष्टकास्तत्समवायात्तत्सम्बन्धादिष्टकागणस्यैवाजहत्स्वार्थलक्षणया ऽभिधानमिति प्राणभृत इति बहुवचनस्योपपत्तेरुत्तरश्रुतेर्लक्षणयैवोपपत्तौ पूर्वश्रुतिबाधस्यान्याय्यत्वम्। तस्य निरपेक्षत्वेन बलवत्त्वात्। नचेष्टकासंस्कारे ऽनध्यवसायः पुरोडाशकपालवदुपपत्तेः।

९३ अथ प्रकृतिभागव्यवस्था–

"कृष्णाघ्न्याक्षीरे कृष्णलान् श्रपयेत्, विष्णुब्रह्मरुद्रेन्द्रादिसयमेभ्यो जुहोति इदं विष्णुः, ब्रह्मादेवानां, नमः शम्भवे, व्रातावमितं, आकृष्णेन, असियमइति" इति श्रुतिः। कृष्णाघ्न्या–कृष्णा गौः। अत्र यमेभ्यइति बहुत्वश्रुतावपि न साहित्येन देवतात्वम् प्रत्येकम्मन्त्रोपदेशादिति। अस्य विकृतियागे श्रुतिः "तथैव नीवारान् श्रपयेत्, तथैव जुहोतीत्यायुष्कामः, त्र्यंशं विष्णवे, साम्येनान्येभ्यः" इति। चरुत्रिभागं कृत्वा एकमंशं विष्णवे ऽन्यद्व्यंशं समभागेन ब्रह्मादिभ्यो जुहुयादित्यर्थः। तथा च प्रकृतियागे कृष्णलचरोर्न त्र्यंशकरणम् विकृतावेव तदुपदेशात्। इत्यत्र सूत्रम्–"असति विरूपे पूर्वापरयोः साम्यम्" इति। विरूपे बाधके ऽसति पूर्वापरयोः प्रकृतिविकृत्योः

साम्यमेव । तेन कृष्णलचरोरपि द्व्यंशकरणमिति ।

पृथिवीयागे श्रूयते-"पृथिव्यै क्षीरेण दध्ना च जुहोति, इरावतीति वायुं पिबति, क्षीरं, दधि च" इति । अस्य विकृतौ श्रुतिः "वायवे जुहोति, चतुःपलं चतुर्धा ऽश्नाति" इति । अत्र पलचतुष्कस्य चतुर्भागं कृत्वा ऽशनं विहितम् । प्रकृतिविकृत्योः साम्यकथनात्-प्रकृतावपि तथैव भागस्य वाय्वादित्रयाणां प्राप्तत्वादाह-असति विरूप इति । वायोर्गुरुत्वाभावेन पलाभावाद्भागासम्भव इति प्रकृतौ दधिपयसोरेव भागकरणं, वायोः सकृदेव पानम् । एवं विकृतियागे वायुभक्षणं नाङ्गं तस्य पलासम्भवात् । पलत्वेनैव भक्षणविधानात् । तथा च—

यो येन संपिबेद्वर्षं सोऽपि तत्समतामियात् ।
पादन्यूनञ्चरेत्सोऽपि तस्य तच्च व्रतं द्विज ॥

इति व्यासवचनम् । यः पापी येन पापिना सम्पिबेत्संसर्गी स्यात् तस्य व्रतं पादन्यूनं स कुर्यादित्यर्थः । तेन ज्ञानपूर्वकब्राह्मणघातिनि मनुना द्वादशवार्षिकादित्रयोदशप्रायश्चित्ताभिधानात्तन्मध्ये मरणस्य विधानेऽपि न तस्यातिदेशः तत्संसर्गिणि मरणस्य पादन्यूनत्वासम्भवात् किन्तु द्वादशवार्षिकमेव पादन्यूनं प्रायश्चित्तमिति प्रायश्चित्तविवेकः । एवं प्रकृतिविकृत्योः साम्यकथनाद्विकृतावाभ्युदयिके 'कराग्राग्रपवित्रकान्' इति श्रुतेः पार्वणेऽपि तथैव विशेषानुपदेशादिति नवीनगौडाः ।

मैथिलास्तु 'पित्र्ये द्विगुणा दर्भा दक्षिणाग्राश्च' इति परिभाषया पवित्रस्य पार्वणे ब्राह्मणकरे दक्षिणाग्रत्वमेव, तथाऽऽभ्युदयिकेऽपि तथात्वप्राप्त्या तद्बाधाय कराग्राग्रेति । अत एवार्घ्याणामुत्सर्गे द्विगुणकुशाग्रदिशि नानध्यवसायः किन्तु दक्षिणाग्रा एव धार्या इति वदन्ति ।

अत्र वदन्ति-पार्वणस्याभ्युदयिकप्रकृतित्वे 'प्रकृतिवद्विकृतिः' इतिन्यायेन पार्वणाङ्गसमुदायस्यैवातिदेशः। तथा चाष्टकाश्राद्धस्यापि पार्वणतया तद्धर्माणामपूपमांसशाकानामावश्यकानामङ्गानामपि प्राप्तिः स्यात्पार्वणपदवाच्यता च तस्यापि। यथा भविष्ये—

अमावास्यायां क्रियते पार्वणं समुदाहृतम्।
क्रियते वा पर्वणि यत्तत्पार्वणमिति स्थितिः।

तथा चामावास्याश्राद्धत्वं पर्वश्राद्धत्वञ्च पार्वणपदशक्यतावच्छेदकमतोऽष्टकाश्राद्धं पार्वणपदवाच्यमेवेति। अत्र नवीनाः-यद्यपि पार्वणपदस्योभयमपि शक्यं, तथापि अमावास्याश्राद्धे रूढेस्तस्य शीघ्रोपस्थितिकत्वात्पार्वणविधिना कुर्यादित्यमावास्याश्राद्धमुपस्थापितम्। पर्वश्राद्धे यौगिकत्वात्तस्य चावयवार्थोपस्थित्यधीनत्वाद्विलम्बोपस्थितिः। ततः शीघ्रोपस्थितिकेनैवान्वयबोधः स्यादिति नापूपादीनामतिदेश इति बहुदिनभावनापूर्वकं समाधानमाहुः। सामान्यातिदेशे विशेषानतिदेश इति न्यायात्पार्वणविशेषाष्टकाधर्मस्याप्राप्तत्वात्। स तु न्यायो यथा—"विद्याकाम ऊर्जमारभ्य वर्षं प्रति कृष्णचतुर्दश्यां रुद्राय तिलैर्जुहोति इमारुद्रायेति, तपस्ये तु यवान् श्रपयति" इति रुद्रयागमुक्त्वा "एवं दाम्पत्यसर्वकामः प्रत्यष्टम्यम्बिकायै जुहोत्यम्बेऽम्बिकइति" इति श्रुतावुक्तम्। ऊर्ज-कार्तिकमिति। तपस्ये-फाल्गुने। अत्र च रुद्रयागः अम्बिकायागस्य प्रकृतिरेवमित्युक्तेः। तथा च रुद्रयागे फाल्गुनकर्तव्ये चरुरङ्गम्। तथा चाम्बिकायागे सर्वमासेष्वेव चरोरप्यतिदेशात्प्राप्त्या अम्बिकायागस्तिलैश्चरुणा च कार्यः।

नच तपस्ये इतिश्रुतेः कथं सर्वमासेष्विति वक्तव्यम्। त-

पस्यस्य चतुर्दशीधीशेषत्वात्तपस्ये च चतुर्दश्यामित्यन्वयात् । तथा अष्टम्यां न तपस्यान्वयो ऽन्यान्वितत्वात् । एवञ्च केवलमतिदेशेन यत्रस्यैवान्वयः । इत्यत्र सिद्धान्तसूत्रम्—"तुल्यप्राप्त्या नातुल्यप्राप्तिः" इति । सामान्यस्यातिदेशेन न विशेषस्यातिदेश इत्यर्थः । तेनाम्बिकाहोमे न चरुः तस्य मासविशेषणीयत्वेन विशेषत्वात् ।

एवं सांवत्सरिकैकोद्दिष्टे प्रकृतिराद्यैकोद्दिष्टे च "इह लोकं परित्यज्य" इति मन्त्रोऽङ्गम् । सांवत्सरिके एकोद्दिष्टविकृतौ तस्याङ्गत्वं स्यात्तत्राप्येष एव न्याय इति ।

यच्चोक्तं—पार्वणपदस्योभयमेव शक्यं, तदपि न । "अन्याय्यश्चानेकार्थत्वम्" (अधि० ४९) इति सूत्रात् । अमावास्याश्राद्धत्वमेव शक्यतावच्छेदकं, नान्यत् । तथा हि अमावास्यायामिति यद्यधिकरणसप्तमी तदा ऽमावास्याधिकरणकं भाद्राद्यैकोद्दिष्टमपि पार्वणं स्यात्, ततश्चामावास्यात्वेन यत्र निमित्तता तत्पार्वणं नत्वमावास्यानिमित्तकमात्रम् । अमावास्याया मृताहत्वे मृताहनिमित्तकस्यामावास्यानिमित्तत्वात् । एवं पर्वणीत्यत्राधिकरणसप्तमीत्वेन स एव दोषः । अतः पर्वत्वेन निमित्तता वाच्या, सा च न सम्भवति अष्टकादिश्राद्धे पर्वणीत्युल्लेखापत्तेः । निमित्ततावच्छेदकरूपेण निमित्तस्योल्लेखात् । न च निमित्तानामिति श्रवणप्रनिमित्तस्यैवोल्लेखो न तु तत्त्वेनेति वाच्यम् । एवमशौचान्ताद्द्वितीयेऽह्नि इत्यादेरनुल्लेखात् । निमित्तस्य तद्दिनस्य अद्येत्यनेनैवोल्लेखात् । तथा चामावास्यात्वावच्छिन्ननिमित्तताकश्राद्धत्वं पार्वणपदशक्यतावच्छेदकम् । कथं पार्वणपदप्रयोगस्तत्राह—क्रियते इति । वा एवार्थः ।

"वा स्याद्विकल्पोपमयोरेवार्थे चावधारणे"

इति कोशात् । पर्वण्येव क्रियत इति पार्वणम् । तथा च योगस्यापि दर्शनेन पङ्कजपदवद्योगरूढिः प्रदर्शितेति ।

एवञ्चामावास्यायां पार्वणश्राद्धमित्येव प्रयोगो नतु अमावास्यानिमित्तकमिति श्राद्धविशेषणम् । पार्वणपदेनैव तदर्थोपस्थितेः । अमावास्यायामिति निमित्तसप्तमीमुक्त्वा केचिद्विशेषणं वदन्ति । तन्न । अमावास्यायास्तर्हि अधिकरणत्वेनालाभात् । नह्येका सप्तमी सकृदुच्चरिता उभयमर्थं बोधयति । ततश्चाष्टकायामपि पार्वणविधिनेति प्रयोज्यम्, न पार्वणमिति मघादिश्राद्धवदिति ।

अत एव ।

पार्वणे त्वष्टकाश्राद्धे चान्द्रमिष्टं तथाब्दिके ।

इत्यत्र पार्वणाष्टकाश्राद्धयोर्भेदेनोपादानम् ॥

अथ कस्तावत्प्रकृतिविकृतिभावः ? ।

न तावत्कार्यकारणभावः । घटस्य कुलालविकृतित्वापत्तेः । मृद्विकारो हि घटः । नच समवायेनेति तत्र वाच्यम् । गुणस्य द्रव्यविकृतित्वापत्तेः । अथ कारणतावच्छेदकाश्रयकार्यत्वं विकृतित्वम् । तथा च सुवर्णत्वं कुण्डलकारणतावच्छेदकं तदाश्रयं कुण्डलमिति सुवर्णविकारं तदुच्यते । नचैवं कार्यस्य स्वजनकत्वापत्तिरिति वाच्यम् । स्वरूपयोग्यत्वस्येष्टत्वात् । फलोपधानस्य तु पूर्ववर्तित्वाभावादभावः, जातघटं प्रति भाविदण्डवत् । मैवम् । उक्तविकृतित्वमाभ्युदयिकादावसत्त्वेन प्रकृतानुपयोगीति ।

ननु सुवर्णादिसाधारणमिदं प्रकृतित्वं विकृतित्वञ्च नास्ति यागादेः प्रकृतित्वम्—अतिदिश्यमानाङ्गप्रतियोगित्वम् । यस्याङ्गमतिदिश्यते तत्प्रतियोगि । तादृशानुयोगित्वञ्च विकृतित्वमिति चेदेवमन्योन्याश्रयापत्तिः । प्रकृतित्वज्ञाने प्रकृति-

वद्विकृतिरित्यतिदेशः। अतिदेशघटितस्य विकृतित्वमिति। उच्यते— नात्रान्योन्याश्रयः। स हि द्विविध एव दुष्टः। उत्पत्तितो ज्ञप्तितश्चेति। नाद्यः—प्रकृतित्वस्याजन्यत्वेनाऽतिदेशानपेक्षणात्। न द्वितीयः प्रकृतित्वस्यातिदेशज्ञानं विनापि, क्वचित्प्रकृतिवदिदमित्यादिवाक्यत्वात्, क्वचिन्न्यायगम्यत्वात्।

किञ्चातिदेशज्ञानं न प्रकृतित्वज्ञानाधीनं लक्षणप्रविष्टातिदेशपदादेव तदुपस्थितेः।

नन्वतिदेशात्प्राप्तिरित्यत्रानिषिद्धविषये प्राप्तिः प्रमैव वाच्या। तथा चातिदेशस्यातिरिक्तप्रमाणत्वापत्तिः। प्रत्यक्षानुमानयोरसम्भवात्, शब्दस्याभावाच्च। मैवम्। अन्यत्र श्रुतस्य प्रकृतेऽश्रुतस्य कल्पनमतिदेशः। "पारमेष्ठ्यकामो विरिञ्चये जुहोति ब्रह्मादेवानामिति, प्रोद्गातृभ्यो हुतशेषफलचमसभक्षं प्रयच्छति" इति श्रूयते। प्रोद्गातृभ्य इति बहुवचननिर्देशात्प्रोद्गात्रादिभ्य ऋत्विग्भ्य इत्यर्थः। अत्र यद्यपि होमस्य द्रव्यं नोक्तं तथाऽपि हुतशेषमिति श्रुत्या फलचमसस्य होमद्रव्यत्वं कल्प्यते नातिदेशादतोऽन्यत्रश्रुतस्येति। श्रुतस्य—प्राप्तस्य। तेनातिदिष्टातिदेशे नाव्याप्तिः। यथा, पार्वणातिदेश एकोद्दिष्टे, तदतिदेशः साम्वत्सरिके इति। "चक्षुष्काम आदित्यायार्कसमिधा जुहुयात्" इति। चित्रं देवानामिति सहस्रं सौरलोककामस्तथैव तस्मै जुहोति" इत्यत्र तथैवेति श्रुत्यैव पूर्वोक्तसर्वाङ्गप्राप्तिर्नातिदेशादतोऽतिव्याप्तिवारणाय प्रकृतेऽश्रुतस्येति। वस्तुतोऽश्रुतस्येति न देयम्। तथैवेत्यनेनाप्यतिदेशदर्शनादिति। कल्पनन्त्वनुमानम्—यथाऽयं यागः प्रकृतिविकृतियावदङ्गाङ्गकः विकृतित्वात् दर्शविकृत्याष्टमिकयागवत्। नच दृष्टान्तेऽसिद्धिः पूर्वपूर्वानुमानाधीनत्वात्। यद्वा प्रकृ-

तिश्रुतानामेव वाक्यानां न्यायेन समभिव्याहारः कल्प्यते । तथाच शब्द एवातिदेशः ।

नन्वतिदेशस्य शब्दत्वे ऽतिदिष्टनिषेधस्य पर्युदासत्वासम्भवः श्रुत्यभावेनैकवाक्यताया असम्भवादिति । न, तत्र पर्युदासत्वे वैयर्थ्यापत्तेः । 'एकोद्दिष्टे नावाहनम्' इत्यत्र पर्युदासत्वे आवाहनभिन्नं कुशासनादि कुर्यादित्यर्थः स्यात्तस्य चातिदेशादेव प्राप्त्या नावाहनमिति व्यर्थं स्यात् । आवाहनञ्च स्यात्तस्याप्यतिदेशात् । 'आवाहनरहितं कुर्यात्' इत्यर्थे तु निषेधे एव पर्यवसानमिति ।

९४ अथ स्थालीपुलाकन्यायः—

"श्येनेनाभिचरन् यजेत । मेमीक्षीरेण श्येनं श्रपयति । कालान्तकयमरुद्रेभ्यो जुहोति, कालःकरालइति, कार्षिरसीति, असियमइति, यातेरुद्र इति । अष्टाशासु भस्म किरति । अष्टलोहपात्रे पुलाकान् दहति स्थाल्यां वा" इति श्रूयते । कस्य भस्मेत्यतो ऽष्टेति । अष्टलोहानि यथा—

काञ्चनं रजतं ताम्रमारकूटं तथायसम् ।
सीसकं रङ्गकांस्ये च लोहाष्टकमुदाहृतम् ॥ १ ॥

तथा शैवयागे "भस्मतिलकी मृत्युञ्जयाय जुहोति" "अभिचारशमनाय गोमयचूर्णानि लोहाष्टकपात्रे दहति तद्भस्म भवति" इति । एवञ्च लोहाष्टकपात्रसम्पत्त्या शिवयागसङ्कल्पे कृते तत्पात्रापचारी कथं कर्म कुर्यात् ? । कर्मासम्पत्तौ च प्रत्यवायी स्यादत्र सूत्रम्-"स्थालीपुलाकवत्" इति । यथा-पुलाकदाहे-लोहाष्टकापचारे स्थाली ग्राह्या, तन्न्यायादत्रापि तथा । एवं

गवामभावे दातव्यं तन्मूल्यं न तु संशयः ।

इति गोवधप्रकरणोक्तमन्यत्रापि सम्बध्यते । तथा

चान्यप्रकरणोक्तमन्त्रस्यापेक्षणीयमन्यत्रापि ग्राह्यमिति । अत एव मैथिलाः—यज्ञप्रकरणोक्तं "पवित्रेस्थोवैष्णव्यौ" इति मन्त्रद्वयं श्राद्धार्थपवित्रेषु न वदन्ति, अमावास्यापेक्षणीयत्वाभावात् । अवश्यापेक्षणीयत्वे दक्षिणकरधारणार्थपवित्रेऽपि तदापत्तेः । नचैवं श्राद्धेऽसंस्कृतपवित्रान्वयप्रसङ्गः । तत्र द्रव्यान्तरवत्तूष्णीं प्रोक्षणेन संस्कारात् । वस्तुतस्तु "बर्हिषः प्रादेशमात्रे पवित्रे कुरुते, ओषधीमन्तर्धाय छिनत्ति, न नखेन, पवित्रेस्थोवैष्णव्याविति । अथैनमद्भिरनुमार्ष्टि विष्णोर्मनसा पूतेस्थ" इति गोभिलवचनं यज्ञप्रकरणपठितमपि परिभाषारूपम् । अन्यथा श्राद्धे नखेनापि छेदनं स्यात् । तर्हि श्राद्धे ओषध्यव्यवधानेन छेदनमायातमिष्टापत्तेः । ओषधिर्मन्त्रादिः । धारणार्थपवित्रे तु ओषध्यादेरन्वयोऽस्त्येव, नतु मन्त्रान्वयः । स्नानं विना मन्त्रपाठेऽनधिकारात् । स्नानेऽपि पवित्रधारणस्याङ्गत्वात् । नचातोऽधिस्नातेन समन्त्रकपवित्रं क्रियतां, विशेषवचनाभावे अङ्गानां समानकर्तृत्वनियमात् । एवं पूर्वदिनकृतसमन्त्रकपवित्रस्य न कर्माङ्गत्वं विशेषवचनाभावे समानकालकर्तव्यत्वात् । नच स्नानातिरिक्तकर्मसु मन्त्रान्वयोऽस्तु, मन्त्रपाठेऽपि पवित्रधारणस्याङ्गत्वादनवस्थापातात् । तथा च कृष्णले ऽवघातबाधवद्धारणपवित्रे मन्त्रबाधः । नच गोभिलेन पिण्डस्थाने पवित्रेण रेखोक्ता, तत्र मन्त्रान्वयोऽस्त्विति वाच्यम् । तत्र पिञ्जल्या इति श्रवणात् । तथा च पवित्रपदेन यत्राभिधानं तत्र मन्त्रस्याङ्गता । नचैवं सर्वाङ्गपवित्रे मन्त्रान्वयः । इष्टापत्तेः । पद्धतौ तादृशलेखनन्तु आज्यसंस्कारकपवित्रप्रसङ्गादुपदेशात् तत्रापि तथा प्राप्त्येति ।

अत्र वदन्ति—यज्ञे 'बर्हिषः पवित्रे कुरुते' इति श्रुतेर्मध्य-

एव समन्त्रकपवित्रकरणं, श्राद्धे तु "चमसेषु पवित्रान्तर्हितेष्वपः क्षिपति शन्नोदेवीरिति" इति तदानींकरणश्रुतेः श्राद्धारम्भात् पूर्वं समन्त्रकपवित्रकरणमस्तु । यथा—

"शुचींश्च विदुषो विप्रान् सम्यग्यत्नेन भोजयेत्" ।

इत्यत्र श्राद्धभोजनसमये तेषां न शुचित्वकरणं, किन्तु श्राद्धारम्भात्पूर्वं शुचित्वविशिष्टा एव ते भोजनसमये इति । यथा वा चमसानां न तदा करणमिति । तन्न, श्राद्धात्पूर्वं पवित्रं यत्कर्तव्यं तत्र मन्त्रपाठो न । तद्विधानं द्विविधम्—काम्यं, नित्यञ्च । नाद्यं, फलाश्रुतेः । विश्वजिन्न्याये च तत्र पृथक् सङ्कल्पः स्यात् । न द्वितीयमकरणे प्रत्यवायाश्रुतेः, प्रायश्चित्तानुपदेशाच्च । किन्तु पवित्रविशेषणत्वेनाङ्गत्वम् । पवित्रमप्यस्य विशेषणत्वेनाङ्गमतो मन्त्रविशिष्टं पवित्रमर्घ्येऽपेक्षितम् । अतस्तदानीमेव समन्त्रकपवित्रकरणं, न श्राद्धारम्भात्पूर्वम् । नच तदानीमपि पवित्रप्रोक्षणमपेक्षितमिति वाच्यम् । दलद्वयं सन्निधाप्य प्रोक्षणं कार्यमर्घ्यसमये तेनैव दलद्वयेन पवित्रं कर्तव्यमिति । नच श्राद्धोपयुक्तयावद्द्रव्यप्रोक्षणमादौ कर्तव्यं पवित्रञ्च तदुपर्युक्तं न दलसामान्यमिति वाच्यम् । तथा सति प्रोक्षितपिण्डदानापत्तेः । आकारविशेषविशिष्टस्यापि तत्त्वात्तदभावात् । तथा च पिण्डघटकान्नादिप्रोक्षणेन यथा पिण्डस्य संस्कारः, तथा पवित्रघटकदलप्रोक्षणादेव पवित्रसंस्कारः । किञ्च पवित्रप्रोक्षणं "विष्णोर्मनसा पूतेस्थ" इति मन्त्रकर्तव्यं, तच्च नादौ विहितं किन्त्वर्घ्यसमये एवेति । ननु पवित्रे इति द्विवचनानुपपत्तिः, पवित्रपदस्य दलद्वयवाचकत्वात् नानार्थत्वकल्पने मानाभावादिति । नैवम् । मन्त्रपाठकरणकच्छेदान्मन्त्रपाठकाले छेदाभावेन पवित्रत्वानिष्पत्तेरिति पवित्रपदं तदारम्भकदलपरम् । एवं प-

त्रित्रे इति मन्त्रेऽपि । "विष्णोर्मनसा पूतेस्थ" इत्येतत्पाठकाले पवित्रवाच्यत्वेऽपि तत्र विशेष्यपदाभावादनन्वयेऽन्वयार्थं पूर्वमन्त्रस्थं पवित्रे इति पदमनुषज्यते । तस्य च दलपरतैवोक्ता । नह्येकं पदं तत्र दलमात्रपरमत्र दलद्वयपरं भवितुमर्हति । तदात्त्वनुषङ्गः । अनुषङ्गे तत्पदस्यैव पदान्तरसमभिव्याहारतात्पर्यम् । आवृत्तौ तु तादृशपदान्तरकल्पनम् । तथा च पवित्रे कुरुते इत्यनेन दलद्वयविषयककृतिर्विहिता । तत्र किंक्रियानुकूला कृतिरित्यत्राऽऽह—छिनत्तीति । इति सर्वं समञ्जसम् ।

इति श्रीमहामहोपाध्याय पं० रामकृष्णभट्टाचार्य विरचिताऽधिकरणकौमुदी समाप्ता ॥

अस्मिन् ग्रन्थे ऽनिर्दिष्टानि कानि चित् बहुशश्चोपयुक्ताधिकरणानि प्रदर्श्यन्ते ।

१ अथ वाजपेयाधिकरणम् ।

इदं श्रूयते "वाजपेयेन स्वाराज्यकामो यजेत" इति । वाजोऽन्नं तस्य पेयं द्रवीभूतो रसो यवागूरिति यावत्(१) । अत्रोक्तव्युत्पत्त्या वाजपेयशब्दस्य प्रसिद्धार्थकत्वेन "दध्ना जुहोति" इतिवद् यजतिना ज्योतिष्टोमं प्रकृतमनूद्य वाजपेयद्रव्यविधानाद् गुणविधिरिति चेत्फलपदानर्थक्यापातः । अथ फलोद्देशेनापूर्वं कर्म विधेयं, तदुद्देशेन च द्रव्यरूपगुणविधिस्तर्हि वाक्यं भिद्येत । तत्परिजिहीर्षयैकस्यार्थिकत्वे "सोमेन यजेत" इतिवद् मत्वर्थलक्षणाप्रसङ्गः 'वाजपेयद्रव्यवता यागेन स्वाराज्यं भावयेत्' इति ।

---

(१) अधिकरणमालादिषु 'वाजो ऽन्नं तच्च पेयं सुराद्रव्यमिति यावत्' इति व्युत्पत्तिः प्रदर्शिता । मूलोक्ता तु तन्त्रवार्तिके—
"वाजपेयं यवागूः स्यादौषधद्रव्यता ततः"।इत्यनेन स्पष्टीकृतेति सुधिभिराकलनीयम् ।

इति चेन्न । तन्त्रेणाख्यातस्य फलद्रव्याभ्यां युगपत्सम्बन्धस्वीकारेण विनैव मत्वर्थलक्षणामुभयविधिसिद्धेः । आह च—

करणेषूपदिष्टेषु या ऽर्थात्साध्यत्वकल्पना ॥
तस्यां गुणविधानेन नास्ति मत्वर्थलक्षणा ॥ १ ॥

तथाहि-यजेतेत्याख्यातस्य तावद् द्वौ भागौ। एकः प्रकृतिरपरश्च प्रत्ययः। तत्र प्रत्ययांशेन तावद् भावनोच्यते। प्रकृत्यंशेन च यागः। प्रकृतेश्च निर्विभक्तिकतया प्रत्ययार्थेन साकं सम्बन्धविशेषानवबोधात्समभिव्याहारात्सम्बन्धसामान्यं प्रतीयते । तदुक्तम्—

सम्बन्धमात्रमुक्तं च श्रुत्या धात्वर्थभावयोः ॥
तदेकांशनिवेशे तु व्यापारो ऽस्या न विद्यते ॥ २ ॥ इति ।

'निर्विशेषं न सामान्यमिति विशेषाक्षेपोन्मुखं तदविशेषाद् द्रव्यफलापेक्षितं साध्यसाधनरूपं सम्बन्धद्वयमाक्षिपेत् । तथा च द्रव्येण सम्बन्धात् कर्मकारकत्वं 'वाजपेयद्रव्येण यागं भावयेत्' इति । फले सम्बन्धे च करणकारकत्वमपि 'यागेन स्वाराज्यं भावयेत्' इति । न खलु काचिदत्र कर्मत्वस्य करणत्वस्य वा प्रतिपादिका साक्षादसाधारणी विभक्तिः श्रूयते, येन उभयसम्बन्धासम्भवः स्यात् । तस्माद् गुणकर्मोभयविधिरित्यत्र सिद्धान्तसूत्रे-"तुल्यत्वात् क्रिययोर्न" (अ०१.पा०४.अधि०६.सू०७) "एकशब्द्ये परार्थवत्"(अ०१.पा०४.अधि०६.सू०८) इति। अयमर्थः-क्रिययोः-दर्शपूर्णमासवाजपेययोः, तुल्यत्वात्-समानत्वात्,न-गुणविधिर्नेति । तथा -सकृदुच्चरिते धात्वर्थे कर्मत्वकरणत्वयोर्युगपत्सम्बन्धत्वसापेक्षया परो यवागूरूपो यो ऽर्थस्तद्विधानवत् तद्विधानाश्रयः तदर्थमनुवादवदिति यावत् ।

अयम्भावः-यवागूरूपगुणविधाने ओषधिद्रव्यत्वेन वाजपेयस्य दर्शपूर्णमासविकृतित्वापत्तिः । न चेष्टापत्तिः "सप्त-

दशोपसत्को वाजपेयः" इति सौमिकधर्मश्रुतिविरोधात् ।

किञ्च यागस्य तन्त्रेण सम्बन्धाङ्गीकारे विरुद्धत्रिकद्वयापत्तिः । विरुद्धत्रिकं च—

उपादेयविधेयत्वगुणत्वाख्यं त्रिकं यजेः ।
उद्देश्यानूक्तिमुख्यत्वत्रिकं तस्य गुणं प्रति ॥ ३ ॥

इति माधवाचार्येणोक्तम् ।

तत्रोद्देश्यत्वमिच्छाविषयत्वम् । उपादेयत्वञ्च अनुष्ठीयमानत्वम् । ततश्चैतौ मनःशरीरोपाधिकौ धर्मौ । विधेयत्वं नाम विधिविषयत्वम् । विधिश्च अज्ञातबोधनम् । ज्ञातस्य कथनन्त्वनुवाद इति । विधेयत्वानुवाद्यत्वधर्मौ च शब्दोपाधिकौ । मुख्यत्वं तावत् प्रधानत्वम् । गुणत्वञ्च अप्रधानत्वम् । न चैतस्य त्रिकद्वयस्यैकत्रावस्थानं सम्भवति, मिथो विरोधात् ।

यागफलयोस्तावत्स्वभावपर्यालोचनायां फलमुद्दिश्य यागस्योपादेयत्वात्, फलानुवादेन तत्साधनतया यागस्य विधानात्, फलेच्छाधीनेच्छाविषयत्वाच्च, यागस्योपादेयत्वादित्रिकं, फलस्य च उद्देश्यत्वादित्रिकं पर्यवस्यति ।

तथा यागवाजपेयद्रव्ययोः स्वभावपर्यालोचने यागमुद्दिश्य द्रव्यस्योपादेयत्वाद्,यागानुवादेन तस्य विधानात्, तदधीनेच्छाविषयत्वाच्च यागस्योद्देश्यत्वादि, द्रव्यस्य उपादेयत्वादि, त्रिकं पर्यवस्यति । न च द्रव्यं प्रति यागोऽर्हं उपादातुम् । तस्य तत्संस्कारकत्वप्रसङ्गात्, तृतीयाश्रुतिबाधाच्च । नापि संस्कृतस्य यवागूद्रव्यस्यान्यत्रोपयोगोऽस्ति येनैवमाश्रीयेत । तस्माद्वाजपेयपदस्याग्निहोत्रशब्दवद्यागसामानाधिकरण्येन च 'कर्मनामधेयतेति स्वतन्त्रकर्ममात्रविधिरिति ।

२ अथारुणाधिकरणम् ।

ज्योतिष्टोमे श्रूयते "अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति" इति । तत्रारुणाशब्दो गुणिविषयतया प्रयुज्यमानोऽपि अरुणं गुणमाचष्टे । "नागृहीतविशेषणा विशिष्टबुद्धिः" इति न्यायादन्वयव्यतिरेकाभ्यां तत्रैव व्युत्पत्तेश्च । तस्य च तृतीयाश्रुत्या क्रयसाधनत्वं प्रतीयते । तच्चानुपपन्नम् । अमूर्तस्य तस्य वासोहिरण्यादिवत्क्रयसाधनत्वासम्भवात् । उक्तं च-

अमूर्तत्वाद् गुणो नैव क्रियां साधयितुं क्षमः ॥
तस्मात्क्रीणातिना नास्य सम्भवत्येकवाक्यता ॥ १ ॥ इति ।

अतश्च तृतीयाश्रुतेरविनियोजकतया तया ज्योतिष्टोमप्रकरणगतग्रहचमसादीन् करणतयोपदिष्टाननूद्यारुण्यरूपो गुणो विधीयते ।

यदि च विभक्तेः निष्कृष्य कारकशक्त्यभिधायकत्वेन क्रियाविशेषकत्वात्कथं कृदन्तकरणादिशब्दवत्तृतीयया द्रव्याभिधानमिति उच्यते, तर्हि गुणवाचकप्रातिपदिकस्योपादानलक्षणया द्रव्यवाचित्वेन तृतीयया तद्गतकरणत्वाभिधानेन प्राप्ताप्राप्तविवेकेन विधिशक्तेर्गुणे उपसंक्रमात् प्रकरणगतविशेष्यभूतद्रव्यानुवादेन विशेषणभूतो गुणस्तत्परिच्छेदकत्वेन विधीयते । तथा च अरुणयेति भिन्नं वाक्यं, पिङ्गाक्ष्येति च । तत्राऽऽद्यस्य येन द्रव्येण किञ्चित् क्रियते तेनाऽरुणगुणकेन इत्यर्थः । नचैवं पिङ्गाक्ष्येकहायन्योरपि ज्योतिष्टोमगतसकलसाधनद्रव्यगामित्वं शङ्कनीयम् । तयोर्द्रव्यवाचित्वेन द्रव्यान्तरगामित्वासम्भवात् ।

नच पिङ्गे अक्षिणी यस्या इति षष्ठ्यर्थे समासविधानात्सम्बन्धवाचित्वं शङ्क्यम् । लाघवानुरोधेन सर्वैरपि यौगिकैः

शब्दैर्द्रव्याभिधानात् ॥

तथाहि—तेषां सम्बन्धवाचित्वे सम्बन्धमात्रमभिधेयं कल्प्यते, सम्बन्धविशेषो वा? नाद्यः, तेषां सर्वेषां सम्बन्धमात्रवाचित्वैकार्थकत्वापातात् । अथ सम्बन्धविशेषः । ततस्तज्ज्ञानस्य सम्बन्ध्यधीनत्वादनुक्तसम्बन्धिनश्च तदवच्छेदासामर्थ्यमिति, तस्य चोभयनिष्ठत्वादुभौ सम्बन्धिनाववश्यमभिधातव्यौ । तत्रैकस्य वृत्तिघटकपदेनाभिधानाद् द्वितीयनिरूपिता वृत्तौ शक्तिः कल्प्यते इत्यवश्यमभ्युपेतव्यमिति । ततश्च सम्बन्धिनमभिधाय सम्बन्धाभिधानेऽतिगौरवमिति । एवं च पिङ्गाक्ष्येकहायनीशब्दयोरपि पिङ्गे अक्षिणी यस्याः, एकं हायनं यस्या इति यौगिकत्वेन सिद्धं द्रव्यवाचित्वम् । उक्तं च—

सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयते ।
न हि सम्बन्धवाचित्वं सम्भवत्यतिगौरवात् ॥ २ ॥
सम्बन्धिनैव सम्बन्धः प्रत्येतुं यदि शक्यते ।
पुनस्तस्याभिधाशक्तिं कः श्रुतेः परिकल्पयेत् ॥ ३ ॥

एवं च वाक्यभेदेन प्रकरणात् ज्योतिष्टोमगतक्रयणभूतसकलद्रव्यगामी आरुण्यगुणः ।

यत्तु समानवाक्यश्रुतपिङ्गाक्षीद्रव्यानुवादेनाऽऽरुण्यगुणो विधीयताम् । वाक्यभेदश्च नेति । तन्न, "एकशब्दे परार्थवत्" इतिन्यायेन पिङ्गाक्ष्याः क्रयारुणौ प्रति वैरूप्यप्रसङ्गादिति पूर्वपक्षे सिद्धान्तसूत्रम्—"अर्थैकत्वं द्रव्यगुणयोरैककर्म्यान्नियमः स्यात्"इति (अ० ३-पा० १-अधि० ६-सू० १२) अयमर्थः—द्रव्यगुणयोरेकक्रियान्वयित्वरूपार्थैकत्वे सम्भवति तयोः परिच्छेद्यपरिच्छेदकभावनियमः । ऐककर्म्याद् एकार्थप्रति-

पादकत्वरूपैकवाक्यत्वात् । अयम्भावः-उदाहृतवाक्येन भावार्थाधिकरणन्यायेन (अ० २-पा० १ अधि० १ सू० १ द्वितीयवर्णकम्) क्रयो विधीयते । तस्मिंश्च तृतीयाश्रुत्या पिङ्गाक्ष्यादेर्यथा करणत्वं, तथा आरुण्यगुणस्यापि । तच्च स्वसाध्यक्रियापेक्षितया पिङ्गाक्ष्यादिद्रव्यमनपेक्ष्यैव वाक्येन साक्षात्क्रयेऽन्वेति । खलेकपोतन्यायेन सर्वकारकाणां साक्षात्क्रियान्वयनियमात् । उक्तं च—

कारकं ह्युच्यते कुर्वन्नाक्रियां तत्करोति च ॥
तस्मान्न द्रव्यसम्बन्धः कारकस्यास्ति कस्य चित् ॥४॥ इति ।

यदि तस्यामूर्तत्वात्साक्षात्क्रियासाधनत्वं न सम्भवति इति विभाव्यते, तर्हि क्रयसाधनद्रव्यपरिच्छेदमुखेनान्वीयताम् । तदुक्तम्—

तृतीयया गुणस्यैव करणत्वं क्रयं प्रति ॥
विस्पष्टं गम्यते तच्च द्रव्यद्वारेण युज्यते ॥ ५ ॥

किञ्च—

द्रव्येण साधनीयेयमिति ज्ञाता यदा क्रिया ।
कीदृशेनेत्यपेक्षाऽस्य गुणेऽप्युत्पद्यते तदा ॥ ६ ॥

द्रव्यमप्यपरिच्छिन्नं न क्रियां साधयितुमलमिति परिच्छेदकमपेक्षते । गुणश्च क्रियासाधनत्वेनोच्यमानः तां च स्वतः साधयितुमक्षमः तदर्थं परिच्छेद्यं द्रव्यमपेक्षते इति द्रव्यगुणयोः परस्परमपेक्षितत्वात्सुनिरूपितः पार्ष्णिकः परिच्छेद्यपरिच्छेदकभावेनान्वयः । युक्तं च गुणस्य तत्परिच्छेदकत्वात्क्रियासाधनत्वाभिधानम् । एवञ्च साधनत्वेन गुणं विदधती श्रुतिः यथैतेन शक्यते क्रियां साधयितुं तथा कुर्यादित्याह । स च द्रव्यपरिच्छेदेनैव शक्नोति साधयितुं, नान्यथा ।

तथा च अरुणपरिच्छिन्नेन पिङ्गाक्षीद्रव्येण क्रयं कुर्यादित्यर्थस्य पर्यवसानेन वाक्यभेदाभावेन च न चमसादिषु गुणो निविशते।

किञ्च प्रकरणेन चमसादिषु गुणनिवेशं वदता वक्तव्यमिदं केन तत्र गुणो विधीयते। नच श्रूयमाणविधिना तत्सम्भवति। क्रीणातिना त्वया सम्बन्धस्य नेष्यमाणत्वात्। नाप्यरुणपदस्य विधिशक्तिरस्ति। प्रयोगवचनं त्वक्रियात्मकं दूरादुपेक्षते। मम तु क्रीणातिना सम्बन्धस्येष्टत्वात्सुलभं विधानम्। न चैवं वासोहिरण्यादिषु क्रयसाधनत्वात्तन्निवेशः स्यादिति वाच्यम्। तेषां क्रयान्तरसाधनत्वात्। नहि स्ववाक्यगतं पिङ्गाक्षीद्रव्यमुपेक्ष्य वाक्यान्तरोपात्तवस्त्राद्यवच्छेदो युक्तः। तस्मादारुण्यगुणः क्रयहेतुं पिङ्गाक्षीमेव भजते इति।

३ अथ वैश्वानरेष्टयधिकरणम्-

काम्येष्टिकाण्डे श्रूयते "वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते, यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति, यन्नवकपालस्त्रिवृतैवास्मिंस्तेजो दधाति, यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति, यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति, यद्द्वादशकपालो जगत्यैवास्मिन् पशून् दधाति, यस्मिन् जाते एतामिष्टिं निर्वपति पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति" इति। तत्राष्टाकपालादिशब्दाः प्रकृतवैश्वानरयागस्य नामधेयपरा गुणविधिपरा अर्थवादपरा वा?। तत्राष्टाकपालादिशब्दबोधिताष्टत्वादिसंख्यानां द्वादशस्वन्तर्भावेन प्राप्तत्वात्तत्प्रख्यन्यायेन "वैश्वदेवेन यजेत" इतिवद् "अग्निहोत्रं जुहोति" इतिवद्वा तेषां यागनामधेयत्वं युक्तम्।

तत्र हि "वैश्वदेवीमामिक्षाम्" इत्यनेन यागे विश्वदेवसम्बन्धस्य

प्राप्ततया "वैश्वदेवेन यजेत" इत्यत्र वैश्वदेवशब्देन विश्वदेवदेवताविधानासम्भवात्तस्य नामधेयविधित्वम्। "अग्निहोत्रं जुहोति" इत्यत्रापि "अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा" इति मन्त्रवर्णेनाग्नेः प्राप्तत्वेन तद्विधानासम्भवादग्निहोत्रमिति कर्मनामधेयम्।

अथ नात्र द्वादशकपालादिशब्दाः संख्यापराः, किन्तु द्वादशसु कपालेषु संस्कृतः पुरोडाश इति योगेन द्रव्यपराः। एवञ्च द्रव्ये द्रव्यान्तरानन्तर्भाव इत्यप्राप्तत्वम्। द्वादशकपाल एवाष्टसु संस्कृत इति तु वक्तुमशक्यम्। अन्यथा ऽष्टानामन्यैश्चतुर्भिः कपालैः साकाङ्क्षया सामर्थ्याभावात्समर्थाधिकारे "संस्कृतं भक्षाः" (अ० ४ पा० २ सू० १६) इति पाणिनिसूत्रविधीयमानतद्धितानुत्पत्तिप्रसङ्गः। एवं च न नामत्वम्। अप्राप्तत्वादेव च नार्थवादत्वम्। न ह्यविहितस्याष्टाकपालस्य स्तुतिः सम्भवति। तदुक्तम्—

"सामानाधिकरण्ये हि नामधेयं प्रगीयते"। इति।
"पूर्वज्ञातार्थवाचित्वे नामधेयार्थवादते" ॥ इति च।

तस्मात्प्रकृतवैश्वानरयागे ऽष्टाकपालपुरोडाशरूपगुणविधिरिति।

न चैवमुत्पत्तिशिष्टद्वादशकपालावरुद्धत्वात् तत्रान्यद्रव्यनिवेशासम्भवात्तद्वैयर्थ्यमिति वाच्यम्। उपक्रमोपसंहारवशात्सर्वं चेदमेकं वाक्यमिति पर्यालोचनेन वैकल्पिकाष्टाकपालादिद्रव्यविशिष्टवैश्वानरेष्टिविधानात्सर्वेषामुत्पत्तिशिष्टत्वसाम्येन पक्षे चारितार्थ्यात्। तस्माद् गुणविधिरिति पूर्वपक्षे सिद्धान्तसूत्रम्—

अविभागाद्विधानार्थे स्तुत्यर्थेनोपपद्येरन् (अ० १-पा० ४-अधि० ११ सू० २०) इति। अयमर्थः—विधानार्थे-कपालगतद्वादशसंख्यायामष्टत्वादिसंख्याया अविभागात्—नियमात्,

तस्या अवयवरूपत्वादिति यावत्। द्वादशकपालस्तुत्यर्थत्वेनाष्टाकपालादिशब्दा उपपद्येरन्। अवयवस्तुतिद्वारा अवयविस्तुतिरित्यर्थः। तथा हि—

अष्टत्वाद्यविधानत्वाद्यर्थेयं तत्प्ररोचना।
तस्मादवयवद्वारं द्वादशत्वं प्ररोच्यते॥

अयम्भावः—सर्वत्र तावद्विधेयस्य स्तुतिर्दृश्यते। वरं चात्र द्वादशकपालसंस्कृतपुरोडाशद्रव्यं विधेयत्वात्। तस्मात्तस्य यथा स्तुतिर्भवितुमर्हति तथा कर्तव्या। अष्टाकपालादिशब्दाश्च तत्प्रतीत्यजनका अपि तदेकदेशं प्रत्याययितुमर्हन्तीति तदेकदेशप्रत्यायनद्वारा एकदेशिनो द्वादशकपालस्य तैः शब्दैः स्तुतिः प्रतीयते। तथा च श्रुतेरयमर्थः—ईदृशोऽयं द्वादशकपालः पुरोडाशो महाभागः, यस्मिन् क्रियमाणे अष्टाकपालादयोऽपि सम्भाविता भवन्ति, ते च ब्रह्मवर्चसादिसिद्धिभिः प्रशस्ताः, तस्मात्प्रशस्तोऽयमिति। यागविधायकवाक्येन द्वादशकपालस्य विहिततया न स्तुत्यस्याज्ञातत्वं, येनाष्टादिशब्दानां स्तावकत्वं नोपपद्येत।

किञ्च तस्य "जगत्येवास्मिन्" इति पृथक्स्तुतिसत्त्वेऽप्यधिकप्राशस्त्यबोधनार्थमाधिकस्तुत्यपेक्षया नानर्थक्यम्।

विधिपक्षे तु वैश्वानरस्य द्वादशकपालावरुद्धत्वात् पश्चाच्छ्रूयमाणाष्टाकपालादीनां वैयर्थ्यं स्पष्टमेव।

ननूक्तं सर्वेषामुत्पत्तिशिष्टत्वेन समानबलत्वाद्व्रीहियववद्विकल्पेन चारितार्थ्यमिति। तत्रोक्तम्—

उत्पत्तिवाक्यशिष्टत्वं न तावदुपपद्यते।
सर्वेषामर्थभेदेन वाक्यं तत्र हि भिद्यते॥

वैकल्पिका अष्टाकपालादिगुणा वैश्वानरे विधीयन्ते इति वि-

भाष्यते चेन्नानागुणविधानेनार्थभेदाद्वाक्यभेदप्रसङ्गः। उपक्रमोपसंहारदर्शनेन च वाक्यैकत्वं प्रतीयते। तस्मान्नाष्टाकपालादीनां समानबलत्वमिति।

ननु मास्तूत्पत्तिशिष्टत्वं परमष्टाकपालादिगुणविधिगतद्वादशकपालाद्यन्यथाऽनुपपत्त्या वैश्वानरवाक्यगतद्वादशकपालस्य सामान्यतो द्रव्योपलक्षकत्वविवक्षणात्सर्वेषामेवैभिर्विधानादुत्पन्नशिष्टत्वात्तुल्यबलत्वमिति। उच्यते, अष्टाकपालादीनां स्तावकत्वेनोपपत्तौ विधिवाक्यगतवैश्वानरसमानाधिकरणद्वादशकपालशब्दस्योपलक्षणत्वविवक्षाया निष्प्रमाणत्वात्।

किञ्च निर्वपतिनाऽत्र यागो विधीयते। स च द्वितीयान्तेन द्वादशकपालेनैव सम्बध्यते, न तु प्रथमान्ताष्टाकपालादिभिः, निराकाङ्क्षत्वात्। आख्यातार्थनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन शाब्दबोधे प्रातिपदिकाद्विहितकारकविभक्तिजन्योपस्थितेः कारणत्वादाख्यातस्य कारकविभक्त्यन्तेन साकाङ्क्षत्वात्। नचाष्टाकपालादिवाक्यैः स्वतन्त्रं कर्म विधीयते। द्रव्यदेवतारूपयागस्वरूपानुपलब्धेः।

ननु वैश्वानरपदस्य अनुषङ्गाधिकरणन्यायेन (अ० २-पा० १ सू० १६) सम्बन्धे देवतालाभेन यागस्वरूपसिद्धिरिति चेन्न। भिन्नविभक्तिकत्वेन द्वितीयान्तवैश्वानरपदस्य प्रथमान्ताष्टाकपालादिशब्दैरनुषङ्गासम्भवात्। तदुक्तम्—

वैश्वानरपदं नापि यागायात्रानुषज्यते।

विभक्त्यन्तरयोगित्वात्, न चेतेऽस्मादनर्थकम्॥ इति।

न च विभक्तिविपरिणामेन तत्सम्भव इति वाच्यम्। अष्टाकपालादिश्रुतेः स्तावकत्वेनोपपत्त्या ऽनुषङ्गविभक्तिविपरिणामयोरयुक्तत्वात्।

नापि ब्रह्मवर्चसादिफलाय गुणविधिः। वाक्यभेदप्रसङ्गात्। तस्मात् पूर्वोक्तप्रकारेण नामधेयविधित्वयोरभावेन 'पुत्रे जाते' इत्यत्रोपक्रान्तस्य द्वादशकपालस्य 'यस्मिन् जाते' इत्यनेनोपसंहारादेकवाक्यत्वपर्यालोचनया स्तुत्या विना च तदसम्भवात्स्तावकत्वमेव युक्तम्। तथा च अष्टाकपालादिभिरंशैरंशिनो द्वादशकपालस्य स्तुतिरिति॥

४ अथासञ्जातविरोधिन्यायः।

"प्रजापतिरकामयत प्रजाः सृजेयेति। स तपोऽतप्यत। तस्मात्तेपानात्* त्रयो देवा असृज्यन्त 'अग्निर्वायुरादित्यः'। ते तपोऽतप्यन्त। तेभ्यस्तेपानेभ्य*स्त्रयो वेदा ह्यसृज्यन्त। अग्नेर्ऋग्वेदो, वायोर्यजुर्वेद, आदित्यात्सामवेदः" इत्युपक्रम्य ज्योतिष्टोमे श्रूयते "तस्मादुच्चैर्ऋचोपांशु यजुषा उच्चैः साम्ना" इति। अत्रोपक्रमोपसंहारयोरेकवाक्यत्वानुरोधाय तयोरेकार्थविषयत्वावश्यकतया उच्चैस्त्वादिविधिवाक्यगतऋगादिशब्दा–यत्रार्थवशेन पादव्यवस्थेत्यादिलक्षणार्थकाः पूर्वश्रुतमन्त्र–ब्राह्मणसमुदायपरवेदशब्दसामानाधिकरण्याय लक्षणया तदर्थपरत्वेन व्याख्येयाः? उतोपक्रमगतवेदशब्द एवोपसंहारस्थऋगादिशब्दसमानार्थत्वाय लक्षणया व्याख्येय इति?। तत्रोक्तम्—

गुणत्वादनुवादत्वादर्थवादस्य लक्षणा॥
मुख्यस्यापि प्रधानत्वादप्राप्तविषयत्वतः॥

विध्युद्देशो जघन्योऽपि स्वार्थहानिं न गच्छति॥ इति।

उच्चैस्त्वादिधर्मविधाने हि ऋगादेरुद्देश्यतया विधिवाक्यगतत्वेन प्राबल्यादप्राप्तविषयत्वेन प्राधान्याच्च तदपेक्षयोपक्र-

* कानजन्तमेतत्।

प्रगतवेदशब्दस्यार्थवादगतत्वेन तस्य च विधिसापेक्षप्रमाणत्वेन दौर्बल्यात्, प्रमाणान्तरासिद्धस्यैवानुकीर्तनप्रर्थवाद इत्यनुवादत्वाद् गुणभूतत्वेन "गुणे त्वन्यायकल्पना" इति न्यायेनोपक्रमगतो वेदशब्द एव लक्षणया तदेकदेशमन्त्रपर इति ।

किञ्च ऋगादिशब्दानां वेदपरत्वे तैस्तदेकदेशब्राह्मणाभिधानं स्यात् । नच कदाचिदपि साम्प्रदायिका ब्राह्मणे ऋक्शब्दं प्रयुञ्जते । दृष्टप्रयोगानुसारिणी च सर्वत्र वृत्तिकल्पना युक्ता । वेदशब्दस्तु 'ग्राम आयात' इतिवदेकदेशं बोधयितुमीष्टे । ऋचं ब्राह्मणमात्रं वाऽधीयानस्य सर्वैरपि वेदाध्यायी इत्युच्यमानत्वात् ।

किञ्च एकत्र वेदे पठ्यमाना वेदान्तरेऽप्युपलभ्यन्ते काश्चिदृचस्तथा यजूंषि सामानि च । वेदपरत्वे तेषूच्चैस्त्वादिधर्मस्यानुष्ठाने संशय–उभयवेदगतत्वेन किङ्तस्यानुष्ठानमिति । वेदद्वयव्यपदेशस्य तुल्यतया समानबलत्वत्त्वविभावने त्वष्टदोषग्रस्तविकल्पापत्तिः । तेषां ऋगादिपरत्वे तु नोक्तापत्ती । न ह्येकस्मिन् वर्णसमुदाये ऋक्त्वं यजुष्ट्वं चेत्युभयं समवेतम् । ज्योतिष्टोमप्रकरणं चैवमनुगृह्यते । अन्यथा वेदस्य समस्तेष्टिपश्वेकाहाहीनसत्रविषयत्वाद्यावद्वेदानुसारी धर्मः प्रकरणमुल्लङ्घ्य सार्वत्रिकः स्यात् । तथाचोपक्रमगतवेदशब्दस्य तदवयवे लक्षणया ऋगादिपरत्वमिति पूर्वपक्षे सिद्धान्तसूत्रम् "वेदो वा प्रायदर्शनात् । (अ० ३ पा० ३ अधि० १ सू० २) इति । अयमर्थः–वेदः–उक्तविध्युद्देशः मन्त्रब्राह्मणसमुदायरूपवेदधर्मः । ऋग्वेदेन विहितं कर्म उच्चैः कर्तव्यम्, यजुर्वेदेनोपांशु, सामवेदेनोच्चैरिति यावत् । प्राये-वाक्योपक्रमे दर्शनात्–वेदशब्ददर्शनात् । अयम्भावः—उपक्रमे मन्त्रब्राह्मणसमुदायपरवेदपदश्रुत्या तज्जनितसंस्कारव्याप्तमनस्कतया पश्चाच्छ्रूयमाणऋगादिशब्दानामेव लक्षणा करणीया ।

यत्तु विध्युद्देशबलीयस्त्वान्न तत्र लक्षणेति। तत्रोक्तम्—

विध्यर्थवादसम्बद्धमन्यदेव बलाबलम्।
मुख्यपश्चात्तनत्वेन ज्ञानानामन्यदेव तत्॥ इति।

ते एवार्थवादा विध्युद्देशैः प्रबाध्यन्ते ये पश्चाच्छ्रूयन्ते। येतु पूर्वं, न ते पश्चाच्छ्रूयमाणस्य विधेरप्यनुरोधाय स्वार्थातिक्रमं सहन्ते, कुतो विध्युद्देशस्य। सर्वेषामपि शब्दानां स्वार्थातिक्रमे विरोधः कारणम्। स च विरोधिज्ञाने सत्येवोपपद्यते। न चात्र "त्रयो वेदा असृजन्त अग्नेर्ऋग्वेद" इत्यादिवाक्यश्रवणकाले जातिवाचकऋगादिपदानां श्रुतिः। यद्वशेन वेदशब्दस्तदवयवे लक्षणां भजेत। अवधारिते च तदा वेदपदार्थे उपसंहारगतऋगादिशब्दाः सञ्जातप्रतिपक्षज्ञानत्वात्स्वार्थपराः सन्तस्तदेकवाक्यतामप्रतिपद्यमाना बलाल्लक्षणां भजन्ते।

किञ्च विध्यर्थवादयोः समानविषयत्वनियमात् यावदेवार्थवादे वेदाः सङ्कीर्तितास्तावदेव किमप्येषां विधास्यत इत्येतदवधृतम्। ततश्च किमेषां विधेयमित्येतन्मात्रमपेक्षते, न तु कस्य किमिति। तथा चोत्तरस्माद्वाक्यादपेक्षितमात्रं गृह्यते। विधेयं चापेक्षितम्, न विधिविषय इति उच्चैस्त्वादिमात्रं सम्बध्यते, नतु ऋगादयः। ततश्चाविवक्षितत्वादेषामर्थवादगतवेदशब्दे च विध्युद्देशत्वेनावधारिते यस्मादेवमेते वेदा जातास्तस्मादेषामुच्चैस्त्वादि कर्तव्यमितिवक्तव्ये तमेवार्थं सिद्धमङ्गीकृत्य ऋगादिशब्दा उच्चार्यन्ते। अन्यथा ह्यसम्बद्धमेवं स्यादिति तेषामेवानुवादत्वम्।

यत्तूक्तं न हि कदाचिदपि ब्राह्मणे ऋक्शब्दप्रयोग इति। तन्न, वेदे एव—

"ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदेन तिष्ठति मध्ये अन्हः ।
सामवेदेनास्तमये महीयते वेदैरशून्यस्त्रिभिरेति सूर्यः" ॥

इति मन्त्रे प्रथमचरणे ऋक्शब्दस्य मन्त्रब्राह्मणसमुदाये प्रयोगदर्शनात् । नहि तत्र स मन्त्रमात्राभिधानाभिप्रायेण प्रयुक्त इति भ्रमितव्यम् । चतुर्थचरणे वेदैरिति बहुवचनानुपपत्तेः ।

यश्च संशय उच्चैस्त्वानुष्ठाने उक्तः सोऽपि न । नहि पाठमात्रेण तद्गतधर्मानुष्ठानप्रसक्तिः । किन्तु येषां यत्र विधानं तेषां तद्गतधर्मो भवति । यदि केषांचिदुभयत्रापि विधानं तर्हि "भूयस्त्वेनोभयश्रुति" (अ० ३–पा० ३ अधि० ३ सू० १०) इति न्यायेन निर्णयः । यत्र तु भूयस्त्वमपि नास्ति तत्रेष्ट एव विकल्प इति ।

शिवं भूयात् ।

THE

CHOWKHAMBÂ SANSKṚIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NOS. 188, 189, 190, 225 & 226.

शास्त्रदीपिका ।

मीमांसाधुरन्धरश्रीपार्थसारथिमिश्रप्रणीता ।
पण्डितप्रवररामकृष्णविरचित-
युक्तिस्नेहप्रपूरण्याख्यव्याख्यया समलङ्कृता ।

SASTRA DIPIKA

OF PÂRTHA SARATHI MISRA,
With the Commentary called Yuktisneha Prapûrani.
by Pandit Rama Krishna Misra,
Edited by
Pandit Laxman Shastri Dravid,
Professor, Government Sanskrit College, Calcutta.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE. BENARES.
AGENTS:-
OTTO HARRASSOWITZ, LEIPZIG:
PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY:
PROBSTHAIN & CO; BOOKSELLERS, LONDON.
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press.
BENARES.
1916.

॥ नमः परमात्मने ॥

शास्त्रदीपिका ।

श्रीपार्थसारथिमिश्रविरचिता ।

श्रीरामकृष्णविरचितयुक्तिस्नेहप्रपूरण्याख्यव्याख्यासहिता ।

श्रीगणेशायनमः ।

आनन्दाश्रितवदनं सदनं रघुनन्दनं दयामुक्त्योः ।
सीतालक्ष्मणसहितं वन्दे गिरिशादिवन्द्याङ्घ्रिम् ॥ १ ॥
विधिश्रुतिस्मृतिद्वारमद्वारं योगिनामपि ।
वाञ्छितार्थप्रदं धर्मप्रमाणं राममाश्रये ॥ २ ॥
वाचं देवीं गिरिशतनयां गोत्रदेवीं च भक्त्या
वन्दे व्यासं मुनिवरमथो जैमिनिं सूत्रकारम् ॥
व्याख्यातारं गहनवचनं भाष्यकारं च पूज्यं
भट्टाचार्यं शिखिगतितनुं तन्मतज्ञान् गुरूंश्च ॥ ३ ॥
अस्त्यत्र रेवोत्तरतीरवर्ती देशः प्रसिद्धो भुवि मालवाख्यः ॥
ओंकारमाहिष्मतिकाविशालतीर्थाद्यधिष्ठानकृतात्यभिख्यः ॥४॥
वसिष्ठपाराशरवत्सकौत्सशाण्डिल्यसङ्गार्गवगौतमाद्याः ॥
वंशाः प्रसिद्धा भुवि मालवानां पूर्वक्षितीशेन्द्रसमर्चितानाम् ॥५॥

---

१ गिरिशादिभिर्वन्द्यमिति २- पा० पु० ।

२ इत आरभ्याऽन्ये श्लोकाः पुस्तकान्तरे न सन्ति ते यथालिखिता एवाऽत्र सम्मुद्रिता इति न सुधीभिर्दोषदृष्टिभिर्भावितव्यम् ।

वंशो विद्याविनयविमलस्तेषु कश्चित्प्रसिद्धः
कर्मब्रह्मप्रवणमतयः सर्वे एव द्विजेन्द्राः ॥
गोत्रं वंशप्रवरसहितं यत्र पाराशराख्यं
नैक्रिविष्णौ(?) भुवनजननी देवता सा पुरेति ॥ ६ ॥
शिवदासाभिधस्तत्र वंशे पाराशराह्वये ॥
वेदशास्त्रार्थसम्पन्नः सदाचारपरोऽभवत् ॥ ७ ॥
तत्पुत्रोऽभून्मित्रशर्मा द्विजेन्द्रो मित्रं साक्षाद्ब्रह्मतेजोविशेषैः ॥
विद्वद्वृन्दैः पूजितः सर्वशास्त्रव्याख्या-
शिष्योद्गीतकीर्तिः पृथिव्याम् ॥ ८ ॥
जनार्दनस्तस्य सुतो मनीषी जनार्दनार्चानिरतो बभूव ॥
वेदेषु शास्त्रेषु च गीतकीर्तिः महीपतीन्द्रार्चितरम्यमूर्तिः ॥ ९ ॥
तस्माज्जातो वेदशास्त्रेष्वधीती गङ्गादेव्यां भैरवाख्यो द्विजेन्द्रः ॥
कीर्तिर्येनोपार्जिता विश्ववन्द्या वृत्तिश्चाग्र्या भूपतेः शेषवंश्यात्॥१०॥
समुत्पन्नस्तस्मादतिविमलकीर्तिर्द्विजवरः
कृती पूनादेव्यां दिशि दिशि च नारायण इति ॥
प्रसिद्धः शास्त्रेषु क्षितिपतिसमूहार्चितपदः
परब्रह्मानन्दामृतरससमास्वादनपटुः ॥ ११ ॥
तस्मादभूद्धर्मरतनूरथाव्यां(?) श्रीमाधवः पुण्यचरित्रकीर्तिः ॥
वेदान्तवित्त्यक्तभवप्रवृत्तिः श्रीरामचन्द्रार्पितचित्तवृत्तिः ॥ १२ ॥
स देशादागतः काश्यां शास्त्राध्ययनसिद्धये ॥
सकलत्रः कृती भाग्यात् स्थितिं तत्र चकार ह ॥ १३ ॥
तस्माज्जातः प्रभावत्यां रामकृष्णाभिधः सुधीः ॥
पितृभक्तिपरः काश्यां सर्वशास्त्रविशारदः ॥ १४ ॥
तत्तद्ग्रन्थ[१]विनिर्माणात्स्वविद्या प्रकटीकृता ॥

१ निर्विष्टौ इति पु० पा० ।

॥ श्रीगणेशाय नमः ॥

लक्ष्मीकौस्तुभवक्षसं मुररिपुं शङ्खासिकौमोदकी-
हस्तं पद्मलाशताम्रनयनं पीताम्बरं शार्ङ्गिणम् ।
मेघश्याममुदारपीवरचतुर्बाहुं प्रधानात्परं
श्रीवत्साङ्कमनाथनाथममृतं वन्दे मुकुन्दं मुदा ॥ १ ॥

कीर्तिश्च येन विपुला पूर्वापरसमुद्रयोः ॥ १५ ॥
राजराजाभिधश्रीमद्गोपीनाथद्विजोत्तमात् ॥
विद्वन्नागरवृन्देषु प्राप्तं भट्टपदं स्थिरम् ॥ १६ ॥
गजपतिसदसि प्राप्ता पदवी बलभद्रराजगुरोः ॥
पण्डितशिरोमणिरिति प्रतापमार्तण्डनिर्माणात् ॥ १७ ॥
स तु शास्त्रप्रसादेन व्याचष्टे शास्त्रदीपिकाम् ॥
निमित्तमात्रमत्रैष व्याख्याता रघुनन्दनः ॥ १८ ॥
न शास्त्रदीपिका टीका कृता केनाऽपि सूरिणा ॥
तदपूर्वाध्वसञ्चारी नोपहास्यः स्खलन्नपि ॥ १९ ॥

ग्रन्थकारो ग्रन्थारम्भे तत्समाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिप्राप्तविशिष्टेष्टदेवताप्रणतिरूपं मङ्गलमाचरति—

लक्ष्मीकौस्तुभेति । अध्येतॄणां लक्ष्मीसौभाग्यादिप्राप्तिसूचनार्थं जगदीश्वरस्यैतद्विशेषणम् । प्रस्तरशष्कुलीन्यायेन विघ्नविघातकत्वसामर्थ्यप्रदर्शनार्थं द्वितीयम् । विशेषणान्तराणि तु भक्तानुग्रहार्थस्वीकृतशरीरध्यानौपयिकानि । मतान्तरप्रसिद्धप्रधानेनान्यथासिद्धिवारणार्थं प्रधानात्परमित्युक्तम् । नचैवं देवताधिकरणविरोधः, उद्देश्याया एव तद्विषयत्वात् । उक्तं च "नास्माकं शब्द एव देवता नाकसदामिन्द्रादीनां देवतात्वाङ्गीकारात्" । अत एव वार्तिककारैः "विशुद्धज्ञानदेहाय" इत्यादिना महादेवो नमस्कृतः । उक्तं च भट्टोम्बेकेन—

(१) मीमांसाश्लोकवार्तिके १ श्लोकः ।

न्यायाभासतमश्छन्नशास्त्रतत्त्वार्थदर्शिनीम् ।
कुमारिलमतेनाऽहं करिष्ये शास्त्रदीपिकाम् ॥२॥

"ग्रन्थारम्भे ऽभिमतदेवतानमस्कारं करोति वार्तिककार" इति । अथवा देवतास्तुतेरेव प्रधानकर्मण एतत्फलं न देवतायाः, तस्या गुणत्वाङ्गीकारात् ।

केचित् पुनरेतत्कर्मपरत्वेन व्याचक्षते, तथाहि—अनेकपद्धत्यादिभिर्विशुद्धं यज्ज्ञानं तद्गम्यं स्वरूपं यस्य । वेदत्रयसमाहाररूपं चक्षुर्ज्ञापकं प्रमाणं यस्य तस्मै । स्वर्गादिफलप्राप्तिहेतवे । सोमस्यार्धं रसरूपं त्याज्यतया यो धारयति तस्मै नम इति । तेषामीश्वरद्रोहिणां प्रतीयमानार्थपरित्यागेनार्थान्तरं कल्पयतामनुपादेयमेतद्व्याख्यानम् ॥ १ ॥

इदानीं सप्रयोजनं कर्तव्यं प्रतिजानीते ।

न्यायाभासेति । अत्र पूर्वार्धेन प्राभाकराद्युद्भावितन्यायाभासतमोनिराकरणेन शास्त्रतत्त्वार्थप्रदर्शनं ग्रन्थस्य प्रयोजनमुक्तम् । शास्त्रदीपिकां करिष्य इति कर्त्तव्यप्रतिज्ञा । कुमारिलमतेनेति मतान्तरनिराकरणं ध्वनितम् ॥ २ ॥

कर्त्तव्यं प्रतिज्ञाय मीमांसाशास्त्रविषयत्वं द्योतयितुं तदाद्यसूत्रं लिखति ।

अथातो धर्म्मजिज्ञासेति ।

एतच्च धर्म्मविचाररूपं मीमांसाशास्त्रम् । लक्षणानि चास्य द्वादश । प्रमाणभेदशेषप्रयुक्तिक्रमाधिकारसामान्यातिदेशाविशेषातिदेशोहबाधतन्त्रप्रसङ्गाख्यानि । प्रमाणादयः प्रसङ्गान्ता द्वादश पदार्थाः क्रमात् द्वादशानामध्यायानां विषयाः । तत्र प्रथमेऽध्याये चतुर्भिः पादैः क्रमेण विध्यर्थवादस्मृतिनामधेयानि विचारितानि । द्वितीये तूपोद्घातभेदतदपवादप्रयोगभेदाः । तृतीये

(१ प्रथमं धर्मजिज्ञासाऽधिकरणम्)

अथाऽतो धर्मजिज्ञासा* ॥ १ ॥

श्रुतिलिङ्गवाक्यादीनि त्रिभिः पादैर्विचारितानि । चतुर्थे निवीतादिश्रुत्यादिबलाबलविचारः । पञ्चमे प्रतिपत्तिकर्म्म । षष्ठेऽनारभ्याधीतानि । सप्तमे बहुप्रधानोपकारकप्रयाजादीनि । अष्टमे याजमानानि ।

प्रधानस्य प्रयोक्तृत्वमप्रधानाप्रयोक्तृता ।
फलचिन्ता जघन्याङ्गचिन्तेत्येवं चतुर्थगाः ।

पञ्चमस्याद्ये श्रुत्यादिभिः क्रमो निरूपितः । द्वितीये क्रमविशेषः। तृतीये प्रयाजादिविवृद्धिः । चतुर्थे श्रुत्यादिबलाबलविचारः ।

अधिकारी तस्य धर्म्माः प्रतिनिध्यर्थलोपने ।
दीक्षा सत्रं देयवह्नी षष्ठपादेष्वमी स्थिताः ।

सप्तमाद्ये प्रत्यक्षवचनातिदेशः । द्वितीये तस्यैव शेषः । तृतीये नामातिदेशः । चतुर्थे निर्वापौषधलिङ्गेन प्राकृतधर्मातिदेशः ।

स्पष्टाल्लिङ्गादथास्पष्टात्प्रबलादपवादतः ॥
अतिदेशविशेषाः स्युरष्टमाध्यायपादगाः ।
ऊहारम्भो ऽथ सामोहो मन्त्रोहस्तत्प्रसङ्गतः ॥
नवमाध्यायपादेषु चतुर्ष्वेते प्रकीर्तिताः ।
द्वारलोपो ऽस्य विस्तारः कार्य्यैकत्वं समुच्चयः ॥
ग्रहसामप्रकीर्णानि नञर्थाश्चाष्टपादगाः ।
उपोद्घातस्तथा तन्त्रावापौ तन्त्रस्य विस्तृतिः ॥
आवापविस्तृतिश्चैकादशाध्यायस्य पादगाः ।

---

* अथ कृत्स्नवेदाध्ययनाऽनन्तरं यतोऽधीतो वेदो विवक्षितार्थः अतो धर्मस्य जिज्ञासा— विचारः कर्तव्य इति शेषः ।

अनेन सूत्रेण प्रारिप्सितस्य शास्त्रस्य श्रोतृप्रवृत्तिसिद्धये धर्मज्ञानं प्रयोजनं कथ्यते । यदा हि धर्मजिज्ञासा कर्तव्येत्युक्त्वा शास्त्रमारभ्यमाणं दृश्यते तदा नूनमिदं शास्त्रं धर्मज्ञानप्रयोजनमित्यवगम्यते ।

प्रसङ्गस्तन्त्रनिर्णीतिस्समुच्चयविकल्पने ।
द्वादशाध्यायपादार्था इति पादार्थसङ्ग्रहः ।

सङ्गतिस्वरूपं चात्र ग्रन्थान्तरादवगन्तव्यम् । सूत्रतात्पर्यं दर्शयति । अनेनेति । प्रयोजनपरत्वेन सकलशास्त्रशेषत्वमस्य ध्वन्यते । किमर्थं प्रयोजनकथनमित्यपेक्षायामाह । श्रोत्रिति । ननु नानेन प्रयोजनं कथ्यते तद्वाचकपदाभावादत आह । यदा हीति । कर्त्तव्येत्युक्त्या सूत्रे कर्त्तव्यतापदाध्याहारस्सूचितः । कर्त्तव्यतानुपदेशे ऽथातः शब्दयोरनन्वयापत्तेः । यथा —

"अथातोधर्म्मजिज्ञासासूत्रमाद्यमिदं कृतम् ।
धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजन" मिति । मंदफलमेतदितिचेत् । न। उक्तोत्तरत्वात् । अनाश्वासात्तदनुपपत्तिरितिचेत् । न । आप्तत्वेन तदनुपपत्तेः । वक्ष्यति हि "तच्चेत्प्रत्यायिता" दिति । तथा "अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरे" न्निति ।

---

१ माधवीयजैमिनीयन्यायमालाविस्तरस्था एव श्लोकाः शब्दतः क्वचिदर्थतश्चोदाहृताः । सङ्गतिस्वरूपं तत एव ज्ञातव्यमिति कथनाच्च प्रदर्श्यन्ते श्लोकाः—

ऊहित्वा सङ्गतीस्तिस्रस्तथाऽवान्तरसङ्गतिम् ।
ऊहेदाक्षेपदृष्टान्तप्रत्युदाहरणादिकम् ॥
पूर्वन्यायस्य सिद्धान्तयुक्तिं वीक्ष्य परे नये ।
पूर्वपक्षोक्तयुक्तिं च तत्राऽऽक्षेपादि योजयेत् ॥

२ मी. श्लो. वा. श्लो. ११ ।

३ शाबरभाष्ये १ । अ. १ पा. २ सू. ।

४ जैमिनिसूत्रे १ अ. ३ पा. ७ सू. ।

विदितं तावत्प्रयोजनं, सम्बन्धोऽपि शास्त्रस्य प्रस्तावहेतुर्वक्तव्यः ? यथा शास्त्रान्तरेषु शिष्यप्रश्नानन्तर्यादिसम्बन्धः प्रस्तावको वर्ण्यते, तथेहाऽपि शास्त्रारम्भप्रयोजकानां सम्बन्धानामन्यतमो वक्तव्यः ? अनेन सम्बन्धेनेदं शास्त्रमायातमिति, अन्यथाह्यऽसम्बद्धप्रलपितं स्यात् ।

सत्यम् । इह तु य एवाऽयं प्रयोजनेन सह शा-

उक्तं च—

"सर्वस्यैव हि शास्त्रस्य कर्म्मणो वा ऽपि कस्य चित् ।
यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यत" इति ॥

ननु प्रयोजनवत्प्रवृत्त्यङ्गत्वात्सम्बन्धोऽपि सूत्रकारेण वक्तव्यः, अविदितप्रयोजनवदविदितसम्बन्धे ऽपि श्रोतुरप्रवृत्तेरिति चोदयति । विदितमिति । यथा "अथातोधर्मं व्याख्यास्यामः" इत्यादिषु शिष्यप्रश्नानन्तर्य्यरूपसम्बन्धोऽभिधीयते तथाऽत्र सूत्रकारेण प्रयोजनवत्सम्बन्धोऽपि वक्तव्यः अन्यथा सूत्रकारस्यासम्बद्धप्रलापित्वेन तद्वचने न श्रद्धीरन्नित्यर्थः । उक्तञ्च—

"सिद्धार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजन" इति ।

परिहरति । सत्यमिति । यदैवास्य शास्त्रस्येदं प्रयोजनमित्युक्तं तदैव तयोर्धर्मज्ञानविचारयोः साध्यसाधनभावलक्षणः सम्बन्धो ऽर्थादुक्तो न चार्थात्प्राप्तं सूत्रकारा अक्षरैर्निबध्नन्ति असूचकत्वेनासूत्रत्वप्रसङ्गादित्यर्थः । अयमाशयः । नाऽस्य

---

९ मी. श्लो. वा. श्लो. ८ ।
१ काणादसूत्रे १ अ. १ आ. १ सू. ।
२ मी. श्लो. वा. श्लो. १९ ।

त्रस्य साध्यसाधनत्वसम्बन्धः स एव शास्त्रस्य प्रस्तावको नान्यः। भवति हि साधनत्वमेव साध्यार्थिनः साधने प्रवृत्तिहेतुः । सचाऽयं सम्बन्धः प्रयोजनोक्त्यैवाऽर्थाज्ज्ञायत इति न सूत्रकारेण पृथगुक्त इत्यदोषः ॥

शास्त्रस्य शिष्यप्रश्नानन्तर्यसम्बन्धो हेतुः लोकहितैषिणा जैमिनिना स्वयमेव धर्म्मज्ञानसाधनीभूतस्य शास्त्रस्याऽऽरब्धत्वात् । अतः साध्यसाधनसम्बन्ध एवात्र । स च सम्बन्धिनोरभिधानादेवार्थात् ज्ञात इति भाष्यकारोऽप्येनमेव सम्बन्धं "धर्म्मः प्रसिद्धो वा स्यादप्रसिद्धो वे[1]" त्यादिना ऽऽक्षेपसमाधानाभ्यामुपपादयिष्यति । अतो न सम्बन्धान्तरगवेषणा कार्येति भावः । स एवेत्यनेन क्रियानन्तर्यगुरुपर्वक्रमरूपसम्बन्धान्तरनिराकरणम् । तथाहि—काणादे तन्त्रे शिष्यप्रश्नक्रियानन्तर्यरूपसम्बन्धो दर्शितः । गुरूपर्वक्रमात्मकश्च सम्बन्धो यथाऽत्रैव कैश्चिदुक्तः तद्यथा—

"ब्रह्मा प्रजापतये मीमांसां प्रोवाच, सोपीन्द्राय, सोऽप्यग्नये, स च वासिष्ठाय, सोऽपि पराशराय, पराशरः कृष्णद्वैपायनाय, सोऽपि जैमिनये, सोऽपि स्वोपेदशादनन्तरमिमं न्यायं ग्रन्थे निबद्धवानिति । क्वचित्तु ब्रह्मा महेश्वरो वा प्रजापतये मीमांसां प्रोवाच प्रजापतिरिद्रायेन्द्र आदित्यायेत्येवमादि पाठान्तरम् । तदत्र क्रियारूपस्तावत्सम्बन्धो न वाच्यो निष्प्रयोजनत्वात्, न ह्येवंरूपसम्बन्धसद्भावासद्भावयोः श्रोतॄणां शास्त्रप्रवृत्तौ निवृत्तौ वा शास्त्रगोचरे ज्ञाने वा कश्चिद्विशेषः, तथा गुरूपर्वक्रमरूपोऽपि सम्बन्धो निष्फलो निर्हेतुकश्च, न ह्यस्मिन्सम्बन्धे किञ्चित्प्रमाणम-

---

१ शा. भा. १ पा. १ अ. १ सू. ।

स्ति अतः सप्रमाणकः सप्रयोजनश्च सम्बन्धो वाच्यः स च साध्यसाधनत्वरूप एव युक्त इति भावः।

नन्वत्र सूत्रकृतैवाऽथशब्दं प्रयुञ्जानेनाध्ययनक्रियानन्तर्यलक्षणस्य शास्त्रसम्बन्धस्योक्तत्वात् कथमुच्यते सूत्रकारेण न पृथगुक्त इति?।

उच्यते।अत्राऽथशब्दोऽध्ययनजिज्ञासाक्रिययोरेव सम्बन्धमाह, न शास्त्रस्य प्रयोजनेन सह, ते च क्रिये शास्त्रादत्यन्तभिन्ने। ननु जिज्ञासापदेनैव विचाररूपा शास्त्रशब्दवाच्या क्रियोपात्तैव कथमुच्यते शास्त्रादत्यन्तभिन्नेति?। मैवं जिज्ञासापदस्य ज्ञानेच्छारूपाक्रियावाचकस्य मीमांसापर्यायत्वाभावात्। श्रोतृक्रिया हि ज्ञानेच्छारूपा जिज्ञासा, वक्तृक्रिया तु विचारात्मिका मीमांसा, कुतस्तयोरैक्यम्। कथन्तर्हि जिज्ञासाशब्दस्य मीमांसायां प्रयोगः?, उभयोरपि सन्प्रत्ययान्तत्वसाम्येनैकार्थत्वभ्रमादितिब्रूमः। अयमत्र विवेकः विषयोऽत्र ज्ञाप्यजन्यभेदेन द्विविधः, ज्ञाप्यो धर्मः, जन्यस्तज्ज्ञानं, सम्बन्धस्तु धर्मेण सह शास्त्रस्य ज्ञाप्यज्ञापकभावलक्षणस्तज्ज्ञानेन सह जन्यजनकलक्षणः, धर्मज्ञानमवान्तरप्रयोजनं, परमप्रयोजनश्चाभ्युदयनिःश्रेयसे, तत्कामोऽधिकारी इत्यनुबन्धचतुष्टयं श्रोतृप्रवृत्तिसिद्ध्यर्थं सूत्रकारेण श्रुत्यर्थाभ्यामुक्तम्। लोकानुग्रहश्च शास्त्रप्रणयने कारणम्। नचैवमपि शिष्टाचारपरम्पराप्राप्तमङ्गलाऽनाचरणात्सूत्रकारस्याशिष्टत्वशङ्कया तच्छास्त्रे प्रवृत्त्यनुपपत्तिः? नैष दोषः। सूत्रादौ मङ्गलार्थाऽथशब्दप्रयोगेण मङ्गलाचरणस्य कृतत्वात्। भाष्यकारेणापि लोकशब्दं प्रयुञ्जानेन तत्त्वानुस्मरणरूपं तत्कृतं, वार्त्तिककारैरपि "विशुद्धज्ञानदेहाय" इत्यनेन देवतनमस्काररूपं स्पष्टमेव मङ्गलमाचरितं, ग्रन्थकारेणापि तन्मतानु-

अत्रेदं चिन्त्यते किमध्ययनानन्तरं धर्मजिज्ञासया गुरुगृहेऽवस्थातव्यम् ? उत गुरुगृहात्समावर्तितव्यम् ? इति । यदि हि स्वाध्यायाध्ययनविधिना धर्ममात्राऽर्थमध्ययनं स्वर्गाद्यर्थेन विधीयते ततस्तन्मात्रेणैव शास्त्रार्थस्य समाप्तत्वात् "अधीत्य स्नायात्" इति स्मृतिवचनबलेन च समावर्तितव्यमिति ।

सारिणा तत्कृतमिति न कस्य चिदुपालम्भः ।

एवमनेन सूत्रेण सकलशास्त्रशेषरूपेण श्रोतृप्रवृत्त्यौपयिकविषयादिनिरूपणेन शास्त्रारम्भे प्रतिज्ञाते तत्सिद्ध्यर्थमध्ययनविधिविचारमारभते ।

अत्रेदमिति । इदं विचारशास्त्रं विधिप्रयुक्त्याऽनारभ्यमारभ्यं वेति मुख्यो विचारस्तत्सिद्ध्यर्थमध्यनविधेरदृष्टार्थत्वं दृष्टार्थत्वं वेति विचार्यते । भाष्यकारेण च शास्त्रादावेतत्सूत्रमध्ययनविधेरदृष्टार्थत्वमाशङ्क्य दृष्टार्थत्वप्रतिपादनपरमिति व्याख्यातं "दृष्टोहि तस्यार्थः कर्मावबोधनं नाम" इत्यादिना । तस्याऽयमेव प्रसङ्गोविधिरित्युचित एवादौ तद्विचारः । कथं पुनरदृष्टार्थत्वकोटेरुदयो यतोऽध्ययनकरणिकायां भावनायां नियोगः प्रतीयमानो नियोज्यविशेषं विनाऽपर्यवस्यन् अश्रुतस्वर्गादिपरित्यागेन "फलमात्रेयो निर्देशा"[१]दितिन्यायेन घृतकुल्यादिकाममवलम्बते । न चार्थवादत्वं पारार्थ्यानवगमात् । न च कर्मावबोधार्थत्वेन पारार्थ्यं अध्ययनस्य तादर्थ्येन श्रवणात् । अतो नादृष्टार्थत्वशङ्केति । उच्यते । अध्ययनकरणिकायां भावनायां निर्वर्त्यमानायां तावदर्थावबोधो जायते स चाहवनीयादिवदुपकारकत्वेन कर्मार्थो भवति, अतोऽध्ययनमपि

१ जै. सू. ४. अ. ३. पा. १८ सू. ।

अथा ऽक्षरग्रहणादिपरम्परोपजायमानवाक्यार्थज्ञानार्थमध्ययनं विधीयते ? ततस्तस्य विचारमन्तरेणाऽसम्भवादध्ययनविधिनैवाऽर्थाद्विचारोविहित इति गुरुगृह एवाऽवस्थाय विचारयितव्यो धर्मः।

तद्द्वारा कर्मार्थमाधानवत्, एवञ्चाध्ययनस्य पारार्थ्येऽवगते घृतकुल्यादेस्तदर्थवादानुपपत्तौ फलसमर्पकत्वाऽयोगात्। नन्वेवमपि दृष्टार्थावबोधार्थत्वेनादृष्टार्थत्वानुपपत्तिः। मैवम्। तादर्थ्ये विध्यानर्थक्यापत्तेः। विधिं विनाऽपि तल्लाभात्। अतो विध्यर्थवत्वायाऽदृष्टार्थत्वकल्पनेति। अत्र शास्त्रारम्भासिद्ध्यर्थत्वेनाध्ययनविधेरदृष्टार्थत्वं दृष्टार्थत्वं वेति विचारे कर्तव्ये ग्रन्थकारस्याऽध्ययनानन्तरं गुरुगृहे ऽवस्थातव्यमुत ततोनिवर्तितव्यमिति विचारोऽनुपपन्नस्तत्सिद्ध्यर्थश्चाध्ययनविधेर्दृष्टादृष्टार्थत्वविचारोऽत्यन्तमनुपपन्नः शास्त्रारम्भसिद्ध्यर्थत्वादध्ययनविधिविचारस्येत्यादिबहुग्रन्थविरोधात्। तस्मादस्मदुक्त एव विचारक्रमोऽनुसन्धेयः। ग्रन्थोऽपि शाब्दक्रमं बाधित्वा तत्रैव योज्यः। अथवा सूत्रकारेणाध्ययनानन्तरं धर्मजिज्ञासा कर्त्तव्येत्युपदेशार्थमथशब्दः प्रयुक्तस्तस्य प्रयोजनं "वेदमधीत्य स्नाया" दिति स्मृतिप्राप्तस्नानकालबाधः, वेदमधीत्य तावन्न स्नातव्यं यावन्न धर्मो जिज्ञास्यत इति तदर्थोऽध्ययनविधिविचार इति ग्रन्थकर्तुरभिप्रायः। ततस्तस्येति। विचारस्येतिकर्त्तव्यतारूपत्वादध्ययनविधेरेव तत्पर्यन्तोव्यापारः। नचैवं प्रवृत्तिभेदापत्तिः आविचारात्प्रवृत्तेरेकत्वात्। एका हि प्रवृत्तिरङ्गप्रधानयोः वक्ष्यति च—

"अङ्गप्रधानवर्त्यां भावनायां युगपत्पुरुषनियोग" इति।
मीमांसा चेतिकर्त्तव्यतात्वेनाङ्गम्। तदुक्तम्—

तत्र—

विनाऽपि विधिना दृष्टलाभान्नहि तदर्थता ।
कल्प्यस्तु विधिसामर्थ्यात् स्वर्गो विश्वजिदादिवत् ॥३॥

"धर्मे प्रमीयमाणे तु वेदेन करणात्मना ।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति"

इति । अतो वैध एवायं शास्त्रारम्भ इति सिद्धान्तकोट्युपपत्तिः । नन्वेवं सति न प्रयोजनस्य वाक्यार्थत्वं स्यात् । अध्ययनविधिदृष्टार्थत्वप्रतिपादनस्यैव वाक्यार्थत्वावगमात् । ततश्च मीमांसायाः प्रयोजनं वक्तुमेतत्सूत्रमिति भाष्यं नोपपद्येत । नैष दोषः । मीमांसारम्भासिद्ध्यर्थमिह दृष्टार्थत्वं प्रतिपाद्यत इति फलतः प्रयोजनपरत्वाभिधानम् । तदप्रतिपादने च शास्त्रारम्भानुपपत्तेः सूत्रस्य शास्त्रादावनन्वय एव स्यात् अतोऽध्ययनविधिदृष्टार्थत्वे सूत्रतात्पर्ये सति विचारस्य कर्त्तव्यतोपपत्तौ धर्मज्ञानस्य प्रयोजनत्वे फलिते सूत्रस्य तदुक्तिवचनस्योपपत्तिः । अतो यत्कैश्चिदुक्तं नात्र प्रयोजनं पदेनोपात्तं, न चापदार्थस्य वाक्यार्थत्वं, न चावाक्यार्थे तात्पर्य्यं, प्रयोजनपरत्वे च कर्त्तव्यताऽनुपदेशात् अथातः शब्दयोरनन्वय इति, तदपास्तम् । फलतस्तस्य प्रयोजनपरत्वात् वाक्यार्थस्यैवान्यपरत्वे अनन्वितपदार्थकत्वचोद्यानवकाशादित्यलम् ।

एवं विचारस्वरूपमुपवर्ण्य पूर्वपक्षमारभते ।

तत्रेति । प्रमाणान्तरसिद्धत्वादेवार्थज्ञानार्थत्वं न युक्तमित्यर्थः । नचैवमानर्थक्यापत्तिरित्याह । कल्प्यस्त्विति । तुशब्दः सिद्धान्तापेक्षयाऽतिशयद्योतनार्थः । सिद्धान्ते पुरुषार्थरूपस्यार्थावबोधस्य भाव्यत्वमत्र पुरुषार्थरूपस्य स्वर्गस्य, एवं च चेतनप्रवर्त्तनात्मकविध्युपपत्तिरि-

स्वाध्यायसंस्कारद्वारेणाऽध्ययनस्यार्थज्ञानहेतुत्वं विनैव विधिना प्रमाणान्तरेण सिद्धमिति तादर्थ्ये विध्यानर्थक्यम्। नचाऽवघातादिविधिवन्नियमार्थत्वम्, अवघातोहि दर्शपूर्णमासाऽपूर्वे नियम्यते– अवघातनिष्पन्नैरेव तण्डुलैरपूर्वं सिद्ध्यतीति, न तण्डुलस्वरूपे, प्रमाणान्तरविरोधात्। तद्वदिहाऽपि ज्ञानस्याध्ययनमन्तरेणाऽपि दर्शनात् तत्स्वरूपे नियमाऽसम्भवात् क्रत्वपूर्वेष्वेवाऽध्ययननियमो विधातव्यः—अधीतैरेव वेदैरवगतानि कर्माणि फलदानीति। नचैवं युक्तम्–अक्रत्वर्थत्वादध्ययनस्य, अनारभ्याऽधीतत्वात् श्रुत्याद्यभावाच्चाऽक्रत्वर्थत्वम्। तस्माददृष्टार्थमेव स्वाध्यायाध्ययनमित्यध्ययनमात्रादेव समाप्ते शास्त्रार्थे गुरुगृहात्समावर्तितव्यम्।

ति। पूर्वार्द्धं व्याचष्टे। स्वाध्यायेति। न तावदयमपूर्वविधिः वेदाध्ययनमर्थज्ञानहेतुः अध्ययनत्वात् भारताध्ययनवदिति प्रमाणान्तरेणैव प्राप्तत्वादप्राप्ते च शास्त्रस्यार्थवत्त्वादित्यर्थः। नाऽप्यवघातवन्नियमविधित्वमित्याह। नचेति। कथं नचेत्यपेक्षायामाह। अक्रर्थत्वादिति। अनारभ्याधीतत्वेनाऽध्ययनस्याक्रत्वर्थत्वादित्यर्थः। पर्णतावद्भविष्यतीतिचेन्नेत्याह। श्रुत्याद्यभावादिति। ननु सर्वथा फलाश्रवणे विश्वजिन्न्यायेन तत्कल्पनं, श्रूयते चात्र फलं—

"यं यं क्रतुमधीते तेन तेनास्येष्टं भवती"ति—

क्रतुफलावाप्तिः।

"यदृचोऽधीते पयसः कुल्या अस्य पितॄन् स्वधा अभिवहन्ति पयआहुतिभिरेव तद्देवांस्तर्पयति ते पितरोदेवाश्चैनमध्ये-

इति प्राप्ते—

अभिधीयते—

लभ्यमाने फले दृष्टे नाऽदृष्टपरिकल्पना।

विधेश्च नियमार्थत्वान्नानर्थक्यं भविष्यति ॥ ४ ॥

यदुक्तं ज्ञानस्वरूपे क्रत्वपूर्वे वा न नियमः सम्भवतीति। तत्राऽभिधीयते। नोभयथाऽपि ब्रूमः, कथं तर्हि? योऽयमग्निहोत्रादिष्वधीतवेदानां त्रैवर्णिकानामेवाऽधिकारो नाऽनधीतवेदानां शूद्राणामित्यधिका-

---

तारं तृप्ता आयुरादिभिस्तर्पयन्ति"

इत्यायुरादिप्राप्तिः। यथा—

"यः स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम्।

आहैव स नखाग्रेभ्यः परमं तप्यते तप" इति तपः फलप्राप्तिः। कथमर्थवादात्फलकल्पनमितिचेत् निर्देशात् प्रतिष्ठावदिति ब्रूमः श्रुतपरित्यागस्यायुक्तत्वात् अतो न स्वर्गकल्पना युक्तेति। मैवम्। एतत्फलश्रुतेर्जपयज्ञाध्ययनगोचरत्वा"दहरहः स्वाध्यायमधीयीते"ति विध्यन्तरश्रवणात्, "यं यं क्रतुमधीयीते"त्याद्युपक्रम्य "नित्यं स्वाध्यायवान् द्विज" इत्युपसंहारात्। वेदाक्षरस्वीकरणार्थे तु प्रथमाध्ययने ऽध्ययनविधिविहिते न किञ्चित्फलं श्रूयते, यतो निर्देशादिति स्यात् अतोऽदृष्टार्थमेवाध्ययनमिति।

सिद्धान्तं प्रतिजानीते।

इति प्राप्त इति। यदुक्तमध्ययनस्यार्थज्ञानार्थतायाः प्रमाणान्तरासिद्धत्वाद्विधेरानर्थक्यमिति तत्परिहरति। विधेश्चेति। पूर्वपक्षोक्तं दूषणमनूद्य परिहरति। यदुक्तमिति। स्वाभिमतं नियमं प्रश्नपूर्वमुपपादयति। कथं तर्हीति। नन्वध्ययनविधौ

रनियमः स प्रयोजनमध्ययनविधेः।

तथाहि—असत्यध्ययनविधावग्निहोत्रादिशास्त्राणि विद्वांसमलभमानानि अविद्वांसमेवाधिकृत्य विद्यामन्तरेणाऽनुष्ठानासम्भवाद्विद्यामाक्षिपन्त्यविशेषाच्चतुरोवर्णानधिकुर्य्युः। सति त्वध्ययनविधौ त्रैवर्णिकानामेव विदुषामधिकारो भवति न तुरीयादेः।

तथाहि—"वसन्ते ब्राह्मणमुपनयीत "ग्रीष्मे राजन्यम्" "शरदि वैश्यम्" इति द्वितीयानिर्देशादुपनयनसंस्कृतास्त्रैवर्णिकाः किमस्माभिः कर्तव्यमित्यपेक्षन्ते, तत्सन्निधौ चाध्ययनमनिर्दिष्टकर्तृकं विधीयमानं कर्तारमपेक्षते, तत्राऽपेक्षासंनिधियोग्यत्वैरेवं विज्ञायते त्रैवर्णिकैरेवोपनीतैरक्षरग्रहणेनाऽध्ययनादिपरम्परयाऽर्थज्ञानं कर्तव्यमिति। एवं च फलवदध्ययनकर्तृभूतमाणवकसंस्कारत्वादुपनयनमध्ययनाङ्गम्। अध्ययनमपि दृष्टार्थज्ञानार्थम्। अर्थज्ञानं त्वनुष्ठानौपयिकत्वात्प्रसिद्धफलकमेवेति सर्वेषां फलवत्त्वम्। एवञ्च त्रैवर्णिकेषु विद्वत्सु लब्धेषु नाग्निहोत्रादिविधयश्चतुर्थवर्णस्य विद्यामाक्षिपन्ति, किन्तु त्रैवर्णिकानेव विदुषोऽधिकुर्वन्ति। सोऽयमधिकारनि-

---

त्रैवर्णिकानुपादानात् कथं त्रैवर्णिकाधिकारनियमसिद्धिरित्याकाङ्क्षायामाह। तथाहीति। उपनयनविध्येकवाक्यतया त्रैवर्णिकलाभ इति भावः। नन्वेवंरूपाधिकारनियमस्याऽपशूद्राधिकरणन्यायसिद्धत्वान्नाध्ययनविधिप्रयोजनत्वमित्याशङ्क्याह। सोऽयमिति। तत्राऽप्यध्ययनविधिवशादेव तन्नियमसिद्धिरित्यर्थः। एतच्च विभवादुक्तं वस्तुतस्त्वपूर्वविधिस्वीका-

यमोऽपशूद्राधिकरणे वक्ष्यमाणोऽध्ययनविधिप्रसादलभ्य इति फलवानेव विधिः। तेनाऽर्थज्ञानावसानमध्ययनमध्ययनविधिना विधीयत इति विचारमन्तरेण तदनुपपत्तेरध्यनविधिरेव विचारमाक्षिपँस्तद्विरुद्धं स्मार्तं स्नानं बाधते, इति सिद्धमध्ययनानन्तरं धर्मजिज्ञासा कर्त्तव्येति।

रेण पूर्वपक्षोक्तदोषपरिहारात् नियमार्थत्वं सम्भवति। अनारभ्याधीतस्यापि सामर्थ्यात् क्रत्वर्थत्वोपपत्तेः। यावद्धि फलवत् कर्मानुष्ठानोपयोगिज्ञानोपायतया सामर्थ्येन किञ्चित्कल्पयितुमारभ्यते तावत्स्वाध्यायोऽध्येतव्य इति प्रत्यक्षया श्रुत्याऽध्ययनमेव तदुपायत्वेन विधीयते। लिङ्गतः शीघ्रं प्रवृत्तेः उपनयनप्रक्रमाधीतत्वाच्च। तदेकवाक्यतयाऽधिकारनियमोऽपि सिध्यति। हन्त तर्ह्यपूर्वविधिरेवायं जात इति नियमभावानुपत्तिः, ? नैष दोषः फलतस्तदुपपत्तेः। अपूर्वविधित्वे सत्युपायान्तराक्षेपाभावान्नियमः फलति। परिसंख्यावत्। वाक्यार्थत्वे हि परिसंख्यायाः स्वार्थहानादिदोषः प्रसज्येत अतोऽपूर्वविधित्वेनैव निस्तारः अतोऽत्रापि न नियमो वाक्यार्थः किन्त्वपूर्वविधेः फलमिति न पूर्वपक्षोक्तदोषावकाशः। न चैतावताऽध्ययनस्य क्रत्वङ्गतापत्तिः तदापादितज्ञानस्यैव क्रत्वङ्गत्वात् यदेवेत्यादिना तस्यैव क्रत्वङ्गत्वबोधनात्। अध्ययनं तु ज्ञानाङ्गमेव। यथा आधानसाध्यानामग्नीनां क्रत्वर्थत्वेऽपि नाधानस्य क्रत्वर्थत्वम्। एवमिह ज्ञानस्य क्रत्वर्थत्वेऽपि नाध्ययनस्य क्रत्वर्थत्वमिति सर्वं समञ्जसम्। फलितमाह। तेनेति। अयं च ग्रन्थकारस्याभिप्रायोऽस्माभिरथवेत्यादिना पूर्वमेव प्रकटीकृतः। नन्वेवं हुमादीनामनर्थकानामध्ययनं कथमर्थज्ञाना-

केचित्पुनराचार्यकरणविधिप्रयुक्तत्वमध्ययनस्याऽङ्गीकृत्य किमाचार्यकसिद्धिरेवाऽध्ययनस्य प्रयोजनम्? उतार्थज्ञानम्? इति विचार्य, अन्तरङ्गत्वादर्थज्ञानमित्याहुः। किं पुनः कारणमाचार्यकरणविधिप्रयुक्तत्वेऽध्ययनस्य? अध्ययनविधेरधिकारिशून्यत्वादाचार्यकरणविधिप्रयुक्त्या चात्मलाभे विश्वजिदादिवत् फलकल्पनानुपपत्तिः। कः पुनराचार्यकरणविधिः? कथं वा तेनाऽध्ययनस्य प्रयुक्तिः?।

उच्यते—

र्थं स्यात्। नैष दोषः। गीतिकालोपलक्षकत्वेनैव तेषामर्थवत्त्वोपपत्तेः। अध्ययनोपात्तेन स्वाध्यायेन यच्छक्नुयात् तत्कुर्यादिति वचनव्यक्त्या सर्वेषां यथासामर्थ्यं विनियोगकल्पनात्। एतच्चार्थवादाधिकरणे विशेषतोऽस्माभिर्निरूपणीयमिति नेह प्रतन्यते। उपसंहरति। इतीति।

एवं स्वमतेन पूर्वोत्तरपक्षावुपपाद्य एकदेशिमतेन तौ दर्शयितुमाह। केचिदिति। आचार्यकस्य पुरुषान्तरगामित्वेन बहिरङ्गत्वादध्ययनप्रयोजनत्वमेव कथमिति चेन्न। प्रथमावगतत्वादिति ब्रूमः। अध्ययनमन्तरेण चाध्यापनस्यैवासिद्धेः। अर्थज्ञानं तु पश्चाद्भावित्वान्न प्रयोजनम्। अन्तरङ्गत्वादिति। अध्यापनकर्तृगामित्वेनान्तरङ्गत्वादित्यर्थः। प्रथमावगतत्वात् तत्प्रयोजनमिति चेन्न। प्रथमावगतत्वेऽपि तस्य प्रयोजनत्वापरिकल्पनात्। अकल्पितेऽपि तस्य प्रयोजनत्वेऽध्ययनानुष्ठानसम्भवात्। नियोग एव शब्दादवगतः प्रयोजनं स्यान्नार्थज्ञानमिति चेन्न। अर्थज्ञानस्याऽपि प्रतीयमानस्य त्यागायोगात्। फलकल्पनां निराकरोति। आचार्येति। फलकल्पनानुपपत्तेरर्थ-

"उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते"

इति स्मृत्यनुमितः-'उपनीयाध्यापनेनाचार्यकं कुर्यात्' इत्याचार्यकरणविधिः। अत्र चाऽध्यापनमाचार्यत्वसाधनम्, उपनयनन्तु क्त्वाप्रत्ययात्तस्यैवाङ्गम्। तच्च केन द्वारेणोपकरोतीत्यपेक्षायामुपनेयासत्तिरेवाऽस्य द्वारमङ्गीक्रियते लिङ्गात् । तदुपनेयोऽपि नाकिञ्चित्करोऽङ्गमिति तद्व्यापारापेक्षयामुपनयनं प्रक्रम्य विहितमध्ययनमध्यापनोपकारित्वादुपनीतस्य व्यापारत्वेनाध्यवसीयते । तदेवं स्वाङ्गभूतमुपनयनं प्रयुञ्जानोऽध्यापनविधिस्तद्व्यापारेणाध्ययनं प्रयुङ्क्ते ।

तदिदमनुपपन्नम्—

तथाहि-नियोगार्थस्याध्ययनस्याचार्यकप्रयोजनता अर्थज्ञानप्रयोजनता वा न शक्यते शास्त्रेण बोधयितुं, साध्यद्वयस्यैकत्राऽसम्भवात् । नियोगार्थतैव शास्त्रेण बोध्यते, अर्थज्ञानार्थतायां त्वनुज्ञामात्रमिति चेत् ? तथाऽप्यर्थद्वयं स्यादेव । किञ्चैवं सकृदुच्चारितस्य लिङ्प्रत्ययस्य विध्यर्थत्वमनुज्ञार्थत्वं चेति वैरूप्यमपि

ज्ञानार्थत्वं पर्यवस्यतीति भावः । आचार्यकरणविधिनाऽध्ययनस्य प्रयुक्तिमुपपादयति । अत्रेति । क्त्वाप्रत्ययेनाध्यापनसमानकर्तृकमवगम्यमानं तस्यैवाङ्गमित्यर्थः । तच्छेषत्वात्तेनवत्प्रयुक्तिरुचिता न त्वध्ययनस्येत्याशङ्क्याह। तदेवमिति ।उक्तरीत्या परम्परया तत्प्रयुङ्क्त इत्यर्थः। दूषयति। तदेतदिति।(१) नियोगार्थतैवेति । नियोगस्यैव शब्दादवगम्यमानत्वादध्ययनप्र-

(१) तदिदमनुपपन्नमित्येवमूलपाठः सर्वेषु पुस्तकेषु दृश्यते ।

स्यात्। तेन संशय एवानुपपन्नः। तथा सिद्धान्तोऽप्यनुपपन्नएव। प्रमाणान्तरसिद्धत्वादर्थज्ञानार्थत्वं न शास्त्रगोचरतामनुभवतीति। तत्र यदेवास्मदभिप्रेतं विधेर्नियमार्थत्वं महता प्रयत्नेन भवद्भिर्दूषितं तदेव भवद्भिरपि मुक्तलज्जैरनन्यगतिकत्वादाश्रयणीयमापन्नम्। नियमानङ्गीकारे च पूर्वपक्ष एव श्रेयानापद्येत। आचार्यत्वस्यादृष्टत्वेन प्रयोजनतोपपत्तेः। अर्थज्ञानार्थत्वे चाध्ययनं स्वाध्यायसंस्कारो नियोगार्थत्वे तु प्रधानकर्मेति वैरूप्यमपि स्यात्। अर्थाज्जातमर्थज्ञानं प्रयोजनं न शास्त्रत इति चेत्? आचार्यत्वमपि प्रयोजनं न स्यात् तस्याप्यर्थाज्जातत्वात्। स्मृतिबाधेन च स्नानोत्कर्षो न स्यादशास्त्रस्वीकृतत्वाद्विचारस्य।

किंच–नियोज्यः कल्पनीयोऽत्र विध्यर्थानुपपत्तितः॥
नचोपनयनस्याङ्गभावोऽस्त्यध्यापनं प्रति॥ ५॥
द्वितीयाश्रुतिसामर्थ्यात्सा माणवकसंस्क्रिया॥
तथा सत्यन्तरङ्गत्वादङ्गमध्ययनस्य तत्॥ ६॥

यत्तावन्नियोज्याऽभावादप्रयोजकत्वमध्ययनविधे-

योजनत्वमिति भावः। प्रमाणान्तरेति। "अप्राप्ते शास्त्रमर्थव"दिति न्यायात्प्रमाणान्तरसिद्धस्य न शास्त्रविषयत्वमित्यर्थः। विध्यर्थवत्त्वाय नियमाङ्गीकारे चास्मत्पक्षप्रवेश इत्याह। तत्रेति। प्रकारान्तरेण वैरूप्यमाह। अर्थेति। अर्थाज्जातमिति। शास्त्रतस्तु नियोग एव प्रयोजनं नियोगार्थत्वस्यैव शास्त्रेण बोधनादिति भावः। अशास्त्रीयत्वे चार्थज्ञानस्य तत्सिद्ध्यर्थस्य विचारस्याप्यशास्त्रीयत्वात्स्नानोत्कर्षत्वं न स्यादित्याह। स्मृतीति।

इदानीमेकदेश्युक्तानि स्वपक्षदूषणानि परिहरति। किं चेति।

रिति । तदयुक्तम् । अभावासिद्धेः । अश्रुतस्याऽपि विश्वजिदादिवत् कल्पनात्, कार्यं हि विध्यर्थः सम्बन्धिशब्दश्चायं कार्यमिति, कस्य चिद्धि किञ्चित् कार्यं भवति, न सर्वं सर्वस्य, अतः कस्येदं कार्यमित्यस्ति सम्बन्ध्यपेक्षा, साऽवश्यमध्याहृतेन केन चिन्निवर्तनीया अस्येदं कार्यमिति, यस्येदं कार्यं स एव नियोज्य इत्युच्यते ।

यद्यपि कथञ्चित् परप्रयुक्तानुष्ठानादेवात्मलाभः स्यात्, तथाऽपि न तावता कार्यत्वं सिद्ध्यति, न हि कृतिसाध्यतामात्रं कार्यत्वम् । किं तर्हि ? यत्कृतिसाध्यं कृतिं प्रति प्रधानभूतं तत् कार्यमित्युच्यते, प्राधान्यं च कृतेस्तदुद्देशेन प्रवृत्तिः, ततश्चाध्ययननियोगेन कार्येण भवताऽवश्यं पुरुषव्यापारोद्देश्येन भवितव्यम् । न चाऽसति नियोज्ये तदुद्देशेन कश्चित्प्रवर्तेत, अध्यापनविधिना हि प्रवर्त्यमानो माणवकः कथंचिदध्ययनमात्रमनुतिष्ठेन्न त्वपूर्वमुद्दिशेत्, न हि तस्य

प्रथमार्द्धं व्याचष्टे । यत्तावदिति । कल्पनामुपपादयति । कार्यं हीति । नियोज्यकल्पनां विनापि नियोगस्वरूपसिद्धिमाशङ्क्याह । यद्यपीति । परप्रयुक्तं—अध्यापनप्रयुक्तं यदनुष्ठानं तत एवाध्ययननियोगस्यात्मलाभ इत्यर्थः । कथं न सिद्ध्यत्यत आह । न हीति । अध्यापनविधेस्त्वध्यापननियोग एवोद्देश्यो नाध्ययननियोगः । अनन्यपरकृत्युद्देश्यस्यैव च कार्य्यत्वादिति भावः । अस्त्वेवं कथमेतावता नियोज्यकल्पनेत्यत आह । नचेति । अतो नियोज्यकल्पनमावश्यकमिति भावः । एतदेवोपपादयति । अध्यापनेति । अध्ययनमात्रमिति । तेन विनाऽध्याप-

तदुद्देश्यं प्रमाणाभावात्,प्रयाजाद्यपूर्वाणि दर्शपूर्णमासाऽपूर्वोपकारित्वात् तदधिकृतेन पुरुषेण तत्सिद्ध्यर्थमुद्दिश्य क्रियमाणानीति युक्तं यदसत्यपि साक्षान्नियोज्योपादाने कार्थत्वं लभन्ते, अध्ययननियोगस्य तु नान्यौपयिकत्वं यतस्तद्रूपेणोद्देश्यता स्यात् । अर्थज्ञानस्य च नियमफलत्वेन नियोगाऽनपेक्षत्वात् । तस्मादस्य कार्थत्वसिद्धये ऽवश्यं नियोज्यः कल्पनीयः।

यच्चाध्यापनविधेरुपनयनद्वारमध्ययनप्रयोजकत्वमुक्तम् । तदप्ययुक्तम् । उपनयनप्रयुक्तेरेवाभावात्, तद्द्वारेणाध्यापनप्रयुक्तिर्दूरापास्ता । क्त्वाप्रत्ययेन हि समानकर्तृकत्वमेवोच्यते तेन चैकप्रयोगता कल्प्यते, अङ्गाङ्गिभावस्त्वेकप्रयोगतावशात् कल्पनीयः, द्वितीयया तु साक्षादङ्गित्वमेवोच्यते, अतो यथा त्रिवृता यूपपरिव्याणं यूपार्थं नोपाकरणार्थम्, एवमु-

---

नविद्ध्यानिर्वाहादित्यर्थः । तस्य—माणवकस्य । असा—वध्ययननियोगः । प्रयाजापूर्ववत्कार्यत्वमाशङ्क्याह । प्रयाजादीति । अर्थज्ञानौपयिकत्वमाशङ्क्याह । अर्थेति । अध्ययनफलत्वेन तन्मात्रापेक्षत्वमिति भावः । निगमयति । तस्मादिति ।

द्वितीयार्द्धं व्याख्यातुमाह । यच्चेति । उपनयनस्याध्यापनाङ्गत्वे शेषिणा शेषप्रयुक्तिः स्यात् न त्वेवमस्तीति भावः । एवमप्यङ्गाङ्गिभावः सेत्स्यतीत्याशङ्क्याह । द्वितीययेति । तृतीयार्द्धव्याख्यानं चैतत् । वसन्तेब्राह्मणमित्यादि द्वितीययेत्यर्थः । यथा "आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोतीति" यूपपरिव्याणं यूपार्थं द्वितीयानिर्देशात्सन्निधानाच्च । एवमुपनयनं माणवकसंस्कारार्थं नाध्यापना-

पनयनमपि माणवकसंस्कारार्थं नाध्यापनार्थम् । स्मृतिगतश्च क्त्वाप्रत्ययः, प्रत्यक्षवेदगता तु वसन्ते ब्राह्मणमिति द्वितीया, अतोऽपि माणवकार्थत्वम् । भवतु माणवकसंस्कारस्तद्द्वारेण त्वध्यापनाङ्गं नाध्ययनाङ्गमिति चेत् ? मैवम् । अन्तरङ्गत्वादध्ययनस्य तादर्थ्यमेव संस्कारस्य युक्तम् । अध्ययनमपि फलवदध्यापनमपि, तयोः कस्याऽयं माणवकसंस्कारोऽङ्गं भवतु इत्यपेक्षायामध्यापनस्य पुरुषान्तरगामित्वेन बहिरङ्गत्वात् माणवकगताध्ययनार्थत्वमेव युक्तम् । यथैव ह्यध्ययनस्याऽऽचार्यकसिद्धिप्रयोजनतामनादृत्य "वेदमधीत्य स्नायात्" इति स्मार्तिं बाधित्वाऽन्तरङ्गत्वादर्थज्ञानार्थतैवाऽऽश्रीयते तथोपनयनस्याऽप्यध्ययनार्थता वेदितव्या ।

स्मरणादपि पाणिनीयादध्ययनाङ्गतैवोपनयनस्यावगम्यते । अध्ययनाङ्गतां हि स्मरन्नाचार्यकरणे नयतेरात्मनेपदं विधत्ते, अध्यापनाङ्गत्वे हि कर्त्रभि-

र्थमित्यर्थः । क्त्वाश्रुत्याऽध्यापनाङ्गत्वमिति चेत् । नेत्याह । स्मृतीति । अत्राशङ्कते । भवत्विति । परिहरति । मैवमिति । अध्ययनसमानाधिकरणत्वादुपनयनस्याध्ययनार्थत्वमेव युक्तं, न बहिरङ्गाध्यापनार्थत्वमित्यर्थः । एतदेवोपपादयितुमाह । अध्ययनमिति । इतश्चाध्ययनाङ्गमित्याह ।

स्मरणादपीति । "संमाननोत्सर्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः"(१) इति पाणिनीयसूत्रादित्यर्थः । एतदुक्तं भवति । अध्यापनाङ्गत्वे हि कर्त्रभिप्रायत्वा-

(१) १ अ. ३ पा. ३६ सू. ।

प्रायत्वात् क्रियाफलस्य ञित्वादेवात्मनेपदं सिद्ध्येत् । "उपनीय तु यः शिष्यम्" इति क्त्वाप्रत्ययो हि कथं चित् "दर्शपूर्णमासाभ्यामिष्ट्वा" इति वदसत्यप्यङ्गाङ्गिभावे ऽवकल्पते। पुनर्विधानं चाऽऽत्मनेपदस्यात्यन्तानर्थकम् । तस्मादध्ययनाङ्गमुपनयनं स्यात् ।

न तु स्यात्, तज्जन्यः संस्कारो हि माणवकसमवायी ? सत्यम् । माणवकसमवेतोऽपि न तदर्थः । कर्त्र-

---

त् क्रियाफलस्य स्वरितञित इत्यनेनैव सूत्रेण ञित्वादेवाचार्यकत्साधनेऽप्यर्थे वर्त्तमानान्नयतेरात्मनेपदं प्राप्नोतीति सम्माननादिसूत्रमनर्थकं स्यात् अतस्संमाननादिसूत्रेणाचार्यकरणे यदात्मनेपदविधानं तदकर्तृगामिन्यपि क्रियाफले यथाऽऽत्मनेपदं स्यादित्येवमर्थमिति । यथाह वृत्तिकारः "अकर्त्रभिप्रायार्थः पुनरारम्भ" इति । क्त्वाश्रुत्योपनयनस्याध्यापनाङ्गत्वमाशङ्क्याह । उपनीयेति । सूत्रस्य वाक्यत्वात्तदपेक्षया क्त्वाप्रत्ययश्रुतेर्बलीयस्त्वमिति शङ्काभिप्रायः । कालार्थसंयोगे ऽपि क्त्वाप्रत्ययोपपत्तिरिति परिहाराभिप्रायः । उपनयनाङ्गत्वे पूर्वमर्थादुक्तमेव संमाननादिसूत्रानर्थक्यमिदानीं प्रकटीकरोति । पुनरिति । वस्तुतस्तु पुनरित्यादिग्रन्थः सिद्ध्येदित्यस्यानन्तरं द्रष्टव्यः । उपनीयेत्यादिग्रन्थस्तु वेदितव्येत्यस्यानन्तरं द्रष्टव्यः । आनर्थक्यं परिहर्तुं शङ्कते । न स्यादिति । यस्मादुपनयनजन्यः संस्कारो माणवकसमवायी तस्मादकर्त्रभिप्रायार्थः पुनरारम्भोऽर्थवानित्यर्थः । परिहरति । सत्यमिति। न तदर्थः—न माणवकार्थः, यदि माणवकार्थः स्यात् तदा अकर्त्रभिप्रायार्थः पुनरारम्भोऽर्थवान् स्यात् किन्तूपनयनकर्त्रर्थः ततश्च ञित्वादेवात्मनेपदं स्यादिति भावः । ननूपनयनकर्तर्यसमवेतस्य

र्थत्वं च फलस्य कर्त्रभिप्रायत्वं, न तु तत्समवायः— अन्यथा हि "अग्नीनादधीत" इत्यात्मनेपदं न स्यात्— आधानफलस्याऽऽहवनीयत्वादेरग्निसमवेतत्वेन कर्तृसमवायाऽभावात् । इयं च स्मृतिः—"उपनीय तु यः शिष्यम्" इति, अतो बलीयसी द्वितीया श्रुतिः, तस्मान्नाध्यापनाङ्गमुपनयनमिति न तद्द्वारेणाध्यापनस्य प्रयुक्तिः ।

यच्च "उपनीतस्य व्यापारापेक्षायामुपनयनं प्रक्रम्य विहितमध्ययनं तद्व्यापारत्वेनाध्यवसीयते" इति, तदप्यबुद्धिपूर्वकम्—एवं हि वदताऽध्यापनाङ्गमध्ययनमित्युपपादितं भवति, यदा ह्यध्यापनार्थत्वेनोपनीतस्य माणकस्य तदुपयोगिव्यापारापेक्षायामध्ययनविधिरध्ययनं तदुपयोगिव्यापारतया विधत्ते—त्रैवर्णिकैरुपनीतैरध्यापनौपयिकव्यापारापेक्षैरध्ययनव्यापारः कर्तव्य इति, तदाऽपि स्पष्टमेवाध्यापनशेषोऽध्ययनमिति दूरनिरस्तमर्थज्ञानार्थत्वमिति सुनिरूपितो वाक्यार्थः ।

अथाऽध्ययनविधिरध्ययनमर्थज्ञानार्थतया विध-

संस्कारस्य कथं कर्त्रर्थत्वं तत्राह । कर्त्रर्थत्वमिति । इतश्च नाध्यापनाङ्गत्वमित्याह । इयं चेति । निगमयति । तस्मादिति । फलितमाह । इतीति ।

पूर्वपक्षोक्तं दूषणान्तरमनूद्य परिहरति । यच्चेत्यादिना । नन्वस्त्वध्यापनाङ्गमेवाध्ययनं किमेतावताऽनिष्टं स्यादत आह । इतीति । अध्यापनार्थत्वेऽध्ययनस्यार्थज्ञानार्थत्वं न स्यादित्यर्थः । ततः किमत आह । इतीति । इदानीं तन्मतेनैवार्थज्ञानार्थत्वमाशङ्क्य निराकरोति । अथेत्यादिना । तदौपयिकत्वं अध्यापनौपयिकत्वम् ।

से नाध्यापनौपयिकतया, तदाऽऽस्थ- अध्ययनस्य त-दौपयिकत्वं केन प्रमाणेन गम्यते ? नह्यत्र प्रत्यक्षादीनि क्रमन्ते । सन्निधानादिति चेत् ? न सन्निधानं नाम स्वयं प्रमाणं, शब्दस्य स्वर्थं प्रतिपादयतः सन्निध्यपेक्षा-योग्यस्वानीतिकर्तव्यता, नेत्रस्येवोन्मीलनम् । शब्दश्चेदध्यापनौपायिकतयाऽध्ययनं विदध्यात् नार्थज्ञानार्थता सिद्ध्येत् । अर्थज्ञानार्थतया विधानेऽध्यापनौपयिकता न सिद्ध्येत् । अतो नोपनयनसन्निधौ "स्वाध्यायोऽध्येतव्य" इति विहितस्याध्ययनस्योपनयनद्वाराऽध्यापनविधिना प्रयुक्तिसम्भवः ।

यदि परमध्यापनस्याध्ययनमन्तरेणाऽसम्भवात् पदार्थस्वभावेनाध्ययनमाक्षिप्यते ? तथा सत्यविहितेन लौकिकेनाध्ययनेन तत्सम्भवान्न विहितस्याध्ययनस्य नियोगतस्तत्प्रयुक्तिः । नच प्रयुक्तिलाघवादपि विहितोपजीवनम् । तदुपजीवनेऽपि प्रयुक्त्यनकेनेति । अध्ययनविधेरर्थज्ञानार्थतया विधायकत्वस्योक्तत्वादित्यर्थ इति भावः। अध्येतव्य इत्यस्य विधायकत्वमाशङ्क्याह। शब्दस्य त्विति । प्रकारान्तरेणाध्यापनप्रयुक्तिमाशङ्क्य निराकरोति ।

यदीति । तत्प्रयुक्तिरिति । तेनाध्यापनेन विहितस्यैव प्रयुक्तिर्लभ्यत इत्यर्थः । विहितप्रयुक्त्यलाभे च प्रतीयमानस्याप्यर्थस्याविवक्षितत्वादविवक्षितस्य च विचारानर्हत्वादनारभ्यमेव शास्त्रं स्यात्कथञ्चिदर्थविवक्षायां वा विधेरतत्परत्वान्न वैधत्वं विचारस्य सिद्ध्यति अवैधश्च न वैधं स्नानमुत्क्रष्टुमर्हतीति भावः । कथं चेत्यपेक्षायामाह । तदिति । लौकिकोपजीवनेऽपि प्रयुक्तिसम्भवादित्यर्थः । इतोऽप्येवमि-

वलोपात् । विहितमप्यध्ययनमध्यापनविधिनैव त्वन्मते प्रयुज्यते न स्वविधिना । तस्माल्लौकिकमेवाध्ययनमुपनीतानामध्यापनविधिराक्षिपेत् । विधिविहितमध्ययनं परप्रयुक्त्यभावादधिकं प्रकल्पयेत् । किञ्च यद्युपनयनमध्यापनाङ्गं ततोऽध्ययनविधिरर्थज्ञानार्थः सन्नाध्यापनार्थतयोपनीतैस्त्रैवर्णिकैः सम्बध्येत । येऽध्यापनार्थतयोपनीतास्त्रैवर्णिकाः तदुपयोगिव्यापारमेपक्षन्ते तेऽर्थज्ञानार्थमधीयीरन्—इत्यसम्बद्धमेव स्यात्। ततश्चोपनीतैरसम्बध्यमानोऽध्ययनविधिश्चतुर्णामपि वर्णानां स्यादिति शूद्राधिकारप्रसङ्गः । तस्मादुपनीतानां प्रयोजनापेक्षिणामध्ययनकरणिकाऽर्थज्ञानभावना विधीयत इत्यध्ययनाङ्गमेवोपनयनम् । स्वविधिप्रयुक्तं चाऽध्ययनम् । प्रपञ्चेनाऽयं पक्षो न्यायरत्नमालायां

स्याह । विहितमिति । अध्ययनविधिप्रयुक्त्यभावे च लौकिकमेवाक्षिपेदित्याह । तस्मादिति । अस्त्वेवं किमेतावताऽनिष्टं स्यादत आह विधीति । परेणाध्यापनेन या प्रयुक्तिः सा विधिविहितस्य न लभ्यत इतिकृत्वा विधिविहितमध्ययनं स्वतन्त्रमधिकारं कल्पयेदित्यर्थः । इतोऽपि नाध्यापनाङ्गमुपनयनमित्याह । किञ्चेति । नन्वस्तु नामैतदसम्बद्धमिव अध्यापनाङ्गत्वं तूपनयस्य सिद्धं तत्राह । ततश्चेति । अध्यापनाङ्गत्वे सतीत्यर्थः । अध्ययनाङ्गत्वे तु नैतद्दूषणमित्याह । तस्मादिति । यदा त्वध्ययनाङ्गमेवोपनयनं तदा न तद्द्वारेणाध्ययनस्य प्रवृत्तिः सम्भवति । न चाङ्गमाकृष्यमाणं प्रधानमाकर्षति प्रधानानामनङ्गवशवर्त्तित्वादिति । ननु नात्र मुख्यत्वेनाध्यापनविधिप्रयुक्तिर्निराकृता, नाप्यध्ययनस्य स्वविधिप्रयुक्तिरुपपादिता, उपनयनस्याध्यापना-

मेव निरस्त इत्युपरम्यते ।

तस्मात् पूर्वोक्त एव विचारःकिमदृष्टार्थमध्ययनमुताऽक्षरग्रहणादिपरम्परया ऽर्थज्ञानार्थमिति ।

कृत्वमात्रनिराकरणादत आह । प्रपञ्चेनेति ।

न निराकरणं ग्रन्थान्तरस्थमुपयुज्यते ।
अतस्तत्रत्यमेवैतत्सङ्क्षेपणोच्यते मया ॥

स्यादेतत् नियोज्याश्रवणान्नाध्ययनविधिरध्ययनस्य प्रयोजको भवितुं क्षमस्तस्मादध्यापनविधिप्रयुक्तिरङ्गीक्रियते इति । नैवम् । अध्यापनेऽपि तुल्यत्वात् । "न ह्यष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीते" त्यत्र नियोज्यः कश्चिच्छ्रुतः तदश्रवणे चाध्यापनप्रयोजकत्वमपि न सम्भवति दूरेऽध्ययनप्रयुक्तिः तत्राऽऽचार्यककामस्य नियोज्यत्वकल्पने ऽध्ययनविधावर्थज्ञानकामस्य नियोज्यत्वकल्पनं तुल्यम् । ननु ज्ञातेऽर्थे कामना स्यादज्ञाते वा, नाद्यः ज्ञाते तदनुपपत्तेः नहि ज्ञात एवार्थो ज्ञातुमिष्यते । न द्वितीयः सर्वथा बुद्ध्यनारूढेऽर्थे जिज्ञासानुपपत्तेः अतोनार्थज्ञानकामस्य नियोज्यता सम्भवतीति । नैष दोषः, केन चिद्रूपेणाऽवगतस्य केन चिद्रूपेण जिज्ञासादर्शनात् । अत्र च धर्माधर्मयोरर्थानर्थहेतुत्वमात्रेणावगतयोर्विशेषरूपेणापरिज्ञातयोर्हानोपादानाशक्तेस्तत्परिज्ञानेच्छा सम्भवतीति धर्माधर्मज्ञानकामः स्वाध्यायमधीयीतेति नियोज्यलाभः । नैमित्तिकनिषेधाधिकारयोर्यद्यपीष्टानिष्टप्राप्तिपरिहारार्थता नास्ति तथाऽपि विध्यर्थानुष्ठानसिद्ध्यर्थमेव तद्वाक्यार्थज्ञानमपेक्षितव्यम् । हन्त ! तर्हि प्रागपि वेदाध्ययनाद्धर्मजिज्ञासोपपत्तेस्तदानन्तर्यमनुपपन्नम् । न जिज्ञासाभेदात् । यथाऽऽहुः—

"जिज्ञासैकोपनीतस्य द्वितीया पठितश्रुतेः ।

ज्ञातविद्यान्तरस्यान्या या मीमांसापुरस्सरेति" ॥

अन्तिमजिज्ञासाया वेदाध्ययनानन्तर्योपपत्तिः। अत एवाऽऽह भाष्यकारः "तादृशीं तु धर्मजिज्ञासामधिकृत्याऽथशब्दं प्रयुक्तवानाचार्यो या वेदाध्ययनमन्तरेण न सम्भवति" इति(१)।

विषयभूताध्ययनफलं ज्ञानं न नियोगजन्यमिति न तत्कामस्य नियोज्यत्वं नियोगफलस्यैव नियोज्यावच्छेदकत्वादिति चेत्, तर्हि आचार्यकमपि न नियोज्यविशेषणं स्यात् तस्याऽपि विषयफलत्वात्। कश्चासावध्यापनविधिर्यत्प्रयुक्तमध्ययनं स्यात्।

"उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विज"

इत्यादिस्मृत्योपनीयाध्यापयेदाचार्यकसिद्ध्यर्थमेवंरूपं वचनमिति चेत्। एतस्याध्ययनविधिपरत्वात्। यथैवा "श्राद्धकामं याजये"दित्यादिषु याजयतेः परः श्रूयमाणोऽपि विधिर्यागपर एव, याजयेदिति प्रयोजकव्यापारवचनशब्दस्य द्रव्यार्जनार्थप्राप्तर्त्विग्व्यापारानुवादत्वस्य वक्ष्यमाणत्वात्। एवमध्यापयेदित्यध्ययनविधिपर एव नाध्यापनविधिपरः द्रव्योपायतयैव तस्य प्राप्तत्वात्। यथाहुः—

"नाध्यापनमिदं वाक्यं विधातुं क्षमते यतः।
द्रव्यार्जनार्थप्राप्तत्वाद्यच्छब्देन च सङ्गतेः" ॥

एव "मष्टवर्षं ब्राह्मणमुपनयीत, तमध्यापयीते"त्यत्रापि अष्टवर्षो ब्राह्मण उपगच्छेत्सोऽधीयीतेत्यध्ययनविधिरेव नाध्यापनविधिः। किं चाऽत्र स्मार्तवाक्यसदृशरूपं मूलमनुमीयते। इह पुनरध्यापनकर्तरि लौकिका आचार्यशब्दं प्रयुञ्जते इति सिद्धानुवादात्कथं कर्तव्यताश्रुतिरनुमातुं शक्यते।

"उपनीय ददद्वेदमाचार्यः स उदाहृत"

(१) शा. भा. १ अ. १ पा १ सू.।

इत्यप्यनुवादो नात्र क्वचिदपि विधिगन्धः । किं चा-ऽप्रवृत्तप्रवर्तनं विधेरर्थः आचार्यके तु धनाद्यर्थं स्वयमेव प्रवृत्त इति किं तद्विधिनेत्युक्तमेव । यद्यपि—

"विद्यादानेन सुमतिर्ब्रह्मलोके महीयत"

इत्यादिभिर्विद्यादानात्मकमध्यापनं फलान्तरशेषतया वि-हितं भवेत् तथाऽपि नाध्ययनस्य तत्प्रयुक्तिः तत्र सर्वत्र नियोज्याऽश्रवणात् । नियोज्यताऽपि फलसाधनत्वश्रवणाद्भ-विष्यतीति चेत् । एवं रूपाधिकारमात्रस्याध्ययनेऽपि सद्भावात्।

अत्र कश्चित् अर्थज्ञानं स्वयमपुरुषार्थत्वान्नाध्ययनस्य प्र-योजकं ज्ञानसाध्यानि त्वग्निहोत्राद्यपूर्वाणि तद्द्वारेणाऽध्ययनस्य प्रयोजकानि भवन्ति । न च तेषां ज्ञानमङ्गं श्रुत्याद्यभावात् । उपकारकमात्रं तु भवति, आचार्यकस्य त्वध्यापनमङ्गमेव । अतस्तत्स्वाङ्गद्वारेण प्रयोजकं तस्मादध्यापनविधिप्रयुक्तमध्ययन-मित्याह ।

तदयुक्तम् । यद्यपि न कर्माङ्गं ज्ञानं अध्ययनं तु ज्ञानाङ्गमेव, तेन च प्रयुज्यमानमध्ययनं शेषिप्रयुक्तमे-व भवति, अध्यापनप्रयुक्तं तु न शेषिप्रयुक्तं भवति अध्ययनस्य तदनङ्गत्वात् उपकारकमात्रत्वेनैवाङ्गीकारात् । यद्यपि ज्ञानं स्वरूपेणापुरुषार्थस्तथाऽपि कर्मानुष्ठानौ-पयिकतया पुरुषैरर्थ्यमानत्वात् पुरुषार्थो भवति आचार्यक-मपि न स्वरूपेणाभिलषितं, दक्षिणालाभसिद्ध्यर्थमेव तु पुरुषरू-पेणार्थ्यते अतो यथा तस्य प्रयोजकत्वमेवं ज्ञानस्याऽपि । अस्तु वाऽग्निहोत्राऽपूर्वमेव ज्ञानद्वारेण प्रयोजकमन्तरङ्गत्वात्, न त्व-ध्यापनं पुरुषान्तरगामित्वात् । वस्तुतस्तु तदपि न प्रयोजकं उत्तरविधिप्रयुक्तत्वे फलार्थितैव प्रवर्तिकेत्यापन्नं ततः शूद्रादे-

अथवा नाऽत्र किं चिद्विचार्यते—नावमिकन्याये-नैवाध्ययनस्याक्षरसंस्कारादिपरम्परया ऽर्थज्ञानार्थत्व-रप्यधिकारः प्रसज्येत फलार्थिताया अविशेषात् । "विद्यादानेन सुमति"रित्येतदपि पुरुषार्थप्रापकविद्यादानाभिप्रायम् । नचाध्ययनस्य पूर्वपक्षे पुरुषार्थताऽस्तीति न ब्रह्मलोकप्राप्तिफलविद्यादानविधिवशादपि तस्य प्रयुक्तिः सम्भवति । तत्सिद्धं नाध्यापनविधिप्रयुक्तमध्ययनमित्यलमतिविस्तरेण । एकदेशिमतं निराकृत्य पूर्वोक्तं स्वाभिप्रेतमेव विचारस्वरूपमुपसंहरति । तस्मादिति ।

विचारस्य पौनरुक्त्यमाशङ्क्याह । अथवेति । नन्वध्ययनस्य स्वाध्यायार्थत्वे ऽध्ययनेन स्वाध्यायं भावयेदिति वाक्यार्थः स्यात् ततश्च स्वाध्यायस्याध्ययनं प्रत्युद्देश्यत्वानुवाद्यत्वप्रधानत्वानि स्युः अध्ययनस्य तु तं प्रत्युपादेयत्वविधेयत्वगुणत्वानीति विरुद्धत्रिकद्वयम् । अध्ययनस्य पुनर्ज्ञानार्थत्वे ऽध्ययनेनार्थज्ञानं भावयेदध्ययनं च स्वाध्यायेनेति वाक्यार्थः ततश्च स्वाध्यायस्याध्ययनं प्रत्युपादेयत्वादीनि स्युः अध्ययनस्य तु तं प्रत्युद्देश्यत्वादीनीति । तथा स्वाध्यायस्यार्थज्ञानं प्रत्युपादेयत्वादीनि अध्ययनं प्रति संस्कार्यत्वेनोद्देश्यत्वादीनीति । अत्रोच्यते । न स्वाध्यायोद्देशेनाध्ययनं विधीयते नाप्यध्ययनोद्देशेन स्वाध्यायविधिः किं तु स्वाध्यायाध्ययनेन विध्यन्तरापेक्षितं सम्पादयेदित्येकरूपैव वाक्यप्रवृत्तिः अपेक्षितसम्पादनं चाध्ययनस्य स्वाध्यायसंस्कारमुखेनैवेति स्वाध्यायस्य प्राधान्यमध्ययनस्य च तच्छेषत्वमिति न वैरूप्यं एवं स्वाध्यायस्यापि न वैरूप्यं । अधीतेन स्वाध्यायेनार्थं जानीयादित्येकरूपैव वचनव्यक्त्या तत्परिहारात् । अत एव स्वाध्यायस्य संस्कार्यत्वेऽप्यर्थज्ञानं प्रत्युपादेयतया तद्गतैकत्वस्य विवक्षितत्वादेक-

सिद्धेः। नवमे हि साम्नामृगक्षराभिव्यक्तिद्वारेण स्तुत्युपयोगित्वदर्शनात् तादर्थ्यमेव नादृष्टार्थत्वमिति वक्ष्यते तेनैव न्यायेनाध्ययनस्यार्थज्ञानार्थत्वसिद्धेरध्ययनानन्तरं धर्मजिज्ञासा कर्तव्येति सिद्धमेवैतत्प्रयोजनविवक्षया सूत्रकारेणोच्यते। यदाहुः—

शाखाध्ययनेऽपि अध्ययनशास्त्रार्थनिर्वृत्तिस्सिध्यतीति शाखान्तराधिकरणे दर्शितं। कथमेकेनैव वाक्येनोभयसिद्धिरिति चेत्। न। सामवदिति ब्रूमः। यथा "साम्ना स्तुवीते"तिस्तुतौ विनियुक्तस्यापि साम्नः स्वाभाविकाक्षरसंस्कारत्वं न हीयते तद्द्वारेणैव स्तुतिसाधनत्वात्। न हि तत्रर्चो वाक्यान्तरेण विनियोगोऽस्ति। अथ च तत्संस्कारत्वमेव साम्नो भवति। एवमध्ययनस्यापि स्वाध्यायं संस्कुर्वत एवार्थज्ञानजनकत्वं नान्यथा, अत एवंजातीयकं स्वभावतः संस्काररूपमपि संस्कार्योद्देशेनाविधानादर्थकर्माभिधानमपि लभते। ननु साम्नेतिगीतिमात्रविनियोगेन चर्चो स्तुतावविनियोगात् अनङ्गभूतानां च संस्कार्यत्वानुपपत्तेः। नैवम्। सामविनियोगेनैव सामर्थ्यादृचामपि स्तोत्रविनियोगोपपत्तेः अतोऽदृष्टार्थत्वेऽप्यध्ययनविधेः नियमार्थत्वान्नानर्थक्यमिति सिद्धम्। न च क्रत्वर्थेष्वेव नियमविधिः न पुरुषार्थेष्विति वाच्यम्। पुरुषार्थेष्वपि द्रव्यार्जनादिषु नियमविध्यभ्युपगमात्। अत्र तु पूर्वोक्तन्यायेनापूर्वविधित्वे सिद्धे फलत एव नियमो भवति। तस्माज्जपयज्ञपारायणक्रतुज्ञानसिद्धिप्रयोजनमध्ययनम्। अतएव नित्यं अवश्यानुष्ठेयजपयज्ञादिसाधनत्वात्। नावमिकमेव न्यायं विवृणोति। नवमे हीति। नन्वयमर्थश्चेन्नवम एव सिद्धस्तर्हि किमर्थोऽत्र सूत्रारम्भ इत्यत आह। इति सिद्धमेवैतदिति। प्रयोजनकथनार्थमेवात्र सूत्रारम्भो न तु तद्विचारार्थ इत्यर्थः। अ-

"धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्"(१) इति ।

"नन्वत्र कस्य चिद्वेदवाक्यस्यार्थोविचार्यते" । तदप्याहुः,–

"न चाऽत्र चोदनाव्याख्या गौरवं तत्र चोदितम्"(२)॥ इति तत्सिद्धमध्ययनानन्तरं धर्मजिज्ञासा कर्तव्येति ।

स्मिन्नर्थे वार्त्तिककृत्संमतिमाह । यदाहुरिति । नात्र वेदवाक्यस्यार्थो विचार्यत इत्यत्रापि संमतिमाह । तदपीति । एतच्च प्रत्याख्यानपक्षे भाष्ययोजनार्थवार्त्तिकं । नचात्रेत्यादि । उभयव्याख्यायां हि यत्रगौरवमुक्तं न चात्र चोदना कापि व्याख्यायते सूत्रमपि चेन्न व्याख्यायेत निर्विषयमेव भाष्यं स्यात् अतो युक्तैव सूत्रव्याख्येत्यर्थः । अतो गौरवभयाद्यत्प्रत्याख्यानं तच्चोदनाव्याख्यायामिति भावः । तस्मादर्थज्ञानार्थत्वादध्ययनस्यार्थज्ञानस्य च विचारमन्तरेणासम्भवा दध्ययनानन्तरं धर्मजिज्ञासा कर्तव्येत्युपपादितमर्थं निगमयति । तत्सिद्धमिति ।

अयमत्र सूत्रार्थः— अत्राऽथशब्दस्य चत्वारोऽर्थाः आनन्तर्यमधिकारः पूर्वप्रकृतादर्थादर्थान्तरत्वं मङ्गलं च । तदत्र न तावदधिकारार्थः इच्छाया अनाधिकार्यत्वात् । अत आनन्तर्यार्थः । आनन्तर्यं च पूर्ववृत्ताद्वेदाध्ययनात् यतस्तस्मिन्सत्येव, धर्मजिज्ञासाऽवकल्पते । वेदवाक्यगतानेकविधविचारात् । तदुक्तम्—

"येन वृत्तेन जिज्ञासा विनानैवोपपद्यते ।

---

(१) श्लो. वा. श्लो. ११ । १ सू. ।
(२) श्लो. वा. श्लो. १४ १ सू. ।

तदानन्तर्यमुक्तं हि दृष्टार्थमवकल्पते ॥
सङ्कल्पादिभिरप्येषा विना सत्यं न सिद्ध्यति ।
साधारण्यात्तु ते ऽप्यत्र नोपदेश्याः कथञ्चन ॥
तस्माद्धर्मबुभुत्सायामसाधारणकारणम् ।
निर्दिष्टं सूत्रकारेष्टं तच्च नाध्ययनादृते"(श्लो.वा.सू.१श्लो.७०)॥

तथाचोक्तम्— "वेदाध्ययनमेव वेदार्थविचारात्मिकायां धर्मजिज्ञासायां दृष्टार्थं तेन विना तदनुपपत्ते"रिति । नन्वविचारितोपादाने बुद्धिपूर्वकमुपादानं न स्यात् अतोऽध्ययनात्प्रागेव जिज्ञासा युक्तेति । केनोक्तं बुद्धिपूर्वकमुपादत्त इति । कुमारहितैषिभिः पुत्रादिभिरेवाध्ययने तस्य प्रवर्तनात् । विचार्याधीयानस्तु विचारस्यानेककालसाध्यत्वादध्ययनकालातिपातादूव्रात्यतामापद्येत । नन्वेवं सति "वेदमधीत्य स्नाया"दिति स्मृतिर्बाधिता स्यान्नेति ब्रूमः पूर्वकालतामात्रे क्त्वाप्रत्ययस्मरणात् अतो वेदाध्ययनानन्तरं धर्मं विचार्य स्नास्यता न पूर्वकालता बाधिता भवति । उक्तं च— "न ह्यत्राऽऽनन्तर्यस्य वक्ता कश्चिच्छब्दोऽस्ति पूर्वकालतायां क्त्वा स्मर्यते नानन्तर्य"मिति (शा.भा.१सू.) । अथवा इण् गताविति गत्यर्थस्य धातोर्ज्ञानार्थत्वमभिप्रेत्य वेदमर्थतो ज्ञात्वा स्नायादिति व्याख्येयम् । यथाऽऽहुः—

"ग्रन्थग्रहणमात्रे च कृते स्नानं विरुद्ध्यते ।
अधीत्येत्यधिगम्येति व्याख्याने स्वविरोधिता"(श्लो.वा.९१)॥

अत्रेदं वक्तव्यं अस्तु नाम पूर्वकालतामात्रे क्त्वाप्रत्ययस्मरणं तथाऽपि लोके भुक्त्वा व्रजतीत्यादौ पौर्वापर्यविशेषरूपमानन्तर्यमेव प्रतीयते तदत्राध्ययनानन्तरमनेककालसाध्यविचारानुष्ठाने पौर्वापर्यमेव बाधितं स्यात् किमु वक्तव्यमानन्तर्यं बाधितमिति । अतोऽध्ययनानन्तरमेव द्वयमापतति गुरुकुलात्स-

मावर्तनं वेदवाक्यविचारश्चेत्यस्त्येव विरोधः । तथाऽधीत्ये-तीङोरूपे ऽस्त्येव विरोधः । इतरे हि नित्यसहचरितोऽधि-शब्द एकदेशभूतो न हि तस्य केवलस्य प्रयोगो दृष्टपूर्वः अत इङोरूपे समुदायप्रसिद्धिः इणोरूपे त्ववयवप्रसिद्धिः, सा च स-मुदायप्रसिद्धेर्दुर्बला, अधीत्येति च स्वाध्यायाध्ययनाधिकारे श्रुतत्वात्तद्विषयमेवावगम्यत इति नाधिगमार्थकल्पना युक्तेति । अथोच्येत गुरुकुलादनावृत्तस्यैव स्नानमात्रमेतददृष्टार्थं न सं-स्काररूपं विधीयते ऽतोगुरुगृह एवावस्थायानन्तरं विचारः कर्तव्य इति नास्ति विरोधः । तत्रोच्यते । ब्रह्मचारिणो हि न स्नायादित्यस्नानादिनियम उक्तः तस्यावध्यपेक्षायामधीत्य स्नायादिति विहितं स्नानमस्नानादिनियमनिवृत्तिं लक्षयति । तत्सहचरिताश्च गुरुकुलवासादय इति तन्निवृत्त्या तेषामपि निवृ-त्तिर्लक्ष्यते इत्यपेक्षितार्थविधाने स्मृतेर्दृष्टार्थत्वमितरथाऽदृष्टार्थं स्नानविधानं स्यात् । न च दृष्टे सम्भवति तद्युक्तं यथा लोके भोजनकाले स्थलमात्रसंमार्जनोपदेशोऽपि तत्सहचरितसकलज-नोपकरणसंमार्जनोपदेश एवमत्रापीति । ननु लोके कर्मार्थ-लक्षणं श्रुतिस्मृत्योस्तु यावदुपात्तमात्रविषयत्वात्सहचरितग्रहणम-न्याय्यम् ? स्यादेतद्यद्यधीत्य स्नायादितिस्मृतिः श्रुतिमूला स्यात्, न्यायमूला त्वेषा न्यायश्च सकलब्रह्मचारिधर्मनिवृत्तौ समानः । ब्रह्मचारिधर्मा हि गुरुकुलवासादयोऽध्ययनाङ्गमध्यय-नसमाप्तौ समाप्यन्ते इष्टिसमाप्ताविव व्रतमिति न्यायः । अतो-ऽस्नानानिवृत्तौ तत्सहचरितानां सर्वेषां निवृत्तिः । ननु भवतु नाम गुरुकुलनिवृत्तिरेव स्मृत्यर्थः तथापि तदुत्तरकालमध्ययन-विध्याक्षिप्तस्य विचारस्य करणान्नैव विरोधः । सत्यम् । भवे-दपि स्मृत्यनुरोधेनानन्तरं स्नानं, यदि तावन्मात्रमेव समर्प्येत किं

तु स्नानोत्तरकालमपि नानाविधानि कर्माणि स्मर्यन्ते। यदि तान्यप्यनुरुद्ध्यन्ते ततोऽत्यन्तं वेदबाधः स्यात्। न चाविदितवेदार्थः कर्माण्यनुष्ठातुमीष्टे ततः कियद्दूरमपि गत्वा ऽवश्यं स्मार्तस्य कस्य चित्पदार्थस्य बाधोऽङ्गीकर्तव्यस्तदध्ययनानन्तरं प्रथमोपनिपातिनो विरोधिनः स्नानस्यैव बाधनं युक्तम्। ननु सत्यपि विरोधे वाचनिकत्वेन स्नानस्य बलीयस्त्वान्न बाधो युक्तः धर्मजिज्ञासैव तु न्यायप्राप्ता दुर्बलत्वात् बाधितव्या। मैवम्। "स्वाध्यायोऽध्येतव्य" इति करणेतिकर्तव्यतयोर्यौगपद्यविधानेनाध्ययनविधिविरोधात्स्नायादिति स्मृतेरेव बाधः। अत एवाऽऽह भाष्यकारः "अतिक्रमिष्याम इममाम्नाय"(शा.भा.)मित्यादि। किञ्चैकस्य वेदवाक्यस्य बाधे स्मृतिरप्रमाणीभवति किं पुनस्समस्तस्यैवानर्थक्यापत्तौ। एवं च विरोधानुसारित्वाद्बाधस्य यन्मात्रमेव विरुद्ध्यते तद् बाधितव्यं, गुरुगृहपरित्यागमात्रं च धर्मजिज्ञासाविरोधि। तस्मात्तावन्मात्रमेव बाधितव्यं न तु मधुमांसादिभक्षणमपीति न तद्बाधः। यथाऽऽहुः—

"तस्माद्गुरुकुले तिष्ठन्मधुमांसाद्यवर्जयन्।
जिज्ञासेताविरुद्धत्वाद्धर्ममित्यवगम्यते" (श्लो.वा.१०१)॥

ननु मधुमांसादिभक्षणवद्दारसङ्ग्रहोऽपि विरोधाभावात्प्राप्नुयात्। न। स्नात्वा भार्यामधिगच्छेदिति स्नातकस्यैव दानग्रहणस्मरणात् सकलब्रह्मचारिधर्मनिवृत्तौ स्नातकव्यपदेशात्। तदुक्तम्—

"गुरुगेहादनावृत्तः स्नातको हि न कथ्यते।
तत्परत्वविधानाच्च न तावद्दारसङ्ग्रहः" (श्लो.वा.१०३)॥

सूत्रकारेणाऽपि योऽयमथशब्देन स्मृत्यर्थबाध उक्तः स दृष्टार्थत्वेन गुरुकुलनिवृत्त्यंशमात्रस्य नाविरुद्धस्य मधुमांसभक्ष-

णादेरिति । एतच्च प्रौढिमात्रेणोक्तमस्नातस्य मधुमांसादिभक्षणनिषेधात् समावर्तनात्पूर्वं ब्रह्मचारिव्रतपरित्यागे चावकीर्णित्वापत्तेः । अतो यावद्विचारसमाप्ति ब्रह्मचारिव्रतयुक्तेनैव भवितव्यमिति युक्तम् । ननु वेदमधीत्य स्नायादिति वाक्यादध्ययनानन्तरं गुरुगृहान्निवृत्य स्वाध्यायोऽध्येतव्य इत्यस्माच्च पुनः प्रविश्य धर्मं जिज्ञासमानो विरोधाभावान्न स्मृत्यर्थं बाधेत । मैवम् । अध्ययनविधिविरोधापत्तेरकृतार्थस्य स्मृत्या निवर्तयितुमशक्यत्वाद्विचारसहितमध्ययनं हि विध्यर्थस्तस्मिन्ननुष्ठित एव कृतार्थो भवति अकृतार्थस्य च निर्गमो ऽदृष्टार्थस्सन्ननर्थक एव स्यात् कृतार्थस्य ह्याश्रमान्तरनिवेशाय गुरुगृहान्निर्गमो दृष्ट इति । उक्तं च—

"निर्गमो हि कृतार्थस्य दृष्टार्थो गुरुवेश्मनः ।
स्मर्यते तस्य नार्थः स्यादकृतार्थस्य निर्गमे"(श्लो.वा.१०९) ॥

अतःशब्दोऽत्र हेत्वर्थो यस्मादधीतो वेदो धर्मजिज्ञासायां हेतुर्ज्ञातस्तस्मात्तदध्ययनानन्तरं धर्मो जिज्ञासितव्य इति । आनन्तर्योपदेशतद्दृष्टार्थत्वाभ्यामथशब्देनैवाध्ययनस्य जिज्ञासां प्राति हेतुत्वमुक्तं किमतश्शब्देनेति चेत् । न । आनन्तर्योपदेशाद्धि अध्ययनेन धर्मज्ञाने योग्योभवतीत्येतावदेवाथशब्देनोक्तं स्यात् न त्वनुष्ठानहेतुत्वमतस्तद्वक्तुमतश्शब्द इति । यथाऽऽहुः—

"योग्यत्वमथशब्देन यद्यपि प्रतिपादितम् ।
तदेव हेतुरत्रेति नातःशब्दाद्विना भवेत्"(श्लो.वा.१११) ॥

अयं श्लोकाऽभिप्रायः स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिरेवेतिकर्तव्यताभूतस्य धर्मविचारस्योत्पादकोऽनुष्ठापकश्च तत्रोत्पत्तावथशब्देनाध्ययनस्य हेतुत्वमुक्तम् ।दर्शितं चैतत् "तस्मिन् हि सति साऽवकल्पत"(शा.भा.) इति। अतश्शब्दोऽप्यध्ययनवि-

धेरेव धर्मजिज्ञासां प्रति अनुष्ठापकत्वलक्षणप्रयोजकत्वमाहेति । अकथ्यमाने तु धर्मजिज्ञासां प्रत्यध्ययनविधेरनुष्ठापकत्वे फलार्थताऽप्यनुष्ठापकत्वेनाशङ्क्येत सा च शूद्रेऽपि सम्भवात्तस्यापि विचारं प्रयुञ्जीत, अतोऽध्ययनविधिरेव विचारस्य प्रयोजक इति वक्तुमतश्शब्द इति । अथवा जिज्ञासाहेतुत्वेऽप्यध्ययनस्याथशब्देनैव प्रतिपादिते ऽप्यध्ययनविधिप्रयुक्तोऽयं विचारोऽनन्तरमेव स्मृत्यर्थबाधेन कर्तव्य इत्यत्र न किञ्चित्प्रमाणमित्याशङ्कायां प्रयोगवचनचोदितयौगपद्यपर्यालोचनयाऽध्ययनस्यैव स्नानबाधं प्रति हेतुत्वमतश्शब्द आह- अध्ययनानन्तरं स्नानं न कर्तव्यं तदाक्षिप्तविचारणविरोधादिति ॥

धर्मस्य जिज्ञासा धर्मजिज्ञासा । नन्वत्र "धर्माय जिज्ञासा धर्मजिज्ञासा" इति भाष्यकार आह तत्कथं षष्ठीसमासः ? । उच्यते । नाऽत्र भाष्यकारस्य चतुर्थीसमासोऽत्राभिप्रेतः किन्तु षष्ठीसमास एव चतुर्थीसमासानुपपत्तेः । यत्र हि तादर्थ्ये चतुर्थीसमासो भवति तत्र विकृतिरेव चतुर्थ्यन्ता प्रकृत्या समस्यते यथा यूपाय दार्विति । अप्रकृतिविकारयोस्तु न समासो यथा रन्धनाय स्थाली अवहननायोलूखलमिति । अत एवाह वार्तिककारः "तादर्थ्यसमासे प्रकृतिविकृतिग्रहणं कर्तव्य"मिति । नचेदं सामर्थ्यप्रदर्शनपरं अतोऽप्रकृतिविकारयोरपि यत्र सामर्थ्यं तत्र समासोभवत्येव धर्मजिज्ञासापदेऽपि सामर्थ्यस्य विद्यमानत्वाद्युक्तस्तादर्थ्यसमास इति वाच्यम् । "समर्थः पदविधि"रित्यनेनैव सिद्धत्वात् बलिहितसुखरक्षितग्रहणानर्थक्यप्रसङ्गाच्च । रन्धनाय स्थालीत्यादिषु समासप्रसङ्गाच्च । न चाऽत्र धर्मो जिज्ञासाविकारस्तस्माद्समासः । तदुक्तम्—

"प्रकृत्या विकृतिर्यस्माच्चतुर्थ्यन्तात् समस्यते ।

तादर्थ्ये यूपदार्वादौ तेनाऽस्मिन्न समासता"(श्लो.वा.११८)॥

अतो नाऽयं चतुर्थीसमासः किन्त्वश्वघासादिवत् षष्ठीसमास एव। अत एव भाष्यकारः "सा हि तस्य ज्ञातुमिच्छा" इति षष्ठ्यन्तेन विगृह्णाति। कथं तर्हि धर्माय जिज्ञासेति विग्रहवचनं? नेदं विग्रहवचनं किन्तु षष्ठ्यर्थविशेषप्रदर्शनार्थम्। तदुक्तम्।

"सा हि तस्येत्यनेनोक्तो धर्मस्येत्येष विग्रहः।
धर्मायेति तु तादर्थ्ये षष्ठी वृत्तेति कथ्यते"(श्लो.वा.११९) ॥

यदाह भट्टोंवेकः "धर्माय जिज्ञासेति विगृहीतषष्ठ्यर्थपरं भाष्यम्। ननु तादर्थ्यलक्षणसम्बन्धविशेषविवक्षायां तादर्थ्ये चतुर्थ्युपसङ्ख्यानमिति चतुर्थ्येव प्राप्नोति तत्र च समासानुपपत्तिः सम्बन्धमात्रविवक्षायान्तु तादर्थ्यकथनमसम्बद्धम्। अत्रोच्यते सूत्रकारेणाऽत्र सम्बन्धसामान्यविवक्षयैव धर्मजिज्ञासेति षष्ठीसमासः प्रयुक्तो निर्विशेषसामान्यानुपपत्तेस्तु तादर्थ्यरूपविशेषनिष्ठता धर्मायेति भाष्येण दर्शितेति न कश्चिद्दोषः। धर्मजिज्ञासेत्यत्र कर्तव्येति शेषः।

अत्र केचित्– न चाऽत्र ज्ञातुमिच्छा जिज्ञासा इच्छाया अकर्तव्यत्वात्। सामान्यतो ज्ञाते विशेषजिज्ञासा विचारं विना न सम्भवतीत्यन्तर्णीतविचारजिज्ञासापदसामर्थ्याद्वेदाध्ययनानन्तरं तद्धेतुको धर्मविचारः कर्तव्य इति प्रतिज्ञासूत्रार्थस्सम्पद्यत इत्याहुस्तन्न युक्तिसहमिव। "सा हि तस्य ज्ञातुमिच्छेति" भाष्यविरोधात्। न चेच्छायाः कर्तव्यत्वानुपपत्तिः बुभुक्षावदुपपत्तेः दृश्यते च मन्दाग्नीनामपि भेषजादिनाऽपि तत्कर्तव्यता। न चेच्छाया इच्छाविषयत्वाभावात्कर्तव्यत्वानुपपत्तिः मन्दाग्नीनां भोजनेच्छायामिच्छादर्शनात्। अत एव भाष्यकारेण "धर्मं जिज्ञासितुमिच्छे"दिति

सा चतुर्विधा—धर्मस्वरूपप्रमाणसाधनफलैः ।

नन्वध्ययनाविधिना वेदवाक्यार्थविचारमात्राक्षेपाद्धर्मस्वरूपप्रमाणाजिज्ञासयोः कः प्रसङ्गः ? । उच्यते– उपोद्घातत्वात्प्रसङ्गः, यदि हि वेदवाक्यार्थो धर्मः स्यात् वेदश्च प्रमाणं ततोऽसौ विचारः कर्तव्यो भवति । इतरथा काकदन्तपरीक्षावत् स्यात् । तदध्ययनविधिरेव प्रमाणादिविचारमाक्षिपति । धर्मग्रहणं

धर्मजिज्ञासां कर्तुमिच्छेदिति धर्मज्ञानेच्छानिर्वृत्त्यर्थं द्वितीयेच्छोपात्ता, इच्छोपदेशेनाऽपि च कर्तव्यतोपदिष्टा भवत्येव तत्पूर्वभावित्वादिच्छायाः । उक्तं च व्याख्यातृभिः "अनुपात्तमपीच्छारूपं सूत्रकृता सूत्रितेच्छाभिनिर्वृत्त्यर्थं भाष्यकृतोक्तमिच्छेदिति । तदाह—

"सूत्रितेच्छाभिनिर्वृत्त्यै द्वितीयेच्छाऽत्र सूत्रिता"(श्लो.वा.११७)।

जिज्ञासापदस्य विचारवाचित्वे तु न का चिदनुपपत्तिः ।

एवं तावत्सूत्रार्थमुपपाद्य सम्प्रति सूत्रोपात्तजिज्ञासाभेदं दर्शयति । सेति । यदाह भाष्यकारः "स कथं जिज्ञासितव्यः ? को धर्मः ? कथं लक्षणकः ? कान्यस्य साधनानि ? कानि साधनाभासानि ? किंफलश्चेति ? । साधनाभासशब्दश्चात्र वार्तिककारैर्व्याख्यातः । तथाहि—

"अन्यसाधनमन्यस्य साधनाभास उच्यते ।
क्रत्वर्थं पुरुषार्थस्य तदर्थं च क्रतो"रिति (श्लो.वा.१२२)॥

प्रसङ्गाभावादाद्यं जिज्ञासाद्वयमाक्षिपति । नन्विति । समाधत्ते । उच्यते इति । उपोद्घातत्वं विवृणोति । यदीति । प्रसङ्गादधर्मजिज्ञासामप्युपक्षिपति । धर्मेति । एतस्य प्रतिज्ञासूत्रत्वेऽपि ग्रन्थान्तरोक्तरीत्याऽधिकरणमेवं व्याख्येयम् । तथाहि–

चोपलक्षणार्थम्- अधर्मस्यापि हानाय जिज्ञास्यत्वात् । अकारप्रश्लेषेण वा सूत्रमधर्मजिज्ञासायामपि व्याख्येयमिति निरवद्यम् ।

"स्वाध्यायोऽध्येतव्य इत्यस्य विधानस्य प्रयुक्तितः ।
विचारशास्त्रं नारभ्यमारभ्यं वेति संशयः ॥
अर्थधीहेतुताऽधीतेर्लोकसिद्धाऽवघातवत् ।
नियामकं न चैवातो वैधारम्भो न सम्भवी ॥
दर्शापूर्ववदस्त्यत्र क्रत्वपूर्वं नियामकम् ।
अर्थनिर्णायकं शास्त्रमत आरभ्यतां विधेः" इति ॥

ननु प्रसिद्धश्चेद्धर्मो न जिज्ञास्यः प्रसिद्धे ज्ञानेच्छाऽभावात् । अथाप्रसिद्धो न तरां । तदेतदनर्थकं धर्मजिज्ञासाप्रकरणम् । उक्तं च--

"प्रसिद्धः शक्यते ज्ञातुं प्रसिद्धत्वात्तु नेष्यते ।
अप्रसिद्धस्त्वशक्यत्वात् न तरामित्यतोऽब्रवीत्"(श्लो.वा.१२४)॥

उच्यते । सन्दिग्धत्वं सप्रयोजनत्वं च विचाराक्षेपे कारणद्वयमुक्तं, धर्मश्च तथा, तस्मादयमपि जिज्ञास्यः । केचिच्चैत्यवन्दनादिकं धर्ममामनन्ति, अपरे ऽग्निहोत्रादिरूपं, तत्र विचारं विनैव प्रवर्तमानो यं कञ्चिदेवोपाददानो विहन्येतानर्थं च प्राप्नुयात् । निःश्रेयससाधनत्वाच्च सप्रयोजनत्वं धर्मस्य सकलजनसिद्धं तस्माद्धर्मो जिज्ञास्य इति । तदुक्तम्--

"जिज्ञास्यः संशयाद्धर्मः श्रेयस्करतयाऽपि च ।
असन्दिग्धो ह्यजिज्ञास्यो यो वा स्यान्निष्प्रयोजनः"(श्लो.वा.१२५)॥

अतस्तन्निर्णयार्थं शास्त्रमारब्धव्यम् ।

एवमथातोधर्मजिज्ञासेत्यनेन शास्त्रारम्भमुपपाद्येदानीं शा-

---

१ जैमिनीयन्यायमाला १ अ० १ पा० १ अ० ।

(द्वितीयं धर्मलक्षणाधिकरणम्)

सू० चोदनालक्षणोऽर्थो धर्मः* ॥ २ ॥

प्रथमं तावत्को धर्मः ? कथं लक्षणकः ? इत्येतद्द्वयमनेन सूत्रेण श्रुत्यर्थाभ्यां निरूप्यते—यो धर्मः स चोदनालक्षणः चोदनैव तस्य लक्षणं प्रमाणं चोदना च तस्य लक्षणमेवेति श्रुत्या प्रमाणविधानार्थाच्चोदनागम्य एवाग्निहोत्रादिर्धर्मो नाऽतल्लक्षणश्चैत्यवन्दनादिरिति स्वरूपमपि सिद्ध्यति । तथा यश्चोदनालक्षणः स धर्म इति स्वरूपविधानार्थात् प्रमाणसिद्धिर्वेदितव्या ।

सूत्रमारभते । "चोदनालक्षणोऽर्थो धर्म" इति । सूत्रतात्पर्यमाह । प्रथममिति । एतद्द्वयं धर्मस्य स्वरूपं प्रमाणं चेत्यर्थः । किं श्रुत्या किं चाऽर्थाद्गम्यत इत्याकाङ्क्षायां वचनव्यक्तिभेदेन तद्दर्शयति । यो धर्म इति । ननु स्वरूपविशेषेऽपेक्षिते प्रमाणविशेषविधानमसङ्गतमित्यत आह । स्वरूपमपीति । धर्मपदार्थस्येदं प्रमाणमित्युक्ते प्रमाणायत्तत्वात्प्रमेयसिद्धेरर्थादिदमुक्तं भवति । यच्चोदनाप्रवेदितं तद्धर्मस्वरूपमिति । ननु यदि प्रमाणान्तरानवगम्यो धर्मः कथमनूद्यते अप्रमाणसिद्धस्यानुवादासम्भवात् । प्रमाणान्तरप्रमेयत्वे तु चोदनैव प्रमाणमेवेति विधानं विरुद्ध्यते । सामान्यतः सिद्धस्यानुवाद इति चेत् । न । निर्मूलायास्सामान्यसिद्धेरसंभवात् । लोकप्रसिद्धिर्मूलमिति चेत् । प्रत्यक्षादिप्रमाणातिरिक्ताया लोकप्रसिद्धेरसम्भवात् विचित्रानेकप्रकारत्वाच्च लोकप्रसिद्धे र्न तया धर्मसिद्धिः । नाप्यर्थापत्तिः

* चोदनैव लक्षणं प्रमाणं यस्य स्वरूपाधिगमे सोऽर्थः—बलवदनिष्टाननुबन्धीष्टसाधनं धर्म इति सूत्रार्थः ।

कश्चित्त्वाह—कार्यरूपो वेदार्थो न सिद्धरूप इ-

जगद्वैचित्र्यस्य स्वभावादेवोपपत्तेः। प्रमाणान्तरसिद्धे च वस्तुनि चोदनाया अनुवादकत्वापत्तेः। धर्मानुवादेन चोदनाप्रमाणविधौ चार्थपदस्यानन्वयप्रसङ्गः। नहि तदाऽनर्थस्य धर्मत्वं प्राप्तं यन्निवर्त्येत। नाऽपि सामान्यतो धर्मे चोदना प्रमाणत्वेन विधातुं शक्यते तस्याः शब्दान्तरावसितभेदाग्निहोत्रादिधर्मविशेषविषयत्वात्। अत्रोच्यते। ज्योतिष्टोमाऽदयस्तावत्क्रियाविशेषा धर्मत्वेन कार्यतया स्मर्यन्ते। वक्ष्यति च "यो यागमनुतिष्ठति तं धार्मिकमिति हि समाचक्षते (शा. भा.)। तत्र निर्मूलमेवेदं स्मरणमिति चार्वाकाः। योगिप्रत्यक्षमूलमिति वैशेषिकाद्यः। एवं चानेकधा मूलविप्रतिपत्तौ प्रत्यक्षाद्यनुप्रवेशव्यवच्छेदेन चोदना प्रमाणत्वेन प्रतिज्ञायते "चोदनैव तत्र प्रमाण"मिति। चोदनाया एव विधानान्नात्र प्रमाणान्तरसिद्धता सम्भवति अतो यथा मन्वादिस्मरणप्रतिभासिन्यष्टकादौ चोदना मूलमिति वक्ष्यति तथेहापि च द्रष्टव्यम्। मूलविशेषानवधारणाभिप्रायं चैतत् वार्तिकम् —

"धर्मे सामान्यतः सिद्धे प्रमाणं चोदनोच्यत' (श्लो. वा. सू. २) इति।

न चाऽर्थपदानन्वयः एतद्वचनव्यक्तिसाधनत्वेनार्थवत्वात् अर्थपदाभावे हि यश्चोदनालक्षणस्स धर्म इति वचनव्यक्तिः सम्भाव्येत। अस्यां च श्येनादेरनर्थस्यापि धर्मत्वमापद्येत चोदनालक्षणत्वात् नित्यानुवादभूते त्वर्थग्रहणे नेयं वचनव्यक्तिः सम्भवति॥

प्रसङ्गादेकदेशिकृतं सूत्रार्थवर्णनं दूषयितुमुपन्यस्यति—

कश्चित्त्विति। कथमनेन सूत्रेणाऽयमर्थ उच्यते ऽत आह

त्येतदनेन सूत्रेणोच्यते, चोदनालक्षणशब्देन कार्यमुच्यते, धर्मशब्देन वेदार्थ इति।

तदयुक्तम्—यानि तावद्विधिवाक्यानि तेषां विधावेव प्रामाण्यं वस्तुस्वरूपे चाऽप्रामाण्यं त्विस्पष्टमेवेति न तत्र किञ्चिद्वक्तव्यम्। क्षेपिष्ठादिवाक्यानामपि विध्येकवाक्यतया तत्रैव प्रामाण्यम्। मन्त्राणामपि प्रकरणेन प्रधानविधिशेषत्वं द्वितीयपादे वक्ष्यत इति न तत्राऽपि किञ्चिद्वक्तव्यमस्ति। तेन कस्याऽत्र सिद्धार्थतां निरस्य कार्यार्थतोच्यते?। "अविनाशी वा अरे अयमात्मा" इत्यादीनामुपनिषद्वाक्यानामिति चेत्? न, तेषामपि यदि विध्येकवाक्यत्वमस्ति ततोऽर्थवादाधिकरणेन गतम्, अथ नास्ति? कथं तेषां कार्यार्थता स्यात्?।

अथ तेषां विध्यश्रवणाद्विध्यन्तरेणैकवाक्यत्वाभावाच्च कार्यार्थत्वानुपपत्तेर्व्युत्पत्तिविरहाच्च सिद्धार्थे प्रामाण्याऽयोगादप्रामाण्यमेवाभिमतम्?। किमिदानीमात्मादिवाक्यानामप्रामाण्यप्रतिपादनपरमिदं सूत्रम्? सुव्याहृतं तर्हि शास्त्रारम्भे प्रथमं तावत्सूत्रकारोऽप्रामाण्यमेव वेदवाक्यानां प्रतिपादयतीति।

कथं च कार्ये एव प्रामाण्यम्?। तत्रैव व्युत्पत्तेः—

चोदनेति। दूषयति। तदिति। गूढाभिप्रायमाशङ्क्य निराकरोति। अथेति। येषां कार्यार्थत्वानुपपत्तिस्तेषामप्रामाण्यमेव सूत्रकारस्याभिमतमिति भावः। एतदेव दूषयितुं पृच्छति। कथमिति। उत्तरमाह। तत्रैवेति। व्युत्पत्तेः— सङ्केतग्रहात्।

प्रवृत्त्यधीना हि व्युत्पत्तिः, सा च कार्यावगमाधीनेति व्युत्पत्तिरपि तत्रैव भवतीति चेत् ? नावश्यं प्रवृत्त्यधीनैव व्युत्पत्तिः—काष्ठैः स्थाल्यामोदनं पचतीत्यादिवर्तमानापदेशेष्वपि प्रसिद्धतृतीयार्थानामप्रसिद्धकाष्ठप्रातिपदिकार्थानां च पुरुषाणां काष्ठार्थे व्युत्पत्तिदर्शनात्।

अथ प्रथमव्युत्पत्तिः कार्यविषयैव—नहि तदा शब्दान्तरवशेन शब्दान्तरस्याऽर्थे व्युत्पत्तिः सम्भवति सर्वस्य धर्मस्याऽप्रसिद्धत्वादिति चेत् ? । अस्त्वेवम्, तथाऽपि पश्चाद्बहुशः सिद्धार्थे शब्दप्रयोगदर्शनात् कोऽयं राजा ? पाञ्चाल इत्यादिषु प्रश्नप्रतिवचनादिषु कार्यस्य व्यभिचारादव्यभिचार्यर्थमात्रं वाच्यमिति सुज्ञानम्। यथैव हि कस्यां चिद्व्यक्तौ प्रथमं गोशब्दस्य प्रयोगदर्शनात् सैव वाच्येत्यवगमे सत्यपि पश्चाद्व्यक्त्यन्तरे प्रयोगं दृष्ट्वा पूर्वव्यक्तिव्यभिचारादव्यभिचारिसामान्यमेवार्थ इत्यध्यवसीयते तथा कार्यपरतामवगतामपि पश्चात्सिद्धार्थप्रयोगदर्शनेन बाधित्वाऽर्थमात्रमेवाव्यभिचाराद्वाच्यमिति युक्तम्।

किञ्च प्रथमव्युत्पत्तौ कतिपयानामेव शब्दानां कार्यार्थत्वमवगतं न सर्वशब्दानामतः पश्चाद्व्युत्पाद्यमानस्य काष्ठादेः सिद्धार्थे व्युत्पत्तिः केन वार्यते। न च व्युत्पत्तौ शब्दानां पौर्वापर्यनियमोऽस्ति, अतः

एतदेवोपपादयति। प्रवृत्त्यधीनेति । उत्तरं निराकरोति। नाऽवश्यमिति । विशेषं शङ्कते। प्रथमेति। परिहरति। अस्त्विति। इतश्च न कार्य एव प्रथमव्युत्पत्तिरित्याह— किं चेति।

सर्वं शब्दाः पश्चाद्व्युत्पाद्यमानाः कैश्चित्सिद्धार्था भवन्ति । सर्वेषां तु कार्यार्थत्वे सिद्धार्थपरेषु लौकिकवाक्येषु सर्वशब्दानां लाक्षणिकत्वान्न कश्चिदन्विताभिधायी स्यात् । तत्राऽन्वितप्रतीतिः कथं सिद्ध्येत् ? । वक्तृज्ञानानुमानादिति चेत् ? न, यद्विषयं हि वाक्यं तद्विषयमेव वक्तृज्ञानमनुमातव्यम् । न चाऽन्वितप्रतिपादकं वाक्यमुच्चारितमिति कथमन्वितज्ञानानुमानम् ? ।

अथार्थस्वरूपस्मारकैः पदैरन्वितज्ञानमनुमीयते ?, ततः कार्यवाचकेऽप्यासिद्धेरन्विताभिधानं न स्यात् ।

किञ्च प्रथममेव कार्यव्यभिचारः शक्योऽवगन्तुम्—यदा हि पुत्रस्ते जात इत्युक्तस्य कस्य चिन्मुखविकासं पार्श्वस्थः पश्यति तदा हर्षहेतुरनेन शब्देन प्रतिपादित इति हर्षहेतुभूतसिद्धार्थप्रतिपादने शब्दस्य सामर्थ्यं कल्पयति । यद्यपि च तदानीमर्थविशेषो न ज्ञायते हर्षहेतूनां बहूनां सम्भवात् । तथाऽपि सिद्धार्थता तावदवगता, तावतापि कार्ये व्याभिचारः सिद्धः । किं च बहुशः पुत्रजनने सति एवं शब्दप्रयोगादऽन्येषु हर्षहेतुष्वप्रयोगात् पुत्रजननरूपार्थविशेषोऽपि सुज्ञान एव ।

किं च प्रवृत्त्यधीनापि व्युत्पत्तिर्नावश्यं कार्यविषयैव भवति, तथा हि—यदा कश्चित् प्रवृत्तावऽत्यन्तासमर्थं वृद्धमाऽऽतुरं वा प्रति विनोदार्थं वाक्यं प्रयुङ्क्ते 'नद्यास्तीरे पञ्च फलानि सन्ति' इति, तत्रान्यो दैवसङ्गतः कश्चिदर्थी तद्वाक्यमर्थाच्छ्रुत्वा नदीतीरं गत्वा फलान्याहरति, एतत्सर्वं पश्यन्नन्यो व्युत्पित्सुः

---

(१) ष्वपिसिद्धेरिति पु० पा० ।

फलसद्भावप्रतिपादने शब्दस्य सामर्थ्यं व्युत्पद्यते, तस्मान्नैकान्ततः कार्यार्थता शब्दानाम् ।

का चास्य सूत्रस्य वचनव्यक्तिः? यदि तावत् 'यत्कार्यं तद्वेदार्थ एव' इति कार्यमुद्दिश्य वेदार्थता विधीयते, तथा सति—उद्देश्यस्योपादेयेन स्वरसनियमात्सर्वस्य लौकिकस्यापि गवानयनादिकार्यस्य वेदार्थता स्यात् । किं चोपादेयस्य वेदार्थस्योद्देश्येन कार्यरूपेणाग्नेरिव धूमेनाव्याप्तेरऽकार्येऽपि वेदस्य प्रामाण्यमनिरस्तं स्यात् ।

अथ 'यो वेदार्थः स कार्यरूप एव' इति' ततो यो धर्मः स चोदनालक्षण इति वचनव्यक्तिः स्यात्, तत्रार्थशब्दोऽभ्युदयवाची कस्य विशेषणम् ?, यद्युपादेयस्य चोदनालक्षणपदार्थस्य ? ततः सर्वस्य वेदार्थस्य कार्यत्वमर्थत्वं च विधीयते इति श्येनादिनियोगानामप्यर्थत्वं स्यात् ।

अथोद्देश्यवेदार्थविशेषणम्?, ततोऽयमर्थो भवति- योऽर्थात्मकः—अभ्युदयात्मको वेदार्थः स कार्यरूपः, ततश्च श्येनादिनियोगानां निषिद्धफलत्वेनाऽनभ्युदयरूपाणां कार्यता न स्यात् ।

दूषणमुपसंहरति । तस्मादिति । वचनव्यक्त्यसम्भवेनापि तद्व्याख्यानं दूषयति । का चेति । तत इति । सूत्रगतधर्मशब्दस्य वेदार्थपरत्वादेवं वचनव्यक्तिः पर्यवस्यतीत्यर्थः । ततः किमत आह । तत्रेति । अभ्युदयः प्रयोजनम् । श्येनादीनामपि वेदार्थत्वेनोद्देश्यत्वात्तत्राऽप्यर्थत्वं विधेयमित्यर्थः । ततश्चेति । योऽर्थरूपो वेदार्थस्तस्यैव कार्यताविधानादिति, भावः ।

मा भूदिति चेत् ? न, तेषामपि लिङा कार्यताऽवगमात्। श्येनयागस्य कार्यता निवारयितुं शक्यते न नियोगस्य, तस्य कार्यैकस्वभावत्वात्। असति च कार्यत्वे श्येनवाक्यस्य कार्यार्थत्वाऽभावात् सिद्धार्थतैव वक्तव्या स्यात्, न च तथा सम्भवति विधिप्रत्यययोगात्। सिद्धे चार्थे व्युत्पत्तिविरहादप्रामाण्यमेव श्येनादिवाक्यानां स्यात्।

अथ पूर्वसूत्राद्वेदार्थपरं धर्मपदमनुषज्य 'चोदनालक्षणो वेदार्थः' इत्येकं वाक्यम् 'अर्थो धर्मः' इत्यपरं वाक्यम्। तदिदं स्वप्रज्ञाविलसितमात्रम्, अनुषङ्गवाक्यभेदयोर्विना फलमाश्रयणात्। अप्रतिज्ञातस्य च धर्मस्य लक्षणमसङ्गतम्।

अथ प्रतिज्ञातस्यैव वेदार्थस्य कार्यत्वसिद्धये धर्मत्वमुच्यते ?। किं कार्य एव धर्मरूपो वेदार्थः स एव जिज्ञास्यो नान्यः ?, तथा चेत् ? य एव जिज्ञास्यो धर्मस्तस्यैव सूत्राक्षराविनाशेन जिज्ञासा प्रतिज्ञातऽयेति वेदार्थप्रतिज्ञावचनमर्थकम्।

इष्टापत्तिं शङ्कते। मा भूदिति। तेषामपीति। श्येनादिनियोगानामपीत्यर्थः। कार्यत्वानङ्गीकारे दोषमाह। असतीति। सिद्धे चेति। तन्मते व्युत्पत्तिविरहादित्यर्थः। प्रकारान्तरेणाशङ्क्य निराकरोति। अथेति। प्रतिज्ञातस्येति। प्रतिज्ञासूत्रगतधर्मपदस्य वेदार्थपरत्वात् वेदार्थस्यैव तत्र प्रतिज्ञा न धर्मस्येति भावः। धर्मत्वमुच्यत इति। धर्मशब्देन प्रतिज्ञातं वेदार्थमुद्दिश्य चोदनालक्षणशब्देन तस्य कार्यत्व उक्ते कस्मात्कार्य इत्यपेक्षायां तस्य कार्यत्वसिद्धयेऽर्थपदेन धर्मत्वमुच्यत इत्यर्थः।

अथ त्वर्थशब्दमनादृत्य यो वेदार्थः स कार्यरूप इत्युच्यते ?, ततोऽर्थपदमनर्थकं वस्तुमात्रपर्यायमनुवादकं स्यात्। अनर्थव्युदासार्थता चास्य भाष्यकारेणोक्ता, तस्माद्विशेषणमेवैतत्। विशेषणत्वे चाभ्युदयरूपस्य वेदार्थस्य कार्यत्वाभिधानादऽनभ्युदयरूपस्य वेदार्थस्य कार्यत्वं न स्यादिति सर्वस्य वेदस्य कार्य एव प्रामाण्यमिति नियमो न स्यात्। ततश्च "अविनाशी वा अरे अयमात्मा" इत्यादीनामात्मस्वरूपपरत्वं न निराकर्तव्यमित्यास्तां तावत्। तस्माद्धर्मस्वरूपप्रमाणप्रतिपादनार्थमेवेदं सूत्रम्।

तदिह धर्मं विषयीकृत्य चिन्त्यते—किमस्य न किंचित् प्रमाणमस्ति ? किं वा प्रत्यक्षादिकमेव प्रमाणम् ? उत चोदनैव ? अथ वा विकल्पः ? अथ वा समुच्चय ?

आद्य इति। धर्मरूपो वेदार्थो जिज्ञास्य इत्यत्र धर्मस्यार्थत्वात्स एव जिज्ञास्य एवं च सूत्राक्षरविनाशो न भवति वेदार्थपरत्वे तु धर्मपदस्य तद्विनाश इत्यर्थः। आनर्थक्याङ्गीकारे च भाष्यविरोध इत्याह। अनर्थेति। ततश्चेति। नियमाभाव इत्यर्थः। अतोऽस्मदुक्त एव सूत्रार्थो युक्त इत्याह। तस्मादिति। उक्तं च—

"द्वयमेकेन सूत्रेण श्रुत्यर्थाभ्यां निरूप्यते"।

स्वरूपेऽपि हि तस्योक्ते प्रमाणं कथ्यतेऽर्थतः"(श्लो.वा.२)

एवं तावत्सूत्रतात्पर्यमुक्त्वा सम्प्रति सूत्रसूचितं विचारस्वरूपं दर्शयति। तदिहेति। ननु प्रतिज्ञासूत्रेऽनुपपन्नोयं विचारः पुनरुक्तश्च सदौत्पत्तिकसूत्राभ्यामस्यार्थस्य वक्ष्यमाणत्वात्। नापि प्रतिज्ञोपपत्तिः। सम्भवदर्थविषयं हि वाक्यं प्रतिज्ञोच्यते। न चायमर्थः सम्भवति यत्प्रत्यक्षायोग्यं वस्तु तत्र वाक्यं प्रमाणमिति।

इति। तत्र शब्दस्य प्रमाणान्तरप्राप्तप्रापकत्वेन स्वयमप्रमाणत्वात् प्रत्यक्षादीनां चाऽसामर्थ्यादप्रमाणको धर्म इत्येकः पक्षः, प्रत्यक्षादिगम्य एवेत्येकः पक्षः, योगिनां प्रत्यक्षगम्यः, अर्वाचीनानां तु चोदनागम्य इत्यपरः, जगद्वैचित्र्यार्थापत्त्या किमप्यदृष्टमस्तीति सामान्येन प्रसिद्धो धर्मश्चोदनयाऽग्निहोत्रादिविशेषरूपेण गम्यते तस्मात्समुच्चय इति पक्षान्तरम्, चोदनैव सा च प्रमाणमेवेति सिद्धान्तः। तदिह चोदनैव प्रमाणं सा च प्रमाणमेवेत्यवधारणद्वयं प्रतिज्ञायते।

निमित्तसूत्रे तु प्रथमद्वितीयसूत्रमात्रालोचनया वेदो धर्ममूलमित्यादिवदुपदेशशास्त्रताशङ्का मा भूदिति परीक्षाशास्त्रमेवेदमिति ज्ञापयितुं परीक्षाप्रतिज्ञानम्। यद्यपि चोपरितनव्यापारादेव परीक्षाशास्त्रत्वं गम्यते तथापि वक्ष्यमाणमेव श्रोतृबुद्धिसमाधानाय कीर्तितम्।

प्रत्यक्षसूत्रे तु प्रत्यक्षस्य विद्यमानोपलम्भनत्वात् भविष्यति धर्मे प्रामाण्याऽसंभवात् तत्पूर्वकत्वेनेतरेषामप्यप्रामाण्यात् प्रमाणान्तर—नियम—विकल्प-

---

उच्यते। वक्ष्यमाणोऽप्यर्थः प्रतिज्ञासमर्थनार्थमत्रोच्यमानो न दुष्यति। नचात्र पूर्वपक्षयुक्तय उक्ताः विचारस्वरूपमात्रकथनात्। सम्भवदर्थविषयत्वं चाग्र एवोपपादयिष्यति। आर्थं विवृणोति। तत्रेति। एवं सूत्रसूचितं विचारं सङ्क्षिप्य सूत्रार्थमुपसंहरति। तदिहेति। इदानीमुत्तरसूत्राणि सङ्क्रमयन् भाष्यकारमतेन तावदेतत्पादगतपदार्थाननुक्रामति। निमित्तेति।

समुच्चयनिराकरणाच्चोदनैवेत्ययमर्थः सिद्ध्यति।

औत्पत्तिकसूत्रे तु स्वतः प्रामाण्यमऽर्थान्यथात्व-कारणदोषज्ञानाभ्याम ऽप्रामाण्यमित्याश्रित्याग्निहोत्रा-दिचोदनाभ्योऽसंदिग्धज्ञानोत्पत्तेः स्वतः प्रामाण्यं प्राप्तम्। न चापवादकमर्थान्यथात्वज्ञानं साक्षादस्ति, नापि कारणदोषज्ञानम्, पुरुषाश्रयत्वाच्छब्ददोषाणाम्। पदपदार्थसंबन्धस्याऽकृत्रिमत्वात् तद्द्वारेण पुरुषानुप्रवेशाभावाच्चोदनानामिति स्थिते—

'शब्दस्यैवानित्यत्वात् कुतः सम्बन्धानित्यता(श्लो'.वा.) इत्याक्षिप्य शब्दस्य नित्यतया शब्दाधिकरणे सम्बन्धनित्यत्वे समाहिते, मा भूत् पदपदार्थसम्बन्धद्वारेण पुरुषानुप्रवेशः, वाक्यवाक्यार्थयोस्तु लोके सम्बन्धादर्शनान्निर्मूलोऽग्निहोत्रादिवाक्यार्थप्रत्यय इत्यतो व्यामोहः सामयिको वा। अतो न वाक्यार्थे वेदस्य प्रामाण्यमित्याशङ्क्य, पदार्थानां सम्बन्धग्रहणं समयं चानपेक्षमाणानामेव वाक्यार्थे प्रामाण्यं सम्भवतीति तद्भूताधिकरणेन प्रतिपादिते—

पुनर्वेदानां वाक्यात्मकत्वात् काठकादिसमाख्यानाच्च पौरुषेयत्वात् तद्द्वारेण दोषसंस्पर्शमाशङ्क्य-स्मर्तव्यत्वे सत्यऽस्मरणाद् योग्यानुपलब्धिनिरस्तस्य कर्तुरनुमानासम्भवात् 'समाख्यायाश्च प्रवचननिमित्तत्वादऽपौरुषेया वेदाः इति तदेकदेशानां चोदनानां सिद्धं प्रामाण्यमित्येवं समस्तः प्रथमः पादश्चोदनासूत्रप्रतिज्ञातार्थोपपादनेन तस्यैव परिकरः'। सोऽयं भाष्यकारानुसारेण पादार्थोऽनुक्रान्तः। वृत्तिकारमतं

तु पश्चादनुक्रमिष्यामः । प्रकृतमनुसरामः—प्रतिज्ञातं तावच्चोदनैव प्रमाणं सा च प्रमाणमेवेति ।

ननु प्रत्यक्षादेरन्यानपेक्षं प्रामाण्यं सम्भवतीति तस्यैव धर्मे प्रामाण्यम्, शब्दस्य तु सर्वदैव प्रमाणान्तरप्रमितविषयत्वान्न तदनपेक्षं प्रामाण्यं सम्भवतीति, उच्यते—प्रत्यक्षं तावत्संयुक्तविषयत्वेन विद्यमानोपलम्भनत्वाद्भविष्यति धर्मे न समर्थम् ।

यद्यपि गोदोहनादिद्रव्यम्, यागादिक्रिया, नीचैस्त्वादिगुणश्च, फलसाधनत्वाद् धर्मशब्देनोच्यते नाऽपूर्वादय इति श्रेयस्करभाष्ये वक्ष्यते, तथापि तेषां फलसाधनरूपेण धर्मत्वात् फलस्य च जन्मान्तरादिभावित्वाद् धर्मस्वरूपेण प्रत्यक्षविषयत्वं न सम्भवति, तत्पूर्वकत्वाच्चानुमानादिकमपि न प्रमाणम् ।

ग्रन्थो निगदव्याख्यातः । प्रतिज्ञातार्थमुपपादयितुमाह । प्रकृतमिति । शब्दस्येति । यथाहुः—

"प्रमाणान्तरदृष्टं हि शब्दोऽर्थं प्रापयेत्सदा ।

स्मृतिवच्च स्वयं तस्य प्रामाण्यं नोपपद्यते" (श्लो॰ वा॰ २२) इति ।

ननु फलसाधनस्य द्रव्यादेरेव धर्मत्वाङ्गीकारात्तेषां चैन्द्रियकत्वात्कथं न धर्मस्य प्रत्यक्षविषयत्वमित्याशङ्क्य निराकरोति । यद्यपीति।य एव श्रेयस्करः स एव धर्मशब्देनोच्यते । कथमवगम्यते? योहि यागमनुतिष्ठति तं धार्मिकमिति हि समाचक्षते यश्च यस्य कर्ता स तेन व्यपदिश्यते । यथा पाचको लावक इति । तेन यःपुरुषं निःश्रेयसेन संयुनक्ति स धर्मशब्देनोच्यते। न केवलं लोके वेदे ऽपि—

भावनाबलजं तु योगिप्रत्यक्षं भविष्यत्यपि धर्मे समर्थमिति मनोरथमात्रम्। भावना ह्यनुभूतगोचरनियताऽनुभूतेष्वेव निश्चयरूपां स्मृतिं जनयेत्। न च साऽत्र प्रमाणं स्मृतित्वादेव, नतरां प्रत्यक्षमनिन्द्रियजत्वात्। नेन्द्रियजत्वं प्रत्यक्षलक्षणम्, अपि तु कल्पनापोढत्वमिति चेत्? सुतरां धर्मस्याऽप्रत्यक्षत्वं फलसाधनरूपस्याविकल्पग्रहणासम्भवात्। तस्मादनिमित्तं प्रत्यक्षम्। तत्पूर्वकत्वाच्चानुमानाद्यपि।

काश्यपीयाः पुनः प्रातिभज्ञानमृषीणां धर्मे प्रवर्तत इत्याहुः, तत्तु लिङ्गाद्याभासजत्वात् प्रमाणमेव न भवति किं पुनर्धर्मे, । शब्दस्य तु बुद्धिजनकत्वा-

---

"यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्" इति यजतिशब्दवाच्यमेव धर्मं समामनन्तीति श्रेयस्करभाष्ये वक्ष्यत इत्यर्थः। तथापीति।

"द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते।
तेषामैन्द्रियकत्वेऽपि न ताद्रूप्येण धर्मता॥
श्रेयःसाधनता ह्येषां नित्यं वेदात् प्रतीयते।
ताद्रूप्येण तु धर्मत्वं तस्मान्नेन्द्रियगोचरः" (श्लो. वा. १.४)॥

भावनेति। योगाभ्यासजनितः संस्कारविशेषो भावना तज्जनितं तु ज्ञानं स्मृतिरूपमेव भवतीत्यर्थः। बाह्यमतेन शङ्कते। नेन्द्रियेति। कल्पनेति। नामजात्यादियोजनाराहित्यमित्यर्थः। अविकल्पेति। फलसाधनत्वेन रूपेण धर्मत्वं न चतेन रूपेण निर्विकल्पकेन ग्रहणं सम्भवति वस्तुस्वरूपमात्रावगाहित्वात् तस्येत्यर्थः। प्रातिभमिति। प्रतिभा-धर्मविशेषस्तज्जन्यमित्यर्थः। तत्त्विति। तत्तु प्रमाणमेव न भवति किं पुनर्धर्मे इति सम्बन्धः।

दसत्यऽपवादे युक्तं प्रामाण्यम् ।

ननु न बुद्धिजननमात्रात् प्रामाण्यं युक्तम्, अयथार्थेष्वपि वाक्येषु बुद्धिजननाविशेषात् । सत्यम् । तत्र तु कारणदोषबाधकप्रत्ययाभ्यां युक्तमप्रामाण्यं वेदे तु तदभावात् स्वतः प्राप्तं प्रामाण्यमऽनपोदितं भवति ।

याहच्छिकत्वेन लिङ्गाद्याभासकल्पत्वादित्यर्थः । शब्दस्य तु धर्मे युक्तं प्रामाण्यं सम्भाव्यमानत्वात् अर्थगोचरशक्तिर्हि प्रमाणानां प्रामाण्यं सा च शब्दे सम्भवति । यतः—

"अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि"

इत्यन्तासत्यपि गगनकुसुमसंसर्गादौ स धियमुपजनयिष्यतीत्यर्थः । नन्वेवं सति तद्वदेवाप्रामाण्यमापद्यते बुद्धिजनकत्वाविशेषात् एवञ्च प्रामाण्यं साधयतो ऽप्रामाण्यमापतितमित्यभिप्रायेण शङ्कते । नन्विति । परिहरति । सत्यमिति । अयमाशयः । उत्सर्गोहि ज्ञानजननेन प्रामाण्यं तत्पौरुषेयेषु वन्ध्यासुतोयातीत्यादिषु दोषादपोद्येतापि, अपौरुषेयेतु शब्दे पुंदोषाभावात् स्वयमदुष्टत्वाच्च प्रमाणतैवानपोदिता सेत्स्यतीति । यथाहुः—

"अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि ।
तेनोत्सर्गेस्थिते तस्य दोषाभावात्प्रमाणता" (श्लो.वा. ६)।

उक्तञ्चान्यैः— "प्रमाणं भ्रमः संशयः स्मरणं संम्वाद इति पञ्चधा ज्ञानं विभजामहे तस्मात्सर्वमेव शाब्दमर्थगोचरं प्रमाणप्रमाणञ्च, दोषसदसद्भावनिबन्धनश्च प्रमाणेतरविभागः प्रत्यक्षादिवदेवे"ति । ननु चोदनाप्रामाण्यसदसद्भावविचाराधिकारे तत्प्रामाण्याक्षेपपरिहारप्रतिसमाधाने वक्तव्ये सर्वविज्ञानप्रामाण्यप्रतिज्ञावचनमसम्बद्धमप्रस्तुताभिधा-

कथं पुनः प्रामाण्यस्य स्वतः प्राप्तिः ? । तदर्थमिदं सर्वज्ञानान्यऽधिकृत्य चिन्त्यते–किं प्रामाण्यमप्रामाण्यं चोभयं स्वत एवावगम्यते ?, अथ वाऽन्यतरदपि स्वभावेनाऽनिरूपितं कारणगुणदोषप्रत्ययाभ्यामवगम्यते ?, आहोस्विदप्रामाण्यं स्वतोऽवगम्यते प्रामाण्यं तु कारणगुणज्ञानात् संवादज्ञानादर्थक्रियाज्ञानाद्वाऽवधार्यते ?, उत प्रामाण्यं स्वतः प्राप्तं सदऽर्थान्यथात्वकारणदोषज्ञानाभ्यामवगम्यमानेनाऽप्रामाण्येनाऽपोह्यते ! इति ।

तत्र सर्वकारणानां स्वकार्यशक्तेः स्वाभाविकत्वादुभयमपि ज्ञानस्य स्वरसादेवावगम्यते इति केचित्,

---

नादित्याशङ्क्य चोदनाप्रामाण्यसिद्ध्यर्थमेव सर्वविज्ञानप्रामाण्यचिन्तेत्याह । तदर्थमिति । अयमाशयः। यदाहि सर्वसंविदामौत्सर्गिकं प्रामाण्यं बाधकारणदोषायत्तश्चाप्रामाण्यमिति सिद्धम्भविष्यति वेदे चापौरुषेये तदुभयाभावात्स्वतः सिद्धमेव प्रामाण्यमिति । तदेवं वादिविप्रतिपत्त्या संशय्य द्वयं स्वत इत्याद्यं पक्षं परिगृह्णाति । तत्रेति । स्वयमतदात्मनो देवैरपि तादात्म्यापत्तेः कर्त्तुमशक्यत्वात् द्वयं स्वतः, नहि सिकतासु तैलादिकमाधातुं शक्यमिति । एतच्च सत्कार्यवादिमतं तन्मते हि सर्वमेव कार्यजातं सदुत्पद्यत इति प्रामाण्याप्रामाण्यात्मकमपि स्वत एव, यत्स्वतोऽसत्तन्न साध्यं यथा शशविषाणमसदुत्पत्तौ च मृत्तिका घटस्य वीरणकटस्येत्युपादाननियमो न स्यादसत्वाविशेषेण हि सर्वं सर्वस्मादसदुत्पद्येत । यस्य यदुत्पत्तिशक्तिरस्ति तां निश्चित्य यो यदर्थीस त दुपादत्त इति शक्तितोनियम इति चेत् । नैवम् । अविशेषात् । अस्माकं शक्त्यात्म-

तदयुक्तम्—न हि ज्ञानं स्वविषयस्य तथात्वमतथात्वं च युगपच्छक्नोति वेदयितुं विरोधात्।

अथ कापि ज्ञानव्यक्तिः स्वप्रामाण्यं स्वतो बोधयति काप्यऽप्रामाण्यमित्युच्यते, तथापि न युक्तम्—

ना विकार उपादानेऽस्तीति मतं भवतस्तु विकारोत्पत्तिशक्तिरुपादानेऽस्तीति वाचोयुक्तिमात्रं भिद्यते नार्थः। सत्त्वे कारकव्यापारानर्थक्यमिति चेत्। न। अभिव्यक्तिफलत्वात्। सन्तोपि हि विकाराः पूर्वमनभिव्यक्ताः कारकव्यापारैरभिव्यज्यन्ते। अभिव्यक्तावुत्पत्तिशब्दोऽनर्थक इति चेत्। अभिव्यक्तिभेदात्। घटस्यान्धकारातिरोहितस्य दीपेन तदुत्सारणमभिव्यक्तिः। मृदि तु मृत्स्नाकारस्य प्रोत्सारणं कुलालेन क्रियते स्थूलाकारता प्रकटीक्रियते सा च पूर्वमपरिदृष्टेत्युत्पत्तिव्यपदेश इति दिक्। तमिमं पक्षं प्रतिक्षिपति। तदयुक्तमिति। न तावदेकस्यां ज्ञानव्यक्तौ द्वयं सम्भवति विरोधात्। प्रामाण्याप्रामाण्ये हि परस्परपरिहारास्थितिविरोधेन विरुध्येते कथमेकव्यक्तिनिवाशिनी स्याताम्। अथैकस्यैव विज्ञानस्य द्वयं स्वत एव प्रकाशत इति मतं तथापि विरोधः। यदुक्तमसतस्साध्यत्वानुपपत्तिः तन्न। सतोप्यात्मादेरसाध्यत्वदर्शनात्। यदपि सिकतासु तैलादिर्नज्ञायते इति तदप्ययुक्तम्। तस्य तदुत्पादनशक्त्यभावात्। न हि सर्वं सर्वोत्पादनशक्तियुक्तम्। अधिकं दूषणं ग्रन्थान्तरादवगन्तव्यम्। अतो यथा नैकस्याग्नेश्शीतोष्णस्वभावत्वं विरुद्धधर्म्माध्यासस्य भेदनिबन्धनत्वात्। एवं न ज्ञानस्य प्रमाणाप्रमाणस्वभावत्वम्। अथ विरोधपरिजिहीर्षया भिन्नव्यक्त्याश्रयं नीलपीतवत्स्वतोद्वयमित्युच्यते। तदप्ययुक्तमित्याह। अथेति।

कारणान्तरानिरपेक्षस्य ज्ञानस्यैवोपलम्भहेतुत्वे किं क्व ज्ञाने भवतीति न शक्यं विवेक्तुम् । अतो द्वयमपि स्वस्वभावेनानिरूपितं कारणगुणदोषज्ञानाभ्यामवगम्यत इत्यपरे । तदप्यपेशलम्—एवं हि गुणदोषावधारणात् प्रागन्यतरेणाप्याकारेणार्थमनवगमयद्विज्ञानं निस्स्वभावं स्यात् । तस्मादप्रामाण्यं स्वतः, प्रामाण्यं तु संवादज्ञानादिभिरित्येतदेव युक्तम् ।

तथा हि—न ज्ञानमुत्पन्नमित्येतावताऽर्थतथात्वावधारणं युक्तं व्यभिचारादनिश्चयाच्च, अप्रामाण्यमेव तस्यां वेलायां प्राप्तम्, पश्चात् कारणगुणज्ञानात्संवा-

---

कथं न युक्तमत आह।कारणान्तरेति । स्वतोद्वयवादिना प्रामाण्याप्रामाण्यावधारणे कारणान्तरस्य संवादादेरनपेक्षणात् । ज्ञानस्यैवोपलम्भहेतुत्वे सर्वज्ञानेषु बोधरूपायाः स्वतोविशेषाप्रतिभासनात् कस्यां ज्ञानव्यक्तौ प्रामाण्यं कस्यां नेत्यनिश्चयाद्व्यवहारोच्छेदः स्यादिति भावः । परतोद्वयमिति पक्षान्तरमुत्थापयति । अपेशलत्वे कारणमाह । अत इति । एवं हीति । सर्वं हि विज्ञानं स्वभावद्वयेऽन्तर्भूतं किञ्चित् प्रमाणस्वभावमवशिष्टमप्रमाणस्वभावमिति स्वभावान्तराभावात्पूर्वं च केनापि रूपेणाऽनवधारणे निःस्वभावत्वं स्यात् निःस्वभावस्य चाभाव एव प्राप्त इति परतोपि कस्य प्रामाण्याप्रामाण्ये स्यातामिति भावः । ननु ज्ञाने सत्वगुणत्वज्ञेयत्वादिस्वभावसद्भावात्कथं निःस्वभावत्वम् । मैवम् । सत्वगुणत्वादीनामप्यन्यतरांशपातित्वाद्गुणदोषावधारणात्प्राक्—प्रामाण्याप्रामाण्यानवधारणे च स्वभावद्वयवर्जितं क्रियात्मकं किं स्वभावकं स्यादित्यनवधारणं स्यात् अत एतत्पक्षासम्भवात्पक्षान्तरमेव युक्तमित्याह। तस्मादिति । युक्तमेव दर्शयति । तथा-

हीति । अयमाशयः । अप्रामाण्यं नाम प्रामाण्याभावस्तस्याव-स्तुत्वान्न कुतश्चिदुत्पादः प्रामाण्यन्तु वस्तुत्वात्कारणगुणजन्यम् । ननु प्रामाण्याभावस्य प्रध्वंसादिरूपस्य मीमांसकैर्वस्तुत्वेनेष्टत्वा-दवस्तुत्वादित्यसिद्धो हेतुः सिद्धत्वे वा घटादिप्रध्वंसेनानैकान्तिकः। उच्यते । एतन्मतवादिनो बौद्धस्य तुच्छमभावो न वस्त्वन्तरं, यदि वस्त्वन्तरं स्यात्सत्यपि तस्मिन् भावस्य पूर्ववद्दर्शनं स्यादविशेषात् । न हि घटे सति पटस्यानुपलब्धिः । भावविरोधित्वादभावस्या-यमदोष इति चेत् । न । यद्यकिञ्चित्करोयं भावस्याभावः ? कथं विरोधी स्यात् । अथ किञ्चित्करः ? तथापि न तावद्भावस्वरूपं करोति अर्थान्तरकरणे तु कोविरोधः । तस्माद्घटाभाव इति घ-टस्य भावो नास्तीत्यर्थः । नच घटादिप्रध्वंसेनानैकान्तः तस्य तेन निर्हेतुकत्वाभ्युपगमात् । प्रामाण्यं तु स्वालम्बनाव्यभिचारि-त्वं तस्य च वस्तुत्वाद्युक्ता गुणैरुत्पत्तिरिति । ननु के पुनरमी गुणाः ये प्रामाण्यस्योत्पादका इत्युच्यन्ते यदि भेषजादिभिरा-हितातिशयविशेषा इत्युच्यन्ते तद्धीनाहितातिशयानां न प्रामाण्यं जायेत । उच्यते—

"विशुद्धिरिन्द्रियादीनां गुणानामतिशयः कृतः ।
साम्यं वातादिधातूनां विशुद्धिरभिधीयते" ॥

साम्येन हि स्थिता वातादयः प्रामाण्यमुपजनयन्ति, तद्वै-षम्ये तु तिमिरादयो दोषा जायन्ते, शब्दे तु वक्तुराशयशुद्धिर्गु-णो, विप्रलम्भादयश्च दोष इति तज्जन्यमप्रामाण्यं, प्रामाण्यं त्वर्थ-निश्चयोवस्त्वात्मक इति तद् गुणेभ्योजायते ज्ञायते चेति । यदि प्रामाण्यं स्वतः स्यात् अप्रामाण्यमप्यवस्तुत्वेनाजन्यत्वाद-न्यानधीनं, तर्हि सर्वज्ञानानामपि प्रामाण्यप्रसङ्गः स्वप्नादिज्ञाना-नामपि ज्ञानत्वाविशेषात् । ननु कथमप्रामाण्यमजन्यं दोषान्वय-

दज्ञानादर्थक्रियाज्ञानाद्वा प्रामाण्यावगमादपोद्यते। शब्दे चाप्तप्रणीतत्वं गुणः, न च वेदे तदस्त्यपौरुषेयत्वाभ्युपगमात्। "वनस्पतयः सत्रमासत" "शृणोत ग्रावाण" इत्येवमादीनामुन्मत्तप्रलपितकल्पत्वात्, अप्रत्ययिततरप्रणीतत्वादप्रामाण्यमेव वेदानामिति प्राप्ते अभिधीयते--

परापेक्षं प्रमाणत्वं नात्मानं लभते क्वचित्।
मूलोच्छेदकरं पक्षं को हि नामाध्यवस्यति ॥ ७ ॥

यदि हि सर्वमेव ज्ञानं स्वविषयतथात्वावधारणे स्वयमसमर्थं विज्ञानान्तरमपेक्षेत ततः कारणगुणसं-

---

व्यतिरेकानुविधायित्वेन तज्जन्यत्वावगमात्। कामली हि पीतं शङ्खं जानाति, तदपगमे च शुक्लं, अतोऽवस्तुनोपि हेतुजन्यत्वमापन्नं, तदनभ्युपगमे वा स्वप्नादिज्ञानानामपि प्रामाण्यापत्तिः। उच्यते। नात्र दोषैरप्रामाण्यं जन्यते तेषां प्रामाण्यजनकगुणोत्पत्तिप्रतिबन्धकत्वेनोपक्षीणत्वात्। सत्सु च दोषेष्वसन्तो गुणा न स्वकार्य्यं प्रामाण्यं जनयन्तीत्यप्रामाण्यमेवानपोदितं स्वाभाविकमास्ते। तदुक्तं—

"तस्मात्कारणशुद्धत्वं ज्ञानप्रामाण्यकारणम्।
स्वभावतोऽप्रमाणत्वं तदभावे न लक्ष्यते" इति (श्लो.वा.४४)॥

एवं च गुणाधीनप्रामाण्याभ्युपगमान्नित्यवेदवादिनाञ्च तदसम्भवादाप्तप्रणीतत्वे च प्रमाणाभावाद्वेदानामप्रामाण्यमापन्नमित्याह। शब्दे चेति।

एवं तावत् परतः प्रामाण्येन पूर्वपक्षं कृत्वा संप्रति तमेव दूषयन् सिद्धान्तमारभते। इति प्राप्त इति। श्लोकार्थं विवृणोति। यदि हीति। अर्थक्रियाज्ञानं चाव्यभिचारात्स्वतःप्र-

षादाऽर्थक्रियाज्ञानान्यपि स्वाविषयभूतगुणाद्यवधारणेऽपरमपेक्षेरन्, अपरमपि तथेति न कश्चिदर्थो जन्मसहस्रेणाप्यध्यवसीयेतेति प्रामाण्यमेवोत्सीदेत्।

अथ—अर्थक्रियाज्ञानं स्वतः प्रमाणमिति चेत्? को विशेषः?, अव्यभिचार इति चेत्? न, स्वप्नावस्थायामसत्यप्युदकाहरणेऽर्थक्रियाविज्ञानदर्शनात्।

अथ सुखज्ञानमेवार्थक्रिया? तच्चाव्यभिचार्येव न हि क्वचिदप्यसति सुखे सुखज्ञानमस्ति। सत्यमेतत्, नतु तेन पूर्वज्ञानस्य प्रामाण्याध्यवसानं सम्भवति—अप्रमाणेनापि प्रियासङ्गमाविज्ञानेन स्वप्नावस्था-

---

माणमर्थक्रियां निश्चाययच्छक्नोति पूर्वज्ञानस्य प्रामाण्यं निश्चाययितुमतो नानवस्थेति शङ्कते। अर्थक्रियेति। उपलक्षणं चैतत् ज्ञानान्तरसंवादोपि नार्थतथात्वाभावे घटत इति ततोऽप्यर्थतथात्वनिश्चयः तथा गुणवत्कारणजन्यं यथार्थमेव भवतीति कारणगुणावधारणादपि शक्यते ऽर्थस्य तथाभावो निश्चेतुमिति। परिहरति। नेति। अतोऽर्थज्ञानं व्यभिचारान्न स्वतःप्रमाणमित्यर्थः। अर्थक्रियाशब्देन नोदकाहरणादिकमुच्यते किन्तु ज्ञानमेव सुखात्मकं, सर्वं च ज्ञानं स्वार्थे स्वत एव प्रमाणमव्यभिचारादिति शङ्कते। अथेति। परिहरति। सत्यमिति। पूर्वज्ञानं—सुखजनकज्ञानम्। भवतु नाम तेन ज्ञानेनार्थक्रियायास्सुखस्य सत्यत्वनिश्चयः तथापि पूर्वज्ञानस्य याथार्थ्यं दुर्निरूपं, अयथार्थादपि ज्ञानात्सुखोत्पत्तेरित्यर्थः। किञ्चार्थक्रियालिङ्गकानुमानप्रवृत्तेः पूर्वं केनचिदर्थस्य निर्णयोऽङ्गीकर्तव्यः अन्यथा व्याप्तिग्रहणस्यैवासम्भवः। यच्च पूर्वमर्थनिर्णायकं तस्य स्वतः प्रामाण्यमङ्गीकर्तव्यं एवं च सर्वत्र तथैवास्तु किं वैरूप्याङ्गीकारेण?। सिद्धा-

यां सुखदर्शनात्। तस्मात् स्वतः प्रामाण्यं प्राप्तमऽर्थान्यथात्वकारणदोषज्ञानाभ्यामपोद्यत इत्यवश्यमङ्गीकरणीयम्। एवं च शब्देऽनाप्तपुरुषसंस्पर्शकृतत्वाद् दोषाणामऽपौरुषेये वेदे तदभावात् साक्षाच्चार्थान्यथात्वज्ञानाभावादनपोदितं प्रामाण्यं भवति। पौरुषेयवचनानि तु पुरुषबुद्धिप्रभवत्वाद् भ्रान्त्या विप्रलिप्सया वा प्रयुक्तानि मूलदोषेण दुष्टत्वादयथार्थानि भवन्तीति वैषम्यम्।

न्तमुपसंहरति। तस्मादिति। नन्ववस्तुत्वात् दोषजन्यमप्रामाण्यं न भवति अतस्तज्जन्यं च कथं ततो निश्चेतुं शक्यम्। उच्यते। न निश्चयप्रागभावरूपमप्रामाण्यं, किंत्वविद्यमानार्थप्रकाशत्वरूपं, तच्च शक्यं दोषज्ञानेन निश्चेतुं, अर्थान्यथात्वस्य दोषनिमित्तत्वात्। दुष्टेषु कारणेष्वयथार्थत्वदर्शनात्। स्वतःप्रामाण्योपपादनफलमाह। एवं चेति। ननु गुणविधुरेषु दुष्टेषु च कारणेष्वयथार्थज्ञानं जायते तत्कथमयं निर्णयो दोषनिमित्तकमेवायथार्थत्वं न गुणाभावनिमित्तकमिति। सत्यम्। यद्यपि प्रसिद्धेषु अयथार्थज्ञानेषु गुणाभावो दोषश्चेति द्वयं दृष्टं, तथापि वेदे गुणाभावेऽपि प्रामाण्यदर्शनात्तन्मा बाधीति दोषनिमित्तमेवायथार्थत्वं शुक्तिकारजतज्ञानादीनां कल्प्यते दोषस्यैव तिमिरादेस्तन्निमित्तत्वेन बहुलमुपलब्धेः। किं च गुणाभावस्याप्रामाण्यहेतुत्वे गुणस्य प्रामाण्यहेतुत्वं वाच्यं तच्च न युज्यते गुणाभावेऽपि शुक्तिरजतादिज्ञानेषु शुक्लत्वभास्वरत्वादिरूपाणां तथाभूतानामेव दर्शनात् धर्म्यंशे प्रामाण्याच्च। तस्मात्स्वकारणादेव यथार्थत्वं ज्ञानस्य, दोषात्त्वयथार्थत्वमिति। अत्रेयमुपपत्तिः। गुणज्ञानाऽसंवादज्ञानात्पूर्वं ज्ञाने तावज्जायत एव, तच्चोत्पन्नमपि तत्संश-

यात्मकमवभासते । अत एव ज्ञानोत्पत्तेरनन्तरमेव प्रमातॄणां भ्रान्तिसंविदितेऽपि रजते सम्यग्रजतबोध इव प्रवृत्तिर्दृश्यते अतो जातोपि निश्चयः पश्चात्कथमप्रमाणं भविष्यति । सत्यपि संवादे गुणज्ञाने वा तावदेव प्रमाणस्य सत्त्वं नाधिकं किञ्चित् । अतः किं तदपेक्षयेति । यथाऽऽहुः—

"स्वतः सर्वप्रमाणानां प्रामाण्यमिति गृह्यताम् ।
न हि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यते"(श्लो.वा.४७)॥

अत्र पूर्वार्द्धेन ज्ञानहेतूनां प्रामाण्येऽपि व्यापार इति प्रतिज्ञातं उत्तरेण तु सामग्र्यन्तराभावस्तत्र हेतुरुक्तः । अन्येन—विज्ञानसामग्र्यतिरिक्तेनेत्यर्थः । लोके च स्वशब्द आत्मीयवचनः । ननु स्वतः प्रामाण्यवादिनामपि गुणवदिन्द्रियादिकारणिकैव प्रमाणोत्पत्तिरास्थेया, तद्यदि गुणाः प्रमाणोत्पत्तौ कारणं तदाऽर्थनिश्चयाख्ये तत्कार्येऽपि तदधीनता युक्ता, तदायत्तप्रामाण्याश्रयणात् । उच्यते । प्रमाणोत्पत्तावपि न गुणा इत्येवापेक्ष्यन्ते, किन्तु दोषनिराकरणौपयिकतया, दोषाणां प्रामाण्योत्पत्तिविघातकत्वात् । गुणैरुत्सारितानां च तद्विघातकत्वासम्भवात् । अत एवासत्स्वपि वक्तृगुणेषु वेदे दोषाभावमात्रादेव प्रामाण्यं सिद्ध्यति । किञ्च गुणाः प्रमाणोत्पत्तौ कारणं नैतावता प्रमाणकार्येऽप्यर्थनिश्चयाख्ये तदपेक्षा युक्ता, नहि घटः स्वोत्पत्तौ मृत्पिण्डदण्डादिकारणापेक्ष इति स्वकार्यजलाहरणेपि तदपेक्षेत । लब्धात्मनां स्वकार्येषु कारणनिरपेक्षाणामपि प्रवृत्तिदर्शनात्, कारणगुणाद्यपेक्षायां त्वनवस्थायाः परिहर्तुमशक्यत्वात् । स्वतः प्रामाण्ये तु नानवस्थापत्तिः, ज्ञानस्वभावादेवार्थनिश्चयस्य सिद्धत्वात् मिथ्यात्वाशङ्का तु तद्धेतुभूतदोषाज्ञानादयत्नेनैव निवर्तत इति । तस्माद्बोधस्वभावानुस-

न्धिज्ञानानामौत्सर्गिकमेव प्रामाण्यं, यथाऽऽहुः—

"तस्माद्बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता।
अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यत" इति (श्लो.वा.५३)॥

अर्थान्यथात्वज्ञानं च द्वेधा नैतदेवमिति पूर्वावगतरूपोपमर्देन तत्त्वप्रकाशनेन वा। हेतवो ज्ञानानामिन्द्रियादयस्तेषु वातादिसमुत्था दोषास्तिमिरादयः तज्ज्ञानेनोत्सर्गतः प्राप्नुवन्ती प्रमाणताऽपोद्यत इति श्लोकार्थः। नन्वस्तु नाम स्वतः प्रामाण्यमप्रामाण्यं तु कथं परतस्तस्यावस्तुत्वेन दोषैरजन्यत्वात्। उच्यते। त्रिविधमप्रामाण्यं तत्र संशयविपर्ययोर्ज्ञानात्मकवस्तुत्वाद्दोषजन्यत्वं युक्तमेव। ज्ञानप्रागभावस्त्ववस्तुतयैव प्रसिद्धः। न चास्माकमप्यसौ दोषैर्जन्यते ज्ञानकारणाभावादेव तत्सिद्धेः। यथाऽऽहुः—

"अप्रामाण्यं त्रिधा भिन्नं मिथ्यात्वाज्ञानसंशयैः।
वस्तुत्वात् द्विविधस्याऽत्र सम्भवो दुष्टकारणादिति"(श्लो.वा.५४)॥

नन्वप्रामाण्यस्याऽपि परतस्त्वेऽनवस्था स्यात् पारतन्त्र्यस्यैवाऽनवस्थापादकत्वात्। मैवम्। पराश्रयतामात्रस्यानवस्थानापादकत्वात्। सजातीयापेक्षायां ह्यनवस्था भवति यथा प्रामाण्यस्य प्रमाणापेक्षायां, अप्रामाण्ये तु स्वतःप्रमाणेन नैतदेवमिति साक्षाद्विपर्ययज्ञानात्। ननु स्वतः प्रामाण्यपक्षे पूर्वज्ञानमप्यसन्दिग्धमेवोत्पन्नं कथमप्रमाणं भविष्यति येन परेण बाध्यते, पूर्वेणैव परं किं न बाध्येत। नैष दोषः। उत्सर्गतः पूर्वस्याऽपि प्रामाण्यं प्राप्तमेव, अपवादभूतेन तूत्तरेण बाध्यमानं तदप्रमाणं भवति। नच वैपरीत्येन बाधः शङ्क्यः, यद्धि यद्बाधमानमवभासते तत्तस्य बाधकमभिधीयते। नचानागतोत्तरबाधरूपेण पूर्वमवभासते। उत्तरन्तु पूर्वज्ञानबाधमन्तरे-

णानुत्पद्यमानं तस्य बाधकं भवति तच्च स्वत एव प्रमाणमिति न काचिदनवस्था । ननु नेदं रजतमित्यादिना परेण पूर्वस्य बाधो युक्तो विषयैक्यात्, दोषज्ञानं तु कारणदोषविषयत्वेन पूर्वस्माद्भिन्नविषयं, कथं तेन पूर्वज्ञानप्रमाणताऽपोद्यत इत्युच्यते। सत्यमेवम् । तथाऽप्यर्थात्तुल्यार्थतामासाद्य बाधो भवति दोषाणामयथार्थज्ञानहेतुत्वात् । तथाहि शङ्खे पीतमिदमिति ज्ञाने जाते परतश्च ज्ञानकारणदोषे ऽवगतेऽर्थात् पीतिमा शङ्खस्य प्रातिक्षिप्तो भवति यथा क्रत्वर्थपुरुषार्थत्वेन भिन्नविषययोरपि चमसगोदोहनयोरवान्तरव्यापारैक्ये न बाध्यबाधकभावस्तथेहाऽपि । तत्किमेष एवोत्सर्गो यत्सर्वदा परेण पूर्वं बाध्यते । नेति ब्रूमः । यदोत्तरज्ञाने बाधधीर्न भवति कारणदोषज्ञानं वा तदा पूर्वस्य बाधः । यदा तु बाधकज्ञानं सापवादं भवति तदा पूर्वज्ञानमेव निरपवादमौत्सर्गिकप्रामाण्यं लभत इति । ननु प्रमाणेन सता तृतीयेन बाधकं बाध्येत तदेव तु कथं प्रमाणं ?, दोषाऽज्ञानादिति ब्रूमः । सर्वं हि ज्ञानं स्वत एव प्रमाणं यद्यपि विज्ञायमानदोषं भवति । अतस्तृतीयेन बाधकज्ञानेन बाधिते पूर्वस्यैव प्रामाण्यं भवतीति । यस्य तु तृतीयेऽपि ज्ञाने दोषज्ञानं बाधकं वा जायते तस्यास्तु चतुर्थज्ञानावसानो निर्णयः । नत्वेवं, प्रायेण प्रथमज्ञान एव निर्णयदर्शनात् । उक्तं च—

"एवं त्रिचतुरज्ञानजन्मनो नाधिका मतिः ।
प्रार्थ्यते तावतैवैकं स्वतः प्रामाण्यमश्नुते" (श्लो.वा.६१)॥

शब्दे च वक्त्रधीना एव दोषाः, वेदे च वक्तुरभावान्निराश्रया दोषा न भवन्तीति निरपवादं प्रामाण्यमुपपन्नं भवति ।

"पौरुषेये द्वयं दृष्टं दोषाभावो गुणस्तथा ।
प्रामाण्यं तत्र गुणतो नैव स्यादनवस्थितेः ॥

केचित्त्वाहुः—न लोकेपि शब्दस्याऽयथार्थत्वमस्ति तदभावात्, न हि लोके शाब्दं प्रमाणमस्ति य-

तस्माद्गुणेभ्यो दोषाणामभावस्तदभावतः ।
अप्रामाण्यद्वयासत्त्वात्तेनोत्सर्गो ऽनपोदितः"(श्लो.वा.६५)॥

गुणाश्च स्वरूपसन्त एव दोषानुत्सारयन्ति न ज्ञायमानाः, ततोऽसन्तो दोषा न जाता इति सहजं प्रामाण्यमवतिष्ठते। यदि तु प्रमाणान्तरेण ज्ञाता एव गुणा दोषानुत्सादयेयुस्तदाऽनवस्था स्यात् नत्वेवं, नाऽपि संवादापेक्षं प्रामाण्यमनवस्थानात् । वेदे च प्रमाणान्तरसंवादाऽसम्भवादनुवादकत्वापत्तेश्च ।

"तस्मात् दृढं यदुत्पन्नं न विसंवादमृच्छति ।
ज्ञानान्तरेण विज्ञानं तत्प्रमाणं प्रतीयताम्" (श्लो.वा.८०)॥

अत्र वार्तिककारैः स्वतः प्रामाण्योपयोग्यन्यदपि निरूप्यानन्तरं भाष्यव्याख्याप्रसङ्गेन सुगतसार्वज्ञमार्हतसार्वज्ञं च निराकृत्यानन्तरं सृष्ट्यादौ ·नित्य एवायमागमः सुप्तप्रतिबुद्धन्यायेन हिरण्यगर्भस्य प्रतिभातस्ततः प्रभृत्येषा स्वाध्यायपरम्परेति वेदान्तवादिमतं सिद्धान्तपरिपन्थित्वेन—

"नित्यागमावबोधोऽपि प्रत्याख्येयोऽनया दिशा"(श्लो.वा.१४३)

इत्यादिना निराकृत्यानन्तरं भाष्यग्रन्थान् व्याख्याय तत्सूचितमनुमानं च—

"चोदनाजनिता बुद्धिः प्रमाणं दोषवर्जितैः ।
कारणैर्जन्यमानत्वाल्लिङ्गाप्तोक्ताक्षबुद्धिवत्" (श्लो.वा.१८१)॥

इत्यादिनोक्ता भाष्यार्थोपसंहारः कृतस्तत्सर्वं तत्रैवावगन्तव्यं विस्तरभयान्नेह लिखितम् ।

प्रसङ्गादेकदेशिमतं निराकर्तुमुपन्यस्यति । कश्चित्त्विति ।

(१) टीकानुसारेण कश्चित्त्वाह इति युक्तः पाठः ॥

क्त्रभिप्रायानुमापकत्वात् पुरुषवचसाम्, तेनानुमानस्यैवायं व्यभिचारो न शब्दस्य। न वा तस्यापि, विवेकाग्रहणादालिङ्गे लिङ्गव्यवहारप्रवृत्तिः। यदि तु शब्दस्यैवायं व्यभिचारोऽभ्युपेयते स्वाभाविकमेवाऽप्रामाण्यं स्यात्, न हि पुरुषदोषेण शब्दस्य दोषो भवति, यथावस्थितशब्दाभिव्यक्तिमात्रे पुरुषस्य व्यापारात्।

तदिदमसारम्—यदि लोके शाब्दं नास्ति तदा वेदेपि कथं तत्स्यात्?। 'न ह्यभिप्रायानुमानक्षीणस्य शब्दस्यार्थं प्रति वाचकत्वे प्रमाणमस्ति' इत्युक्तं न्यायरत्नमालायाम्[1]।

तदभावात्—लोके शब्दलक्षणप्रमाणाभावात्। कथमेतावता

---

(१) न्यायरत्नमालायामेवमुक्तम् "किं च स्वरूपमात्रमपि नाभिधेयम् पदविशेषस्यैव वाचकत्ववद् विशिष्टार्थविषयेणैव विज्ञानेन व्याप्तिग्रहणसंभवात्, यथा हि वाचकत्वं प्रतिपदमऽर्थविशेषं प्रतिगृह्यते-गोपदं सास्नादिमतो वाचकम्, अश्वपदं वाजिवाचकमिति तथा तदन्वितार्थविषयविज्ञानव्याप्तिस्तस्य तस्य-ग्रहीतुं शक्यते, आप्तस्य गोपदरचना आकाङ्क्षितसंनिहितयोग्यार्थान्तरान्वितसास्नादिमद्विज्ञानपूर्विकेति वा। ततश्च पदानाम्—

अर्थस्वरूपवाचित्वमपि नैव प्रसिध्यति।
प्रागेवान्वितवाचित्वमतो वेदाऽप्रमाणता॥

नन्वनुमितमप्यर्थं पश्चादनुवदद्वाक्यं वाचकम् स्यात्?, तन्न, अनुवादकत्वे प्रमाणाभावात्। नह्यनुवादकत्वमन्तरेण किंचिदनुपपन्नं यतस्तत् कल्प्येत। शक्तत्वादनुवादकत्वमिति: चेत्? तदितरेतराश्रयम्-शक्तेरनुवादस्ततश्च शक्तिरिति। तस्मान्न वाचकत्वं सिद्ध्यति। यदि परम्- अर्थविशेषाविज्ञानानुमानसिद्ध्यर्थं पुनर्वाचकत्वमवस्थाप्येत? तन्नान्तरेणापि वाचकत्वं शब्दविशेषस्य ज्ञानविशेषेणैव व्याप्तिग्रहणसम्भवादनुपपन्नम्। तस्माल्लोकवचसा-

यच्च व्यभिचाराभ्युपगमे स्वाभाविकमप्रामाण्यं भवति पुरुषदोषस्य शब्देऽनवतारादिति, स्यादेतदेवं यदि यदीयं यद्वाक्यं तत्स पुरुषोऽभिव्यञ्ज्यात्, तत्तु तेनैव क्रियते–वर्णा नित्याः पदानि च, वाक्यानि तु पुरुषैरेव क्रियन्ते पौरुषेयत्वादेव । यथाऽवस्थितानि व्यज्यमानानि वेदवाक्यवदपौरुषेयाण्येव स्युः । ततश्च वक्त्रभिप्रायानुमापकत्वमपि न स्यात्, तद्यथाऽध्येतृभिरभिव्यज्यमानानि वेदवाक्यानि नाध्येतॄणामभिप्रायं सूचयन्ति तथा पुरुषवाक्यान्यपि न सूचयेयुः । यदि हि व्यभिचाराऽऽशङ्कया लोके शब्दस्य प्रामाण्यं न सम्भवतीत्युच्यते ?, तर्हि तद् वक्त्रभिप्रायानुमानेऽपि तुल्यम्, अन्यथासंविदानस्याप्यऽन्यथा वाक्यरचनादर्शनात् ।

किञ्च शब्दस्य चक्षुरादेरिव स्वसामर्थ्येन बोधकत्वाद् व्यभिचारेपि न बोधकत्वहानिः । लिङ्गस्याव्यभिचारिण एव गमकत्वमिति व्यभिचारिणो लिङ्गत्वमनुपपन्नम् ।

अथ वक्तुरासत्वाद् व्यभिचारशङ्कां निवर्त्यानुमानम् ? तथा सति शाब्दमेवार्थे प्रमाणमस्तु प्रतिबन्धिकायाः शङ्काया निरस्तत्वात् । अवश्यं हि बुद्धिविशेषमनुमित्सतो प्रथमं पदार्थास्तेषां चाऽन्वययोग्यताऽऽलोचयितव्या, ते चालोच्यमाना द्रागेव

मनुमानत्वेन प्रामाण्याङ्गीरणे पदानां वाचकत्वाऽयोगादप्रतिपादकत्वेनाप्रामाण्यं वेदस्य स्यादिति तत्प्रामाण्यसिद्ध्यर्थं लोकेऽपि शब्दानां शब्दतयैव प्रामाण्यमभ्युपगन्तव्यम्" इत्यादि ।

वाक्यार्थं बोधयन्तीति नानुमानं प्रतीक्षन्ते ।

किञ्चानुमिते बुद्धिविशेषे पश्चादनुवादभूतं वाक्यं वाक्यार्थमवबोधयतीति वः सिद्धान्तः, ततश्च यो नामाऽनाप्त एवाऽऽप्तबुद्ध्या गृहीतस्तद्वाक्यादयथार्थमेव ज्ञानमुत्पन्नमित्यभ्युपगन्तव्यं ततश्च दोषाधीनत्वादप्रामाण्यस्य वक्तृदोषाणां च शब्दे संक्रान्त्यऽनभ्युपगमात् स्वारसिकमेव शब्दे दुष्टत्वमापन्नमिति बलादप्रामाण्यं वेदस्य प्रसज्यत इत्यास्तां तावत् । तस्मादनाप्तवचसां सत्येवाप्रामाण्ये वक्तृदोषाधीनत्वाद् वेदे च तदभावात् प्रामाण्यमेव वक्तव्यम् । तस्माच्चोदनालक्षण एव धर्मः श्रेयस्कर इत्यर्थः । यदेव श्रेयस्साधनरूपं यागहोमादि तदेव धर्म इत्युच्यते लोके, नाऽपूर्वमन्तःकरणवृत्त्यादि वा लोकप्रसिद्धिविरहात् ।

नन्वऽपूर्वमेव श्रेयस्साधनम् ?, न, अवान्तरव्या-

शब्दस्यायथार्थत्वपरिहारोऽत आह । तेनेति । तेनेत्यादिर्वक्तव्यमित्यन्तो ग्रन्थः स्पष्टार्थः । उपपादितमर्थं निगमयति । तस्मादिति ।

धर्मपदार्थं व्याचष्टे । श्रेयस्कर इति । लोके यागहोमादिकर्तरि धार्मिकपदप्रयोगादित्यर्थः । यागादेरेव श्रेयस्साधनत्वबोधनादितिभावः । अत्र चोदयति । नन्विति । नैयायिकादिभिर्विहितयागादिक्रियासाध्यापूर्वस्यैव धर्मत्वाङ्गीकारादित्यर्थः । परिहरति । नेति । अतीन्द्रियापूर्वदर्शनमन्तरेणाऽपि यागादिकर्तर्येव धार्मिकपदप्रयोगदर्शनादिति भावः । तदुक्तम् —

"अन्यत्साध्यमदृष्ट्वैव यागादीननुतिष्ठतः ।

पारमात्रत्वात् । तस्माद् यागादिरेव श्रेयस्साधनरूपेण धार्मिकत्वसमाख्यानं तद्योगादिति गम्यते"(श्लो.वा.१९२)

ननु न तावद्यागादीनां स्वरूपमेव धर्मः तेषामैन्द्रियकत्वे न धर्मत्वनिषेधात् श्रेयस्साधनत्वरूपेणैव धर्मत्वोक्तेः तच्च रूपमतीन्द्रियत्वादपूर्वमेवाप्रत्यक्षं ततश्चाऽन्यत्साध्यमदृष्टमित्यनेन न्यायेन यागादिस्वरूपस्यैव धर्मत्वमित्यापन्नं स्वरूपाभिधाने चैकस्यैव धर्मपदस्य नानाजातीयेषु द्रव्यगुणकर्मस्वनेकशक्तिकल्पनास्यात् । न च सकलानुगतप्रीतिसाधनत्ववचनाददोष इति वाच्यम् । तस्यातीन्द्रियत्वात् विशिष्टवाचकस्य प्रीतिरूपविशेषणमात्राभिधानप्रसङ्गाच्च । किञ्च विधेयस्य धर्मपदार्थत्वे भावनाया एव विधेयतया धर्मपदवाच्यता स्यात् । सा हि त्र्यंशा विधीयत इति सिद्धान्तेन यागादेरविधेयत्वात् तद्द्वारमपूर्वमेव धर्मपदवाच्यं तदन्वयव्यतिरेकानुविधानात् धर्मपदस्य । तथा हि फलकाले ऽसत्यपि कर्मण्यपूर्ववत्तयैव धर्मवानयमित्युच्यते सत्स्वपि च यागादिषु वैगुण्येनापूर्वानिष्पत्तौ न धर्मवानिति प्रयुज्यते अतोऽपूर्वमेव धर्मशब्दार्थः । अत्रोच्यते । धर्मशब्दोऽयं पाचकादिवत्सभाग एवं धृतिसाधने वर्तते । धृतिरिति च प्रीतिपर्यायः धृञा धृतिः प्रत्ययेन च तत्साधनमभिधीयते पृषोदरादिमध्यपतितश्चायम् । न चैवं भोजनादौ प्रसङ्गः, चोदनालक्षणश्रेयस्करमात्रे रूढत्वात् । नच भावनायां प्रसङ्गः विहितत्वेपि तस्या असाधनत्वात् यागादीनामेव श्रेयस्साधनत्वस्य चोदनाप्रमाणकत्वात् । न चैवं विशेषणमात्राभिधानापत्तिः अखण्डस्यैव प्रायेण विशेषणमात्राभिधायकत्वदर्शनात् । असत्यां च गतौ सर्वाभिधानस्यैव युक्तत्वात् । उक्तश्च–

"यत्र ह्येकखण्डेन शब्देन विशिष्टो बोध्यते तत्र विशेषणमेव शब्दस्य वाच्यं गवादिशब्दवत्सामशब्दवच्चेति। केवलरूढ्यभ्युपगमेन वा उपाधिद्वयस्याभिधानमेव वाच्यं, प्रीतिसाधनत्वस्य विहितत्वस्य च, उभयत्र धर्मपदोपचारात्। न च प्रीतिसाधनत्वरूपस्यादृश्यत्वोपलम्भः तद्रूपस्य वेदादवगमात्। न चापूर्वस्य वेदादवगतिः तस्यावान्तरव्यापारत्वेन कल्प्यत्वात्। असत्यपि कर्मणि कृतयागत्वेनैव धार्मिकपदप्रयोगोपपत्तेः। यदप्युक्तम्—विगुणे प्रयोगाभावान्न यागादिर्धर्म इति। तन्न। तथाविधस्याभ्युदयसाधनत्वाभावेन तत्र धर्मपदप्रयोगाभावात्। फलकाले तु धर्मवत् पदप्रयोगोऽभ्युदयसाधनाभिप्राय एव तदानीमपि शक्तिरूपेण यागस्य सत्वात्। ननु यागादिसाधनवादिनोऽप्यपूर्वसिद्धिमन्तराऽन्तर्भाव्यैव साधनत्वं वदन्ति। तथा ह्याहुः "तेनापूर्वं कृत्वेति"। प्रत्यासन्नफलं चापूर्वमेव, अतिक्रान्ते कर्मणि तत एव फलसिद्धेः, अतोऽपूर्वं धर्म इत्येव न्याय्यम्। मैवम्। तद्धि कर्मशक्तिः फलशक्तिर्वा वस्त्वन्तरमेव वा स्यात्। न चैतस्य साध्यसाधनयोरन्यतररूपानुप्रवेशः सम्भवति। न तावत्फलसाधनभूतं सत्कल्प्यते नापि यागसाध्यभूतं श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। नाप्युभयरूपरहितं निःस्वभावस्यासद्रूपतापत्तेः अतो यागस्य फलोत्पादिका शक्ति, रात्मनो वा फलभोगयोग्यता, फलस्य वाङ्कुरावस्थाऽवान्तरव्यापररूप एव वा कश्चित्पदार्थः, सर्वथा तावद्यागादिवाचकस्य धर्मशब्दस्य तत्प्रतिपादकत्वानुपपत्तिः। न ह्युदकादरणोत्पादिका शक्तिर्घटशब्देनाभिधीयते। साङ्ख्यास्तु मनसो वृत्तिविशेषं धर्ममाहुः। शाक्यास्तु चित्तस्य शुभां वासनाम्। आर्हतास्तु कार्यारम्भकान् सूक्ष्मान्मूर्तिमतः पुद्गलान् धर्ममाहुः। पुद्गलशब्दश्चा-

धर्मः, तद्रूपाभावाच्च न शूद्रकृतस्य धर्मतापत्तिः। चोदनालक्षणमात्रस्य धर्मत्वं माभूदित्यर्थशब्देन विशेष्यते।

चोदनाशब्देन च प्रवर्तकं निवर्तकं च वाक्यमुच्यते ततश्च निषेधवाक्यैः "न हिंस्यात्" इत्यादिभिरनर्थत्वेन लक्ष्यमाणानां हिंसादीनामपि धर्मत्वं स्यात् तद्व्यावृत्त्यर्थं य एवार्थरूपेण प्रवर्तकवाक्यैर्लक्ष्यतेस्तेष्वेव परिभाष्यते। वैशेषिकाश्चात्मनो विशेषगुणं मीमांसकैकदेशिनस्त्वपूर्वमेव धर्ममाहुः। सर्वेषु चैतेषु लोके धर्मशब्दप्रयोगाऽदर्शनात् विधिना तेषां श्रेयस्साधनत्वानवगमाच्च नास्ति धर्मत्वं अतो यागादेरेव धर्मशब्दवाच्यतेत्युपसंहरति। तस्मादिति। अनधिकारिकृतस्य श्रेयःसाधनत्वाभावात् इति भावः। धर्मपदं व्याख्याय सूत्रगतार्थपदव्यावर्त्यमाह। चोदनेति। चोदनाशब्दार्थमाह। चोदनेति। न न्वेतदयुक्तं लिङादिप्रत्ययमात्रस्यैव विधौ स्मरणात्। तस्य च प्रवर्तनाऽभिधानद्वारेण प्रवर्तकत्वं न वाक्यस्य, सत्यं तावन्मात्रस्य प्रवर्तकत्वं, तथाऽपि तेन स्वव्यापारे पुरुषः प्रवर्तते। अंशत्रयात्मिका च भावना तद्व्यापारः तदंशलाभश्च नर्ते वाक्यात्सिद्ध्यतीति युक्तमुक्तं प्रवर्तकं वाक्यं चोदनेति। तदुक्तम्—

"किमाद्यपेक्षितैः पूर्णः समर्थः प्रत्ययो विधौ॥
तेन प्रवर्तकं वाक्यं शास्त्रेऽस्मिँश्चोदनोच्यते"(श्लो.वा.चो.सू.३)

लक्षणपदं च व्याख्यातप्रायम्। अस्तु वाक्यस्य चोदकत्वं ततः किमतआह। तेनेति। ननु "उभयमिह चोदनया लक्ष्यतेऽर्थोऽनर्थश्च, कोऽर्थो? यो निःश्रेयसाय ज्योतिष्टोमादिः, कोऽनर्थो? यः प्रत्यवायाय श्येनो वज्रइषुरित्येवमादिस्तत्राऽनर्थो धर्म उक्तो माभूदित्यर्थग्रहण" मितिभाष्ये श्येनादेरेवानर्थत्वोक्ते-

ते तस्यैव धर्मत्वं वक्तुमर्थग्रहणम् ।

भाष्ये च श्येनादिग्रहणं तत्साध्यहिंसादिलक्षणार्थम् । उपरिष्टात्–"हिंसा हि सा सा च प्रतिषिद्धा" इति विवरणात् ।

स्तद्विरुद्धं हिंसादीनामनर्थत्वकथनमित्याशङ्क्याह । भाष्ये चेति । कथमेवं भाष्यार्थोऽत आह । उपरिष्टादिति । "कथंपुनरसावनर्थः हिंसा हि सा सा च प्रतिषिद्धा" इत्यग्रिमभाष्यग्रन्थेन हिंसारूपश्येनशब्दार्थविवरणादित्यर्थः । नन्वनर्थश्चोदनालक्षणपदेनैव व्यावर्तितः विधायकवाक्यस्य चोदनात्वात् तेन चाऽनर्थहेतोर्हिंसायां अलक्ष्यमाणत्वात् प्राणवियोगफलको व्यापारो हिंसा सा च "नहिं स्यात्सर्वाभूतानि" इति निषिद्धत्वादनर्थः स तु निषेधलक्षणो न चोदनालक्षणोऽथ चोदनालक्षणत्वाच्छ्येनादय एवाऽत्र प्रत्युदाहरणभूताः तर्हि तेषां विधिविषयत्वेन निषेधागोचरत्वादनर्थत्वमेव नास्ति कथमर्थपदेन व्यावृत्तिः स्यात् । अथश्येनादीनामपि हिंसाफलत्वेन निषेधविषयत्वादनर्थत्वं तन्न । केवलनिषेधविषयत्वस्यैवानर्थापादकत्वात् कलञ्जभक्षणादिवत्प्रत्यवायहेतुत्वात् श्येनादीनां विधिविषयत्वेन षोडशिग्रहणादिवदनर्थत्वाभावात् । उक्तं च—

"यद्यपि स्याद्विधिस्पृष्टे निषेधो नैव तादृशात् ।
विज्ञायते ह्यनर्थत्वं षोडशिग्रहणादिवत्" (श्लो. वा. २०३)॥

किं पुनरेषां प्रत्यवायहेतुत्वे प्रमाणम् ? प्रतिषेध एवेति चेत् ? प्रतिषेधविधेरनर्थत्वमात्रपर्यवसायितया निषेध्यस्य प्रत्यवायहेतुत्वबोधने शक्त्यभावात् । निषिद्ध्यमानक्रियायां च रागादिना प्रवृत्तः पुमानधिकारी लब्ध एवेति नाधिकार्यपेक्षा उक्तं च—"निषिद्ध्यमानक्रियाकर्तुरेवाधिकार" इति । किं पु-

नस्तस्य विशेषणम् ? भक्षयतिरेवेति ब्रूमः विषयविशेषणस्याऽपि सतो बलादधिकारिविशेषणत्वोपपत्तेः । यो भक्षयेत्स नेति वचनव्यक्त्यङ्गीकारात् श्रुतिपरतन्त्राणामशब्दार्थकल्पनानुपपत्तेः । अकरणं तु निषिद्धत्वादेव । नहि विधिनिषेधाभ्यामन्यो हेतुरस्ति प्रवृत्तिनिवृत्त्योः ।

अत्रोच्यते । निषेधश्रुत्यर्थापत्तिरेव निषिद्धानां प्रत्यवायकरत्वे प्रमाणम् । विधिश्रुतिविहितानामभ्युदयहेतुत्वे तथैव व्युत्पत्तेः निषेधश्रवणाद्धि दुःखहेतुरयं निषिद्धो विषय इति सर्व एव प्रतिपद्यते । अत एव न तत्र प्रवृत्तिः । यत्त्वधिकारिलाभे सति न कल्पनाबीजमस्तीति । तन्न । हिताहितप्राप्तिपरिहारार्थिन एव सर्वत्राऽधिकारात् । न भक्षयतिरधिकारिविशेषणम् । नित्याधिकारेष्वप्युपात्तदुरितक्षयाकरणनिमित्तप्रत्यवायपरिहारार्थिन एवाधिकारसमर्थनात् । ततश्चैवं वचनव्यक्तिः यतो दुःखजन्म तन्नेति । नाऽपि श्येनादयो ऽत्र हिंसाशब्देनाभिधातुं शक्यन्ते । स्वरूपभेदात्-हिंसा हि श्येनादीनां फलं भवति अभिचारत्वात् अत एवाभिचारिकं कर्मोच्यते । यथाऽऽहुः—

"हिंसा हि फलमेतेषां भिन्ना तेभ्यः स्वरूपतः ।
सा हि प्राणवियोगात्मा श्येनस्तत्राऽसिवत् पृथक्" (श्लो.वा.२०५)

अभिचारो मरणं हिंसेति पर्यायः । तद्यथाऽसिना शत्रौ व्यापाद्यमाने छेदनमेवासिजन्यं हिंसा नासिः एवं श्येनजन्यमायुर्भाग्यछेदनमेव हिंसा न श्येनः अतस्तत्र हिंसाभिधानमनुपपन्नमिति श्लोकार्थः । ननु "सा हि प्राणवियोगात्मा" इत्यनुपपन्नं प्राणवियोगस्य मरणरूपस्य प्रयोज्यव्यापारत्वात् नहि तत्र विधिप्रतिषेधौ सम्भवतः हिंसाशब्दवाच्यमारणप्रयोजक-

व्यापारविषयत्वात्तयोः नहि मरणमेव मारणं स्वरूपभेदाद्व्यपदेशभेदाच्च, नहि म्रियमाणो हिनस्तीत्युच्यते। तस्मादयमर्थः प्राणवियोग आत्माऽवच्छेदको यस्य प्रयोजकव्यापारस्य स प्राणवियोगावच्छिन्नः प्रयोजकव्यापारो हिंसा न स्वर्गपश्वाद्यवच्छिन्न इति। ननु लोके मरणफलव्यापारस्य हिंसात्वप्रसिद्धेः श्येनोऽपि हिंसा स्यात्? नेति ब्रूमः कूपादौ गवादिमरणे तत्कर्तुर्गोवधकर्तृतापत्तेः। ननु कूपादेरुपकारफलत्वेन चोदनान्न मरणफलत्वम्। असिद्धस्यानुपकारत्वेन तत्फलत्वसम्भवात्। अथ मरणोद्देशेनान्वीयमान इति विशेषणं श्येनश्च तथा कूपादौ च तदभावः? तर्हि पदद्वयघटितस्य हिंसार्थत्वे गौरवं स्यात् मरणानुद्देशेन क्षिप्तनाराचाद्धतब्राह्मणे च हिंसा न स्यात्। किञ्चाव्यवहितमरणफलको व्यापारो हिंसा पचतीत्यादावव्यवहितफलव्यापारस्यैव धातुवाच्यत्वदर्शनात्। नच श्येनस्तथा, विलम्बेन मरणसाधनत्वात्। अत एव खड्गाद्याघातेन विषप्रयोगेण वा व्रणपाकपरम्परया यत्र मरणं तत्र न मुख्यं हन्तृत्वं, प्रायश्चित्तोपदेशश्च मुख्यहन्तृत्वसादृश्यज्ञापनार्थः हन्तृव्यपदेशस्य तत्र गौणत्वात्।

केचित्तु मरणोद्देशेन कृतोऽदृष्टाद्वारकस्तदनुकूलो व्यापारो हिंसा श्येनश्चादृष्टद्वारा मरणसाधनमतो न हिंसा। यदि चादृष्टद्वाराऽपि मरणसाधनं हिंसा स्यात् तदा सप्तमीतैलाभ्यङ्गनिषेधस्याऽदृष्टद्वारेष्टभार्याविनाशकत्वादभ्यङ्गकर्तुर्हिंसकत्वापत्तिरित्याहुः। तन्न युक्तम्। उद्देश्यपदेनैव तद्व्यावृत्तिसिद्धेः। अभ्यङ्गस्य मरणोद्देशेनाक्रियमाणत्वात् अदृष्टाद्वारकपदवैयर्थ्यात्। किञ्च—

---

१ प्रसिद्धस्येति पु० पा०।

"सप्तम्यां स्पृशतस्तैलमिष्टाभार्या विनश्यति"

इति नायं विधिःकिन्तु सप्तमीतैलाभ्यङ्गनिषेधस्यार्थवादः यथा

"तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत्"

इति विद्धोपवासनिषेधस्यार्थवादः विधिना चापूर्वद्वारकल्पनासम्भवात् तावन्मात्रेण च कूपादौ गोमरणेऽपि न तत्कर्तुर्गोवधकर्तृत्वं, नाऽपि परिवेषयितुर्भोक्तृहन्तृत्वं, नाऽपि गललग्नान्नमरणे भोक्तुरात्महन्तृत्वं, व्रणपाकपरम्परया विलम्बेनाऽपि मरणे मुख्यमेव हन्तृत्वम् । नन्वेवं सत्यन्योद्देशेन कृते नाराचप्रक्षेपे तेन च ब्राह्मणे हते तत्कर्तुर्ब्रह्महन्तृत्वं न स्यात् ।

अत्र काश्चित् इष्टापत्तिरेवात्र, व्यपदेशस्तु गौणः प्रयोगो लक्षणया समर्थयितुं शक्यते । अत एवातदुद्देशेन कृते प्रायश्चित्तार्द्धमुक्तमित्याह । तदयुक्तम् । ब्रह्महन्तृत्वेनैव तत्र सम्पूर्णद्वादशाब्दप्रायश्चित्तविधानात् ।

"विहितं यदकामानां कामात्तद्द्विगुणं भवेत्"

इति स्मरणात् ।

"प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्"

इत्यज्ञानकृते प्रायश्चित्तविधानाच्च । तस्मादेवं समाधेयम् । उद्देशपदेनात्रमरणफलकत्वमुच्यते मरणमेव फलं यस्येत्यर्थः । अन्योद्देशेन क्षिप्तनाराचस्य लक्ष्यवेधाभावात् मरणमेव फलं पर्यवसितमिति । प्रकृते तु श्येनजन्यमायुर्भाग्यच्छेदनमेव हिंसा तस्यैव मरणफलकव्यापारत्वात् न श्येनः । अत एवोक्तं श्येनस्तत्राऽसिवत् पृथक् इति ।

अत्र श्येनापूर्वं कुत्र जायत इति वक्तव्यम् । तत्र केचिदाहुः—यो यद्गतफलान्विततया क्रियते स तद्गनुकूलमतिशयं तद्गतमेव जनयतीत्याधेयशक्तिसाधकव्याप्तेर्वै-

रिमारणरूपफलान्वितयागकर्तरि जायत इति । एकदेशिनस्तु श्येनापूर्वं यष्टुः प्रत्यवायापूर्वं तत्फलं च न वैरिहिंसा, किन्तु स्वव्याप्तिरेव नरकः, अपूर्वं तु हिंसामनुत्पाद्य नरकं साधयितुं न शक्नोतीत्यनन्तरं वैरिहिंसामेव जनयति श्येनवत् क्षिप्रकारित्वात्, हिंसायाः क्षणिकत्वेऽपि तज्जन्यमपूर्वं द्वारम् । बलवदनिष्टसाधनत्वात् कथं तत्र प्रवृत्तिरिति चेत्? न कथञ्चिदिति ब्रूमः यो हि हिंसितुमिच्छेत्तस्यायमभ्युपाय इति हि तेषामुपदेशो नतु विधानं अत एव विध्याभासोऽयमित्याहुः । तदयुक्तम् । "अभिचरन्यजेते"ति वैरिहिंसाफलत्वेन तस्य श्रवणात् । नरकस्य तत्फलत्वेनाश्रवणात् कथं तर्हि श्येनहिंसाकर्तुर्नरकपातः? हिंसारूपकर्मकर्तृत्वादिति ब्रूमः । किञ्च उद्देश्यफलरूपाया हिंसाया अपूर्वावान्तरव्यापारत्वमुच्यमानं नरकस्य चाश्रुतस्य श्येनफलत्वकल्पनमलौकिकमेवेत्युपेक्षणीयम् । वस्तुतस्तु वैरिमरणोद्देशेन क्रियमाणः श्येनादिः पुत्रेष्टिन्यायेन फलसमानाधिकरणं वैरिनिष्ठमेवापूर्वं जनयति । नन्वभिचारसाधनत्वेन श्येनश्रवणाद्वैरिमारणरूपफलान्विते यागकर्तरि तदपूर्वं कल्पयितुमुचितम् । सत्यम् । तथाऽपि वैरिमरणस्योद्देश्यत्वेन तत्फलत्वात् मारणस्याऽपि तादर्थ्यात् । हिंसाजन्यापूर्वं तु नरकरूपफलसमानाधिकरणं यागकर्तृनिष्ठमेव । एतच्च कृत्वाचिन्तान्यायेनोक्तम् । भार्यापहारनिमित्तकश्येनाद्यनुष्ठाने प्रत्यवायाभावात् । षडेतानभिचरन् यजेतेति श्रवणात् । अथ श्येनादयो नैव विधीयन्त इत्युच्यते यदाह—भाष्यकारः "नैव श्येनादयः कर्तव्यत्वेन विधेया विज्ञायन्त" इति; कथमविधीयमानस्योपदिश्यमानत्वाभिधानं "योहि हिंसितुमिच्छेत्तस्यायमभ्युपाय इति हि तेषामुपदेश" इति विध्युपदेशशब्दयोस्तुल्यार्थत्वात् ।

अत्र कश्चिदाह—द्वौ विधेर्व्यापारौ एकस्तावद्धात्वर्थफलयोरुपायोपेयभावज्ञापनाख्यः अपरोऽनुष्ठापकत्वरूपः अयं चाधिकारिविधिप्रमितोपायोपेयभावोत्तरकालीनः प्रयोगविधेर्व्यापारः स नैव श्येनादय इति अनेन निषिध्यते। तत्र पुरुषस्य लिप्सयैव प्रवृत्तत्वात् । यस्तु ततः पूर्वभाव्यधिकारविधिव्यापारः तदभिप्रायेण यो हिंसितुमिच्छेदित्यादि। अत एव श्येनेनाभिचरन्यजेतेति हि समामनन्तीत्यनेन 'श्येनस्योपायमात्रतां दर्शयति नाभिचरितव्यमिति च प्रयोज्यतां निषेधति। एवं च सति निषिद्धेषु चोदनालक्षणेषु उपायेषु अनर्थत्वमनिषिद्धेषु ज्योतिष्टोमादिष्वर्थत्वमिति।

तदयुक्तम्। प्रवर्तनैकपरतया विधेः सर्वत्र प्रयोजकत्वाङ्गीकारात्। न हि प्रथममुपायोपेयभावो विधितः प्रतीयते किन्त्वनवगतोपायत्वस्यैव भावार्थस्यानुष्ठानं इदं त्वं कुर्विंतिविधितः। उत्पत्तिविनियोगयोरप्येतन्निर्वाहार्थमेव कल्पनात्। उक्तं च–"एकस्यैव विधेः प्रमेयभेदादुत्पत्त्यादयः क्रमभाविन्यश्चतस्रोऽवस्था भवन्ति" इति। तत्र प्रवर्तनैकपरतया प्रयोजकत्वमेव स्वाभाविकमतः स एव विधिरिति"। यथाऽऽहुः—

"विधात्री च तृतीयोक्ता प्रयोगो यन्निबन्धन" इति।

तस्माद्विधेयोभावार्थो न च तं विधिरनुष्ठापयतीति विरुद्धम्। यदप्युक्तं लिप्सयैव तत्र प्रवृत्तिरिति। तत्र ब्रूमः लिप्सायाः प्रवर्तकत्वे करणांशवदितिकर्तव्यतांशेऽपि सैव प्रवर्तिका स्यात्तश्च प्रयोगविधेरुच्छेद एव। अत एवाऽऽहुः—

"उपदेशाभिधानं च नाविधेयेऽवकल्पते।
श्येनादेरविधाने च कस्याऽन्यस्य विधेयता॥
सर्वत्र च स्थितो न्यायो भावनांशद्वये विधिः॥(श्लो.वा.२०६)

फलांशे भावनायाश्च प्रत्ययो न विधायक" इति च ॥

केचित्तु अविधेयेष्वेव चोदनालक्षणत्वमात्रेणोपदेशवाचोयुक्तिः क्रमवदित्याहुः । यथा क्रमस्याविधेयस्याऽपि चोदनालक्षणत्वं विध्यनुमतत्वात् एवं श्येनादयोऽपि विध्यनुज्ञामात्रेणैव चोदनालक्षणाः न तु विधीयन्ते । विध्यनुज्ञा च विनियोगविषयत्वात् । न तावत् क्रमस्य यागादिवद्विधेयत्वमभावार्थत्वात् । नापि दध्यादिद्रव्यवत्, अमूर्तत्वेनाकारकत्वात् । नाऽप्यरुणादिवत् द्रव्यावच्छेदकतया कारकत्वं एकैकपदार्थावच्छेदकत्वेनाऽनुपलक्ष्यमाणत्वात् अनेकाश्रयत्वात् । नापि सङ्ख्यादिवद्विधानमपृथक्पदाभिधेयत्वात् । पृथक्पदाभिधेया हि सङ्ख्या भवति "तां चतुर्भिरभ्रिमादत्त" इति । सा कथं चिद्विधीयेताऽपि न चैवं क्रमः, प्रचयावगम्यत्वात् । तथा चेदं कृत्वा इदं कुर्वीत इति पदार्था एव कर्तव्यबुद्ध्या गृह्यन्ते न क्रमः । पदार्थानां च बहूनां युगपदेकेन कर्त्राऽनुष्ठातुमशक्यत्वात्प्रयोगविधिः क्रममभ्यनुजानाति । तावन्मात्रेण क्रमः शास्त्रार्थः । एवं च श्येनादयोऽपि न विधीयन्ते नियोगविषयभावगतया तु चोदनालक्षणा इत्युच्यन्ते । अविधेयत्वाच्च निषेधविषयत्वोपपत्तिः । अत एव चोभयमिह चोदनया लक्ष्यते इत्यादिश्येनस्वरूपाभिप्रायमेव । हिंसा हीत्यपि श्येनस्वरूपाभिप्रायमेव । प्राणवियोगफले व्यापारो हिंसा श्येनश्च तथाऽतः सोपि हिंसैव । न च श्येनानन्तरमेव निधनानुपलम्भनात् न श्येनो हिंसेति वाच्यम् । किञ्चिद्विलम्बेऽपि तस्य तत्फलत्वाऽनपायात् । खड्गाभिहतेऽपि क्वचिद्व्रणपाकादिनापि विलम्बसम्भवात् अतश्चोदनालक्षणोनिषिद्धत्वेनानर्थश्च श्येनादिर्धर्मो माभूदित्यर्थग्रहणम् । नैतदपि युक्तम् । दृष्टान्तासिद्धेः । क्रमस्य विधेयत्वाङ्गीकारात् । यत्र विधिं विना पुरुषस्याप्रवृत्तिस्तद्विधेयं,

न च फलादन्यत्र पुरुषो रागादिना प्रवर्त्यते। न च दीक्षाक्रमानुष्ठाने रागादयः प्रवर्तकाः। कथं तर्हि तत्र प्रवृत्तिरिति चेत् विधेरेवेति ब्रूमः विधिर्हि साङ्गे प्रधाने कर्तारमायोजयन् तावतश्चैकेन कर्त्रा युगपदनुष्ठातुमशक्तेरानुपूर्व्यलक्षणं क्रममप्यनुष्ठापयति। पाश्चमिकश्रुत्यादिसहायश्च तत्क्रमानुपूर्व्यविशेषं शास्त्रार्थतया नियच्छति अविनियुक्तस्यानङ्गत्वात्। कथं प्रयोगविधिनाऽनुष्ठापनमिति चेत् न। अविनियुक्तस्याऽपि पश्वेकत्ववदङ्गत्वोपपत्तेः। अन्ये पदार्थाः कर्मस्वरूपानुबन्धाः पृथगङ्गत्वेन विनियुज्यन्ते क्रमस्तु देशादिवत्प्रयोगानुबन्ध इति नास्य पृथग्विनियोगः। किञ्च "अध्वर्युर्गृहपति"मित्यादेः क्रमं विना किमन्यद्विधेयं स्यात् कर्तृदीक्षयोर्नोर्देशादेव प्राप्तेः। नापि वाचकानुपपत्तिः क्त्वाश्रुतेरेव तद्वाचकत्वात् "वषट्कर्तुः प्रथमभक्ष" इत्यादौ चानन्यपराभिधानावगमाद्विधेयत्वं सिद्ध्यति। "वेदं कृत्वा वेदिं करोति" इति सक्रमपदार्थकर्तव्यतावगमात्। एवं च क्रमस्य विधेयत्वान्न तन्निदर्शनेनाविधानमेव श्येनादीनामतोनोदनालक्षणत्वासिद्धिः। किञ्चाऽत्र श्येनादीनामविधेयत्वे किमन्यद्विधेयमिति वक्तव्यम्? अङ्गानि विधीयन्ते इति चेत् साधनांशवत्तेष्वपि रागादेव प्रवृत्तिसिद्धेः। किञ्च विधिविषयाः श्येनादयो न विधीयन्ते इति महदाश्चर्यम्। अविधेयस्य विधिविषयत्वानुपपत्तेः। अविधेयत्वे च भावनांशद्वये विधिरिति स्थितसिद्धान्तहानिः स्यात्। एवमंशद्वयस्याविधेयत्वे ज्योतिष्टोमादेरपि विधेयत्वं न स्यात् ततश्चाधर्मत्वापत्तिः। निषिद्धत्वाभावादेव धर्मत्वं भविष्यतीति चेत्। न। निषिद्धाङ्गत्वेन प्रत्यवायावहत्वादधर्मत्वापत्तेः। यद्यपि स्वरूपेण ज्योतिष्टोमादयो न हिंसा तथाऽप्यग्नीषोमायादिपशुहिंसा तेषां साधनं सा चांशद्वयगामिन्यपि विध्यसं-

स्पर्शो निषिद्धा, अतो निषिद्धाङ्गत्वेन प्रत्यवायजनकत्वं, विधेयत्वाभावे यागस्य फलाङ्गत्वं न स्यात् । तथेतिकर्तव्यताया अपि फलवत्साधनाङ्गत्वाभावः प्रसज्येत । स्यादेतत् साधनत्वेन विहिता अपि साध्यतया न विधीयन्त इति कृत्वा अविधेया इत्युच्यन्ते, अत एवाह "नैव श्येनादयः कर्तव्यतया विज्ञायन्त" इति । नैवम् । साधनत्वेनाऽपि विधिसंस्पर्शेनानर्थत्वाऽसम्भवात् विधानमात्रस्यानर्थत्वापरिपन्थित्वात् । वस्तुतस्तु साध्यत्वेन विधानमनङ्गीकारपराहतमेव मीमांसकानाम् ।

"स्वयमेव हि जानन्ति कर्तव्यं पुरुषाः सदा"

इति साध्ये स्वयमेव पुरुषप्रवृत्तिसम्भवात् । तस्मात् न श्येनादिनिवृत्तिरर्थशब्दस्य प्रयोजनमित्यन्यथा वर्णनीयम् ।

अत्रोच्यते । प्रवर्तकं निवर्तकं च वाक्यं चोदनाशब्देनोच्यतेऽतो निषेधचोदनालक्षितानां धर्मत्वं निवर्तयितुमर्थशब्दः । तदुक्तम्—

"प्रवृत्तौ वा निवृत्तौ वा या शब्दश्रवणेन धीः ।
सा चोदनेति सामान्यलक्षणं हृदये स्थितम्" (श्लो.वा.२१०)॥

अत एव ग्रन्थकारेण यथाश्रुतं भाष्यमुपेक्ष्य प्रवर्तकं निवर्तकं च वाक्यं चोदनेत्युक्तम् । कथं तर्हि भाष्यकारस्य प्रवर्तकवाक्यमात्रोपन्यासः? निवर्तकवाक्योपलक्षणार्थमिति ब्रूमः । यदि प्रवर्तकैकपर एव भाष्याभिप्रायो भवेत्तदाऽर्थशब्दस्यैवंरूपा व्याख्या नोपपद्येत अनर्थानामप्रवर्तकवाक्यलक्षितानामचोदनालक्षणत्वात् । अर्थशब्दसहितस्य वा चोदनाशब्दस्यैतद्व्याख्यानं "प्रवर्तकं वाक्यं चोदने"ति । अर्थस्य हि प्रवर्तकवाक्यलक्षणत्वात् ।

अथ वा चोदनासूत्रे सूत्रकारेण सूचितम् ।
धर्मप्रमाणमेवेति तल्लक्षणमुदीरितम् ॥

---

१ नर्थत्वापरि इति पु० पा० ।

धर्मस्य प्रवर्तकवाक्यप्रमाणत्वात् । एवं च द्विविधचोदनापक्षे विधिचोदनाभ्यो विधेयानां ज्योतिष्टोमादीनामर्थत्वेनावधारणं निषेधचोदनाभ्यश्च निषेध्यानां ब्रह्महत्यादीनामनर्थत्वेन निर्णयः एवमुभाभ्यां चोदनाभ्यामर्थत्वानर्थत्वे लक्ष्येते तल्लक्षणानां ज्योतिष्टोमादीनामत्रार्थग्रहणेन धर्मत्वमुक्तम् । विधेयार्थानां च धर्मत्वे कथिते विपरीतार्थानामधर्मत्वमर्थासिद्धमिति तत्सूत्रकारेण पृथङ्न सूत्रितम् । अत उभयमित्यादिग्रन्थोविधेयप्रतिषेध्ययोर्यागादिब्रह्महत्यादिवर्गयोर्निदर्शनार्थोऽवगन्तव्यः । कथं तर्हि ब्रह्महत्यादिवर्गपरित्यागेन श्येनाद्युपन्यासः श्येनादयो हि विधेयत्वेनेष्टसाधनाः स्वर्गादपि शत्रुवधस्येष्टत्वात् । सत्यम् । श्येनः स्वयमिष्टसाधनत्वादर्थात्मकोपि अनर्थानुबन्धी, तत्फलस्य हिंसारूपस्याऽऽयुर्दभाग्यच्छेदात्मकस्याविहितत्वान्निषिद्धत्वाच्च । तदिदं कार्यगतमनर्थत्वं श्येन उपचरितं, कारणे कार्यवदुपचारात् । अथवा श्येनशब्द एव फल उपचरितः कार्ये कारणवदुपचारात् "हिंसा हि सा सा च प्रतिषिद्धेति" न श्येनरूपाभिप्रायं प्रतिषेधाभिधानमुपपद्यते तस्य विहितत्वेन प्रतिषेधविषयत्वासम्भवादहिंसात्वात् अतस्तत्फलाभिप्राय एव श्येनाद्युपन्यास इति भाष्यकारस्योपचारोऽभिप्रेतः नाभिचरितव्यमित्यत्राप्याभिचारस्यैव श्येनफलस्य निषेधं दर्शयन्न श्येनस्वरूपं निषिद्धमित्याह । यदा तु चोदनाशब्दो यथाश्रुतभाष्यानुरोधेन प्रवर्तकवाक्यपर एव व्यवस्थाप्यते तदाप्युभयमिह चोदनया लक्ष्यत इत्यादिको ग्रन्थो व्याख्याविशेषेणोपपादयितुं शक्यते । तथाहि—उभयं साध्यं साधनं च विधायिकया चोदनया लक्ष्यते । ननु फलांशे स्वयमेव पुरुषाणां प्रवृत्तिसम्भवात्साध्यांशविधानाभिधानमयुक्तम् । सत्यम् । साधनेतिकर्तव्यतांशगोचरमेव वि-

धेः प्रवर्तनं तथाऽपि स्वर्गयागादीनां साध्यसाधनसम्बन्धप्रविधिप्रमाणकत्वात्साध्यांशविधानाभिधानमुपपन्नम् । एवं च फलं साधनं चोभयमपि चोदनालक्षणमित्युक्ते पुनरिदमुच्यते । फलं च यागादीनां द्विविधं अर्थोऽनर्थश्च । तत्र ज्योतिष्टोमादीनां तावत्स्वर्गाद्यर्थरूपं फलं प्राप्यतेऽप्रतिषिद्धत्वात् । श्येनादिफलं तु हिंसाद्यनर्थरूपं प्रतिषेधसद्भावादवाप्यते । एवं च सत्यर्थात्मकस्य फलस्याऽपि यत्साधनं सोऽप्यर्थ इति अतोऽर्थात्मकफलसाधनस्य ज्योतिष्टोमादेर्द्धर्मत्वं वक्तुमर्थपदं प्रयुक्तमित्युक्तं भवति । उक्तं चान्यत्र—

"तस्याऽपि साधनं यत्तदर्थ एवाभिधीयते ।
वक्तुं तस्यैव धर्मत्वमुक्तमर्थविशेषणम्" ॥

एवं श्येनादेरप्यनर्थफलसाधनत्वादेवानर्थत्वम् । अत एव भाष्ये श्येनादिफलपर एव श्येनादिप्रयोगोऽवगन्तव्यः । ननु श्येनादिविधिसामर्थ्यादेव श्येनफलमासाद्यमानं कथमनर्थः स्यात् ? न हिंस्यादित्यादिशास्त्रान्तरेण निषिद्धत्वादिति ब्रूमः । ननु विधिस्पृष्टे निषेधानवकाशः सत्यपि वा प्रतिषेधे नैवंविधस्यानर्थत्वमित्युक्तम् । सत्यम् । फलमुद्दिश्य श्येनोविधीयते, एतावत्येव फलस्य चोदनालक्षणता, न तु फलमेव विधीयते भावनायाः फलांशे प्रत्ययस्याविधायकत्वात् । वक्ष्यति च " जानात्येवाऽयं पुरुषोमयैतत्कर्तव्यमुपायन्तु न वेदे"ति । अतः स्वयमेव तत्र पुरुषप्रवृत्तेः न तद्विषयकप्रवृत्तिज्ञापनं विधेः फलम् । साधनेतिकर्तव्यतयोस्त्वप्रवृत्तः पुरुषः प्रवर्त्स्यत इति तयोर्विधेयत्वम् । वक्ष्यति च सूत्रकारः "तस्य लिप्साऽर्थलक्षणेति । अतः श्येनफलांशोपनिपातिन्यां हिंसायामेव तत्प्रतिषेधो विधिना न वारित इत्यनर्थतामापादयति । श्येनस्य तु सत्यप्यनर्थहेतुत्वे विधिसंस्प-

शेन निषेधाभावाञ्च स्वरूपेणानर्थत्वम् । ननु श्येंशभावनावि-धानाङ्गीकारात् फलस्य च तदंशत्वात्कथमविधेयत्वम् । मैवम् । उक्तोत्तरत्वात् फलांशस्याऽप्युक्तरीत्या विधिसंस्पर्शात् । श्येनस्य तु स्वरूपेण विधेयत्वं स्फुटीकृतं चैतद्भाष्यकारेण योहीत्यादिना लक्षणे शत्रुरुत्पत्तिं दर्शयता । अत्रोंवेकभट्टैरिदं तु वार्तिककारीयं दूषणं समर्थनं च सर्वमेवालूनविशीर्णमित्यादिना श्येनादौ न कस्य चिदनर्थत्वं, ब्रह्महत्यादय एव त्वनर्थत्वेनार्थपदव्यावर्त्याः, श्येनादीनां तु न साक्षान्नाप्युपचारेण, नापि तत्फलस्यानर्थत्वमिति तस्यानर्थत्वप्रतिपादनपरं श्येनो वज्र इत्यादिभाष्यमुपेक्षणीयम् ।

"गुरोरप्यवलिप्तस्य[1] कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते"

इत्यन्तेन ग्रन्थेन वार्तिकं भाष्यं च दूषितं तदस्माभिर्ग्रन्थविस्तरभयात्प्रकृतानुपयोगाच्च न लिखितम् । एवं च साधनेतिकर्तव्यतयोर्विधेयत्वे दैक्षपश्वादिहिंसाऽपीतिकर्तव्यतारूपा विधीयत एव । फलांशस्थैव तु वैदिकी हिंसा न हिंस्यादिति निषिध्यते । नन्वेवं सति फलांशोपनिपातिनी सवस्वारहिंसाऽनर्थो भवेत् । मैवम् । तीर्थबहिर्भूताया एव यज्ञे हिंसाया निषेधात् । इयं तु तीर्थमध्यगता हिंसा विधिस्पृष्टैवेति नानर्थः श्येनफलं तु चिरातिपन्ने श्येने तज्जन्यापूर्वाच्छिन्नभाग्येषु शत्रुषु विद्यमानेषु भवतीति तीर्थबहिर्भावादनर्थ इति तेन क्रतुबहिर्भूता हिंसा वैदिकी निषिध्यते नान्तःक्रत्विति विवेकः । यद्यपि न हिंस्यादित्यादि सामान्येन निषेधेन हिंसामात्रनिषेधप्रतीतेः साधनेतिकर्तव्यतारूपा हिंसा निषेद्धुं शक्यते तथाऽपि पदहोमवत् विशेषेण सामान्यस्य बाधात् न त-

१ भारते रामायणे चैतत्पद्यमस्ति ।

न्निषेधः । ननु केयं साधनांशगामिनी हिंसा ? न ताव-च्छ्येनादिः तस्याहिंसात्वस्योक्तत्वात् । नापि दैक्षपश्वादि-हिंसा तस्या इतिकर्तव्यतात्वात् । उच्यते । प्रधानपशुहिंसै-वात्रोदाहरणं यथा "वायव्यं श्वेतमालभेत भूतिकाम" इति । श्येनोदाहरणं त्वसत्सु भार्यापहारादिषु मन्युहेतुष्वनर्थतया दर्शितम् । आततायिनां वधे दोषाभावस्मरणात् "पडेतान-भिचरन् यजेतेति" बौधायनिकाः पठन्ति ।

"नाततायिवधे दोषो हन्तुर्भवति कश्चन"

इत्यादिस्मृतेश्च । नन्वेवंशद्वयगतहिंसाया अप्रतिषिद्धत्वेऽपि हिंसात्वेनैवाऽनर्थत्वमस्तु । न । निषेधानवष्टब्धत्वेन प्रत्यवायज-नकत्वाभावात् । तथाभावस्य शास्त्रैकसमधिगम्यत्वात् । नहि त्रिवृत्पानविरेकयोरिव साध्यसाधनभावो, हिंसाप्रत्यवाययोः प्रत्यक्षेणैवावगन्तुं शक्यते । नापि बाह्यहिंसावद्विचिकित्साबलेना-श्रानर्थत्वं शास्त्रीयत्वेन विचिकित्साया अभावात् । नापि "हिं-स्यमानदुःखदर्शनेन कर्तुर्दुःखानुमानं यथाऽऽहुर्वृद्धाः "तथा च नारीष्वपि सिद्धमित्यादि" तत्काले तत्कर्तुः सुखोपलम्भात् । कालान्तरे दुःखं भविष्यतीति चेत् । न । तस्य प्रत्यक्षागोचर-त्वात् । प्रत्युत हिंसा सुखकरी हिंसात्वादघवदिति प्रत्यक्ष-दर्शनानुसारेण विपर्ययस्यैवानुमातुं शक्यत्वात् । अत्र क-श्चित् विवादपदं हिंसा प्रेत्यकर्तुर्विषयतुल्यफलदात्री क्रिया-विशेषत्वात् शास्त्रोक्तदानवदित्याह । तन्न । विपक्षे गुरुस्त्रीग-मनादौ हेतोरनैकान्तिकत्वात् । हिंसा प्रेत्यकर्तुरदुःखात्मकफ-लजनिका क्रियाविशेषत्वाच्छास्त्रोक्तदानवदिति साध्यविप-र्ययसाधनाद्विरुद्धोऽयं हेतुः साध्यविकलश्चाऽयं दृष्टान्तः स-

---

१ तै० सं० २ का० १ प्र० । २ तत्त्वश इति० पु० पा० ।

म्प्रदानतुल्यफलाभावात् । अन्या हि प्रीतिर्गृहीतवतो भवति दातुस्तु सवत्सारोमतुल्यानि वर्षाणि स्वर्गो भवतीति शास्त्रेणावगम्यते । अपि च जपादयः क्रियाविशेषा न परेषां पीडानुग्रहयोर्वर्तन्ते चोदितत्वमात्रेण तेषामर्थत्वावगमात् अतस्तद्दृष्टान्तेन चोदिता हिंसाऽर्थ इत्यपि शक्यते साधयितुमतो विरुद्धाव्यभिचारी हेतुः । किञ्च--

"शास्त्रप्रमाणयोर्धर्माधर्मयोरनुमानगीः ।
त्यक्तमन्दाक्षमन्दानामुपहासाय केवलम्" ॥

अधिकं तु वार्तिके ऽवगन्तव्यम् । ननु निषेधशास्त्रेण हिंसामात्रस्य प्रत्यवायशक्तिरवबोधिता सा च दैक्षपशुहिंसायामपि सम्भवति नहि विशेषविधानेन दैक्षपशुहिंसातः सा शक्तिरुत्सार्यते शास्त्राणां वस्तुगतविद्यमानशक्तिबोधकत्वात् नहि शास्त्राणां शक्त्यावापोद्वापयोः सामर्थ्यमस्ति अतो दैक्षपशुहिंसाया अपि शास्त्रानुसारेणैवानर्थत्वमापतति । तर्त्कि निषेधशास्त्रात्सुरापानस्य प्रत्यवायजननशक्तिरवगतेति शूद्रस्याऽपि प्रत्यवायं जनयिष्यति वैश्यस्तोमस्य वैश्यं प्रति फलजननशक्तिर्दर्शितेति विप्रराजन्ययोरपि तत्कर्त्रोः फलं स्यात्? एवमन्यदप्यूह्यम् । तस्माच्छास्त्रानुसारेण कर्मणां फलजननशक्तिरास्थेया । यथाऽऽहुः—

"एवं ये निपुणं प्राहुस्तैरप्येतत्परीक्ष्यताम् ।
सुरापानादिभिः शूद्रः किं याति नरकं कृतैः ॥
वैश्यस्तोमेन किं वा स्यात् विप्रराजन्ययोः फलम् ।
पञ्चम्यामिष्टिकरणान्मध्याह्ने चाग्निहोत्रतः ॥
तस्माद्यद्यादृशं कर्म यादृशोत्पत्तिहेतुकम् ।
शास्त्रेण गम्यते तस्य तादृशस्यैव तत्फलम्"(श्लो.वा.२८४)

एवं सामान्यतो हिंसामात्रे प्रतिषेधाज्जातं प्रत्यवायहेतुत्वज्ञा-

नं तीर्थेषु "योदीक्षितो यदग्नीषोमीय" मित्यादिविधिना बाध्यते । यद्यपि च न शास्त्रस्य शक्त्याऽऽवापोद्वापयोर्व्यापारस्तथाऽपि तदनुसारेणैव तत्तत्क्रियाभेदव्यवस्थिता एव शक्तयोऽवगम्यन्तेऽतो नातिप्रसङ्गः । कथमेकस्यैव कर्मणः शक्तिभावाभावाविति चेत् लौकिककर्मवदितिब्रूमः । यथैकमेव भोजनं स्वस्थातुरकर्तृकं भिन्नशक्तिकं दृष्टं एवमदृष्टार्थेष्वपि कर्मसु भविष्यति । यथा च तत्र स्वस्थातुरकर्तृभेदानिबन्धनभोजनव्यक्तिमाश्रित्य शक्तिभेदः समाधीयते एवमिहापि हिंसाव्यक्तिभेदादुपपन्नः शक्तिभेद इति । किञ्चाङ्गहिंसायां पुरुषार्थत्वे सिद्धे कदा चिदनर्थोऽपि फलतया कल्प्येत । नचैवं, प्रकरणविनियोगेन क्रत्वर्थत्वावगमात् क्रत्वर्थत्वेऽपि चेयं पशुसंस्काररूपा न प्रयाजादिवदारादुपकारिका, हिंसापूर्वमेव विशसनादिसंस्कारानुष्ठानात् पशुं संज्ञपयतीति पशोः प्राधान्यश्रुतेः । संस्कारत्वेऽपि वाऽस्या अयं विशेषो यदियं दृष्टार्थ एवावघातादिवन्न प्रोक्षणादिवददृष्टार्थः । कोऽस्या दृष्टोर्थ इति चेत् क्रत्वपेक्षितैकादशावदाननिष्पत्तिरेव । नचासति हिंसासंस्कारे पशोरेकादशावदाननिष्पत्तिः सम्भवति हिंसानन्तरमेव हृदयाद्यवदानसम्भवात् अवघातानन्तरं वैतुष्यवत् । किञ्च श्येनादीनां ज्योतिष्टोमप्रकृतित्वाच्चोदकप्राप्ताङ्गरूपा हिंसा तत्राऽपि नाऽधर्मः । एवं चत्र्यंशभावनाविधानेऽपि विधेर्हंसवत् नीरक्षीरविवेकात्प्राप्तपरिहारेणाप्राप्तमेव विधिर्गृह्णातीति भाव्यांशस्य च रागादेव प्राप्तेस्तत्परिहारः । अतः श्येनादीनां स्वतो न धर्मत्वं पारम्पर्येणानिष्टसाधनत्वात् । नाप्यधर्मत्वं प्रतिषेधाभावात् । औपचारिकस्तु तत्रानर्थशब्दप्रयोग इति सिद्धम् । यत्कर्म फलद्वाराऽपि नानर्थेनानुबध्यते तत्रैव लोके धर्मशब्दः

प्रसिद्धः। नन्विष्टाभ्युपायश्चोदनालक्षणो धर्म इत्युच्यते श्येनश्च तथा, अतः फलस्यानर्थानुबन्धित्वेऽपि स्वतो धर्म एवायं वक्तुमुचितः। सत्यमेवैतत्। श्येनफलस्य तावन्निषिद्धत्वेनाधर्मत्वमित्येतावदविवादं, श्येनादिस्वरूपं तु विचारयितव्यं तत्र यद्यनिष्टानुबन्धरहितेष्टाभ्युपायश्चोदनालक्षणो धर्म इति लोके प्रसिद्धिस्तदा न श्येनादीनां धर्मत्वं फलद्वाराऽनिष्टानुबन्धित्वात्। यदि तु परम्परयाऽनर्थानुबन्ध्यप्याहत्य प्रीतिफलो नोदनादिलक्षणो धर्म इति तदा श्येनादीनामपि धर्मत्वं। यस्तु हिंसात्वसाधर्म्येण बाह्यहिंसावदग्नीषोमीयादिष्वप्यनर्थत्वमित्याह तस्याऽऽगमविरोधो वक्तव्यः। तथाहि श्रूयते "क्रतौ विधानसामर्थ्यादन्यत्र तीर्थेभ्य" इति। स्मर्यते च "यज्ञार्थं पशवः सृष्टा" इत्यादि। नन्वेवंसति चोदनालक्षणो धर्मो नेन्द्रियादिलक्षणः अर्थो धर्मो नानर्थ इति वाक्यं भिद्येत। पौरुषेयेषु नायं दोषो विशेषतः सूत्रेषु बह्वर्थसूचकत्वादिति चेत्। न सूत्रवाक्यस्याऽपि प्रमाणान्तराप्रतिपन्नवेदार्थप्रतिपादकत्वेन वेदतुल्यत्वात्। उक्तं च—

"नान्यतो वेदविद्भ्यश्च सूत्रवृत्तिक्रियेष्यते" (श्लो.वा.४२)।

उभयं च वेदसूत्रात्मकं वाक्यं वाक्यभेदादिदोषादशक्तं अन्यपरस्य चाऽन्यार्थप्रतिपादनाशक्तेः। उच्यते। प्रमाणान्तरप्रतिपन्नार्थसूचकत्वात्सूत्रस्य नाऽयं दोषः। प्रमाणान्तरेण चोदनालक्षणो चऽर्थश्च लोके धर्मत्वेन प्रसिद्धः ततो यथा तमर्थं सासाधयति तथा व्याख्येयम्। उक्तञ्च—

"तस्मादावर्तते सूत्रं तन्त्रं वा शक्तिभेदतः।
एकदेशानुमानाद्वा द्वे सूत्रे परिकल्पिते"॥

ननु सूत्रद्वयकल्पनायां चोदनालक्षणो धर्म इत्यत्रानर्थस्या-

ऽपि धर्मत्वं प्राप्नोति, अर्थो धर्म इत्यत्र च कृष्यादेरपि, नैवम् ।

"इतरेतरसामीप्यादेतावेव परस्परम् ।
कल्पेते वाक्यशेषेण नान्यावयवकल्पना" ॥

यदर्थो धर्म इत्येकत्र सूत्र उक्तम् । तच्चोदनालक्षण इति । यश्चोदनालक्षण इत्येकत्रोक्तं तदर्थ इति । अथवा अर्थस्य सतश्चोदनालक्षणधर्मत्वमुच्यते एकार्थमेवेति । अस्मिन्पक्षेऽर्थविशेषणविशिष्टचोदनालक्षणानुवादेन धर्मविधानमापद्यते । तथा च विशेषणविशेष्योभयपरत्वात् वाक्यभेदस्तदवस्थस्तस्माद्वाक्यभेदपरिहाराय पूर्वोक्तमेव युक्तम् । अत्रेदमुच्यते । यदि सामान्यतः सिद्धं धर्ममनूद्य चोदना प्रमाणत्वेन विधीयते तदाऽनर्थस्य धर्मत्वं न प्राप्नोत्येव अर्थस्यैव धर्मत्वात् अतो नार्थशब्दव्द्युदसनीयं पश्यामः । सत्यमेवम् । तथाऽप्यभिमतवचनव्यक्तिलाभार्थमेवार्थशब्दप्रयोगः तदभावे हि वचनव्यक्तिसन्देहो भवेत् यश्चोदनालक्षणः स धर्म इत्यपि वचनव्यक्तिः सम्भाव्यते अस्यां च ब्रह्महत्यादीनामपि निषेधविधिलक्षितानां चोदनालक्षितत्वात् धर्मत्वमापद्येत । न चाऽस्यां वचनव्यक्तावर्थशब्दो विधातुं शक्यते वाक्यभेदप्रसङ्गात् । नाप्यनुवदितुं, प्राप्त्यभावात् । नहि चोदनालक्षणोऽर्थसम्बन्धं न व्यभिचरति अनर्थस्यापि तल्लक्ष्यत्वात् । न च तत्परित्यागो युक्तः एकदेशपरित्यागेन सूत्रानर्थक्यापत्तेः । यो धर्म इत्यस्यां तु वचनव्यक्तौ धर्मस्यार्थत्वाव्यभिचारादनुवादकत्वेनान्वयः अतो विध्यनुवादयोर्विशेषसूचनार्थ एवायमर्थशब्दो न विशेषणम् । नन्वस्यां वचनव्यक्तावर्थशब्दस्याविशेषणत्वात् "उभयमिह चोदनया" इत्यादिभाष्यमसम्बद्धं स्यात् तत्राऽनर्थो धर्म उक्तो माभूत् इत्यर्थग्रहणमिति व्यावर्तकत्वेन विशेषणत्वाभिधानात् ।

केचित्तु—लक्षणां परिहरन्तः श्येनादिस्वरूपमेवार्थपदस्य व्यावर्त्यं मन्यन्ते, तेषामेव "नैव श्येनादयः कर्तव्या विज्ञायन्ते" इति विधेयत्वनिराकरणेन प्रतिषेधविषयत्वसमर्थनात्। कथं पुनस्तेषां विधेयत्वं निराक्रियते? तत्राहुः—यस्य हि विधिः स्वसिद्ध्यन्यथानुपपत्त्याऽनुष्ठानमाक्षिपति तद्विधेयमित्युच्यते, का-

---

उच्यते। नायमभिप्रायो भाष्यकारस्य यदेतद्विशेषणं सदनर्थस्य व्यावर्तकमिति। किं तर्हि? अर्थ शब्दप्रयोगे सा वचनव्यक्तिरेव न सम्भवति यथाऽनर्थस्य धर्मत्वं प्राप्नोतीत्यर्थशब्दप्रयोगस्यैतत्फलं यदर्थनिवृत्तिरित्यभिप्रेत्योक्तं अनर्थो धर्म उक्तो माभूदित्यर्थग्रहणमिति। एवं च वचनव्यक्तिविशेषपरिग्रहार्थोऽर्थशब्द इति भाष्यकारेण दर्शितं भवति। किञ्च प्रमाणवचनव्यक्त्याश्रयणे प्रमाणलक्षणस्यादौ निवेश उपपद्यते तत्प्रतिज्ञानात्। स्वरूपवचनव्यक्त्याश्रयणे तु धर्मस्वरूपपरं भेदलक्षणमेवादौ क्रियेत न च तथाऽकरोत्तस्मात्सूत्रकारस्यैषैव वचनव्यक्तिरभिप्रेता।

ग्रन्थव्याख्याप्रसङ्गेन श्येनटीकार्थवर्णनम्।
मीमांसकोपयुक्तत्वात्सङ्क्षेपेणमया कृतम्॥

अत्र प्रसङ्गादेकदेशिमतं दूषयितुमुपन्यस्यति। केचित्त्विति। अस्मिन्पक्षे श्येनादिग्रहणं हिंसालक्षणार्थमिति यदुक्तं तत्परिहृतं भवतीत्यर्थः। अत्रोपपत्तिमाह। तेषामेवेति। यस्मान्नैव श्येनादय इति भाष्येण तेषां श्येनादीनामेव विधेयत्वनिराकरणेन प्रतिषेधविषयत्वं समर्थितं तस्माच्छ्येनादिस्वरूपमेवार्थपदस्य व्यावर्त्यमित्यर्थः। विधेयत्वनिराकरणमेव प्रश्नपूर्वकमुपपादयति। कथमिति। श्येनादीनामपि काम्यत्वा-

म्येषु च कर्मसु कामनावशादेव प्रवृत्तिसिद्धेस्तत एव विधिः सिद्ध्यन्नऽन्यथानुपपत्त्यभावान्न स्वयमनुष्ठानमाक्षिपति ।

ननु कर्तव्यताबोधनमेव प्रवर्तनं कर्तव्यता च वेदे यागस्य लिङैव बोधितेति कथमविधेयत्वम् ? । सत्यम्, न तु यागस्य कर्तव्यता लिङाऽभिधीयते, स्वार्थस्य कर्तव्यतां लिङऽभिधत्ते यागश्च तस्य विषयः करणं च, सोयं कर्तव्यतात्मा नियोगार्थोऽन्यथानुपपत्त्या स्वविषयस्य कर्तव्यतां बोधयन्नऽनुष्ठापक इत्युच्यते । श्येनादीनां तु रागादेवानुष्ठानसिद्धेर्न नियोगस्तेषामनुष्ठानमाक्षिपतीति न तेषां विधेयत्वम् । असति च विधेयत्वे तेषां निषेधविषयत्वादनर्थत्वमिति तद्व्यावृत्त्यर्थमऽर्थपदमिति ।

तत्रेदं वक्तव्यम्—कस्मिन्नंशे तेषां व्यावृत्तिरिति । धर्मत्व इति चेत् ?, न, तत्स्वरूपानभिधानात् । इदं हि सूत्रं वेदार्थस्य कार्यत्वप्रतिपादनार्थं न कर्मस्वरूपलक्षणार्थं यतः श्येनादीनां धर्मत्वं मा प्रसाङ्क्षीदित्यर्थपदेन व्यावृत्तिः क्रियेत ।

त्त्राऽपि कामवशादेव प्रवृत्तिसिद्धेर्नार्थो विधिनेति भावः । अत्र चोदयति । नन्विति । परिहरति । सत्यमिति । स्वार्थस्य नियोगस्येत्यर्थः । कथमविधेयस्य यागस्य कर्तव्यतासिद्धिरत आह । सोऽयमिति । श्येनादीनामपि नियोगादेवानुष्ठानसिद्धेर्विधेयत्वमाशङ्क्याह । श्येनादीनामिति । दूषयति । तत्रेदमिति । तादिति । तन्मतेन सूत्रेण तत्स्वरूपानभिधानात्—धर्मस्वरूपान-

यदि परं कार्यत्वव्यावृत्तिः स्यात्सा चायुक्तेत्युक्तं प्राक्। भवतु वा वाक्यभेदाङ्गीकारेण धर्मलक्षणार्थमपि सूत्रं तथापि चोदनालक्षणपदेन कार्यात्मकमपूर्वमुद्दिश्य तस्य धर्मत्वमुच्यत इति वो मतम्, तत्र श्येनादियागस्य कः प्रसङ्गो यद्व्यावृत्त्यर्थमर्थपदं स्यात्? न हि ज्योतिष्टोमादियागस्यापि धर्मत्वमस्ति, अपूर्वस्य धर्मत्वाभ्युपगमात्।

अथ श्येनाद्यपूर्वस्यैव धर्मत्वमर्थपदेन व्यावर्त्यते? ततो भाष्ये श्येनादिशब्देन कर्मनामधेयेन तत्साध्यमऽपूर्वं लक्ष्यते इत्यऽविशिष्टा लक्षणा स्यात्। यदि चाऽपूर्वमेव प्रत्युदाहरणम् ततो–"हिंसा हि सा सा च प्रतिषिद्धा" इति भाष्यमसङ्गतं स्यात्। श्येनयागो वा तत्फलं वा हिंसा, न त्वऽपूर्वं कथं चिदपि हिंसापदास्पदम्। अस्मिंश्च कल्पे–"कथं पुनरसावनर्थः कर्तव्यतयोपदिश्यते" इति चोद्यम् "नैव श्येनादयः कर्तव्या विज्ञायन्ते" इति चोत्तरमऽपूर्वविषयं स्यात्।

भिधानादित्यर्थः। एतदेव विवृणोति। इदमिति। उक्तं प्रागिति। सिद्धे चार्थे व्युत्पत्तिविरहादप्रामाण्यमेव श्येनादिवाक्यानां स्यात् अतः श्येनादीनामपि कार्यत्वमङ्गीकार्यमित्यर्थादुक्तमिति भावः। भवतु वेति। पूर्वसूत्राद्वेदार्थपरं धर्मपदमनुषज्य चोदनालक्षणो वेदार्थ इत्येकं वाक्यमर्थो धर्म इत्यपरं वाक्यमिति वाक्यभेदाङ्गीकरणेनेत्यर्थः। तत्रेति। श्येनादीनामपूर्वत्वाभावेन धर्मत्वप्रसक्त्यभावात् निषेधानुपपत्तिरित्यर्थः। अपूर्वं व्यावर्त्यत इत्यत्रैव दूषणान्तरमाह। यदि चेति। अस्मिंश्चेति।

न च तस्य कर्तव्यत्वं शक्यते वारयितुं कार्यस्वभावत्वात् ।

एवं च यागकर्तव्यतानिषेधार्थमिदं भाष्यमङ्गीकृत्य यत् तत्समाधानाय प्रयत्यते–'कर्तव्यताविषयो हि नियोगो न पुनस्तस्य कर्तव्यतामाह' इति तदपार्थकम् ।

काम्येष्वपि विधिरेव प्रवर्तको न फलं तस्य विध्यधीनोत्पत्तिकत्वेन यागापेक्षाभावात् । विधिस्तु यागाधीननिष्पत्तित्वाद् यागमनुष्ठापयतीति युक्तम् ।

यदि च विधिरप्रवर्तकः काम्येषु स्याद् इतिकर्तव्यताप्यविधेया स्यात् तस्यामपि फलत एव प्रवृत्तिसिद्धेः साङ्गप्रधानसाध्यत्वात् फलस्य । वक्ष्यति हि—"तद्युक्ते तु फलश्रुतिस्तस्मात्सर्वचिकीर्षा" (जै. सू.

अपूर्वपक्ष इत्यर्थः । ततः किं दूषणं स्यादत आह । न चेति । अत्रैव दूषणान्तरमाह । एवं चेति । अपूर्वकर्तव्यतानिषेधासम्भवान्नैव श्येनादय इत्यादिभाष्यं यागकर्तव्यतानिषेधार्थमित्यङ्गीकृत्य तत्समाधानार्थं प्रतिज्ञातयागकर्तव्यतानिषेधपरत्वस्थापनाय यत्प्रयत्यते तदपार्थकमिति सम्बन्धः । प्रयत्नमेव दर्शयति । कर्तव्येत्यादिना आहेत्यन्तेन । फलेच्छात एव यागे प्रवृत्तिसिद्धेर्न यागस्य कर्तव्यतामाहेति भावः । कथमपार्थकमत आह । काम्येष्विति । एतदनङ्गीकारे दण्डमाह । यदि चेति । अत्र संमतिमाह । वक्ष्यतीति । अङ्गयुक्ते प्रधाने फलश्रुतिर्न केवले तस्मात्सकलाङ्गयुक्तं प्रधानानुष्ठानमित्यर्थः । अस्त्वितिकर्तव्यतांशेऽपि विधिसम्बन्धः किमनिष्टमेतावता स्या-

९ अ. ३ पा. ७) इति । ततश्चाग्नीषोमीयाहिंसाया अपि विध्यभावेन निषेधविषयत्वात् तद्युक्तस्य ज्योतिष्टोमस्याप्यनर्थत्वापत्तेः "कोर्थः? यो निःश्रेयसाय ज्योतिष्टोमादिः" इति भाष्यानुपपत्तिः।

ननु "न हिंस्यात्" इति निषेधोऽनारभ्याधीतत्वात् पुरुषार्थः' तेनानेन पुरुषार्था एव हिंसाः प्रतिषेद्धव्याः' क्रत्वर्थनिषेधे हि सोपि क्रत्वर्थः स्यात्। अविशेषे त्वेकस्य प्रतिषेधविधेः क्रत्वर्थत्वपुरुषार्थत्वापत्त्या वैरूप्यं स्यात्। तस्मात्पुरुषार्थानामेव हिंसानामिह प्रतिषेधो न क्रत्वर्थानामिति।

तदिदं बालसंमोहनम्, नह्यविशेषेणापि प्रतिषेधे वैरूप्यम्। यदि हि क्रत्वर्थत्वपुरुषार्थत्वरूपं विशेषणोद्दिश्य प्रतिषेधः क्रियेत ततः स्यादपि वैरूप्यं प्रतिषेध्योपस्थापितक्रतुपुरुषगोचरत्वात् प्रतिषेधस्य। यदा तु हिंसामात्रमुद्दिश्य प्रतिषेधः क्रियते तदास्य किं वैरूप्यम्?। तद् यथा—या भोजनार्थं मांसोत्पादने हिंसा या च वैरनिर्यातनार्थतया साक्षात् पुरुषार्था तस्यामुभय्यामविशेषेण प्रतिषिध्यमानायामपि नास्ति वैरूप्यम्, एवहापि। इतरथा तत्रापि भोजनाङ्गता पुरुषार्थता च प्रतिषेधस्य स्यादिति वैरूप्यं स्यात्। तस्माद् यैव का चिद् येन केनापि प्रकारेण प्रसक्ता हिंसा सा सर्वा सामान्येन प्रतिषिध्यते। पुरुषार्थश्च प्रतिषेधोऽनारभ्याधीतत्वात्। तस्मादग्नीषोमीयाहिं-

---

दत आह। ततश्चेति। अत्र परिहारं शङ्कते। नन्विति। हिंसामात्रनिषेधमाशङ्क्याह। अविशेषेति। दूषयति। तदिदमिति।

साऽप्यसति विधेयत्वे प्रतिषेधगोचरः स्यात् । विधेयत्वे तु विधेर्विशेषविषयत्वात् सामान्यविषयो निषेधस्तद्विरोधाद् हिंसान्तराण्यवलम्बते ।

ननु सत्यपि विधेयत्वे विधेः क्रत्वर्थत्वात् प्रतिषेधस्य च पुरुषार्थत्वाद्विषयभेदेनाविरोधान्न बाधः । न ह्यदं विरुद्धं क्रतोर्हिंसया भवितव्यं पुरुषस्य तु तद्वर्जनेनेति । सत्यम्–अङ्गविधिमात्राऽऽलोचनायां नास्ति विरोधः, ज्योतिष्टोमविधिस्तु साङ्गं प्रधानं पुरुषस्य विदधत् पुरुषार्थहिंसानिषेधमग्नीषोमीयहिंसायामवतरन्तं निरुणद्धि । न ह्यग्नीषोमीयहिंसां वर्जयता ज्योतिष्टोमः शक्यतेऽनुष्ठातुम् । तस्मादस्ति विरोध इति सामान्यस्य बाधः । विधौ त्वऽप्रवर्तके सत्यऽग्नीषोमीयहिंसापि प्रतिषिध्येत ।

किमर्थं च श्येनस्य विधेयत्वं निराक्रियते ? प्रतिषेधसिद्ध्यर्थमिति चेत् ?, कः प्रतिषेधः ?, "न हिंस्यात्सर्वाभूतानि" इति नायं निषेधः श्येने प्रवर्तते हिंसाविषयत्वात् । श्येनफलं च हिंसा न श्येनः । तथा

वैरूप्योपपत्तिमाह । प्रतीति । विधेयत्वपक्षे नायं दोष इत्याह । विधेयत्वे त्विति । अविरोधं शङ्कते । नन्विति । विरोधाभावादत्राप्यवतरन्तं प्रतिषेधं विशेषविधिर्न वारयतीत्यर्थः । अङ्गविधीति । यद्यपि केवलोऽङ्गविधिः क्रत्वर्थ एवेति न तन्मात्रपर्यालोचनया विरोधः सम्भवति तथाऽपि साङ्गज्योतिष्टोमविधेः पुरुषार्थत्वापत्त्याऽस्ति विरोध इति भावः । इदानीं हिंसायामेव प्रत्युदाहरणत्वं स्थिरीकर्तुं श्येनस्य प्रतिषेधाविषयत्वमेव प्रतिपादयितुमाह । किमर्थमिति । अयमभ्युपाय इत्यनेन श्येनस्य

चोक्तम्—"यो हि हिंसितुमिच्छेत्तस्यायमभ्युपाय इति हि तेषामुपदेशः" इति।

कश्चित्त्वाह—श्येनस्य कर्तव्यत्वे सति बलात्तत्फलमपि हिंसा कर्तव्या भवतीति न निषेद्धुं शक्यते, अतः फलकर्तव्यतानिरासार्थं श्येनकर्तव्यता बलान्निरस्यते इति। तदिदमसम्बद्धम्—यथैव हि श्येनापूर्वस्य कर्तव्यतायां सत्यामपि तत्साध्यफलस्य कर्तव्यता न प्रसज्यते तथा यागस्य कर्तव्यत्वे सत्यपि रागप्राप्तस्य फलस्य नास्ति कर्तव्यताप्राप्तिः। तस्मादनर्थकं श्येनकर्तव्यतानिराकरणम्। तस्माद्धिंसैवात्र प्रत्युदाहरणम्।

इदं चापरमेकदेशिनः प्रष्टव्याः—अर्थशब्देन किमुच्यते इति, यदि श्रेयस्साधनम्?, नित्यानां धर्मत्वं न स्यात्। अथ यन्निषिद्धफलं न भवति तदर्थशब्दे-

---

हिंसासाधनत्वमुच्यते न हिंसात्वमित्यर्थः।

प्रकारान्तरेण श्येनकर्त्तव्यतानिरासमुपपादयितुमाह। कश्चित्त्विति। एतदपि दूषयति। तदिदमिति। एवं श्येनादिस्वरूपमेवार्थशब्दस्य व्यावर्त्यमित्येकदेशिमतं निराकृत्य तन्मतेऽर्थशब्दार्थमपि निराकर्तुमाह। इदमिति। तन्मते नित्यानां पण्डापूर्वमात्रजनकत्वेन श्रेयस्साधनत्वाभावादित्यर्थः। अस्मिन्पक्षे श्येनादिस्वरूपव्यावर्तकत्वमर्थशब्दस्य भवतीति भावः। एतदपि दूषयति। तथेति। "ब्राह्मणो न हन्तव्य" इत्यत्र ब्राह्मणहननाभावविषयस्यापूर्वस्यापि धर्मत्वप्रसङ्ग इत्यर्थः। निराकरणमुपसंहरति।

नोच्यते ?, तथा सति नञर्थविषयस्यापूर्वस्य धर्मत्वप्रसङ्गः, चोदनालक्षणत्वान्निषिद्धफलत्वाभावाच्च। भवत्विति चेत् ?, न, लोकविरोधात्। यो हि हिंसाया-मुद्युक्तः प्रतिषेधवशान्निवर्तते न तं धार्मिक इत्याचक्षते किं त्वधर्मान्निवृत्त इत्येतावत्। तदाहुः—"लोकसिद्धस्य लक्षणं परीक्षकैर्वक्तव्यं न वृद्ध्यादिवत् परिभाषणम्" इत्यास्तां तावत्॥

॥ इति चोदनासूत्रम् ॥ २ ॥

इतीति। अधिकरणस्वरूपं त्वेवम्। पूर्वसूत्रे विचारविषयत्वेन धर्म उक्तस्तत्र लक्षणप्रमाणाभ्यां वस्तुस्वरूपसिद्धेर्धर्मे लक्षणं प्रमाणं च नास्ति उतास्ति इति संशयः।

" लौकिकाकारहीनस्य तस्य किं नाम लक्षणम्।
मानशङ्का तु दूरेऽत्र प्रत्यक्षाद्यप्रवर्तनात् " (जै.न्या.मा.)॥

अतो लक्षणप्रमाणरहितस्य न विचारविषयत्वमिति पूर्वः पक्षः। माभूच्चक्षुरादिगम्यो लौकिक आकारस्तथापि चोदनागम्यश्रेयस्साधनत्वादिलक्षण आकारोऽस्ति। एवं चार्थत्वे सति चोदनागम्यो धर्म इति लक्षणमुक्तं सूत्रकृता। अर्थो धर्म इत्युक्ते ब्रह्मणि घटादौ चातिव्याप्तिस्तन्निवृत्त्यर्थं चोदनालक्षण इत्युक्तम्। अर्थपदं चानर्थव्यावृत्तये। चोदनागम्यत्वे धर्मस्य चोदनैव तत्र प्रमाणमित्युक्तं भवति। तस्माल्लक्षणप्रमाणाभ्यामुपेतो धर्मो जिज्ञास्य इति सिद्धान्तः॥ २॥

(तृतीयं धर्मप्रमाणपरीक्ष्यताधिकरणम्)

सू० तस्य निमित्तपरीष्टिः* ॥ ३ ॥

अनेन सूत्रेण चोदनाख्यस्य निमित्तस्य परीक्षणमस्मिन् पादे वक्ष्यमाणम् " अथातः शेषलक्षणम् " " अथ विशेषलक्षणम् " इतिवत्सुखग्रहणार्थमनुकीर्त्यते ॥ ३ ॥

तस्य निमित्तपरीष्टिः ॥ ३ ॥ अत्र " चोदनालक्षणोऽर्थो धर्मः " इति प्रतिज्ञायां हेतौ वक्तव्ये मध्ये निमित्तपरीक्षाप्रतिज्ञाया असङ्गतिमाशङ्क्याह । अनेनेति । यद्यपि चोदनासूत्रे वक्ष्यमाणोऽर्थः सङ्क्षेपेण प्रतिज्ञातस्तथाऽपि प्रतिज्ञासङ्करे सति न ज्ञायते कस्य प्रतिज्ञाभागस्य सदौत्पत्तिकसूत्राभ्यां हेतुरभिधीयते इति सुखग्रहणार्थमस्मिन् पादे चोदनाख्यस्य धर्मनिमित्तस्य परीक्षणं प्रतिज्ञायत इत्यर्थः । अयमत्र सूत्रार्थः तस्य धर्मस्य ज्ञाने यन्निमित्तं प्रमाणं चोदनाभिधानं तत्परीष्टिः परीक्षा कर्तव्येति । इषुगतावित्यस्माद्धातोरनिच्छार्थस्येति युचि विहिते परेर्वेतिक्तिन्युचोर्विकल्पस्मरणात् युज्विधौ पर्येषणेति रूपं क्तिन्विधौ तु परीष्टिरिति रूपं सिद्ध्यति । अत्र धर्मप्रमाणं परीक्ष्यं न वेति सन्देहे प्रमाणोपदेशेनैव प्रमेयसिद्धेः किं परीक्षयेति पूर्वः पक्षः । नात्रासिद्धवल्लक्षणप्रकथनमात्रं किन्तु विचारशास्त्रत्वादस्य सर्वथा प्रमाणपरीक्षा कर्तव्येति सिद्धान्तः ॥ ३ ॥

---

* तस्य—धर्मस्य निमित्तस्य प्रमाणस्य परीष्टिः—परीक्षणं क्रियत इति सूत्रार्थः ।

(चतुर्थे धर्मे प्रत्यक्षस्याऽप्रामाण्याधिकरणम्)

चोदनैवेत्यस्याऽर्थस्य साधनाय प्रत्यक्षादीनामनिमित्तत्वमुच्यते—

सू० सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् * ॥ ४ ॥

प्रत्यक्षं तावदिन्द्रियार्थसंप्रयोगजन्यत्वेन विद्यमानोपलम्भनत्वाद् भविष्यति धर्मे न निमित्तम् । सत्संप्रयोगजन्यत्वमाभासेऽपि तुल्यत्वादलक्षणमिति नैयायिका दूषयन्ति, तत्तु लक्षणानभिधानादऽदूषणम् । नहीदं लक्षणं प्रत्यक्षस्य, किं त्वनिमित्तत्वकथन-

सत्सम्प्रयोगे ॥ ४ ॥ सूत्रसङ्गतिं तावत्करोति । चोदनैवेति । अनिमित्तत्वमेवोपपादयति । प्रत्यक्षं तावदिति । अत्र भाष्यकारेणैतत्सूत्रं सकलमेव प्रत्यक्षस्यानिमित्तत्वकथनपरत्वेन व्याख्यातं, वृत्त्यन्तरे तु "सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्ष"मित्येतावत्प्रत्यक्षलक्षणपरत्वेन व्याख्यातमवशिष्टं तु तस्य धर्मं प्रत्यनिमित्तत्वेन, तदस्य लक्षणपरत्वे परोद्भावितं दूषणमनूद्य परिहरति । सदिति । कथं लक्षणानभिधानमत आह । नहीति । अत्रेयमुपपत्तिः न तावदस्य सूत्रस्य प्रत्यक्षलक्षणपरत्वे "चोदनालक्षणोऽर्थो धर्म" इत्यनया प्रतिज्ञया सम्बन्धः सम्भवति । निष्प्रयोजनं च शाब्दप्रमाणाधिकारे प्रत्यक्षलक्षणकथनं, अथानुक्तस्वरूपस्यानिमित्तत्वमेव प्रतिपादयितुं न शक्यतेऽतस्तल्लक्षणकथनं प्रयोजनवत् ? तर्ह्यनुमानादेरपि लक्षणं वक्तव्यं स्यात् । नच तदुक्तम् । "सम्भवत्येकवाक्यत्वे वाक्यभेदश्च नेष्यते" लोकप्रसिद्धव्यवहारिणोमीमांसकस्य तल्लक्षणकरणं चायुक्त-

* सता—विद्यमानेनाऽर्थेन इन्द्रियाणां सम्प्रयोगे सन्निकर्षेसति या पुरुषस्य बुद्धिर्जायते तत्प्रत्यक्षं धर्मेऽअनिमित्तं-अप्रमाणं, कुतः प्रत्यक्षस्य विद्यमानवस्तुन एव ज्ञापकत्वात् धर्मस्य च भविष्यत्त्वात् न तदगम्यतेति सूत्रार्थः ।

मात्रम्। तत्र हेतुः विद्यमानोपलम्भनत्वं तत्साधनं च सत्संप्रयोगजत्वम्। न हि सत्संप्रयोगजमऽविद्यमानोपलम्भनं सम्भवति।

इन्द्रियार्थसंयोगजत्वं सुखादिज्ञानेष्वव्याप्तेरहेतुरिति चेत् ?, न, तेषामपि मनस्संज्ञकेन्द्रियसंप्रयोगजत्वात्। मनस्सद्भावे च सुखादिज्ञानमेव प्रमाणम्, अपरोक्षावभासज्ञानस्येन्द्रियाधीनतया रूपादिज्ञानेषु व्याप्तिदर्शनात् सुखादिविषयमऽपरोक्षज्ञानमिन्द्रियमनुमापयति। तत्र चक्षुरादीनामसम्भवात् तेभ्योऽन्यदवतिष्ठते।

मेवातोऽनिमित्तत्वकथनपरमेवैतादिति। अस्मिन्नेवार्थे सूत्रं योजयति। किन्त्विति। प्रत्यक्षं धर्मे ऽनिमित्तमित्युक्ते कस्मादित्यपेक्षायां विद्यमानोपलम्भनत्वादिति हेतुः। एतदुपपादकत्वेन सत्सम्प्रयोगजत्वाद्युपन्यासः। सता विद्यमानेनार्थेनेन्द्रियाणां सम्प्रयोगे सति या पुरुषस्य बुद्धिर्जायते तत्प्रत्यक्षं धर्मेऽप्रमाणं विद्यमानार्थग्राहकत्वादिति सूत्रार्थः। अत्रेन्द्रियाणामित्युपलक्षणार्थम्। तदुक्तम्—

"यद्वेन्द्रियं प्रमाणं स्यात्तस्य चार्थेन सङ्गतिः।
मनसो वेन्द्रियैर्योग आत्मना सर्व एव वा॥
तदा ज्ञानं फलं तत्र व्यापाराच्च प्रमाणता"(श्लो.वा.६१)।

इन्द्रियमिन्द्रियार्थसन्निकर्षो वा इन्द्रियमनःसंयोगो वा आत्ममनस्संयोगो वा। आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेनेति संयोगत्रितयमेकं प्रमाणम्। बुद्धिजन्मेत्यनेन जायमाना बुद्धिः प्रमाणमित्युक्तं न भूता नापि भाविनी, अत एव बुद्धेः कारकान्तराद्वैलक्षण्यं तद्धि जन्मातिरेकिव्यापारा-

अत्र कश्चित्—नित्यद्रव्यगतविशेषगुणत्वात्सुखादीनां द्रव्यान्तरसंयोगजत्वम्, पार्थिवपरमाणुगतरूपादीनामग्निसंयोगजत्वदर्शनात्, यच्च द्रव्यान्तरं तन्मन इत्याह।

तन्न युक्तम्—शरीरं हि भोगायतनम्, किं च तस्य भोगायतनत्वमन्यत् तत्संयोगापेक्षसुखाद्युत्पत्तेः १, अशितपीताद्याधारत्वाच्च न बहिः शरीरात्सुखाद्युत्पत्तिः। अतः शरीरसंयोगादेव सिद्धेर्न द्रव्यान्तरानुमानम्। किं च पार्थिवगुणानामेव द्रव्यान्तरसंयोगापेक्षा दृष्टा न द्रव्यमात्रगुणानाम्। तेजस्संयोग एव च कारणतया दृष्टो न द्रव्यमात्रसंयोगस्तस्मान्नैवं मनस्सिद्धिरिति सुखाद्यऽपरोक्षज्ञानमेव मनसो लिङ्गम्।

न्तरेण प्रधानक्रियां निष्पादयति बुद्धिस्तु जन्मनैवेति। तथाहुः—

"बुद्धिजन्मेति चाप्याह जायमानप्रमाणताम्।
व्यापारः कारकाणां हि दृष्टो जन्मातिरेकतः॥
न हि तत्क्षणमप्यास्ते जायते वाऽप्रमात्मकम्।
येनार्थग्रहणे पश्चाद्व्याप्रियेतेन्द्रियादिवत्॥
तेन जन्मैव विषये बुद्धेर्व्यापार इष्यते"(श्लो.वा.५६)इति॥

अत्र केचित् प्रकारान्तरेण मनः साधयन्ति तद्दूषयितुमुपन्यस्यति। केचित्त्विति। अर्थान्तरापत्त्या दूषयति। तन्निवति। अर्थान्तरत्वमेव विवृणोति। शरीरं हीति। तत्संयोगापेक्षया सुखाद्युत्पत्तेः सकाशात्—किमन्यद्भोगायतनत्वं शरीरस्य स्यात्, अपि त्वेतदेव यच्छरीरसंयोगेनात्मनि सुखादिकं जन्यतेऽतः शरीरात्मसंयोगजत्वात्सुखादीनां द्रव्यान्तरं शरीरमेव

किं पुनरिन्द्रियलक्षणं चक्षुरादिषु मनसि चानुस्यूतम्? । उच्यते—यत् संप्रयुक्तेऽर्थे विशदावभासं विज्ञानं जनयति तदिन्द्रियमित्युच्यते, तच्च द्विविधम्—बाह्यमाभ्यन्तरं च, बाह्यं पञ्चविधम्—घ्राणरसनचक्षुस्त्वक्श्रोत्रात्मकम् । आन्तरं त्वेकं मनः । तत्राऽऽद्यानि चत्वारि च—पृथिव्यप्तेजोवायुप्रकृतीनीत्यऽक्षपाददर्शनवदभ्युपगम्यन्ते । श्रोत्रं त्वाकाशात्मकं तैरभ्युपगतं वयं तु—"दिशः श्रोत्रम्" इति दर्शनाद् दिग्भागमेव कर्णशष्कुल्यवच्छिन्नं श्रोत्रमाचक्ष्महे । मनस्तु पृथिव्यादीनामेवान्यतमात्मकं तेभ्योऽन्यद्वा सर्वथा तावदस्ति मनः । तच्चात्मतद्गुणेष्वेव स्वतन्त्रं प्रवर्तते न बाह्येषु रूपादिष्वित्याऽऽन्तरमित्युच्यते । रूपादिज्ञानेष्वपि तच्चक्षुरादिसहायं प्रवर्तते, एवऽमनुमानादिष्वपि लिङ्गादिसहायम् । अन्यमनस्कस्य संयुक्तेष्वपि रूपादिषु ज्ञानानुत्पत्तेः । स्मृतावपि संस्कारपरतन्त्रं प्रवर्तते न स्वतन्त्रम् ।

नन्वनुमानादीनां मनोजन्यत्वात् तेषां च भूतभविष्यतोरपि प्रवृत्तेरिन्द्रियजन्यत्वं विद्यमानोपल-

---

सिद्ध्यति न मन इत्यस्मदुक्त एव प्रकारो मनस्साधक इत्यर्थः । स्पष्टार्थोऽग्रिमग्रन्थः । अत्रानेकप्रकारं सौत्रपदव्याख्यानमाक्षेपसमाधानपूर्वकं योगिप्रत्यक्षनिराकरणं साङ्ख्यसिद्धान्तसिद्धवृत्तिगमनपक्षनिराकरणमिन्द्रियभौतिकत्वनिरूपणं प्राप्यकारित्वादिस्थापनं तत्प्रासङ्गिकमन्यदपि प्रमेयजातं वार्तिके टीकायां चावगन्तव्यम् । विस्तरभयादस्माभिर्न लिखितम् । प्रकृतं निगमयति । तदेवमिति । नन्वनुमानाद्यपि न ध-

म्भनत्वेनाऽनैकान्तिकं स्यात्। न स्यात्-नहीन्द्रियजन्यत्वं हेतुः किं त्विन्द्रियसंप्रयोगजत्वम्। न चानुमानेऽतीताया भविष्यन्त्या वा वृष्टेरनुमीयमानाया मनसा संप्रयोगोस्तीत्यव्यभिचारः। तदेवं प्रत्यक्षं तावदऽनिमित्तं तत्पूर्वकत्वाच्चानुमानाद्यपि। न ह्यऽगृहीते धर्मे तेन सह कस्य चित्सम्बन्धग्रहणं संभवति। सादृश्यविषयकत्वाच्चोपमानं दूरभ्रष्टम्।

र्मे निमित्तं प्रत्यक्षपूर्वकत्वादित्यनुपपन्नं, द्विविधं हि प्रत्यक्षं सविकल्पकं निर्विकल्पकं च। न तावन्निर्विकल्पकपूर्वकत्वमनुमानस्य, लिङ्गलिङ्गिनोः सामान्यविषयत्वात्। स्वलक्षणविषयेण निर्विकल्पकेन ग्रहणासम्भवात्। नाप्युपमानस्य तत्पूर्वकत्वं सादृश्यस्य निर्विकल्पकागोचरत्वात्। स्मृते च नगरस्थे गवि यत्सादृश्यग्रहणं तदुपमानम्। न च तन्निर्विकल्पके सम्भवति। यच्चानुपपद्यमानं दृष्ट्वाऽर्थापत्तिज्ञानमुत्पद्यते तस्यापि सविकल्पकगोचरत्वेन निर्विकल्पकेनाग्रहणम्। अस्तु वा सविकल्पके प्रत्यक्षपूर्वकत्वं तथाऽपि भागासिद्धोऽयं हेतुः अनुमितानुमाने लिङ्गलिङ्गिनोरुभयोरपि प्रत्यक्षाविषयत्वात्। परमाणुमहं जानामीत्यादौ प्रत्यक्षस्यानुमानपूर्वकत्वदर्शनात्। किञ्च तत्पूर्वकत्वं तत्प्रत्यक्षावगतिवेलायामेव तत्प्रवृत्तिरिति। तन्न। गृहीतग्राहित्वेनाप्रामाण्यात्। यद्यन्यदा प्रत्यक्षमन्यदा चानुमादीनि प्रमाणानि प्रवर्तन्त इति तत्पूर्वकमुच्येत। तर्हि प्रत्यक्षागोचरेऽपि भविष्यत्यपि धर्मे नानुमानप्रवृत्तिर्विरुद्ध्येत। तथापि वेदेऽपि प्रत्यक्षेण वर्णान्—गृहीत्वैवार्थावधारणदर्शनेन प्रत्यक्षपूर्वकत्वान्न वेदस्य धर्मे निमित्तत्वं स्यादिति दूषणजातं परिहरन्—तत्पूर्वकत्वमुपपादयति। न हीति।

अर्थापत्तिरपि धर्मेण विनाऽनुपपद्यमानस्य कस्य चिद्-ऽदर्शनादसमर्था ।

ननु जगद्वैचित्र्यमनुपपन्नम् ? । न, स्वाभाविकत्वे-नोपपत्तेः । यद्यपि तदनुपपत्त्या किं चिददृष्टं कल्प्येत तथापि को धर्मः को वाऽधर्म इति विवेकाभावा-

---

प्रमाणान्तरगृहीतयोरेव साध्यसाधनयोर्व्याप्तिग्रहणसम्भवादत्र च प्रत्यक्षस्यैव प्रमाणान्तरत्वात्—तत्पूर्वकत्वापात्तिरित्यर्थः। अयमाशयः । न धर्मे प्रत्यप्रामाण्ये साध्ये प्रत्यक्षपूर्वकत्वादित्ययं हेतुरुपदिश्यते, येन हेतुदोषा उद्भाव्येरन् किन्तु प्रत्यक्षपूर्वकत्वाद्यत्प्रामाण्यं तस्य धर्मे प्रत्यसम्भव इत्युच्यते । यस्मात्—

"प्रत्यक्षेण गृहीत्वा च लिङ्गाद्यन्यतमं ध्रुवम् ।
प्रवृत्तिरनुमानादे र्नच धर्मे ऽस्ति तादृशम्"(श्लो.वा.९६)।

अनुमितानुमानस्यापि पारम्पर्येण प्रत्यक्षपूर्वकत्वाद्धर्मे प्रत्यसम्भव इति । प्रयोगश्च धर्मो नानुमानगोचरः केनचिद्वस्तुना सहादृष्टपूर्वत्वादसाधारणवस्तुवत्, तथा नानुमेयोऽपि अदृष्टसदृशत्वादसाधारणवस्तुवत् । ननु सुखित्वदुःखित्वादि जगद्वैचित्र्यमनुपपद्यमानमदृष्टं कल्पयतीति शङ्कते । नन्विति । परिहरति । नेति । स्वभावत एव कानि चित्कारणानि सुखिरूपपदार्थमुपजनयन्ति कानि चित् दुःखिरूपमिति किमत्रादृष्टकल्पनयेत्यर्थः । यथा हि कर्मणां विचित्रफलजननशक्तिः स्वभावादेव भवति तथा जगद्वैचित्र्यमपि स्वभावादेवास्त्विति भावः । उक्तं च—

" यथा च फलवैचित्र्ये कर्मणां शक्तता स्वतः ।
तथा विचित्रता लोके स्वभावादुपपत्स्यते" (श्लो.वा.१०४)॥

दवश्यं चोदनैवार्थनीया । सा चेदङ्गीकृता कृतमर्थापत्त्या, सामान्यतोदृष्टेन वा ।

ननु विकल्पनिमित्तं सम्बन्धग्रहणं तत्कथं प्रत्यक्षपूर्वकत्वम् ? । सविकल्पकमप्यनुपरतेन्द्रियव्यापार-

अस्तु वाऽदृष्टमात्रं प्रत्यर्थापत्तेः प्रामाण्यं तथाऽपि न तन्मात्रज्ञानं कुत्राप्युपयुज्यत इति तद्विशेषज्ञानार्थं चोदनैवाभ्यर्थनीयेत्याह यद्यपीति । एतस्मात्कर्मणइदं फलं भवतीति विशेषज्ञानं विना प्रवृत्तिरेव न भवतीत्यर्थः । यथाऽऽहुः—

" स्वर्गपुत्रादिभेदश्च कीदृशात्कर्मभेदतः ।
इति यावन्न विज्ञातं तावन्नैव प्रवर्तते" ॥

सूत्रकारेण धर्मविशेषजिज्ञासैव प्रतिज्ञाता, उपरिष्टाद्विशेषाणामेव जिज्ञास्यमानत्वात् । हानोपादानार्थिभिस्तस्यैव प्रवृत्त्यङ्गस्य ज्ञानस्य मूलपरीक्षणात् । औलूक्यास्तु जगद्वैचित्र्यात्सामान्यतः सिद्ध आगमेन विशेषतोऽवगम्यत इति द्वाभ्यामेव प्रमाणाभ्यां धर्मः परिनितिष्ठतीत्याहुः तत्राह—सा चेदिति । सामान्यं हि साधयन्ती अर्थापत्तिर्न विशेषं निर्धारयितुं समर्था, शास्त्रं तु विशेषं साधयत्सामान्यालीढमेव साधयतीति, तस्मादकारणमर्थापत्तिः सामान्यसिद्धावित्यर्थः । ये तु वदन्ति नेयमर्थापत्तिः किन्तु सामान्यतोदृष्टानुमानमिदं, कार्यसामान्यस्य कारणसामान्येन व्याप्तेः, तेषामप्यर्थापत्तिनिरासेनैव निस्तार इत्यभिप्रेत्याह । सामान्यत इति । सविकल्पप्रामाण्यमसहमानः शङ्कते । नन्विति । तत्कथमिति । सविकल्पकस्याप्रत्यक्षत्वादिति भावः । परिहरति । सविकल्पकमिति । निर्विकल्पकजन्यस्यापि पारम्पर्येणेन्द्रियजन्यत्वमस्तीति भावः । तदुक्तम्—

स्य जायमानमऽपरोक्षावभासत्वात् प्रत्यक्षमेवेत्यदोषः।

विकल्पश्चापरोक्षावभासश्चेति चित्रम्, अपरोक्षमिति हि स्वलक्षणमुच्यते तद्विषयोऽवभासोऽपरोक्षावभासः। विकल्पस्त्वभिलापसंसर्गयोग्यप्रतिभासत्वान्न स्वलक्षणं स्पृशति, न ह्यभिलापः स्वलक्षणं स्पृशति, यदि स्पृशेदभिलापमात्रेणापि विनाऽक्षव्यापारमऽपरोक्षावभासः स्यात्, न चाऽसावस्ति, तदुक्तम्—

"ततः परं पुनर्वस्तु धर्मैर्जात्यादिभिर्यया।
बुद्ध्याऽवसीयते सा हि प्रत्यक्षत्वेन सम्मता"(श्लो.वा.१२०)॥

नन्विन्द्रियस्य निर्विकल्पकोत्पत्तावेवोपक्षीणव्यापारत्वादिन्द्रियसम्प्रयोगस्य च शब्दादिस्मरणेन व्यवहितत्वादप्रत्यक्षत्वं सविकल्पकस्यापद्यत इत्यत आह। अनुपरतेन्द्रियेति। अनुपरतेन्द्रियव्यापारस्य जायमानं ज्ञानमिन्द्रियाधीनत्वादिन्द्रियैर्व्यपदिश्यते शब्दादिस्मरणेनेन्द्रियाणामदूषितत्वात्। स्मृतिसहायानामपि तेषामेव करणत्वादिति भावः। उक्तंच—

" तेनेन्द्रियार्थसम्बन्धे विद्यमाने स्मरन्नपि।
विकल्पयन् स्वधर्मेण वस्तु प्रत्यक्षवान् नरः"(श्लो.वा.१२३)॥

अत्र चोदयति। विकल्पश्चेति। एतदेव विवृणोति। अपरोक्षमिति। स्वलक्षणं—वस्तुमात्रम्। अभिलापो—गौरयमित्यादिशब्दः। सविकल्पकस्य स्वलक्षणासंस्पर्शे हेतुरभिलापेति। अभिलापस्य स्वलक्षणसंस्पर्शे सविकल्पकस्यापि स स्यादिति भावः। न चैवमस्तीत्याह—नहीति। स्पर्शेऽनिष्टमाह। यदीति। विनाऽप्यक्षव्यापारमभिलापमात्रेणापरोक्षावभासः स्यादित्यन्वयः। यथा वह्नित्वगिन्द्रियसंयोगाद्दाहशब्दार्थस्यापरोक्षावभासो भवति न तथा शब्दप्रयोगमात्रेणेति दृष्टान्तार्थः। वि-

"अन्यथैवाग्निसंयोगाद् दाहं दग्धो हि मन्यते ।
अन्यथा दाहशब्देन दाहार्थः संप्रकाशते" इति ।

तस्मादभिलापास्तावन्न विशदाकारमवभासयन्ति तत्समानविषया विकल्पा अपि ।

यस्त्वयं विस्फारिताक्षस्य—"गौरयम्" इति विकल्पो विशदावभासः स समानकालविशदावभासनिर्विकल्पकसंसर्गकृतः, तदभावेऽभिलापमात्रेऽनुमाने च विकल्पाकारप्रतिभासे वैशद्याभावात् । तस्मान्निर्विकल्पकमेव प्रत्यक्षम् । तत्रैव हि विशदस्य स्वलक्षणस्यावभासः ।

मैवम्—उन्मीलितनेत्रस्य विकल्पोपि गौरयमित्यपरोक्षावभास एव प्रतीयते । न चासावन्यसंसर्गकृतः प्रमाणाभावात् । अभिलापसंसर्गयोग्यस्यापि सामान्याकारस्याभिलापलिङ्गादिभिरवैशद्यमिन्द्रियैश्च वैशद्यमुपपद्यत एव । न ह्ययं परोक्षापरोक्षविभागो विषयकृतः । यदि हि तथा स्यात्—सर्वदैव सामान्यं परोक्षं स्यात् स्वलक्षणं चापरोक्षं स्यात्, न चैवमस्ति, सामान्याकारस्यापि परोक्षापरोक्षविभागदर्शनात् ।

तथा हि—दूराच्छ्रुतं स्वलक्षणं पश्यन्नऽनिर्द्धारितगवाश्वजातिविशेषो हेषाशब्दश्रवणादश्वत्वं तस्मिन्नेव स्वलक्षणे ऽनुमिमानोपि परोक्षं बुध्यते, वदन्ति

शदं—स्पष्टं—अपरोक्षमिति यावत् । तदभाव इति । निर्विकल्पकसंसर्गाभाव इत्यर्थः । दूषणमुपसंहरति । तस्मादिति । परिहरति । मैवमिति । अभिलापेत्यादिनोक्तं दूषणं परिहर-

हि 'अश्वोऽप्ययं न चक्षुषा तथाऽवभासते' इति । प्रत्यासन्नस्तु वदति–'संप्रत्यश्वत्वमप्यस्य चक्षुषा पश्यामि न पूर्वम्' इति । स्वलक्षणं तु प्रागपि विशदमेवेति सामान्यांशगत एवायं दूरसमीपवर्तिनः परोक्षापरोक्षविभागः, तस्मात्कारणकृतोयं विभागः ।

एकस्मिन्नपि हि विषयेऽक्षैर्जायमानं विज्ञानमापरोक्ष्यं जनयति लिङ्गादिजं तु नेति किं नोपपद्यते ? । ज्ञानजन्यो विषयगतः फलविशेषोऽयमापरोक्ष्यं नाम सर्वस्य संवेद्यः । यद्भावाभावाभ्यां लिङ्गाभ्यामक्षैः पश्यामि न पश्यामीति विस्फारिताक्षाणामेव व्यवहारः प्रवर्तते । अतोऽस्ति विकल्पस्यापि विशदावभासित्वमिति प्रत्यक्षत्वोपपत्तिः ।

ति । अभिलापेति । यद्भावाभावाभ्यामिति । यस्यापरोक्षस्य भावेन लिङ्गेन विस्फारिताक्षस्य पश्यामीति व्यवहारः प्रवर्तते तदभावेन लिङ्गेन न पश्यामीति, ततश्च त्रिरूपलिङ्गानुत्पन्नत्वान्नानुमानं, स्वलक्षणविषयनिर्विकल्पकप्रत्यक्षविषयता नास्तीति न स्मृतित्वं, बाधकप्रत्ययाभावान्नाप्रामाण्यं, सर्वेषां सविकल्पकेनैव प्रत्यक्षेण व्यवहारदर्शनात्पारिशेष्यात्सविकल्पकस्य प्रत्यक्षत्वं प्रमाणत्वं च सिद्धमित्यभिप्रायेणोपसंहरति । अत इति । स्यादेतत् स्वलक्षणभिन्नजातिगुणक्रियारूपविशिष्टार्थावभासकत्वेनातस्मिंस्तद्ग्रहणरूपं सविकल्पकं भ्रान्तिरेव । प्रयोगश्च सविकल्पकज्ञानमप्रमाणमर्थान्तरेऽर्थान्तरारोपेणोत्पद्यमानत्वात् ऊपरसलिलज्ञानवत् । नैतद्युक्तम् । पररूपे हि परस्मिन्निरूप्यमाणे भ्रान्तिर्भवति जात्यादीनां च व्यक्त्यभेदाङ्गीकारेण पाररूप्याभावात् । अभेदे विशेषणविशेष्यभावानुपपत्तिरिति चेत् । न ।

जात्यादिविशेषणस्याभेद एवोपपत्तेः सर्वदैव तदाकारबोधात् । प्रयोगश्च—विशेषणं विशेष्यादभिन्नं विशेष्ये सदा स्वानुरक्तबुद्धिजनकत्वात् स्वलक्षणस्वरूपवदिति । यद्यपि भिन्ना अपि लाक्षादयो भिन्ने स्फटिकादौ स्वानुरूपां बुद्धिं जनयन्ति तथापि न सदेति तद्व्यवच्छेदः । जात्यादयस्तु न कदाचिदपि स्वलक्षणाविविक्ताः । स्वलक्षणं वा जात्यादिविविक्तमुपलब्धम् । नन्वस्तु नामैतज्जातौ, गुणकर्मणोस्त्वेतदसम्भवः ताभ्यां वियुक्तस्याऽपि वस्तुनो ज्ञायमानत्वात्, विद्यमानेऽपि द्रव्ये पूर्वगुणविनाशस्योत्तरोत्पादस्य च दर्शनात् एवं कर्मण्यपि दर्शयितव्यम् । उच्यते । यद्यपि द्रव्यं तद्वियुक्तं दृश्यते तथापि तानि तद्वियुक्तानि न जातु दृश्यन्ते । यदि च तानि द्रव्याद्भिन्नानि भवेयुस्तदा द्रव्यवियुक्तान्यपि कदाचिदुपलभ्येरन्, न चेह तथा । कथं तर्हि द्रव्याभेदे पूर्वापरयोर्गुणकर्मणोर्नाशोत्पादौ ? प्रत्यभिज्ञायते हि तदेवेदं द्रव्यं गुणकर्मणी च विनष्टे इति । नैष दोषः । गुणकर्मविनाशे वस्तुनोऽपि ताद्रूप्येण विनाशाङ्गीकारात् । रूपरहिताद्वस्तुनः कथं तद्विनाशे न नश्यतीति शक्यते वक्तुम् । वस्तुतस्तु गुणकर्मणोरपि नात्यन्तिको नाशो वस्त्वात्मना विद्यमानत्वात् । जातावप्येषैव गतिः दृश्यते हि विनष्टे पिण्डे ऽवियुक्ता पिण्डान्तरे जातिः । ननु भिन्ना अपि जात्यादयः समवायात् द्रव्ये स्वानुरक्तां बुद्धिं जनयिष्यन्ति तदुक्तम्—"अयुतसिद्धानामाधार्याधारभूतानामिह प्रत्ययहेतुर्यः सम्बन्धः स समवाय" (प्रशस्त. भा.) इति । नैतद्युक्तम् । अयुतसिद्धयोस्सम्बन्धित्वासम्भवात् । तथाहि केयमयुतसिद्धिः ? युतसिद्ध्यभावमात्रं, अपृथक्सिद्धिर्वा, भिन्नाश्रयाश्रयित्वं वा, पृथग्गतिमत्वं वा, नाद्यौ अनिष्पन्नस्याविद्यमानत्वेन सम्बन्धा-

भावात् सिद्धयोर्हि सम्बन्धिनोः सम्बन्धो भवति नासिद्धयोः, अत एव च न निष्पद्यमानयोः, निष्पत्त्युत्तरकालं च सम्बन्धे युतासिद्धताप्रसङ्गः, युतासिद्धयोश्च पश्चात्सम्बन्धे हेत्वभावात् सम्बन्धो न स्यात् । नहि यथा पृथक्सिद्धयो रज्जुघटयोर्देवदत्तादिः सम्बन्धहेतुस्तथा जातिव्यक्त्योः संयोजकः कश्चित् दृश्यते, समवायस्तु सम्बन्धरूपत्वादेव न सम्बन्धहेतुः । नापि तृतीयचतुर्थौ, जात्यादेर्व्यक्त्याश्रितत्वात् व्यक्तेश्च स्वावयवाश्रितत्वात् पृथग्गतिमत्वात् सम्बन्धहेत्वभावात् षण्णामपि पदार्थानां परस्परसम्बन्धो न प्रतीयेत । किं च अयं समवायः समवायिभ्यां भिन्नो वा अभिन्नो वा, भेदे ऽपि ताभ्यां सम्बद्धो ऽसम्बद्धोवा, तत्र यदि तावद्व्यतिरिक्तो ऽसम्बद्धश्च तदा समवायिभ्यः समवायस्य विश्लेषात् समवायिनोः परस्परविश्लेषः स्यात्, अथ सम्बद्धस्तत्रापि न तावत्संयोगः द्रव्ययोरेव तदभ्युपगमात् समवायान्तराभ्युपगमे त्वनवस्था स्यात् । अथ समवायिनोः स्वरूपमेव समवायो नान्येन सम्बन्धनीय इत्युच्यते तर्ह्यङ्गीकृतोऽभेदवादः धर्मिस्वरूपानुप्रविष्टस्याभावप्रसङ्गश्च । व्यतिरिक्तः सम्बद्ध्यमानश्च समवायः संयोगवत् सम्बन्धान्तरमपेक्षेतैव, तस्मात्समवायासम्भवादभेदपक्ष एव श्रेयानित्यलम् । अस्तु वाऽत्यन्तभेद एव जात्यादेस्तथापि न सविकल्पकस्य मिथ्यात्वम्, अन्यस्यान्यथा संवेदनेन बाधकप्रत्ययेन वा मिथ्यात्वं सम्भवति नान्यरूपसंवेद्यतामात्रेण, सर्वेषां तत्र संवादात् । यथा भावनाया धात्वर्थविशिष्टज्ञानं न मिथ्या भवति । तदुक्तम्—

"यो ह्यन्यरूपसंवेद्यः संवेद्येतान्यथा पुनः ।
स मिथ्या, न तु तेनैव यो नित्यमवगम्यते" (श्लो.वा.) ॥

इदानीं लौकिकानां बाहुल्येन सविकल्पके प्रत्यक्षशब्द-

केचित्तु सविकल्पकमेव सर्वं ज्ञानं न निर्विकल्पकं नाम किंचिदस्तीति मन्यन्ते । तत्तु प्रतीतिविरुद्धम्—प्रतीमो हि वयमक्षसंनिपातानन्तरमऽविविक्तसामान्यविशेषविभागं संमुग्धवस्तुमात्रगोचरमालोचनज्ञानम् । तदभावे तु विकल्प एव न जायेत । विकल्पयता हि पूर्वानुभूतं जातिविशेषं सञ्ज्ञाविशेषं चानुस्मृत्य तेन पुरःस्थितं वस्तु विकल्पयितव्यम् । न चार्थमदृष्टवतस्तत्स्मरणमाकस्मिकमेवो-

---

प्रयोगात् इन्द्रियसंयोगजन्यत्वाच्च सविकल्पकमेव प्रत्यक्षं न निर्विकल्पकं "कल्पनापोढमभ्रान्त"मिति प्रत्यक्षलक्षणाभावात् अत्रेति चेत् । न । लोकविरोधेन लक्षणानादरणात् लक्षणस्य निर्विकल्पकमात्रविषयत्वेनोपपत्तेश्च । उक्तं च—

"वृद्धप्रयोगगम्याश्च शब्दार्थाः सर्व एव नः ।
तेन यत्र प्रयुक्तोऽयं न तस्मादपनीयते" ॥
सिद्धानुगममात्रं हि युक्तं कर्तुं परीक्षकैः ।
न सर्वलोकसिद्धस्य लक्षणेन निवर्तनम्"(श्लो.वा.१३३)॥

तथाऽन्यत्राऽप्युक्तम्—

" न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यते" (वाक्यपदी.) इति ॥

अतः सविकल्पकमेव प्रत्यक्षमिति कस्यचिन्मतं तद्दूषयितुमनुवदति । केचित्त्विति । दूषयति । तत्त्विति । प्रतीतिमेव दर्शयति । प्रतीम इति । अनङ्गीकारे दोषमाह । तदभाव इति । कथं न जायेताऽत आह । विकल्पयता इति । सविकल्पकं हि सङ्केतग्रहणकालभाविशब्दादिस्मरणपूर्वकं, न चाकस्मादेव तत्स्मरणमाविरास्ति, निर्विकल्पकेन तु तत्संस्कारोद्बो-

त्पद्यते । तस्मादस्ति निर्विकल्पकमपि ज्ञानम् ।

तच्च सन्मात्रविषयमिति केचित । भेदस्य विकल्पवेद्यत्वादऽगृहीते च भेदे विशेषाणामग्रहणात् । किं चेतरेतराभावो भेदो न चासौ प्रत्यक्षेण ग्रहीतुं

धात् स्मरणोपपत्तिरित्यर्थः । उपपादितमर्थं निगमयति । तस्मादिति । व्यवहारानङ्गत्वान्न तत्प्रमाणमिति चेत् । न । तस्यापि व्यवहारोपयोगित्वदर्शनात् । दृश्यते हि वन्हिना दह्यमानस्य सहसाऽपसरणं तद्विमर्शानपेक्षमेव झटिति जायमानमुपलभ्यते तिरश्चां बालानां च निर्विकल्पकेनैव सर्वो व्यवहारः अगृहीतसम्बन्धानां तेषां शब्दसंभिन्नार्थबोधासम्भवात् । उक्तं च—

"अस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकम् ।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् ॥
न विशेषो न सामान्यं तदानीमनुभूयते ।
तयोराधारभूता तु व्यक्तिरेवावगम्यते" इति (श्लो.वा.११२)

आलोचनाज्ञानमित्यनेन बोधकत्वं प्रामाण्यहेतुत्वेनोक्तम् । प्रथममित्यनेनास्तित्वं निर्विकल्पकत्वं च युक्त्या साधितम् । न विशेष इत्यनेन शुद्धवस्तुजत्वं विवृतम् ।

अद्वैतवादिनस्तु सन्मात्रविषयकं निर्विकल्पकं प्रत्यक्षमित्याचक्षते तदुपन्यस्यति । तत्सन्मात्रेति । भेदस्येति । यत्र सविकल्पके भेदावगमस्तत्प्रत्यक्षमेव न भवतीति भावः । अस्तु वा सविकल्पकं प्रत्यक्षं तथाऽपि न तेन भेदग्रहणं सम्भवतीत्याह । किं चेति । अभावस्य प्रत्यक्षानुपलब्धिगम्यस्य प्रत्यक्षेणाग्रहणमित्यर्थः । इदं चेतरेतराभावभेदवादी प्रष्टव्यः किं भिन्नयोरितरेतराभावः उताभिन्नयोः आद्येऽन्यो भेदः अन्यश्चेतरेतराभाव इति स्यात्, अभिन्नयोरिति पक्षे कथमितरव्यपदेशः तस्य भेदग-

शक्यते न तरां निर्विकल्पकेन । अतश्च " नेह नानास्ति किं चन " इत्यादिनिषेधानां प्रत्यक्षादिविरोधाभावात् " एकमेवाद्वितीयम् " इत्यादिश्रुतिभिरद्वितीयं ब्रह्म सिद्धम् ।

तदिदमतिसाहसम्- किं भवतो नीलपीतयोस्तिक्तमधुरयोः शीतोष्णयोः सुखदुःखयोश्चाविलक्षणा बुद्धिः ?, यद्येवं नात्रोत्तरं वक्तव्यम् । न च सत्स्वरूपे सविकल्पेन विशेषग्रहणमिति वाच्यम्, अविकल्पेन विकल्पस्यापि विलक्षणस्योत्पत्त्यऽसम्भवात् ।

यच्चावश्यमिदमस्माद्भिन्नमित्येवं विकल्पेनैव भेदोग्रहीतव्यो नाऽविकल्पेन तस्य ग्रहणं सम्भवतीति, न ब्रूमो भेदस्य ग्रहणं किं तु भिन्नानाम् । तेषामपि न भिन्नतया, किं तु स्वरूपेण-यदन्यस्माद्भिन्नं नीलं पीतं वा तद् गृह्यत इति ब्रूमः । नहि नीलं पीतं वा भेदः, तयोर्हि धर्मो भेदः, तदग्रहेपि धर्मिणां ग्रहणं नानुपपन्नम् ।

यदि च सन्मात्रं प्रत्यक्षेण गृह्यते न नीलं पीतं

र्भितत्वात् । कथं च तस्यैव तत्राभाव इति । अस्मिंश्च पक्षे वेदान्तिनामिष्टासिद्धिं दर्शयति । अतश्चेति । दूषयति । तदिदमिति । वेदान्तवादिन आशङ्कामुद्भाटयति । यदिति । परिहरति । न ब्रूम इति । ननु भेदस्य वस्तुस्वरूपत्वात् कथं तद्ग्रहणे तदग्रहणमित्युच्यते तत्राह । न हीति । दूषणान्तरमाह । यदीति । यदि निर्विकल्पकेन सन्मात्रमेव गृह्यते न वस्त्वन्तरमिति पक्षस्ततस्सविकल्पकस्य तत्पूर्वकत्वात्सविकल्पकेनाऽपि न वस्त्वन्तरं गृह्येतेत्यर्थः । अथ सविकल्पकमपि सद्विषयमित्युच्येत तर्हि तेन

वा ततो विकल्पेनापीदमस्माद्भिन्नमिति कथं भेदो गृह्येत ?, नहि सदेव सतो भिन्नमिति सम्भवति। तस्मान्नीलादिगुणानां पृथिव्यादिद्रव्याणां च प्रत्यक्षेण ग्रहणात् प्रपञ्चापलापः प्रत्यक्षविरुद्ध एव।

यदि तु पृथिव्यादिप्रपञ्चं नापन्हुमहे तद्धर्मं तु भेदमेवेति ब्रूयात् ?, तदप्यशक्यम्– नीलपीतयोरितरेतराभावस्य प्रत्यक्षानुपलब्धिसिद्धस्यापन्हवासम्भवात्। प्रत्यक्षाभावोऽपि हि प्रत्यक्षवदेव प्रमाणान्तरेभ्यो बलीयान्, इतरथा शशे चतुष्पात्त्वाद्विषाणित्वमनुमीयेत, अतो भेदापलापो न सम्भवति।

यदि त्वितरेतराश्रयतया इतरेतराभावग्रहणस्याऽनवक्लृप्तेरऽविद्यामात्रनिमित्तं तदित्युच्यते ?, तदपि–यदि भिन्नतया प्रतियोगिनमाश्रयं च गृहीत्वा तत इतरेतराभावो गृह्येत ततः स्यात्, नीलपीतयोस्त्वितरेतराभावाऽनादरेण स्वरूपेण गृहीतयोः पश्चादितरेतराभावग्रहणे किमितरेतराश्रयत्वम् ?।

यदि तु द्वित्वमपन्हूयते न पृथिव्यादयस्तेषां च मिथो भेदः ? । तदपि प्रत्यक्षविरुद्धम्–सङ्ख्यायाः प्रत्यक्षत्वात्। सत्यपि प्रत्यक्षविरोधे तदुपमर्देन प्रव-

---

भेदग्रहणानुपपत्तिरित्याह। नहीति। प्रत्यक्षानुपलब्धीति। इतरेतरभावः प्रत्यक्षेण ग्रहणयोग्यस्तदभावो योग्यानुपलब्धिगम्योनापन्होतुं शक्य इत्यर्थः। ननु भिन्नतया धर्मिणं प्रतियोगिनं च गृहीत्वा इतरेतराभावरूपभेदग्रहणे इतरेतराश्रयः प्रसज्येतेत्याशङ्कां परिहरति। यदि त्विति। अथ द्वैतमात्रमपन्हूयते न पृथिव्यादि द्रव्यमित्याशङ्क्य निराकरोति। यदीति। स्पष्टार्थो-

र्तमानस्तद्बाधेनैवाऽऽगमोऽद्वैतमवगमयतीति चेत् ?, न, प्रवृत्त्यऽसम्भवात्–प्रत्यक्षं हि निरपेक्षं शीघ्रं जायमानं स्वविरुद्धस्यागमिकज्ञानस्य पदपदार्थसन्निध्यपेक्षायोग्यत्त्वन्यायालोचनसापेक्षतया विलम्बितप्रवृत्तेः प्रवृत्तिमेव निरुणद्धि।

किं चाशक्यमेव श्रुत्या प्रपञ्चस्याऽसत्त्वं बोद्धुम्, बुद्ध्यमाने हि श्रुतिरपि प्रपञ्चान्तर्गतत्वादसती बोद्धव्या स्यात्। कथं च श्रुत्यैव श्रुतेरसत्त्वं बुद्ध्येत ?। असत्त्वेन हि प्रतीयमाना न प्रमाणं स्यात्। प्रमाणत्वे त्ववस्थिते–सत्तया प्रतीयमानायाः श्रुतेर्न मिथ्यात्वं शक्यं वक्तुम्। नह्येकस्यैव वस्तुनो युगपदेव सत्त्वमसत्त्वं च समुच्चित्य बोद्धुं शक्यम् ?, अन्यतरोपमर्देन ह्यन्यतरद् बुद्धावारोहति। ततश्च श्रुतिरऽस्तीति चेत् ?, न प्रपञ्चस्याऽभावः सम्भवति श्रुतेरपि प्रपञ्चत्वात्। नास्ति चेच्छ्रुतिः ? प्रमाणाभावादेव न प्रपञ्चापलापः सम्भवति।

ननु स्वयं प्रकाशं ब्रह्म किमस्यान्येन प्रमाणेन ?। भवतु ब्रह्म स्वयं प्रकाशं, प्रपञ्चाभावस्य किमायातम् ? स हि प्रमाणमपेक्षत एव।

कथं चाविद्यमानस्य प्रपञ्चस्य प्रतिभासः ?,। अविद्ययेति चेत् ?, कस्य पुनरियमविद्या ?, जीवानामिति चेत् ?, न, तेषामभावात् भावे वा द्वैतप्रसङ्गः। ब्रह्मणि तु विशुद्धविज्ञानात्मके निरवकाशैवाऽविद्या। विद्यात्मकमपि ब्रह्माऽविद्याशबलमिव भ्रान्त्याऽवगम्यत इति चेत् ?, कस्येयं भ्रान्तिः ?, यदि न कस्य

चित्सूक्तम । जीवानामिति चेत् ?, न, तदभावात् । यदि ब्रह्मणः ?, नास्य भ्रान्तिः सम्भवतीत्युक्तम् । यदि च विद्यारूपेऽप्यविद्या स्यात् केनासावुच्छिद्येत ?। ध्यानादिभिरिति चेत् ? न, तेषामप्यभावात्, भावे तु द्वैतापत्तिः। ब्रह्मणि तु सहाऽवस्थानादविरुद्धा ऽविद्या न तेनोच्छेत्तुं सा शक्या । ततश्चाऽनिर्मोक्षप्रसङ्गः ।

तस्माद् ब्रह्मणः प्रशंसार्थैरस्थायित्वेन प्रपञ्चस्यासत्त्वमुपचरद्भिरौपनिषदैर्वादैस्तदनुसारिभिश्चेतिहासपुराणैर्भ्रान्तानां वाक्यतात्पर्यमजानानानां न्यायाभियोगशून्यानां प्रलापोयमऽद्वैतवाद इत्युपेक्षणीयः। तत् सिद्धमऽविकल्पस्य प्रत्यक्षस्य विशेषविषयत्वम् ।

अपरे तु स्वलक्षणमात्रगोचरं निर्विकल्पकमिच्छन्ति। तदपि प्रतीतिविरुद्धम्—प्रतीयते हि संमुग्धाकारं वस्तु सहसैव, यत् पश्चाज्जातिद्रव्यगुणक्रियानामभिः पञ्चधा सविकल्पकेन विकल्प्यते—गौरयम्, दण्ड्ययम्, शुक्लोयम्, गच्छत्ययम्, डित्थोयम्, इति । तत्र निर्विकल्पकमनेकाकारं वस्तु संमुग्धं गृह्णाति, सविकल्पकं त्वेकैकाकारं जात्यादिकं विविच्य विषयीकरोति ।

ऽग्रिमग्रन्थः। दूषणमुपसंहरति । तस्मादिति । उपपादितमर्थं निगमयति । तत्सिद्धमिति।

मतान्तरमनुवदति । अपरेत्विति । स्वलक्षणं—क्षणिकवस्तुमात्रम् । दूषयति। तदपीति । निर्विकल्पके जात्यादेरपि

ननु षष्ठोपि विकल्पोस्ति—तदेवेदमिति, तत्कथं पञ्चधा विकल्प इत्युच्यते?, न त्वयं जातिविकल्पो व्यक्तिप्रत्यभिज्ञा हीयम्, न संज्ञाविकल्पः—अनवगतसंज्ञानामपि भावात्। तिर्यञ्चोपि ह्यद्य जाताः स्वमातरं प्रथममुपलभ्य क्षणान्तरे पुनरुपलभमानाः सैवेयमिति शब्दानुवेधशून्यमेव प्रत्याभिजानन्ति, तस्मादियं षष्ठी कल्पनेति पञ्चविधत्वानुपपत्तिः।

उच्यते—इयमेवास्माभिर्नामकल्पनेत्युच्यते। तथा हि—डित्थोयमिति तावद् गौरयमितिवत् गवात्मना डित्थात्मना वस्तु विकल्प्यते, न दण्डीतिवत् तत्सम्बन्धितया, मत्वर्थानुपादानात्। तत्र न डित्थशब्दो जातिवदर्थस्यात्मा अत्यन्तभिन्नत्वाद् यतस्तेनैवार्थोनुरज्येत। तदेतदेवं विज्ञेयम्—डित्थशब्देन तद्वाच्यं पूर्वावगतं डित्थमुपस्थाप्य तदात्मना पुरःस्थितोऽर्थो विकल्प्यते—डित्थोयमिति।

किमुक्तं भवति? योसावस्माकं डित्थः सोयं पुरस्स्थितो नान्य इति, सेयं व्यक्तिप्रत्यभिज्ञैव पञ्चमी कल्पना। सा च शब्दविदां नामरूपितैव भवतीति नामविकल्पनेति व्यवह्रियते। एतेन यदाहुः—"डित्थोयमित्यऽशब्दाकारस्यार्थस्य शब्दाकारेण विकल्पनादप्रमाणं सविकल्पकम्" इति तदपि निरस्त-

संमुग्धाकारेण प्रतीतेः स्वलक्षणमात्रगोचरत्वं प्रतीतिविरुद्धमित्यर्थः। पञ्चधेत्युक्तिमसहमानः शङ्कते। नन्विति। परिहरति। उच्यते इति। अत्रैव मतान्तरमुपन्यस्यति। एतेनेति। अशब्दरूपाणामेव भावानां सविकल्पकज्ञाने शब्दाकारेण निरूप्य-

म्। न ह्यत्र शब्दाकारेणार्थः प्रतीयते किं तु पूर्वावगतार्थस्मरणमात्रे शब्दस्य व्यापारः, तेन च स्मृतेनार्थेन तादात्म्येन पुरस्थितार्थविकल्पनात्। आह च-

"यदा तु यादृशः पिण्डः पूर्वं शब्दात् प्रतीयते।

तादृशस्मरणे हेतुः शब्दस्तत्र यथार्थता" (श्लो. सू. ४ श्लो. २२६) इति।

तस्मान्नामविकल्पेपि जात्यादिवन्नास्त्यऽतद्रूपारोपः। किं पुनर्जात्यादिभिर्विकल्प्यते ?, द्रव्यम्। किं पुनरिदं द्रव्यं नाम ?, पृथिव्युदकतेजोवायुप्रभृति।

माणत्वात् भवति पारूप्ये मिथ्यात्वमित्यर्थः। निरासे कारणमाह। नहीति। तदुक्तम्—

" न शब्दाभेदरूपेण बुद्धिरर्थेषु जायते।

प्राक् शब्दात् यादृशी बुद्धिः शब्दादपि हि तादृशी"(श्लो.वा.१७२)॥

अत्रैव वार्तिककृत्संमतिमाह। आह चेति। परमार्थतस्तु नाध्यासो नापि मिथ्यात्वमिति भावः। ननु गौरयमिति सामानाधिकरण्येन शब्दानुविद्धबोधात् तद्रूपसमारोपः स्यात्। अत्र ब्रूमः। यदि गोत्वादिरूपोऽर्थः सर्वदा शब्दाकारेणैव प्रतीयते तदा भेदाऽभावात् कुतोऽध्यासस्तदभावे च मिथ्यात्वं दूरापास्तम्। भेदावगतौ तु सुतरामध्यासाभावः अतोभ्रान्त्यैवेयमध्यासकल्पना तद्वादिनां अर्थशब्दज्ञानेषु त्रिष्वपि समाननिर्देशस्य भ्रान्तिमूलस्य सम्भवात्, यथाऽऽहुः—

"शब्देनैव हि निर्देशो गृहीतेऽर्थेऽवगम्यते।

गौरित्येव च निर्देशो वाच्यतद्बुद्धिवादिनाम्" (श्लो.वा.१८२)॥

इदानीं मतान्तरनिराकरणेन रूपादिसङ्घातातिरिक्तं धर्मिणं स्थापयितुमाह। किं पुनरिति। चक्षुरादीनामिति। एत-

ननु रूपादिव्यतिरिक्तं द्रव्यं नाम न किंचिदुपलभामहे । न च तस्योपलम्भकमस्ति, चक्षुरादीनां रूपादिष्वेवोपक्षीणत्वात् । गन्धरूपरसस्पर्शसंघातः पृथिवी, रसरूपस्पर्शसंघात आपः, रूपस्पर्शसंघातस्तेजः, शब्दस्पर्शसंघातो वायुः, एवं रूपादिसंघातभेदादेव पृथिव्यादिविभागो, न द्रव्यं नाम किंचिदिति सौगताः ।

तदयुक्तम्–आगमापायिषु रूपादिषु यदनुयायिप्रत्यभिज्ञा जायते तद् द्रव्यम् । दर्शनस्पर्शनाभ्यां चास्य ग्रहणम्, प्रत्यभिज्ञा च–यथा बदरफलं श्यामावस्थायां रक्तावस्थायां च, यथा वा घटपिण्डकपालावस्थासु मृद्द्रव्यम् । अस्ति हि तत्र पिण्डावस्थाभेदे श्यामरक्तरूपभेदेपि द्रव्यप्रत्यभिज्ञा–मृदियं पिण्डावस्थामपहाय घटावस्था सञ्जाता, श्यामिमानं च त्यक्त्वा पक्वा सत्यऽरुणिमानं गृहीतवती, अनन्तरं घटावस्थामपहाय कपालिका जातेति । एवं तन्तुपटाद्यवस्थास्वपि द्रष्टव्यम् ।

ननु तन्तुपटादिषु द्रव्यान्तरोत्पत्तिरेवाभिमता, अन्यथा ह्यऽवयव्यऽपलापः स्यात् ? । नाऽवयविनम-

---

दतिरिक्तद्रव्यमात्रबोधकषष्ठेन्द्रियस्याभावात् न द्रव्यसिद्धिरित्यर्थः । मन एव षष्ठमिन्द्रियमिति चेत् । न । तस्य स्वातन्त्र्येण बहिर्विषयव्यवस्थापनेऽसामर्थ्यात् । तदाहुः—

"क्षीणानि चक्षुरादीनि रूपादिष्वेव पञ्चसु ।
न षष्ठमिन्द्रियं तस्य ग्राहकं विद्यते बहिः" इति ॥

उपलम्भकाभावं परिहरति । दर्शनेति । अत्र वार्तिककृत्सं-

पन्छुमहे द्रव्यान्तरोत्पत्तिं तु नेच्छामः प्रतिपत्त्यभावात्। तन्तव एव हि संयोगविशेषादेकद्रव्यतामापद्यन्ते, अवयवी च भवन्ति, तादृशाश्च पटजातिं स्थौल्यं च बिभ्रत एकपटस्थूलबुद्ध्या गृह्यन्त इति लौकिकी प्रतिपत्तिः। अतो न द्रव्यस्य कदाचिदागमोऽपायो वा घटपटगवाश्वशुक्लरक्ताद्यवस्थानामेवागमापायौ। आह च—

"आविर्भावतिरोभावधर्मकेष्वनुयायि यत्।
तद्धर्मि यत्र च ज्ञानं प्राग्धर्मग्रहणाद्भवेत्" (श्लो. वा. १५२) इति। तथा "यादृशमस्माभिरभिहितं द्रव्यं तादृशस्यैव हि सर्वस्य गुण एव भिद्यते न स्वरूपम्" इति।

तत्सिद्धं द्रव्यम्। तच्च जात्यादिभिः पञ्चधा सविकल्पकेन विभज्यते। अतः सविकल्पकम-

---

मतिमाह। आह चेति। आविर्भावतिरोभावधर्मकेषु रूपादिषु यदनुयायि तद्धर्मि यथाऽग्निसंयोगप्रच्यावितप्राग्रूपः समुपजातरूपान्तरश्च घटः स एवायं घट इति प्रत्यभिज्ञायमानस्तदतिरिक्तो धर्मी। ननु रूपादीनामग्रहणे तस्यानवभासात् कथं तदतिरेकसिद्धिः। नैवं। धर्माग्रहणेऽपि क्वचित् धर्मिप्रतीतेः। दृश्यते च प्रदोषे शुक्लाग्रहणेऽपि बलाकापङ्क्तिः। उपपादितमर्थं निगमयति। अत इति। ननु विस्फारितेऽपि चक्षुषि शब्दसम्बन्धस्मरणोत्तरकालं पूर्वगृहीतानुसन्धानेन चोत्पद्यमानत्वात् अनक्षजत्वेनाप्रत्यक्षत्वं अनुभूते च वस्तुन्यभ्रष्टसंस्कारस्य जायमानत्वाच्च स्मृतित्वं सविकल्पकस्य। सत्यम्। तथापीन्द्रियार्थसन्निकर्षेणापरोक्षप्रतिभासतया चोत्पद्यमानत्वात् प्रत्यक्षत्वमव्याह-

पि प्रत्यक्षम्, तत्पूर्वकं चानुमानादीति सिद्धं तेषामप्यनिमित्तत्वम् ।

इति प्रत्यक्षसूत्रम् ॥

तं, नापिस्मृतित्वम् पूर्वतोऽप्यधिकार्थप्रतिभासनात्। तथा हि पूर्वकालविशिष्टः प्रतिपन्नोऽपीदानीं वर्तमानकालतया गृह्यते स एवायं देवदत्त इति यथा सामान्यप्रत्यभिज्ञायामपि पूर्वमन्यव्यक्तिगतत्वेन ग्रहणमासीत् इदानीमन्यव्यक्तिगतत्वेनानुभूयते । यद्यपि पूर्वेद्युरनवगतमपरेद्युरवगम्यते तथाऽपि निर्विकल्पलक्षणेनावगतं सविकल्पकलक्षणेनावगम्यत इत्यधिकार्थत्वम् । यथाऽऽहुः—

"स्मर्येते शब्दसम्बन्धौ मा भूत् प्रत्यक्षता तयोः ।
तदप्रत्यक्षभावेन न त्वर्थस्यापि वार्यते ॥
गृहीतमपि गोत्वादि स्मृतिस्पृष्टं च यद्यपि ।
तथापि व्यतिरेकेण पूर्वबोधात् प्रतीयते ॥
व्यक्तिकालादिभेदेन तत्रास्त्यवसरो मितेः"(श्लो.वा.२३३)।

वस्तुतस्तु यथा ह्यालोकमनःसापेक्षतायामपि निर्विकल्पकस्याक्षजत्वं नापैति, तथा सविकल्पकस्यापि स्मरणसापेक्षतायामक्षजत्वं नापैति नापि मिथ्यात्वं भवतीति तत्त्वम् । अतो लिङ्गलिङ्गिसामान्ययोस्तत्सम्बन्धस्य च सविकल्पकप्रत्यक्षवेद्यत्वादुपपन्नमनुमानादीनां तत्पूर्वकत्वमित्युपसंहरति । तत्पूर्वकं चेति । अधिकरणं त्वेवम् । धर्मो विषयः प्रत्यक्षादिभिरपि गम्यते चोदनयैवेति सन्देहः प्रत्यक्षादीनां प्रमाणत्वेन प्रमेयावभासकत्वात् धर्मस्य प्रमेयत्वात् प्रत्यक्षादिभिरपि गम्यते इति पूर्वः पक्षः धर्मस्य प्रमेयत्वेऽपि प्रत्यक्षस्य वर्तमानमात्रविषयत्वात् अनुमानादेश्च तत्पूर्वकत्वात् नोदनयैव गम्यत इति सिद्धान्तः ॥४॥

(पञ्चमं धर्मे वेदप्रामाण्याधिकरणम्)

सू० औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थे ऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् ॥ ५ ॥ *

उक्तं प्रत्यक्षादीनामनिमित्तत्वम् । तत एव तन्मूलपुरुषवचनस्याप्यनिमित्तत्वम् । एवं तर्हि शब्दस्य सर्वत्र प्रमाणान्तरापेक्षयैव प्रामाण्यदर्शनात् तदभावे तस्याप्यऽप्रामाण्यादऽभावगम्यत्वमेवायातं धर्मस्येत्याशङ्कानिराकरणाय चोदनायाः प्रामाण्यमु-

---

औत्पत्तिकस्तु—त्वात् ॥ ५ ॥

ननु प्रत्यक्षादीनामनिमित्तत्वोपपादनेनार्थाच्चोदनैव धर्मे प्रमाणमित्यवधारणस्य सिद्धत्वात्किमुत्तरसूत्रेणेत्याशङ्क्य शङ्काविशेषनिराकरणार्थत्वं दर्शयितुमाह । उक्तमिति । ननु पौरुषेयस्यानिमित्तत्वे चोदनायाः किमायातमत आह । एवमिति । ननु लोकप्रसिद्धेरेव धर्माधर्मयोरवगतिसम्भवात्कथमभावगम्यत्वोक्तिः यदाह भगवान् वेदव्यासः—

"इदं पुण्यमिदं पापमित्येतास्मिन् पदद्वये ।
आचण्डालं मनुष्याणामल्पं शास्त्रप्रयोजनम्" ॥

---

* शब्दस्य—वेदघटकपदस्य अर्थेन सह सम्बन्धः—शक्तिरूपः औत्पत्तिकः—स्वाभाविकः नित्य इति यावत् । अतः तस्य—धर्मस्य ज्ञानं—ज्ञानसाधनं करणेल्युट् । अनुपलब्धे—प्रत्यक्षादिप्रमाणैः, उपदेशः अव्यतिरेकः—अर्थाव्यभिचारी दृश्यते, अत इतरानपेक्षत्वात्—प्रत्यक्षाद्यनपेक्षत्वात् तत्—विधिवाक्यं धर्मे प्रमाणं बादरायणाचार्यस्याऽनुमतमिति सूत्रार्थः ।

च्यते। सत्यम्—लोके प्रमाणान्तरमूलानां प्रामाण्यम्, अतन्मूलानां चाप्रामाण्यं दृश्यते, न त्वेवमपि सापेक्षं प्रामाण्यं किं तु स्वत एव। अनाप्तवाक्यस्य त्वऽप्रामाण्यं न मूलविरहात्। किं तु दुष्टमूलतया, शब्दस्य दुष्टत्वात्स्वाभाविकस्य प्रामाण्यस्याऽपवादात्।

अपौरुषेये तु वेदे यद्यप्याप्तप्रणीतत्वं नास्ति त-

नन्वेवं पुण्यपापपदप्रमाणको धर्म इत्युक्तं भवति न लोकप्रमाणकः। मैवम्। तत्प्रयोगस्यैव लोकायत्तत्वादयमनुपालम्भः। नचाप्रमाणं लोकप्रसिद्धिः ब्राह्मणादिजातिविवेकस्य तदधीनत्वात् सकलशब्दार्थावधारणस्य च तदायत्तत्वात् अतो निषिद्धेऽपि प्रत्यक्षादौ नाभावः शङ्कितव्यः। सत्यमेवैतत्। प्रासिद्धेरेव तु प्रत्यक्षादिमूलान्तरनिषेधेन निर्मूलत्वमाशङ्क्य समूलताऽत्र प्रदर्श्यते। न च प्रसिद्धिः प्रत्यक्षादिवत्स्वत एव प्रमाणं, स्मरणं हि प्रसिद्धिशब्देनोच्यते तच्च प्रत्यक्षादिमूलमेव। अव्यवस्थिता च प्रसिद्धिः। नास्तिका ह्यहिंसामेव धर्ममाहुः। अन्ये तु प्राजापत्यादिकं तपः पीडात्मकत्वात्परपीडावदधर्म एवेत्याहुः। आर्यास्तु विधिनिषेधप्रमाणकौ धर्माधर्मौ साङ्गिरन्ते। एवं परस्परविगानात्स्वतोऽप्रमाणमेव प्रसिद्धिः। नाप्यार्यप्रसिद्धेर्धर्मं प्रति प्रामाण्यं विगानादिति वाच्यम्। तस्य शास्त्रप्रामाण्यसिद्ध्युत्तरकालीनत्वात्। तथा च वक्ष्यति "शास्त्रस्था वा तन्निमित्तत्वा"दिति[1]। अतो ऽभावगम्यत्वानिराकरणाय चोदनाप्रामाण्यमुपपादनीयम्। यथाहुः—

"तस्मादभाववक्त्रस्थौ धर्माधर्मौ न शक्नुयात्।
चोदना चेत्समुद्धर्तुं ग्रस्तौ तेनैव पश्यताम्"(श्लो.वा.सू.५।८)इति॥

प्रामाण्यमेव वक्तुं भूमिमारचयति। सत्यमिति। अपौरुषे-

१ जै० सू० १ अ० ३ पा० ९ सू०।

थापि प्रामाण्यस्य तदपेक्षाऽभावादऽनाप्तस्पर्शनिमित्तदोषाभावाच्चाऽनपोदितं प्रामाण्यं भवति । त्रेधा ह्यत्र पुरुषानुप्रवेशः–पदपदार्थसम्बन्धद्वारेण, वाक्यवाक्यार्थसम्बन्धद्वारेण, ग्रन्थस्यैव वा भारतादिवत् पौरुषेयत्वात् । न त्वेतत् त्रयमप्यस्ति । पदपदार्थसम्बन्धस्य नित्यत्वमत्रौत्पत्तिकशब्देनोक्तम्, वाक्यार्थस्य च पदार्थमूलत्वं वेदस्य चाऽपौरुषेयत्वमुपरिष्टाद्वक्ष्यते । न च साक्षाद्बाधकमस्तीत्यऽव्यतिरेकशब्देनोच्यते । अनुपलब्धार्थत्वाच्च नानुवादलक्षणमप्रामाण्यमस्तीति "अर्थेऽनुपलब्धे" इत्यनेनो-

---

यत्वमुपपादयितुमाह । त्रेधा हीति । सूत्रं योजयति । पदेति । नित्यत्वमत्र स्वाभाविकत्वं शब्दार्थयोर्नित्यः सम्बन्धो न समयलक्षण इत्यर्थः । अनेन कारणदोषाभाव उक्तः । तस्याऽग्निहोत्रादिलक्षणस्य धर्मस्य ज्ञानं–निमित्तं यस्मादयमुपदेशः । ननु ज्ञानमुपदेश इति ज्ञानोपदेशशब्दार्थयोर्भिन्नार्थत्वात् सामानाधिकरण्यानुपपत्तिः उपदेशोहि शब्द उच्यते ज्ञानं चार्थावगमः । नच शब्द एव ज्ञानं भवति । यदाह भाष्यकारः "उपदेश इति विशिष्टस्य शब्दस्योच्चारणम्" (शा० भा० । नैष दोषः । एतस्य भावसाधनत्वे सामानाधिकरण्यानुपपत्तिः स्यात् करणसाधनस्त्वसौ । करणे ल्युट् ज्ञायते ऽनेनेति ज्ञानं ज्ञापकं प्रमाणमिति यावत् । ततश्चायमर्थः उपदेशः–सविधिकं वाक्यं धर्मे ज्ञानं–प्रमाणमिति । एतेनानुत्पत्तिलक्षणमप्रामाण्यं निराकृतम् । तदुक्तम्––

"उपदेशोहि भवति ज्ञानं तस्येति योग्यता ।
ज्ञायते येन तज्ज्ञानमेकाधिकरणत्वतः" (श्लो.वा.९) ॥

अव्यतिरेकशब्देन बाधकप्रत्ययनिरासः । चकारात् संश-

क्तम्। एतच्च विशेषणत्रयमुपाददानेन सूत्रकारेण कारणदोषबाधकज्ञानरहितमऽगृहीतग्राहि ज्ञानं प्रमाणमिति प्रमाणलक्षणं सूचितम्।

यस्य, अर्थेऽनुपलब्धे इत्यनुवादत्वं निरस्यति, अतस्तच्चोदनाख्यं प्रमाणमेवानपेक्षत्वात्, न ह्येवंसति प्रत्ययान्तरमपेक्षितव्यं अनाप्तप्रणीते हि वाक्ये प्रतिपत्तुः प्रमाणान्तरसंवादेन प्रामाण्यमाप्तप्रणीते तु तत्प्रमाणान्तरापेक्षा, चोदनायां त्वपौरुषेयत्वेनोभयापेक्षा नास्तीत्यनपेक्षत्वादित्युक्तम्। यथाहुर्वार्तिककाराः—

"स्वप्रत्ययान्तरापेक्षा स्यादनाप्तनरोक्तिषु।
आप्तोक्तिषु परापेक्षा नोभयं चोदनासु तदिति"(श्लो.वा.१६७)॥

बादरायणग्रहणं तु पूजार्थम्। बादरायणस्याप्येतन्मतमित्यर्थः। पिण्डितार्थं दर्शयति। एतच्चेति। ननु ज्ञानशब्देनैव प्रामाण्यमुपदेशस्योक्तमतस्तत् प्रमाणमिति व्यर्थम्। सत्यम्। नानेन तस्यैव पुनः प्रामाण्यमुच्यते, किन्तु निरपेक्षत्वेन कार्ये ऽर्थे शब्दस्य यत् प्रामाण्यं तत् स्वत इति नानर्थक्यम्। यथाऽऽहुः—

"औत्पत्तिकगिरा दोषः कारणस्य निवार्यते।
अबाधोऽव्यतिरेकेण स्वतस्तेन प्रमाणता॥
सर्वस्याऽनुपलब्धेऽर्थे प्रामाण्यं स्मृतिरन्यथा" (श्लो. वा. ५ सू० श्लो ११) इति।

अनुपलब्ध इत्युपदेशाख्यप्रमाणविषयविशेषणम्। प्रत्यक्षादयस्तूपलब्धेष्वपि प्रवर्तन्त इतिभावः। सर्वग्रहणं चोत्पत्तिविनियोगप्रयोगाधिकाराभिप्रायम्। ननु "चोदनालक्षणोऽर्थो धर्म" इति चोदनाप्रामाण्यं प्रतिज्ञातं "तस्य ज्ञानमुपदेश" इत्युपदे-

नन्वेवं धारावाहिकेषूत्तरेषां पूर्वगृहीतार्थविषयकत्वादप्रामाण्यं स्यात् । तस्मात् 'अनुभूतिः प्रमाणम्' इति प्रमाणलक्षणम् । स्मृतिव्यतिरिक्ता च प्रतीतिरनुभूतिः । स्मृतिश्च संस्कारमात्रजं ज्ञानमभिधीयते । मात्रग्रहणं च संस्कारसध्रीचीनेन्द्रियजस्य प्रत्यभिज्ञानस्य स्मृतित्वप्रसङ्गेनाप्रामाण्यं मा प्रसाङ्क्षीदित्येवमर्थम् । तदेवम्–संस्कारातिरिक्तकारणजन्यं ज्ञानं प्रमाणमित्युक्तं भवति । तदिदं स्वप्रदर्शने तावदव्यापकम्, संस्कारमात्रजस्यापि ज्ञानस्य स्वरूपे कर्तरि च प्रामाण्यमिष्टं भवताम् ।

अथ स्मर्तव्यापेक्षयैव स्मृतेः स्मृतित्वं तद्विषयसंस्कारजत्वात्, स्वरूपकर्त्रपेक्षया त्वनुभूतिरेव, अतः सिद्ध्यति प्रामाण्यमित्युच्यते ? एवं तर्हि मात्रग्रहणमनर्थकम्, प्रत्यभिज्ञानस्यापि पूर्वानुभूतांशापेक्षयैव स्मृतित्वात् । तत्र चाप्रामाण्यमिष्टमेव, यत्र स्वंशे प्रामाण्यं तत्रानुभूतिरेव सा ।

शस्य साधितमित्यसम्बद्धमिव । मैवम् । उभयोरेकार्थत्वात् । उक्तं च—

"चोदना चोपदेशश्च विधिश्चैकार्थवाचिन" श्लो.वा.११) इति ।

अर्थेऽनुपलब्ध इत्येतदाक्षिपति । नन्विति । उपलब्धार्थविषयस्यापि लोके प्रामाण्याङ्गीकारादिति भावः । किं तर्हि प्रमाणलक्षणमित्यपेक्षायामेकदेश्यभिमतं लक्षणं दर्शयति । तस्मादिति । दूषयति । तदिदमिति । तस्यापि ज्ञानस्य तेनात्मांशस्वात्मांशयोः प्रामाण्याङ्गीकारादित्यर्थः । अतिव्याप्तिमाह ।

किं चानुवादानाम्—"य एवं विद्वान् पौर्णमासीम्" इत्यादीनामपि संस्कारमात्रजत्वाभावात् प्रामाण्यं स्यात् । भवतु इति चेत् ?, न, लोकविरोधात् । तथा लौकिकमपि वाक्यं वक्तृज्ञानानुमितेऽर्थेऽनुवादकतया प्रवर्तमानं प्रमाणं स्यात् । न चैतदिष्टं भवताम्—असंनिकृष्टग्रहणमनुवादानां शास्त्रत्वनिवृत्त्यर्थमित्यङ्गीकरणात् ।

अथाऽनपेक्षं प्रमाणम्=यत्स्वविषये प्रमाणान्तरं नापेक्षते तत् प्रमाणम् । अनुवादानां तु पुरोवादसापेक्षत्वादप्रामाण्यमिति ? । एवं तर्हि लौकिकं वाक्यमप्यनुमितेऽर्थेप्रवर्तमानमनुमानस्य शङ्कानिराकरणमात्रौपयिकत्वादर्थप्रतिपादने तदपेक्षाऽभावात् प्रमाणं स्यात् ।

तथाऽनुमानस्य प्रामाण्यं न स्यात्, तद्धि नियमग्रहणमपेक्षते । न च गृहीतमर्थं मात्रयाऽप्यधिकं गृह्णा-

---

किंचेति । वाक्यत्वादिष्टमेव प्रामाण्यमित्यभिप्रायेणाह । भवत्विति । अनिष्टत्वे नियामकमाह । असन्निकृष्टेति । शास्त्रं शब्दविज्ञानादित्यत्रेत्यर्थः । निराकरोति । एवमिति । अनुमितेऽप्यर्थे प्रवर्तमानं प्रमाणं स्यात् अत्र हेतुः स्वार्थप्रतिपादने प्रमाणान्तरापेक्षाभावात् । नन्वनुमानमपेक्षत इत्याशङ्क्याह । अनुमानस्येति । अनुमानं तु वाक्यस्य निर्मूलत्वशङ्कानिराकरणमात्र एवोपयुज्यते न त्वर्थप्रतिपादने तदपेक्ष्यत इत्यर्थः । नन्वनुमानस्य स्वासिद्ध्यर्थं नियमग्रहणापेक्षा न तु स्वार्थप्रतिपादन इत्याशङ्क्याह । न चेति । यद्यपि मतान्तरेऽनुमानस्याधिकार्थविषयत्वं तथापि तन्मते नास्तीत्यर्थः । अतोऽस्मदुक्तमेव

तीति भवतां दर्शनम् । पीतशङ्खज्ञानमप्यनुभूतित्वात् प्रमाणं स्यात् । इष्टमेवेति वदतो लोकविरोधः । तस्माद् 'यथार्थमगृहीतग्राहि ज्ञानं प्रमाणम्' इति वक्तव्यम् । धारावाहिकेष्वप्युत्तरोत्तरेषां कालान्तरसम्बन्धस्यागृहीतस्य ग्रहणाद् युक्तं प्रामाण्यम् ।

सन्नपि कालभेदोऽतिसूक्ष्मत्वान्न परामृष्यत इति चेत् ? अहो सूक्ष्मदर्शी देवानाम्प्रियः । यो हि समानविषयया विज्ञानधारया चिरमवस्थायोपरतः सोऽनन्तरक्षणसम्बन्धितयाऽर्थं स्मरति । तथा हि—किमत्र घटोऽवास्थित इति पृष्टः कथयति—अस्मिन् क्षणे मयोपलब्ध इति । तथा प्रातरारभ्यैतावत्कालं मयोपलब्ध इति । कालभेदे त्वगृहीते कथमेवं वदेत् । तस्मादस्ति कालभेदस्य परामर्शः । तदाधिक्याच्च सिद्धमुत्तरेषां प्रामाण्यम् ।

ननु यथार्थतापि चेत् प्रमाणलक्षणम्, उष्णजल-

लक्षणं न्याय इत्युपसंहरति । तस्मादिति । उत्तरोत्तरेषां—ज्ञानानाम् । चोदयति । सन्नपीति । कालस्य परोक्षत्वात्प्रत्यक्षधर्मस्य तन्तुनभस्संयोगवदप्रत्यक्षत्वात्तद्भेदस्यापरामर्श इति भावः । कालभेदे त्विति । अयमाशयः नास्माकं वैशेषिकादिवदप्रत्यक्षः कालः किन्तु प्रत्यक्ष एवाऽस्मिन् क्षणे मयोपलब्ध इत्यनुभवात् । अरूपस्याप्याकाशवत्प्रत्यक्षत्वं भविष्यति, नहि रूपिप्रत्यक्षमस्माकं प्रत्यक्षलक्षणं, किन्तु संविदेव परोक्षापरोक्षनिर्भासा जायमाना इदं प्रत्यक्षमिदमप्रत्यक्षमिति विभजते विस्फारिताक्षस्य तु भवत्येवोत्तरोत्तरक्षणसंभिन्नावभास इति । प्रमाणलक्षणे ऽव्याप्तिं शङ्कते । नन्विति । इष्टापत्त्या परिहरति ।

ज्ञानमप्रमाणं स्यात् । इष्टमेवैतत् । ननु लोकविरोधः स्यात् ?, स्याद् यद्यऽयथार्थतां जानन्त एव लौकिकाः प्रामाण्यं मन्वीरन् । ते तु यथार्थतामेवैतस्य मन्यमानाः प्रामाण्यमऽभ्रान्तत्वं च मन्यन्ते । ये त्वयथार्थतां जानन्ति ते नैव प्रामाण्यं मन्यन्ते, नाप्यऽभ्रान्तताम्, तस्मान्नास्ति विरोधः ।

पीतशङ्खज्ञानस्यापि स्मृतित्वाभिमानादनुभूतित्वापरिज्ञानादप्रामाण्यं मन्यन्ते, अतो ऽस्माकमपि नास्ति विरोध इति चेत् ?, तदयुक्तम्—न हि लौकिकाः शुक्तिरजतज्ञानेऽपि स्मृतित्वं मन्यन्ते न तरां पीतशङ्खज्ञाने । तस्मात्सूक्तम्—"अर्थे ऽनुपलब्धे"इति ।

इष्टमिति । विरोधं परिहरति । स्यादिति । इदानीमनेनैव न्यायेनैकदेश्यपि स्वमते लोकविरोधपरिहारं शङ्कते । पीतशङ्खेति । ये त्वनुभूतित्वं जानन्ति ते तु प्रामाण्यमेव मन्यन्त इति नास्ति विरोध इत्यर्थः । परिहरति । तदिति । यत्र प्राभाकरमते शुक्तिरजतज्ञाने स्मृतित्वं सम्भाव्यते तत्रापि न लौकिकानां स्मृतित्वाभिमानः किमु वाच्यं पीतशङ्खज्ञाने इत्यर्थः । उपपादितमर्थं निगमयति । तस्मादिति । अत्र सूत्रकारेण चोदनोपदेशशब्दाभ्यां विधिराश्रितस्तत्प्रयोजनं न पश्यामः । न तावत्साध्यसाधनभावावगमः विधिं विनाप्याख्यातेषु साध्यसाधनभावावगमोपपत्तेः । आख्यातप्रत्ययोहि करोत्यर्थरूपां भावनामवबोधयति, सा च साध्यसाधनभावमन्तरेण नोपपद्यते । यथा हि लोके ओदनं पचतीत्युक्ते पाकौदनयोः साध्यसाधन-

---

१ तदुक्तम् वाक्यान्तरे समर्थेपि किमर्थं विधिराश्रितः । साध्यसाधनसम्बन्धः सर्वाख्यातेषु विद्यते ॥

सम्बन्धबुद्धिरेवं स्वर्गकामोयजेतेत्यतोऽपि यागेन स्वर्गः सिद्ध्यतीति गम्यते एव, आख्यातप्रयोगस्य च सर्वत्र भावात् तेन विना च साकाङ्क्षस्य वाक्यस्य स्वार्थपर्यवसानाभावात् । अथ तस्याः साध्यसाधनमात्रेणोपपत्तेः स्वर्गस्यैव साध्यत्वं यागस्य च साधनत्वमित्ययमर्थो विधिं विना न सिद्ध्यतीत्युच्येत । तन्न । स्वर्गकामोयजेतेत्यत्र स्वर्गयागाभ्यामन्विता भावनाऽवगम्यते तत्र स्वर्गस्येष्यमाणत्वेनाऽवगमात्साध्यत्वमेव युक्तम्, यागस्य तु योग्यत्वात्सन्निधेश्च तत्साधनत्वमिति नास्ति विधेः प्रयोजनम् । अथोच्येतानुष्ठितो यागादिर्धर्मो न चानुष्ठानं प्रवर्तकादृते सम्भवति अतः प्रवृत्तिसिद्ध्यर्थं विध्याश्रयणमिति । तदपिन । तत्प्रयोजनार्थिनं इच्छयैव तत्र प्रवृत्तिसिद्धेः अनिष्टेषु विधिशतेनाप्यप्रवृत्तेः इतिकर्तव्यतांशेऽपि करणोपकारकत्वज्ञानात्प्रवृत्तिः । नाप्यधर्मवर्जनार्थो विधिः प्रतिषेधादेव नञस्तत्सिद्धेः । श्रूयमाणोऽपि विधीरागादिलक्षणामेव प्रवृत्तिमनुवदेत् यद्धननं कुर्यादिति । ननु विधायकः स्यात् एषा हि तत्र वचनव्यक्तिः यद्धन्यात्पिबेद्वा तन्नेति । अविधायकत्वे युक्तिकलापस्तात्पर्यटीकायामवगन्तव्यः । अतोऽनर्थको विधिप्रामाण्यप्रतिपादनग्रहोऽपौरुषेयः शब्दो धर्मे प्रमाणमित्येतावदेव वक्तव्यम् । उच्यते । यदुक्तं समभिव्याहारादेव स्वर्गयागयोः साध्यसाधनभाव इति । तन्न । यजेतेतिपदश्रुत्या समभिव्याहाररूपवाक्यबाधेन भाव्यांशे धात्वर्थस्यैव निवेशनात्, विधौ तु सति समानप्रत्ययोपात्तविध्यवरुद्धा भावना विधेः प्रवर्तनाशक्तिरक्षार्थं विप्रकृष्टमपि पुरुषार्थरूपं स्वर्गादि फलं भाव्यत्वेन गृह्णाति यागं

१ सर्ववाक्येषु चाख्यातं तेनाकाङ्क्षानिवर्तनात् ।
२ प्रवृत्तिसिद्धिरिच्छातः प्रतिषेधात्तु वर्जनम् ।

च साधनत्वेनेति श्रेयःसाधनत्वेन यागादेर्धर्मत्वसिद्धिर्विधेः प्रयोजनम् । यथाऽऽहुः—

"विधावनाश्रिते साध्यः पुरुषार्थो न लभ्यते ।
श्रुतस्वर्गादिबाधेन धात्वर्थः साध्यतां व्रजेत् ॥
विधौ तु तमतिक्रम्य स्वर्गादेः साध्यतेष्यते ।
तत्साधनस्य धर्मत्वमेवं सति च लभ्यते" (श्लो. वा. १.५) ॥

ननु भावनासामर्थ्यादेव पुरुषार्थस्य भाव्यत्वसिद्धिः पुरुषप्रयत्नरूपा हि सा, न ह्यपुरुषार्थे चेतनस्य प्रयत्नः सम्भवति, पदश्रुत्या च यागस्य तत्साधनत्वावगतिरिति किं विधिना । मैवम्, प्रयत्नस्येच्छायोनित्वे तस्याश्च श्रेयःसाधनत्वज्ञानाधीनत्वात् तज्ज्ञानस्य च विधिं विनाऽनुपपत्तेरित्यलं प्रपञ्चेन ।

अत्रेदमुच्यते—यदुक्तं विधौ सति पुरुषार्थः साध्यो लभ्यत इति तदनुपपन्नम् । विध्यनिरूपणात् । तथाहि—लिङादिशब्दविशेष एव विधिस्तद्व्यापारातिशयो वा कोऽपि) तदर्थभेदो वा । नाद्यः आप्ते हि बुद्धिपूर्वकारिणि प्रवर्तके भवति प्रवृत्तिविषयव्यापारस्य फलवत्वाध्यवसायः शब्दस्त्वचेतनोऽस्मिन् प्रवर्तयत्यपि न पुरुषार्थप्रातिलम्भः । नहि प्रबलपवनाभिहतो गर्ते निपतन् फलं लभते । किञ्च प्रमाणानां प्रमेयोपदर्शनात् अन्यत्र व्यापारो न दृष्टचरः प्रत्यक्षं हि रूपादीनुपदर्शयति । ननु प्रवर्तयति शब्दोऽपि प्रमाणमतस्तदपि न प्रवर्तयेत् । प्रवर्तकत्वेन च प्रमाणानां वैफल्यं नोपपद्येत उपादानमात्रस्यैव फलत्वापातात् । कण्टकादिषु प्रत्यक्षेषु प्रवर्तमानो जिहासन्नपि तान् गृह्णीयात् । प्रयोगश्च शब्दो न प्रवर्तकः प्रमाणत्वात्प्रत्यक्षादिवत् शब्दस्य च प्रवर्तकत्वे नित्यत्वात् सर्वदैव प्रवृत्तिप्रसङ्गः सम्बन्धज्ञानाद्यपेक्षा च नस्यात् कारकाणां तथापेक्षाभावात् । अत एव

न शब्दव्यापारोऽपि विधिः। अस्तु तर्हि लिङादीनामभिधेय एवाभिधाख्योव्यापारोविधिः। मैवम्। कार्योन्नेयस्य तस्याभिधेयत्वानुपपत्तेः। अनन्यलभ्यस्यैव शब्दाभिधेयत्वाभ्युपगमात्। अभिधानोपगमे चानवस्थापातात् विशेषहेतोरभावाच्चाऽभिधामात्रस्य प्रवर्तकत्वप्रसङ्गः अनभिधेयत्वे त्वशब्दार्थस्य भावनासमभिव्याहारानुपपत्तिः। अस्तु तर्हि कार्यरूपोऽर्थभेदोविधिः तस्य च प्रमाणान्तराऽगोचरत्वेन चोदनामात्रविषयत्वात् अपूर्वत्वं, कालत्रयविपरिवर्त्यर्थगोचराणि प्रमाणान्तराणि, कार्यं त्वपरामृष्टकालभेदं स्वप्रमाणादवगम्यते। कालत्रयापरामर्शादसदेव कार्यमापद्येत इति चेत्। न। कालेनैकान्तात्, नहि कालः कालान्तरावच्छिन्नो, न च नास्ति, कालान्तरावच्छेदे त्वनवस्था स्यात्, कार्यमेव च मनसि विपरिवर्तमानं नियुङ्क्त इति साम्येन नियोग उच्यते। ननु नियोक्तृव्यापारो नियोगो न च वेदे नियोक्ताऽस्ति अपौरुषेयत्वात् शब्दस्याऽनियोक्तृत्वात्। मैवम्। तस्य व्यापारत्वानङ्गीकारात् अदूरविप्रकर्षेण तु नियोगादिपदप्रयोगः। कथमनन्यगोचरे कार्यात्मनि व्युत्पत्तिः तदभावे वा कथं शब्दात्प्रतिपत्तिः। सत्यमेतत्, तथाऽपि लिङादीनां सकलेतरशब्दविलक्षणः कोऽपि महिमा यदविदितसमया अपि स्वार्थं गमयन्तीति कल्प्यते। अथ वा कार्यमात्रे सङ्केतग्रहो योग्यतया च वेदे कार्यविशेषावगतिरिति न किञ्चिदनुपपन्नम्। अतः कार्यमेव विधिरित्याचार्याः प्रतिपेदिरे। प्रेषणादीनां तु वेदे व्यभिचारात्। एवं तर्हि इष्टाभ्युपायता लिङादीनामर्थो भविष्यति प्रवृत्तौ तस्य सर्वत्राऽव्यभिचारात् प्रवृत्तिहेतुत्वेन तस्यैव प्रवर्तनारूपत्वात् अतस्तदेव लोकवेद-

साधारणं चोदनोपदेशादिशब्दवाच्यं लिङादीनामर्थ इति युक्तम् । एतच्चायुक्तं प्रतीतिविरोधात् लिङादिश्रवणानन्तरं प्रवर्तनाया एवावगमात् नेष्टाभ्युपायत्वावगमः । नन्विष्टाभ्युपायतैव प्रवर्तना ? नेति ब्रूमः "तरतिमृत्यु"मित्याद्यर्थवादादपि तदवगतेस्तत्रापि विधित्वप्रसङ्गः । ननु यागेनेति तृतीयया विधौ साधनत्वावगतिर्नार्थवादे तदभावात् । स्यादेवं यदि यागेनेति तृतीया श्रूयेत विधेरेवायं महिमा यदतृतीयान्तोऽपि याजिः करणतया निर्दिश्यते । किंच इष्टाभ्युपायो यागः यागेन स्वर्गः सिद्ध्यतीत्यादौ विधित्वप्रसङ्गः स्पष्टमेवेष्टाभ्युपायत्वावगमात् अनन्तरं नैवमपि यागस्वर्गयोः साध्यसाधनसम्बन्धसिद्धिः नियोगो हि तदा साध्यो न च साध्यद्वयमेकत्र समवैतीत्यादिना नियोगविचारः प्रस्तावितः सोऽनुपयुक्तत्वादस्माभिरुपेक्षितः ।

अनन्तरं यथावार्तिकमेवानुसन्धास्यामः एवंहि वार्तिककृता भावार्थाऽधिकरण उक्तं लिङादिशब्दानां पुरुषं प्रति प्रयोजकव्यापारोऽभिधात्मिका "भावना विधि"रित्यादिना वार्तिकानुसारेण विधिस्वरूपं निरूपितं सुचरितमिश्रैस्तदेवा स्माभिः सङ्क्षिप्यते । द्वे किल भावने मीमांसकाः सङ्गिरन्ते शब्दात्मिकाऽर्थात्मिका चेति । तत्रार्थात्मिका स्वर्गादिफलकर्मिका यागादिधात्वर्थकरणिका स्ववाक्यप्रकरणान्यप्रकरणानारभ्यवादस्मृतिलोकाचारप्राप्ततत्तदितिकर्तव्यतावती तत्र तत्र सिद्ध्यतीति । शब्दात्मिका तु लिङादिशब्दानां प्रयोजकानां प्रयोज्यपुरुषकर्मिका अभिधासम्बन्धज्ञानकरणिका अर्थवादोदितप्राशस्त्येतिकर्तव्यतावतीति विवेकः । शब्दव्यापाररूपाप्यभिधा शब्दात्मिका व्यापारतद्वतोरनतिरेकात् द्रव्यमेव हि पूर्वावस्थातः प्रच्युतं परावस्थामप्राप्तं पूर्वापरीभूतं

व्यापारशब्दवाच्यं, भावना हि लिङादिभिरभिधीयमाना न स्वरूपमात्रेण वर्तमानापदेशवदभिधीयते । किं तर्हि ? कुर्यादिति प्रवृत्तिविषयतया, अतो लिङादीनामभिधा पुरुषकर्मिकेत्युच्यते । उक्तं च—"पुरुषं हि वदन्ति भावये" दिति । लिङादिश्रवणानन्तरं प्रवृत्तिहेतुप्रत्ययः सर्वस्य भवतीत्यविवादं प्रवृत्तिहेतुस्वरूपे तु विप्रतिपत्तिः तत्र सम्भावितानामन्येषां प्रवृत्तिव्यभिचारित्वात्प्रमाणान्तरागोचरे च प्रवृत्त्यहेतोरुत्पत्त्यसम्भवात् अभिधेयप्रत्ययवतो भीयमानस्वरूपं लिङादीनामभिधानमेव प्रवृत्तिहेतुरिति युक्तं स एव प्रवर्तना पुरुषप्रवर्तकत्वात् । लिङादिव्यापारोपि सन् अभिधेयप्रत्ययहेतुत्वादभिधेय इत्युच्यते । यतः प्रवृत्तिदर्शनं तद्व्यापारः प्रवर्तना प्रवृत्तिहेतुत्वात् । न च शब्दान्तरेभ्यः प्रवृत्तिरुपलभ्यते ऽतो न तदभिधा सुप्रवर्तनात्वप्रसङ्गः । यत्तु कार्यान्वियत्वादनभिधानमुक्तं तन्न । भावनावगतिरूपस्य कार्यस्य वर्तमानापदेशेष्वपि प्रसङ्गात् । प्रवर्तेऽहमिति ज्ञानं तु प्रवर्तनाज्ञानोत्तरकालीनं न तदुन्नायकं अतोऽनन्यप्रमाणकत्वादुपपन्नमभिधेयत्वमभिधायाः । नापि व्युत्पत्तिविरहः प्रवृत्तिहेतुत्वेनैवार्थापत्तितस्तदवगमात् तथा हि—यत्र तावल्लिङादिभ्यः प्रवृत्तिरुपलभ्यते तत्र मया प्रवर्तितव्यं इत्यन्तः सङ्कल्पात्मा लिङ्वृत्तिविशेष उन्नीयते । अप्रवर्तमाना अपि लिङ्श्राविणः प्रवर्तस्वेति मामयमाहेति वक्तारं निर्दिशन्ति । तेनावगम्यते प्रवृत्तिहेतुरभिहितो लिङा स च नर्ते व्यापारात्सिद्ध्यति एतदेवास्यानन्यप्रमाणकत्वं यत्प्रतिपत्तिगम्यत्वेनै शब्दादवगम्यते । ननु प्रवर्तनास्वरूपमेवाऽन्यतो नावगतं येन व्युत्पत्तिविरहश्चोद्येत, न चाभिधा

१ यत्प्रतिपत्तिकाले न शब्दादृतेऽवगम्यते । इति पु० पा० ।

नाभिधीयत इति मन्तव्यम्। अभिधाशब्दवदुपपत्तेः। यदेव हि शब्दश्रवणानन्तरं बुद्धौ विपरिवर्तते तदभिधेयम्। उक्तं च "लिङादिभ्यः प्रवृत्तिहेतुरवगम्यते, न च लिङादीनामभिधानव्यापारादन्यः प्रवृत्तिहेतुः शक्यो निरूपयितु"मिति। नाप्यनवस्था तदभिधानस्य शब्दादप्रतीतेः प्रवर्तनामात्रस्यैव प्रतीतेः। नापि लिङादिस्वरूपाभिधानापत्तिः स्वयमेव तद्व्यापारस्य वैलक्षण्यात्, अतो लिङादीनामभिधा प्रवर्तना सोऽयं विधिः। आह च—

"अभिधाभावनामाहुरन्यामेव लिङादय" इति।

तदनेनैव रूपेण विधिना सम्बद्धा भावना प्रवृत्तिविषयतयाऽवगता फलवत्तया निश्चीयते तथा ऽवगता चाऽनुष्ठीयते फलवत्ता च विधिशक्तिमवसीदन्तीमुत्तभ्नाति। सागरं तरेदित्यादौ तु सन्नपि लिङ्व्यापारो निर्वाहिकायाः फलवत्ताया अभावात् न निर्वहति। तदभावश्चानाप्तवाक्यत्वात्। वेदे त्वपौरुषेयत्वान्न पुरुषदोषशङ्कापीत्युपपन्नम्। विधौ तु तमतिक्रम्येति।

सुचरितमिश्रनिरूपितविधितत्त्वमिदं मयाऽत्र सङ्क्षिप्तम्।
वार्तिकराणकटीकाविरोधपरिहारस्तु संचिन्त्यः॥

वार्तिकटीकाद्यनुगुणं तु विधितत्त्वमस्माभिरर्थवादाधिकरणे निरूपणीयम्।

अधिकरणं त्वेवम्। विधिरबोधको बोधको वेति संशयः अलौकिके धर्मे विधेः शक्तिग्रहणासम्भवात् अबोधकत्वं, ततश्चाप्रामाण्यमिति पूर्वः पक्षः। यथा प्रसिद्धपदसमभिव्याहारेणाऽप्रसिद्धार्थस्य मधुकरशब्दस्य भ्रमरे सङ्गतिं गृहीत्वा वाक्यार्थं प्रतिपद्यते तथा कारीर्यादृष्टिकामो यजेतेत्यत्र लोकप्रसिद्धार्थवृष्ट्यादिपदसमभिव्याहारादलौकिकभावनायां विधः सङ्गतिं

वृत्तिकारस्त्वन्यथेदं वर्णयांचकारेत्येवमादिनोपवर्षमतेन "तस्य निमित्तपरीष्टिः" इत्येवमादिसूत्रत्रयमन्यथाकृत्वा व्याचष्टे भाष्यकारः, तत्र निमित्तसूत्रेण तावत् प्रतिज्ञातस्य चोदनाप्रामाण्यस्य परीक्षाऽपदेशेन स्वतः प्रामाण्यं हेतुरित्युच्यते।

प्रसिद्धानि हि प्रत्यक्षादीनि प्रमाणानि तदन्तर्गतं च शास्त्रम्, अतस्तदपि प्रसिद्धमेव। न च प्रसिद्धस्य प्रमाणस्य प्रामाण्यमन्येन परीक्षितव्यम्, स्वत एव तस्य स्वविषयोपस्थापनसामर्थ्यात्। यदि च परीक्ष्येत ततो येन परीक्ष्येत तस्याप्यन्येन परीक्ष्येत तस्याप्यन्येनेत्यनवस्था स्यात्। तस्मात्प्रसिद्धत्वात् प्रामाण्यस्य चोदनापि प्रमाणमिति।

गृहीत्वा विधिवाक्यार्थं पुरुषोऽवगच्छति तस्मान्नाबोधकत्वलक्षणमप्रामाण्यम्। नापि संवादापेक्षा स्वतःप्रामाण्याऽभ्युपगमात्। नापि मिथ्यात्वादिरूपं सूत्रोक्तयुक्तेरिति॥

अत्र भगवता वृत्तिकारेण "तस्य निमित्तपरीष्टि"रित्येवमादिसूत्रत्रयमन्यथा व्याख्यातं, तच्च व्याख्यानं वृत्तिकारस्त्वित्यादिना ग्रन्थेन भाष्यकृता दर्शितं ग्रन्थकारोऽपि तद्दर्शयितुमाह। वृत्तिकारास्त्विति। उपवर्षमतेन सूत्रत्रयमन्यथाकृत्वा व्याचष्टे भाष्यकारः केन ग्रन्थेनेत्यपेक्षायां वृत्तिकारस्त्वित्यादिना भाष्यग्रन्थः पठितः। निमित्तसूत्रव्याख्यानं तावद्दर्शयति। तत्रेति। एतच्च सूत्रं नञर्थाध्याहारेण व्याख्यातं न परीक्षितव्यं निमित्तं प्रत्यक्षादीनि हि प्रसिद्धानि प्रमाणानि तदन्तर्गतं चेदं शास्त्रं अतस्तदपि न परीक्षितव्यमित्यस्मिन् व्याख्याने सू-

ननु न ज्ञानमुत्पन्नमित्येवाऽर्थतथात्वमध्यवसातुं शक्यम्—प्रसिद्धतरस्यापि प्रत्यक्षस्याऽयथार्थस्योत्पत्तिदर्शनात्, यथा—शुक्तिकायां रजतमिति प्रत्यक्षमेवाऽयथार्थम् । न, शुक्तिकायां रजतज्ञानस्य प्रत्यक्षाभासत्वात् ।

किं पुनराभासाऽसंकीर्णं प्रत्यक्षलक्षणम् ? । तद्दर्शयति—"तत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म सत्प्रत्यक्षम्"— यदाभासं विज्ञानं तेनेन्द्रियाणां संप्रयोगे यद्विज्ञानं तत् सत्प्रत्यक्षम् । तत्सतोर्व्यत्ययादाऽऽभासाऽसंकरसिद्धिः । तदिति चाव्ययं तृतीयान्तं तेनेत्यर्थे ।

त्रार्थः । प्रत्यक्षसूत्रमवतारयितुं परिचोदयति । नन्विति । परिहरति । नेति । यत्प्रत्यक्षं न तद्व्यभिचरति, यद्व्यभिचरति न तत्प्रत्यक्षमिति भावः । अयथार्थत्वशङ्का च परीक्षायां हेतुः सा चैवंरूपे प्रत्यक्षे न सम्भवत्येवातो युक्तमेवापरीक्ष्यत्वमिति भावः । एतदेव प्रश्नपूर्वकं सूत्रेणोपपादयति । किं पुनरिति । सूत्रं व्याचष्टे । यदिति । ननु सत्सम्प्रयोग इत्यत्र तच्छब्दाश्रवणात् तेनेन्द्रियाणामिति व्याख्यानमनुपपन्नं तत्राह । तत्सतोरिति । ननु व्यत्ययकल्पनायामपि नास्ति निर्वाहः ईदृशं यत्तत्सत्प्रत्यक्षमपि पुनस्तच्छब्दापेक्षाया विद्यमानत्वात् । नैष दोषः । व्यत्ययस्याध्याहारोपलक्षणत्वात् । उक्तं च "यद्वाध्याहारकल्पनेति" । अन्यस्यैव वाऽयं तच्छब्दस्याध्याहार इति भट्टोम्बकः । द्वयोरपि तत्सतोरत्राध्याहारः । तत्राभासमानाकारपरामर्शार्थोऽध्याहृतस्तच्छब्दः । अपरश्च प्रत्यक्षस्वरूपपरामर्शार्थः । सत्सम्प्रयोगे इत्यत्र पठितः सच्छब्दस्तद्विशेषणार्थ

नन्वऽसत्यपि व्यत्यये नास्ति संकरः—'इन्द्रियसंप्रयोगजं ज्ञानं प्रत्यक्षम्' इत्येतावदेव वक्तव्यम्, न हि शुक्तिकायां रजतज्ञानमिन्द्रियसंप्रयोगजम् । किं तर्हि ? इन्द्रियसंप्रयोगाच्छुक्तिशकलं रजतसाधारणेन भास्वरत्वादिरूपेण गृहीतम्, असाधारणं तु शुक्तिकात्वमिन्द्रियदौर्बल्यादऽगृहीतम्, अनन्तरं च संस्कारोद्बोधाद्रजतं स्मृतम्, ततः स्मृतरजतात्मना शुक्तिव्यक्तिर्दोषवशाद् गृह्यते, अतो नेन्द्रियसंप्रयोगजं रजतविज्ञानमिति नातिप्रसङ्गः ।

प्रणाड्याऽस्तीन्द्रियसंप्रयोगजत्वमिति तद्व्यावृत्त्यर्थं तत्संप्रयोगजत्वमिति विशेषणं वक्तव्यमिति चेत् ? तन्न, न हीह यथाकथंचित्संप्रयोगजन्यत्वं लक्षणम्, किं तु साक्षात्तज्जन्यत्वम् । यदि च यथाकथंचिदित्याश्रीयेत ततो विशेषणे सत्यप्यतिव्याप्तिमल्लक्षणं स्यात—आरादग्निमध्यक्षयतो यदौष्ण्यविषय-

---

एव, अध्याहृतस्तु शोभनार्थः इति विवेचनीयमिति सुचरितमिश्राः । नन्वाभासलक्षणाकथनात् न प्रत्यक्षतदाभासविवेकः शक्यते कर्तुम् । न । ईदृशं प्रत्यक्षमित्युक्ते ऽर्थाद्नीदृशं प्रत्यक्षाभास इति ज्ञातुं शक्यत्वात् । प्रयोजनाभावेन व्यत्यासमाक्षिपति । नन्वसत्यपीति । अत्र शङ्कते । प्रणाड्येति । आक्षेपवादी परिहरति । तत्रेति । आक्षेपमुपसंहरति । अत इति । परिहरति । सत्यमिति । कुतस्तर्ह्यतिप्रसङ्गोऽत आह । पीतेति । शुक्तिरजतज्ञान एव चातिप्रसङ्गनिवारणार्थो व्यत्यय इत्याह । अपि चेति । उपपादितमर्थं निगमयति । तस्मादिति । अत्राह । किं पुनरयथार्थं ज्ञानं न तावच्छुक्तौ रजतमिति । नात्र-

शुक्तौ रजताकारेण भासते किन्तु ज्ञानद्वयमेवैतत् । तथाहि—शुक्तिस्तावत्पुरोवर्तिनी रजतसाधारणेनात्मना गृह्यते । अनन्तरं च सदृशदर्शनोद्बोधितसंस्काराद्दोषवशात्प्रमुष्टतदवमर्शात् रजतमिति स्मृतिर्भवति। तद्गोचरयोश्च गृह्यमाणस्मर्यमाणयोर्दोषवशादेव भेदकधर्मानवधारणं भेदाग्रहादेव च विभ्रमव्यवहारो, न पुनरस्याऽन्यथाभानात् । किञ्च शुक्तिगोचराया रजतधियः किं निबन्धनमिति विपरीतख्यातिवादी वक्तव्यः न तावदिन्द्रियं प्राप्यकारित्वात्, असन्निहितरजतप्राप्त्यसम्भवात् अतोऽग्रहणकारणाभावात्स्मृतिरेवेदं, अस्ति च स्मृतेः कारणं पूर्वानुभवप्रभाविता भावना । ननु तत्तांशपरामर्शाभावात् स्मरणमपि नोपपद्येत । नैवम् । अनुभूतविषयत्वमात्रेण तदुपपत्तेः । तदितिपरामर्शस्य तत्राप्रयोजकत्वात् । अतोऽग्रहणस्मरणयोरुभयोरपि यथार्थत्वात् यथार्थाऽयथार्थविभागो ऽनुपपन्नः, साङ्ख्यस्याप्ययमेव पक्षः ।

अत्र ब्रूमः—

उभयोश्चेद्यथार्थत्वं न भ्रान्तिः क्वापि सिद्ध्यति ।
स्मरामीत्यग्रहो भ्रान्तिरितिचेत्तन्न युज्यते ॥

अयथार्थं ज्ञानं भ्रान्तिरिति हि लौकिकाः प्रतिपद्यन्ते । भाष्यकारोऽपि "यस्य च दुष्टं करणं यत्र च मिथ्येतिप्रत्ययः स एवासमीचीनः प्रत्ययो नान्य" (शाब. भा.) इति । यदपि विवेकाऽग्रहणादयथा व्यवहार इति । तदतिमन्दम् । अग्रहणस्य ग्रहणाभावरूपस्य तेनानङ्गीकारात् कस्य भ्रान्तिशब्दवाच्यता स्यात् । स्मरामीत्युल्लेखशून्यं स्मरणमेवाग्रहणमिति चेत् । न । स्मृतिमात्रस्य तथात्वापातात् । नहि स्मरन् भ्राम्यतीत्युच्यते । अपिच कोऽयं नियमो यत्स्मृतरजतस-

दर्थी शुक्तावेव प्रवर्तते नान्यत्र। यदि तु तामेव रजततया जानीयात् ततस्तत्र प्रवर्तत इति युक्तम् । सादृश्यदर्शनात्तत्रैव प्रवृत्तिरिति चेत् तर्हि तत्सदृशमिति प्रतीयान्न रजतमिदमिति। नहि गवा सदृशं गवयं जानन्तो गौरयमिति व्यवहरन्ति। यदि च शुक्तावप्रसक्तं स्वतन्त्रमेव रजतं स्मर्यते कथं तर्हि नेदं रजतमिति प्रतिषेधः प्राप्त्यभावात् । ननु नात्र किञ्चिद्बाध्यते किन्त्वनवगतो विवेको ऽवगम्यते—नेदं रजतमिति शुक्तेर्विविक्तं रजतमित्यर्थः। एतच्चालौकिकमेव व्याख्यानं उपेक्षणीयम्। अतोऽन्यदन्याकारतया प्रसक्तं बाध्यत इति युक्तम्। कथमसन्निहितं ज्ञानोत्पादकमिति चेत् । प्रत्यक्षप्रमाणस्यायं धर्मो नाभासस्य । कथमन्यसंयुक्तमिन्द्रियमन्याकारज्ञानस्य हेतुरिति चेत् । दोषवशादिति ब्रूमः। दोषस्यैव मिथ्याज्ञानकारणत्वात् । दृश्यते हि स्वप्ने मनोदोषादवर्तमानस्याऽपि वर्तमानवज्ज्ञानं, अत आत्मेन्द्रियमनोऽर्थसन्निकर्षोऽसत्सु दोषेषु सम्यग्ज्ञानहेतुः सत्सु तु शुक्तौ विपरीतज्ञानकारणमिति यथार्थायथार्थविवेकः।

योगाचारस्तु बुद्धिस्थस्य रजतादेः शुक्त्यादावारोप इत्याह । तदसत् । पुरोवर्तित्वेन रजतस्य बाधेऽहं रजतमिति स्यात् इदन्ताबाधे च निरधिष्ठानभ्रमापत्तिः। असदेव रजतमारोप्यत इति माध्यमिकाः। तन्न। निरुपाख्यानस्यापरोक्षाभासगोचरत्वानुपपत्तेः। अनिर्वचनीयमारोप्यत इति वेदान्तिनः। तदपि न। तादृशे वस्तुनि प्रमाणाभावात्। असतो ऽप्रतीतिः सतश्च बाधानुपपत्तिरेव प्रमाणमिति चेन्न। देशान्तरगतस्यात्रारोपेण तस्यान्यथाप्युपपन्नत्वात्। ननु शुक्तिरजततादात्म्यमत्र प्रतीयते। न च तदन्यत्रास्ति अतो ऽनिर्वचनी-

मनुमानं तदपि प्रत्यक्षं स्यात्, घ्राणाक्ष्येन्द्रियसंप्रयोगजत्वात् संप्रयुक्तविषयत्वाच्च, अस्ति ह्यौष्ण्यस्येन्द्रियसंप्रयोगः संयुक्तसमवायलक्षणः । तस्मादवश्यं साक्षात्संप्रयोगजत्वं लक्षणमित्यङ्गीकर्तव्यम्, अतः शुक्तिरजतवेदनेऽपि व्यभिचाराभावादनर्थकस्तत्सतोऽर्थत्ययः ।

सत्यम्–साक्षात्संप्रयोगजत्वं लक्षणम्, सत्यं च शुक्तिरजतज्ञानेपि नातिप्रसङ्गः, पीतशङ्खद्विचन्द्रादिज्ञानेऽव्वतिव्याप्तिः स्यात् साक्षात्संप्रयोगजत्वात् । अपि च स्मृतेन रजताकारेण यत् संनिहितस्य शुक्तिशकलस्य तादात्म्यग्रहणं तदऽनुपरतेन्द्रियव्यापारस्य भवत् साक्षात्संप्रयोगजमेवापरोक्षत्वात् । तस्मादाभासनिवृत्त्यर्थस्तत्सतोऽर्थत्यय इति सूक्तम् । भाष्ये त्वाभासप्रदर्शनार्थं शुक्तिकारजतज्ञानोदाहरणमित्यनवद्यम् ।

तत्संप्रयोगजत्वाऽतत्संप्रयोगजत्वे कथं विविच्येते ?। उच्यते–ज्ञानस्वरसादेव विषयस्य तथात्वमध्यवसीयते, तदन्यथात्वं तु कारणदोषज्ञानादऽर्थान्यथात्वज्ञानाद्वाऽवगन्तव्यम् । अतो यत्र प्रयत्नेनान्विष्यमाणोऽपि कारणदोषो बाधकज्ञानं वा नोपलभ्यते तत्राम-

---

यमेवाङ्गीकर्तव्यम् । नैवम् । इदमंशरजतांशतादात्म्यस्यान्यत्रापि सद्भावात् । अतोऽन्यत्र सतोऽन्यत्राऽरोपोऽन्यथाख्यातिरेवेति सिद्धो विपर्यासः ।

प्रमाणतदाभासविवेकं प्रश्नपूर्वकमुपपादयति । कथमिति ।

णम्, इतरच्चाऽप्रमाणम् । चोदनार्थज्ञानस्य तूभयाभावात् सिद्धं प्रामाण्यम् ।

इत्यौत्पत्तिकसूत्रम् ॥ ५ ॥

"ननु सर्व एव निरालम्बनः" (शाब.भा.) इत्यादिना पूर्वोक्तहेतुद्वयनिमित्तमिथ्यात्वाक्षेपेण शून्यवादी प्रत्ययविवेकोपपादनफलमाह । चोदनेति ॥ ५ ॥

अत्र भाष्यकारेण "ननु सर्व एव निरालम्बनः स्वप्नवत्प्रत्यय" इत्याद्याक्षेपपुरस्सरं "जाग्रतो बुद्धिः सुपरिनिष्ठिता कथं विपर्येष्यती" ति बाह्यार्थसद्भावः प्रतिपादितः । तस्य प्रकृतविचाराऽसङ्गतिमनुपयोगं चाशङ्क्य समाधातुमाह । नन्विति । कारणदोषो बाधकज्ञानं चेति पूर्वोक्तहेतुद्वयं, तदाक्षेपात्प्रकृतविचारसङ्गतिः । सर्वस्यापि मीमांसाप्रपञ्चस्य बाह्यार्थाश्रयत्वात् तत्सद्भावप्रतिपादनं प्रयोजनवदेवेति भावः । यथाऽऽहुः—

"कर्मभ्यः फलसम्बन्धः पारलौक्यैहलौकिकः ।
सर्वमित्याद्ययुक्तं स्यादर्थशून्यासु बुद्धिषु ॥
तस्माद्धर्मार्थिभिः पूर्वं प्रमाणैर्लोकसम्मतैः ।
अर्थस्य सदसद्भावे यत्नः कार्यः क्रियां प्रति" (श्लो.वा.नि.वा.४)॥

निरालम्बनवादी बाह्यार्थमपलपति ज्ञानं स्वीकुरुते शून्यवादी तु ज्ञानस्याप्यभावमभिप्रैतीति विवेकः । उक्तं च—

"तत्रार्थशून्यं विज्ञानं योगाचाराः समाश्रिताः ।
तस्याप्यभावमिच्छन्ति ये माध्यमिकवादिनः ॥
तत्र बाह्यार्थशून्यत्वं तुल्यं तावत् द्वयोरपि" (श्लो.वा.नि.वा.१५)इति।

ननु बाह्यार्थाभावेऽपि संवृतिसिद्धमर्थमङ्गीकृत्य बौद्धाना-

मिव धर्माधर्मोपदेशौ घटत एव । तदुक्तं–

“ द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ।
लोक संवृतिसत्यश्च सत्यं च परमार्थत” (लङ्कावतार) इति ।

एतच्चाद्वैतवादिभिरपीष्टमेव बाह्यप्रपञ्चमिथ्यात्वनिरूपणात् । एतच्चायुक्तम् । सत्यद्वयासम्भवात् । नहि संवृतेः सत्यत्वमस्ति संवृतिशब्दस्य मिथ्यापर्यायत्वात् सत्यशब्दसमभिव्याहारानुपपत्तिश्च । अतो यः सत्यभेदो बौद्धैराश्रितः द्विविधं सत्यं संवृतिसत्यं परमार्थसत्यं चेति सोऽनुपपन्नः । न चायं सत्यशब्दः संवृतिपरमार्थयोः साधारणोऽक्षशब्दवत् विरोधात् । अत एव न गवादिवत्सामान्यशब्दोऽपि, समानानां हि भावः सामान्यं, न च तत्परस्परविरोधिनोः सम्भवति नहि धर्माधर्मयोर्धर्मत्वमधर्मत्वं वा एकं सामान्यं भवति । तदुक्तम्–

“संवृतेर्नतु सत्यत्वं सत्यभेदः कुतोऽन्वयम् ।
सत्या चेत्संवृतिः केयं मृषा चेत्सत्यता कथम् ॥
सत्यत्वं न तु सामान्यं मृषार्थपरमार्थयोः ।
विरोधात् नहि वृक्षत्वं सामान्यं वृक्षसिंहयो”रिति(श्लो.वा.नि.वा.७)

यदप्युच्यते कल्पनामात्रकल्पितेन बाह्येन सर्वो लौकिको व्यवहारधर्म इति । तदप्यसत् । निर्वस्तुके जगत्यभिन्नस्य चिन्मात्रस्य कल्पनया भेत्तुमशक्यत्वात् । कश्चिद्भिन्नमेव किञ्चिद्रूपान्तरं कल्पनास्पदं भवति शुक्ताविव रजतरूपं, यस्य तु किञ्चिद्भिन्नमस्ति तत्केन रूपेण कल्प्यताम् । उक्तंच—

“कल्पनाऽपि ह्यभिन्नस्य नैव निर्वस्तुके भवेत्” (श्लो.नि.वा९)

ननु सत्यमसत्यं सांवृतं चेति त्रिविधं वस्तुतत्त्वमङ्गीकुर्मः तत्र सांवृतं नासत्यमेव व्यवहाराविसम्वादात् । नापि सदेव प्रमाणान्तरविरोधात् । अतो विधान्तरमेवेदमितियुक्त-

तिष्ठते । तथा हि-यत्र कारणदोषज्ञानं बाधकज्ञानं वा तत्र मिथ्यात्वम्, अन्यत्र सत्यत्वमिति व्यवस्था नोपपद्यते, सर्वज्ञानानां मिथ्यात्वात् । सर्वमेव हि ज्ञानमात्मांशपर्यवसितमऽनादिवासनावशादात्मानमेव बाह्यतयाऽध्यवस्यन्मिथ्यैव ।

कथं पुनरात्मांशपर्यवसायित्वं गम्यते ?, अनुमानात्, बाह्ये च प्रवृत्त्यऽसामर्थ्यात् । यथा चासामर्थ्यं तथा वक्ष्यामः । संप्रत्यनुमानमुच्यते- स्तम्भा-

---

स्तदाश्रयो व्यहारः । मैवम् । संवृतेर्मिथ्याज्ञानत्वेन वस्तुकल्पने सामर्थ्यासम्भवात्, अतो यत्परमार्थतो नास्त्येवेति निरूप्यते न तत्संवृत्त्या सद्रूपं भवितुमर्हति इति । यत्तु यावद्व्यवहारमविसंवादि तदस्त्येव परमार्थसत् न ह्यसतः सर्वदा व्यवहारहेतुत्वं सम्भवति । तदुक्तम्—

"तस्माद्यन्नास्ति नास्त्येव यत्त्वस्ति परमार्थतः ।
तत्सत्यमन्यन्मिथ्यैव न सत्यद्वयकल्पना" (श्लो.नि.वा.१०) ॥

स्वप्नवच्च बाह्यपदार्थाभ्युगमे स्वप्नादिभोगतुल्य एव शुभाशुभकर्मफलोपभोगो भवेत् । ततो ज्योतिष्टोमादौ नैव कश्चित्प्रवर्तेत स्वाप्निकसुखादिवच्च यदृच्छयैव कदाचिदुत्पत्तेः प्रवृत्तिवैयर्थ्यात् । उक्तं च—

"नहि स्वप्नसुखाद्यर्थं धर्मे कश्चित्प्रवर्तते ।
यादृच्छिकत्वात्स्वप्नस्य तूष्णीमासयेत पण्डितैः"(श्लो.नि.वा.१२)॥

अतः परमार्थफलप्राप्त्यर्थं बाह्यवस्तुव्यवस्थापनं प्रयोजनवदिति सिद्धम् ।

प्रत्यवस्थानं विवृणोति । तथा हीति । व्यवस्थानुपपत्तौ कारणमाह । सर्वेति । स्तम्भादिप्रत्यया इति । अत्र

दिप्रत्ययाः स्वांशमेव बाह्यतयाऽध्यवस्यन्तो मिथ्याभूताः प्रत्ययत्वात् स्वप्नप्रत्ययवत् शुक्तिकारजतादिप्रत्ययवच्च। स्वप्नादिप्रत्यया हि यथाऽवगम्यमानबाह्यार्थाभावाद् देशान्तरकालान्तरवर्तिनां च संनिहितदेशकालतया प्रतिभासाऽसम्भवात् क्वचित् कदाचिदप्यसम्भवतां स्वशिरश्छेदादीनां स्वप्ने प्रतिभासादवश्यं स्वात्मानमेव बहिर्वद् गृह्णन्तीत्यभ्युपगन्तव्यम्। अतस्तत्सामान्याज्जाग्रज्ज्ञानानामपि स्वांशपर्यवसायित्वान्मिथ्यात्वम्। इति प्राप्ते—

अभिधीयते- न तावत्स्वप्नादिप्रत्ययाः स्वांशावलम्बनाः, तेपि बाह्यार्थमेवान्यथा गृह्णन्तीति वक्ष्यामः। भवतु वा तत्रात्मख्यानं नैतावता नीलादिप्रत्ययास्तथा भवितुमर्हन्ति, तत्र हि नीलमिदं पीतमिदं स्तम्भोयं घटोऽयमित्येवमिदमाकारास्पदीभूतं बाह्यं नीलादि प्रत्यक्षेणावगम्यमानं न शक्यमनुमानेनाऽपह्नोतुम्। आत्मग्राहित्वे ह्यहं नीलमिति स्यात्।

प्रत्ययमात्रस्य पक्षत्वे सिद्धसाधनता दृष्टान्ताभावश्च स्यात् अतो जाग्रत इति पक्षविशेषणं कर्तव्यम्। अत्र साध्यं बाह्यानालम्बनत्वेन व्यवस्थाप्यं स्वांशालम्बनत्वस्य बौद्धनाभ्युपगमादित्यभिप्रायेणाह। स्वांशमेवेति। मीमांसकाभिप्रायेण च व्यवयवोपन्यासः। सर्वज्ञाननिरालम्बनत्ववादिमते विपक्षाभावेन तत्र हेतोरवृत्तेः व्यतिरेकानुपन्यासः। समाधातुमुपक्रमते। इति प्राप्त इति। वक्ष्याम इति। शून्यवाद इत्यर्थः। अन्वारुह्यवादेनाह—भवत्विति। प्रत्यक्षेणेति। प्रत्यक्षे परिपन्थिनि तद्विरुद्धमनुमानमात्मानमेव न लभते वन्हौ शैत्यानु-

तदेवं प्रत्यक्षमेव बाह्यार्थमुपस्थाप्य तदपन्हव-प्रवृत्तस्यानुमानस्योदयं निरुणद्धि । स्वप्नादिषु तु बाधकेन ज्ञानान्तरेण बाह्यसद्भावनिराकरणाद् युज्येतात्मख्यातिः । न त्विह तथा बाधकमस्त्यऽन्यत् भवदुक्तादनुमानात् । न चानुमानमलं बाधितुमित्यु-

---

मानमिवेति भावः । एतदेव विवृणोति । यदिति । नत्विहेति । जाग्रत्प्रत्यत्यय इत्यर्थः । यदाह भाष्यकारः—

"स्तम्भ इति जाग्रतोबुद्धिः सुपरिनिश्चिता कथं विपर्येष्यतीति" ।

सुपरिनिश्चितग्रहणं बाधकप्रत्ययनिवृत्त्यर्थम् । अत एवस्तम्भादिप्रत्यया अनुमानाद्बलीयांसो भवन्तीति भावः । इत्युक्तं-प्रत्यक्षेण तदुत्पत्तिनिरोधादेव न बाधकमित्युक्तमित्यर्थः । अप्रमाणगृहीतस्यार्थस्य बाधो भवति गृहीतमात्रबाधे तु निरालम्बनाः प्रत्यया इति योऽयं भवत्पक्षः सोऽपि गृहीतत्वान्मिथ्या स्यात् ततश्चानुमाने पक्षाभावः । किञ्च निरालम्बनत्वेन विशिष्टाः प्रत्ययाः साध्यन्ते तत्र विशेषणविशेष्ययोर्यज्ज्ञानं तस्यापि निरालम्बनत्वात्तयोरप्रसिद्धिः ततश्चाप्रसिद्धाविशेषणत्वमप्रसिद्धविशेष्यत्वमप्रसिद्धत्वं च दूषणम् । सालम्बनत्वे तु तेनैवानैकान्तिकत्वात् न प्रत्ययानामनालम्बनत्वसिद्धिः । तथा किमिदं निरालम्बत्वं धर्मिणो भिन्नमभिन्नं वा, अन्त्ये विशेषणत्वासम्भवः । आद्ये तद्भेदग्राहिणो ज्ञानस्य मिथ्यात्वान्न भेदसिद्धिः । स्यादेतत् वस्तुनि हि भेदाभेदादिविकल्पौ युक्तौ नावस्तुनि, नचालम्बनप्रतिषेधो वस्तुभूतः अतः किं तद्विकल्पेन । मैवम् । अवस्तुत्वेऽस्मान् प्रति तद्बोधनानुपपत्तेः । नह्यवस्तु बुद्धिविषयो भवति तद्विषयत्वे वा वस्तुत्वापातात् । अथाऽवस्तुनोऽपि वस्तुत्वं क-

क्तम् । दूषणसहस्रं चास्यानुमानस्य वार्तिके प्रपञ्चि-
तमित्युपरम्यते ।

एवमनुमाने प्रत्यक्षविरोधेन निराकृते 'प्रत्यक्षस्य

रूपयित्वा ऽनुमानव्यवहारः क्रियते प्रतिमायामिव देवतात्व
माराधनादिव्यवहारः । मैवम् । अत्यन्तासतः कल्पनायो-
गात् । अन्यत्र प्रसिद्धसद्भावं हि देवतात्वमन्यत्र कल्प्यते ।
अनालम्बनत्वं तु गगनकुसुमायमानं न कल्पनामर्हति ।
कल्पनाऽपि निरालम्बनत्वस्य ज्ञानरूपा तदुत्पत्तौ च व्या-
प्रियमाणं कथमवस्तु भविष्यति अर्थक्रियाकारित्वस्यैव वस्तु-
त्वात् ज्ञानोत्पादनस्याप्यर्थक्रियात्वात् । अत्रान्ये ऽपि पक्षसा-
ध्यहेतुदृष्टान्तदोषा "अग्राह्यत्वाच्च भेदेन" इत्यादिना ग्रन्थेन
वार्तिककृता दर्शिता इत्याह । दूषणेति । सहस्रशब्दोऽत्रा-
नेकसङ्ख्यवचनः सहस्राक्ष इतिवत् । अत्र

"प्रत्यक्षा च नो बुद्धिरतस्तद्भिन्नमर्थरूपं नाम न किञ्चि-
दस्तीति" ।

तथा निराकारा च नो बुद्धिराकारवान् बाह्योऽर्थः स
हि बहिर्देशसम्बद्धः प्रत्यक्षमुपलभ्यते"

इति पूर्वोत्तरभाष्यपर्यालोचनयाऽत्रापि बाह्यार्थसदसद्भा-
वचिन्तैव । उक्तं च—

"शून्यस्त्विवाति पुनः सैव निरालम्बनतोच्यत" इति ।

अतः " सर्व एव निरालम्बन " इत्यनेनैव गतत्वा-
त् पुनरुक्तमिदं "शून्य"स्त्वित्याशङ्क्य विचारस्वरूप-
भेदोपदर्शनेन परिहर्तुमाह । एवमिति । प्रत्यक्षबाह्यार्थनि-
राकरणपरस्यानुमानस्य स्वात्मांशग्राहकेण प्रत्यक्षेण विषय-
भेदे सति पूर्वोक्तः प्रत्यक्षविरोध एव नास्तीत्यभिप्रायः पुनः

बहिः प्रवृत्तौ सामर्थ्यं नास्ति' इत्येवं पूर्वोक्ताक्षेपेण "शून्यस्तु" (शाब.भा.) इत्यादिना स एष शून्यवादी पुनः प्रत्यवतिष्ठते । तदिहैवं चिन्त्यते- यदिदं नील-मिदं पीतमिदमिति नीलाद्याकारं वस्तु प्रथते तत् किं विज्ञानमेव तथा प्रथते ? किं वा बाह्यं वस्तु, ? इति । तदर्थमिदं विचार्यते- किं विज्ञानं प्रत्यक्षमुतानुमेय-मिति, प्रत्यक्षत्वे सति निराकारस्य प्रत्यक्षग्रहणायो-गात्, आकारस्य चैकस्यैव ग्रहणाद् गृह्यमाण आका-रो ज्ञान एवावतिष्ठत इत्यर्थस्याऽगृह्यमाणत्वादस-त्त्वमेव भवति । अनुमेयत्वे तु बाह्यार्थं विनाऽनुमाना-संभवाद् बाह्यार्थसिद्धिः । तत्र-

ज्ञानमेवैवमाकारमात्मना प्रथते, कुतः ?- ।
नाऽप्रत्यक्षस्य तस्यास्ति प्रमाणान्तरतो गतिः ॥ ८ ॥

प्रत्यवस्थाने मूलम् । नन्वत्र सन्देह एव नास्ति सर्वत्र ग्रहणे परस्परविलक्षणत्रितयप्रतिभासनात्, नीलमिदमहं गृह्णामीत्या-दिषु ज्ञानात्मतया नीलादयः प्रतिभासन्ते न पुनर्नील एव केवलः स्वप्रकाशः तथा प्रतिभासाभावात् अतोऽनारभ्य एवायं विचार इत्याशङ्क्याह । तदर्थमिति । ज्ञानस्यैव ग्राह्यग्राहकसंवि-त्तिरूपेण प्रतिभासनात् निष्प्रमाणिका बहिरर्थकल्पनेत्यर्थः । यथोक्तं--

"अविभक्तोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यत" इति ॥

पूर्वपक्षं परिगृह्णाति । तत्रेति ।ननु नीलमिदमित्यनात्मतया नीलादयोभासन्ते न तु नीलमहमिति अतो निष्प्रमाणिकैवेयं कल्पनेत्यभिप्रायेणाह । कुत इति । अत्राह । नेति । अयमा-

संवेद्यत्वाच्च नीलादेर्ज्ञानाकारत्वनिश्चयः ।
अर्थान्तरस्य च ग्राह्यलक्षणं न हि युज्यते ॥ ९ ॥

यो हि विज्ञानमप्रत्यक्षमिच्छति तस्य ज्ञानमेव न सिद्ध्येत् प्रमाणान्तरासम्भवात् । अनुमानमिति चेत् ?, न, लिङ्गाभावात् । न तावदर्थो लिङ्गम्, विनापि तेन सुषुप्त्याद्यवस्थायामर्थसद्भावाभ्युपगमात् । अर्थव्यवहारो लिङ्गम्– स हि कादाचित्कं कारणं कल्पयतीति चेत् ?, एवं तु प्राग्व्यवहाराज्ज्ञानप्रति-

शयः—नीलपीतादेर्ग्राह्यत्वमिति तावत्सर्वजनसिद्धं तत्र यदि विपर्ययज्ञानेष्विवात्मैवानात्मतयाऽवभासत इत्यङ्गीक्रियते तदानानेकादृष्टकल्पना भवति, अतिरिक्तग्राह्यकल्पनायां तु ग्राह्यत्वस्य ग्राहकं विनाऽनुपपत्तेस्तत्कल्पनाऽपीत्यनेकादृष्टकल्पना स्यादिति । ननु भवत्पक्षेऽप्येकस्यैव ज्ञानस्यानेकग्राह्यग्राहकशक्तिकल्पनात् अस्त्येव गौरवम् । सत्यमेवम् । तथा ऽपि त्वन्मते ग्राह्यग्राहकधर्मिद्वयकल्पना शक्तिद्वयकल्पना च । अस्मत्पक्षे त्वेकस्यैव शक्तिद्वयकल्पनाल्लाघवमित्यस्ति विशेषः । अप्रत्यक्षस्येति । ज्ञानस्याप्रत्यक्षत्वेऽन्यस्मादवगतात्तदवगन्तव्यं ततश्चानवस्था स्यात् प्रकाशस्वभावस्य च प्रकाशान्तरापेक्षानुपपत्तेः स्वप्रकाशमेवार्थसंवेदनमिति भावः । हेत्वन्तरमाह । संवेद्यत्वादिति । नीलोऽयमर्थो यस्मान्नीलाकारं ज्ञानमुत्पद्यत इत्येवं वदन्तो लौकिका अपि ज्ञानाकारतामभ्युपगच्छन्तीत्यर्थः । अर्थान्तरस्येति । यदि चायं ग्राह्यो नीलादिर्विज्ञानस्याकारः स्यात् तदा तादात्म्यलक्षणसम्बन्धेन ग्राह्यग्राहकभाव उपपद्यते, भेदे तु सम्बन्धाभावेन ग्राह्यग्राहकभावानुपपत्तिरिति भावः । श्लोकार्थं विवृणोति । योहीति । व्यवस्थाहेतुं शङ्कते । हेतुत्वमिति ।

भासो न स्यात् । अव्यवहरन्नपि घटं पश्यन् 'जानेऽहं घटम्' इति ज्ञानमनुसन्धत्ते इति प्रतीतिसाक्षिकम् । अर्थधर्मो ज्ञानजन्मा लिङ्गमिति चेत् ?, न, तत्सद्भावे प्रमाणाभावात् । अतीतानागतयोश्चार्थयोर्धर्मोऽसम्भवादतीताद्यनुमाने ज्ञानसिद्धिर्न स्यात्, तस्मादवश्यं विज्ञानं प्रत्यक्षमेषितव्यम् । एवं च तस्यैवायमाकार इति निष्प्रमाणकोऽर्थः ।

किं च वेद्यत्वादपि नीलादेर्ज्ञानाकारत्वम्, नह्यनात्मनो नीलस्य पीतवद् वेद्यता सम्भवति । यदि चार्थान्तरं नीलं ततोऽस्य किंलक्षणं वेद्यत्वम् ? । यद्यर्थत्वलक्षणं स्यात्, सर्वं सर्वस्य वेद्यं स्याद् व्यवस्थाहेत्वभावात् । अथ हेतुत्वं व्यवस्थापकम्–य एवार्थो ज्ञानस्य हेतुः स एव वेद्यो नान्य इति चेत् ?, न, नेत्रादेरपि वेद्यत्वप्रसङ्गात् । सादृश्यं हेतुत्वं च विषयत्वं नीलार्थश्च नीलज्ञानेन सदृशो न नेत्रमिति चेत् ?, एवमपि समनन्तरप्रत्ययस्य हेतुत्वाद् विज्ञानत्वेन च सादृश्याद्विषयत्वं स्यात् ।

अथाऽसाधारणेन विषयाकारेण सादृश्यं विषयलक्षणम्–ज्ञानत्वं हि सर्वज्ञानसाधारणं नीलाद्याकारस्तु केषांचिदेवाऽसाधारणस्तेन तदाकारेण सादृश्यं विषयत्वम् ? । एवमपि धारावाहिकेषु पूर्वमुत्तरस्य विषयः स्यात्–उभयोर्नीलरूपत्वाद्धेतुत्वाच्च ।

एतदेव विवृणोति । य एवेति । परिहारं शङ्कते । सादृश्यं इति । दूषयति । एवमिति । समनन्तरः–पूर्वप्रत्ययः । अत्र विशेषं शङ्कते । अथेति । एतदपि निराकरोति । एवमपीति ।

स्यान्मतम्– न सादृश्यं विषयत्वं, किं तु यो ज्ञाने नीलाद्याकारविशेषसमर्पको हेतुः स विषयः, समनन्तरप्रत्ययस्तु न नीलाद्याकाराणां समर्पकः ? । तथा सति नीलज्ञानानन्तरं सर्वदैव नीलविज्ञानं स्यात् । तत्रैकस्मिन् सन्ताने नीलपीतादिविचित्राकारोदयो न स्यात् कारणाऽवैलक्षण्ये कार्यवैलक्षण्यायोगात् । नीलपीतादिविचित्रार्थसंनिधिविशेषकृतश्चायं विचित्राकारोदय इत्यर्थस्यैव ग्राह्यत्वम् ।

ननु कार्यभूतज्ञानसमये कारणभूतस्यार्थस्य क्षणिकत्वेनाऽतीतत्वात् कथं प्रत्यक्षग्राह्यत्वम् ? । एतदेवार्थस्य ग्राह्यत्वं यज्ज्ञानाकारार्पणक्षमहेतुत्वम । यथाहुः–

"भिन्नकालं कथं ग्राह्यमिति चेत् ?, ग्राह्यतां विदुः।
हेतुत्वमेव तद् युक्तं ज्ञानाकारार्पणक्षमम्" इति ।

यद्येवम् ? कस्यायमाकारो यो वर्तमानः प्रथते ?, यदि ज्ञानस्यैव–तर्हि अर्थस्याप्रथमानस्य सद्भावे ज्ञानं प्रति हेतुत्वे च किं प्रमाणम् ? । ज्ञानवैचित्र्यमेव, न हि तत्समनन्तरप्रत्ययमात्रात् सम्भवतीत्युक्तम् । एवं तर्ह्यनुमेयोऽर्थः कथं प्रत्यक्षग्राह्य इत्युच्यते ? ।

सौत्रान्तिकमतमुत्थापयति । स्यादिति । किन्तु इति । वस्तुतो निराकारमेव ज्ञानं अर्थसम्बन्धी चायमाकारोबुद्ध्यारूढः प्रतीयते इति भावः । तथासतीति । आकारसमर्पकत्वे सतीत्यर्थः । चोदयति । ननु कार्येति । परिहरति । एतदेवेति । हेतुत्वमेवेति । ज्ञानाकारार्पणक्षमं हेतुत्वमेव ग्राह्यत्वं विदुरिति सम्बन्धः । पुनश्चोदयति । यद्येवमिति । उक्तरूपं यदीत्यर्थः । उत्तरमाह । ज्ञानेति । अस्मिन्पक्षे प्रत्यक्षग्राह्यत्वानुपपत्तिरिति शङ्कते । एव-

एतदेव हि प्रत्यक्षग्राह्यत्वमर्थस्य, यत् साक्षादाकारसमर्पणेन हेतुत्वम्, यस्तु परम्परया ज्ञानाकारसमर्पको हेतुश्च सोऽनुमेयः। तद् यथा—वन्हिस्वलक्षणं धूमस्वलक्षणतद्दर्शनताद्विकल्पप्रणाड्या वन्हिज्ञानं जनयदनुमेयम्। अत एव प्रत्यक्षमनुमानं च द्वे एव प्रमाणे, ज्ञानार्थयोर्भिन्नत्वात्। असति तादात्म्ये तदुत्पत्तिनिबन्धन एव ज्ञानादर्थनिश्चयः। तत्र साक्षादुत्पत्तौ प्रत्यक्षं प्रणाड्या त्वनुमानमिति द्वे एव विधे। अत एव विषयसादृश्यमेव प्रामाण्यं तदधीनत्वादर्थविशेषव्यवस्थापनस्य। न हि ज्ञानमित्येव नीलवेदनं भवति पीतादावपि तुल्यत्वात्। नीलिम्ना तु नीलवेदनसिद्धिः, यथाहुः—

"न हि संवित्तिसत्तयैव तद्वेदना युक्ता, तस्याः सर्वत्राविशेषादविशेषप्रसङ्गात्, तां तु सारूप्यमाविशत् सरूपयितुं घटयेत्" इति।

तस्मात्साकारे विज्ञाने सिद्धमर्थस्य सत्त्वं ग्राह्यलक्षणं चेति सौत्रान्तिकाः।

अत्र वदामः—स्यादिदं ग्राह्यलक्षणं यद्यर्थस्याकारसमर्पकत्वे हेतुत्वे वा प्रमाणं स्यात्, न तु तदस्ति, समनन्तरप्रत्ययविशेषादेव विचित्राकारोदयसम्भ-

---

मिति। ज्ञानवैचित्र्येणैवानुमेयमित्यर्थः। समाधत्ते। एतदिति। वह्निस्वलक्षणं परम्परया वह्निज्ञानं जनयदनुमेयमित्यर्थः। तादात्म्यानङ्गीकारे सत्यसम्बन्धात् कथमर्थनिश्चय इति चेत् तत्राह। असतीति। तां संवित्तिं आविशत् सारूप्यमिति सम्बन्धः। तन्मतमुपसंहरति। इतीति। दूषयितुमुपक्रमते। अत्रेति।

वात् । तथा हि—त्वयापि हि स्वप्नावस्थायामसत्यप्यर्थसंनिधौ ज्ञानवैचित्र्यदर्शनादवश्यं समनन्तरप्रत्ययकृतत्वमङ्गीकर्तव्यम्, एवं चेज्जाग्रत्प्रत्ययानामपि तथैवास्तु किमऽर्थग्रहणेन ? अतो न हेतुत्वं ग्राह्यलक्षणम् ।

अथ ज्ञाननिबन्धनो यत्रोपादानादिव्यवहारः स विषय इत्युच्यते ?, तथा सति नीलज्ञानस्य नीलान्तर्गताः परमाणवो रसादयश्च विषयभावमनुभवीरन्, उपादीयमानत्वात् ।

अथ द्रव्यस्यैवोपादानं न गुणानां रसादीनाम् ? । एवं तर्हि रूपस्यापि विषयत्वं न स्यात् । किं च सुखार्थः सर्वो व्यवहारोऽतो ऽनुभूते सुखे न कश्चित्सुखविषयो व्यवहारोऽस्ति, न च सम्भवति यतः सुखप्रतिबद्धव्यवहारानुगुण्यं तद्वित्तेः स्यात्, तथा घ्राणगृहीते गन्धे न कश्चिदुपादानादिव्यवहारोऽस्तीति कथं तस्य विषयत्वम् ? ।

ननु नोपादानमेव व्यवहारः शब्दप्रयोगस्यापि व्यवहारत्वात्, अतो नीलज्ञाननिबन्धनशब्दप्रयोगगोचरत्वान्नीलिम्नो विषयत्वम्, एवं सुखादेरपि ।

अत इति । समनन्तरप्रत्ययस्यापि विषयत्वापत्तेरित्यर्थः । प्रकारान्तरेण विषयत्वं शङ्कते । अथेति । परिहरति । तथेति । सुखस्योपादातुमशक्यत्वादिति भावः । यतः तद्वित्तेः—सुखज्ञानात् । सुखस्य उपादानादिव्यवहारानुगुण्यं स्यात् । तदभावे तु न विषयत्वमिति भावः । अन्यदप्याह । तथेति । विशेषं शङ्कते । नन्विति । निराकरोति । एवमिति । उभयरूपव्यवहाराङ्गीका-

एवमप्युपादानस्यापि व्यवहारत्वात्तद्विषयभूतानां परमाणूनां विषयत्वापत्तिस्तदवस्थैव ।

किं च न शब्दप्रयोगवशेन ज्ञानस्य विषयनिरूपणं शक्यं विपरीतत्वात् । अर्थसम्बद्धशब्दप्रयोगो हि लक्षणं न शब्दमात्रप्रयोगः, प्रत्याय्यप्रत्यायकत्वमेव हि शब्दार्थयोः सम्बन्धोऽतो यदर्थविषयं ज्ञानं शब्दो जनयति स तस्य वाच्यः, अतो ज्ञानविषयनिरूपणपूर्वकं शब्दविषयनिरूपणं तदधीने तु तस्मिन् दुरुत्तरमितरेतराश्रयमापद्येत ।

ज्ञानजन्यातिशयभाक्त्वमेव ग्राह्यत्वमिति चेत्?, नासावुपलभ्यते, न च सम्भवति भूतभविष्यतोरित्युक्तम् ।

अथ यत्संप्रयुक्तेन्द्रियजं ज्ञानं यद्व्याप्तलिङ्गजं वा स विषय इति मतम्? । ततो नेत्रजन्यस्य नीलज्ञानस्य स्पर्शो विषयः स्यात्, अस्ति च स्पर्शस्यापि रूपस्येव संयुक्तसमवायलक्षणः सम्बन्धो नेत्रेण । तथा गन्धलिङ्गस्य रसानुमानस्य रूपमपि विषयः स्यात्, रूपेणापि रसेनेव तस्य व्याप्तत्वात् । तस्माज्ज्ञानात्मकत्वमेव नीलादेर्विषयलक्षणमिति सिद्धं तादात्म्यम् ।

सहोपलम्भनियमोऽपि ज्ञानार्थयोरनियमव्याप्तं भेदं व्यापकविरुद्धोपलब्ध्या प्रतिषेधन्नऽभेदमुपस्थापयति, भिन्नानां घटपटादीनामनियतसहोपलम्भत्वा

रेऽप्युक्तदोषानतिवृत्तिरित्यर्थः । वैपरीत्यं विवृणोति । अर्थेति प्रकारान्तरेण ग्राह्यत्वं शङ्कते । ज्ञानेति । अथेति । पक्षद्वयं चात्र प्रमाणद्वयाभिप्रायेण । उपपादितमर्थं निगमयति । तस्मादिति ।

त् । न चाऽसिद्धो वेद्योपलम्भसमये वित्तेरुपलम्भ इति वाच्यम्, उत्तरकालं सहैव ज्ञानेन विषयस्मरणदर्शनात् 'ज्ञातो घटः' इति । न चाननुभूतस्य स्मरणं सम्भवति, तस्मादुत्पत्तिवेलायामेव ज्ञानस्य प्रकाशनमङ्गीकर्तव्यम् । न च निराकारस्योपलब्धिरस्तीति सिद्धं ज्ञानात्मकत्वं नीलादेः । अवश्यं च स्वप्नादिबोधे 'वन्ध्यासुतो याति' 'अङ्गुल्यग्रे हस्तियूथशत'मित्यादौ चात्यन्तासम्भवाद्बाह्यस्य ज्ञानात्मकत्वमेवाऽऽकाराणामभ्युपगन्तव्यम्, तथा ऽन्यत्रा-

---

सहोपलम्भानियमोऽप्यभेदमुपस्थापयतीति सम्बन्धः । अनियममाशङ्क्य निराकरोति । न चेति । तस्मिन्काले ज्ञानेन विषयस्यैव प्रकाशनादिति भावः । न चेत्यत्र कारणमाह । उत्तरेति । एतदेव सहोपलम्भे प्रमाणमिति अर्थः । प्रकाशनमित्यनेन ज्ञानस्य स्वप्रकाशत्वं ध्वनितम् । विषयं प्रकाशयदात्मानमपि प्रकाशयतीति भावः । ननु वस्तुतो निराकारमेव ज्ञानं अर्थसम्बन्धी चायमाकारो बुद्ध्यारूढः प्रतीयत इत्येव किं न स्यात् । मैवम् । बाह्यार्थपरित्यागेनान्तरमनुभवमारूढ इत्यत्र प्रमाणाभावात् । अस्तु तर्ह्यर्थाकारस्यैव ज्ञाने प्रतिबिम्बोदयः जले चन्द्रस्येव । नैतदपि युक्तम् । अहनि चन्द्ररहितस्य जलस्योपलम्भाद्रात्रौ तत्प्रतिबिम्बप्रतीतिर्युक्ता, ज्ञानन्तु न कदाचिदपि निराकारं दृष्टं कथं तत्राकारप्रतिबिम्बकल्पना स्यात् । अस्तु नाम रूपस्य प्रतिबिम्बोदयः गन्धरसादीनां त्वसम्भाव्य एव । यथाऽऽहुः—

" शब्दगन्धरसानां च कीदृशी प्रतिबिम्बता " ।
ज्ञाने च गृह्यमाणस्य कथं स्यादर्थधर्मता" (श्लो.वा.शू.वा.३९)

प्यस्तु, तस्मान्न बाह्यमस्ति। इति प्राप्ते-

अभिधीयते-

नीलादिश्चित्तरात्मांशग्राहित्वं केन गृह्यते?।
नात्मना नान्यसंवित्त्या सापि ह्यात्मावसायिनी॥१०॥
अज्ञानस्थिरचित्रत्वबाह्यत्वादेरनात्मनः।
असतो वा सतो वापि कथं विज्ञानवेद्यता?॥११॥

विज्ञानवादी हि सर्वमेव विज्ञानमात्मानमेव गृह्णाति नान्यत्, आत्मनैव च गृह्यते नान्येन, तस्याप्यन्यस्य स्वात्मपर्यवसायित्वादिति वदति, यथोक्तम्-

"नान्योऽनुभाव्यो बुद्ध्याऽस्ति तस्या नानुभवोऽपरः।
ग्राह्यग्राहकवैधुर्यात्स्वयं सैव प्रकाशते" इति।

तमेवं वादिनं प्रत्युच्यते-नीलज्ञानस्यात्मावसायित्वं नीलस्य च विज्ञानाकारत्वं केन ज्ञानेन गृह्यते?। न तावदात्मनैव- न हि नीलमिदमित्यत्र स्वात्मपर्यवसायित्वं नीलाकारस्य च ज्ञानात्मकत्वं प्रकाशते नीलमात्रप्रकाशनात्। संवेद्यत्वग्राह्यलक्षणायोगसहोपलम्भनियमादिलिङ्गनिमित्तकेन त्वनुमानेनैव तदवगन्तव्यम्, तदपि त्वनुमानमाऽऽत्मांशग्राहि चेत्? न ज्ञानान्तरस्य स्वात्मपर्यवसायितां ग्रहीतुमलम्।

सिद्धान्तं प्रतिजानीते। इतीति। श्लोकार्थं विवृणोति। विज्ञानेति। नीलमिदं पीतमिदमिति ज्ञानमुत्पद्यमानमात्मानमेव प्रकाशयदुत्पद्यत इत्यर्थः। अत्रैव तत्सम्मतिमाह। यथेति। नतावदिति। एकस्यैवैवंरूपत्वे प्रमाणाभावादिति भावः। अत्र पूर्वपक्षोक्तयुक्तिमनूद्य परिहरति। संवेद्येति। न हीति। यदाऽनुमानं न स्वात्मांशग्राहि तदा एतत् नानेत्यादिनोच्यमानं वक्तुं

अथानुमानं न स्वात्मांशग्राहि ? ततो नीलादिविज्ञानैः किमपराद्धम् ? येन तानीदङ्कारास्पदीभूतबाह्यनीलादिप्रकाशकत्वेनाऽवभासमानान्यपि स्वात्मन्येवाऽवरुध्यन्ते । न हि तदेतद्वक्तुं शक्यम्–नाऽनात्मनः संवेदनं ग्राह्यलक्षणं सहोपलम्भनियमो वा सम्भवतीति । तेषां सर्वेषामेवैतस्मिन्नेव भवदीयेऽनुमाने व्यभिचारात् । तत् खल्वात्मानमतिक्रम्य नीलादिवित्तेर्नीलाद्यात्मभूतस्वात्मांशावसायितां गृह्णातीत्यभ्युपगन्तव्यम् । तस्यापि स्वात्मपर्यवसायित्वे नीलबुद्धेस्तद्वशेन स्वात्मांशग्राहिता न सिद्ध्येत् । आह च–

" चैत्रादिप्रत्ययानां च निरालम्बनता यदि ।
धर्मभूता न गृह्येत साधनोत्थितया धिया ॥
ततो विषयनानात्वात् प्रतियोग्यनिराकृता ।
रूपात् सालम्बनप्राप्तिः सती केन निवार्यते" (श्लो. वा. नि. वा. ६२) इति ।

न शक्यमित्यर्थः । कथं न शक्यमत आह । तेषामिति । नानेत्यादिनोक्तानां निमित्तानां व्यभिचारात् अभावादित्यर्थः । ननु तस्याप्यात्मांशपर्यवसायित्वमेवाङ्गीक्रियते नेत्याह । तदिति । एवमनङ्गीकारे दोषमाह । तस्येति । अत्रैव वार्तिककृत्सम्मतिमाह । आह चेति । अनुमानजाया बुद्धेः स्वात्मांशपर्यवसायित्वात् तया साध्यभूता निरालम्बनता यदि न गृह्यते ततो ऽस्याः स्वांशमात्रं विषयः चैत्रादिप्रत्ययानां च चैत्रादय इति भिन्नविषयत्वान्न बाध्यबाधकभावः अतो रूपात्–वैचित्र्यादिप्रत्ययस्वरूपपर्यालोचया विद्यमानैव सालम्बनप्राप्तिः सती केन निवार्यत इति श्लोकार्थः । दूषणान्त-

किं चाऽज्ञानमित्यस्य ज्ञानस्य ज्ञानाभावो ग्राह्यो न च ज्ञानाभावस्य ज्ञानात्मता सम्भवति अत्यन्तविपरीतत्वात्। तथा– तदेवेदमिति ज्ञाने पूर्वापरकालाऽवस्थायित्वं प्रकाशते, न च क्षणिकस्य ज्ञानस्य स्थायित्वमात्मा संभवति। तथा– चित्रबुद्धौ नानाऽऽकाराणामवभासः, न चैकस्य ज्ञानस्य नानाकारता सम्भवति।

नन्वर्थस्यापि स्थायित्वमेकस्य च नानाकारत्वं न सम्भवत्येव ?, सम्भवतु वा मा वा, ज्ञानात्मता तावन्न सम्भवति। तदसम्भवे चाऽर्थाकारौ वा स्थायित्वचित्रत्वे स्याताम्, अत्यन्तासद्रूपे वा, द्वेधापि ज्ञानाऽनात्मकयोर्ज्ञानेन ग्रहणात् सिद्धं नः समीहितम्।

तथा बाह्यं नास्तीति निषेधताऽवश्यं बाह्यं बुद्धावाऽऽरोपयितव्यम्, ज्ञानातिरिक्तं च बाह्यम्। न च ज्ञानाकारता तस्य सम्भवति, तस्मादेवमादिसिद्ध्यर्थमवश्यं विज्ञानानामऽनात्मग्राहित्वं बलादभ्युपगन्तव्यम्, भवदीयानुमानार्थं च। तदेवं संविद्बलासिद्धस्य बाह्यस्य सम्भवे वेद्यत्वादिभिर्नापन्हवः सम्भवति, बाह्यस्यैव हि तदा संवेद्यत्वं दर्शनबलादभ्युपगम्यते। प्रत्युतात्मन एव संवेद्यत्वं न सम्भवति–नीलादिविषयिणाम् 'इदं नीलमिदं पीतम्, इत्यऽनात्मावभासित्वात् आत्मावभासित्वाऽभावात्।

रमाह। किं चेति। निगमयति। तस्मादिति। यदुक्तं ज्ञानस्यैव तत्तदाकारेणावभासोनातिरिक्तस्यार्थस्येति तद्दूषयितुमाह। प्रत्युतेति। अहंप्रत्ययस्य ज्ञानावभासकत्वमाशङ्क्याह। अह-

अहंप्रत्ययस्तर्हि ज्ञानावलम्बनो भवतु ? । सोपि कर्त्रेऽवलम्बनो न ज्ञानावलम्बन इत्यात्मवादे वक्ष्यामः । तथा ग्राह्यलक्षणमपि बाह्यस्यैव किं चिदेष्टव्यम् । अन्यथा नीलादिवित्तीनां स्वांशपर्यवसायित्वसाधनार्थस्य त्वदीयानुमानस्य नीलादिवित्तिगतं स्वांशाविषयत्वं ग्राह्यं न स्यात्, स्थायित्वादयश्च तद्बुद्धीनाम्।

तल्लक्षणं चेतरेषामुक्तदोषात् ज्ञानजन्यफलभागित्वमेवाश्रयितव्यम् । ज्ञानक्रिया हि सकर्मिका कर्मभूतेऽर्थे फलं जनयति पाकादिवत्, तच्च फलमैन्द्रियकज्ञानजन्यमापरोक्ष्यम्, लिङ्गादिज्ञानजन्यं तु पारोक्ष्यमित्युच्यते । अस्ति हि विषयाविषयविभागः, विषयेष्वपि परोक्षापरोक्षविभागः सार्वजनीनः । न च फलमन्तरेणायं विभागः सम्भवतीति तदाश्रीयते । तदेव च फलं कार्यभूतं कारणभूतं विज्ञानमुपकल्पयतीति सिद्ध्यत्यप्रत्यक्षमपि ज्ञानम् ।

मिति । नापि ग्राह्यत्वलक्षणानुपपत्त्या तत्सिद्धिरित्याह । तथेति । यथा वेद्यत्वमभ्युपगतं तथा ग्राह्यत्वमपि बाह्यस्यैव कर्मत्वादिरूपं किञ्चिदेष्टव्यमित्यर्थः । एवमनङ्गीकारे दोषमाह । अन्यथेति । यत्किञ्चिदित्यनेनोक्तमर्थं विवृणोति । तदिति । अन्येषां—पूर्वपक्षोक्तदोषग्रासात् ज्ञानजन्यफलभागित्वमेव तल्लक्षणं—ग्राह्यलक्षणमाश्रयितव्यमित्यर्थः । एतदेवोपपादयति । ज्ञानेति । न चास्मिन्नर्थे प्रमाणाभाव इत्याह । अस्ति हीति । उच्यमानो विभाग एवात्र प्रमाणमित्यर्थः । एवं च सत्येतदप्यस्मदभिमतं सिद्ध्यतीत्याह । तदेवेति ।

अथ वा ज्ञानक्रियाद्वारको यः कर्तृभूतस्यात्मनः कर्मभूतस्य चार्थस्य परस्परं सम्बन्धो व्याप्तृव्याप्यत्वलक्षणः स मानसप्रत्यक्षावगतो विज्ञानं कल्पयति, न ह्यागन्तुककारणमन्तरेणात्मनोऽर्थं प्रति व्याप्तृत्वमुत्पत्तुमर्हति । तच्च कारणं लोके ज्ञानशब्देनाभिधीयते ।

येपि स्वप्रकाशां संविदमातिष्ठन्ते तैरप्ययं सम्बन्धो मानसप्रत्यक्षगम्योऽवश्यमभ्युपगमनीयः । अन्यथा 'ज्ञातो मया घटः' इति ज्ञानज्ञेयसम्बन्धो ज्ञातृज्ञेयसम्बन्धो वा न व्यवहर्तुं शक्यते । यन्मात्रं हि प्रकाशितं तन्मात्रमेव व्यवहर्तुं शक्यते, नान्यत् ।

इह च संविन्मात्रं स्वयं प्रकाशितम्, अर्थोपि तद्वशात्, ज्ञानसम्बन्धस्तु केन प्रकाशितः ? । सोपि तयैव संविदा प्रकाशते इति चेत् ?, न, तदुत्पत्त्यवस्थायां सम्बन्धस्याऽनिष्पन्नत्वात् । प्रकाशकत्वमेव हि संविदा विषयेण सम्बन्धो नान्यः, तेन जातायां संविदि विषये च प्रकाशिते निष्पद्यमानः सम्बन्धो न तया संविदा शक्यते विषयीकर्तुम्, विरम्य व्यापारासम्भवात् । न हि प्रथममर्थं प्रकाश्य पुनः सम्बन्धं

प्रकारान्तरेण कल्पनमुपपादयति । अथेति । किं तत्कारणमित्यपेक्षायामाह । तच्चेति । लोकशब्देन प्रसिद्धिरुक्ता । स्वयंप्रकाशत्वपक्षे ऽपि मानसप्रत्यक्षगम्यत्वमुपपादयति । येऽपीति । स्वप्रकाशमहिम्ना व्यवहारोपपत्तिमाशङ्क्याह । यन्मात्रमिति । चोदयति । सोपीति । परिहरति । नेति । एतदेवोपपादयति । प्रकाशकत्वमिति । व्यापारासम्भवं विवृणोति । नहीति । उपपादितमर्थं निगमयति । तस्मादिति ।

प्रकाशयितुमर्हति क्षणिकत्वात् ।

अथ सम्बन्धोपि स्वयं प्रकाशत इति मन्येथाः ?, नात्र प्रमाणमस्ति । तस्मान्मानसप्रत्यक्षगम्योऽर्थेन सहात्मनः सम्बन्धो ज्ञानं कल्पयतीति रमणीयम् । अस्ति हि कोपि सम्बन्धोऽर्थेन सहाऽऽत्मनो मानसप्रत्यक्षगम्यः सर्वजनीनः स ज्ञानस्य कल्पकः ।

अर्थगतो वा ज्ञानजन्योऽतिशयः कल्पयति ज्ञानम्, अवश्यमङ्गीकरणीयश्चायमतिशयस्त्रितयप्रतिभासवादिभिरपि । त्रितयं प्रतिभासत इति वदता ज्ञानज्ञेयज्ञातृषु त्रिष्वप्यनुगतं प्रकाशनपदवाच्यमवश्यमङ्गीकर्तव्यम् । तत्र ज्ञानत्वं तावन्नाऽनुगतम्—तद्धि ज्ञाने एव न ज्ञातृज्ञेययोः । ज्ञेयत्वमपि ज्ञेय एव न ज्ञातृज्ञानयोः । ज्ञातृत्वं ज्ञातर्येव न ज्ञानज्ञेययोः ।

व्यवहारविषयत्वं प्रकाशमानत्वमिति चेत् ?, न, संविदि व्यवहाराभावाद् विनष्टत्वात् । शब्दप्रयोगो व्यवहार इति चेत् ?, न, उक्तदोषत्वात् । तदवश्यं प्रकाशनभासनादिपर्यायो धर्मविशेषस्त्रिष्वप्यनुवृत्तो गोत्वमिव गोव्यक्तिष्वऽस्ति । स च धर्मो ज्ञातरि ज्ञेये च ज्ञानवशाज्जायते, ज्ञानस्य तु स्वाभाविकोऽग्नेरिवौष्ण्यमिति स्वप्रकाशं ज्ञानम् । इतरौ परप्रकाश्यावित्याश्रयणीयम् । तन्निमित्तं च विषयस्य विषयत्वम्,

---

प्रकारान्तरमाह । अर्थगतो वेति । अनुगतं प्रकाशपदवाच्यं शङ्कते । व्यवहारेति । उपादानादिव्यवहाराभावादिति परिहारार्थः । उक्तदोषत्वादिति । अस्मिन्पक्षे एवमित्यादिना ग्रन्थेन पूर्वं दोषस्योक्तत्वादित्यर्थः । तन्निमित्तं—परप्रकाश्यत्वनिमित्तम् । उपपादितमर्थं

व्यवहारादीनां हि विषयलक्षणत्वं प्रागेव दूषितम्। एकदेशिनां तु- व्यवहारनिबन्धनाविषयताङ्गीकरणे रजतवित्तेः शुक्तिका विषयः स्यात्, न चैवमिच्छन्ति। तदेवमऽविवादसिद्धेऽर्थगतेऽतिशये तेनैव ज्ञानस्यानुमानं पूर्वोक्तेन वा मानसप्रत्यक्षगम्येन सम्बन्धेन सम्भवति। अतिक्रान्तदिवसगतदशत्वादिसंख्यावचाऽसतोर्भूतभविष्यतोरविद्यमानत्वेपि धर्मिणः प्रकाशनधर्मो जायत इति प्रमाणबलादभ्युपगम्यते। अतो न प्रत्यक्षत्वं सम्विदोऽभ्युपगन्तव्यम्।

न च प्रतीतिबलादपि प्रत्यक्षत्वम्-अर्थावभाससमये संविदः प्रतिभास एव नास्ति नतरामापरोक्ष्यम्। एवं च सहोपलम्भस्यैवाभावात् तान्नियमो य उक्तः स दूरापास्त इति प्रत्युक्तमेतत्-

"सहोपलम्भनियमादभेदो नीलतद्धियोः" इति।

यत्तु पश्चात् स्मरणस्य दर्शनाज्ज्ञानमपि प्रागनुभूतमिति। तदप्यसिद्धम्- अर्थ एव हि तदा स्मर्यते, तत्तत्स्मरणाच्च तदैवार्थव्याप्तिरात्मनो मनसाऽवगम्यते, तद्वशाच्च तदाऽर्थे तावज्ज्ञानं कल्पयति। तस्य च ज्ञानस्येन्द्रियादिकारणाभावात् स्मृतित्वं निश्चित्य

निगमयति। तदेवमिति। भूतभविष्यतोस्तदनुपपत्तिं परिहरति। अतिक्रान्तेति। एतेनान्यदपि निरस्तमित्याह। एवञ्चेति। इति नियमनिरासाद्धेतोः सहोपलम्भेत्यादि यदुक्तं तदपि प्रत्युक्तमित्यर्थः। अत्र पूर्वपक्षोक्तं परिहारमनूद्य निराकरोति। यत्त्विति। नास्येति। ज्ञानस्येत्यर्थः। ततः किमत आह।

स्मृतिकारणभूतं पूर्वज्ञानं तदैव कल्पयतीति नास्य स्मरणम् ।

इतश्च न नीलादेर्ज्ञानात्मकत्वम्, अनुमानादिषु विषयाकाराणां परोक्षत्वात्, ज्ञानस्य च सर्वत्र प्रत्यक्षत्वाभ्युपगमात्, न हि परोक्षापरोक्षयोरेकत्वं सम्भवति । एवमत्यन्तासद्रूपत्वेनाभिमतस्य स्थायित्वादेः सद्रूपज्ञानात्मकत्वमत्यन्तासम्भाव्यम् । तथा भूतानुमानेषु भूतत्वमवभासते न च वर्तमानस्य ज्ञानस्य भूतत्वमात्मा सम्भवति ।

भिन्नत्वेपि ग्राहकाद् ग्राह्यस्य ज्ञानमेवाऽतीतमुत्तरस्य ग्राह्यं नार्थ इति चेत् ?, न, प्रमाणाभावात् । अत्र चातीतं त्रेधा विकल्प्य "अतीतं यच्च विज्ञानम्" इत्यादिना दूषणमुक्तम् । उत्तरमपि त्रेधैव विकल्प्य

न हीति । दूषणान्तरमाह । तथेति । अत्रेति । यच्चेदमतीतं विज्ञानमुपरितनस्य ग्राह्यत्वेन भवद्भिरिष्टं तद्ग्राह्याकारं ग्राहकाकारं स्वप्रकाशं वा स्यादिति त्रेधा विकल्प्येत्यर्थः । केनेत्यपेक्षायामतीतं यच्च विज्ञानमित्यादिनेत्युक्तं—

"अतीतं यच्च विज्ञानं ग्राह्यत्वेन हि कल्पितम् ।
तस्मात् ग्राहकरूपं वा ग्राह्यं वोभयथाऽपि वा"(श्लो.वा.शू.१६३)

इत्यनेन वार्तिकेन विकल्प्येत्यर्थः । दूषणमुक्तमिति । वार्तिककारेणेतिशेषः । दूषणवार्तिकं त्वेवम्—

"ग्राह्याकारत्वमात्रे स्यादर्थः शब्दान्तरेण ते ।
स्वकाले चाऽप्यसंवित्तेर्न स्याच्छक्त्यर्पणं ततः ॥
यथैवानागताज्ज्ञानात् सन्तत्यन्तरजादपि ।
दृढत्वेनाप्यविज्ञानात्तथोत्पन्नाद्विनश्यतः ॥

"आकारकल्पनायां च" इत्यादिना दूषणमुक्तमिति विवेचनीयम्। तस्मादिदमपि वैभाषिकमतमयुक्तमेव। तस्माद् बाह्यार्थाकार एव नीलादिर्न ज्ञानाकारः।

कथं तर्हि स्वप्ने?, तत्रापि बाह्यमेव देशकालान्तरगतमऽदृष्टोद्बोधितसंस्कारवशात् स्मर्यमाणं निद्रा-

---

केवलग्राहकत्वे तु विषयत्वं न युज्यते।
किमपेक्ष्य च तस्येदं ग्राहकत्वं प्रकल्प्यते।
आकारता निरस्तैवं सम्वेद्येत तदैव च॥
ततश्चोत्तरविज्ञानं न प्रतीक्षेत बोधक"श्लो.वा.शू.१६८)मिति।

उत्तरमिति। उत्तरज्ञानमपि ग्राहकरूपं वा ग्राह्यरूपं वा उभयरूपं वेति त्रेधा विकल्प आकारेत्यादिना दूषणमुक्तं वार्तिककारेणेति विवेचनीयमित्यर्थ। दूषणवार्तिकपर्यालोचनयोत्तरस्य त्रेधा विकल्पो बहिरेव बोद्धव्यः। दूषणवार्तिकन्तु—

"आकारकल्पनायां च परस्यात्मांश एवते।
प्रमापर्यवसाने च नातीतो विषयो भवेत्॥
पूर्वग्राह्यस्वरूपत्वे ग्राहकत्वं तु हीयते।
ग्राहकाकारमात्रे स्याद्विषयो नासरूपतः॥
न च शक्त्यर्पणस्यात्र व्यापार उपलभ्यते।
शक्त्यर्पणस्य चाभावो युष्मत्पक्षे प्रसाधित" (श्लो. वा. शू.१७०इति।

अनन्तरं च "सन्तानान्तरवच्चैषा"मित्यादिवार्तिकेन ज्ञानानां हेतुसाध्यत्वाभावे वास्यवासकत्वाभावे च प्रयोगा दर्शिता स्ते च ग्रन्थविस्तरभयादस्माभिर्न लिखिताः। ग्रन्थकारस्य तु वार्तिकस्थविवेककीर्तनमत्र किंप्रयोजनकमिति न विद्मः। अत्र चोदयति। कथमिति। परिहरति। तत्रेति। न चैवमसत्ख्या-

दूषितमनस्कतया भ्रान्त्या संनिहितदेशकालमिव मन्यते । विस्पष्टं चैतदनन्तरदिवसानुभूतस्य स्वप्ने वर्तमानावभासदर्शनात्, अन्यत्रापि स्वप्ने तथाङ्गीकर्तुं युक्तम् । शिरश्छेदोऽप्यन्यत्रावगतः स्वसम्बन्धितया दोषवशादवगम्यते । सर्वत्र संसर्गमात्रमसदेवावभासते संसर्गिणस्तु सन्त एव, सेयं विपरीतख्यातिरित्युच्यते मीमांसकैः, । असत्ख्यातिवादिनस्तु संसर्गिणोऽप्यपलपन्तीति विशेषः । शुक्तिरजतवेदनेऽपि विद्यमानैव रजतत्वजातिर्विद्यमानस्यैव शुक्तिकाशकलस्यानात्मभूतैवाऽऽत्मतयाऽवगम्यते । तथा वन्ध्यासुतादिष्वपि विद्यमान एव सुतशब्दार्थो वन्ध्यान्विततया तत्पदसंनिधिदोषादवगम्यते ।

यत्तु कैश्चिदेवमादिषु तदाकारावभासमपन्हुत्य विवेकाग्रहणमेव भ्रान्तिरित्युक्तम्, तत् संविद्विरोधादेवोपेक्षणीयम् । को हि नामाङ्गुलिनिपीडितदृष्टिश्चन्द्राद्वित्वं न प्रकाशत इति ब्रूयात् । किं चैक एवायं चन्द्रो न द्वावित्येवं द्वित्वाविवेकं चन्द्रस्य विस्पष्टमनुसन्दधानस्य चक्षुषा द्वित्वभ्रमो जायमानः कथं विवेकाग्रहणनिमित्तः स्यात् ? । एवमवगतदिक्कस्य दिग्भ्रमो नाऽग्रहनिमित्तः सम्भवति ।

कथं पुनर्द्वित्वस्यावगमः ?– न संस्मरणं तद्द्वित्व-

स्यापत्तिरित्याह । सर्वत्रेति । एतदेवोपपादयति । शुक्तिकेति । अत्र प्रसङ्गादेकदेशिमतमनूद्य निराकरोति । यत्त्विति । विरोधमेव दर्शयति । को हीति । विवेकग्रहेऽपि भ्रमो दृष्ट इत्याह । किञ्चेति । अत्र चोदयति । कथमिति । उदाहरणान्तरेऽप्या-

भावात्, न ग्रहणं अप्राप्य चक्षुषा ग्रहणासम्भवा-त्। उच्यते-देशद्वयं नेत्रेण प्राप्तं चन्द्रश्च, तयोश्च संसर्गो दोषवशादवगम्यते, देशद्वये चन्द्रं प्रतीत्य देशगतं द्वित्वं दोषवशाच्चन्द्रेऽध्यवस्यति। तथा पित्तवर्त्तिपीतत्वं शङ्खस्वरूपं च चक्षुषा गृह्णन् दोषवशात् सम्बन्धं बुद्ध्यत इत्यवगन्तव्यम्।

किं च यदि सम्यग्रजतबोधे तादात्म्यमवभासते न शुक्तिरजतवेदने ततोऽवभास्यभेदादवभासस्य वैलक्षण्यं प्रागेव बाधकादनुसन्धातुं शक्नुयात्, वैलक्षण्यावगमाच्च न प्रवर्तेत।

किं च यदि रजतार्थी शुक्तेरुपादानं कार्यतयावगच्छेत्?, ततोऽकार्यस्य कार्यतया भानाद्विपरीतख्यात्यापत्तिः। अथ नावगच्छेत्? न प्रवर्तेत-तत्कार्यावगमाऽधीनत्वात् प्रवृत्तेः।

अथ कार्यत्वानवगमेऽपि तत्कार्यावगतिसादृश्यात् प्रवृत्तिः?, ततस्तत्कार्यत्वानवगमेनाऽकार्यावगतिसादृश्यमप्यस्तीति निवृत्तिरपि स्यात् सादृश्ययोरविशेषात्। न चासति कारणे कारणसदृशं तत्कार्यं साधयितुमर्हति-मा सीषधच्छुक्तिका रजतकार्यमाभरणम्।

ननु व्रीहिकार्यमपूर्वं नीवाराः साधयन्ति?। नै-

रोपमुपपादयति। तथेति। इदानीन्तन्मतेनाप्यन्यथाख्यातिमापादयति। किञ्चेति। हेत्वन्तरेण प्रवृत्तिं शङ्कते। अथेति। नापि सादृश्यात् प्रवृत्तिः सम्भवतीत्याह। नचेति। कारणसदृशस्यापि तत्कार्यसाधकत्वमस्तीति शङ्कते। नन्विति। परिहरति। नैवमिति। व्रीह्यंशानामेव नीवारगतानां तत्रापूर्वसाधक-

वम्, व्रीह्यंशा एव तत्र कार्यं कुर्वन्ति, ते च विकलाः सन्तोऽप्यशक्त्यवस्थायां तत्साधनत्वेन यथाशक्तिप्रयोगविधानादवगता इति नाऽकारणात् तत्सदृशात् कार्योत्पत्तिः ।

अथ त्वकार्यानवगतिरेव प्रवृत्तेः कारणम्?, ततो बाह्या अपि वेदार्थे प्रवर्तेरन् अकार्यत्वानवगमात् । अथ त्वकार्यमेव तेऽवगच्छेयुः ? ततः कार्यस्याऽकार्यतयाऽवगमाद्विपरीतख्यातिरित्यास्तां तावत् । तस्मात्स्वप्नादिष्वपि बाह्यस्यैवान्यथाभूतस्यैवान्यथाऽवभासात् सिद्धं सर्वत्र बाह्यालम्बनत्वम् ।

अथ स्वप्नवत् प्रत्ययत्वात् स्तम्भादिज्ञानमन्यथाभूतमित्यनुमीयते ! । तदसत्, तथा सति प्रत्ययत्वाविशेषात् त्वदीयमप्यनुमानं मिथ्या स्यात् । मिथ्यात्वग्राहिणोनुमानस्याऽमिथ्यात्वे वा तत्रैव हेतोर्व्यभिचारः । तस्मात्सूक्तम्–“ यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः स एवाऽसमीचीनः प्रत्ययो नान्यः ” (शा.भा.) इति । तस्मादव्यभिचारात् प्रत्यक्षं न परीक्षितव्यम् ।

इति शून्यवादः ॥

त्वमित्यर्थः । तत इति । यद्यकार्यत्वावगमात्तेषामप्रवृत्तिरित्युच्यते ततः कार्यत्वावगमात्प्रवृत्तिरित्यङ्गीकृतमित्युक्तदोषानतिवृत्तिरित्यर्थः । उपपादितमर्थं निगमयति । तस्मादिति । उपपादितेऽर्थे भाष्यं प्रमाणयति । तस्मादिति । वृत्तिकाराभिमतसूत्रार्थोपपादनप्रयोजनमुपसंहरति । तस्मादिति ॥

इति शून्यवादः ॥

प्रत्यक्षस्य सत्संप्रयोगजन्यत्वलक्षणेन लोकसिद्धेनाऽव्यभिचारमुक्त्वा, इदानीमनुमानादेरप्यऽव्यभिचारार्थं लोकसिद्धमेव लक्षणमाह–

"अनुमानं ज्ञातसम्बन्धस्यैकदेशदर्शनादेकदेशान्तरे ऽसंनिकृष्टेऽर्थे बुद्धिः" (शा. भा.)

यस्य यादृशस्य येन यादृशेन सह साक्षा-

एवं प्रत्यक्षस्या ऽव्यभिचारित्वं परीक्षानिवृत्तये तत्संप्रयोग इत्यादिना लक्षणतः प्रतिपाद्यानन्तरमनुमानादिलक्षणमाह वृत्तिकारस्तस्य प्रयोजनं दर्शयति । प्रत्यक्षस्येति । दर्शयितुमाह–वृत्तिकार इति शेषः । असूत्रितानुमानादिवर्णनं वृत्तिकारस्यानुचितमिति चेत् । न । सूत्रस्य सूचनात्मकत्वेन प्रत्यक्षेणानुमानादिलक्षणस्यापि सूचितत्वात् । अथवा प्रत्यक्षं तावदव्यभिचारित्वान्न परीक्ष्यं तत्पूर्वकमनुमानाद्यपि, एवंलक्षणकत्वात् प्रत्यक्षाव्यभिचारित्वाच्च न परीक्ष्यमित्यनुमानादिलक्षणप्रदर्शनार्थत्वात् प्रत्यक्षसूत्रस्यायमदोषः । तत्र वृत्तिकाराभिमतमनुमानलक्षणं तावदाह । अनुमानमिति । अत्र ज्ञातः सम्बन्धो व्याप्तिलक्षणो व्याप्यव्यापकयोर्दृष्टान्तधर्मिणि येन प्रमात्रा स ज्ञातसम्बन्धः तस्य एकदेशस्य व्याप्यस्य धूमादेर्दर्शनात् एकदेशान्तरे व्यापकवन्ह्यादौ चक्षुराद्यसन्निकृष्टेऽर्थे या बुद्धिस्तदनुमानम् । अथवा ज्ञातः सम्बन्धोयस्य एकदेशाभ्यां धूमवह्निरूपाभ्यां सह स ज्ञातसम्बन्धो महानसादिधर्मी एकदेशी तस्य यो धूमाख्य एकदेशः तस्य पर्वतादौ दर्शनात् एकदेशान्तरे वन्ह्यादौ बुद्धिः । अत्र च सर्वनामार्थे बहुव्रीहेः स्मरणं सन्निहितश्च सर्वनामामार्थो भवति । नचात्र प्रमाता एकदेशी वा केन चिदुपात्त इत्यसन्निधानात्तयोः समासार्थत्वानुपपत्तिमाशङ्क्य लिङ्गस्यै

द्वा प्रणाड्या वा यादृशः सम्बन्धः- संयोगः समवाय

वैकदेशरूपस्य समासार्थत्वमभिप्रेत्य व्याचष्टे । यस्येति । अत्र यादृशतादृशशब्दाभ्यां दृष्टान्तपरिदृष्टरूपस्य न लिङ्गत्वं नापि लिङ्गित्वमिति दर्शितं न्यूनरूपस्याप्रयोजकत्वादिति भावः । ज्ञातः सम्बन्धो यस्यैकदेशस्य धूमाख्यस्य एकदेशान्तरेण साध्येन सह स ज्ञातसम्बन्धस्तस्य दृष्टवतः पुरुषस्य या बुद्धिः साऽनुमानमित्यर्थः। अत्र चैकदेशपदोपादानत् सन्निहित एव सर्वनामार्थो भवतीति बहुव्रीह्युपपत्तिः । एतदप्यनुपपन्नम् । एकदेशस्याप्यनुपात्तत्वेनासन्निधानात् । एकदेशदर्शनादित्यत्रैकदेशशब्दस्योत्तरपदार्थविशेषणत्वेनोपसर्जनत्वात् पूर्वपदार्थविशेषणत्वे वैकदेशपदस्य दर्शनशब्देन सह समासानुपपत्तिः ज्ञातपदसहसम्बन्धसापेक्षत्वेनाव्यपेक्षालक्षणसामर्थ्याभावात् । ननु दर्शनाक्रियां प्रत्येकदेशस्योद्देश्यत्वेन प्राधान्यं भवति च प्रधानस्य सापेक्षस्यापि समासः । नैवम् । शब्दतः प्राधान्याभावात् व्याकरणे हि शब्दस्यैव पदार्थत्वात्तत्कृतगुणप्रधानभावस्यैव प्रयोजकत्वात् । तस्माद्विशेषणत्वमेवात्र गुणत्वं नोपकारत्वलक्षणं शेषत्वं, विशेष्यत्वं प्राधान्यं, न शेषित्वं, अत एव ऋद्धस्य राज्ञः पुरुष इत्यत्र शेषिणोऽपि राज्ञः शब्दतो विशेणत्वात् वृत्तिमपेक्षमाणस्य समासाभावः । राजपुरुषः शोभन इति च शेषभूतस्यापि पुरुषस्य विशेष्यत्वेन प्रधानत्वात् शोभनपदापेक्षस्यापि भवति समासः । अत्र च विशेषणमेकदेशो दर्शनस्येति न ज्ञातसम्बन्धपदापेक्षस्य सम्भवति समासः । नैष दोषः सन्निहितमात्रस्यैव सर्वनामार्थत्वेनोपादानस्याऽत्रानुपयोगात् अन्यपरेणाप्युपादानेनैकदेशस्य बुद्धिसान्निध्युपपत्तेः स्वर्गकामादिपदानां च बहु-

व्रीहित्वेनानुपात्तेपि पुरुषे वृत्त्युपगमात् । अस्तुवा कर्मधारय एव बलीयस्त्वात् ज्ञातश्चासौ सम्बन्धश्चेति । नन्वस्मिन्पक्षे एकदेश-दर्शनादेकदेशान्तर इत्यनुपपन्नं स्यात् सम्बन्धस्य निरवयवत्वे-नैकदेशासम्भवात् । न स्यात् । सम्बन्धारम्भकत्वेन सम्ब-न्धिनोरेकदेशत्वोपचारात् ज्ञेयस्वरूपेऽवधारिते तज्ज्ञानं शक्यं निरूपयितुमिति ज्ञातपदमतिक्रम्य सम्बन्धपदं व्याचष्टे । स-म्बन्ध इति । अन्यो वा तादात्म्यलक्षण इत्यर्थः । अत्रेदमु-च्यते नैते सम्बन्धा गम्यगमकभावप्रयोजकाः तदभावेऽपि कृत्तिकारोहिण्युदयादीनां लिङ्गलिङ्गिभावदर्शनात् । अपि च कार्यमपि न कार्यत्वात् कारणं गमयति, किं तर्हि ? तेन नियतत्वात् अन्यथा कार्यमस्तु कारणं च माऽनुमापयदित्यपि वक्तुं शक्यते यतस्तु तेन नियतस्ततोऽनुमापयतीति स एवानु-मानाङ्गं स एव च व्याप्तिशब्देनाभिधीयते । यथाऽऽहुः—

"सम्बन्धो व्याप्तिरिष्टाऽत्र लिङ्गं धर्मस्य लिङ्गिना" (श्लो.वा. अनु. ४)

अत्रानुमानव्यवहारे व्याप्तिलक्षणः सम्बन्धोऽङ्गमित्यर्थः । ननु व्याप्तेः सम्बन्धत्वे तद्द्विष्ठत्वात् धूमवदग्नेरपि गमकत्वं स्यात् । सत्यम् । तथापि व्याप्तिलक्षणसम्बन्धिसमवेतैव व्याप्तिर्न संयोगवदुभयसमवेता तथा दर्शनात् । अतो न धूमवदग्नेरपि गमकत्वापत्तिः । एतदप्याऽऽहुः—

"व्याप्यस्य गमकत्वं तु व्यापकं गम्यमिष्यते ।
यो यस्य देशकालाभ्यां समो न्यूनोपि वा भवेत् ।
स व्याप्यो व्यापकस्तस्य समो वाप्यधिको ऽपि वा"
(श्लो. वा. अनु. ६)

ननु व्याप्यस्य गमकत्वे हिंसात्वमधर्मत्वं गमयेत् दृष्टं हि

एकार्थसमवायः कार्यकारणत्वमऽन्यो वा दृष्टान्तधर्मिषु नियतो ज्ञातस्तं तादृशं साध्यधर्मिषु दृष्टवतस्तस्मिंस्तादृशे—तादृशसम्बन्धसम्बन्धिनि प्रबलेन प्रमाणेन ताद्रूप्यतद्विपर्ययाभ्यामपरिच्छिन्ने या बुद्धिः साऽनुमानम्। यथा धूमस्याऽनुपरतोर्ध्वगमनस्याग्निसाहित्यं महानसादिषु नियतमुपलब्धवतः पर्वते तद्दर्शनादग्निज्ञानम्।

ब्रह्महत्यादौ तद्धर्मत्वेन व्याप्तं, तत्राहुः—

" व्याप्तेश्च दृश्यमानायाः कश्चिद्धर्मः प्रयोजकः।
अस्मिन्सत्यमुना भाव्यमिति शक्त्या निरूप्यते॥
अन्ये परप्रयुक्तानां व्याप्तीनामुपजीवकाः।
तैर्दृष्टैरपि नैवेष्टा व्यापकांशावधारणा"(श्लो.वा.अ.१९)इति।

एवं च सति ग्रन्थकारस्य संयोगादिरूपसम्बन्धकीर्तनं किमभिप्रायमिति न विद्मः। एवं वा ग्रन्थगमनिका ग्रन्थकारस्यापि नियतो ज्ञात इति सम्बन्धविशेषणं कुर्वतोऽयमेवाभिप्रायः। संयोगादिकीर्तनं तु प्रायेणैवंरूपः सम्बन्धस्तत्र तत्र पर्यवस्यतीत्यभिप्रायः। कृत्तिकारोहिण्युदयादीनां तु स्वरूपकृत एव गम्यगमकभाव इति नानुपपत्तिः का चित्। ज्ञातसम्बन्धस्येत्यनेन ज्ञात एव सम्बन्धोऽनुमानाङ्गमिति सूचितम्। असन्निकृष्ट इत्यस्यार्थमाह। ताद्रूप्येति। ताद्रूप्येण तद्विपर्ययेण वा परिच्छिन्नस्य सन्निकृष्टस्य पक्षाभासत्वमिति भावः। येन रूपेणानुमातुमिष्यते तेनैव रूपेण रूपान्तरेण वा तद्विपरीतेन शीघ्रं प्रमाणेन परिच्छिन्नो योऽर्थः स सन्निकृष्टः तस्य पक्षत्वं व्यावर्तयितुमसन्निकृष्टग्रहणमित्यर्थः। ते च पक्षाभासाः प्र-

ननु नियमावधारणाधीनत्वे कथं ताद्रूप्येणापरिच्छिन्ने प्रवृत्तिः ? ईदृशो हि नियमः—यत्र यत्र धूमस्तत्रतत्राग्निः यद्यद्रसवत्तत्तद्रूपवदिति । एवं चेत् ? यावद्धूममग्निसद्भावोऽवगत एवेति नाऽपरिच्छिन्नविषयत्वमनुमानस्य संभवतीति, । अत एव चोद्याद्बिभ्यतः केचिदऽसन्निकृष्टग्रहणं स्मरणाभिमाननिरासार्थं व्याचक्षते गृहीतग्राहित्वमेवानुमानस्य स्वीकुर्वाणाः । तथापि नाऽप्रामाण्यम्, नह्यऽगृहीतग्रहणं प्रमाणलक्षणम् । अनुभूतिर्हि तल्लक्षणम् । अनुमानं च गृहीतग्राहित्वेऽपि प्रत्युत्पन्नलिङ्गकारणजन्यत्वेन संस्कारमात्रजन्यत्वाभावादऽनुभूतिरेवेति युक्तमस्य प्रामाण्यम् ।

अथ स्मृतिप्रमोषः कस्मान्नाश्रीयते ?, प्रत्युत्पन्नकारणसद्भावात्, संस्कारातिरिक्तकारणाऽसद्भावेन हि 'इदं रजतम्' इत्यत्रानुभवरूपस्यापि रजतज्ञानस्य बलात् स्मृतित्वमाश्रित्य प्रमोषोऽङ्गीकृतः । अत्र तु लिङ्गस्यानुभवकारणस्य सद्भावादयुक्तं प्रतीतिसिद्ध-

---

त्यक्षादिविरोधेन वार्तिककारैर्दर्शिताः तत्रैवावगन्तव्याः । ताद्रूप्यतद्विपर्ययाभ्यामपरिच्छिन्न इत्येतदाक्षिपति । नन्विति । मतान्तरेण तावत्समाधत्ते । अत इति । एतस्मादेव चोद्यात् एतद्भयादेव गृहीतग्राहित्वमेवानुमानस्याङ्गीकुर्वन्तीति भावः । एतत्पक्षेऽसन्निकृष्टग्रहणस्य तर्हि का गतिरित्यत आह । असन्निकृष्टेति । गृहीतग्राहित्वादप्रामाण्यमिति चेत् नेत्याह । तथापीति । चोदयति । अथेति । समाधत्ते । प्रत्युत्पन्नेति ।

स्यानुभवरूपस्यापन्हवेन स्मृतिप्रमोषाङ्गीकरणमिति ।

सोऽयमेषामकारणकस्त्रासः, तथा हि–यदि हि यावद्व्याप्यं व्यापकसद्भावोऽवगतः स्यात्ततो गृहीतग्राहित्वमाशङ्क्येतापि, न त्वेवमस्ति, महानसादिष्वेव हि दृष्टान्तधर्मिषु प्रागऽनुमानाद् धूमस्याग्निसाहित्यमवगतं न सर्वत्र, प्रमाणासंभवात् । यथा चासंभवस्तथा

एतदेवोपपादयति । संस्कारेति । तदेतद्दूषयति । सोऽयमिति । यावद्व्याप्यं व्यापकसद्भावावगमे गृहीतग्राहित्वं स्यान्न त्वेवमस्तीत्यर्थः । ननु यावद्धूममग्निसद्भावावगमाभावे कथं व्याप्तिनिश्चयस्तत्राह । महानसादिष्विति । नन्वेतदयुक्तं भूयोदर्शनगम्यत्वात् व्याप्तेः यथाऽऽहुः—

"भूयोदर्शनगम्या च व्याप्तिः सामान्यधर्मयोः ।
ज्ञायते भेदहानेन क्वचिच्चापि विशेषयोः" (श्लो.वा.अनु.१२) ॥

सत्यमेवम् । तथाप्येकत्रैव महानसादौ बहुशोऽवगताग्निसाहित्य धूमस्य परिदृष्टेषु देशकालेषु वन्हिनियमावगतिर्भवति एतावदेवानुमानाङ्गं, तदनन्तरं यत्र यत्र धूमस्तत्र तत्राग्निरिति योऽवगमः सोऽप्यानुमानिक एव परोक्षरूपत्वात् । प्रत्यक्षत्वं तु संविद्विरुद्धं आपरोक्ष्याभावात् नियमज्ञानस्य चानग्नौ धूमदर्शनं बाधकप्रत्ययो न चात्र तदस्ति, भविष्यतीति बाधकप्रत्ययाशङ्का रजतेपि रजतज्ञाने समाना । वार्तिककृतोप्ययमेव श्लोकार्थो ऽभिमतः—

"ममत्वदृष्टिमात्रेण गमकः सहचारिण" (श्लो.वा.अनु.१४)

इत्यग्रे भूयोदर्शनश्लोकार्थविवरणात् । ननु तत्र तत्र प्रत्यक्षादिना साहित्यस्यावगन्तुं शक्यत्वात् कथं प्रमाणासम्भवस्तत्राह । यथेति । ननु भूयोभिरपि दर्शनैस्तत्र तत्र साहित्यं

न्यायरत्नमालायामेव प्रपञ्चितम् ।

दृष्टान्तधर्मिण्येव बहुशोऽग्निसाहित्यमुपलब्धवतोऽनग्नौ च क्वचिदपि प्रयत्नेनान्विष्यमाणे धूममदृष्टवतः साध्यधर्मिण्यग्निमत्ताज्ञानमुत्पद्यते । आह च—

"साहित्ये मितदेशत्वात् प्रसिद्धे वह्निधूमयोः ।
व्यतिरेकस्य चादृष्टेर्गमकत्वं प्रकल्प्यते" (श्लो० वा० अनु० ४२)इति ।

"ममत्वदृष्टिमात्रेण गमकः सहचारिणः" इति गम्यते न तु सर्वत्र, दर्शनानां सर्वेषां स्वविषयपर्यवसानात् अनन्तप्रत्यक्षगम्यो हि सर्वत्र सहभावः, स जीवद्भिर्दुर्लभः, विपक्षादर्शनादपि प्रत्यासन्नेष्वेव विपक्षेषु परं अभावोऽवगम्यते, सर्वविपक्षव्यावृत्तिस्तु दुर्लभैव दृश्यादर्शनासिद्धेः तत्कथं नियमस्य सर्वदेशकालव्याप्तिरूपस्य भूयोदर्शनगम्यत्वम् । एवं च स्वयमेवाऽऽचार्येण शङ्कितं यथाऽऽहुः—

"अन्वयो ऽपि ह्यतिव्याप्यं व्यापकस्य न दृश्यते ।
अनन्तेन हि लभ्येत स प्रत्यक्षादिजन्मना"(१) ॥ तथा—
"नाभावेन विपक्षाद्धि हेत्वभावः प्रतीयत"(२)न्या.र.मा. इति च ।

सर्वविपक्षाभावो न प्रतीयत इत्यर्थः" इति प्रमाणासम्भवो न्यायरत्नमालायां प्रपञ्चित इत्यर्थः । हन्त तर्ह्यनुमानासम्भव एव नेत्याह । दृष्टान्तेति । एतदपि न्यायरत्नमालायां प्रपञ्चितम् । तथाहि—अत्र च समर्थनमुक्तम्—

"तत्रास्या दृष्टिमात्रेण गमकः सहचारिणः"(३)

इति । तत्रेति । विपक्षे इत्यर्थः । एतदुक्तं भवति मानाम सर्वविपक्षाभावो लिङ्गस्य सैत्सीत् अदर्शनं तु विपक्षेषु लिङ्गस्यास्त्येव ।

(१) न्यायरत्नमालायां व्याप्तिवादे ।
(२) न्याय० मा० । (३) न्याय० मा० ॥

च । ततश्चानुमित्सता न सर्वेषां धूमवतामग्निमत्ताऽव-
गन्तव्या, नापि सर्वत्राऽनग्नौ धूमस्याऽभावः । भूयो-
ऽग्निसाहित्यं व्यभिचाराऽदर्शनमित्येतावदेवानुमाना-
र्थिभिरभ्यर्थनीयं नाधिकं किं चित् । यत्त्विदं यत्र यत्र
धूमस्तत्राग्निरिति ज्ञानं तदनुमानमेवेति तत्रैवोक्तम् ।

तावता च सहचारी दृष्टो धूमादिः सहचारिणोऽग्न्यादेर्गमको भवति।
यत्तु सहचारित्वमपि सर्वत्र दुर्लभं द्रष्टुमित्युक्तं तत्राप्युत्तरम्—

"दुर्लभं सहचारित्वं सर्वत्रेति यदुच्यते ।
द्रष्टुं मा नाम सर्वत्र द्वित्रयोर्दृश्यते ध्रुवम्"(१) ।

"साहित्ये मितदेशत्वादिति' च । अस्यार्थः । मा नाम स-
र्वत्र सहचारित्वं दर्शि द्वित्रयोस्तु प्रदेशयोरीषत्करं दर्शनं तावता
चासति व्यभिचारदर्शने भवत्यनुमानमिति । तथा कियद्भिः पुनः
साहित्यदर्शनैरनुमानं को नामैतत्संचष्टे यावद्भिर्दृश्यते ताव-
द्भिरेव, न तु सङ्ख्या वक्तुं शक्यते । येऽपि भूयोदर्शनसहाय-
प्रत्यक्षगम्यं नियममाहुः येऽपि सकृद्दर्शनेऽपि गृहीतनियमे
उपाध्याशङ्कानिराकरणार्थं भूयोदर्शनमर्थयन्ते तेऽपि नैव सं
चक्षते तथा वयमपीति न कश्चिद्विशेष इति । तत्रैवोक्तमिति ।
न्यायरत्नमालायामेवेत्यर्थः । तथाहि आह भवतु नामैवं य-
थादृष्टप्रदेशेषु साहित्यनियमादेवानुमानं यत् स्वयं यत्र यत्र
धूमस्तत्रतत्राग्निरिति भूयोदर्शनतोऽवगमः स कथम् ? न
ह्यसौ नास्ति, न चाप्रमाणं सर्वेषां सर्वदा दृष्टत्वेन जायमान-
त्वात् तदयं कस्मिन् प्रमाणेऽन्तर्भवतीति वक्तव्यम् । उच्यते ।
आनुमानिकोऽयमवगमः ज्ञातसम्बन्धस्योपजायमानत्वात् । प-

---

(१) न्यायर० मा० ।

नन्वेवमप्यनेनैव सामान्यानुमानेन सर्वधूमवतामग्निमत्ताऽवगतेति यत् पुनः पर्वतादिदेशविशेषेषु धूमदर्शनादग्न्यनुमानं तस्य गृहीतग्राहित्वं तदवस्थमेव स्यात् ? । मैवम्, सामान्यविशेषभेदात्-सामान्येन हि धूमवतामग्निमत्ताऽवगता पर्वतादेस्तु देशविशेषस्य स्वरूपमपि प्रागऽनवगतम्, नतरामग्निमत्त्वम् ।

यस्त्ववगतमेवेति मन्यते, तेन पर्वतस्वरूपमेव तावदऽप्राप्तं पर्वतासमीपस्थैः केन प्रमाणेनावगतमिति वक्तव्यम्, न प्रत्यक्षेण, नान्येन प्रमाणेन, न चानवगतपर्वतस्तस्याग्निमत्तामवधारयितुमलम् । यदि चेदानीन्तनं पर्वतस्याग्निमत्त्वं प्रागेवावगतं स्यात् ततोऽग्न्यर्थी विनैव धूमदर्शनेनाग्नये पर्वतमारोहेत्, नह्यऽग्न्यर्थिनोऽवगतेऽग्नौ धूमदर्शनेनार्थः कश्चित् ।

किं च धूमोपलक्षितस्य पर्वतादिदेशविशेषस्याग्निसम्बन्धोऽवगत इति वदता धूमसम्बन्धोप्यवगत इति वक्तव्यम्, नह्यऽज्ञातसम्बन्धमुपलक्षणमुपलक्ष्यमुपलक्षयितुं क्षमम् ।

अथ देशमात्रस्य धूमेनोपलक्षणं न देशविशेषस्य ?, ततोऽग्निमत्त्वमपि तन्मात्रस्याऽवगतं न देशविशेषस्य, अतो लिङ्गलिङ्गिनोरविशेषात् "लिङ्गस्यैव दे-

---

रोक्षरूपत्वाच्च नैन्द्रियकः साक्षात्कारित्वाभावात् संविद्विरोधाच्च धूमस्य बहुषु देशकालेष्वग्निना साहित्यमुपलब्धवतो भवत्यनुमानम् । अन्येऽप्यतीतानागतव्यवहितविप्रकृष्टाः सर्व एव धूमवन्तोऽग्निमन्तः धूमवत्वात् परिदृश्यमानमहानसादिवत् इति,

शकालातिरेको न लिङ्गिनः" इति प्रलापमात्रम्।

अपि च यत्राग्नीन्धनसंयोगस्तत्र धूम इत्यनेन धूमोऽप्यवगत एवेति न किंचिदप्यवगन्तव्यमवशिष्यते धूमज्ञानेनेत्यलं बालजल्पितेन।

यदि चावगतमेवानुमानेनावगम्यते ततः स्मरणमेव प्रमुषिततद्भावमऽनुमानज्ञानं स्यात्। न च प्रत्युत्पन्नकारणजत्वादऽस्मृतित्वम्, तदसिद्धेः—संबन्धिदर्शनं हि सदृशदर्शनवत् संस्कारमुद्बोधयेत्, क्लृप्तं हि तत्र तस्य कारणत्वम्, संस्कारश्चोद्बोधितः स्मृतिं जनयतीत्यविवादम्, स्मृतेश्च प्रमोषः शुक्तिकारजतादिवेदनेषु क्लृप्त एव। तदेवं क्लृप्तेनैव मार्गेण धूमादग्निज्ञानोत्पत्तौ को नामाऽक्लृप्तं लिङ्गस्य लिङ्गिज्ञानहेतुत्वं कल्पयेत्। कल्पनायां वा शुक्तावपि रजतवेदनस्यानुभवरूपत्वात्तदुपपत्तये दोषस्यैवानुभवहेतुत्वं कल्पनीयम्। अकल्पने त्वत्रापि स्मृति-

---

तेन यथालोकं प्रमाणसामग्र्यनुभवात् धर्म्यन्तरगतसाहित्यनियमादेव धर्म्यन्तरेऽनुमानमित्यनवद्यमिति। लब्धावसरः पुनर्गृहीतग्राहित्वं शङ्कते। नन्विति। उत्तरग्रन्थः स्पष्टार्थः। मतान्तरोक्तं गृहीतग्राहित्वमिदानीमनुमानस्य निराचष्टे। यदीति। न चेति। लिङ्गदर्शनमेवात्र प्रत्युत्पन्नं कारणं तस्य सम्बन्धिदर्शनस्य तत्र संस्कारोद्बोधे कारणत्वं क्लृप्तमित्यर्थः। तन्मतेनोपपादितं स्मृतित्वं निगमयति। तदेवमिति। संस्कारोद्बोधनद्वारा स्मृतिरूपवन्हिज्ञानोत्पत्तौ सत्यामित्यर्थः। अ-

प्रमोषादऽप्रामाण्यमेव स्यात् । तस्मादवश्यमऽगृहीत-ग्राहित्वमङ्गीकर्तव्यम् ।

नन्वाग्निविशेषस्याऽगृहीतसम्बन्धस्याऽननुमेयत्वा-त्सामान्यमेवानुमेयं तच्च प्रागवगतमेवेति कथमऽगृ-हीतग्राहित्वम् ? यथाहुः—

"विशेषेऽनुगमाभावः सामान्ये सिद्धसाध्यता ।
अनुमाभङ्गपङ्केऽस्मिन्निमग्ना वादिदन्तिनः" इति ।

नैष दोषः-अवगतस्यापि सामान्यस्य देशान्तर-कालान्तरसम्बन्धस्यागृहीतस्य ग्रहणाद् ह्युपपन्नं प्रमे-यत्वम् ।

इदं चापरमेकदेशिना वक्तव्यम्—केन प्रमाणेन धूमदर्शनस्याग्निज्ञानहेतुत्वमवगम्यते ? इति । तदान-न्तर्यादिति चेत् ?, न, तस्य संस्कारद्वारेणाप्युपपत्तेः । अनुभवरूपत्वमनुपपन्नमिति चेत् ?, न, स्मरणस्यापि तत्परामर्शप्रमोषेणानुभवाभिमानोपपत्तेः । वस्तुतो-ऽनुभवत्वं त्वसिद्धमेव प्रमाणाभावात्, न ह्यग्निज्ञान-स्यानुभवत्वे प्रत्यक्षमन्यद्वा प्रमाणमस्ति । अस्ति तु स्मृतिप्रमोषे ।

कल्पन इति । दोषस्यानुभवहेतुत्वाकल्पने सतीत्यर्थः । अ-त्रापि—अनुमानेपि । लिङ्गस्य लिङ्गिज्ञानहेतुत्वाकल्पनात् स्मृ-तिप्रमोषादप्रामाण्यमेव स्यादित्यर्थः । चोदयति । नन्विति । प्रत्युत्पन्नकारणजत्वं दूषयितुमाह । इदमिति । तस्येति । आनन्तर्यस्येत्यर्थः । स्मरणस्यापि—वस्तुतः स्मरणरूपस्यापि

अथ स्मृतिप्रमोषत्वे बाधकं स्यात्, न चाग्निज्ञानस्य तदस्तीत्यतो न स्मृतिप्रमोष इति चेत् ?, न, स्मृतिप्रमोषस्याप्यबाधदर्शनात्। मणिप्रभादर्शिनो मणिबुद्धिस्तावत् स्मृतिप्रमोष एव, अन्यथा विपरीतख्यातिप्रसङ्गात्, अथ च प्रवृत्तस्य मणिलाभान्न बाधकमस्ति, तस्मात्स्मृतिरेवानुमानमित्यप्रामाण्यापत्तिः।

कथं च गृहीतग्राहित्वमनुमानस्य ?, अत्यन्तापरिदृष्टे देशे काले चाग्निरनुमीयते स केन प्रमाणेन प्रागवगतः ?, न प्रत्यक्षेण तस्य विद्यमानोपलम्भनत्वात्। न चान्येन केन चित्। किं चाग्निधूमयोर्मिथः सम्बन्धो देशकालानवच्छिन्नः प्रत्यक्षेणावगत इत्येतावदेव भवान् ब्रवीति, न चैतावता देशान्तरकालान्तरसम्बन्धोऽग्नेरवगतो भवति, तस्मादगृहीतग्राह्येवानुमानम्।

किमत्रागृहीतम् ?, अग्निसामान्यं तावद् गृही-

वन्हिज्ञानस्येत्यर्थः। स्मृतिप्रमोषत्वपरिहारं शङ्कते। अथेति। 'नेदं रजत'मितिवदत्र बाधकाभावान्न स्मृतिप्रमोषत्वमित्यर्थः। परिहरति। नेति। अन्यथेति। स्मृतिप्रमोषानङ्गीकार इत्यर्थः। अनुमानस्य गृहीतग्राहित्वपक्ष उपपादितं स्मृतित्वं निगमयति। तस्मादिति। इतश्च न गृहीतग्राहित्वमित्याह। कथं चेति। तस्येति। प्रत्यक्षस्येत्यर्थः। अनुमानस्यापि विद्यमानोपलम्भनत्वं वन्ह्यादौ दृष्टं अत इन्द्रियसंयोगेति विशेषणं देयम्। इतश्चैवमित्याह। किञ्चेति। स्वमतं निगमयति। तस्मादिति। एतदेवोपपादयितुमाह। किमत्रेति। दृष्टान्तद्वयं स्पष्टार्थम्। तत्र

तमेव, पर्वतोपि प्रत्यक्षेणावगतः, अग्निविशिष्टस्तु पर्वतो न केनाप्यवगत इति सोऽनुमेयो भविष्यति। तत्र च प्राप्ताऽप्राप्तविवेकेन सम्बन्धमात्रं प्रमेयमवशिष्यते। यथा "दध्ना जुहोति" इति विशिष्टविषयोऽपि विधिर्विशेषणपरो भवति तथेहापि, विशिष्टविषयमेवानुमानं विशेषणविशेष्ययोस्तु प्राप्तत्वात् "यजुर्युक्तं रथमध्वर्यवे ददाति" इतिवत्सम्बन्धविषयं भवतीति।

यस्तु प्रतिपन्नमर्थं परमऽनुमानेन प्रतिपिपादयिषति तेन साधनं प्रयोक्तव्यम्। येन वाक्येन यस्यानुमानबुद्धिरुत्पद्यते तत् साधनमित्युच्यते।

'तच्च पञ्चतयं केचित्, द्वयमऽन्ये, वयं त्रयम्।
'उदाहरणपर्यन्तं यद्वोदाहरणादिकम्'।

अक्षपादीयास्तावत्-प्रतिज्ञाहेतूदाहरणोपनयनिगमनैः पञ्चावयवं साधनं मन्यन्ते। अनित्यः शब्द इति प्रतिज्ञा, कृतकत्वादिति हेतुः, यत्कृतकं तदनित्यं दृष्टं यथा घटादीत्युदाहरणम्, कृतकश्च शब्द इत्युपनयः, तस्मादनित्य इति निगमनम्।

अयं त्वऽतिविस्तरो गतार्थ इति मन्वानाः सौगता द्व्यऽवयवम्— उदाहरणोपनयात्मकं मन्यन्ते। स्म-

---

स्वार्थस्य स्वप्रतिपत्तिमात्रहेतुत्वेन शब्दप्रयोगानर्हत्वात्तदपेक्ष्य परार्थानुमानाभिप्रायेणाह। यस्त्विति। लोके साधनशब्दस्य हेतुमात्रे प्रयोगदर्शनात्तद्व्यावृत्त्यर्थं लक्षणं करोति। येनेति। श्लोकं व्याचष्टे। अक्षपादीया इति। उदाहरणादि अवयवप्रयोगे

येमाणनियमं हि लिङ्गं साध्यधर्मिण्यनुसन्दधानस्य स्वयमेव लिङ्गिबुद्धिरुत्पद्यते, तेन यत्कृतकं तदनित्यमिति कृतकत्वस्याऽनित्यत्वेन व्याप्तिनियमं स्मारयित्वा कृतकश्च शब्द इत्युपनयमात्रे कृते शब्दस्यानित्यत्वमवगम्यत एवेति कृतमवयवान्तरैः ।

एवं त्वऽत्यन्तसाकाङ्क्षमेव वाक्यं क्लेशगम्यार्थं भवतीति त्र्यवयवमेव युक्तम्–अनित्यः शब्दः कृतकत्वाद् यत्कृतकं तदनित्यं यथा घटादीत्येवमुदाहरणान्तं साधनं सर्वत्र वार्तिककारः प्रयुङ्क्ते । अथ वा–यत् कृतकं तदनित्यं यथा घटादि, कृतकश्च शब्दस्तस्मादनित्यः–इत्युदाहरणप्रभृति प्रयोक्तव्यम् । एवमप्यन्यूनाधिकमेव साधनम् । तथा च " यत् कर्म तत् फलवद् होमोपि कर्म तेनापि फलवता भवितव्यम् " इत्येव सर्वत्र भाष्यकारः प्रयुङ्क्ते ।

भाष्यकारसम्मतिमाह । तथाचेति । अत्र वार्तिककारैः—

"अग्नेर्देशाविशिष्टत्वेन चैतत् पक्षस्य लक्षण" (श्लो. वा. अनु. ३९)

मित्यादिना ग्रन्थेन देशविशिष्टत्वमष्टधा विकल्प्य देशविशिष्टस्याग्नेरनुमेयत्वं दूषयित्वा—

"तस्माद्धर्मविशिष्टस्य धर्मिणः स्यात्प्रमेयता"। (श्लो.वा.४७)

इत्यनेन धर्मविशिष्टस्य धर्मिणोऽनुमेयत्वमुक्तम् । तथाच

"न च तस्यानुमेयत्वं विशेष्यश्चावधारितः ।
विशिष्टत्वेन चाज्ञानात्तन्मात्रस्यानुमेयता (श्लो. ५०)"

इत्युक्तम् । तथाऽन्यदपि प्रमेयं तद्वार्तिक एवावगन्तव्यम् ।

प्रतिज्ञादोषाः प्रत्यक्षविरोधादयोऽप्रसिद्धविशेषणत्वादयश्च वार्तिके प्रपञ्चिताः ।

असिद्धिः, अनैकान्तिकत्वम्, बाधकत्वम्, चेति त्रयो हेतुदोषाः । तत्रासिद्धिः पञ्चधा– बुद्धो धर्माधर्मवेदी सर्वज्ञत्वादिति स्वरूपासिद्धिः, न हि सर्वज्ञत्वस्वरूपं क्वचिदस्ति १ । वन्हिरदाहकः शीतत्वादिति सम्बन्धासिद्धिः शैत्यस्य वन्हिसम्बन्धाभावात् २ ।

नन्वेवं समुद्रवृद्धौ चन्द्रोदयस्य हेतुत्वं न स्यात्, उदयस्य समुद्रसम्बन्धाभावात् ?, एककालसम्बन्धादुभयोरदोषः ।

प्रतिज्ञादोषा इति, ।

" अग्राह्यता तु शब्दादेः प्रत्यक्षेण विरुध्यते ।

तेषामश्रावणत्वादि विरुद्धमनुमानत (श्लो. वा. ६०) "

इत्यादिना ग्रन्थेन वार्तिके प्रपञ्चिता इत्यर्थः । ननु प्रत्यक्षादिविरोधेन रूपत्रयबाधात् हेतुदोष एवायं न प्रतिज्ञादोषः । सत्यम् । रूपत्रयबाध एवायं, पक्षविपर्ययद्वारेण तु पक्षदोष इत्युच्यते साध्यविकलत्वादय इव दृष्टान्तदोषा अप्रसिद्धविशेषणत्वाप्रसिद्धविशेष्यत्वाप्रसिद्धोभयत्वादिदोषाश्च निरालम्बनवादे वार्तिके प्रपञ्चिता इत्यर्थः । एवमसन्निकृष्टग्रहणनिरस्ताः प्रतिज्ञादोषादयो वार्तिक एव प्रपञ्चितत्वान्न प्रदर्शिताः । सम्प्रति हेत्वाभासान् प्रपञ्चयन् एकदेशदर्शनादित्यनेन दर्शनशब्देन निश्चयवाचिना निरस्तमसिद्धं तावद्दर्शयति । तत्रेति । वादिप्रतिवादिनोरेकस्य द्वयोर्वा संशयाज्ञानविपर्यया यस्मिन् सोऽसिद्ध इति भावः । अत्र चोदयति । नन्विति । परिहरति । एकेति ।

यदा तर्हि चन्द्रस्य नभोमध्ये स्थितिं दृष्ट्वा पञ्चदशनाडिकातिक्रान्ता समुद्रवृद्धिरनुमीयते तदा कथम् ?, तत्रापि परम्परासम्बन्धादुभयोरदोषः । न हि साक्षात्सम्बन्ध एव सर्वत्राश्रीयते, यद्धि येन साक्षात् प्रणाड्या वा केनापि सम्बन्धेन नियतं तत् तस्य तथैवानुमापकं भवतीति दर्शितमेवैतत् । तेन यादृशः सम्बन्धो हेतोर्वादिना दर्शितस्तदसिद्धौ दोषो भवति नान्यथा ।

गोशब्दः सास्नादिमद्वचनो गोशब्दत्वादिति व्यतिरेकासिद्धिः, नहि धर्मिव्यतिरेकेण गोशब्दत्वं नाम किंचिदस्ति ३ । नित्यमाकाशमनवयवद्रव्यत्वादिति सौत्रान्तिकमाऽऽकाशाभाववादिनं प्रत्याऽऽश्रयासि-

---

उदयसमुद्रयोः परस्परसम्बन्धाभावेऽपि उदयवृद्ध्योरेककालसम्बन्धात् तत्कालीनवृद्ध्यनुमापकत्वाददोष इत्यर्थः । पुनश्चोदयति । यदेति । तदा चन्द्रनभोमध्यस्थितेरतिक्रान्तसमुद्रवृद्धेश्चैककालत्वाभावादित्यर्थः । परिहरति । तत्रापीति । चन्द्रनभोमध्यस्थितिरप्यतिक्रान्तामुदयकालीनामेव वृद्धिमनुमापयति चन्द्रद्वारा परम्परासम्बन्धादित्यर्थः । दर्शितमिति । यस्य यादृशस्येत्यादिना । असिद्ध्यन्तरमुदाहरति । गोशब्द इति । ननु यः सास्नादिमद्वचनो न भवति स गोशब्दोऽपि न भवति यथा घटशब्दादिरिति व्यतिरेकस्य सत्वान्नायं दोष इत्याशङ्क्य स्वाभिप्रेतं व्यतिरेकशब्दार्थं विवृणोति । नहीति । पक्षस्यैव हेतुत्वापत्तिरत्र दोषः । आश्रयासिद्धमुदाहरति । नित्यमिति । न चाश्रयस्यासिद्ध्या हेतोरसिद्धिः कथं स्यात् । उच्यते ।

द्धिः ४। वायुराकाशश्चाऽनित्यो मूर्तत्वादिति व्याप्त्यऽसिद्धिः मूर्तत्वस्याकाशे व्याप्त्यऽभावादिति ५।

अनैकान्तिकत्वं द्विविधम्– सव्यभिचारं सप्रतिसाधनं च। नित्यः शब्दोऽमूर्तत्वादिति कर्मादिष्वनित्येष्वप्यऽमूर्तत्वस्य सम्भवाद् व्यभिचार्यऽमूर्तत्वम्। अप्रत्यक्षो वायुर्द्रव्यत्वे सत्यऽरूपत्वात् प्रत्यक्षो वायुर्महत्वे सति स्पर्शवत्त्वादिति सप्रतिसाधनत्वादुभयमप्यनिर्णायकं संशयहेतुः, अगृह्यमाणबलाबलत्वादुभयोः।

कश्चित्त्वाह– न विरुद्धार्थे हेतुद्वयं तुल्यबलमेकत्र सम्भवति, तद्भावे वस्तुनि नित्यसंशयापत्तेः। द्रव्यत्वे सत्यऽरूपत्वस्याऽपरोक्षावभासाविरोधादऽप्रत्यक्षत्वमनुमापयितुमसामर्थ्याद् दौर्बल्यम्। स्पार्शनानुमानं त्वविरुद्धं बलवदिति न द्वयोस्तुल्यबलत्वम्, अतो नास्ति सप्रतिसाधनो हेतुरिति। स वक्तव्यः– सव्यभिचारोऽपि तर्हि न संशयहेतुः स्यान्नित्यसंशयापत्तिप्रसङ्गादेव।

"धर्मिधर्मतया गृह्यमाणस्यैव हि हेतुता।
असिद्धे धर्मिणि कथं हेतोस्तद्धर्मता भवेत्"॥

ज्ञातसम्बन्धस्येत्यनेनानैकान्तिकविरुद्धयोः। संशयविपर्ययजनकयोर्हेत्वाभासत्वं दर्शितम्। तत्रानैकान्तिकं तावदाह। अनैकान्तिकत्वमिति। सप्रतिसाधनत्वनिराकरणपरं मतान्तरं दूषयितुमनुवदति। कश्चित्त्विति। दूषयति। स इति। नित्यसंशयापादकत्वेन सप्रतिसाधननिराकरणे सव्यभिचारो-

सत्यपि तस्य संशयहेतुत्वे प्रमाणान्तरेण निर्णयसम्भवान्न नित्यसंशयापत्तिरिति चेत् ?, तर्हीहापि प्रमाणान्तरेण निर्णयसम्भवादऽदोषः । तथा सति यत्प्रमाणान्तरविरुद्धं तस्य दुर्बलत्वादितरस्य बलीयस्त्वादऽतुल्यबलत्वमिति चेत् ?, केन चोक्तमुभयं तुल्यबलम् ? इति, किं त्वऽगृह्यमाणबलाबलत्वमात्रम् ।

तथा हि– यः स्थाणुत्वं पुरुषत्वं वा नावधारयति तस्योर्ध्वत्वं संशयहेतुर्भवति, निर्णीते त्वन्यतरस्मिन् रूपे संशयो निवर्तते । तथा यो वायोरपरोक्षावभासं नावधारितवान् तस्य पृथिव्यादिषु प्रत्यक्षत्वव्याप्तं स्पर्शवत्त्वं व्योमादिषु चाऽप्रत्यक्षत्वव्याप्तमरूपत्वं वायावुपलभमानस्य भवत्येव संशयः । स तु प्रमाणान्तरेण निर्णये सति निवर्तत इत्यास्तां तावत् । तस्मात्सप्रतिसाधनमपि सव्यभिचारवत्संशयहेतुः । तथा च भाष्यकारः– " यत्कर्म तत् फलवद् होमोपि कर्म तेनापि फलवता भवितव्यम् " इत्यस्य " उपरते क-

---

ऽपि निराकृतः स्यात् संशयहेतुत्वाभावेऽनैकान्तिकत्वाऽसम्भवादिति भावः । सव्यभिचारिणि विशेषं शङ्कते । सत्यपीति । इष्टापत्त्यभिप्रायेण शङ्कते । तथेति । सप्रतिसाधने प्रमाणान्तरेण निर्णये सतीत्यर्थः । अतुल्यबलत्वे सप्रतिसाधनत्वाभाव इति भावः । अत्र भाष्यकारसंमतिमाह । तथा चेति । होमेनापि फलवता भवितव्यमित्यस्येति प्रतिसाधनं ब्रुवन् इति दर्शयतीति सम्बन्धः । प्रतिसाधनस्वरूपं दर्शयति । उपरत इति । हस्तादिव्यापाररूपे कर्मणि उपरते द्रव्याणां तन्त्वादी-

र्मणि द्रव्याणां तत्संयोगानां च द्रव्यान्तरं फलं दृष्ट-मिति द्रव्यमपि फलश्चस्यात् " इति सप्रतिसाधनं ब्रु-वन् सप्रतिसाधनत्वमपि दूषणमिति दर्शयति, तस्मा-त् सोपि संशयहेतुः ।

असाधारणं तु गन्धवत्त्वं पृथिव्यां दृष्टं न क्वचिद-पि बुद्धिमादधातीति न संशयहेतुः । साधारणं हि द्व-योः साध्यतदभावयोर्दृष्टत्वादुभयत्राप्यनवस्थया बु-द्धिमादधत् संशयहेतुरिति युक्तम् । तथा विरुद्धार्थ-व्याप्तमपि हेतुद्वयमेकत्र दृश्यमानं स्वव्यापकमेकस्मि-न् धर्मिण्युपसंहरदेकस्य विरुद्धोभयरूपधर्मत्वासम्भ-वात् संशयं जनयति । न चैवम्भावोऽसाधारणस्य सम्भवतीति नायं संशयहेतुः ।

नां तत्सयोगानां च पटादिरूपं फलं दृष्टमित्यर्थः । असाधा-रणस्यापि केचिदनैकान्तिकत्वमाहुस्तान्निराकरणार्थमाह । अ-साधारणमिति । एतस्य चानन्तरमेव वार्तिकविरोधं दर्शयि-ष्यामः । ननु साधारणस्यापि कथं संशयहेतुत्वं न तावन्नित्या-नित्यबुद्धिद्वयोत्पादकत्वेन ताभ्यामेके (?) । चाऽप्यनियतत्वात् । नियमलक्षणेनैव सम्बन्धेनैव तद्बुद्धिजनकत्वसम्भवात् उभाभ्यां नियतत्वे चोभयत्र निश्चायकत्वापातात् । नापि कोटिद्वयसंस्प-र्श्येकविज्ञानजनकत्वेन संशयहेतुत्वं अर्थसन्देहाभावेन तेनाप्य-नियतत्वात् स्वपक्षे वादिनोः सन्देहाभावादित्याशङ्कां निराक-र्तुमाह । साधारणमिति । प्रसङ्गात् सप्रतिसाधनस्यापि पूर्वोक्त-संशयहेतुत्वं स्मारयति । तथेति । अयमेव च विरुद्धाव्यभि-चारी । धर्म्यन्तरेषु विरुद्धार्थव्याप्तहेतुद्वयमेकत्रैकदेशिनि दृश्यमा-

तथा बाधको नाम हेत्वाभासो यो विरुद्ध इति तार्किकैरभिधीयते । स च षड्विध इति केचित्–धर्मधर्म्युभयेषां स्वरूपस्य विशेषस्य च बाधात् । चतुर्धेति केचित्–उभयबाधस्य धर्मधर्मिबाधान्तर्गतत्वात् ।

नं विरुद्धाव्यभिचारीत्युच्यते । निगमयति । इतीति । अत्र वार्तिककारैस्त्रयः संशयहेतवः—

"तत्साध्ये तदभावे च द्वाभ्यां व्यावृत्त एव च ।
द्वौ विरुद्धार्थसम्बद्धौ यावेकत्रैकदेशिनि" (श्लो. वा. ८४)

इत्यनेन साधारणासाधारणविरुद्धाव्यभिचारिभेदात्त्रिविधा अनैकान्तिका दर्शिताः । तत्र साधारणोदाहरणानि प्रदर्श्यानन्तरं

"नित्या भूर्गन्धवत्त्वेन स्यादसाधारणस्त्वय"(श्लो.वा८६)

मित्यसाधारणोदाहरणमुक्तं नन्वसाधारणधर्मोपलब्धौ संशय एव नोपजायत इत्याशङ्क्य—

"निश्चयैकाङ्गवैकल्यादेष संशयकारण" (श्लो. वा. ८७)

मित्युक्ते ततो—

" यत्राप्रत्यक्षता वायोररूपत्वेन साध्यते ।
स्पर्शात् प्रत्यक्षता चासौ विरुद्धाव्यभिचारिता"(श्लो.वा.९२

इति तदुदाहरणमुक्तम् ।

स्वबुद्ध्या ग्रन्थकारस्य यद्धेत्वाभासवर्णनम् ।
वार्तिकव्यतिरेकेण किमर्थं तन्न वेद्म्यहम् ॥

बाधकाख्यं तृतीयं हेत्वाभासं दर्शयति । तथेति । प्रतिज्ञातार्थं बाधमानो बाधक एव विरुद्धशब्देनोच्यते इत्यर्थः । प्रतिज्ञातार्थस्य हेतुना बाधायां यो विरुद्धः स षड्विध इत्यर्थः । षड्विधत्वं विवृणोति । धर्मेति । धर्मस्वरूपबाधो विशेषबाधश्च तथोभयस्वरूपबाध उभयविशेषबाधश्चेति षोढेत्यर्थः । प्रतिज्ञा-

एकधेत्यपरे- सर्वथा समीहितधर्मविपर्ययसाधनत्वात्, इदमेव च युक्तम्, अवान्तरभेदस्यानुपयोगात्। यद्यवश्यमवान्तरभेदो वक्तव्यस्तर्हि द्वैविध्यमेव वक्तव्यम्- धर्मस्वरूपबाधनं तद्विशेषबाधनं चेति। न हि धर्मितद्विशेषबाधकत्वं नाम हेतोर्दूषणं सम्भवतीति स्वयमेव वार्तिककारेण—

" धर्मिस्वरूपबाधेन विरुद्धो योऽभिधीयते "

इत्यादिना दर्शितम्।

तथा हि- द्रव्यातिरिक्तः समवाय इहप्रत्ययहेतुत्वात् संयोगवदिति, अत्रेहप्रत्ययहेतुत्वमऽसमवायत्वेन भेदेन च व्याप्तं संयोगे दृष्टम्, समवायस्यास-

---

र्थबाधाविशेषादेक एव भेद इत्याह। एक इति। सर्वेष्वपि भेदेषु साध्यविपर्ययसाधनस्याविशेषादेक एव प्रकार इत्यर्थः। एते च धर्मस्वरूपबाधादयोभेदाः—

"नित्यत्वे कृतकत्वस्य धर्मभेदाद्विरुद्धता" (श्लो. वा. ९७)

इत्यादिना ग्रन्थेन वार्तिककारैर्दर्शितास्तत्रैवावगन्तव्याः। ग्रन्थकारोपि किञ्चित्प्रपञ्चयिष्यति। द्वैविध्यमेवाह। धर्मेति। ननु चातुर्विध्यवादिमते धर्मिस्वरूपतद्विशेषबाधस्यापि दूषणत्वात्तदेव कथं नोदाहृतमत आह। नहीति। दूषयितुं तदुदाहरणं तावदाह। तथाहीति। द्रव्यातिरिक्त इत्युपलक्षणं द्रव्यादिपञ्चकातिरिक्त इति साध्यो धर्मः अत्र प्रयोगे धर्मिस्वरूपविपरीतसाधनोऽयं हेतुः तथा संयोगे प्रतिद्रव्यं भेदेन व्याप्तिमिह प्रत्ययहेतुत्वं दृष्टं समवायस्यापि भेदमापादयत् तस्य त्रि-

मवायत्वं भेदं चापादयत् समवायधर्मिस्वरूपं तद्विशेषणं चैकत्वं बाधत इत्युदाहृतम्। तदयुक्तम्—इहप्रत्ययहेतुत्वं हि समवाये धर्मिणि दृष्टं न वा ? यद्यऽदृष्टं ततोऽसिद्धत्वान्न कस्य चिदपि साधकं बाधकं वा भवति, यदि दृष्टं तत्कथं तत्रैव दृश्यमानं तस्यैव बाधनं कुर्यात् ? विरोधे हि सति बाधेत, न च तद्धर्मतया दृश्यमानस्य कथं चिदपि तेन विरोधः सम्भवति ।

ननु समवायत्वं बाधत इत्युक्तम् ? । यदि समवायत्वं नाम समवायधर्मिणोऽतिरिक्तं ? तद्बाधेपि न धर्मिस्वरूपं बाधितं स्यात्। अथ धर्म्येव तत्र तस्य बाधकं सम्भवतीत्युक्तम् । तस्मान्न धर्मिस्वरूपबाधनं नाम हेतुदोषः क्वचित्सम्भवति, सर्वत्रादृश्यमानस्यासत्त्वात् दृश्यमानस्य चाऽविरोधात् । धर्मिविशेषणस्यैकत्वस्य कामं सम्भवति बाधो न त्वेतद् दूषणम्। यदि

शेषं सत्तावदेकत्वं वैशेषिकाभिमतं बाधते अतो विशेषविरुद्धोऽयं हेतुरिति समस्ततात्पर्यार्थः । दूषयति । तदिति । नन्वसमवायत्वेन व्याप्तत्वात् समवायस्वरूपं बाधते नेत्याह । विरोधेहीति । आश्रयाश्रयिणोर्विरोधासम्भवादित्यर्थः । धर्मबाधं शङ्कते । नन्विति । अभेदाभिप्रायेण समाधत्ते । यदीति । दूषणमुपसंहरति । तस्मादिति । उक्तमेवार्थं स्मारयति । सर्वत्रेति । कथं तर्हि वार्तिकस्य दूषणोदाहरणत्वं तत्राह । धर्मीति । तद्बाधस्य कथं चिद्धर्मिबाधे पर्यवसानादुदाहरणमिति भावः । नन्विति । वार्तिककारस्याप्येकीयमतेनोप-

खल्विहप्रत्ययहेतुत्वं समवायस्यैकत्वं विरुन्ध्यात् ततो द्रव्यातिरेकं साधयतः किं हीयते ?। न हि द्रव्यातिरेकसाधनकृतमेकत्वसाधनं यतस्तस्य दूषणत्वेन संभाव्येत। तस्माद्धर्मस्वरूपस्य तद्विशेषस्य च बाधनाद् द्विविधमेव बाधकम्। तत्र-नित्यः शब्दः कृतकत्वादिति कृतकत्वमनित्यत्वेन व्याप्तत्वान्नित्यस्वरूपमेव बाधते।

यस्तु-स्वरूपमेव शब्दानामभिधेयं नार्थान्तरमित्येतमर्थं प्रतिपिपादयिषुस्तत्सिद्ध्यर्थमेवं प्रयुङ्क्ते-अगृहीतसम्बन्धावस्थोऽपि शब्दः स्वाभिधेयमर्थं प्रतिपादयति विभक्तिमत्त्वाद् गृहीतसम्बन्धवदिति, तस्य धर्मविशेषविपर्ययसाधनो हेतुः, पश्चाद्धि सम्बन्धग्रहणाद-

---

न्यासाददूषणत्वमभिमेतमिति भावः। अदूषणत्वमेवोपपादयति। यदीति। नन्वेतत्साधयतः स्वाभिमेतं समवायैकत्वं हीयत इति चेत् तत्राह। नहीति। पूर्वोक्तं स्वाभिमतं द्वैविध्यमुपसंहरति। तस्मादिति। आद्यमुदाहरति। तत्रेति। धर्मविशेषबाधमुदाहरति। यस्त्विति। पूर्वेण सम्बन्धग्रहणादर्थवत्ता सिद्ध्यन्ती स्वरूपेणवार्थेन सिद्ध्यति न स्वरूपातिरिक्तमर्थमालम्बत इत्यभिप्रायेण यः प्रयुङ्क्ते तं प्रत्युच्यते धर्मविशेषविपर्ययसाधनोऽयं हेतुः तथाहि—सम्बन्धग्रहणानन्तरं स्वरूपातिरिक्तार्थबोधनेन सह विभक्तिमत्त्वस्य व्याप्तिदर्शनात्तद्दृष्टान्तानुसारेण प्रागपि स्वरूपातिरिक्तार्थबोधनमेव साधयेत्। प्रतिप्रयोगश्च प्राक्सम्बन्धग्रहणान्न स्वरूपार्थत्वं विभक्तिमत्त्वात् पश्चाद्वदिति समस्तार्थः। एतदेवोपपादयति। पश्चा-

स्वरूपप्रतिपादनं दृष्टमिति तद्वदेव प्रागस्वरूपार्थत्वं तेनैव हेतुना प्रसज्येत, स्वरूपप्रतिपादने च बाधितेऽर्थप्रतिपादनमपि तद्धर्मस्वरूपं बाधितमेव । नहि प्राक् सम्बन्धग्रहादर्थान्तरप्रतिपत्तिः शक्यते वक्तुं प्रतीतिविरोधादेव ।

सर्वत्र यो हेतुर्यादृग्विशेषविशिष्टेन साध्येन दृष्टान्तधर्मिषु नियतः स तादृग्विशेषविशिष्टस्य साध्यस्य धर्मिणि प्रमाणान्तरविरोधात् साधनासम्भवेन विपरीतं विशेषं नियमबलात्स्वयमेव बाधमानो निर्विशेषस्य च साध्यस्यासम्भवात् साध्यमेव न साधयति । यथा शरीरिचेतनकर्तृकत्वेन घटादिषु व्याप्तमुत्पत्तिमत्त्वं देहाङ्कुरादीनां चेतनकर्तृकत्वसाधनायोच्यमानं शरीरिणश्चेतनस्यानुपलब्धिविरोधेन साधयितुमशक्यत्वादऽशरीरस्य तेनैव हेतुना घटादिव-

---

दिति । एतदुपपादनार्थं सामान्यन्यायमाह । सर्वत्रेति । तादृशस्य साध्यस्य पक्षे साधनासम्भवे सति साध्यमेव न साधयतीत्यग्रिमेणान्वयः । असम्भवे कारणं प्रमाणान्तरविरोधादिति । साध्यासाधने हेतुः निर्विशेषस्येत्यादिः । निर्विशेषत्वमेव कथमित्याकाङ्क्षायां स्वयमेव बाधमान इति हेतुगर्भं विशेषणम् । यस्मात्तद्विपरीतं साध्यगतं विशेषमेव बाधते तस्मान्निर्विशेषमेव साध्यमित्यर्थः । बाधकत्वे हेतुः नियमबलादिति । अन्येन सह नियतत्वात्तद्विपरीतं बाधत इत्यर्थः । अत्र दृष्टान्तमाह । यथेति । उत्पत्तिमत्वं देहाङ्कुरादीनां चेतनकर्तृकत्वसाधनायोच्यमानं चेतनकर्तृकत्वमेव न साधय-

न्निवारणाद् विधाद्वयशून्यस्य चेतनस्यासम्भवाच्चेतनकर्तृकत्वमेवाङ्कुरादीनां न साधयति । तेन धर्मविशेषविरोधो हेतोः साध्यसिद्धिमेव निरुणद्धीति भवति दूषणम् । धर्मिविशेषविरोधस्तु साध्याविरोधित्वान्न दूषणं, प्रत्युत सिद्धान्तान्तरदूषणत्वात् प्रतिवादिन एव निग्रहस्थानत्वाद् दूषणं तद्भवति न वादिनः ।

यस्तु दृष्टान्तपरिदृष्टसाध्यविशेषविरोधसम्भवेऽपि तद्रहितं साध्यमात्रं हेतुः साधयत्येव, तच्च विशेषान्तरमाक्षिप्य सिद्ध्यतीति वदति, तस्य—उष्णाग्निनियतस्तृणादिविकारो हिमे दृश्यमानः शैत्यप्रत्यक्षवि-

---

तीति सम्बन्धः । कथं न साधयतीत्यत्राह । विधेति । शरीर्यशरीरो वा द्विविधश्चेतनो दृष्ट अङ्कुरादिर्नाशरीरकर्तृकः उत्पत्तिमत्त्वात् घटादिवदिति निवारणादित्यर्थः । फलितमाह । तेनेति । ततः किमत आह । इतीति । धर्मी समवायस्तद्विशेष एकत्वं तद्बाधस्य साध्याविरोधित्वं पूर्वोक्तमेवानुसन्धेयम् । प्रत्युतेति । द्रव्यातिरिक्तः समवाय इत्येवं साधयतो वादिनो नैतद्दूषणं साध्यसिद्धेरप्रत्यूहत्वात् प्रत्युत विशेषबाधं हेत्वाभासत्वेनोद्भावयतः प्रतिवादिन एव दूषणं भवति निग्रहस्थानत्वादित्यर्थः । मतान्तरमनुवदति । यस्त्विति । इति वदतीत्यनेन सम्बन्धः । तद्रहितं—महानसीयत्वादिविशेषरहितम् । कथं तर्हि पर्वतीयवन्हिसिद्धिरत आह । तच्चेति । सामान्यस्य विशेषमन्तरेणासिद्धेर्महानसीयत्वादिविशेषस्य बाधात् पर्वतीयत्वादिविशेषान्तरमाक्षिप्य सिद्ध्यतीत्यर्थः । तदेतद्दूषयति । तस्येति । हेतुदूषणमुपसंहरति ।

रोधादौष्ण्यासम्भवेऽप्यनुष्णमेवाग्निं साधयेत्, तस्माद्धर्मिविशेषविपर्ययसाधनत्वं हेतोरदूषणमेव ।

उदाहरणं द्विविधम्—साधर्म्योदाहरणं वैधर्म्योदाहरणं च । साधर्म्यम्—लिङ्गमुद्दिश्य लिङ्गिन उपादानम्—यो यो धूमवान्महानसादिः स सर्वोऽग्निमान् दृष्ट इति, सम्यगुक्ते च साधर्म्ये न वैधर्म्यं वक्तव्यं गतार्थ-

---

तस्मादिति । हेत्वाभासान् प्रदर्श्य सम्प्रति ज्ञातसम्बन्धपदव्यावर्तितानेव दृष्टान्तदोषान् दर्शयितुं दृष्टान्तवचनं प्रस्तौति । उदाहरणमिति । साधनस्य साध्येन सह व्याप्तिप्रतिपादनाय दृष्टान्तद्वयं प्रयोक्तव्यमित्यर्थः । साधर्म्यदृष्टान्तं लक्षयति । साधर्म्यमिति । यदुद्देशेन यदुपादीयते तस्य तेन व्याप्तिः कथिता भवतीति भावः । उद्दिश्यमानं च यद्वृत्तयुक्तं प्रथमं प्रयोक्तव्यं उपादीयमानं च तद्वृत्तैवकाराभ्यां पश्चात् । यथाऽऽहुः—

"यद्वृत्तयोगः प्राथम्यमित्याद्युद्देशलक्षणम्"।
तद्वृत्तमेवकारश्च स्यादुपादेयलक्षणम्"। (श्लो. वा. ११०)

ननु यथा तथा वा रचितं वाक्यं वक्तुर्विवक्षितं प्रतिपादयत्येव किं रचनाविशेषेणेति चेत् । न । शब्दानां स्वशक्त्यनुसारेणार्थावबोधकत्वात् नहि शब्दा वक्तुरभिप्रायमनुरुद्ध्यन्ते अतोऽवश्यमादर्तव्य एव रचनादिविशेषः । यत्र यत्र धूमस्तत्र तत्राग्निरित्युक्ते साधर्म्यमात्रादेवाग्निना धूमस्य व्याप्तिरवगता किं वैधर्म्येणेत्यभिप्रायवानाह । सम्यगिति । अर्थाद्वैधर्म्यस्य ज्ञातुं शक्यत्वादिति भावः । अथवा सम्यक्प्रयुक्ते साधर्म्ये यस्तु भ्रान्त्या विपक्षव्यतिरेकं न प्रति-

त्वात्। यदा वक्तव्यमापति तदा लिङ्ग्यभावमुद्दिश्य लिङ्गाभावोपादानम्—यत्राग्निर्नास्ति तत्र धूमोऽपि नास्ति यथा तोयादिष्विवति। यत्र भावेन भावः साध्यते तत्रैव विधिरूपं साधर्म्यं तत्प्रतिषेधरूपं च वैधर्म्यम्। यत्र तु मेघाभावादिना वृष्ट्याद्यभावः साध्यते तत्र साधर्म्यमेव प्रतिषेधरूपं यथा—यदा यत्र मेघोत्पत्तिर्नास्ति तदा तत्र वृष्टिर्नास्तीति। वैध-

---

पद्यते अवगतेऽपि वा सपक्षान्वये विपक्षव्यतिरेकाकाङ्क्षायां साधर्म्यं नापेक्षते तदा विपक्षव्यतिरेकसिद्धये वैधर्म्यमपि प्रयोक्तव्यमित्यभिप्रायेणाह। यदेति। कथं च तत् प्रयोक्तव्यमत आह। लिङ्ग्यभावमिति। तदुक्तम्—

"व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते।
तयोरभावयोस्तस्माद्विपरीतः प्रतीयते" (श्लो.वा. १२१)

ननु तदा वैधर्म्यादेव व्यतिरेकसिद्धेः किं साधर्म्येण। मैवम्। असाधारणे विपक्षव्यतिरेकदर्शनात् तन्निवृत्तये सपक्षान्वयप्रतिपत्तिफलत्वेन साधर्म्योपयोगात्। वस्तुतस्तु साधारणेऽन्वयदर्शनादसाधारणे च व्यतिरेकदर्शनादुभयनिवृत्त्यर्थं द्वयमप्यपेक्षितव्यम्। ननु यथा शुक्लः पट इत्युक्ते ऽनीलादिव्यवच्छेदेनैव शुक्लादीनां विशेषणत्वं उपादीयमानस्य प्रसक्तिविरोधिव्यवच्छेदपरत्वात् तथा पर्वतोऽग्निमानित्युक्ते ऽग्न्यभावस्यैव निवृत्तिर्भविष्यति नान्यस्येति न वैधर्म्यमपि प्रयोक्तव्यम्। मैवम्। शुक्लादिवदत्र वह्नेरनिश्चितत्वात् निश्चितत्वे वा साध्यत्वानुपपत्तिः अतस्तन्निश्चयार्थं वैधर्म्यस्याप्युपयोग इति। नन्वभावसाधनके नैवंरूप-

र्म्यं तु विधिरूपम्-यत्र वृष्टिरस्ति तत्र मेघोत्पत्तिरस्तीति । तेन शाक्यभिक्षुणोक्तम्-" प्रसज्यप्रतिषेधात्मकमेव वैधर्म्यम् " इति तदनादरणीयम् ।

साधर्म्याऽऽभासाश्च-साध्यविकलत्वादयः, वैधर्म्याभासाश्च-साध्याभाववैकल्यादयो वार्तिक एव द्रष्टव्या इति ।

ताऽस्तीत्याशङ्क्याह । यत्रेति । ततश्चैतदपि निरस्तमित्याह । तेनेति । विधिरूपस्यापि वैधर्म्यस्य दर्शनादित्यर्थः । ननु हेत्वाभासवदुदाहरणलक्षणरहिता दृष्टान्ताभासा अप्यप्रयोगाय प्रदर्शनीयास्तत्राह । साधर्म्याभासाश्चेति । नित्यो ध्वनिरमूर्तत्वात् कर्मवत् परमाणुवदित्यादि वार्तिके द्रष्टव्याः । अनतिप्रयोजनत्वाद्धेत्वाभासेऽन्तर्भूतत्वाच्च न मयाऽत्र प्रदर्शिता इति भावः । उक्तं चान्यत्र—

" साधारणो विरुद्धो वा दृष्टान्ते साध्यवर्जिते ।
असाधारणता हेतोस्तस्मिन् साधनवर्जिते" इत्यादि ।

नित्यः शब्दोऽमूर्तत्वात् कर्मवदिति प्रयोगे साध्यविकलो दृष्टान्तः, परमाणुवदिति साधनविकलः, घटवदित्युभयविकलः, आकाशस्य च दृष्टान्तत्वे तत्रामूर्तत्वानित्यत्वे सत्यपि कर्मादौ नित्यत्वाभावे ऽप्यमूर्तत्वदर्शनाद्व्याप्तिशून्यतेत्यादि तत्रैव द्रष्टव्यम् । तथा—

"यत्राप्यर्थस्य शून्यत्वं द्वाभ्यामेकेन वा भवेत् ।
यदनित्यन्तु तन्मूर्तमणुवद्बुद्धिवत् खवत् "

इत्यादिना वैधर्म्याभासा दर्शितास्तत्रैवाऽवगन्तव्याः । अत्र भाष्यं—

"तत्तु द्विविधम्" (शा. भा.) इति दृष्टस्वलक्षणविषयमेवानुमानमिति मन्वानान् निराकर्तुमऽदृष्टस्वलक्षणविषयमप्यनुमानं क्रियादिविषयमस्तीति दर्शयितुं द्वैविध्याभिधानम् । न हि क्रियास्वलक्षणं प्रत्यक्षेण कदाचिद् गृह्यते पूर्वोत्तरदेशसंयोगविभागमात्रस्य प्रत्यक्षेण ग्रहणम्, ताभ्यामेवाऽऽगन्तुकाभ्यामागन्तुकं कारणमनुमीयते, तच्च क्रियेत्युच्यते ।

"तत्तु द्विविधं प्रत्यक्षतो दृष्टसम्बन्धं सामान्यतो दृष्टसम्बन्धं च, प्रत्यक्षतोदृष्टसम्बन्धं यथा धूमाकृतिदर्शनादग्न्याकृतिविज्ञानम् । सामान्यतोदृष्टसम्बन्धं यथा देवदत्तस्य गतिपूर्विकां देशान्तरप्राप्तिमुपलभ्यादित्यगतिस्मरणमिति" (शा० भा०) । अत्र यथैव धूमत्वाग्नित्वयोः प्रत्यक्षत्वेन महानसादौ प्रत्यक्षो दृष्टः सम्बन्धस्तथैव देवदत्तादौ चलतीति प्रत्यक्षालम्बनत्वेन गमनस्य प्रत्यक्षत्वात् देशान्तरप्राप्त्या सह प्रत्यक्षदृष्ट एव सम्बन्ध इति द्वैविध्यवचनमनुपपन्नम् । आदित्येऽनुमेयत्वादप्रत्यक्षतेति चेत् एतदपि पर्वतादावग्नित्वस्याप्यनुमेयत्वात्तुल्यम् । अथ देवदत्तादौ गतिप्राप्त्योः सामान्यतः प्रत्यक्षेण सम्बन्धमुपलभ्याऽऽदित्ये देशान्तरप्राप्तिदर्शनेन गत्यनुमानं सामान्यतोदृष्टसम्बन्धमित्युच्यते एतदप्यग्निधूमयोर्महानसादौ सामान्यत एव सम्बन्धदर्शनादविशिष्टमिति द्वैविध्याभाव इत्याशङ्कां निराकर्तुमाह । तत्तु द्विविधमिति । ननु चलतीति प्रत्ययात् प्रत्यक्षमेव क्रियास्वरूपं नेत्याह । नहीति । चलतीति प्रत्ययस्य संयोगविभागमात्रालम्बनत्वमिति

ननु द्रव्यमेव कारणं स्यात्?, न, तस्य प्रागपि सद्भावात् ।

ननु क्षणान्तरेऽन्यद् द्रव्यं सर्वसंस्काराणां क्षणिकत्वात्, सादृश्यात्तु प्रत्यभिज्ञानम् । तत् यदा समानदेशे पूर्वपूर्वमुत्तरोत्तरमारभते तदा तिष्ठतीति लक्ष्यते । यदा त्वनन्तरदेशे पूर्वपूर्वमुत्तरोत्तरमारभते तदा गच्छतीति लक्ष्यते । दीपगमनवच्छायागमनवच्च सदृशापरापरक्षणानामुत्तरोत्तरदेशप्रारब्धानां गमनावभासनिमित्तत्वात् कृतं क्रियया । किं चानुत्पन्नस्य क्षणस्य क्रियाश्रयत्वायोगात्, उत्पन्नस्य च विनाशग्रस्तत्वात् कथं क्रियारम्भत्वम्? । यथाहुः—

"क्षणिकाः सर्वसंस्काराः, अस्थिराणां कुतः क्रिया" इति । तदिदं शब्दाधिकरणे निराकरिष्यामः । ततः स्थिरत्वे सति तन्मात्रेणानुपपत्तेः क्रियानुमानं

भावः । अन्यथासिद्धिं शङ्कते । नन्विति । तदाधारभूतं द्रव्यमेव संयोगविभागकारणं न तु तदतिरिक्ता क्रियेत्यर्थः । प्रसिद्धक्लृप्तकारणपरित्यागेनाप्रसिद्धकल्पना निष्प्रमाणिकेति भावः । परिहरति । नेति । प्रागपि सद्भावान्नागन्तुकं कारणद्रव्यमित्यर्थः । आश्रयस्य समवायिकारणत्वेऽप्यसमवायिकारणं क्रिया भविष्यतीति भावः । क्षणिकत्वाभ्युपगमेन द्रव्यस्याप्यागन्तुकत्वमिति शङ्कते । नन्विति । ननु द्रव्याणामेकरूपत्वे कथं तिष्ठति चलतीति प्रतीतिवैलक्षण्यमत आह । तद्यदेति । शङ्कानिराकरणं प्रतिजानीते । तदिदमिति । स्थिरत्वे वा कथं क्रियासिद्धिरत आह । तत इति ।

युक्तमिति।

न युक्तम्-कार्यं हि कारणमात्रमपेक्षते तच्चेह दृष्टमेवास्ति-प्रयत्नविशेषानन्तरं हि शरीरे देशसंयोगविभागाख्यं फलमुत्पद्यमानमुपलभ्यते ततः स एव निमित्तम्। तद्वदात्मशरीरसंयोगश्चाऽसमवायि शरीरं च समवायीति किमत्राऽदृष्टकारणानुमानेन?।

नन्वऽसमवायिकारणभूतस्य संयोगस्य स्वाश्रये स्वाश्रयसमवेते वा कार्यं नान्यत्र, तन्तुसंयोगानामिव स्वाश्रयेषु तन्तुषु पटः, तन्तुतुरीसंयोगस्य वा पटतुरीसंयोगः। प्रयत्नवदात्मसंयोगस्त्वऽनेवंविधे व्योम्नि कथं संयोगमारभते? अतः कारणान्तरं कल्पनी-

---

आश्रयद्रव्यमात्रेण कादाचित्कयोः संयोगविभागयोरनुपपत्तेरित्यर्थः। क्रियानुमानं चैवं विमतौ संयोगविभागौ प्रत्युत्पन्नकारणजौ कादाचित्ककार्यत्वात् दारुद्वैधीभाववत् स हि कुठारदारुसंयोगविभागजन्यः पक्षे तु माक्रियैव प्रत्युत्पन्नकारणमिति। तदेतत् दूषयति। न युक्तमिति। स एव—प्रयत्नविशेष एव दृष्टं कारणमित्यर्थः। एतेनार्थान्तरत्वमनुमाने दर्शितम्। असमवायिकारणं कर्मेति चेत् तत्राह। तद्वदिति। बहिरङ्गत्वादकारणत्वं शङ्कते। नन्विति। पटः कार्यमिति सम्बन्धः। अनेवंविधे अस्वाश्रये अस्वाश्रयसमवेते चेत्यर्थः। कारणान्तरं– कर्माख्यं अतो न प्रयत्नवदात्मसंयोगेनार्थान्तरत्वमिति भावः। एवं च सति यदेकार्थसमवायिनौ संयोगविभागौ यस्मिँश्च सति

यमिति चेत् ?, न तन्तुसंयोगः स्वाश्रय एव पटमारभते पटस्य बहुतन्तुव्यापित्वात्, संयोगानां च द्वयोर्द्वयोरेव वृत्तेः ।

किं च शरज्यासंयोगान्नोदनाख्याद् युगपदेव शरे शरावयवेषु च सर्वेष्वन्तर्बहिर्वर्तिषु बहूनि कर्माण्युत्पद्यन्ते, तत्र येषामवयवानां ज्यासंयोगो नास्ति तेष्वस्वाश्रयेषु स्वाश्रयाऽसमवेतेषु च ज्यासंयोगः कर्माऽऽरभते इति व्यभिचारः । नहि ते संयोगाश्रयीभूते शरे समवेताः शरस्यैव तेषु समवायात् ।

किं च प्रयत्नवदात्मसंयोगानन्तरं युगपदेव हस्ते प्रयत्नवदात्मसंयुक्ते तत्संयुक्ते चाङ्गदेऽङ्गुलीयके च तल्लग्ने मणौ च कर्मोत्पद्यते, अथैवमादिषु न नोदनात् न प्रयत्नवदात्मसंयोगाद्वा कर्मोत्पत्तिः, किं तु संयुक्तसंयोगादित्युच्यते, ज्यासंयुक्तावयवसंयोगात्तदनन्तरावयवे तत्संयोगाच्च तदनन्तरे।तथाऽऽत्मसंयोगाद्धस्ते, तत्संयोगादङ्गदे, तत्संयोगान्मणावपीति । एवं तर्ह्य-

---

नियमेन तदुत्पत्तिस्तत् कर्मेति नार्थान्तरत्वमित्युक्तं भवति । परिहरति । नेति । कथं च न स्वाश्रय एव पटमारभतेऽत आह । पटस्येति । संयोगस्य स्वाश्रये तन्तुद्वये बहुतरतन्त्वाश्रितपटानारम्भकत्वमिति भावः । इतश्चैवमित्याह । किञ्चेति । तेषु— अवयवेषु अस्वाश्रयेषु— ज्यासंयोगानाश्रयेषु । स्वाश्रयासमवेतत्वं विवृणोति । नहीति । ते—अवयवाः । इतोऽप्येवमित्याह । किं चेति । यदि संयुक्तसंयोगात् तत्रोपपत्तिः तर्ह्यत्रापि तथेत्याह । एवमिति । एतेन— अ-

त्रापि शक्यते वक्तुम्-प्रयत्नवदात्मसंयुक्तशरीराकाशसंयोगाच्छरीराकाशदेशविभागस्तत्संयोगाच्च तदनन्तरदेशसंयोग इति दृष्टेनैव संयोगेन संयोगविभागसिद्धेर्न कर्मकल्पनाऽवकल्पते।

किं च न संयोगस्यैवायं धर्मः, सर्वाण्येवाऽसमवायिकारणानि स्वाश्रये स्वाश्रयसमवेते वा कार्यमारभन्ते नान्यत्र। ततश्च कर्माप्यसमवायिकारणत्वेनानुमीयमानं वियति विहङ्गमे चोभयत्रानुमीयेत? न हि विहगकर्मणा वियति कार्यं संभवति, ततश्च वियत्यपि चलतीति बुद्धिः स्यात्, अतो नानुमेयं कर्म। किमिदानीं नास्त्येव क्रियातत्त्वम्?। अस्ति प्रत्यक्षावगमात्।

ननु संयोगविभागातिरिक्तं न किं चिदत्र?। दृश्यते हि सर्पति सर्पे भूमेः सर्पस्य च द्वयोर्मिथः संयोगविभागाऽविशेषेऽपि सर्पमेव चलतीति बुद्धिरालम्बते न भूमिम्। अतोऽस्या बुद्धेरालम्बनमस्ति सर्पे चलनं नाम तत्त्वम्। यद्भावाभावाभ्यां सर्पभूम्योश्च-

---

नेवंविधेभ्योऽग्नि कथं संयोगमारभत इति यदुक्तं तत्परिहृतम्। इतो ऽपि न कर्मकल्पनेत्याह। किञ्चेति। आकाशे परिस्पन्दासम्भवात् विहङ्गस्थेन तत्र संयोगविभागौ वाच्यौ तच्च न सम्भवतीत्याह। न हीति। विहङ्गे तु क्रियायाः प्रत्यक्षत्वादेव नानुमानमिति भावः। अज्ञाताशयः पृच्छति। किमिति। आशयमुद्घाटयति। अस्तीति। अत्र चोदयति। नन्विति। परिहरति। दृश्यत इति। दूषण-

लतीतिबुद्धेर्भावाभावावित्यङ्गीकार्यम् । न चेयमानुमानिकी संभवतीत्युक्तम् । तस्मान्नैवमभिप्रायमिदं भाष्यं, किं तु विशेषविषयं सामान्यविषयं चानुमानमित्यनुमानस्य विषयप्रपञ्चार्थम् ।

येऽपि मन्यन्ते—

"विशेषेऽनुगमाभावः सामान्ये सिद्धसाध्यता"

मुपसंहरति । तस्मादिति । सम्प्रति यथावार्तिकं समाधत्ते । किन्त्विति । विषयप्रपञ्चार्थं भाष्यमिति पूर्वेणान्वयः । यत्र विशेषयोरेव प्रत्यक्षेण सम्बन्धो गृह्यते तद्विशेषविषयं प्रत्यक्षतो दृष्टसम्बन्धमित्युच्यते यत्र च सामान्ययोः प्रत्यक्षेण सम्बन्धो गृह्यते तत्सामान्यविषयं सामान्यतो दृष्टमित्युच्यते इत्यर्थः । तथाहि यस्मिन्नेव धर्मिणि गोमयेन्धनाग्निविशेषतज्जन्यधूमविशेषयोः सम्बन्धग्रहणं तस्मिन्नेव कालान्तरे धूमविशेषदर्शनेन पुनः सन्दिह्यमानसद्भावस्य यदग्नेरनुमानं तत्प्रत्यक्षदृष्ट सम्बन्धं भाष्यकारस्याभिप्रेतमिति । ननु प्रत्यक्षावगताग्निविशेषविषयस्यानुमानस्य कथं प्रामाण्यं ? पूर्वबोधात् कालान्तराधिक्येनेति ब्रूमः । ननु यदि विशेषयोरेवानुमानं कथं तर्हि भाष्ये धूमाकृतिदर्शनादित्याकृतिग्रहणं ? आकृत्योरेव हेतुसाध्यव्यवस्थापर्यवसानादिति ब्रूमः । तर्हीदमेव विशेषानवच्छिन्नं सामान्यतोदृष्टोदाहरणं दातव्यं किमादित्योदाहरणेन । सत्यम् । तथापि विशेषतोदृष्टासङ्कीर्णानिःसन्दिग्ध सामान्यतोदृष्टप्रदर्शनार्थमादित्योदाहरणम् । प्रसङ्गान्मतान्तरनिराकरणं दर्शयति । येऽपीति । अनेनेत्यस्यार्थे विवृणो-

इति, तेऽनेन निराक्रियन्ते, उभयोरपि विषयत्वोपपत्तेः । यत्र विशेषस्यैवानुगमस्तत्र विशेषविषयत्वम्, सामान्यानुगमे तु सामान्यविषयत्वम् । न च सिद्धसाध्यत्वम्, देशान्तरकालान्तरसम्बन्धस्याऽगृहीतस्य ग्रहणादिति प्रागेव वर्णितम् ॥

॥ इत्यनुमानपरिच्छेदः ॥

ति । उभयोरिति एतदेव दर्शयति । यत्रेति । ननु सामान्यस्यावस्तुत्वेन प्रत्यक्षागोचरत्वात् कथं धूमाकृतिदर्शनादग्न्याकृतिज्ञानं प्रत्यक्षदृष्टसम्बन्धतो । नैष दोषः । सामान्यस्य प्रत्यक्षविषयत्ववस्तुत्वयोः प्रामाणिकत्वात् । तथाहि धूमादग्निज्ञानं वस्त्वालम्बनमभावान्यत्वे सति प्रमाणत्वात् स्वार्थे श्रोत्रबुद्धिवत् । तथा सामान्यं वस्तु प्रत्यक्षग्राह्यं च तत् अभावान्यत्वे सति प्रमेयत्वात् स्वलक्षणवदिति । अनुमानैकसमधिगम्ये तु सामान्ये विशेषेऽनुगमाभावात् सामान्यमेव सर्वत्र लिङ्गं ततश्च लिङ्गभूतसामान्यग्रहणाय पुनरप्यपेक्षणादनवस्थापत्तेरनुमानव्यवहारोच्छेदप्रसङ्ग इत्यलं प्रसङ्गेन । वस्तुतस्तु सर्वत्र सामान्यविषयमेव प्रत्यक्षं गवादि स्वलक्षणस्यावयवित्वेन स्वावयवापेक्षया सामान्यरूपत्वात् । अथ द्रव्यमपन्हुत्य रूपादीनामेव प्रत्यक्षत्वमुच्यते तदाऽपि रूपविशेषान् नीलपीतादीनुपेक्ष्य सामान्यमेव । एवं सर्वमपि वस्तु स्वस्वविशेषापेक्षया सामान्यमेव द्व्यणुकस्यापि परमाणुद्वयसाधारणत्वात् सामान्यरूपतेति न कचिद्विशेषविषयता प्रत्यक्षस्य । यथाऽऽहुः—

"रूपादयोऽपि सामान्यं सर्वे नीलाद्यपेक्षया ।
स्वविशेषानपेक्ष्याथ नीलादीनां समानता ॥
ते चापि तावत्सामान्यं यावत्स्युः परमाणवः ।

घणुकस्यापि यद्रूपं तत्तु साधारणं द्वयोः"(श्लो. वा. अ. १७६)

अथ देवदत्तोऽयमिति प्रत्यक्षस्य परमाणव एवालम्बनं ते चाऽन्त्या विशेषा एवेति विशेषविषयता प्रत्यक्षस्य। तत्रोच्यते। किं परमाणवः समुदिताः प्रत्येकं वाऽऽलम्बनं, नान्त्यः स्थूलप्रतिभासात्। नाद्यः तत्समुदायस्यैकरूपत्वेन घटशरावादिबुद्धिप्रमेयवैलक्षण्याभावप्रसङ्गात् परस्परभिन्नानां च परमाणूनामभिन्नसंवेदनग्राह्यत्वानुपपत्तेः समुदायिव्यतिरेकेण समुदायस्यानङ्गीकाराच्च। किञ्च व्यवहाराविसंवादितया प्रत्यक्षानुमानयोः प्रामाण्यं, नचान्त्यैः परमाणुभिर्व्यवहारः सम्भवत्यतीन्द्रियत्वात्। तस्माद्देवदत्तोऽयमिति विज्ञानं परमाणुकार्यमवयव्याख्यमभिन्नं स्थूलमालम्बते तथा प्रतिभासात् तच्च स्वाश्रयेषु व्यासज्य वर्तमानत्वात्सामान्यमेवेति सामान्यविषयता प्रत्यक्षस्येति, असाधारणविषयत्वेऽपि वा प्रत्यक्षस्योच्यमाने धूमाकृतेः प्रत्यक्षदृष्टता नैवापैति सत्ताद्यपेक्षया धूमत्वस्यापि विशेषरूपत्वात्। अथ सामान्यमित्येवं प्रतिभासाभावेन सामान्यस्याग्रहणमित्युच्येत ? तर्ह्यसाधारणमित्येवं प्रतिभासाभावेन स्वलक्षणस्याप्यग्रहणप्रसङ्गात्। यथाऽऽहुः—

"सत्तादिसामान्यमपेक्ष्य सर्वं गोत्वाद्यसाधारणतामुपैति।
तस्मादसाधारणमक्षगम्यं वदन्न सामान्यमपन्हुवीत॥
सामान्यरूपेण न गृह्यते चेत् किंवाऽस्त्यसाधारणबुद्धिरत्र।
यद्वस्तु लोकः प्रतिपद्यतेऽत्र द्विधापि तच्छक्यत एव वक्तुम्"
[श्लो. वा. अ. १७७]

॥ इत्यनुमानवादः॥

" शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानम् " (शा. भा.) इति,

---

इदानीं क्रमप्राप्तं शब्दप्रमाणनिरूपणमारभते । शास्त्रमिति । ननु प्रत्यक्षलक्षणवद्व्यभिचारशङ्कानिवृत्तये शब्दमात्रस्यैवात्र लक्षणं कर्तव्यं न तद्विशेषस्य शास्त्रस्य, न च सामान्यलक्षणं विना विशेषलक्षणं कर्तुमपि शक्यते अतिव्यापकं चैतल्लक्षणं शब्दमात्रसाधारणत्वात् । तथाहि—"विज्ञाताच्छब्दादसन्निकृष्टेऽर्थे यद्विज्ञान"मिति शब्दमात्रस्यैवतल्लक्षणं नतु तद्विशेषस्य शास्त्रस्य । शास्त्रलक्षणं तु—

"प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा ।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते" [श्लो. वा. श. ४] इति ॥

नन्वेतास्मिन्नपि लक्षणे स्वरूपप्रतिपादकस्य सोऽरोदीदित्येवमादेरशास्त्रत्वं स्यात् । मैवम् । विध्येकवाक्यतया तेषामपि शास्त्रत्वोपपत्तेः । ननु विध्यङ्गत्वेऽपि प्रवर्तकत्वाभावात्कथं शास्त्रत्वं प्रत्ययस्यैव प्रवर्तकत्वात् पदस्यापि शास्त्रत्वं न सिद्ध्यति न तरां विध्युद्देशवर्तिनां पदान्तराणां, दूरेऽर्थवादानां शास्त्रत्वमिति । नैष दोषः । येन हि पुरुषः प्रवर्त्यते तत्प्रवर्तकं स च त्र्यंशपूरितायां सप्ररोचनायां भावनायां प्रवर्तते तादृशी च सार्थवादकेन वाक्येन समर्प्यत इति तद्युक्तस्यैव प्रत्ययस्यैव शास्त्रत्वम् । अत्रोच्यते । अत्र परीक्षाव्याजेनापि शब्दविशेषस्य शास्त्रस्यैव लक्षणं वक्तुमुचितं चोदनोपदेशशब्दाभ्यां तस्यैव प्रस्तुतत्वात् । वेदोपयोगित्वेन च लक्षणानि कर्तव्यानि । शास्त्रलक्षणं च वेदोपयोगिनः शास्त्रस्य लक्षणं, न हि लौकिकवाक्य-

विज्ञाताच्छब्दात् पदार्थाभिधानद्वारेण यद्वाक्यार्थविज्ञानं तच्छाब्दं नाम प्रमाणम्, तल्लोकसिद्धत्वान्न परीक्षितव्यम् । तच्च द्विविधम्—पौरुषेयमपौरुषेयं चेति । तत्र पौरुषयेम्—आप्तवाक्यम् । अपौरुषेयं

लक्षणं वेदप्रामाण्ये तदर्थविचारे वा उपयुज्यते, प्रत्यक्षमात्रस्य तु शास्त्रस्वरूपावधारणद्वारा तदर्थविचारेऽस्त्युपयोगः शास्त्रावगतौ हि तदर्थावधारणं भवति । अनुमानादेरपि विश्वजिता यजेत स्वर्गकामः प्रकृतिवदिति प्रकृतिविशेषगताङ्गयत्तावधारणे ऽस्त्युपयोग इति सामान्यलक्षणमनेनैवार्थात्सिद्ध्यतीति पृथङ्नोक्तम् । यदा हि प्रवर्तकं वाक्यं शास्त्रमित्युक्तं तदाऽर्थात्प्रवर्तकविशेषणरहितं वाक्यमात्रं शाब्दमित्युक्तं भवति । नाप्यतिव्यापकं शब्दशब्देन चोदनाया एवाभिधानात् । तस्या एव चोदनासूत्रे प्रकृतत्वात् । अर्थशब्देनापि धर्माधर्मयोराभिधानं, ततश्चायमर्थः विधायकशब्दविज्ञानादसन्निकृष्टेऽर्थे धर्माधर्मलक्षणे विज्ञानं शास्त्रमिति । ग्रन्थकारस्तु विशेषलक्षणस्यान्तर्गतिं मत्वा सामान्यलक्षणत्वेनैव व्याचष्टे । विज्ञातादिति । अयमाशयः—यदि लोकवेदसाधारण्येनैव शाब्दं लक्षणतोऽनुमानात् प्रमाणान्तरत्वेन निरूप्येत तदैव वेदप्रामाण्यं सिद्ध्यति, नान्यथेति । यथाऽहुः—

"तस्माल्लक्षणभेदेन यदि शब्दप्रमाणता ।
समा लोके च वेदे च सिद्धा वेदप्रमाणता" [श्लो. वा. शब्द. ५१] इति ॥

विभजते । तच्चेति । न चौलूक्यादिभिरस्याऽनुमानेऽन्तर्भावाङ्गीकारात् अनुमानलक्षणेनैव लक्षितत्वात् पृथक् लक्षणं न कर्तव्यमित्याशङ्कां निराकर्तुं तन्मतमनुवदति । इदं चेति । इदं

च-वेदवाक्यम् । उभयमप्यनाप्तप्रणीतत्वदोषविरहात् स्वतश्च शब्दस्यादुष्टत्वात् प्रमाणम् ।

तच्च पुनर्द्विविधम्-सिद्धार्थं विधायकं चेति । विधायकमपि द्विविधम्-उपदेशकमतिदेशकं च । इत्थमिदं कर्तव्यमित्युपदेशः यथा लोके-दधिघृतसूपशाल्यादिभिर्देवदत्तो भोजयितव्य इति । वेदेऽपि- प्रयाजावघातादिप्रकारेण दर्शपूर्णमासाभ्यां स्वर्गं कुर्यादिति । तद्वदिदं कर्तव्यमित्यतिदेशः, यथालोके-देवदत्तवद् यज्ञदत्तो भोजयितव्य इति । वेदेऽपि सौर्येण कुर्याद् यथाऽऽग्नेयेनेति ।

शब्दान्तरादिभिः श्रुतिलिङ्गादिभिः श्रुत्यर्थादिभिश्च विचित्रोऽयमुपदेशो भेदविनियोगक्रमानऽवबोधयति । वचननामधेयचोदनालिङ्गैश्चातिदेशोऽन्यत्र विहितस्य नानापदार्थविशिष्टस्य प्रकारस्य तत्प्रतिपादकस्य वा शास्त्रस्य विध्यन्तापरनामधेयस्यान्येन सम्बन्धं विकारं बाधं वा बोधयतीत्यूहनीयम् ।

असन्निकृष्टग्रहणं च पूर्ववत्ताद्रूप्यतद्विपर्ययपरिच्छेदनिरासार्थम् । एकदेशिनां तु तदनर्थकमेव स्यात् । विपरीतपरिच्छिन्ने तावन्नास्त्येव शब्दाज्ज्ञानम्, यदि स्यात् पुरुषदोषाणां शब्दे सङ्क्रान्त्यनभ्युपगमात् स्वाभाविकमेव शब्दस्याप्रामाण्यं स्यादिति वेदाप्रामाण्यं स्यात् ।

यदि परं तद्रूपपरिच्छिन्नविषयस्याऽनुवादस्य निरासः स्यात् ?, तच्चायुक्तम्, तस्यापि शास्त्रत्वात्; न हि कस्याप्यप्रामाण्यम्, अनुभूतित्वात् । प्रत्यक्षा-

यन्तर्भावाऽभावाच्च शास्त्रत्वमेवेत्यास्तां तावत् ।

इदंच शाब्दम्-'अस्येदं कारणं कार्यं सम्बन्ध्येकार्थसमवायि विरोधि चेति लैङ्गिकम्' (वैशे. सू.) इत्यनुमानलक्षणमभिधाय "एतेन शाब्दं व्याख्यातम्" (वैशे. सू.)। इति वदन्तः काश्यपीयाः, 'प्रत्यक्षमनुमानं च द्वे एव प्रमाणे' इति ब्रुवाणाः सौगताश्चानुमानादभिन्नमिति मन्यन्ते। तत्र यस्तावत् पदार्थज्ञानं तदऽवगतार्थ-

---

च शाब्दं अनुमानादभिन्नं मन्यन्त इति सम्बन्धः । तदेतद्दूषयति । तत्रेति । ननु द्विविधं शाब्दं पदं च वाक्यं च, तत्र यद्यपि पदं स्मारकत्वादप्रमाणमसन्निकृष्टग्रहणेन व्यावर्तितमिति न तस्य भेदः प्रतिपादनीयः तथापि परैः पदे एवानुमानादभेदः प्रतिपादित इति तद्भेद एव साधयितुमुचितः किमिदमुच्यते किं तस्य भेदाभेदपरीक्षयेति । सत्यम् । किन्तु वार्तिककारैरेव

"विषयोऽन्यादृशस्तावत् दृश्यते लिङ्गशब्दयो" [श्लो. वा. श. ९९]

रित्यादिना महता प्रबन्धेन विषयभेदेन सामग्रीभेदेन च पदात्मकस्य भेदो निरूपितस्तत्रैवावगन्तव्य इति ग्रन्थकारेण तन्निरूपणमुपेक्षितम् । ननु पदजन्यज्ञानस्य बाधाभावात्कथं पदस्याप्रमाणत्वम् ? इत्थम् । पदं हि प्रयुज्यमानं प्रत्यक्षेऽर्थे प्रयुज्यते परोक्षे वा, प्रत्यक्षेऽपि किं गृहीतसम्बन्धेऽगृहीतसम्बन्धे वा, एवं परोक्षेपीति चत्वारः कल्पाः, तत्र यद्यपि प्रत्यक्षेण प्रतीयमानेऽर्थे गृहीतसम्बन्धे पदं प्रयुज्यमानं ज्ञानं जनयति तथाऽप्याधिकाभावेनानुवादकत्वादप्रमाणम् । अगृहीतसम्बन्धे तु प्रत्यक्षे प्रयुज्यमानं प्रतिपत्तिमेव न जनयति । परोक्षेऽप्यगृहीतसम्बन्धे प्र-

विषयत्वात् प्रमाणमेव न भवतीति किं तस्य भेदाभेदपरीक्षया। यत्तु वाक्यार्थज्ञानं तदऽगृहीतसम्बन्धै-

---

तिपत्त्यभावः। यस्तु वाच्यत्वेनावगतः सम्प्रति परोक्षस्तत्र पदात् स्मृतिरेवेति। ननु स्मरणेऽप्यनधिगताधिगमोऽस्त्येव अतीतकालावच्छिन्नो हि घटस्तत्र भासते तादृशश्चागृहीत एव, अनतीते तु अयमित्यपरोक्षतया तत्स्मरणे किमिति न प्रमाणम्। मैवम्। अप्रमिते स्मृत्यनुपपत्तेः प्रमिते च पूर्वमेवार्थपरिच्छेदात्। प्रमितेऽपि तादात्विकपरिच्छेदकत्वेन प्रत्यभिज्ञानवत्प्रमाणं भविष्यतीति चेत्। न। यावान् पूर्वोऽनुभूतोऽर्थः तावत एव स्मृत्या प्रतीतेः पूर्वानुभववशेन हि स्मरणमुत्पद्यमानं तदनुसारेणैवोत्पद्यते तदा सत्तां प्रत्यभिज्ञानवद्बोधयतीति। ननु स्मृतिः संस्कारजन्या पदात् पदार्थज्ञानं तु प्रत्युत्पन्नकारणकं कथं स्मृतिः स्यात्। मैवम्। अनधिकविषयतातुल्यतया स्मृतिवदप्रामाण्यतोपपत्तेः उक्तं च—

"पदमभ्यधिकाभावात्स्मारकान्न विशिष्यते" [श्लो. वा. श. १०७] इति॥

ननु द्वारमित्यादावधिकार्थप्रतीतेः कथमप्रमाणम्। नैवम्। संव्रियतामित्याद्यध्याहारात्तस्य वाक्यत्वेन पदमात्रत्वाभावात्. अस्तु वा पदस्य प्रमाणत्वमनुमानत्वं च वाक्यं हि वाक्यार्थे प्रमाणत्वेनास्माभिः प्रतिज्ञातं तत्र चानुमानत्वगन्धोऽपि नास्तीत्याह। यत्त्विति।

"वाक्यार्थे तु पदार्थेभ्यः सम्बन्धानुभवादृते।
बुद्धिरुत्पद्यते तेन भिन्नासावक्षबुद्धिवत्" [श्लो. वा. श. १०९]॥

एवं च वाक्यार्थज्ञानं अनुमानाद्भिन्नं सम्बन्धग्रहणनिर-

रेव पदार्थैरुपजायमानं नानुमानशङ्कामर्हति, न हि सर्वैर्वाक्यार्थविशेषैः सम्बन्धग्रहणमस्ति न च सम्भवत्यऽनन्तैः सम्बन्धग्रहणम्। अत्यन्तापूर्वोऽपि वाक्यार्थविशेषः पदार्थैरवगम्यते दूरदेशवार्तास्विति सर्वजनीनमेतत्।

यत्त्वाऽऽप्तवाक्यत्वादविसंवादानुमानम्, तद्वाक्यार्थावगमोत्तरकालत्वान्न तस्यानुमानत्वमापादयति। वाक्यश्रवणानन्तरमेव ह्याप्ताऽनाप्तज्ञानानपेक्षैरेव पदार्थैर्वाक्यार्थोऽवगम्यते। अत्यन्तादृष्टपुरुषप्रणीतेऽपि वाक्ये अवगते तु वाक्यार्थे सत्याऽसत्यत्वसंशये प्रणेतुराप्तत्वावगमे सति सत्यत्वमनुमीयमानं न वाक्यार्थावगतेराप्तत्वावधारणानपेक्षजन्मनोऽनुमानत्वमापादयति। तस्मात्प्रमाणान्तरमेव लोके शाब्दमित्यऽपौरुषेयस्यापि वेदस्य सिद्धं प्रामाण्यम्। एकदेशिनां तु लोकवचसामनुमानत्वमङ्गीकुर्वतां यथा वेदप्रामाण्यं न सिद्ध्यति तथोक्तम्॥

इति शब्दप्रमाणवादः॥

पेक्षेभ्यः पदार्थेभ्य उत्पद्यमानत्वात् प्रत्यक्षवदिति प्रयोगः सूचितः। पदार्थानामपि वाक्यार्थे सम्बन्धग्रहसापेक्षत्वादसिद्धो हेतुरिति चेत् तत्राह। न हीति। सम्बन्धग्रहणाभावेऽपीन्द्रियवत् बाधकत्वान्नातिप्रसङ्गः अपेक्षासन्निधियोग्यत्वानां नियामकत्वादिति भावः। प्रकारान्तरेणानुमानत्वमाशङ्क्य निराकरोति। यत्त्विति। एतदेवोपपादयति। वाक्येति। उपपादितमर्थं निगमयति। तस्मादिति॥

॥ इति शब्दवादः॥

"उपमानमपि सादृश्यमसंनिकृष्टेऽर्थे बुद्धिमुत्पादयति यथा गवयदर्शनं गोस्मरणस्य" (शा० भा०)

पूर्वदृष्टे स्मर्यमाणार्थे दृश्यमानार्थसादृश्यज्ञानमुपमानम्— याऽसावस्माभिर्नगरे दृष्टा गौः साऽनेन गवयेन सदृशीति।

इदानीं क्रमप्राप्तमुपमानं निरूपयितुमारभते। उपमानमिति। अयं च गोस्मरणस्येत्यन्तो भाष्यग्रन्थः उपवर्षसम्मत एव भाष्यकारेण लिखितत्वात् टीकाकारादिभिर्भाष्यत्वेनैवोच्यते। अत्र गोसदृशो गवय इति वाक्यमुपमानमिति कश्चित्। तन्न। तस्य शब्दानतिरेकात्। प्रत्यक्षदृष्टगोस्वानां गोसदृशोगवय इति श्रुतातिदेशवाक्यानां च वने गवयदर्शनादयं स गवय इति गोसादृश्यविशिष्टगवयज्ञानं तदुपमानमिति गौतमीयाः। तदप्यसत्, तस्यागमाबहिर्भावात् तत्र ह्याप्तोपदेशेनैव गवयरूपार्थप्रतीतेः अतिदेशवाक्यार्थस्मरणसहकृतेन्द्रियजन्यत्वाच्च सविकल्पकप्रत्यक्षमेव तत्। अतो यथा गवयदर्शनं गोस्मरणस्येत्युदाहरणान्तरमाह भाष्यकारः। तदेतल्लक्षणं व्याचष्टे। पूर्वेति। प्रत्यक्षेण पूर्वदृष्टायां गवि स्मर्यमाणायां च वने गवयदर्शनादेतत्सदृशो गौरिति यद्विज्ञानं तदुपमानमित्यर्थः। ज्ञानस्वरूपमाह। या सेति। अत्रेदमुच्यते गवयदर्शनं गोस्मरणस्येति सादृश्यविशिष्टगवयदर्शनं गवि स्मरणमुत्पादयत् उपमानं तदुत्पादितं वा स्मरणमुपमानमित्युक्तम्। एतच्च ध्यानादिजन्यस्मृतिवत् अनुभूते गवि सदृशदर्शनादभिव्यक्तसंस्कारजन्यत्वेन स्मृतित्वादप्रमाणम्। संस्कारजन्यत्वेऽपि प्रत्यभिज्ञावद्देशकालाधिक्येन प्रमाणं भविष्यतीति चेत्। न। तदा-

धिक्याभावात् । प्रत्यभिज्ञानं हि पूर्वानुभवातिरेकेणैतत्कालीनां सत्तां गृह्णाति । उक्तं च—

"इदानीन्तनमस्तित्वं न हि पूर्वधिया गत"

[श्लो. वा. प्र. २३४] मिति ।

उपमानं तु नगरस्थपूर्वानुभवानुसारेणोत्पद्यमानं नाधिकं गृह्णाति । केचितु "प्रसिद्धसाध्यसाधर्म्यात्साधनमुपमान"(१)मित्याहुस्तन्न । किं गवयस्वरूपालम्बनमेतत् ज्ञानमभ्युपगम्यते तद्गतगोसादृश्यालम्बनं वा । नाद्यः इन्द्रियसन्निकर्षोत्पन्नत्वेन तस्य प्रत्यक्षत्वात् । नद्वितीयः अतिदेशवाक्यादेव गवयगतत्वेन गोसादृश्यस्यावगतत्वेन तज्ज्ञानस्य स्मृतित्वात् । सादृश्यविशिष्टगवयग्राहकत्वेन स्मृतिप्रत्यक्षाभ्यामतिरेक इति चेत् । न उक्तदोषानतिवृत्तेः । यद्यतिदेशवाक्यार्थविज्ञानादधिकार्थानवगमस्तर्हि गवये स्मृतिरूपमेवैतत् ज्ञानं स्यात् अधिकार्थावभासे त्विन्द्रियजन्यत्वात्प्रत्यक्षत्वमिति । स्मरणान्तरितेन्द्रियव्यापारं कथं प्रत्यक्षमिति चेत् । न । इन्द्रियसम्बद्धमात्रस्यैव प्रत्यक्षत्वात् । किञ्च श्रुतातिदेशवाक्यानामित्यपि न वाच्यं अश्रुतातिदेशवाक्यानामपि वने गवयदर्शनोत्तरकालं गोसदृशोऽयमिति ज्ञानोत्पत्तिदर्शनात् । अथाश्रुतातिदेशवाक्यानामयं स गवय इति संज्ञानुसन्धानेन ज्ञानं नोत्पद्यते ? मानाम गवयसंज्ञावेदिष्ट, उपमानप्रमेयं तु गोसादृश्यविशिष्टं गवयं विदन्त्येव । ननु संज्ञासंज्ञिसम्बन्धपरिच्छेद एवोपमानफलम्, न चाश्रुतातिदेशवाक्यार्थस्य तथा प्रतिपत्तिरस्ति । नैतदपि युक्तम् । अतिदेशवाक्यादेव सम्बन्धावगतिसम्भवेनास्योपमानफलत्वासम्भवात् । अत्रोच्यते । गवयदर्शनादेतत्सदृशो नग-

(१) गौतमसू० अ० १ आ० १ सू० ६ ।

किं पुनः सादृश्यम् ?, अर्थान्तरयोगिभिः सम्ब-

रस्थो गौरिति यद्विज्ञानं तदेवोपमानं, तस्य च स्मर्यमाणैव गौर्गवयसादृश्यविशिष्टा प्रमेयं स्मर्यमाणगोगतं वा गवयसादृश्यं प्रमेयम्। यद्यपि गवये सादृश्यं प्रत्यक्षेणावगतं गौश्च स्मर्यते तथापि विशिष्टस्याऽन्यतोऽसिद्धेरुपमानप्रमाणता । यथाहि प्रत्यक्षदृष्टेऽपि पर्वतादौ स्मर्यमाणे च वन्हौ विशिष्टविषयत्वेनाऽनुमानस्य प्रमाणत्वमेव मुपमानस्यापि, यथा च तत्राग्निसामान्यमेवानुमीयते न विशेषस्तथाऽत्र सादृश्यमात्रविशिष्टस्यैवोपमेयत्वमिति । तस्मादेवंलक्षणकत्वादुपमानमपि न व्यभिचरति । यत्र तु व्यभिचारस्तदुपमानमेव न भवति बाधकज्ञानेनाभासत्वात् यथा पलालकूटस्य गजादिसादृश्यं समीपस्थस्य तत्र बाधदर्शनात् । ननु सादृश्यं नाम न किञ्चिद्वस्तु धर्मिणो भिन्नमभिन्नं वा सम्भवति— आद्ये पृथगुपलब्धिप्रसङ्गात्, अभेदे तन्मात्रतापातात् पुरःस्थितवस्तुगतं च सादृश्यमगृहीतप्रतियोग्यपि जातिवद्गृह्येत । प्रतियोग्यपेक्षमेव सादृश्यं सदेति चेत् । न । उत्पत्तौ ज्ञप्तौ च तदपेक्षाभावात् । मृतेऽपि देवदत्ते तत्सादृश्यं यज्ञदत्तस्य निष्पद्यते ऽवगम्यते च अतः कल्पितमेव तदवस्तुरूपमित्यभिप्रायवान् पृच्छति । किं पुनरिति । उत्तरमाह । अर्थान्तरेति । जात्यन्तरयोगिभिरवयवसामान्यैर्यो जात्यन्तरस्य योगस्तत्सादृश्यं न धर्मिस्वरूपमात्रं, न चागृहीते गवि तत्सम्बन्धिनां सामान्यानां ग्रहणं सम्भवति अतोऽवश्यं प्रतियोगिग्रहणापेक्षेति भावः । यदुक्तमुत्पत्तौ ज्ञप्तौ वा प्रतियोग्यपेक्षा न सम्भवति मृतेऽपि तन्निष्पत्तेरिति । तत्र ब्रूमः नोभयत्रापि प्रतियोगी सत्तयोपकरोति

न्धिसामान्यैरर्थान्तरस्य तादृशयोगः सादृश्यम्, यथा गोजातियोगिभिः कर्णाद्यवयवसामान्यैर्गवयजातेर्योगो गवयस्य गोसादृश्यम्, गवयसंयोगिभिश्च गोर्योगस्त-

---

किन्तु स्वसम्बन्धिसामान्ययोगितया स्मर्यमाणसादृश्यावगतात्रु-पयुज्यत इति। यदपि सादृश्यमभिन्नं भिन्नं वेति विकल्पितं तदपि भेदाभेदाङ्गीकारेण परिहृतम् । लक्षणार्थं विवृणोति । यथेति । एतच्च सादृश्यं सदृशप्रत्ययोत्पादकत्वेन गवयसदृशेन यजेतेत्ये-वमादिचोदनार्थनिष्पादकत्वेन चार्थक्रियाकारित्वाद्वस्त्वेवेति भावः । अवयवग्रहणं च धर्ममात्रोपलक्षणार्थं जातिग्रहणं चोप-लक्षणान्तरप्रदर्शनार्थमतोऽग्निरिव माणवको यज्ञदत्तसदृशश्च देव-दत्त इत्यपि सिद्ध्यति। यत्र पुनरवयवयोः सादृश्यं यथा पद्मद-लाक्षीत्यत्र पद्मस्याक्ष्णोश्च तत्रापि तयोः स्वावयवसामान्य-योग एव सादृश्यम् । यदपि गुणयोः सादृश्यं यथा केतकीग-न्धसदृशः सर्पगन्ध इति तत्राप्यवयविगुणानां अवयवगुणसामा-न्ययोगः सादृश्यं, कर्मणामपि स्वसम्बन्धिद्रव्यदेवतासामान्ययोग इति । एवं जात्यादिसामान्यैरपि व्यस्तैः समस्तैर्वा विचित्रं सा-दृश्यमूहनीयम् । यथाहुः—

"एवं जातिगुणद्रव्यक्रियाशक्तिस्वधर्मतः ।
एकैकद्वित्रिसामस्त्यभेदादेतस्य चित्रता" इति।(श्लो.वा.उप.२०)

ननु सामान्यभूयस्त्वमेव सादृश्यमस्तु किं योगग्रहणेन । न । योगं विना तदप्रतीतेः गोजातीयावयवसामान्ययुक्ता तु गवयजा-तिः सादृश्ययुक्ता गृह्यते इति योग एव सादृश्यावगमात् । यद्यपि यमयोर्जात्यन्तरं नास्ति तथापि जात्यन्तरग्रहणस्योपलक्षणा-र्थत्वात् सादृश्यं सम्भवति । न चैकरूपं सामान्यं क्वचिद्भूयसां

त्सादृश्यम् । अत एव च सामान्यभूयस्त्वाल्पत्ववशेन सादृश्यप्रकर्षाप्रकर्षौ–सुसदृशमीषत्सदृशमिति । ये तु सामान्ययोगातिरिक्तमन्यदेव तत्त्वं सादृश्यं मन्यन्ते, तेषां प्रकर्षाप्रकर्षभेदः किंनिमित्त इति चिन्तनीयम् । नच तत्त्वान्तरत्वे प्रमाणमपि किंचिदस्तीत्यास्तां तावत् ।

न चेदमुपमानं प्रत्यक्षान्तर्गतम्, अनिन्द्रियसन्निकृष्टत्वान्नगरस्थस्य गोः । न चानुमानम्, अगृहीतसम्बन्धस्याप्युपजायमानत्वात् । एवं किलानुमीयेत गौर्गवयसदृशो गवयसादृश्यप्रतियोगित्वाद् यद् यत्सादृश्यप्रतियोगि तत् तत्सदृशं दृष्टं यथा यमलयोरन्यतर-

---

क्वचिदल्पीयसां च दर्शनात् अनित्यं ह्येतत् गोत्वादिसामान्यस्यैवानेकाश्रयत्वेन नित्यत्वोपपत्तेः । अथ वा सर्वमेव सामान्यं नित्यं देशान्तरादिषु क्वचिदाश्रयस्य सम्भवात् । ननु व्यासज्य वर्तमानस्य कथमेकत्र ग्रहणम् । मैवम् । जातिवदेकैकत्र सादृश्यस्य परिसमाप्तत्वेन द्वयोर्व्यासज्यवृत्त्यभावात् । मतान्तरं निराकरोति । ये त्विति । अन्यदेव– स्वतन्त्रं किञ्चिदित्यर्थः । तेषां मते प्रकर्षाप्रकर्षभेदः प्रतियोग्यपेक्षा च न स्यादित्यर्थः । ननु सादृश्यविशिष्टपिण्डज्ञानस्येन्द्रियजन्यत्वात्प्रत्यक्षत्वमित्याशङ्क्याह । नचेति । ये तु प्रमाणद्वयवादिन औलूक्यादयः साङ्ख्या वा प्रमाणत्रयवादिनो ऽनुमानान्तर्भावं मन्यन्ते तान्प्रत्याह । न चेति । एतदेव विवृणोति । एवमिति । अत्र गवयसादृश्यविशिष्टो गौरनुमेयः तत्र न तावद्गोगतं सादृश्यं लिङ्गं प्रागुपमानात्तद्धर्मत्वेनाप्रतीतेः उपमानप्रमेयत्वात्तस्य । नापि

स्याऽन्यत्तरेणापि । न चेदं युक्तम्–यौ हि द्वावर्थौ मिथः सदृशौ युगपन्न दृष्टवानेकमेव तु गामुपलभ्य नगरे वने गवयं पश्यति सोऽपि गां गवयसादृश्यविशिष्टामुपमिनोत्येव, तस्मान्नानुमानम् । शाब्दत्वं तु न शङ्क्यमेव, अतः प्रमाणान्तरम्, प्रसिद्धत्वाच्च न परीक्षितव्यम्।

इति उपमानवादः ॥

गवयगतं अपक्षधर्मत्वादिति भावः । आधिकं तु वार्तिकेऽवगन्तव्यम् । द्वावर्थौ– गोगवयरूपौ । पूर्वं मिथः सदृशार्थद्वयदर्शने सत्येव सम्बन्धग्रहणं सम्भवेदिति भावः । अतो गवयसदृशो गौरिति विज्ञानं नानुमानं अगृहीतसम्बन्धस्याऽप्युपजायमानत्वात् प्रत्यक्षवदिति प्रयोगः सूचितः । भेदप्रतिपादनप्रयोजनं च वार्तिककारैरुक्तं तथाहि—

"भिन्नाऽनुमानादुपमेयमुक्ता सौर्यादिवाक्यैरसहापि दृष्टम्।
सादृश्यतोऽग्न्यादियुतं कथन्तु प्रत्याययेदित्युपयुज्यते नः ॥५२॥
प्रतिनिधिरपि चैवं व्रीहिसादृश्ययोगात्
भवति तदपचारे यत्र नीवारजातौ ।
तदपि फलमभीष्टं लक्षणस्योपमायाः
प्रतिकृतिरपिरपि गौणैर्बाध्यते यत्र चान्यैः ॥ ५३ ॥
यदि सुसदृशमन्यल्लभ्यते तत्र मिथ्या
भवति विसदृशत्वान्मन्दसादृश्ययुक्तम् ॥
मतिरपि हि तथैव द्रागिवोत्पद्यतेऽस्मिन्नितराविषयबोधे सत्यपीत्थं च बाधः" ॥ ५४ ॥ [श्लो. वा. उप.]

इत्युपमाननिरूपणम् ॥

"अर्थापत्तिरपि दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यत इत्यर्थकल्पना, यथा–जीवतो देवदत्तस्य गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य परिकल्पना" (शा० भा०)

प्रमितस्यार्थस्यार्थान्तरेण विनाऽनुपपत्तिमालोच्य तदुपपत्तये याऽर्थान्तरकल्पना साऽर्थापत्तिः।

अथ क्रमप्राप्तामर्थापत्तिं लक्षयति। अर्थापत्तिरपीति। अदृष्टस्य परिकल्पनेत्यन्तो भाष्यग्रन्थः। लक्षणभाष्यं व्याचष्टे। प्रमितस्येति। नन्ववगतार्थोऽनुपपद्यमानोनावश्यमर्थान्तरं कल्पयति न ह्यङ्गुल्यग्राधिकरणा हस्तियूथशतानुगतिरर्थान्तरं कल्पयतीत्याशङ्कानिराकरणार्थं प्रमितस्येत्युक्तम्। प्रमाणाऽवगतोऽर्थोऽनुपपद्यमानोऽवश्यमर्थान्तरं कल्पयतीत्यर्थः। ननु दृष्टशब्दस्य प्रमितमात्रवचनत्वाच्छ्रुतोवेत्यनर्थकम्। नैष दोषः। श्रुतार्थापत्तेः प्रमाणग्राहिणीत्वेनार्थविषयाया दृष्टार्थापत्तेर्वैलक्षण्यप्रदर्शनार्थं भेदेनोपादानम्। प्रमितस्येत्यनेन प्रमाणषट्कपूर्विकाऽर्थापत्तिः सूचिता। तत्र प्रत्यक्षपूर्विका यथा प्रत्यक्षतोवगताद्दाहाद्वह्नेर्दाहशक्तिकल्पना। देशान्तरप्राप्तिलिङ्गकेनानुमानेनादित्ये गतिमनुमाय तदन्यथानुपपत्त्या गमने शक्तिरप्यस्तीति यद्विज्ञानं साऽनुमानपूर्विकाऽर्थापत्तिः। शब्दपूर्विका तु श्रुतार्थापत्तिरेव। यथा पीनोदेवदत्तो दिवा न भुङ्क्ते इति श्रुते रात्रिभोजनकल्पना। गवयदर्शनादेतत्सदृशो गौरित्युपमानेन गवि गवयसादृश्यमुपमानात्तदन्यथानुपपत्त्योपमानज्ञानं प्रति ग्राह्यशक्तिरस्यास्तीति यद्विज्ञानं सोपमानपूर्विका। अभिधानानुपपत्तिप्रभवयाऽर्थापत्त्या शब्दस्य वाचकशक्तिं कल्पयित्वा पुनस्तदनुपपत्त्या शब्दस्य नित्यत्वकल्पना स्यादर्थापत्तिपूर्विका।

यद्यनुपपन्नादुपपादककल्पनाऽर्थापत्तिः ?, अनुमानमेव तर्हि ? तत्रापि वह्निमन्तरेणानुपपन्नाद् धूमाद्वह्निः कल्प्यते।

स्यादेवम्—यद्यनुपपन्नं गमकं स्यात् ? इह तु यन्नोपपद्यते तदेव गम्यम्—गृहाभावेन हि विना बहिर्भावो नोपपद्यते। किमिदानीमुपपादकाद्ऽनुपपन्ने बुद्धिरर्थापत्तिः ?। को दोषः ?। न खलु कश्चिद्दोषः—किंत्वसौ नैवास्ति, नह्युपपादकदर्शनादनुपपन्नार्थे बुद्धिर्भवति, यदि स्यात्, वृक्षत्वदर्शनाच्छिंशपात्वं कल्प्येत, वृक्षत्वेन विना शिंशपात्वस्यानुपपत्तेः, तस्मा-

---

प्रत्युच्चारणं तु शब्दान्यत्वे सत्यस्मिन् गृहीतसम्बन्धे ऽन्यस्य वाचकत्वं न स्यात्। सादृश्ये न तदर्थप्रतिपादकत्वाभ्युपगमे लिङ्गाभासोत्पन्नविज्ञानवदप्रमाणं स्यात्। नचाऽत्र सदृशप्रतीतिरस्ति तत्त्वेनैव प्रत्ययात् अतोवाचकशक्त्यनुपपत्त्या नित्यत्वकल्पनम्। अभावपूर्विका त्वर्थापत्तिर्भाष्यकारेणैवोदाता जीवतो देवदत्तस्येत्यादिना। अर्थापत्त्यन्तराणामप्युदाहरणप्रपञ्चः पक्षदोषावसरे बृहट्टीकायां वार्तिककारैर्दर्शितः। ननु भाष्यकारेणाभावपूर्विकाया एवोदाहरणात् वार्तिके कथमुदाहरणप्रपञ्चः। नैष दोषो भाष्योदाहरणस्य सर्वसूचनार्थत्वात्। अनुमानेऽन्तर्भावं शङ्कते। यदीति। परिहरति। स्यादेवमिति। अतोऽनुमानवैषम्यमिति भावः। गूढाभिसन्धिः पृच्छति। किमिति। आशयमविद्वानङ्गीकारेण परिहरति। को दोष इति। शङ्किता स्वाशयमुद्घाटयति। न खल्विति। एतदेवोपपादयति। न हीति। प्रकृतं निगमयति। तस्मादिति।

दनुपपन्नमेव गमकं नोपपादकम्।

अथोच्यते—नाऽविनाभावेनानुपपत्तिरित्युच्यते किं तु संशयापत्तिः, यस्य हि जीवनं गृहसम्बन्ध्येव प्रायशोऽवगतं तस्य गृहाभावे दृष्टे जीवनं सांशयिकं भवद् बहिर्भावकल्पनया समाधीयते, ततश्च प्राग् बहिर्भावकल्पनाया जीवनस्य संदिग्धत्वान्न लिङ्गत्वं, न हि सन्दिग्धं लिङ्गं भवति। जीवनरहितं च गृहाभावमात्रं मृतेऽपि सद्भावादनैकान्तिकं न बहिर्भावमनुमापयितुमलम्, अतोऽनुमानासम्भवात्प्रमाणान्तरमेवेदम्। यथा चानुमाने निश्चितं गमकम्, एवमर्थापत्तौ सान्दिग्धं गमकमिति दर्शनबलादभ्युपगम्यते। संशयश्चात्र पूर्वदृष्टरूपविसंवादात्।

तदिदमसम्बद्धम्—न हि संदिग्धे जीवने बहिर्भावः शक्यते कल्पयितुम्, कथं हि 'जीवति वा मृतो देवदत्तः' इति संदिहानस्तस्य बहिर्भावं कल्पयेत्, न हि भावाऽभावसंशयस्य बहिर्भावकल्पनयाऽपनोदः संभवति। सर्वत्र हि संशयस्य निदानोच्छेदानु-

---

अतो ऽनुमानमेवैतदिति भावः। अत्र सिद्धान्तिनः परिहारमनुभाषते। अथेति। संशयमुपपादयति। यस्येति। किमेतावता दूषणमत आह। ततश्चेति। ननु यथा सन्दिग्धं न लिङ्गमेवं गमकमपि न भविष्यत्यत आह। यथेति। सान्दिग्धमेव जीवनं स्वसमाधानार्थं बहिर्भावं कल्पयति इदमेवास्य गमकत्वमितिभावः। पूर्वदृष्टरूपं— जीवनस्य गृहसम्बन्धित्वम्। दूषयति। तदिदमिति। अशक्यतामेवाह। कथं हीति। केन तदपनोद इत्या-

च्छेदो भवति । अन्यतरपक्षावधारणाद्वा ।

न च बहिर्भावकल्पनया तावन्निदानोच्छेदः, जीवनस्य प्रायेण गृहसम्बन्धित्वात् तद्विपर्ययोऽत्र संशयहेतुत्वेनोपन्यस्तः, न चासौ बहिर्भावे कल्पिते समुच्छिद्यते, प्रत्युत विपर्यय एव दृढमवस्थाप्यते । न चाऽन्यतरपक्षावधारणमपि विद्यते—जीवनभावाभावौ ह्यत्र संदिह्येते न चानयोरन्यतरस्यापि बहिर्भावकल्पनया निर्णयो भवति, अन्यद्धि जीवनम्, अन्यश्च बहिर्देशसम्बन्धः ।

न च गृहाभावनिबन्धनाऽर्थापत्तिर्जीवननिर्णयायाऽलं भवति । न ह्येवं सम्भवति—यस्माद्देवदत्तो गृहे नास्ति तस्माज्जीवतीति । प्रत्युत पूर्वनिश्चितमेव जीवनं गृहाभावादेव संदिग्धं कथं तत एव निर्णीयते । न हि संशयहेतुरेव निर्णयहेतुर्भवति । तस्माज्जीवनं संदिग्धम्, तत्तावदऽन्यतो निश्चित्य पश्चाद्बहिः सम्बन्धः कल्पयितव्यः—यस्माद्देवदत्तो जीवति गृहे च नास्ति तस्मान्नूनं बहिरवस्थित इति । न तु संदिह्यमाने जीवने तत्कल्पनं सम्भवति,—यस्मादविद्यमानो गृहे जीवति वा न वा तस्माद्बहिः स्थितः इत्यसम्बद्धमेव स्यात् । तस्माद्बाहिर्भावनियतं गृहाभा-

---

काङ्क्षायामाह । सर्वत्रेति । आद्यं निराचष्टे । नचेति । प्रत्युतेति । बहिर्भावे कल्पिते गृहसम्बन्धित्वविपर्ययरूपः संशयहेतुरेव दृढमवस्थाप्यत इत्यर्थः । द्वितीयं निराचष्टे । नचेति । असम्भवं दर्शयति । यस्मादिति । असम्बद्धत्वादेव न सम्भवतीत्यर्थः । निगमयति ।

वसहितं जीवनं निश्चित्य बहिर्भावः कल्प्यत इत्यनुमानमेवेदं न प्रमाणान्तरमिति। अत्राभिधीयते—

न तावद् गृहाभावमात्रं लिङ्गं मृतेऽपि सम्भवात्। न जीवनमात्रं गृहेऽपि सद्भावात्, अतो जीवनसंसृष्टो गृहाभावो लिङ्गमिति वक्तव्यम्, प्रथमं च लिङ्गमवगम्य पश्चाल्लिङ्ग्यनुमानेन भवितव्यम्, न तु लिङ्गावगमसमय एव लिङ्ग्यवगमः। अत्र च न बहिर्भावावगममन्तरेण गृहाभावो जीवनं च संसृष्टं प्रत्येतुं शक्यते विरोधात्। जीवता ह्यवश्यं गृहे वा बहिर्वा स्थातव्यमित्यसंदिग्धम्, अतश्च बहिर्भावमनन्तर्भाव्य जीवनगृहाभावौ समुच्चित्य प्रतिपद्यमानस्येदृशी प्रतिपत्तिरापद्यते—देवदत्तो गृहे नावस्थितो गृहे वा बहिर्वाऽवस्थित इति, न चैवं सम्भवति—भावाभावयोरेकत्र देशे समुच्चेतुमशक्यत्वात्। अतोऽवश्यं देशभेदेनैव देवदत्तस्य भावाभावौ समुच्चेतव्यौ। तेन भावाभावसंसर्गबुद्ध्यैव बहिर्भावस्य बुद्धत्वान्न पश्चा-

---

तस्मादिति। समाधत्ते। अत्रेति। ततः किमत आह। प्रथममिति। नत्विति। कार्यकारणबुद्ध्योर्यौगपद्यायोगादिति भावः। नन्वागमेन जीवनस्य निश्चितत्वात्तत्संसृष्टो गृहाभावः पूर्वमेवावगतो लिङ्गं भविष्यतीत्याशङ्क्याह। अत्रेति। सत्त्वासत्त्वे तावदेकस्मिन् देवदत्ते देशविशेषावनन्तर्भाव्य न शक्येते संसृज्य रोद्धुं अतो यथैव धिया तयोः संसर्गो गम्यते तयैवाभावाक्रान्तत्वात् गृहाद्बहिरेव चैत्रस्य विद्यमानत्वमवगतं भवतीति अतो हेतुज्ञानकाल एव साध्यस्यापि ज्ञातत्वात् नानुमानस्य किञ्चि-

त् किंचित् प्रमेयमस्ति, आह च—

" विद्यमानत्वसंसृष्टगेहाभावधियाऽनया ।
गेहादुत्कालिता सत्ता बहिरेवावतिष्ठते " (श्लो. वा. अर्था. २१) इति ।

ननु प्रमाणान्तरत्वेऽपि जीवनमात्रस्य गृहाभावमात्रस्य वाऽवगमकत्वाऽभावात् संसृष्टमुभयं गमकमित्यङ्गीकर्तव्यम्, संसृष्टधियैव च बहिर्भावस्य बुद्धत्वान्न पश्चात् किं चित्प्रमेयमवशिष्यत इति तुल्योऽयं दोषः ।

उच्यते- इयमेव संसृष्टधीरर्थापत्तिरित्यवगम्य शा

त्प्रमेयमस्तीति पिण्डितार्थः । अत्रैव वार्तिकमुदाहरति । आह चेति । एतच्छ्लोकान्तरस्योत्तरार्द्धं ग्रन्थकारेणात्र योजितं तुल्यार्थत्वात् । अत्र वार्तिककारैः—

"बहिर्देशविशिष्टेऽर्थे देशे वा तद्विशेषित"

इत्यादिना ग्रन्थेन बहिर्देशविशिष्टे चैत्रे तद्विशिष्टे वा बहिर्देशेऽनुमेये गृहे चैत्राभावस्य वा लिङ्गत्वं स्यात् चैत्राभावविशिष्टस्य वा गृहस्येत्यादयोऽनेके विकल्पा उपक्षिप्ता दूषिताश्च, ते ग्रन्थविस्तरभयान्न लिखिताः । एवं तर्ह्यनुमानवदर्थापत्तेरपि न किञ्चित्प्रमेयमस्तीति चोदयति । नन्विति । अनुमानएव प्रमेयानुप्रवेशित्वं नाम दूषणं तत्र ह्यर्थादर्थान्तरप्रतीतिः सम्बन्धबलेनानुपपत्त्या धूमदर्शने सत्यप्यगृहीतसम्बन्धस्य वह्निप्रतिपत्तेरभावात् । इह तु प्रमाणद्वयप्रतिपन्नयोरेकाधिकरणयोर्भावाभावयोः संवेदनार्थमेव बहिर्भावाख्यप्रमेयानुप्रवेश इति न दोष इत्याशयवान् परिहरति । उच्यत इति । ननु प्रमितस्यार्थस्यार्थान्तरेण विनाऽनुपपत्तिमालोच्य तदुपपत्तये याऽर्थान्तरकल्पना साऽर्थाप-

ऽयतु भवान्। किं पुनस्तस्याः कारणम् ?, द्वयोर्गृहाभावजीवनयोः परस्परप्रतिघात इति ब्रूमः । यथा खल्वेकेन 'नद्यास्तीरे फलानि सन्ति' इत्युक्ते परेण च 'न सन्ति' इत्युक्ते बलाबलविशेषमजानानः श्रोता मिथः प्रतिहतमुभयं बुध्यते, न चान्यतरदपि त्यक्तुं ग्रहीतुं वा शक्नोति, तथापि तु न सत्त्वासत्त्वे समुच्चिनोति विरोधात् ।

एवमिहापि 'गृहे वा बहिर्वाऽवस्थितो देवदत्तः' इति केन चित्प्रमाणेन प्रतीतम्, अन्येन च 'गृहे नास्ति'

त्तिरित्युक्तं कथमिदानीं संसृष्टधीरेवार्थापत्तिरित्युच्यते। सत्यम् । अत्रापि बहिर्भावरूपार्थान्तरकल्पना तास्त्वेव । किन्त्ववगतजीवनविशिष्टगृहाभावोपपादकत्वेनैव तज्ज्ञानं न स्वातन्त्र्येण । नन्वत्रापि गृहाभावस्य बहिर्भावेन नियतत्वादविनाभावेन प्रतिपत्तेरनुमानमेवास्तु । मैवम् । अगृहीताविनाभावस्यैव प्रतिपादकत्वेनानुमानत्वाभावात् । अस्तुवाऽर्थापत्त्या गृहाभावबहिर्भावयोः सम्बन्धेऽवगते पश्चादनुमानं न विरोधः कश्चित् । तदुक्तं—

"तेन सम्बन्धवेलायां सम्बन्ध्यन्यतरो ध्रुवम् ।
अर्थापत्त्याऽवगन्तव्यः पश्चादस्त्वनुमानता" [श्लो. वा. अर्था. ३३]

ननु संसृष्टधीरर्थापत्तेः कारणं सैव चेदर्थापत्तिस्तदा तत्कारणमतिरिक्तं वाच्यं नच तत्सम्भवतीत्याशयेन पृच्छति । किं पुनरिति । उत्तरमाह । द्वयोरिति । प्रतीघातमेव दृष्टान्तेन विवृणोति । यथेति । दार्ष्टान्तिके सङ्गमयति । एवमिति । तर्हि दृष्टान्तवदत्रापि परस्परप्रतिघातान्नार्थान्तरकल्पनोदेष्यतीत्याश-

इति, तदुभयं समुचितं परस्परप्रतिघाति प्रतीयते, सोयं प्रतिघातो न फलसद्भावाऽसद्भाववदऽसमाधेयः, किं तु बहिर्भावकल्पनया समाधातुं शक्यत इत्येतावान् विशेषः, तेन प्रमाणसिद्धयोर्द्वयोरर्थयोः परस्परं प्रतिघातोऽर्थान्तरकल्पनया समाधेयत्वेनालोच्यमानोऽर्थापत्तेः कारणम् । तत्समाधानाय चार्थान्तरकल्पनाऽर्थापत्तिः प्रमाणान्तरऽमनुमानात् । यश्चायं प्रतीतस्य प्रमाणान्तरेण प्रतिघातः स एवाऽर्थानुपपत्तिरित्युच्यते. ।

भवत्वऽर्थापत्तिः प्रमाणम्, अनुमानं त्वर्थापत्तावेवाऽन्तर्भवति, तथा हि- यत्र यत्र धूमस्तत्राग्निरित्यवगतं पर्वतस्य च धूमवत्ताऽवगता यदि पर्वतेऽग्निर्न स्यात्तदा धूमवत्ता वा मिथ्या स्यात् सर्वधूमवतां वा ऽग्निमत्त्वं मिथ्या स्यात्, कथं तदुभयमप्यऽमिथ्या स्यादित्यग्निमत्त्वं कल्प्यत इत्यर्थापत्तिरेषा ।

स्यादेवं यदि सर्वधूमवतामग्निमत्त्वमनुमानादऽन्येनावगतं स्यात् ? न त्वेवमस्ति–दृष्टान्तधर्मिष्वेव हि धूमस्याग्निनियमो ऽवगतो न सर्वत्र, अनुमानात्तु सर्वधूमवतामग्निमत्ताऽवगतिरित्युक्तम् । न च दृष्टान्तधर्मिष्वेवावगतस्याग्निनियमस्य सर्वधूमवदाग्निमत्तां

क्त्याह । सोऽयमिति । समाधेयत्वात्तद्विलक्षणोऽयंप्रतीघात इति भावः । फलितमाह । तेनेति । कार्यकारणयोर्विवेकंदर्शयति । यश्चेति । यद्येवंरूपाऽर्थापत्तिस्तर्ह्यनुमानस्य तत्रान्तर्भावः प्राप्नुयादिति शङ्कते । भवत्विति । समाधत्ते । स्यादेवमिति । अर्थापत्तेः

विना कश्चिद्विरोधो येनार्थापत्तिः स्यात् । तस्माद्सङ्कीर्णविषयत्वाद्ऽनुमानमपि प्रमाणान्तरमऽर्थापत्तिरपि ।

सिद्धे च द्वयोः प्रामाण्ये येन नाम सर्वधूमवतामग्निमत्त्वमनुमानेनाऽवगतं तस्य पर्वतादिषु धूमदर्शनाद् यदाग्निविज्ञानं तद् द्वेधापि सम्भवति–दृष्टान्तपरिदृष्टनियमस्मरणाद्वाऽनुमानम्, प्रतिघातालोचनया वाऽर्थापत्तिः, तस्मादर्थापत्तिः प्रमाणान्तरम् ।

यापि क्वचिदवस्थितस्य देवदत्तस्यान्यत्र सर्वत्राऽभावप्रतिपत्तिः साप्यऽर्थापत्तिः, तथा हि– मूर्तस्यार्थस्य युगपत् कार्त्स्न्येनाऽनेकदेशसम्बन्धो न घटत इति स्वशरीरेऽवगतं–स्वशरीरस्य हि क्वचिदवस्थितस्य ततोऽन्यत्र सर्वत्राभावो द्वयाऽदर्शनेनावगतः, अतोऽन्यस्यापि देवदत्तादेर्युगपदनेकदेशसम्बन्धो नास्तीत्यनुमीयते । ततो देवदत्तं क्वचित्प्रत्यक्षेणावगच्छन् युगपदनेकदेशाऽसम्बन्धं चानुमानेनावधारयन्नुभयोपपत्तये देशान्तरेषु सर्वेष्वभावं कल्पयति ।

नन्वनुमानमेवेदं सम्भवति– देवदत्तोऽधुना सर्वत्र नास्ति गृहेऽवस्थितत्त्वाद् मद्वदिति । सत्यम्, देवदत्तेन सहैकदेशावस्थितस्य सम्भवति, यस्तु क्वचिद्-

---

पूर्वमेवानुमानप्रवृत्तेर्न विषयसङ्कर इति भावः । निगमयति । तस्मादिति । सत्यमिति । अत्र भावाभावौ सम्बन्धिनौ । तत्र परिमितदेशकालत्वाच्छक्यते ग्रहीतुं अभावस्त्वनन्तदेशकालवर्ती न कथञ्चिद्ग्रहीतुं शक्यते अतः साहित्यग्रहणासम्भवादनुमा-

गृहेऽवस्थितस्तदनन्तरगृहमप्यऽतीत्य तृतीये गृहे देवदत्तं केन चित्प्रमाणेनावगतवान् स तद्गृहातिरिक्ते मध्यगृहे देशान्तरेषु च सर्वेष्वभावं देवदत्तस्य केन लिङ्गेन प्रतीयात् ? ।

अथ क्वचिद् देवदत्तं पश्यन् तद्देशव्यतिरिक्ते च प्रत्यासन्नेदेशे तदभावमवगच्छन्नऽन्येषामपि सर्वदेशानां प्रत्यासन्नदेशवत् तद्देशव्यतिरिक्तत्वात् तच्छून्यतामऽनुमिमीते ?, तत्रापि—

" विरुद्धाव्यभिचारित्वं तद्वदेव हि गम्यते ।
समीपदेशाभिन्नत्वाच्चैत्राधिष्ठितदेशवत् ॥ "

(श्लो० वा० अर्था० ४५)

नमितिभावः । हेत्वन्तरेणानुमानं शङ्कते । अथेति । न सर्वदेशगतेनाभावेन नियमं ब्रूमः किन्तु देवदत्ताधिष्ठितदेशव्यतिरिक्ततया तच्छून्यत्वमनुमीयत इति शङ्कार्थः । अयमत्र प्रयोगः विवादपदं देशान्तरं देवदत्तशून्यं देवदत्ताधिष्ठितदेशव्यतिरिक्तत्वात् देवदत्ताधिष्ठितप्रत्यासन्नदेशवदिति । एतदपि वार्तिकोक्तदूषणेनैव दूषयति । तत्रापीति । तद्वदिति । चैत्रयुक्तमित्यर्थः । प्रयोगश्चैवं--देशान्तरं देवदत्तयुक्तं देवदत्ताधिष्ठितसमीपदेशव्यतिरिक्तत्वात् तदधिष्ठितदेशवदिति विरुद्धाव्यभिचारित्वं दूषणमुक्तमित्यर्थः । एतदुक्तं भवति न तावद्देवदत्तसंयुक्तदेशव्यतिरिक्तत्वादिति हेतुः सम्भवति सन्दिग्धत्वात् देशान्तराण्यपि तत्संयुक्तानि न वेत्येतदेवात्र विचार्यते । कथं तेषां तत्संयुक्तदेशाद्व्यतिरेकः सिद्धः अप्रयोजकश्चायं साध्यव्यतिरेकस्यापि साधयितुं शक्यत्वादिति । उपसंहरति । तस्मादिति ।

इतिवार्तिक एव दूषणमुक्तम् । तस्मादर्थापत्तिरेवेयम् । एतेन बीजादिष्वङ्कुरजननशक्तिकल्पना व्याख्याता ।

किं पुनः शक्तिकल्पनां विना नोपपद्यते ? । बीजादिषु सत्स्वङ्कुराद्युत्पत्तिदर्शनात् असत्सु चादर्शनाद्बीजादीनामङ्कुरादिकारणत्वमवगम्यते, सत्स्वपि बीजेषु मूषिकाघ्रातेष्वङ्कुरानुत्पत्तेरकारणत्वं प्रतिभासते, सोयं कारणत्वाकारणत्वयोर्विरोधः शक्तिकल्पनया समाधीयते—नूनमस्त्यतीन्द्रियमपि रूपं यद्भावात् कदा चिदङ्कुरोत्पत्तिः, यस्य च मूषिकाघ्राणेन नाशात् कदाचिदनुत्पत्तिरिति कल्प्यते । घ्राणाभावोप्यङ्कुरस्य कारणं घ्राणे च सति तदभावादेवाऽनुत्पत्त्युपपत्तेरलं शक्तिकल्पनयेति चेत् ? न, घ्राणक्रियायाः क्षणिकत्वात् तदुत्तरकालं तदभावे सत्यप्यङ्कुरानुत्पत्तेः

प्रागभावः कारणं न प्रध्वंसाभाव इति चेत् ?, न । अभावत्वाविशेषात्, न हि प्रागभावप्रध्वंसाभा-

---

अन्यत्राप्यर्थापत्तिमतिदिशति । एतेनेति । एतदेव प्रश्नपूर्वकमुपपादयति । किं पुनरिति । प्रतिबन्धकाभावस्य कारणत्वं शङ्कते । घ्राणाभाव इति । परिहरति । नेति । प्रतिबन्धकाभावे सत्यपि कार्यानुत्पत्तेस्तस्याकारणत्वमित्यर्थः । विशेषं शङ्कते । प्रागभाव इति । परिहरति । नेति । प्रतिबन्धकाभावत्वेनैव कारणता वक्तव्या विशेषविवक्षायां गौरवापत्तेरिति भावः । बीजस्वरूपे तत्कल्पनायां नियामकमाह । बीजस्येति । उक्तमर्थमन्यत्राति-

वयोः प्रागूर्ध्वकालभेदं मुक्त्वा किं चिदपि रूपवैलक्षण्यमस्ति, न चाऽविलक्षणे कारणे कार्यवैलक्षण्यं सम्भवति। प्रागभावस्य प्रध्वंसाभावाद्विलक्षणमस्ति रूपमिति चेत्? कल्प्यमेवं सति किं चित्, तच्चाभावे कल्प्यतां बीजस्वरूपे वेति- बीजस्य साक्षादङ्कुरकारणत्वात् तत्रैव कल्पयितुं युक्तम्। एवं यागादेरपूर्वस्वर्गादिसाधनशक्तिकल्पनमूहनीयम्।

कथं पुनः शक्तिमति यागे विनष्टे निराधारा शक्तिरवतिष्ठते?, न निराधारा भविष्यति-आत्माधारत्वात्। कथमन्यशक्तिरन्यत्र स्यात्?, तथा ऽवगमात्, नावश्यं स्वाश्रयैव शक्तिरिति नियमोऽस्ति, सा हि कार्यतः कल्प्यमाना यत्रैव कार्याय कल्पते तद्गतैव कल्प्या। सा चेयमपूर्वाख्या शक्तिर्यागाश्रया सती यागविनाशान्न स्वर्गनिष्पत्तये पर्याप्नुयादित्यात्माश्रया कल्प्यते। यथाह—

"शक्तिः कार्यानुमेयत्वाद् यद्गतैवोपयुज्यते।
तत्रैव साऽभ्युपेतव्या स्वाश्रयाऽन्याश्रयापि वा*"इति।

कथमात्माश्रया सती यागशक्तिरिति व्यपदिश्यते?। तस्य हि फलसाधनत्वमुपपादयितुं सा कल्प्यते तावता तच्छक्तित्वम्। लोकेऽपि प्रसिद्धमेत-

---

दिशति। एवमिति। नियमाभावे कारणमाह। सा हीति। अस्त्वेवं प्रकृते किमायातमत आह। सा चेति। अत्रैव वार्तिककृत्सम्मतिमाह। यथाहेति। तर्ह्यात्मशक्तिरित्येव वक्तव्यं न

---

* तन्त्रवार्तिकम् २ अ. १ पा. ५ सू०।

त-तैलपानसामर्थ्याच्चिरवृत्तेपि तस्मिन् बलपुष्ट्यादि-कमद्य मे जातमिति लौकिका व्यवहरन्ति, तस्माद्-नवद्यम् ।

दृष्टग्रहणेनैव प्रतीतिमात्रग्रहाच्छ्रौतस्यापि ग्रहणे सिद्धे श्रुतार्थापत्तेः प्रमाणग्राहिणीत्वेन दृष्टार्थापत्तितो

यागशक्तिरिति चोदयति । कथमिति । समाधत्ते । तस्येति । एवं प्रसक्तानुप्रसक्तं परिसमाप्येदानीं लक्षणगतश्रुतपदव्यावर्त्य-माह । दृष्टेति । एतच्च व्याख्यातपूर्वम् । नन्वत्र वार्तिककारैः—

"पीनोदिवा न भुङ्क्ते चेत्येवमादिवचः श्रुतौ ।
रात्रिभोजनविज्ञानं श्रुतार्थापत्तिरुच्यते"(श्लो.वा.अर्था.५१)

इत्यनेनार्थविषयता दर्शिता तत्कथं प्रमाणग्राहिणीत्वमुच्य-ते । अथ—

"दृष्टः पञ्चभिरप्यस्माद्भेदेनोक्ता श्रुतोद्भवा ।
प्रमाणग्राहिणीत्वेन यस्मात्पूर्वविलक्षणा"(श्लो.वा.अर्था.२)

इत्युपक्रमवार्तिकपर्यालोचनया प्रमाणग्राहिणीत्वमुच्येत तर्हि वार्तिकमेव पूर्वापरविरुद्धम् । नैष दोषः । अर्थविषयत्वस्य मतान्तराभिप्रायेणोक्तत्वात् । अत एवानन्तरं तस्याः प्रमाणग्रा-हिणीत्वप्रदर्शनार्थं विप्रतिपत्तिरुपन्यस्ता ।

"तामर्थगोचरां केचिदपरे शब्दगोचराम् ।
कल्पयन्त्यागमाच्चैनामभिन्नां प्रतिजानते"(श्लो.वा.अर्था.५२)

इति । सर्वे चागमान्तर्भूतां मन्यन्त इत्यर्थः । प्रयोजनं चागमान्तर्भावस्य तत्रैवोक्तम्—

"प्रायशश्चाऽनया वेदे व्यवहारो व्यवस्थितः ।
सोऽवैदिकः प्रसज्येत यद्येषा भिद्यते ततः"(श्लो.वा.अर्था.५३)

अत्र केचित्–दिवा न भुङ्क्ते इति श्रुतस्यैव शब्दस्य रात्रिभोजनप्रतिपादकत्वं कल्पयन्ति । अन्येतु—शब्दान्तरमेव तत्प्रतिपादकमिति । तत्र न तावदाद्यः एकस्य वाक्यस्यानेकार्थताऽयोगात् अन्यथापि रात्रिभोजनप्रतिपत्तेः । किञ्च वाक्यस्य वाचकत्वे स्यादप्यनेकार्थता, न चैतदस्ति, पदार्थान्वयरूपेण हि प्रतीयमानो वाक्यार्थः शब्दशक्तिकल्पनाहेतुर्भवति । न च दिवावाक्यस्य रात्र्यादिपदार्थान्वयोऽस्ति, तस्मात्कल्पितस्य वाक्यान्तरस्यैवायमर्थो न श्रुतस्य । तत्र कल्पितं वाक्यं किं प्रमाणमूलकमिति तावद्विचारणीयम् । न तावदस्य प्रत्यक्षं मूलं अनुच्चारितत्वात् । नानुमानं श्रुतवाक्यस्याश्रुतेन सम्बन्धाग्रहणात् । नाऽपि शब्दगम्यत्वमसम्भवात्–किं दिवावाक्यमेव रात्रिवाक्यस्य वाचकं वाक्यान्तरं वा । नाद्यः वाच्यवाचकयोः सम्बन्धाभावात् । नान्त्यः अनवस्थानात् । वाक्यान्तरस्यापि मूलगवेषणायां पूर्वोक्तदोषानतिवृत्तेः । नाप्युपमानगम्यत्त्वं श्रुतवाक्येनाश्रुतवाक्यस्य सादृश्याभावात् । अतः पारिशेष्याच्छ्रुतार्थापत्तिरेव रात्रिवाक्ये प्रमाणम्–तथाहि–पीनत्वे सति दिवाभोजनप्रतिषेधस्यात्मलाभो रात्रिवाक्यं विना नोपपद्यत इति तच्छेपत्वेन रात्रिवाक्यं कल्प्यत इति श्रुतार्थापत्तेः प्रमाणविषयत्वेन दृष्टमर्थापत्तिवैलक्षण्यम् । ननु न रात्रिभोजनवाक्यं पीनत्वस्योपपादकं किन्तु भोजनमेव, अतोऽर्थ एव कल्प्यतां किं शब्दकल्पनयेति ? अथवा रात्रिभोजनसद्भावोऽपि दिवावाक्यस्यैवार्थो भवतु किं प्रमाणान्तरकल्पनेन ? अथ विश्वजिदादिषु फलादेः शाब्दत्वसिद्ध्यर्थं शब्दकल्पनमित्युच्यते ? तर्हि यथा शब्दाभिहितपदार्थगम्योऽपि वाक्यार्थः शब्दमूलतया शाब्दः तथा वाक्यार्थानुपपत्तिगम्योऽप्यर्थो वाक्यमूलतया

वैलक्षण्यमुपपादयितुं श्रुतग्रहणम् । तथा हि– लोके तावद् द्वारं द्वारमित्यादिषु संपूर्णार्थप्रतिपादनाय संव्रियतामित्यादिशब्दान्तरं श्रुतशब्दैकवाक्यत्वेन कल्प्यते ।

तथा वेदेपि–"विश्वजिता यजेत" इत्यत्र स्वर्गकाम इति वा स्वर्गार्थमिति वा येनैव शब्देन श्रुतशब्दैकवाक्यभूतेन परिपूर्णार्थाभिधानं संपद्यते वाक्यं तदेव हृदयमानीय श्रुतेन सह मेलयित्वा परिपूर्णाद्वाक्याद्वाक्यार्थः प्रतीयते । तथा–"सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः" इत्यादिषु विधिष्वितिकर्तव्यताप्रतिपादकशब्दाऽश्रवणादऽपूर्णेषु तत्प्रतिपादकशब्दापेक्षया चोदनालिङ्गोपस्थापितस्याऽऽग्नेयविधेस्त्र्यंशस्य साध्यसाधनांशप्रतिपादकभागावऽनपेक्षितत्वादऽनादृत्य यस्तृतीयोंऽश इत्थम्भावोऽन्यऽन्वाधानादिर्विध्यन्तत्वेन

शब्दोभविष्यति । अत्रोच्यते । श्रुतार्थानुपपत्त्या हि सविकल्पकविज्ञानमुत्पद्यते तच्च शब्दानुवेधेनार्थं विषयीकरोतीति शब्दः पूर्वं प्रतीयते । ततश्च प्रथमावगतेन शब्देनैवानुपपत्तिपरिक्षयात् नार्थं यावदर्थापत्तिर्गच्छति । प्रतिपन्नैस्तु शब्दैरर्थावगतिरिति । यद्यपि स्मर्यमाणस्य शब्दस्य सविकल्पकज्ञानोत्पादकत्वं सम्भवति दृष्टार्थान्यथानुपपत्त्या च सविकल्पकमेव ज्ञानमुत्पद्यते तथापि प्रमाणैकदेशश्रवणान्यथानुपपत्त्या तदवयवस्यैव कल्पनात्तस्यैव भावनायां प्रमाणत्वात् । अधिकन्तु वार्तिकेऽवगन्तव्यम् । एतदेवोपपादयति । तथाहीत्यादिना । वेदेऽपि शब्दान्तरकल्पनां दर्शयति । तथेति । अस्तु वा लोके यथा तथा,

परिकल्पितस्तस्य वाचको यः शब्दः " आग्नेयादिवत् " इति स वाक्यशेषत्वेन कल्प्यते ।

अथ वा किमऽक्लृप्तेनाऽऽग्नेयादिवच्छब्देन कल्पितेन, किं तु य एवाऽऽग्नेयविध्यन्तस्तस्यैव व्यवहितस्यापि चोदनालिङ्गबलोपस्थापितस्य विकृतिविधिना सहैकवाक्यतामात्रमऽर्थापत्त्या कल्प्यते । न ह्ययमनुषङ्गो येन व्यवहितस्य न स्यादिति । अतिदेशस्त्वयं व्यवहितस्यापि कथंचिदुपस्थानादुपपन्न एव । तथा च वक्ष्यति—

"विध्यन्तो वा प्रकृतिवच्चोदनायां प्रवर्तेत"(१) ।

इति । " विध्यन्त इति प्रधानविधिवर्जितं समस्तमेव पौरोडाशिकं काण्डमभिधीयते " इति (शा०) भाष्यकारः ।

नन्वेवं शास्त्रातिदेशाङ्गीकरणे दशमाद्यविरोधः

वेदे त्ववश्यं शब्दान्तरकल्पनयैवोपपत्तिरिति भावः । अक्लृप्तकल्पनापत्त्यपरितोषात्पक्षान्तरमाह । अथ वेति । कथं व्यवहितस्य विकृतिविध्येकवाक्यता उक्तं च "व्यवायान्नानुषज्येत" (२)इत्याशङ्क्याह । नहीति । सूत्रकृत्संमतिमाह । तथा चेति । एकदेशिमतापत्त्या विरोधं शङ्कते । नन्वेवमिति । प्रकारातिदेशस्यैव तत्र स्थापितत्वादित्यर्थः । मन्त्रस्यापि यथाश्रुतस्य प्रयोगापत्त्या ऊहासिद्धिः । बाधाद्यसिद्धिं च ग्रन्थकार एव यदीत्यादिना दर्शयि-

(१) जैमिनिसू० अ.७ पा.४ सू. १० ।

(२) जैमिनि सू० २ अ० १ पा० ४९ सू० ।

स्यात्, ऊहबाधयोश्चासिद्धिः ? । भवेदेवम्—यदि यथा-श्रुतरूपमेव "व्रीहीनवहन्ति" इति वाक्यं विकृतिं नीत्वा तस्य यथासंभवं विकृतिविधिना सहैकवाक्यता परिकल्प्येत, । यदि तथा क्रियते तत्र कृष्णलचरौ व्रीहिशब्दस्य हविर्लक्षणार्थत्वायोगादऽवघातस्य च दृष्टप्रयोजनाभावाद् व्रीहिसाधनकोऽवघातोऽदृष्टार्थो विधीयेत तत्र नावघातस्य बाधः स्यात् । एवं नीवारादिष्वपि-'व्रीहय एवाहन्तव्याः' इति न नीवारादिष्ववहन्तिरूह्येत ।

नत्वेवमस्माभिरुच्यते, किं तु प्रकृतौ प्रधानेन सहैकवाक्यतयाऽवगतस्यास्य यावान् परिकरो यादृग्रूपं तादृगतिदिश्यते, प्रकृतौ व्रीहीणां हविष्ट्वात् तल्लक्षणार्थो व्रीहिशब्दः, अवघातस्य च तेषु दृष्टं प्रयोजनं तुषविमोचनं सम्भवतीति तद्द्वारेणास्य प्रधानैकवाक्यता । ततश्च- 'अवघातवितुषीकृतैर्व्रीहिभिः पुरोडाशं कृत्वा तेन यजेत' इतीदृशः प्रकृतिविधिः, तस्य प्रधानप्रतिपादको योंऽशः " यजेत " इति तद्वर्जं विशेषणांशो विकृतिवाक्येन सम्बध्यते, तस्य च न साक्षादवघातो विशेषणम्, अवघातविशेषितवितुषीकरणविशिष्टं हि हविर्यागस्य विशेषणं प्रकृतौ अतस्तदेव विकृतावाऽऽकृष्यते । कृष्णलयागे च कृष्णलशब्दस्य हविर्वाचिनः प्रत्यक्षश्रवणात् तद्विरोधात् पुरोडाशशब्दो निवर्तते तन्निवृत्त्या च व्रीहीणामपि निवृत्तिः, न हि ते

ष्यति । परिहरति । भवेदिति । किं तर्ह्यतिदिश्यत इत्याकाङ्क्षायामाह ।

कृष्णलानां प्रकृतित्वेन सम्भवन्ति। वितुषीकरणशब्दोऽपि यो द्वारप्रतिपादकः सोऽपि कृष्णलेषु तदसम्भवान्निवृत्तः, तद्विशेषणं चावघात इति सोऽपि निवर्तते इति बाधसिद्धिः। नीवारादिषु तु वितुषीकरणसम्भवादऽनिवृत्तोऽवघात इत्यूहस्यापि सिद्धिः। दशमाद्ये च यावच्छ्रुतानामङ्गशास्त्राणामतिदेशमाशङ्क्य प्रकृत्यान्वितानां तेन रूपेणातिदेशः सिद्धान्तित इत्यलमतिप्रसङ्गेन।

नन्वर्थमेवाध्याहृत्य वाक्यं पूर्यतां किं शब्दकल्पनया?। नार्थमात्रेण पूरणं सम्भवति, एकवाक्यभूतपदप्रतिपादिता हि पदार्था वाक्यार्थं प्रतिपादयन्ति नान्यथा, न हि 'आनय' इत्येतावत्युक्ते 'गाम्' इत्यनुक्ते प्रत्यक्षप्रतिपन्नेऽपि गवि गवासहाऽऽनयनमन्वीयते। एवं च विकृतिषु सौर्यादिष्वऽसमवेतार्था(१)ग्न्यादिपदनिवृत्तेर्न्यूनसाकाङ्क्षमन्त्रवाक्यपूरणाय सूर्यादिपदप्रक्षेपादूहसिद्धिः।

अर्थाध्याहारवादिनां तु सूर्यार्थेनाध्याहृतेन विशिष्टं निर्वपामिपदमेव प्रकाशयतीति नोहः सिध्येत्। तथा यत्राधिकारवाक्येऽर्थवादमात्रं श्रुतम्—"प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति" इति तत्रापि भवन्मते विध्यर्थ एवाध्याहार्यो न विधिशब्दः, ततश्च प्राकृतस्योपकारस्य पदार्थानां च नाऽपूर्वैदमर्थ्यं सिद्ध्ये-

किन्त्विति। अर्थाध्याहारवादी शङ्कते। नन्वर्थमिति। शब्दस्या-

(१) समवेत्राहितार्था इति पु० पा०।

त् । सत्स्वपि ह्यर्थानामाकाङ्क्षासंनिधियोग्यत्वेषु नाभिधानमन्तरेणान्वयसिद्धिः । न चेहापूर्वाभिधायी शब्दोऽस्ति योऽपूर्वं प्राकृतैरन्वितमभिदध्यात् । नापि प्राकृताः शब्दा विकृतौ सन्ति ये स्वार्थानपूर्वान्वितानभिदध्युः । न चार्थवादपदार्थैस्तेषामन्वयः नाप्युत्पत्त्यपूर्वेणेत्यनन्वय एव स्यात् ।

एवं प्रकृतावपि "सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ" इत्यत्र विधिशब्दस्याऽनाम्नानादनध्याहाराच्च विध्यर्थस्यैव स्वर्गकामाधिकारापूर्वादाग्नेयाद्युत्पत्त्यपूर्वेभ्यश्च पृथग्भूतस्याध्याहारान्न समिदादीनामैदमर्थ्यं सिद्ध्येत् । नहि समिदादियजतयोऽवघातादिवदधिकारापूर्वान्वितं स्वार्थमभिधातुमलं स्वापूर्वविषयत्वव्याघातात् । तस्मादीदृशेष्वधिकारविधिषु विधिशब्द एवाध्याहार्यो नार्थः ।

कथं च विध्यर्थस्यात्यन्ताऽलौकिकतया प्रमाणेन तदाभासेन वा बुद्धावारोपयितुमशक्यत्वेनाभिमतस्य बुद्धिसंनिधानात्मकोऽध्याहारोऽश्रुतविधिशब्दकेष्वधिकारवाक्येषु वा उत्पत्तिवाक्येषु—"यदाग्नेयोऽष्टाकपालोऽमावास्यायाम्" इत्यादिषु वा श-

---

पि कल्पितस्यार्थोपस्थापन एव व्यापारादिति भावः । अर्थाध्याहारवादिनां प्रकृतावप्यनिष्टापत्तिमाह । एवमिति । नाप्यर्थाध्याहारः कर्तुं शक्यत इत्याह । कथं चेति । दूषणमुपसंहरति ।

क्यते ?, इत्यकामेनापि शब्दाध्याहारोऽङ्गीकर्तव्य इत्यास्तां तावत् ॥

॥ इत्यर्थापत्तिवादः ॥

"अभावोपि प्रमाणाभावो नास्तीत्यस्यार्थस्याऽसंनिकृष्टस्य" (शा. भा.) इति ।

कथं पुनः प्रमाणाभावः प्रमाणलक्षणं विपरीतत्वात् ? पूर्वोक्तसदुपलम्भकप्रत्यक्षादिप्रमाणपञ्चकाभिप्रायोऽयं प्रमाणशब्दः तदभावश्च षष्ठस्य

इतीति । अर्थापत्तेर्भेदप्रतिपादनप्रयोजनं वार्तिककारैरुक्तम् । तथाहि—

"स्मृत्या श्रुतिर्या परिकल्प्यतेऽस्मिन् लिङ्गादिभिर्या विनियोजिका च ।

फलादिभिर्यत्परिपूरणं च सम्बन्धदृक् तत्र न काचिदस्ति ॥८७॥

तत्सर्वमित्याद्यसमञ्जसं स्यात् न चेदियं स्यादनुमानतोऽन्या ।

एवं स्वभावाऽप्यनुमानशब्दं लभेत चेदस्तु यथेप्सितं वः" ॥

(श्लो. वा. अर्था. ८८)

॥ इत्यर्थापत्तिः ॥

इदानीमभावाख्यं षष्ठं प्रमाणं निरूपयितुमारभते । अभावोऽपीति । प्रमाणाभावः प्रमाणमिति यथाश्रुतं लक्षणभाष्यमाक्षिपति । कथमिति । समाधत्ते । पूर्वोक्तेति । तदुक्तम्—

"प्रमाणपञ्चकं यत्र वस्तुरूपेण व्यज्यते ।

वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता"(श्लो. वा. अनु.) इति॥

ननु केवलभूप्रदेशातिरेकेण घटाभावस्याभावात्किमस्य

लक्षणमिति नानुपपत्तिः । किमस्य प्रमेयम् ?, उक्तम्—"नास्तीत्यर्थस्य" इति । सर्वं हि वस्तु सदसदात्मना द्विविधं—तद् यदा यत्र सद्रूपेण वर्तते घटादि तत्सदा तत्र प्रत्यक्षादिभिरस्तीति प्रतीयते । यत्र त्वसद्रूपेण वर्तते तत्र सद्रूपेण बोधकानां प्रत्यक्षादीनां सद्रूपबोधनायोत्पत्तुं योग्यत्वे सत्यपि योऽनुत्पादो द्रव्यादर्शनयोग्यानुपलम्भादिपर्यायो भाष्ये प्रमाणाभावशब्देनोक्तस्तेनैवेन्द्रियशब्दादिस्थानीयेन ना-

---

प्रमेयमित्याह । किमिति । एतदुत्तरत्वेन नास्तीत्यादिभाष्यं योजयति । उक्तमिति । नास्तीत्यस्यार्थस्येत्यनेन भाष्यकृता भूप्रदेशातिरिक्तस्मर्यमाणघटावच्छिन्नभूप्रदेशाधिकरणं नञर्थरूपप्रमेययुक्तमित्यर्थः। असन्निकृष्टस्येत्यनेनापि प्रत्यक्षाद्यविषयत्वमुक्तम् । एतदेवोपपादयति । सर्वमिति । तच्च नास्तितारूपमभावाख्यं प्रमेयं चतुर्विधं वार्तिककारैरुक्तम् । तथाहि—

"क्षीरे दध्यादि यन्नास्ति प्रागभावः स उच्यते ।
नास्तिता पयसो दध्नि प्रध्वंसाभावलक्षणम् ॥
गवि योऽश्वाद्यभावस्तु सोऽन्योन्याभाव उच्यते ।
शिरसोऽवयवा निम्ना वृद्धिकाठिन्यवर्जिताः ॥
शशशृङ्गादिरूपेण सोऽत्यन्ताभाव उच्यते"(श्लो.वा.अनु.४)।

अयं च वस्त्वसङ्करोऽसत्यभावप्रामाण्ये न सिध्यतीत्यभिप्रायेणोक्तम्—

" क्षीरे दधि भवेदेवं दध्नि क्षीरं घटे पटः ।
शशे शृङ्गं पृथिव्यादौ चैतन्यं मूर्तिरात्मनि ॥

स्तीति प्रमीयते-भूतलेऽत्र घटो नास्तीति ।

यस्तु नास्तित्वमपन्हुत्य प्रमेयाभावात् षष्ठं प्रमाणं नास्तीत्याह, तस्य दृश्यादर्शनानन्तरं नास्तीह भूतले घट इत्येवमुपजायमानस्य ज्ञानस्य किमालम्बनम् ? । न भूतलम्, सत्यपि घटे प्रसङ्गात् । तथा-गवि योऽश्वो न भवतीति प्रत्ययो रूपे च रसो न भवतीति तस्य किमालम्बनम् ? न गोरूपम्, तस्य प्रतियोग्यऽनपेक्षप्रतीतिकत्वात् । अश्वो न भवतीति ज्ञानस्य प्रतियोग्यऽपेक्षत्वात् । गोरूपालम्बनत्वे च सिंहादावऽश्वोयं न भवतीति प्रत्ययो न स्यात् गोरूपस्य तत्राभावात् ।

अथ योऽश्वाद्भेदो गवादिष्वनुस्यूतः सोऽस्यालम्बनमित्युच्यते ? । कोयं भेदो नाम ?, यदीतरेतराभावः ? समाश्रितस्तर्ह्यभावः । अथ पृथक्त्वं नाम गुणविशेषो भेद इत्युच्यते ?, ततस्तस्य द्रव्यगतत्वाद् गुणेषु रूपादिषु 'रसो न भवति रूपम्' 'रूपं न भवति रसः' इतीतरेतराभावप्रत्ययो न स्यात् ।

यस्तु वैयात्याद् 'भूतलप्रतीतिव्यतिरेकेण घटो नास्तीत्येवंविधा प्रतीतिरेव नास्ति' इति वदति, स

अप्सु गन्धोरसश्चाग्नौ वायौ रूपेण तौ सह ।
व्योम्नि संस्पर्शिता ते च न चेदस्य प्रमाणता " (श्लो. वा. अनु. ६) इति ।

मतान्तरमाशङ्क्य निराकरोति । यस्त्विति । कश्चित्तु प्रतीतिमेवापह्नुते तं प्रत्याह । यस्त्विति । इतश्चाभावाख्यं प्रमेय-

भूतलादिप्रतीतिमप्यऽपन्हुवीत, अविशेषात् । घटोत्र भूतले नास्तीति व्यवहारस्य किं कारणम् ?, दृश्ये घटे यद्भूतलमात्रविषयं (एकाकिभूतलविषयं) ज्ञानं तदस्य कारणमिति चेत् ?, तथा सति पटवद्भूतलोपलम्भे घटो नास्तीतिव्यवहारो न स्याद् भूतलमात्रोपलम्भाभावात् । घटविविक्तभूतलोपलम्भ इति चेत् ?, कोयं घटविवेकः ?, यदि भूतलरूपमेव, घटवत्यपि प्रसङ्गः । घटसंयोगाभावश्चेत् ?, अङ्गीकृतस्तर्ह्यऽभावः ।

स्यान्मतम्–यदऽभाववादिनोऽभावज्ञानस्य कारणं तदेवास्माकं व्यवहारकारणं भवतु ? इति, नैवं वक्तुं शक्यम्–मम हि दृश्यादर्शनमऽभावज्ञानकारणम्, अदर्शनं च दर्शनाभावो न चासौ भवताऽङ्गीकृतः, अभावाभ्युपगमप्रसङ्गात् । प्रमाणाभावाङ्गीकारे वा किमऽपराद्धं प्रमेयाभावेन ? ।

ननु प्रथमं प्रत्यक्षेण भूतलं गृहीत्वा पश्चादभावो बोद्धव्यस्तत्राऽभावज्ञानात् प्राग् यादृशं भूतलज्ञानं तादृशादेव व्यवहारो भवतु ?, तदिदमुक्तोत्तरम्, त-

---

मस्तीत्याह । घटोऽत्रेति । अत्राभावातिरिक्तं कारणं शङ्कते । दृश्य इति । भूतलमात्रेत्यस्यार्थमाह । एकाकीति । परिहरति । तथेति । पटविशिष्टस्य भूतलस्यैकाकित्वाभावादित्यर्थः । प्रकारान्तरेण शङ्कते । घटेति । नास्तीति व्यवहारस्य कारणमित्यनुषङ्गः । प्रकारान्तरेण पुनः शङ्कते । नन्विति । अस्त्वेवं किमेतावता स्यादत आह । तत्रेति । निराकरोति । तदिदमिति । उक्तोत्तरत्वं विवृणोति । तथाहीत्यादिना । उक्तेऽर्थे वार्तिकं

था हि—यस्यामवस्थायां भूतलस्वरूपज्ञानं घटतदभाव-योश्चाऽज्ञानम्-ज्ञानाभावस्तेन घटतदभावज्ञानशून्यं भूतलज्ञानं तस्यावस्थायामस्माभिरुपेयते तदेव च भूतलमात्रवेदनमित्युच्यते ।

"स्वरूपमात्रं दृष्ट्वा च" इत्यादिषु मात्रशब्देन हि घटतदभाववेदनयोरभाव उच्यते,—भूतलमात्रं ज्ञायते न घटस्तदभावो वेत्यर्थः । तेन यदि भवानपि घटादिज्ञानाभावयुक्तं भूतलज्ञानमङ्गीकुर्यात् ततो ज्ञानाभावाङ्गीकाराद् घटाभावोप्यङ्गीकर्तव्य इत्युक्तमेव । तेन नैवं भ्रमितव्यम्—' अभाववादिनापि—

"स्वरूपमात्रं दृष्ट्वा च(ऽपि)पश्चात् किंचित्स्मरन्नपि"
(श्लो० वा० अनु० २८)

इति वदताऽभावज्ञानातिरेकेण तन्मात्रवेदनमङ्गीकृतम्, तदेव दृश्ये प्रतियोगिनि नास्तीतिव्यवहारकारणत्वान्नास्तीतिशब्दस्याभिधेयम्' इति, तस्य हि ज्ञानाभावाभिप्रायो मात्रशब्दः, न चासौ भवतोस्ति, अतो मात्रशब्दस्याऽर्थाभावाद् भूतलवेदनमेव कारणमिति वक्तव्यं ततश्च घटवत्यपि प्रसङ्ग इति स्थितं दूषणम् ।

संवादयति । स्वरूपमात्रमिति । "पश्चात्किंचित् स्मरन्नपि ।
तत्राऽन्यनास्तितां पृष्टस्तदेव प्रतिपद्यत" इति श्लोकशेषः ।

एतमेवार्थमक्षरारूढं करोति । भूतलेति । ततः किमत आह । तेनेति । ननु स्वरूपमात्रमित्यत्र भूतलमात्रज्ञानमङ्गीकृतमिति प्रतीयते ततश्च तदेव नास्तीति शब्दस्याभिधेयमिति कस्यचिद्भ्रान्तिस्तां निराकरोति । तेन नैवमिति । पुनः प्रकारा-

अथ 'भावे देशान्तरस्थे देशान्तरग्रहणं कारणम्' इति मतम् ?, ततः शाबलेयस्थितं गोत्वं धावलेये नास्तीति व्यवह्रियेत, । स्थूणान्तरास्थितश्च वंशः स्थूणान्तरेऽनुस्यूतोपि तत्र नास्तीति व्यवहर्तव्यः स्यात्, अतोऽत्राभाव एव नास्तीति व्यवहारकारणम्, नान्यत्र सद्भावः ।

स्मर्यमाणे घटे भूतलवेदनं नास्तीतिव्यवहारकारणमिति चेत् ?, न, गृह्यमाणस्यापि पार्श्वदेशेष्वभावव्यवहारात् । संप्रत्यानीतस्य च घटस्य गृह्यमाणस्यैव 'प्रागयमिह नासीत्' इति प्राक्कालीनाभावव्यवहारात् ।

ननु भवन्मते प्रमीयमाणस्य घटस्य कथं प्राक्कालीनाभावज्ञानम् ! भावप्रमाणाभावो ह्यभावज्ञानकारणं न च प्रमीयमाणे प्रमाणाभावः सम्भवति । संप्रति प्रमीयमाणोपि घटः प्राक्कालसम्बन्धितया न प्रमीयते अतः प्राक्कालसम्बन्धगोचरप्रमाणानुदयात् तत्कालीनाभावज्ञानं युक्तमेवेति चेत् ?, न, अयोग्यत्वात्-

---

न्तरेण शङ्कते । अथेति । घटादौ देशान्तरस्थे देशान्तरस्य ग्रहणं नास्तीतिव्यवहारस्य कारणमित्यर्थः । दूषयति । तत इति । अथ प्रदेशान्तरेऽपि तस्याभावान्नास्तीति व्यवहारो नभवति अतोभावे सत्येव नास्तीति व्यवहारादभाव एव कारणमित्यर्थः । गृह्यमाणस्यैवाभावव्यवहारादिति श्रुत्वा लब्धावसरः शङ्कते । नन्विति । असम्भवे कारणमाह । भावेति । परिहारं शङ्कते । सम्प्रतीति । दूषयति । नेति । अयोग्यतामेवो

न हि प्राक्कालसम्बन्धोऽधुना प्रमातुं योग्यः, योग्यप्रमाणाभावश्चाभावज्ञानकारणं न प्रमाणाभावमात्रम् । प्राक्काले तु योग्यस्यैव प्रमाणस्यानुदय आसीत्, न हि तदानीं घटाभावः सन्नपि प्रमितः प्रतियोगिनो घटस्याऽपरामर्शात् तदपेक्षत्वाच्चाऽभावज्ञानस्य, अत एव घटाभावोऽधुना स्मर्यते, इति न युक्तम्—अप्रमितस्य स्मरणाऽयोगात् । यश्चायं प्राक्कालीनः प्रमाणानुदयः सोऽधुना प्रमाणोदयेन नष्टो नाऽभावज्ञानमुत्पादयितुमर्हति, उद्धृतमिव नेत्रं रूपबुद्धिम् ।

अथ नष्टोपि प्रमाणानुदयः संप्रति परामृश्यमानोऽभावज्ञानं जनयेत्, ह्यस्तन इव धूमो विनष्टोपि संप्रति स्मर्यमाणो ह्यस्तनाग्निज्ञानम् ? । स्यादेवं यदि प्रमाणाभावो ज्ञायमानतया मेयाभावं बोधयेत् लिङ्गमिव लिङ्गिनम्, न च तथा सम्भवति—अनवस्थाप्रसङ्गात्, प्रमेयाभावं हि ज्ञातुं प्रमाणाभावो ज्ञातव्यः, सोपि चाऽभावत्वादन्येनाभावज्ञानेन ज्ञातव्यः, सोप्यन्येनेति न जन्मसहस्रेणापि घटाभावोऽवधार्येत । तस्मात् सत्तामात्रेणैव प्रमाणाभावोऽभावज्ञानमुत्पादयति नेत्रादिवदित्यङ्गीकर्तव्यम्, अतः प्रमीयमाणस्य घटस्य कथं प्राक्कालीनाभावप्रमितिरिति वक्तव्यम् ।

उच्यते—सत्तामात्रेण ज्ञानाभावो ज्ञेयाभावं बो-

पपादयति । न हीत्यादिना । वैषम्येण परिहरति । स्यादेवमिति । शङ्कामुपसंहरति । अत इति । समाधत्ते । उच्यत इति ।

धयतीति सम्यगुक्तम्, अस्त्येव स्वऽधुना दृश्यमान-स्यापि घटस्य प्राक्कालसम्बन्धगोचरयोग्यज्ञानानुदयः, स हि प्राक्कालसम्बन्धितया स्मर्तुं योग्यः सन्नपि न स्मर्यते, न चावश्यं प्रमाणाभाव एवाभावस्य बोधकः स्मरणज्ञानस्यापि योग्यत्वे सत्यऽनुदयोऽभावं बोधयत्येव, तेन सम्प्रति दृश्यमानोपि घटो यदि प्रागप्यासीत् ततोऽवश्यं तत्र स्थितेन प्रमितः स्यात् प्रमितश्चाधुना स्मर्तव्यः स्यात्, एवं सत्यपि न स्मर्यते—सोयं स्मर्तव्यविषयस्मरणानुदयः सम्प्रति विद्यमानः सम्प्रतितनं प्राक्कालीनाभावविषयं विज्ञानं जनयतीति न किं चिदनुपपन्नम् । भाष्ये च प्रमाणाभावशब्दः स्मरणाभावस्याप्युपलक्षणार्थः, तथा वार्तिकेऽपि । यद्वा प्रमाणस्य स्मरणफलत्वात् तदभावोपि फलतः प्रमाणाभाव एवेति शक्यते वक्तुम् ।

ननु न सत्तामात्रेण योग्यानुपलब्धेरभावबोधकत्वं युक्तम्—सत्यामपि तस्यां कदाचिदभावबुद्ध्यऽनु-

---

ननु भाष्ये प्रमाणाभावग्रहणात् कथं स्मरणाभावो बोधक इत्युच्यते तत्राह । भाष्ये चेति । अस्मिन्नर्थे वार्तिकमप्युदाहरति । तथेति । सत्तामात्रेण बोधकत्त्वमिति यदुक्तं तत्र शङ्कते । नन्विति । एतदेव विवृणोति । तथा हीति । ततश्चैतात्सिद्धमित्याह । तस्मादिति । ननु चेत्यादिसिद्धान्तिग्रन्थः शङ्कापरिहारार्थः । नन्विति । पूर्वपक्षिसम्बोधनार्थमस्तु नामाभावाङ्गीकारस्तथापि प्रमेयत्वं प्रमाणत्त्वं च कथं निरूपणीयमिति पृच्छति । कथमि-

दयात्. असत्यामपि कदाचिदुदयात् । तथा हि- योऽङ्गुलीयकबुभुत्सया ससन्तमसापवरकदेशं हस्ताभ्यां सर्वतः परामृष्टवान् तस्य तावत् सर्वदेशपरामर्शाद् वस्तुतो योग्यानुपलब्धिर्जातैव, अथ च किं सर्वो देशः परामृष्टः किं वा कश्चिद्देशो न परामृष्टोपि स्यादिति सन्दिहानो योग्यानुपलब्धेरनिश्चयात् सत्यामपि तस्यां नाङ्गुलीयकस्याऽभावमवधारयति । कदाचित्तु सर्वतोऽपरामृश्यापि सर्वतः परामृष्टमिति भ्रान्त्या योग्यानुपलब्धिं निश्चित्याऽसत्यामेव तस्यां भ्रान्त्याऽङ्गुलीयकस्याऽभावमवधारयति । तस्माज्ज्ञाततयैव योग्यानुपलब्धिरभावज्ञानकारणमित्यभ्युपगन्तव्यं तथा चाऽनवस्थाप्रसङ्गः । तस्मात्स्वसंवेद्या तन्मात्रसंविदेव दृश्यस्य प्रतियोगिनोऽभावो न तत्त्वान्तरम् ।

ननु चाऽभावानङ्गीकारे तन्मात्रधीरपि न कदाचिन्निरूपयितुं शक्यते- न च भूतलधीरेव तन्मात्रधीः, संसृष्टधियोपि तन्मात्रतापातात् तत्रापि भूतलावभासात्, अतो घटादिवेदनाभावे सति या भूतलधीः सा तन्मात्रधीः, एवं च ज्ञानाभावाङ्गीकाराद्ऽभावापन्हवोऽनर्थकः । कथं तर्ह्येतान्निरूपयितव्यम् ?, तदभिधीयते-घटाद्यभावोऽस्ति प्रमेयम्, योग्यप्रमाणानुदयश्च तस्य सत्तामात्रेणैव नेत्रादिवद् बोधको न ज्ञाततया, यतोऽनवस्था स्यात् ।

ति । निरूपयितुमारभते । तदभिधीयते इति । पूर्वोक्तव्यभिचारं

यत्तु सत्यामपि योग्यानुपलब्धावऽभावानवधारणम्, असत्यां चावधारणमिति, तत्तु योग्यत्वाऽज्ञानकृतम्–योग्यानुपलम्भो हि कारणं तत्र योग्यत्वं ज्ञाततयैव कारणं न सत्तामात्रेण, ततः सदेव योग्यत्वं कदा चिदऽज्ञातं नाभावमवधारयति. कदा चित्त्वऽविद्यमानमेव योग्यत्वं भ्रान्त्या निश्चित्याऽभावमवधारयति। उपलब्ध्यऽभावस्तु सन्मात्रतया कारणं न ज्ञाततया तेन नाऽनवस्थापत्तिरिति सर्वमवदा-

---

परिहर्तुमनुवदति। यत्त्विति। उपपादितमर्थं निगमयति। अत इति। यस्मात्सर्वोऽप्ययं कार्यकारणादिव्यवहारोऽभावं विना नोपपद्यते तस्मादभावाख्यं प्रमेयमस्तीत्यर्थः। न चावस्तुन एते भेदाः सम्भवन्ति। किञ्च कारणस्वरूपमेव कार्यस्याभावः अतोऽपि वस्तुत्वम्। उक्तं च—

"कार्यादीनामभावः को योऽभावः कारणादितः" (श्लो. वा. अनु. ८)।

एतच्चानुपपन्नं कारणातिरिक्ताभावोपपादनेन वस्त्वसंकरस्य पूर्वं साधितत्वात्। भावस्वरूपत्वे चाभावस्य प्रत्यक्षावसेयत्वेनाभावप्रमाणोच्छेदः। सत्यम्। नात्र कारणस्वरूपमेवाभाव इत्युच्यते किन्तु कार्याभावस्य वस्तुत्वसिद्ध्यर्थं कारणधर्मत्वमुच्यते क्षीरमेव दध्यभावः तद्धर्मधर्मिणोश्चानतिभेदात् तदयं वस्तुधर्मः सन् कथमवस्तु स्यादिति। प्रयोगद्वयं चात्र वार्तिककारैरुक्तं—

"यद्वाऽनुवृत्तिव्यावृत्तिबुद्धिग्राह्यो यतस्त्वयम्।
तस्माद्गवादिवद्वस्तु प्रमेयत्वाच्च गम्यते" (श्लो. वा. अनु. ९)

तम् । अतोऽस्त्यऽभावाख्यं प्रमेयम् ।

न च तदैन्द्रियकम्, इन्द्रियव्यापाराभावेपि त-

न चैतस्य प्रत्ययद्वयस्य मिथ्यात्वं बाधकप्रत्ययाभावात् । नन्वस्तु नामाभावाख्यं प्रमेयं तस्य प्रमाणं किंलक्षणकमिति तावद्वक्तव्यम् । ननूक्तं भाष्यकारेण "अभावोऽपि प्रमाणाभाव" इति, तत्राभाव इति लक्ष्यनिर्देशः प्रमाणाभाव इति लक्षणं प्रत्यक्षादेरर्थापत्तिपर्यन्तस्य यथाविषयमनुत्पत्तिः अभावप्रमाणस्य लक्षणमित्यर्थः । प्रत्यक्षाद्यनुत्पत्तिस्तु अभावरूपे वस्तुनि इह प्रदेशे घटोनास्तीति या बुद्धिः साऽभावाख्यं प्रमाणमित्युक्तं भवति । ननु निमीलिताक्षस्याभावज्ञानानुत्पत्तेरिन्द्रियार्थसन्निकर्षे सत्युत्पत्तेः प्रत्यक्षमेवैतत् न च सन्निकर्षाभावः संयुक्तविशेषणताया एव सम्बन्धत्वादफलवती शाखेतिवदित्याशङ्क्याह । न चेति । अयमाशयः । न तावदिन्द्रियाभावयोः संयोगः अद्रव्यत्वात् समवायादेश्चानङ्गीकारात् । नापि संयुक्तविशेषणत्वं प्रत्यासत्तिः असति सम्बन्धे विशेषणत्वायोगात् । नहि भूतलघटाभावयोः कश्चित्सम्बन्धोऽस्ति येनाभावस्तद्विशेषणं स्यात् सम्बन्धं च विना विशेषणविशेष्यभावे हिमवद्विन्ध्ययोरपि तदापातात् । भावाभावयोः स्वरूपमेव सम्बन्ध इति चेत् । न । तस्य सम्बन्धलक्षणरहितस्याऽसम्बन्धत्वात् । नन्वेवमिन्द्रियाभावयोरपि स एवास्तु किं विशेषणताङ्गीकारेण तदङ्गीकारे वा गुणादेरपि तयैव प्रत्यासत्त्या ग्रहणात् संयुक्तसमवायादिवैयर्थ्यापत्तिः संयुक्तविशेषणत्वेन च घटाभावस्याक्षग्रहणे रसादयोऽपि चक्षुषा गृह्येरन् । अयोग्यत्वादग्रहणमिति चेत् तर्हि योग्यतैवैका कार्यानुमेया ग्रहणकारणमिति सन्निकर्षषट्प्रकारत्वमनुपपन्नम् । ननु

ज्ज्ञानोत्पत्तिदर्शनात्—योऽहनि प्रातःकाले गृहे ऽवस्थितो मध्यन्दिनसमये पृच्छ्यते— 'किमस्मिन् गृहे प्रातः काले माथुरः कश्चित् पुरुषः शुक्लवासा दीर्घतमो लोहितवर्णः समागतः !' इति स तदानीमेव योग्यस्मरणानुदयात् तस्याभावं प्रातःकालीनमऽवधारयति विनैवेन्द्रियव्यापारेण। न च प्रातरवगतोऽभावस्तदा स्मर्यत इति वाच्यम्, प्रतियोगिनो माथुरस्य तदानीं कथं चिदपि बुद्धावऽनारोहात्, अबुद्धिस्थे च प्रतियोगिनि भावे तदभावज्ञानाऽसम्भवात्। एवं च यत्रापीदानीमेवाऽनुपरतेन्द्रियव्यापारेणैव संनिहितदेशकालवर्त्यऽभावः प्रतीयते तत्रापि योग्यज्ञानानुदयस्यैव क्लृप्तसामर्थ्यस्य कारणत्वसम्भवान्नेन्द्रियस्य कारणत्वं कल्पयितुं शक्यम्। तस्मान्न प्रत्यक्षोऽभावः। नाप्यनुमेयः, अज्ञातेन तेन कस्य चिल्लिङ्गस्य सम्बन्धग्रहणासम्भवात्।

यदत्र कैश्चिदुच्यते—'दृश्यस्य सत्ता दर्शनव्याप्ता तेन व्यापकीभूतदर्शननिवृत्त्या व्याप्यस्य दृश्यस्य नि-

---

भावादभिन्नत्वेन अभावस्यापीन्द्रियग्रहणयोग्यताऽस्त्येव। मैवम्। भेदस्याप्यङ्गीकारेणात्यन्तमभेदाभावादिति दिक्। इन्द्रियव्यापाराभावेऽपि ज्ञानोत्पत्तिं दर्शयति। योऽहनीत्यादिना। अत्रैव स्वरूपमात्रं दृष्टं वेत्युदाहार्यम्। उपपादितमर्थं निगमयति। तस्मादिति। अनुमानेऽन्तर्भावं निराकरोति। नापीति। अनुमानाद्भेदं निगमयति। सिद्धमिति। शब्दाद्यन्तर्भावसम्भावनैव नास्तीति कृत्वा तद्भेदोपपादनं न कृतमित्यर्थः। महाप्रकृतं नि-

वृत्तिरवसीयते' इति तन्निरस्तम् । व्यापकनिवृत्त्या व्याप्यनिवृत्तिमऽनुमिमानेनाऽवश्यं दृष्टान्तधर्मिषु निवृत्तिद्वयमवगम्य तयोश्च नियममवधार्य साध्यधर्मिणि पक्षे च साधनभूतां दर्शनानिवृत्तिं केनचित् प्रमाणेनावगम्य ततो दृश्यनिवृत्तिरनुमातव्या, निवृत्तेश्चाऽभावात्मिकाया न प्रत्यक्षेण ग्रहणं सम्भवति, निवृत्त्यन्तरेण तदनुमाने तदपि निवृत्तिरूपत्वान्निवृत्त्यन्तरेणाऽनुमातव्यं तदपि तथेत्यनवस्थापत्तिः । अतोऽवश्यं क्वचित् प्रमाणान्तरभूतयाऽनुपलब्ध्याऽभावः प्रत्येतव्यः, प्रमिते च तस्मिन् पश्चाद् भवत्वनुमानम् । सिद्धं तावदभावस्य प्रमाणान्तरत्वम् । शाब्दोपमानार्थापत्तयस्तु नाशङ्कनीया एव । अतः सिद्धं

गमयति । अत इति । ननु सर्वस्य प्रमाणस्य भावात्मकस्यैवोपलम्भादभावस्य प्रमाणत्वोपपादनमनुचितम् । सत्यम् । तस्य भावप्रमेयविषयत्वात् अभावे तु प्रमेयेऽभावस्यैव प्रामाण्यौचित्यात् प्रमेयानुरूपस्वात्प्रमाणाङ्गीकारस्य । यथाहुः

"भावात्मके यथा मेये नाभावस्य प्रमाणता ।
तथैवाभावमेयेपि न च भावप्रमाणता ॥
भावात्मकस्य मानत्वं न च राजाज्ञया स्थितम् ।
परिच्छेदफलत्वात्तु प्रामाण्यं स्याद्द्वयोरपि"(श्लो.वा. अनु.) इति ।

प्रयोगश्च प्रमाणाभावः प्रत्यक्षादेर्भिद्यते अभावशब्दवाच्यत्वात् प्रमेयाभाववत् । तथा प्रमेयाभावः स्वानुरूपेण प्रमाणेन मीयते प्रमेयत्वात् भावाख्यप्रमेयवदिति । प्रयोजनं च वार्तिककारैरुक्तम्—

षष्ठं प्रमाणम् । एतावन्त्येव च प्रमाणानि ॥

यत्त्वधिकं सम्भवाख्यं प्रमाणम्—सहस्रादिसङ्ख्याऽवयवभूतशतादिसङ्ख्याऽवगतिः, आढकप्रमाणेनाऽवयवकुडवपरिमाणावगतिः कैश्चिदिष्यते, तदऽविनाभावनिमित्तत्वादनुमानमेव । 'वटे वटे वैश्रवणः' इत्यादिकं चैतिह्यं प्रमाणमेव न भवति निर्णयाभावात् । प्रामाण्येपि वाऽऽगमेऽन्तर्गतत्वान्न प्रमाणान्तरम् । प्रातिभाख्यमपि प्रमाणं कैश्चिदिष्टम्—"श्वस्ते भ्राताऽऽगन्ता" इत्यादिकम्, तत्तु लिङ्गाद्याभासजम्. अनिश्चायकत्वादेवाऽप्रमाणम् । अतो यत्काश्यपीयैः प्रतिभागम्यमृषीणां धर्माधर्मत्त्वमाश्रितं तदऽसारम् । लोकप्रसिद्धिरपि प्रत्यक्षाद्यन्तर्गतैवेति न प्रमाणान्तरम् । अतः षडेव प्रमाणानि, तथा च भग-

"कर्माणि सर्वाणि फलैः समस्तैः सर्वैर्यथावच्च यदङ्गकाण्डैः ॥
न सङ्गतानीह परस्परं च नाङ्गं तदेतत् प्रभवं क्रतूनाम्".
(श्लो० वा० अनु० ५६)इति।

पौराणिकमतमनुवदति । यत्त्विति । उक्तं च ।

"इह भवति शतादौ सम्भवाद्यासहस्रान्मतिरवियुतभावात्सानुमानादभिन्ना ॥

जगति बहु न तथ्यं नित्यमैतिह्ययुक्तं भवति तु यदि सत्यं नागमाद्भिद्यते तत्" (श्लो० वा० अनु० ५८) ॥

सिद्धान्तमुपसंहरति । अत इति । एवं युक्तिभिः प्रमाणषट्कमुपपाद्याऽऽगममप्युदाहरति । तथा चेति ।

॥ इत्यभाववादः ॥

यद्रामायणे–

"राम षड्युक्तयो लोके याभिः सर्वोऽनुदृश्यते" इति ॥

॥ इत्यभाववादः ॥

लोकप्रसिद्धस्वतः प्रामाण्यदर्शनेन तदन्तर्गतस्यापि च शास्त्रस्य स्वतः प्रामाण्यात् "चोदनालक्षणोर्थो धर्मः" (सू.२) इति प्रतिज्ञातेऽर्थे साधिते, सम्प्रति–"अनिमित्तं विद्यमानोपलम्भनत्वात" (शा०भा०) इत्यनेन चित्रादिचोदनानामैहिकफलानां प्रत्यक्षादिभिरऽसंवादेन विसम्वादेन च प्रामाण्यमाक्षिप्यते । पूर्वोक्तस्तु "न·

नन्वौत्पत्तिकसूत्रेण सकलस्य वेदस्य प्रामाण्ये साधिते पुनराक्षेपोऽसङ्गत इत्याशङ्क्य सङ्गतिं करोति । लोकेति । प्रतिज्ञातार्थे साधितेऽप्यधुना सूत्रावयवेन पूर्वपक्षवादी विषयविशेषे शङ्कां करोतीति नाऽसङ्गतिरित्यर्थः। इन्द्रियाणि हि विद्यमानमर्थमुपलभन्त एव । न च चित्रेष्ट्यनन्तरमुत्पन्नाः पशवश्चक्षुषोपलभ्यन्ते । यदा चोपलपभ्यन्ते न तदा चित्रेष्टिरतश्चित्रावाक्यं प्रत्यक्षविसंवादादप्रमाणं तथा यज्ञायुधवाक्यमपि प्रत्यक्षविरोधादप्रमाणं तत्सामान्यादग्निहोत्रादिचोदनानामप्यप्रामाण्यमिति चोदना न धर्मे निमित्तमतः प्रतिज्ञातार्थाऽसिद्धिरिति सूत्रावयवार्थः । अत्र वृत्तिकारेण प्रत्यक्षसूत्रादवच्छिद्याऽनिमित्तमित्याद्यवयवः प्रतिज्ञातचोदनाप्रामाण्याक्षेपपरतया व्याख्यातः नन्वतथेत्यादिना पौनरुक्त्यमाशङ्क्य परिहरति । पूर्वोक्तास्त्विति । अत्रैव चोदनासूत्रस्थभाष्यं "नन्वतथा-

न्वतथाभूतम्" इत्याक्षेपः परलोकफलस्वर्गकामादि-चोदनाविषय इति विषयभेदादऽपौनरुक्त्यम्।

ननु च "नन्वऽतथाभूतमप्यर्थं ब्रूयाच्चोदना" इति चोदनामात्रपरिग्रहादऽविशेषेणैवाऽसावाऽऽक्षेपः, तथेहापि "यदा तावदसौ विद्यमानाऽऽसीत् तदा फलं न दत्तवती यदा फलमुत्पद्यते तदाऽसौ नास्ति कथमसती फलं दास्यति?" इत्याक्षेपस्य स्वर्गकामचोदनास्वपि तुल्यत्वादऽविशेषत्वामिति नास्ति विषयभेदः?।

उच्यते–पूर्वाक्षेपस्तावत् परलोकफलविषय एव, तत्र हि 'प्रमाणान्तरापेक्षः शब्दो न स्वातन्त्र्येण प्रमाणम्, न च चोदनार्थे प्रमाणान्तरमास्ति, अतोऽप्रमाणं चोदना' इत्ययमाक्षेपः–स चायं परलोकफलविषय एव भवति।

पशुकामचोदनासु हि यदि तावत् कर्मानन्तरमेव पश्वादीन्युपलभ्यन्ते ततोऽपेक्षितमूलप्रमाणलाभात् सिद्ध्यति चोदनायाः प्रामाण्यम्, अथ नोपलभ्यन्ते ततः प्रमाणान्तरबाधेनैव सुखमऽप्रामाण्यमभिधातुं शक्यत इति किमाक्षेपसारूप्यप्रतिपादनव्यसनेन। तस्मात् स तावत् परलोकफलविषय एव, अयं त्वै-

---

भूतमप्यर्थं ब्रूयाच्चोदना यथा यत्किञ्चन लौकिकं वाक्यं नद्यास्तीरे पञ्चफलानि सन्तीति तत्तथ्यमपि भवति वितथमपि भवतीति"। अभेदं शङ्कते। ननु चेति। यदेत्यादि भाष्यग्रन्थोऽत्रत्यः। परिहरति। उच्यत इति। आक्षेप वैलक्षण्येन विषय:

हिकफलविषयः, न हि पारलौकिकस्य फलस्याऽनन्तरकालानुपलब्ध्या निरासः सम्भवति, न हि तेनाऽनन्तरं भवितव्यम्-जन्मान्तरभावित्वात् ।

ननु "असती कथं फलं दास्यति" इतीदं तुल्यम्? । नेति ब्रूमः-अपूर्वद्वारेण सम्भवात्, स्वर्गो हि स्वभावाद् देहान्तरानुभवनीयत्वादऽनन्तराऽसम्भवित्वेन शास्त्रार्थावधारणवेलायामेव निश्चीयत इत्यऽपूर्वमन्तर्भाव्यैव तत्र शास्त्रार्थोऽवधार्यते, तच्च चिरस्थायीति कारणस्याविनाशात् सम्भवति कालान्तरे स्वर्गस्योत्पत्तिः । पश्वादयस्त्वनन्तरमपि सम्भवन्तीति तत्साधनत्वेन चोद्यमानानां चित्रादीनां शास्त्रार्थावधारणसमयेऽपूर्वप्रणाडीसमाश्रयणे कारणं न किंचिदस्तीति स्वरूपेणैव फलसाधनत्वं शास्त्रार्थोऽवधार्यते, तथा चानन्तरमेव फलेन भवितव्यं कालान्तरे कर्मस्वरूपस्य विनष्टत्वात् कारणत्वाभावात्, अनन्तरं च फलमनुपलब्ध्यैव निरस्तमित्यऽप्रामाण्यं चित्रादिचोदनानाम् ।

भेद इति समस्तार्थः । अत्रत्यभाष्यस्य साधारण्यं शङ्कते । नन्विति । परिहरति । नेति । अपूर्वद्वारा तेषां स्वर्गादिफलसाधनत्वसम्भवान्न तद्विषयोऽयमाक्षेपः सम्भवतीत्यर्थः । तथा चेति । स्वरूपेणैव फलसाधनत्वे सतीत्यर्थः । ननु चित्रादिवाक्ये ऽप्यैहिकफलत्वमात्रं गम्यते नत्वनन्तरमेव फलमिति अतो विलम्बितफलासिद्ध्यर्थमपूर्वान्तर्भावो वाच्य इत्याशङ्क्या-

न चानुष्ठानानन्तरं फलानुपलब्ध्यैव शास्त्रार्थेऽपूर्वमन्तर्भावयितुं शक्यते–शास्त्रार्थावधारणपूर्वकं ह्यनुष्ठानं नानुष्ठानपूर्वकं शास्त्रम्, तस्मादैहिकानामत्राक्षेप इति युक्तो विषयभेदः। विषयभेदाच्च न्यायोपि भिद्यते– परलोकफलासु प्रमाणापेक्षितत्वमाक्षेपन्यायः, अत्र तु प्रमाणान्तरविरोध इति न्यायभेदादऽपौनरुक्त्यम्। अथ वा पूर्वोक्तं स्वमते सूत्राणि व्याचक्षाणोऽसूत्रितमेवाक्षेपं दर्शितवान्, इदानीं तु वृत्तिकारमतेन सूत्रेणैवाक्षेपः क्रियते।

तदिह चित्रादिवाक्यानि प्रमाणान्यप्रमाणानि वेति विचार्यते, तदर्थं च किं तेषां प्रमाणान्तरविरोधोऽस्ति न वेति। तत्र फलानामनन्तरमुपलब्ध्यानामनुपलम्भादऽतत्साधनत्वं चित्रादीनामवगम्यते, तदिदं प्रत्यक्षाविसंवादेऽवश्यम्भाविनि सति तदभावादप्रामाण्यम्।

ऽऽह । न चेति। अथ वा पूर्वोक्तमेव सर्वविषयमाक्षेपमधुना सूत्रारूढं करोतीत्याह। अथवेति। पूर्वोक्तमाक्षेपं सूत्रव्याख्यानकाले उत्सूत्रमेव दर्शितवान् इदानीं सूत्रारूढं भाष्यकारः करोतीत्यर्थः। सूत्रारूढत्वे विचारस्वरूपं दर्शयति। तदिहेति। सूत्रेणैव पूर्वपक्षमाह। तत्रेति। चित्रादिवाक्यमप्रमाणं प्रत्यक्षादिगोचरार्थप्रतिपादकत्वे सति तद्विसंवादात् विप्रलिप्सुवाक्यवत्। तथा चित्रा पशुफला न भवति स्वकाले तदजनकत्वात् स्नानभोजनादिवत्। इति प्रयोगद्वयं सूत्रसूचितं द्रष्टव्यम्।

ननु साध्यसाधनसम्बन्धमात्रं विधिना बोध्यते नानन्तर्यं

क्व चित्तु प्रत्यक्षविरोधादऽप्रामाण्यम्—
"स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकं याति"
इति, यज्ञायुधीति हि यज्ञायुधसंयोगाच्छरीरमुच्यते यजमानशब्दोऽपि कर्तृवचनस्तस्यैव वाचको नात्मनः, तस्य सर्वगतत्वेनाभिमतस्य क्रियाविरहिणः कर्तृत्वायोगाद् यज्ञायुधसंयोगाभावाच्च, संयोगाभिप्रायश्चायं यज्ञायुधीति शब्दः पात्रचयनस्तुत्यर्थत्वात्, न स्वस्वामिसम्बन्धाभिप्रायः प्रागपि पात्रचयनात् तत्सम्भवात्। शरीरस्य च प्रत्यक्षविरुद्धं स्वर्गगमनम्। न च

तत्कथमनन्तरानुपलब्ध्या विधिविषयबाधः । सत्यं । कालान्तरे निमित्ताऽभावेन फलानुत्पादात् सामर्थ्यादानन्तर्यमाक्षिप्तं सामर्थ्यस्य च शब्दैकदेशत्वेन शब्दप्रतिपादितमेव तद् भवति । दृष्टविरुद्धमपि भवति किञ्चिद्वचनमित्यादिभाष्यानुसारेण वाक्यान्तरमुदाहरति । क्वचिदिति । तस्यैवेति । त्यागयोग्यश्च यजमानशब्दप्रवृत्तौ निमित्तं वर्णत्रयस्य च यागाधिकारः शरीरस्य च वर्णत्रयविभागो नात्मन इति भावः । शरीरस्य जडत्वेनाकर्तृत्वादयजमानत्वमिति चेन्न । चेतनावच्छेदकत्वेन तत्सम्भवात्। अस्तु शरीरवचनो यजमानशब्दः किमेतावताऽनिष्टमत आह । शरीरस्येति । स्वर्गगमनविरुद्धभस्मीभावदर्शनादप्रमाणं वाक्यं स्यादित्यर्थः । प्रयोगश्च यज्ञायुधिवाक्यमप्रमाणं प्रत्यक्षविरुद्धार्थप्रतिपादकत्वात् अम्बुनि मज्जन्त्यलाबूनीत्यादिवाक्यवत्। ननु "धूम एवाग्नेर्दिवा ददृशे नार्चि"रित्यादिषु मन्त्रेषु च हेतुसत्वादनैकान्तिकत्वम् । नैषदोषः। तेषामपि पक्षीकृतत्वात् । विधौ तु भविष्यत्ताऽपि फलस्य

कालान्तरेऽपि सम्भवति यातीतिवर्तमानापदेशात्, भस्मीभूतस्य च कालान्तरेऽपि तदसम्भवात्। न च शरीरव्यतिरिक्तः कश्चिदात्मास्ति, तस्मादप्रमाणम्। एवमपौरुषेयस्याप्यऽप्रामाण्ये स्वर्गकामचोदनायामपि नाश्वसितुं युक्तमित्यऽप्रामाण्यमेवायातम्।

एवं प्रत्यक्षानुपलब्धिविरोधेन प्रत्यक्षविरोधेन चाऽऽक्षिप्ते प्रामाण्ये विरोधपरिहारमुपेक्ष्यैव कारणदोषनिराकरणेन पूर्वोक्तमेव स्वतः प्रामाण्यं स्वपक्षसाधनत्वेन सिद्धान्तवादी दर्शयति—

"औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानम्" (सू० ५) इति

पूर्वं हि प्रत्यक्षादीनां स्वतःप्रामाण्यस्य लोकसिद्धत्वात् तदन्तर्गतत्वाच्च शास्त्रमपि प्रमाणमित्येतावदुक्तं न तु

सम्भवेत् नचासौ विधिरित्याह। न चेति। वर्तमानापदेशे तु तदानीं स्वर्गगमनं प्रत्यक्षविरुद्धमिति भावः। अस्तु वा विधित्वं तथाप्यनुपपत्तिरित्याह। भस्मीभूतस्येति। आत्मनः सम्भवतीति चेन्नेत्याह। नेति। आक्षेपकर्त्रा तदनङ्गीकारादिति भावः। अतिरिक्तो वा नासौ यज्ञायुधी भवेदिति भावः। आक्षेपमुपसंहरति। तस्मादिति। एवमग्निहोत्रादिवाक्येष्वपि मृषार्थता वेदवाक्यैकदेशत्वाच्चित्रादिवचनेष्विवेत्यभिप्रायवानाह। एवमिति। स्थिते हि प्रामाण्ये तद्बलेनैव सर्वाक्षेपपरिहारः सुकर इति भावः। नन्वेवंजातीयकस्यार्थस्य पूर्वमेव साधितत्वात्पुनरुक्तमेतदित्याशङ्क्याह। पूर्वं हीति। वैदिकवचनं न मिथ्या स्वार्थे वक्त्रनपेक्षत्वात् पदार्थे पदबुद्धिवदिति प्रयोगो द्रष्टव्यः। अयं च सूत्रार्थः तुशब्दः पक्षव्यावृत्त्यर्थः।

कारणदोषनिराकरणं कृतम्, इह तु शब्दार्थसम्बन्धस्यौत्पत्तिकत्वात् तद्द्वारा पुरुषानुप्रवेशाभावात् पुरुषाश्रयत्वाच्च शब्ददोषस्याऽदुष्टमेव शास्त्रमतः प्रमाणमित्युक्तम् ।

॥ इति चित्राक्षेपवादः ॥

एवं सम्बन्धनित्यतयाऽप्रामाण्यं निराकृत्य स्वतः प्रामाण्ये स्थापिते, परः पुनराह—"स्यादेतत् नैव शब्दस्यार्थेनास्ति सम्बन्धः कुतोऽस्य पौरुषेयताऽपौरुषेयता वेति" तथा हि– न तावत्संयोगोस्ति तद्भावे

नाप्रामाण्यं चोदनायाः यत औत्पत्तिकोऽपौरुषेयः शब्दार्थयोः सम्बन्धः तस्य चोदनालक्षणः सम्यक्प्रत्यय इत्यस्यार्थस्य ज्ञानं ज्ञापकः निश्चायकः । पौरुषेयो हि प्रत्ययो विप्लवते अयं तु न तथा तस्मात्प्रमाणमेवेति ।

॥ इति चित्राक्षेपवादः ॥

एवं सिद्धान्तवादिना ऽपौरुषेयत्वेन प्रामाण्ये साधिते परं पूर्वपक्षभाष्यं स्यादेतदित्यादि, तस्य तात्पर्यमाह । एवमिति । अत्र सिद्धान्तवादिना सम्बन्धिनित्यत्वमङ्गीकृत्य स्वतः प्रामाण्ये साधिते पूर्वपक्षवादी सम्बन्धं तस्य च नित्यत्वमनङ्गीकुर्वाणः सम्बन्धाऽभावं तावत्प्रतिपादयतीत्यर्थः । स्यादित्यादिवेत्यन्तो भाष्यग्रन्थः । सम्बन्धाभावमुपपादयति । तथा हीति । क्षुरादीत्यादिशब्देन मोदकग्रहणं पाटनादीत्यादिना पूरणग्रहणम् । नन्वेतदयुक्तं सम्बन्धिनोः समानदेशतानियमाभावात् नहि पित्रादिः सर्वदा पुत्रा-

हि क्षुरादिशब्दोच्चारणे मुखस्य पाटनापि स्यात्। न च कार्यकारणभावः ?, द्वयोरपि नित्यत्वात्।

ननु वर्णस्फोटजात्यादिविकल्पेन व्यक्त्याकृतिसम्बन्धादिविकल्पेन च वाच्ययोः शब्दार्थयोर्दुर्निरूपत्वाद् गकाराद्याकारं विज्ञानमेव शब्दः, तज्जनितं च गवाद्याकारविज्ञानमेवार्थ इति कार्यकारणत्वमेव शब्दार्थयोः सम्बन्धः। नैवम्– निरालम्बनज्ञानानुत्पत्तेः, सम्बन्धान्तरं तु नाऽऽशङ्कनीयमेव।

दिदेश एवावतिष्ठते संयोगस्य च सिद्धान्तिनाऽनङ्गीकारात्तन्निराकरणं चायुक्तम्। सत्यमेतत्। सम्बन्धान्तरस्याऽसम्भवात्पारिशेष्यात्संयोग एवावशिष्यते, लौकिकानां तत्रैव सम्बन्धत्वप्रसिद्धेः सम्बन्धिनोश्चैकत्र सद्भावदर्शनात् क्षुरशब्दवत्तदर्थस्याऽपि मुखे सद्भावाऽऽपत्तेः पाटनं मोदकसद्भावे च पूरणं स्यादिति युक्तमेव तन्निराकरणम्। अयमत्र प्रयोगः। शब्दोऽर्थेन न संयुज्यते अर्थदेशानन्तरमदर्शनात् विन्ध्योहिमवता यथेति। सम्बन्धान्तरं निराकरोति। न चेति। भिन्नसामग्रीकत्वादित्यपि हेतुर्बोद्धव्यः। एतमेव सम्बन्धमुपपादयितुं शङ्कते। नन्विति। शब्दः किं वर्णमात्रं वा स्फोटो वा जातिर्वा ज्ञानं वेत्यादिविकल्पेन शब्दस्य दुर्निरूपत्वम्, तथाऽर्थोऽपि किं व्यक्तिर्वाऽऽकृतिर्वा सम्बन्धो वा समुदायो वेत्यादिविकल्पेनार्थस्य दुर्निरूपत्वमित्यर्थः। दूषयति नैवमिति। ननु संयोगाऽभावेऽपि समवायादि सम्बन्धान्तरं भविष्यति। तत्राह। सम्बन्धान्तरमिति। न तावत्समवायः युतसिद्धत्वात् संयोगसमवायाऽभावे चैतद्घटितसम्बन्धान्तराऽभावः।

प्रत्याय्यप्रत्यायकत्वं सम्बन्ध इति चेत् ?, न, असति सम्बन्धे प्रत्यायकत्वाऽसम्भवात्, केन सम्बन्धेन शब्दोऽर्थं प्रत्याययतीत्येतदेव हि निरूप्यते तत्र प्रत्यायकत्वादेवं प्रत्यायकत्वमित्यात्माश्रयदोषापत्तिः, तस्मान्नास्ति सम्बन्धः । असति च सम्बन्धे वस्त्वन्तरस्य वस्त्वन्तरबोधकत्वासम्भवादऽनिरूपितहेतुविशेषं स्वप्नज्ञानवद् यादृच्छिकं शब्दार्थज्ञानं न प्रमाणं भवितुमर्हति । लौकिकस्तु व्यवहारोऽसत्यपि शब्दप्रामाण्ये प्रमाणान्तरवशात् कथञ्चित् सङ्गच्छेतापि, वैदिकस्तु व्यवहारः शब्दैकशरणत्वादऽनादर्तव्यः स्यान्निर्मूलत्वात् ।

स्यादेवम्- यद्यऽसम्बन्धः शब्दार्थयोः, अस्ति तु सम्बन्धः प्रत्याय्यप्रत्यायकत्वलक्षणः , असत्येव सम्बन्धान्तरे स्वभावत एव शब्दोऽर्थस्य प्रत्यायकोऽर्थ-

---

नाप्याश्रयाश्रयिभावः आकाशपृथिव्यादिभिन्नाश्रयसद्भावादिति भावः । सिद्धान्त्यभिमतं सम्बन्धमाशङ्कते । प्रत्याय्येति । परिहरति । नेति । कथं तर्हि गामानयेति शब्दश्रवणानन्तरं पुरुषस्य निष्कम्पा प्रवृत्तिस्तत्राह । लौकिक इति । समाधत्ते । स्यादेवमिति । कथं सम्बन्धाऽभावे प्रत्यायकत्वमत आह । स्वभावत इति । वाचकशक्तिद्वयाभिप्रायोयं न सम्बन्धान्तरं स्वसिद्ध्यर्थमपेक्षत इति भावः । ननु किमिदं वाचकत्वं नाम ? न तावद्गमकत्वं धूमादेरपि वाचकत्वप्रसङ्गात् । नाप्यात्मसादृश्येन गमकत्वं प्रतिबिम्बस्यापि वाचकत्वप्रसङ्गात् । नाप्यात्माध्यासेन गमकत्वमध्यासस्य निरस्तत्वात् । नाप्यात्मा-

श्च प्रत्याय्य इत्ययमेव सम्बन्धो भविष्यति। यच्चेद्‌मिन्द्रियलिङ्गादिवत् संनिकर्षव्याप्त्यादिसम्बन्धानपेक्षमऽर्थप्रतिपादनम्—इदमेवाभिधानमित्युच्यते, तदेव च सञ्ज्ञासञ्ज्ञित्वम्, तेनोच्यते— सञ्ज्ञासञ्ज्ञिलक्षणः सम्बन्ध इति।

किं पुनः शब्दस्यार्थप्रतिपादने प्रमाणम्?, शब्दानन्तरमऽर्थप्रतिपत्तिरेव। नन्वियमऽभिप्रायानुमानद्वारेणैवोपपन्ना?, नेति ब्रूमः—अर्थाभिप्रायशून्येनापि स्वा

ऽभेदेन गमकत्वमभेदे गम्यगमकत्वानुपपत्तेः। नापि रूपत्रयादिरहितं गमकत्वं चक्षुरादेरपि वाचकत्वप्रसङ्गात्। मैवमभिधानस्यैव वाचकत्वात्। नन्वभिधानमेव न ज्ञायते किं तदिति तत्राह। यच्चेदमिति। यथेन्द्रियं सन्निकर्षमपेक्षते लिङ्गादिकं वा व्याप्त्यादि तथा यन्न भवति किन्तु सन्निकर्षाद्यनपेक्षमेव यदर्थप्रतिपादनमिदमेवाभिधानमित्युच्यत इत्यर्थः। एतदुक्तं भवति अर्थप्रतिपत्तिफलकः शब्दव्यापारो ऽभिधानक्रिया तस्यां च प्रतिपत्त्याख्यफलशालितया यदर्थस्य कर्मत्वं तद्वाच्यत्वं शब्दस्य विवक्षावशेन यत्कर्तृत्वं करणत्वं वा तद्वाचकत्वमिति। उक्तेर्थे भाष्यं योजयति। तेनेति। संज्ञासंज्ञिलक्षणः सम्बन्धोऽयमिति भाष्यकारेण यदुच्यते तदनेनैवाभिप्रायेणेत्यर्थः। एतदेव प्रश्नपूर्वकमुपपादयति। किमिति। अनन्यथासिद्धार्थप्रत्ययान्यथानुपपत्तिप्रसूतार्थापत्तिरेव प्रमाणमित्युत्तरार्थः। शब्दस्यार्थप्रत्यायकत्वानङ्गीकारे च प्रतिज्ञार्थोऽपि प्रतिपादयितुं न शक्यत इति स्ववचनविरोधः स्यादितिभावः। नन्वेवं नियमजन्यत्वादनुमानमेव शाब्दं स्यादिति शङ्कते। नन्विति। परिहरति। नेति। अर्थप्रतीत्युत्तर-

पाद्यवस्थायां परवशप्रयुक्तैरपि शब्दैरर्थप्रतिपत्तिदर्शनात्, तथा पुरुषान्तरकृतमपौरुषेयं वा वेदवाक्यमनर्थज्ञैरपि प्रयुज्यमानं व्युत्पन्नानामर्थबुद्धिं जनयत्येव, तस्मात् प्रत्यायकः शब्दः । किमिति तर्हि प्रथमश्रवणे न प्रत्याययति ?, सहकारिविरहात्-सञ्ज्ञात्वग्रहणमपि शब्दस्यार्थं प्रत्याययतोऽङ्गं नेत्रस्येवाऽऽलोकः, तेन यः पुरुषान्तरेभ्य 'अयं शब्दोऽस्य सञ्ज्ञा' इति ज्ञातवान् तस्यैव प्रत्याययति नान्यस्येति न दोषः।

कालत्वेनाविनाभावस्यात्रानुपयोगात् । अत्र हि अर्थप्रतिपत्तेः शब्दार्थयोर्गम्यगमकभावमेव वृद्धेभ्यः प्रतिपद्य शब्दाद्यदर्थं प्रतिपद्यतेऽतस्तस्यैवार्थप्रतिपत्तावङ्गत्वम् । धूमादौ तु पूर्वमविनाभावित्वावगतिस्ततोऽर्थप्रत्ययस्ततः पश्चाद्गमकत्वावगतिरतोऽत्रानुमानमिति भावः । एवमवस्थिते पुनः पूर्वपक्षी प्रत्यवतिष्ठते । किमिति । गोशब्दो न गोत्ववाचकशक्तिमान् सम्बन्धग्रहणात्पूर्वमप्रतिपादकत्वात् देवदत्तशब्दवदितिप्रयोगो द्रष्टव्यः । प्रत्यायकत्वे वा प्रथमश्रुत एव प्रत्याययेदिति बाधकस्तर्कः। परिहरति । सहकारीति । प्रथमश्रवणे संज्ञात्वग्रहणरूपसहकारिविरहान्न प्रत्याययतीत्यर्थः । तदुक्तम्—

"यत्साधकतमत्वेन कस्यचित् किञ्चिदुच्यते ।
तस्यानुग्राहकापेक्षा न स्वशक्तिविघातिनी ॥
नहि तत्करणं लोके वेदे वा किञ्चिदीदृशम् ।
इतिकर्तव्यतासाध्ये यस्य नानुग्रहेऽर्थिता"(श्लो०वा०सं०३६ ॥

ननु साधनत्वाऽविशेषे सति कथं किञ्चित्करणं किञ्चिदितिकर्तव्यतेति विभागः । उच्यते । यत्फलस्य प्रत्यासन्नं त-

नन्वेवमस्तु नाम सम्बन्धः स तु पौरुषेय इति त्व- दुक्त्यैवापन्नम्, तथा हि— न हि शब्दस्यार्थेन संयोग- तादात्म्यादिसम्बन्धः, किं तु प्रत्यायकत्वं, तच्च पुरु षाधीनमित्युक्तम्, अतो देवदत्तादिशब्दस्येव 'अ- स्यार्थस्येयं सञ्ज्ञा' इत्येवं सम्बन्धे कृते पश्चाच्छन्द-

---

दान्तरं चक्षुरादि करणं भवति । बाह्यन्तु दीपादिकामितिकर्त- व्यता । क्वचित्तु बाह्यस्यापि विवक्षातः करणत्वम् । तथाहि—

"उद्विग्नोऽन्धकारेण कश्चिदेवं ब्रवीत्यपि ।
किं चक्षुषा ममैतेन दृष्टं दीपेन यन्मया"(श्लो०वा०सं०३९)॥

वस्तुतस्त्वान्तरस्यैव चक्षुरादेः करणत्वम् आलोकस्य त्वनुग्राहकत्वमेव, दीपसमवधाने ऽप्यन्धस्य रूपाऽप्रतिपत्तेः । यथाहुः—

" शारीरात्ममनोयोगादसाधारणताबलात् ।
विज्ञानासत्तिभावाच्च चक्षुः करणमिष्यते ॥
तथैवेहापि सम्बन्धज्ञानमङ्गं प्रसिद्धितः"(श्लो०वा०सं०४२)।

एवमुपपादिते सम्बन्धसद्भावे तस्य कृतकत्वोपपादनेन पुनः पूर्वपक्षी प्रत्यवतिष्ठते । नन्वेवमिति । एतदेव विवृणोति । तथाहीति । संज्ञात्वं पुरुषेभ्योऽवगम्यत इत्युक्तं तेन देवदत्ता- दिशब्दवदस्येयं संज्ञेतिवदद्भिः पुरुषैरेव कृतं स्यात् । यदि तु सं- ज्ञात्वातिरिक्तं किञ्चित्सम्बन्धान्तरं स्यात् तदा भवेदपि नित्यता, न तु तदस्ति, भिन्नदेशाद्यधिष्ठानत्वेन स्वभावतः शब्दार्थयोरस- म्बद्धत्वादिति समस्तार्थः । यथाह भाष्यकारः " मुखे हि शब्दमुपलभामहे भूमावर्थम् । शब्दोऽयं नत्वर्थः अर्थोऽयं न शब्द इति व्यपदिशति । रूपभेदोऽपि भवति । गौरितीमं शब्दमुच्चा-

स्यार्थप्रतिपादनमिति सिद्धं पौरुषेयत्वम् ।

इति सम्बन्धाक्षेपः ।

पूर्वाक्षिप्तं सम्बन्धनित्यत्वमऽसमाधायेदानीम्–"अथ गौरित्यत्र कः शब्दः" (शा. भा.) इति कया सङ्गत्या केन वा प्रयोजनेन शब्दस्वरूपं निरूप्यते?। सङ्गतिस्तावत्प्रासङ्गिकी–सम्बन्धप्रस्तावात् सम्बन्धिनोरपि शब्दार्थयोः प्रस्तुतत्वात् तत्स्वरूपं निरूप्यते । प्रयोजनमपि तदवयवाश्रितानामूहादीनां सत्यत्वम्, निरवयवे हि वाक्ये पदे वा वाचकेऽवयवानां मृषात्वात्

रयति सास्नादिमन्तमवबुध्यत इति । पृथग्भूतयोश्च यः सम्बन्धः स कृतको दृष्टो यथा रज्जुघटयो"(शा० भा०)रिति । उपपादितमर्थं निगमयति । इति सिद्धमिति । एवञ्च सम्बन्धस्य कृतकत्वात् तद्द्वारा च पुरुषानुप्रवेशसम्भवाच्चोदना न धर्मे प्रमाणमिति तृतीयः प्रामाण्याक्षेपः ।

॥ इति सम्बन्धाक्षेपः ॥

अत्रानन्तरभाष्यं " अथ गौरित्यत्र कः शब्दः । गकारौकारविसर्जनीया इति भगवानुपवर्ष"(शा० भा०) इत्यादि, तदनन्तराक्षिप्तसम्बन्धनित्यत्वस्याऽसमाधानान्मध्ये शब्दस्वरूपनिरूपणादयुक्तमित्याक्षेपपूर्वकं समाधत्ते । पूर्वाक्षिप्तेति । सम्बन्धाक्षेपपरिहारार्थमेव तन्नित्यत्वोपपादनाय तदाधारभूतयोः शब्दार्थयोर्निरूपणं सूत्रकाराभिप्रेतमेव भाष्यकारेण क्रियते । तत्रापि शब्दपूर्वकत्वादर्थप्रतिपत्तेः प्रथमं शब्दनिरूपणमिति । यथाहुः—

तदाश्रितान्यपि कार्याणि मृषा भवेयुः ।

किं च सम्बन्धसिद्ध्यर्थमवश्यं वर्णानां वाचकत्वं समर्थनीयम्, अन्यथा हि तेषां प्रत्येकं सङ्गत्यऽभावा- द् वाचकत्वानुपपत्तिमाकलयतां स्फोटस्य च शशावि-

---

" वर्णातिरेकः प्रतिषिध्यमानः पदेषु मन्दं पदमादधाति ।
कार्याणि वाक्यावयवाश्रयाणि सत्यानि कर्तुं कृत एष यत्नः"
इति (श्लो० वा० १३७)

अत्र पूर्वार्धेनाशङ्कोत्तरार्द्धेन परिहारउक्तः । तदिति वाक्यं परामृश्यते वाक्यावयवरूपपदाश्रयणमित्यर्थः । ऊहादीना- मित्यादिशब्दान्महावाक्यावान्तरवाक्यार्थप्रयाजाद्याश्रितस्य त- न्त्रप्रसङ्गादेरपि सत्यत्वसिद्धिः प्रयोजनमित्यर्थः । इतश्च वा- चकमित्याह । किञ्चेति । मास्तु तेषां सङ्गत्यभावाद्वाचकत्वं, स्फोटस्य तु भविष्यतीत्याशङ्क्याह । स्फोटस्येति । विधिमुखेन कार्यमुखेन चाप्रतिभासमानस्य शशविषाणतुल्यत्वमित्यर्थः । सम्बन्धग्रहणमपि वाचकत्वपक्षे प्रयोजनं भवतीति भावः । अ- त्र चोद्यते-अथगौरिति कस्याऽयं प्रश्नः, न तावत्पूर्वपक्षिणः सम्बन्धाक्षेपानन्तरं तस्य शब्दप्रश्नानुपपत्तेः, नापि सिद्धा- न्तिनः अकृताक्षेपपरिहारस्य तत्प्रश्नानुपपत्तेः, गकारौकारे- त्याद्युत्तरभाष्यमपि प्रश्नानन्तरमसम्बद्धं स्यात् । उच्यते । सि- द्धान्तिन एवायं प्रश्नः । स हि स्वाभिप्रेतशब्दार्थसम्बन्धमुपपा- दयितुं पृच्छति-अथगौरित्यत्र भवतः कः शब्दोऽभिप्रेतो यस्यार्थेन सह सम्बन्धाऽभावं मन्यसे । न तावत्स्फो- टाख्यः वर्णत्रयातिरिक्तस्य बुद्धावप्रतिभासमानत्वेनाऽभानात् । नाप्यर्थप्रतीतिलक्षणकार्येण तस्यावगतिः अन्योन्याश्रयात् त-

षाणायमानस्य दूरनिरस्तं वाचकत्वमिति सम्बन्ध एव वाच्यवाचकभावो निराधारत्वान्न स्यान्नतरां नित्यत्वमिति तत्सिद्ध्यर्थं वर्णानां वाचकत्वं समर्थयितुं शब्दस्वरूपं निरूप्यते। किं गौरित्यत्र वर्णा एव शब्दः? उत तेभ्योऽर्थान्तरम्? इत्येतत् प्राधान्येन निरूप्यते। वर्णावयव-गत्व-गोशब्दावयवि-जातिनिराकरणं तु प्रासङ्गिकं वर्णा एव शब्द इत्यवधारणसमर्थनार्थम्।

तत्र वर्णानामपि पुद्गलाख्यानऽवयवानाऽऽर्हताः संगिरन्ते, तत्त्वऽवयवानुपलम्भादयुक्तम्। प्रत्यक्षेण तावदऽवयवा नोपलभ्यन्ते वर्णेषु साकल्यवैकल्यग्रहणाभावात्। नानुमानेन-तैः सह कस्य चिल्लिङ्गस्य सम्बन्धाऽग्रहणात्। न च सामान्यतोदृष्टम्, न हि यद् यद्वस्तु तस्य तस्याऽवश्यमवयवैर्भवितव्यम्, परमाणूनां निरवयवत्वात्। तेपि सावयवा इति चेत्?;

त्सिद्धौ तत्सिद्धेः अस्माकन्तु गकारौकारविसर्जनीया एव गोशब्दः ते च श्रोत्रग्रहणाः श्रोत्रग्राह्ये वस्तुनि लोके शब्दशब्दप्रयोगात्। उपवर्षग्रहणेनास्य मतस्य श्रैष्ठ्यं दर्शयति बहुतरप्रमाणसिद्धत्वात्। तत्सिद्ध्यर्थमिति। वाच्यवाचकभावलक्षणम्बन्धसिद्ध्यर्थमित्यर्थः। ननु शब्दस्वरूपं निरूप्यत इति प्रतिज्ञाय वर्णावयवादिनिराकरणमयुक्तमत आह। वर्णावयवेति। तत्र वर्णावयववादिमतमनूद्य निराकरोति। तत्त्विति। अनुअनुपलम्भमेवोपपादयति। प्रत्यक्षेणेति। अवयवानामनुपलम्भादेव तैः सह सम्बन्धग्रहणाऽभाव इत्यर्थः। उक्तञ्च—

तदवयवा अपि तथा स्युस्ततः परमपि तथेत्येकस्यैव माषावयविनोऽनन्तावयवत्वं स्यात्, ततश्चैकेनैव माषेण तिलेन वा सर्वं जगद् व्याप्येत–अनन्तैरवयवैर्मूर्तैरन्योन्यस्यावकाशमप्रयच्छद्भिरनन्तदेशव्याप्तेः। तस्मान्निरवयवाः परमाणवो वर्णाश्च। तथा गत्वजातिरौत्वजातिश्च निष्प्रमाणिकैव।

ननु द्रुतविलम्बितमध्येषूदात्तानुदात्तस्वरितेषु सानुनासिकनिरनुनासिकयोर्ह्रस्वदीर्घप्लुतेषु च प्रत्यभिज्ञायमाना जातिः कथं नास्तीति शक्यतेऽभिधातुम्?। सत्यम्–अस्ति प्रत्यभिज्ञा, सा तु व्यक्त्येकत्वा-

---

"पृथक्त्वेनोपलभ्यन्ते वर्णस्याऽवयवाः क्वचित्॥
न च वर्णेष्वनुस्यूता दृश्यन्ते तन्तुवत्पटे" (श्लो. वा. स्फो. ११)।

घत्वादिजातिं निराकरोति। तथेति। देशादिभेदेन प्रतीयमानस्यापि गकारस्य स एवायमित्येकबुद्धिग्राह्यत्वेन व्योमवदेकत्वे सति नैकव्यक्तिकं गत्वसामान्यं भवतीति भावः। नन्वेकत्वे गकारस्य द्रुतादिभेदेन प्रतिभासो न स्यादित्यभिप्रायवाँश्चोदयति। नन्विति। प्रत्यभिज्ञायमाना–द्रुतादिगकारव्यक्तिष्वनुवृत्ततया गम्यमाना। परिहरति। सत्यमिति। एका गकारव्यक्तिरेव तत्र तत्रानुगता प्रतीयते नतु तदतिरिक्तं गत्वमित्यर्थः। द्रुतादिभेदेन गकारादिभेदे सति स एवायमित्येकत्वप्रत्ययो न स्यादिति भावः। गत्वसामान्यालम्बनो भविष्यतीति चेन्न। विकल्पाऽसहत्वात्। तथाहि–तत्सामान्यं जातिरूपं सादृश्यरूपमपोहरूपं वा स्यात्। आद्ये किं भिन्नमभिन्नं वा स्यात्, नाद्यः, भेदेनाऽप्रतीयमानत्वात् नहि शाबलेयादिषु

देवोपपन्ना। द्रुतादिभेदावभासस्तु द्रुताद्यवस्थाभेदालम्बनो न व्यक्तिभेदमापादयितुमलं भवति।

भेदाभेदावभासोपि द्वेधा भवति—क्वचिद्भेदो धर्मिविषयोऽभेदस्तु धर्मविषयो यथा शाबलेयादिष्वयं गौरयं गौरयमपीति जातेरात्मलाभः। क्वचित्तु भेदावभासो धर्माद्ऽभेदावभासश्च धर्मिणमालम्बते—एकस्मिन्नेव देवदत्ते युवाऽयं वृद्धोऽयं कृशोऽयमिति, न तत्र जातिरङ्गीक्रियते। तदिह द्रुतादिषु धर्मिविषयोऽभेदो धर्मविषयस्तु भेदः, तथा हि—ईदृशोऽत्रावभासः—'अनेनायमकारो द्रुतमुच्चारितोऽनेन विलम्बितम्' इति, न तु 'अयमकारो द्रुतोऽयं तु विलम्बितः' इति येन धर्मिभेदो जातिश्चाङ्गीक्रियेयाताम्।

ननु कार्श्यादीनां क्रमवर्तित्वादेकस्मिन् देवदत्ते युक्तः समावेशः, अनुनासिकादीनां तु धर्माणां युगपदऽनेकवक्त्रुच्चारिते वर्णे समवेतानां कथमेकवर्णविषयत्वम्? न हि विरुद्धधर्मानेको धर्मी युगपद्बिभर्ति?।

स्वरूपेण व्यावर्तमानेष्वनुगतं गोत्वं तद्भेदेन प्रतीयते एवं गत्वमिति। नेतरः अभेदे तत्त्वाभावप्रसङ्गात्। नापि सादृश्यरूपं स एवेत्यनुगमात्, भूयोऽवयवसामान्यलक्षणस्य सादृश्यस्य निरवयवे गकारेऽसम्भवात्। नाप्यपोहरूपं द्रुतादिभेदेषु स एवायं गकार इति श्रौत्रविज्ञानस्याऽभावविषयत्वाऽसम्भवात्। एतदेवाभिप्रेत्याह। भेदाऽभेदावभास इति। अस्त्वेवं प्रकृते किमायातमत आह। तदिहेति। वैषम्यं शङ्कते। नन्विति। परि?

सत्यम्—न त्वेते परमार्थतो वर्णधर्मा ध्वनिधर्मास्त्वेते वर्णे केवलमाभासन्ते, यथाऽल्पे महति च दर्पणे मुग-

---

हरति। सत्यमिति। ननु ध्वनीनां वायवीयानामश्रोत्रत्वात्कथं वर्णेषु तद्धर्मावभासः?। उच्यते। द्रुतादिसंस्कृतश्रोत्रेन्द्रियः पुरुषस्तानपि वर्णमिश्रान् श्रोत्रेणैव गृह्णातीति तेषामपि प्रत्यक्षता। यथाहुः—

"नादेन संस्कृताच्छ्रोत्राद्यदा शब्दः प्रतीयते।
तदुपश्लेषतस्तस्य बोधं केचित्प्रचक्षते" (श्लो. वा. ३९)॥

अयमाशयः—द्विविधः शब्दो वर्णो ध्वनिश्च द्वयोरनुगतं शब्दत्वम्। वर्णत्वं ध्वनित्वं च तदवान्तरसामान्यम्। वर्णविशेषाः ककारादयः। ध्वनिविशेषाः शङ्खघोषादयः। ध्वन्यात्मकश्च शब्दो वायुगुणः। स च वायौ कर्णविवरं प्राप्ते संयुक्तसमवायेन श्रोत्रं संस्कृत्य तेन गृह्यमाणः कदा चिद्धर्मरहितः केवलो गृह्यते शङ्खघोषादिषु, कदाचिच्च वर्णानभिव्यञ्जन् तदुपश्लिष्टः प्रमीयते इति। अथवा नास्त्येव तेषां ग्रहणम्। द्रुतादिसंस्कृतन्तु श्रोत्रेन्द्रियमभिन्नेऽपि गकारादौ संस्कारानुकारेण भेदप्रत्ययं जनयति यथैव हि गत्वादिजातिवादिवैशेषिकमते ऽविद्यमानमेव शब्दे महत्त्वमल्पत्वं च ध्वनिसंस्कारानुसारिण्या बुद्ध्या गृह्यते तथा द्रुतादिकमपि ध्वनिषु श्रोत्रं प्राप्यैव क्षिप्रमन्यतः प्रयातेषु तत्संयोगसंस्कारस्य श्रोत्रेऽल्पकालमवस्थानात् शब्दोऽपि तत्क्षण एवाविर्भूय तिरोभवन् द्रुत इति गृह्यते, तथा मध्यमो विलम्बित इति युक्तो व्यञ्जकधर्माणां द्रुतादीनां व्यङ्ग्ये शब्दे भ्रान्त्या समारोप इति। कथमनवगतेषु भ्रमहेतुषु नादेषु तद्धर्मप्राप्तिर्व्यङ्ग्येषु शब्देषु। अत्राहुः—

पदुदृश्यमाने मुखेऽल्पत्वं महत्त्वं चेति, तस्माद्वर्णस्य व्यक्त्येकत्वेऽपि न विरोध इत्यऽप्रामाणिकी गत्वादिजातिः ।

"मधुरं तिक्तरूपेण श्वेतं पीततया तथा ।
गृह्णन्ति पित्तदोषेण विषयभ्रान्तचेतसः" (श्लो. वा. ४१)॥

यथा पित्तदोषसंस्कृतं रसनेन्द्रियं मधुरं तिक्ततया गृह्णाति चक्षुरिन्द्रियं च पित्तगतं पीतत्वमगृह्णदेव श्वेतं पीततया गृह्णाति, एवं ध्वनिगतान् द्रुतादीन् गृह्णदेव तथा शब्दं प्रतिपद्यत इत्यर्थः । एवं ह्रस्वदीर्घादिष्वपि द्रष्टव्यम् ।

अत्र केचित् । दीर्घादिष्वभेदप्रत्ययवद्भेदप्रत्ययस्यापि वर्णालम्बनत्वमिच्छन्ति । द्रुतादिप्रत्ययो हि नादैरेव युज्येताप्यपारमार्थिकः, ह्रस्वदीर्घभेदस्तु अर्थविशेषप्रतीत्यौपयिकतया विवक्षितप्रयोगः कथं भ्रान्तिः स्यात्, तद्भ्रान्तित्वे हि तन्निबन्धनार्थविशेषबुद्धिरपि अगमनं आगमनमित्यादौ भ्रान्तिः स्यात्, अतः पारमार्थिक एव ह्रस्वदीर्घादिषु वर्णभेद इति । तद्भेदे च सति तेष्वनुगतमत्वसामान्यमिच्छन्ति । एतच्चायुक्तम् । न हि यथा शाबलेयादौ गोत्वं साधारणमेवमत्वं ह्रस्वदीर्घप्लुतेषु । यथाहुः—

"अत्वमित्युच्यमानं हि न दीर्घप्लुतयोर्भवेत् ।
आत्वं न ह्रस्वप्लुतयोस्त्रिमात्रत्वं न पूर्वयोः ॥
अवर्णकुलशब्दोऽपि स्थानसाम्याद्वनादिवत् ।
समुदायार्थवाचीति न जातिवचनो भवेत्" (श्लो. वा. ४२)॥

अत एकमात्रादिकारान्तोच्चारणकृत एव भेदो न पारमार्थिकः । अत्रान्यदपि बहुतरं प्रमेयं वार्त्तिकादिष्ववगन्तव्यम् । उपपादितमर्थं निगमयति । तस्मादिति । ननु गकाराद्यार-

एवं गोशब्दावयव्यपि, गकारादिनामयौगपद्यात् सर्वगतत्वाच्चाऽवयव्यारम्भाऽसामर्थ्यात् । सर्वत्र हि कारणपरिमाणादधिकं कार्यपरिमाणं तन्तुपटयोरिव। न च विभुभ्यो वर्णेभ्यः परिमाणाधिक्यं कस्य चिद्भवति. अतो नास्त्यऽवयवी । तदभावे च तदाधारं गोशब्दत्वं दूरापास्तम् । तस्माद्वर्णा एव शब्दः ।

आह-गृह्णीम एतत्'-अवयवावयविगत्वादिकं नास्ति' इति, न तु 'वर्णा एव शब्दः' इति, अर्थप्रत्यया-

---

व्यगोशब्दस्यैव गोशब्दोपलक्षितस्य सम्बन्धग्रहणादर्थप्रतिपादकत्वमतः कथमिदं भाष्यं "गकारौकारविसर्जनीया" इत्याशङ्क्य गोशब्दावयविनं निराकरोति । एवमिति । अप्रामाणिक इति शेषः । अयौगपद्यादिति । युगपदवस्थितैरेवावयवैरवयव्यारम्भदर्शनादिति भावः । विच्छिन्नप्रयत्नाभिव्यङ्ग्यत्वेनोपलब्धितो यौगपद्याभावादित्यर्थः । नापि सत्तया यौगपद्येनारम्भकत्वमित्याह । सर्वेति । नित्यत्वेन सर्वगतत्वेन च सर्वदा सर्वत्रारम्भकत्वं स्यादिति भावः । किञ्चाऽवयवेभ्योऽधिकपरिमाणोऽवयवी दृष्टः, नच विभुभ्यः कस्य चिदाधिक्यं सम्भवतीति न वर्णैरवयव्यारम्भ इत्याह । सर्वत्रेति । तदनारम्भे च तत्समवेतं गोशब्दत्वं दूरनिरस्तमित्याह । तदभावे चेति । अस्तु वाऽवयवी तथापि निष्प्रमाणकमेव गोशब्दत्वं गत्वादिवत् स एवायं गोशब्द इत्यभिन्नवर्णत्रयालम्बनप्रतिभासादिति भावः । समुदायोऽपि वर्णत्रयातिरिक्तोऽवयविवन्निराकार्यः समुदायस्य भेदेनानुलम्भात्, अभेदे तु वर्णत्रयादेवार्थप्रतीत्युपपत्तेस्तस्यैव समुदायशब्दवाच्यतां निगमयति । तस्मादिति । अत्र चोदयति ।

नुपपत्तेः, तथा हि—

न ह्येकाक्षरविज्ञानादर्थधीरुपजायते ।
वाचश्च क्रमवर्तित्वात् साहित्यं नावकल्पते ॥१२॥

उच्यते—

यथाऽऽग्नेयादिकर्माणि क्रमवर्तीनि सन्त्यपि ।
संहत्य कुर्वते कार्यमेकं वर्णास्तथैव नः ॥ १३ ॥

ननु क्रमवर्तिनामप्युत्पत्त्यऽपूर्ववशेन युक्तं साहित्यम्, वर्णानां तु कथम् ? । तेषामपि संस्कारेण भविष्यति । तत्सद्भावे किं प्रमाणम् ?, यदेवाग्नेयादिषु, यथा हि तेषां शास्त्रेण संहत्यकारिताऽवगमात् स्वरूपतश्च तदसम्भवादपूर्वं द्वारं कल्प्यते, तथा वर्णानामप्येकैकशोऽभिधानाऽदर्शनात् सकलोच्चारणे चाऽवगमात् संहत्यकारित्वे निश्चिते स्वरूपेणाऽसम्भवात् संस्कारकल्पनं युक्तमेव । तद्वदेव चैककर्तृकत्वं क्रमविशेषश्चाद्रियते विपर्ययेणार्थाभिधानादर्शनात् ।

आहेति । अनुपपत्तिमेव विवृणोति । तथाहीति । नन्वाशुतरविनाशित्वान्मास्तु साहित्यं, संस्कारद्वारेण तु भविष्यति । नेति ब्रूमः । संस्कारकल्पनायां प्रमाणाऽभावात् । नहि यथाऽपूर्वपरिकल्पनायां साध्यसाधनसम्बन्धान्यथानुपपत्तिः प्रमाणमेवमत्र किञ्चिदस्ति, अर्थप्रतिपत्तेरन्यथाप्युपपत्तेः । परिहरति । उच्यत इति । वैषम्यं शङ्कते । नन्विति । परिहरति । तेषामिति । अनुपपत्त्यभावाभिप्रायेण शङ्कते । तत्सद्भाव इति । अत्राप्यनुपपत्तिरस्तीत्यभिप्रायवानाह । यदेवेति । अनुपपत्तिं विवृणोति । तथाहीति । यथाहीति वा पाठः । तद्वदिति । उक्तञ्च—

नन्वेवं प्रतिवर्णं संस्कारकल्पनादऽनेककल्पना

" तेषां च गुणभूतानामर्थप्रत्यायनं प्रति ।
साहित्यमेककर्त्रादि क्रमश्चापि विवक्षित इति" (श्लो. वा. ७०)।

कथं तर्हि क्रमवतां गकारादीनामेकपदत्वं कथं च गोशब्दो वर्तते पचतीति च वर्तमानकालनिर्देशः ? । उच्यते । न घटादिवन्निष्पन्नाविनष्टतया व्यापारेषु वर्तमानापदेशः । किन्त्वेकफलावच्छिन्ना बह्वयवात्मिका क्रिया ।

" तस्यामाद्यपरिस्पन्दात्प्रभृत्या ऽऽफललाभतः ।
क्रियापूर्वापरीभूता लक्ष्यते वर्तते तदे"ति (श्लो. वा. ७९)।

अभिधानरूपे वर्णव्यापारेऽप्ययमेव वर्तमानत्वव्यापारो बोद्धव्यः । यथाहुः—

"तेनात्रापि विवक्षातः प्रभृत्यार्थावबोधनात् ।
सङ्कल्पेनेक्ष्यमाणे स्यात् व्यापारे वर्तमानता" (श्लो. वा. ८०)॥

विवक्षामारभ्यान्त्यवर्णपर्यन्ता वर्णा एकार्थप्रतिपत्तये विवक्षिता यावन्तं कालं व्याप्नुवन्ति तावान्वर्तमानः काल इत्युच्यते । तत्कालावच्छिन्नाः च वर्णा गोशब्दोवर्त्तते इत्युच्यते ।व्यापारशब्देनात्र गकारादिज्ञानंजन्यः संस्कारोऽभिधीयते क्रियाजन्यः संस्कारो वा ऽतो नानुपपत्तिः । अत्र लब्धावसरः स्फोटवादी शङ्कते । नन्विति । अयमाशयः । न तावद्वर्णानां प्रत्येकमर्थबोधकत्वम्, एकैकस्मादर्थाऽप्रतीतेः । नापि समुदितानां क्षणविनाशिनां समुदायानुपपत्तेः—प्रतिवर्णं च संस्कारकल्पने गौरवापात्तिः । अतो वर्णोच्चारणानन्तरं यतोऽर्थप्रत्ययो भवति सोऽयं स्फोरकत्वेन प्रकाशकत्वेन स्फोट इत्युच्यते । स एव पदात्मा शब्दः । एवं वाक्यस्फोटो ऽपि ।

स्यात् तद्धरमेकमेव शब्दतत्त्वं कल्पितम् । नैवम्-दृश्यादर्शनेन निरस्तत्वात्, शब्दो हि प्रत्यक्षग्राह्यो-

---

अप्रत्यक्षोऽप्ययमर्थः प्रतीतिलक्षणकार्यानुपपत्त्या गम्यते । वर्णा एवानुभूयन्ते न तदतिरिच्यमानस्वरूपं वस्तुत्वमिति चेन्न । एकं पदमेकं वाक्यमिति चैकरूपस्यानुभवात् । नचेयं वर्णावगाहिनी तेषां परस्परभिन्नत्वात् । नचैकत्र नानात्वैकत्वे सम्भवतः विरुद्धत्वात् । एकार्थविषयत्वेनैकत्वमिति चेत् । न । परस्पराश्रयात् । एकपदत्वेनैवैकार्थविषयत्वात् । तस्मान्न वर्णात्मकः शब्दः किन्तु स्फोटरूप एवेति । तदेतद्दूषयति । नैवमिति । वर्णातिरिक्तवाचककल्पनायामर्थापत्तिः प्रमाणं प्रत्यक्षं वा । नाद्यः अर्थप्रतिपत्तेरन्यथाप्युपपद्यमानत्वात् । नेतरः तदभावात् । नचैकं पदमित्येकवस्त्ववगाहिनी नानावर्णेष्वऽनुपपद्यमानाबुद्धिरेव प्रमाणमिति वाच्यम् । वर्णेष्वप्येकार्थविषयत्वेन तदुपपत्तेः । अस्ति खल्वेकाभिधेयधीहेत्वभावस्त्रयाणामपि वर्णानामेकस्मरणोपारूढानामश्मनामिवैकपिठरधारणे । नाप्यन्योन्याश्रयः समधिगतैकाभिधेयधीहेतुभावानां तेषां पश्चात्पदत्वाऽवधारणात् । कारकविशेषाभिधायी हि पदशब्दः पद्यतेऽनेनेति । स च कार्यसम्बन्धज्ञाने सत्येव भवति नान्यथा । अत एकार्थविषयत्वज्ञाने सत्येवैकपदत्वज्ञानम् । यदाहुः "अर्थैकत्वादेकं वाक्य"(१)मिति । पदमप्यर्थैकत्वादेकम् । श्रोत्रग्राह्ये च वस्तुनि शब्दशब्दः प्रसिद्धो वर्णा एव च श्रोत्रग्राह्या न स्फोटः। अतो नासौ शब्दशब्दवाच्यः कथमर्थप्रत्यायकः स्यात् । शब्दादेवार्थप्रतीतेः सर्वलोकसम्मतत्वात् । आशुतराविनाशिनां

---

(१) जै० सू०

ऽभ्युपगम्यते। न च प्रत्यक्षेण वर्णातिरिक्तं किंचित् प्रकाशते तेन नास्तीत्यवगच्छामः। त्वयापि हि शब्दतत्त्वं कल्पयित्वा पुनः संस्कारकल्पनाऽवश्यं कर्तव्या, ध्वनयो हि न प्रत्येकं स्फोटमभिव्यञ्जन्ति, साहित्यं च क्रमवर्तिनां संस्कारद्वारमेवेति तुल्यं तत्कल्पनम्।

साहित्याऽसम्भवात् कथं गमकत्वमिति चेत् संस्कारद्वारेणेति ब्रूमः। यदाह भाष्यकारः— "पूर्वपूर्ववर्णजनितसंस्कृतसहितोऽन्त्यवर्णः प्रत्यायक" इति। व्यापारस्य चाऽव्यवधायकत्वात् शब्दादर्थं प्रतिपद्यामह इत्यप्युपपद्यते। अथवा भाष्यपर्यालोचनया ऽन्त्यवर्णस्यैव प्रत्यायकत्वम्। एवं च शब्दादिष्वेकवचनमप्युपपन्नम्। यथाहुः—

"यदि चाऽपूर्वसंस्कार इति कर्त्तव्यतेष्यते।
वर्णोऽन्त्यो गमकस्तस्य शब्दत्वान्मुख्यता भवेत्" (श्लो. वा. १३०)

केचित्तु सद्रूपान्त्यवर्णविषयप्रत्यक्षम्, पूर्वेषु चातीतेषु वर्णेषु स्मृतिरूपेति चित्रस्वरूपा बुद्धिः सैवार्थप्रतीतिहेतुरित्याहुः। उक्तं च—

"चित्ररूपां च तां बुद्धिं सदसद्वर्णगोचराम्।
केचिदाहुर्यथा वर्णो गृह्यते ऽन्त्यः पदे पदे॥
तथाऽन्त्यवर्णे विज्ञाते सर्वसंस्कारकारितम्।
स्मरणं यौगपद्येन सर्वेष्वन्ये प्रचक्षते" (श्लो.वा.स्फो.११२)

अत्रान्यदपि प्रमेयं वार्त्तिकेऽवगन्तव्यम्। गौरवमिति चेत्तवापि तदस्तीत्याह। त्वयापीति। आवश्यकत्वं दर्शयति। ध्वनय इति। प्रत्युत तव स्फोटसद्भावो वर्णेभ्यश्च व्यतिरेकः

स्यान्मतम् ?— प्रत्येकमेव नादाः शब्दमभिव्यञ्जन्ति, न चैवमुत्तरनादवैयर्थ्यम्— पूर्वे हि नादाः शब्दमस्फुटमभिव्यञ्जन्ति उत्तरोत्तरे स्फुटं स्फुटतरं च व्यञ्जन्तीति नोत्तरेषामानर्थक्यम् । यद्येवम् ?—ततो य एवोत्तरे नादाः स्फुटाभिव्यक्तिसमर्थास्तैरेव भवितव्यमऽलं पूर्वैः ।

ननु न कश्चिदपि नादः स्वतोऽस्य स्फुटाभिव्यक्तिं करोति, किं तु सर्वे ते प्रत्येकं व्यञ्जकाः, स तु न प्रागेव स्फुटमवभासते, प्रथममस्फुटावभासितः सन् पुनः पुनः श्रूयमाणः स्फुटो भवति, तद् यथा दूरादवस्थितः सहकारः प्रथमं हस्तिपलालकूटादिसाधारणरूपेण प्रतिभातः पुनरालोच्यमानो वृक्षात्मना प्रकाशते पुनः सहकारात्मना स्फुटो भवति, तद्वदेव द्रष्टव्यम् ।

यद्येवम् ?—य एव ते पूर्वे नादास्तैरेवाभ्यस्यमानैरीदृशी स्फुटाभिव्यक्तिः स्यात् उत्तरैर्वा केवलैरभ्यस्यमानैः, तत्र विजातीयनादाऽऽश्रयणमनर्थकम् ।

तथा प्रत्येकं हि व्यञ्जकत्वे सत्युत्तरैरस्फुटाभिव्यक्तिः पूर्वैश्च स्फुटाभिव्यक्तिः स्यादिति व्युत्क्रमेणाप्युच्चारणं स्यात्, अतोऽपेक्षितक्रमविशेषाऽनेकविजातीयनादसमुच्चयाऽऽश्रयणादवश्यं पूर्वनादाऽऽहितसं-

---

सावयवे पदे गम्यमाने निरवयवत्वमित्यधिका कल्पना स्यादिति भावः । तुल्यत्वपरिहारं शङ्कते । स्यान्मतमिति । नादा एव प्रत्येकमभिव्यञ्जन्ति नतु तेषां समुदायो येन संस्कारकल्पना स्यादिति भावः । तुल्यत्वं निगमयति । अत इति । इदानीं

स्कारसहिताऽन्तिमनादाभिव्यङ्ग्यः स्फोट इत्यवश्या- ङ्गीकर्तव्यमिति तुल्या संस्कारकल्पना। यद्वा तवैवेयं संस्कारान्तरकल्पना, मत्पक्षे तु स्मृतिहेतुभिरेव सं- स्कारैः सिद्ध्यत्यर्थावगतिरिति न संस्कारान्तरं क- ल्पयितव्यम्।

ननु ममापि त एव भविष्यन्ति?। न, तेषां स्मृ तेरन्यत्राव्यापारात्। मत्पक्षे तु स्मृतिमेव जनयन्तो- ऽर्थप्रतिपत्तिं संस्कारा जनयन्ति। तथा हि-प्रत्येकव- र्णानुभवभावितैः संस्कारैः संहत्य सर्ववर्णगोचरैका स्मृतिर्जन्यते तस्यां च युगपदवभासमाना वर्णा वि- नैव संस्कारान्तरेण संहत्यार्थप्रत्ययं जनयन्ति।

त्वत्पक्षे तु नैवं सम्भवति, तथा हि- नादा हि न ज्ञायमानतया स्फोटं व्यञ्जयन्ति अश्रावणत्वात्, अगृहीतत्वादेव च न स्मर्यमाणानां व्यञ्जकत्वम्, ये- न वर्णवत्स्मर्यमाणाः कार्यं कुर्वन्तीत्युच्येत। सत्त- या हि ते श्रोत्रसंस्कारं कुर्वन्तः शब्दं व्यञ्जयन्ति, न च युगपत् सत्तास्ति क्रमवर्तित्वात्, अतः संस्कारद्वा- रमेव साहित्यमित्यवर्जनीयं संस्कारान्तरकल्पनम्।

अथ मतम्?-सत्यं न स्मृतिहेतुभिः स्फोटाभि-

स्वपक्षे विशेषं दर्शयति। यद्वेति। साम्यं शङ्कते। नन्विति। परिहरति। नेति। उक्तं च- "वस्तुधर्मो ह्येष यदनुभवः पटी- यान् स्मृतिबीजमाधत्त" इति। ननु त्वत्पक्षेस्मृतेरन्यत्रार्थप्रतिपत्तौ व्यापारो दृष्ट एव तत्राह। मत्पक्षे त्विति। एतदेव विवृणोति। तथाहीति। ननु संस्काराणां तत्र तत्र निरपेक्षाणामेव कारण-

व्यक्तिः, ये तु वर्णोपलब्धिहेतवो नादजन्याः श्रोत्रगताः संस्कारास्तैरेव वर्णानामिव स्फोटाभिव्यक्तिर्भविष्यति किं संस्कारान्तरकल्पनयेति ?। तदयुक्तम्—तेषां क्षणिकत्वात्, न ह्याद्यवर्णोपलब्धिहेतुः संस्कारोऽन्त्यवर्णश्रवणवेलायामवतिष्ठते । यद्यवतिष्ठते ? ततो विसर्जनीयश्रवणवेलायामपि गकारश्रवणमनुवर्तेत, तस्मात् क्षणभङ्गिनस्ते, अतो न तेषां संहत्य स्फोटाभिव्यञ्जकत्वं भवति। प्रत्येकाभिव्यक्तौ चोत्तरोत्तरेषामऽनर्थकत्वमित्युक्तम् ।

अथ वा ध्वनिसंयोग एव श्रोत्रसंस्कारो नान्यः, तस्य च विस्पष्टमेव भङ्गुरत्वं गत्वरत्वाद् ध्वनीनाम् । तस्मादन्ये स्थायिनः संस्काराः कल्प्याः, तथा वर्णातिरिक्तः शब्दः कल्प्य इति बह्वऽप्रमाणकमापन्नम् । मत्पक्षे तु दृढस्मृतिविपरिवर्तिनां वर्णानां वाचकत्वान्न किं चिद् दूषणम् ।

भावोपलम्भान्न सर्वेषामखिलवर्णगोचरैकस्मरणजनकत्वम् । नैवम् । मिलितानामप्येकगोचरैकविज्ञानजनकत्वदर्शनात् । यथा हि संस्कारश्चक्षुराद्यनपेक्षः स्मरणकारणं चक्षुश्च तन्निरपेक्षमेवालोचनकारणं प्रत्यभिज्ञाने तूभयोः परस्परापेक्षा दृष्टैव । उत्तरो ग्रन्थः स्पष्टार्थः । अत्राशङ्कते । नन्विति । परिहरति । नेति ।

"यावन्तो यादृशा ये च यदर्थप्रतिपादने ।
वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः ॥
तेषां च गुणभूतानामर्थप्रत्यायनं प्रति ।
साहित्यमेकवक्त्रादि क्रमश्चापि विवक्षितः" (श्लो.वा.७०)इति

ननु युगपत्स्मर्यमाणानां वाचकत्वे व्युत्क्रमेणाप्युच्चारिता वर्णा वाचकाः स्युः ?, न, तत्क्रमस्याप्यङ्गत्वात् । कः पुनः क्रमोऽङ्गम् ? न हि वर्णानां विभूनां नित्यानां च स्वरूपतः क्रमवत्त्वम्, न प्रतीतिक्रमः–तस्याः स्मृतिरूपाया एकत्वात् । एवं तर्हि ध्वनिक्रमो यो वर्णेष्वारोपितः प्रतिभासते सोऽङ्गमित्यदोषः । तस्माद् व्यञ्जकानां ध्वनीनां क्रमेण व्यङ्ग्येषु वर्णेषु

न चैतत्कलकलश्रुतावशक्यज्ञानम् । तत्राप्यभ्यासपाटवेन ज्ञातुं शक्यत्वात् । अत्र चोदयति । कः क्रम इति । क्रमाऽसम्भवं विवृणोति । नहीति । समाधत्ते । एवमिति । उपपादितमर्थं निगमयति । तस्मादिति । वर्णेषु समारोपितेन ध्वनीनां क्रमेणेति सम्बन्धः । ननु पूर्वमर्थप्रतिपत्तिसंस्कारा जनयन्तीत्युक्तम्, इदानीं वर्णा वाचका इति वर्णानामर्थप्रतीतिजनकत्वमुपसंह्रियत इति विप्रतिषिद्धम् । नैष दोषः । तत्रापि तथाहीत्यादिविवरणग्रन्थे वर्णानामेवार्थप्रतीतिजनकत्वस्योक्तत्वात् । अत्र वार्तिककारैः स्फोटाऽभावे वाचकत्वाऽभावे च प्रयोगो दर्शितः । तथाहि—

"वर्णा वा ध्वनयो वाऽपि स्फोटं न पदवाक्ययोः ।
व्यञ्जन्ति व्यञ्जकत्वेन यथा दीपप्रभादयः ॥
सत्त्वाद् घटादिवच्चेति साधनानि यथारुचि ।
लौकिकव्यतिरेकेण कल्पितेऽर्थे भवन्ति हि" (श्लो.वा.१३२)
नार्थस्य वाचकः स्फोटोवर्णेभ्योऽव्यतिरेकतः ।
घटादिवन्न दृष्टेन विरोधो धर्म्यसिद्धितः ॥ "
तथा वर्णजन्यत्वे ऽर्थप्रत्ययस्य प्रयोगः—

समारोपितेन तदन्तः स्मर्यमाणा वर्णा वाचका, नान्यः शब्दोऽस्तीति सिद्धम् ॥

॥ इति स्फोटवादः ॥

"अथ गौरित्यस्य शब्दस्य कोऽर्थः" (शा.भा.) इति वाच्यनिरूपणोपक्रमव्याजेनाऽऽकृतिसद्भावं प्रतिपादयति सम्बन्धनित्यत्वसिद्धये- न ह्यसत्यामाकृतौ

" वर्णोत्था वाऽर्थधीरेषा तज्ज्ञानानन्तरोद्भवा ।
तादृशी सा तदुत्था हि धूमादेरिव वह्निधीः ॥
दीपवद्वा गकारादिर्गत्वादेः प्रतिपादकः ।
ध्रुवं प्रतीयमानत्वात्तत्पूर्वं प्रतिपादनात्" (श्लो. वा. स्फो. १३६) इति ॥

अत्रोधदहनोद्भूतस्फोटरूपनिराक्रिया ।
चिकित्सेव कृता शब्दविदां मीमांसकैरियम् ॥

॥ इति स्फोटवादः ॥

अत्र भाष्यकृता सम्बन्धनित्यत्वोपपादनाय "अथ गौरित्यत्र कः शब्द" इति प्रश्नपूर्वकं वाचकस्वरूपं निरूप्यानन्तरं "अथ गौरित्यस्य शब्दस्य कोऽर्थ" इत्यादिना वाच्यस्वरूपनिरूपणमुपक्रान्तं तस्यापि वाचकनिरूपणवदेव सङ्गतिं स्पष्टत्वादनभिधाय प्रयोजनं तावदाकृतिसद्भावप्रतिपादनस्य दर्शयति । अथेति । वाच्यनिरूपणोपक्रमस्तु विचारसङ्गतिसिद्ध्यर्थमिति भावः । एतदेवोपपादयति । न हीति । यद्याऽऽकृतिव्यतिरिक्ता व्यक्तय एव शब्दार्थाः स्युः ततस्ताभिर्व्यभिचारात्सम्बन्धोऽपि न सि-

व्यक्तिभिः शब्दस्याऽपौरुषेयः सम्बन्धः सिद्ध्यति तासामनित्यत्वात्, उपलक्षणस्यापि नित्यस्याऽभावादाकृत्यऽभावे, तस्मादाकृतिरस्ति नास्तीति विचार्यते। साधिते तु तत्सद्भावे सैव शब्दाभिधेयत्याकृत्यधिकरणे वक्ष्यते ॥

तत्र सौगताः स्वलक्षणमेव परमार्थं मन्यमाना नाऽऽकृतिसद्भावं मन्यन्ते। तथा हि—

पृथक्के व्यक्तितो जातिर्दृश्येत पृथगेव सा।

द्ध्यतीति भावः। ननु "आकृतिस्तु क्रियार्थत्वा"दित्यत्र सूत्रकार एवाऽऽकृतेरभिधेयत्वं स्थापयिष्यति किमत्र प्रयासेनेत्यत आह। अस्तिनास्तीति। आकृतिसद्भावप्रतिपादनेनाकृतेरभिधेयत्वे साधिते क्रियायामनुपयोगात् पुनरनभिधेयत्वमाशङ्क्योपयोगप्रतिपादनेन तस्या एवाभिधेयत्वं सूत्रकारो वक्ष्यतीत्यर्थः। ननु संस्थानमाकृतिः तच्च प्रतिपिण्डं भिन्नमेवेति तदभिधेयत्वेऽपि न सम्बन्धनित्यत्वसिद्धिः। नैवम्। जातेरेवाकृतिशब्देनाभिधानात्। यदाह "द्रव्यगुणकर्मणां सामान्यमात्रमाकृति"रिति। आक्रियते निरूप्यते द्रव्यमनयेति जातेरेवाकृतिशब्देनाभिधानं गौरियमित्येवं रूपेण तयैव द्रव्यनिरूपणात्। तदुक्तम्—

" जातिमेवाकृतिं प्राहुर्व्यक्तिराक्रियते यया।
सामान्यं तच्च पिण्डानामेकबुद्धिनिबन्धनम् " (श्लो. वा. आ. ३) ॥

अत एवैकबुद्धिनिमित्तं यत्सामान्यं जातिरूपं सारूप्यरूपमपोहरूपं वा तस्य शब्दवाच्यत्वे न कस्यापि विप्रतिपत्तिस्तत्स्वरूपे तु विवाद इति तत्सद्भाव एवात्र साध्यत इत्यभिप्रायः।

अभेदे व्यक्तिमात्रं स्याद् द्वेधा चेन्न विरोधतः ॥१४॥

नहि सैव ततोऽन्या चाऽनन्या च सम्भवति, विरुद्धत्वाद्भेदाभेदयोः । यदि च भिन्ना जातिः ? सा सर्वगता व्यक्तिष्वेव वा ?, न तावत्सर्वगतत्वम्-अन्तरालेऽनुपलब्धेः । व्यक्तिस्था चेत् ? व्यक्तावुत्पन्नायां तस्मिन् देशे प्रागसती कथं तस्यामुपलभ्यते ?, न तावत् तत्रोत्पद्यते नित्याया उत्पत्त्ययोगात् । न च व्यक्त्यन्तरादागच्छति अमूर्तत्वात्, तस्मिंश्च व्यक्त्यन्तरेऽनुपलब्धिप्रसङ्गात् । न चांशेनागतांऽशेन च तत्रैव स्थितेति शक्यं वक्तुम् ? निरंशत्वात् । एवं व्यक्तिनाशे- न च तत्रैव पश्चादवस्थिता-अनुपलब्धेः । न विनष्टा-नित्यत्वात । न चान्यत्र याति-अमूर्तत्वात् । व्यक्त्यन्तरे च पूर्वमेवावस्थिता जातिरिति पुनः प्रवेशे द्विगुणोपलभ्येत । यथाहुः-

"नायाति न च तत्रासीदस्ति पश्चान्न चांशवत् ।
जहाति पूर्वं नाधारमहो व्यसनन्ततिः" इति ।

व्यक्तौ च वर्तमाना यद्येकस्यां व्यक्तौ कात्स्न्र्येन

तदस्मिन्नर्थे सौगतानामत्यन्तं विप्रतिपत्तेस्तमेवादावुपन्यस्यति । नत्रेति । द्वेधेति । भिन्ना अभिन्ना चेत्यर्थः । भेदपक्षे दूषणान्तरमाह । यदि चेति । तस्मिँश्चेति । तस्य तज्जातिशून्यत्वादित्यर्थः । एवमिति । व्यक्तिस्थत्वपक्षे यथा व्यक्तावुत्पन्नायां तस्मिन्देशे इत्यादिना दूषणमुक्तं तथा व्यक्तिनाशेऽप्येतद्वक्ष्यमाणं दूषणमवगन्तव्यमित्यर्थः । दूषणान्तरमाह (। व्यक्ताविति ।) व्यक्तौचेति । आधेयस्याधारनिष्ठत्वेन प्रतीतिनियमादितिभावः ।

वर्तेत व्यक्त्यन्तरेषु न स्यात्, न ह्येका सती युगपदनेकत्र कार्त्स्न्येन वर्तितुं शक्नोति। न चाऽवयवशो वर्तते–निरवयवत्वात्। कथं च नानाविधास्वऽतीताऽनागतवर्तमानासु व्यक्तिष्वऽवयवशो वृत्तिः सम्भाव्येत, व्यक्तौ च वर्तमानेहप्रत्ययमनुभवेत, न चेह गोत्वमिति कस्य चित् प्रतीरस्ति, किं त्वियं गौरिति।

अथ व्यक्तेरात्मैव जातिर्न तदाधारं वस्त्वन्तरमिति चेत्?, नैवं युक्तम्– कथं हि नानाभूतानामनित्यानां व्यावृत्तस्वभावानामेकरूपा नित्याऽनुवृत्तस्वभावा च जातिराऽऽत्मा स्यात्? त्रैलोक्यसङ्करप्रसङ्गात्।

न च प्रमाणमपि किं चिदाकृतिसद्भावे सम्भवति, न तावत् प्रत्यक्षम्–न हि जातिः स्वविषयं ज्ञानं जनयति नित्यत्वाभ्युपगमात् नित्यानां च सर्वार्थक्रियास्वऽसामर्थ्यात्, न चाऽजनकस्य विषयत्वं सम्भवति तल्लक्षणत्वाद्विषयत्वस्य, तस्माद्विकल्पाकारमात्रं सामान्यम्, अलीकं वा।

ननु यथा ज्ञानवैचित्र्यसिद्ध्यर्थं बाह्यानि स्वलक्षणान्यभ्युपगम्यन्ते तथा गवाश्वादिविकल्पवैचित्र्य-

---

सिद्धान्तमाशङ्क्य निराकरोति। अथेति। वस्त्वन्तरत्वे त्विह कुण्डे बदरामितिवदाधारनिष्ठत्वे प्रतीतिः स्यादितिभावः। कथं न युक्तमिति अपेक्षायां त्रेधा वैलक्षण्यादित्याह। कथं हीति। विलक्षणस्वभावानामप्येकात्मत्वे सर्वमेकमेव स्यादित्यर्थः। ननु गौरयमित्यस्त्येव प्रत्यक्षं तत्राह। न हीति। तन्मते नित्यानामर्थक्रियास्वसामर्थ्यम्। अर्थापत्तिं शङ्कते। नन्विति। अन्यथो-

सिद्धये विचित्राणि सामान्यानि किं नाम नाभ्युपगम्यन्ते ?। न, विचित्रस्वभावस्वलक्षणदर्शनवशादेव विकल्पवैचित्र्योपपत्तेः—

अर्थशून्या अपि विकल्पा विचित्रार्थक्रियासमर्थस्वलक्षणाभिमानिनो जायमानास्तत्र व्यवहारार्थिनं प्रवर्तयन्तः परम्परया तत्प्रभवतया तत्प्रापयन्तो मणिमिव मणिप्रभाविषयमणिबुद्धिर्व्यवहाराविसम्वादिनो भवन्तीति न लोकयात्रास्थितेः कश्चिद्विरोधः, तस्मान्नास्ति जातिः ।

एतेनाऽवयविद्रव्यं प्रत्यूढम्, तस्याप्यऽवयवभेदादिविकल्पाऽक्षमत्वात् । स्थूलावभासस्तु सञ्चितानेक-

---

पपत्त्या परिहरति । नेति । वस्तुमात्रं परमार्थसत् तच्च विचित्रस्वभावं दृष्टमिति तद्दर्शनवशादेव गवाश्वादिविकल्पवैचित्र्योपपत्तेर्न तद्वशात्सामान्यासिद्धिरित्यर्थः । व्यवहाराविसंवादादर्थसिद्धिरिति चेन्नेत्याह । अर्थेति । अर्थशून्या अपि विकल्पा व्यवहाराविसंवादिनो भवन्तीति सम्बन्धः । विचित्रार्थेति हेतुगर्भं विकल्पविशेषणम् । कथमाभिमानिकज्ञानमात्रादर्थलाभोऽत आह । परम्परयेति । स्वलक्षणात् निर्विकल्पकमेव साक्षादुत्पद्यते, विकल्पास्तु परम्परया तत्प्रभवत्वात् तत्प्रापयन्तीति कृत्वा व्यवहाराऽविसंवादिनो भवन्तीत्यर्थः । अत्रानुगुणदृष्टान्तमाह । मणिमिति । सामान्यनिरासोक्तदूषणमवयविद्रव्यनिरासेऽतिदिशति । एतेनेति । सञ्चितानेकरूपादीति परमाणुविशेषणम् । यथा चिरकालीनाध्ययनादिखिन्नस्योत्थितस्य नीललोहितादिगुणविशिष्टः केशोण्डूकाख्यः कश्चिन्नयनाग्रे प-

करूपादिपरमाणुवशादेव केशोण्डूकाऽवभासवदुपपन्नो नाऽवयविकल्पनायालम्। तदभावे च निराधारत्वाद् दूरापास्तं गोत्वादिसामान्यम्।

कथमसत्येकरूपे सामान्येऽत्यन्तविलक्षणानि स्वलक्षणान्यऽविलक्षणरूपं विकल्पं जनयन्ति ?। जनयन्ति चेत् ? किमिति कानि चिदेव गोविकल्पं जनयन्ति कानि चिदेवाश्वविकल्पम्, न सर्वाणि सर्वम् ?।

सामान्यवादिनो वा कथं विलक्षणरूपा व्यक्तयोऽविलक्षणसामान्यात्मकत्वं तदाश्रयत्वं तदभिव्यञ्जकत्वं वा भजन्ते ?। भजन्ति चेत् ? किमिति काश्चिदेव व्यक्तयः केनचिदेव सामान्येन सम्बध्यन्ते न सर्वाः सर्वैः ?। स्वभावादिति चेत् ?, अस्माकमपि तुल्यमिदमुत्तरम्।

अथ व्यक्तीनामप्यविलक्षणरूपसामान्यसम्बन्धसिद्ध्यर्थं परमऽविलक्षणरूपमभ्युपगम्यते ?, ततस्तेनापि सम्बन्धसिद्ध्यर्थमऽपरापरसामान्यापेक्षायामनव-

---

रिस्फुटति। अथवा करसंमृदितलोचनरश्मिषु येयं केशपिण्डावस्था स केशोण्डूकः। नच तावताऽवयविसिद्धिस्तथा स्थूलावभासो नावयविकल्पनायालमित्यर्थः। अवयविनिरासस्य प्रकृतोपयोगमाह। तदभाव इति। चोदयति। कथमिति। ननु काऽत्रानुपपत्तिर्न हि दृष्टे ऽनुपपन्नं नाम तत्राह। जनयन्तीति। प्रतिबन्द्या परिहरति। सामान्येति। तन्मते विशेषमाशङ्क्य परिहरति। स्वभावादिति। वैषम्यमाशङ्क्य निराकरोति। अथेति। अस्माभिस्तु सामान्यसम्बन्धसिद्ध्यर्थं परं सत्तासामान्यं स्वीक्रि-

स्था स्यात् । तस्माद्विकल्पमात्रमेवेदं न परमार्थतः सामान्यं नाम किं चित् ।

अत्राभिधीयते—

प्रत्यक्षबलासिद्धस्य सामान्यस्य कुतर्कतः ।
न शक्योऽपन्हवः कर्तुं सर्वं विजयते हि तत् ॥ १५ ॥

सर्वेष्वपि वस्तुषु 'इयमपि गौरियमपि गौः, अयमपि वृक्षोऽयमपि, इति व्यावृत्तानुवृत्ताकारं प्रत्यक्षं देशकालाऽवस्थान्तरेष्वविपर्यस्तमुदीयमानं सर्वमेव तर्काभासं विजित्य द्व्याकारं वस्तु व्यवस्थापयत् केनाऽन्येन शक्यते बाधितुम् ?, न हि ततोऽन्यद् बलवत्तरमस्ति प्रमाणम्, तन्मूलत्वात् प्रमाणान्तराणां तद्बाधसामर्थ्याऽभावात् ।

किं चानुमानान्यपि सामान्यापेक्षत्वात् सुतरां सामान्यं समर्थयन्ते, न तु बाधितुं शक्नुवन्ति, न हि यद् यदपेक्षं तत् तस्य बाधं शक्नोति कर्तुं, तद्बाधे हि स्वात्मापि न सिध्येत् तदपेक्षत्वात् ।

तथा हि—भेदाभेदविकल्पेन सामान्यं निराकुर्वता

यते भवतां तु तदभाव इति वैषम्यमित्यर्थः । निगमयति । तस्मादिति । समाधत्ते । अत्रेति । श्लोकं व्याचष्टे । सर्वेष्वपीति । देशकालावस्थान्तरेष्वबाधितत्वेनाऽस्य बलवत्तरत्वमित्यर्थः । द्व्याकारमिति । यदि स्वलक्षणमेव वस्तु स्यात् न सामान्यं ततोऽयं गौरयमपीति सामान्यबुद्धिर्न स्यात् । अथ सामान्यबुद्धिसिद्ध्यर्थं सत्तासामान्यमेवैकं स्वीक्रियते, न गोत्वादि, ततो गौरयम्— अश्वोऽयमिति विशेषबुद्धिर्न स्यात् अतो द्व्याकारं वस्तु सिद्ध्यतीतिभावः । किञ्चेति । व्याप्तिग्रहस्य सामा-

ऽवश्यमेव वक्तव्यम्-'यद्वस्तु तद् भिन्नमऽभिन्नं वा भवति, सामान्यमपि यदि वस्तु स्यात्ततोऽनेनापि भिन्नेनाऽभिन्नेन वा भवितव्यम्, न च द्वेधापि सम्भवति तस्मादऽवस्तु' इति, एवं च वदता वस्तुत्वं सामान्यमङ्गीकार्यम्, अन्यथा कथं वस्तुत्वस्य भेदाभेदाभ्यां व्याप्तत्वाद् व्यापकानुपलब्ध्या सामान्यस्य वस्तुत्वं न सम्भवतीति भणितुं शक्यम्।

नन्वौपाधिको वस्तुशब्दो न जातिनिमित्तकः, तत्कथमनेन जात्यापत्तिः ? ।

उच्यते- जातिर्वा भवतूपाधिर्वा सर्वथा तावत् सामान्यरूपमपेक्षितव्यम्। औपाधिकानामपि मूलोपलक्षणमेकमन्तरेणात्मलाभाभावात्। न च व्यावृत्तैकरसं सर्वं वस्तुजातमभ्युपगच्छतः सौगतस्य क्वचिदपि किंचिदप्यनुवृत्तं रूपं सम्भवतीत्यौपाधिको व्यवहारो दुर्घट एव, तस्मात् सर्वप्रमाणसिद्धं सामान्यं न शक्यमपन्होतुम्।

न्याधीनत्वादितिभावः। किञ्चान्यदपि यत्सामान्यनिराकरणार्थमुपन्यसनीयं तदेव सामान्यसाधकमित्याह। तथा हीति। अन्यथेति। सामान्यस्याऽवस्तुत्वे पक्षताया अभावात्कुत्रावस्तुत्वं साध्येतेति भावः। चोदयति। नन्विति। उपाधिश्चात्र स्वलक्षणवस्तुनि प्रतीयमानत्वमेवेतिभावः। अन्वारुह्यवादेन तावत्परिहरति। उच्यत इति। वस्तुतस्तूपाधिरपि तन्मते न सम्भवतीत्याह। नचेति। क्वचिदनुवृत्तरूपाङ्गीकारे तत्र वस्तुशब्दः स्वाभाविको भवेत् सामान्ये औपाधिकोभवेदितिभावः। उपसंहरति। तस्मादिति। नन्वङ्गीकृत्यापि सामान्यं तस्य

कः पुनर्विकल्पानां परिहारः ?, न तावदऽपरिहृता अपि शक्नुवन्ति सामान्यमपन्होतुं तेषामपि तदपेक्षत्वादित्युक्तम् । तथापि परिहारोऽभिधीयते-

भेदाभेदविकल्पे तावत् केचिदाहुः-भिन्नमेव सामान्यं व्यक्तिभ्यः । न च पृथगुपलब्धिप्रसङ्गो व्यक्तिसम्बन्धित्वात् । कः पुनः सम्बन्धः ?, समवायः । कः पुनरसौ ?, अयुतसिद्धानामिहप्रत्ययहेतुः सम्बन्धः इति केचित् । तच्चऽयुक्तम्-इहप्रत्ययाऽसिद्धेः, इयं गौरिति हि सर्वदा सर्वेषां प्रतीतिर्नेह गोत्वमिति ।

का चेयमयुतसिद्धिः ?, युतसिद्ध्यभावः । का पुनर्युतसिद्धिः ? पृथग्गतिमत्त्वं पृथगाश्रयाश्रयित्वं वा, तदऽभावोऽयुतसिद्धिः ।

यद्येवम्- अवयवावयविनोः सम्बन्धः समवायो न स्यात्, विनाप्यवयविचलनेनाऽवयवानां चलनात्, अवयविनोऽवयवानां च स्वावयवाश्रयत्वात् । तथा सामान्यस्य व्यक्त्याश्रयत्वाद् व्यक्तेश्च स्वावयवाश्रितत्वादस्ति पृथगाश्रयाश्रयित्वमिति समवायानुपपत्तिः। तस्मादेवं वक्तव्यम्- येन सम्बन्धेनाधेयमाधारे स्वा-

---

तुल्याकारबुद्धिजननशक्तिरङ्गीकर्तव्या तद्वरं विशेषाणामेवोभयवादिसिद्धानां शक्तिराश्रिता किं सामान्येन ? । मैवम् । विकल्पाऽसहत्वात् । तथाहि-सर्वासु व्यक्तिष्वेका प्रतिव्यक्ति भिन्ना वा । व्यक्तिभ्यश्चान्या ऽनन्या वा । ग्राह्याऽग्राह्या वेति । आद्ये पक्षे जातिरेव शब्दान्तरेणोक्ता स्यात् तस्या एव एवंरूपत्वात् । अथाग्राह्या शक्तिस्तर्हि सामान्यबुद्धिर्निर्विषया स्यात् । विशेषा-

नुरूपां बुद्धिं जनयति स्वाकारेण बोधयतीत्यर्थः स सम्बन्धः समवाय इति ।

यदि जात्यात्मना व्यक्तिः प्रतीयते ततो जातिव्यक्त्योरभेद एव प्रतीतिबलादापद्यते कथं भेदाभ्युपगमः ? ।

उच्यते– गौरयं शाबलेयो गौरयं बाहुलेय इत्युभयत्र गवाकारोऽनुवर्तमानो दृश्यते, शाबलेयबाहुलेयाकारौ तु व्यावर्तेते, तद् यदि तयोः शाबलेयगवाकारयोरभेदः स्यात् ? एकानुवृत्तावितरोऽप्यनुवर्तेत, तद् व्यावृत्तौ वा गवाकारोपि व्यावर्तेत । किं च तस्यामेव व्यक्ताबियं गौरिति गवात्मना प्रतीयमानायामपि नेयंबुद्धिगोबुद्ध्योर्गौर्गौरितिवत् पर्यायत्वं प्र-

---

णान्तु भिन्नानामेकबुद्धिविषयत्वाऽसम्भवात् । विषयत्वे वाऽभिन्नत्वं न स्यात् । एवं विकल्पान्तरं प्रत्याख्येयम् । मतान्तरेण तावत्परिहारमाह । भेदेति । व्यक्तीति । व्यक्त्या सह नित्यसम्बन्धित्वादित्यर्थः । औलूक्याभिमतं समवायलक्षणमाह। अयुतेति । तदेतद्दूषयति । तत्त्विति । तस्मादिति । यत एतल्लक्षणमयुक्तं तस्मादेवं वक्तव्यमित्यर्थः । अस्त्वेवं ततः किमत आह । यदीति । ततश्चानेन प्रकारेण भेदसमर्थनं न सम्भवत्यतो यत्केचिदाहुस्तदयुक्तमितिभावः । अत्र चोदयति । कथमिति । तत्र भेदाऽभेदस्वीकारात् कथं भेदोपपत्तिरुक्तयुक्त्या ऽभेदस्यैव पर्यवसानादित्यर्थः । एकेति । अभेदे हि गवाकारानुवृत्तौ शाबलेयाकारोऽप्यनुवर्तेत । शाबलेयाकारानुवृत्तौ वा गवाऽकारोपि व्यावर्त्तेत । एकस्यैव वस्तुनो विरुद्धस्वभावद्वया-

तीयते, तस्मान्नाऽभेदः ।

कथं तर्हि ताद्रूप्यं व्यक्तेः प्रतीयते ?, इदमेव हि ताद्रूप्यं व्यक्तेर्यत् तत्समवायः सम्बन्धः, तस्यैष महिमा येनाधारमाधेयं स्वबुद्ध्याऽनुरञ्जयति, तस्माददोषः । अथ वा तादात्म्यप्रतीतेरभेदोऽप्यस्तु पूर्वोक्तन्यायेन भेदोपि, तस्मात् प्रमाणबलेन भिन्नाभिन्नत्वमेव युक्तम् ।

ननु विरुद्धौ भेदाभेदौ कथमेकत्र स्याताम् ?, न विरोधः सहदर्शनात्, यदि हि 'इदं रजतं नेदं रजतम्' इतिवत् परस्परोपमर्देन भेदाभेदौ प्रतीयेयातां ततो विरुद्ध्येयातां न तु तयोः परस्परोपमर्देन प्रतीतिः । इयं गौरितिबुद्धिद्वयमपर्यायेण प्रतिभासमानमेकं वस्तु द्व्यात्मकं व्यवस्थापयति–सामानाधिकरण्यं ह्यभेदमापादयति. अपर्यायत्वं च भेदम्, अतः प्रतीतिबलादविरोधः ।

ऽसम्भवादितिभावः । अभेदपक्षे दूषणान्तरमाह । किञ्चेति । इयं गौरित्यत्रेयं बुद्धिर्गोबुद्धिश्च । नचैतयोर्गौर्गौरितिवत्पर्यायत्वं प्रतीयते । अभेदे तु पर्यायत्वं प्रतीयेत । तस्मान्नाऽभेद इति शङ्कार्थः । सिद्धान्ती तु भेदपक्ष एव ताद्रूप्यप्रतीतिमुपपादयन्परिहरति । इदमिति । तस्य—समवायस्येत्यर्थः । आधेयं गोत्वादिआधारं गवादिव्यक्तिम् । एवंरूपस्य समवायस्यावयव्यादिष्वसम्भवेनाऽपरितोषात्पक्षान्तरमाह । अथ वेति । शङ्कते । नन्विति । परिहरति । नेति । अपर्यायत्वमिति । इयंबुद्धिगोबुद्ध्योरित्यर्थः । इतोऽप्यविरोध इत्याह । अपेक्षेति । गोत्वं

अपेक्षाभेदाच्च, तथा हि- गोरूपेण निरूप्यमाणया जात्या व्यक्तिरभेदेन प्रतीयते 'गौरयं शाबलेयः' जात्या व्यक्तिरभेदेन प्रतीयते 'गौरयं शाबलेयः' इति। यदा तु जातिर्व्यक्त्यन्तरात्मना निरूप्यते तदेयं व्यक्तिस्ततो भिन्नरूपाऽवसीयते-'योऽसौ बाहुलेयो गौः सोयं शाबलेयो न भवति' इति।

एवं धर्मिणो द्रव्यस्य रसादिधर्मान्तररूपेण रूपादिभ्यो भेदो द्रव्यरूपेण चाऽभेदः। तथाऽवयविनः स्वरूपेणावयवैरभेदोऽवयवान्तररूपेण त्वऽवयवान्तरैर्भेद इत्यूहनीयम्। तत्र यथा दीर्घह्रस्वादीनां विरुद्धस्वभावानामप्यपेक्षाभेदादेकत्राप्यविरुद्धत्वं प्रतीतिबलादङ्गीक्रियते तथा भेदाभेदयोरपि द्रष्टव्यं प्रतीत्यविशेषात्।

कश्चित् पुनराह-प्रतीतिरेव भेदाऽभेदावभासिनी

हि शाबलेयात्मना बाहुलेयाद्भिद्यते स्वरूपेण च न भिद्यते। तथा व्यक्तिरपि गुणकर्मजात्यन्तरात्मना गोत्वाद्भिद्यते, स्वरूपेण च न भिद्यते। तथा व्यक्त्यन्तरादपि व्यक्तिः जात्यात्मना न भिद्यते स्वरूपेण च भिद्यत इत्यर्थाभेदेऽप्यविरोध इत्यर्थः। तदुक्तम्—

"एवञ्च परिहर्तव्या भिन्नाभिन्नत्वकल्पना॥
केन चिद्ध्यात्मनैकत्वं नानात्वं चास्य केन चित्"। (श्लो. वा. आ. ५६)

उक्तमर्थं प्रदेशान्तरेऽतिदिशति। एवमिति।

एवमेकत्र प्रतीतिबलाद्भेदाऽभेदयोरविरोधे उपपादितेऽत्रैकदेशि

न सम्भवति, विलक्षणरूपा प्रतीतिर्हि भेदाऽवभासः, अविलक्षणस्वरूपा प्रतीतिश्चाऽभेदावभासः, तद् येन भेदप्रातिभाससमये जातिरूपं व्यक्तिरूपं च प्रतीतं तेनाभेदप्रतीतिवेलायां तयोरन्यतरत् प्रत्येतव्यम्, तत्रैकस्य द्विरवभासोऽयं भवेत्, न पुनरितरेणाऽभेदः प्रतीतो भवति, तस्मान्नास्ति भेदाभेदयोरेकत्र प्रतीतिः।

तदिदमसारम्—न हि वस्तुद्वयप्रतीतिरेव भेदप्रतीतिः तद्भावेऽप्यभावात्। प्रथमं व्यक्तिदर्शनेपि ह्यऽस्ति जातिव्यक्त्योर्द्वयोः प्रतीतिर्न च तदा तयोर्भेदः प्रतीयते। व्यक्त्यन्तरदर्शनेन तु जातेरन्वयात् पूर्वव्यक्तेश्च व्यतिरेकादऽन्वयव्यतिरेकाभ्यां जातिव्यक्त्योर्भेदोऽवधार्यते इति भवतोऽपि सिद्धान्तः। तथा देवदत्तमुपलभ्य कालान्तरे तत्सदृशं यज्ञदत्तं दूरात् पश्यन् पूर्वोपलब्धं च देवदत्तं स्मरन् वस्तुतस्तद्विलक्षणमेव पुरुषद्वयं प्रत्येति तथापि न भेदमवधारयति संशेते हि—'किं स एवायं देवदत्तः किं वान्यः' इति। तस्माद्वस्तुद्वयप्रतीतिरेव भेदप्रतीतिरित्यऽयुक्तम्।

तथा तमेव देवदत्तं कालान्तरे दूरात् पश्यन्नपि 'किं स एवायमुतान्यः' इति सन्दिहानो वस्तुगत्यैकमेव प्रतियन्नपि नाऽभेदमवधारयितुमलं भवति, तस्मान्न वस्तुद्वयप्रतीतिरेव भेदप्रतीतिः। नाप्येकवस्तुप्रतीतिरेवाऽभेदप्रतीतिः, किं त्वऽन्योयमिति बुद्धिर्भेदावभासः, अनन्योयमिति चाऽभेदावभासः। अस्ति च शाबलेयबाहुलेयावुपलभमानस्य 'अयं गौरयमपि गौः' इत्यऽभेदावभासः, 'अन्यः शाबलेया-

दूबाहुलेयः' इति च भेदावभासः। तस्मादुपपन्नं भिन्नाभिन्नत्वम्।

नन्वऽनुवृत्ता नित्याऽनुत्पत्तिविनाशधर्मा च जातिः, विपरीतस्वभावा च व्यक्तिः, कथं तयोरैक्यम्? न ह्येकमेव वस्तु—अनुवृत्तं व्यावृत्तं नित्यमनित्यमुत्पत्तिविनाशधर्मकमतद्धर्मकं च सम्भवति त्रैलोक्यसङ्करप्रसङ्गात्, जातिरप्येवमनित्यत्वादिधर्मा स्याद् व्यक्तिरपि नित्यत्वादिधर्मा। नैष दोषः— नानाकारं हि तद्वस्तु केन चिदाकारेण नित्यत्वादिकं केन चिचाऽनित्यत्वादिकं बिभ्रन्न विरोत्स्यते। जातिरपि व्यक्तिरूपेणाऽनित्या, व्यक्तिरपि जात्यात्मना नित्येति नात्र काचिदनिष्टापत्तिः।

यत्तु सर्वगता व्यक्तिगता वा जातिरिति विकल्पितम्, तदपि व्यक्त्यात्मत्वाभिधानादेव परिहृतम्—व्य-

---

दूषणमाशङ्क्य निराकरोति। कश्चिदिति। तत्रेति। यथा भेदप्रतीतौ वस्तुद्वयप्रतीतिरेवमभेदप्रतीतावेकवस्त्ववभासोऽत्रवक्तव्यः। न चैवमस्ति अत्रापि वस्तुद्वयप्रतिभासनात्। ततश्चैकस्यैव द्विरवभासोऽयं न त्वभेदप्रतीतिरित्यर्थः। उक्तमर्थं विवृणोति। प्रथममिति। उपपादितमर्थं निगमयति। तस्मादिति। प्रकारान्तरेण शङ्कते। नन्विति। परिहरति। नैष इति। दूषणान्तरमप्यनूद्यानेनैव न्यायेन निराकरोति। यत्त्विति। व्यक्तेर्हीति। व्यक्तिमात्रगतं सामान्यमिति कस्य चिन्मतम्। तदुक्तम्—

"पिण्डेष्वेव च सामान्यं नान्तरा गृह्यते यतः॥

न ह्याकाशवदिच्छन्ति सामान्यं नाम किञ्चन" (श्लो. वा. आ. २९) इति।

क्तेर्ह्यसावात्मा कथमन्यत्र स्यात् ? । नन्वेवं व्यक्तिदेशे व्यक्त्युत्पत्तेः प्रागविद्यमाना जातिः कथं तत्र पश्चाद्भवति ?, स्वकारणान्निष्पद्यमाना व्यक्तिर्जातिविशेषात्मना सम्बद्धैवोत्पद्यत इति न दोषः ।

तत्राविद्यमाना जातिः कथं व्यक्त्या सम्बध्यते ? न ह्यसौ तदानीमेवोत्पद्यते नित्यत्वात्, न चान्यत आगच्छति, अमूर्तत्वात् ।

उच्यते—योपि देशान्तरादागत्यानेन देशेन संयुज्यते सोऽपि प्रागस्मिन् देशेऽविद्यमान एव कथमनेन देशेन संयोगमनुभवति ? कारणवशादिति वक्तव्यम्, एवं जातिरपि कारणवशादेव व्यक्तिसम्बन्धमनुभवति । इयांस्तु विशेषः—संयुज्यमानः पूर्वत्रावस्थितोऽनन्तरदेशेन प्रथमं संयुज्यते ततस्तदनन्तरदेशेनेतिक्रमेण देशान्तरसंयोगं गच्छति । तादात्म्यसमवाययोस्त्वनन्तरदेशमनपेक्ष्यैव स्वकारणतो नि-

---

चोदयति । नन्वेवमिति । परिहरति । स्वकारणत इति । जातिविशेषात्मना—गोत्वादिजातिरूपेण । सामान्यसम्बन्धमाक्षिपति। तत्रेति । एवं व्यक्तिगतत्वपक्षे दोषं परिहृत्य वैशेषिकाभिमतसर्वगतत्वपक्षेऽपि दोषं परिहरति । यद्वेति । सर्वगतं सामान्यमाभिव्यक्तिशक्त्यनुरोधेन व्यक्तिष्वेव गृह्यते । वस्तुतस्तु सर्वगतमपि सामान्यं व्यक्तेरात्माऽतः स्वव्यक्तिष्वेव तदुपलम्भो न सर्वत्र । उक्तञ्च—

"कस्मात्सास्नादिमत्स्वेव गोत्वं यस्मात्तदात्मकम् ॥
तादात्म्यमस्य कस्माच्चेत्स्वभावादिति गम्यताम्" (श्लो.वा.आ.४७)

ऽव्याप्तिः। न हि यः संयोगस्य स्वभावः स एव तादात्म्यस्य समवायस्य वाऽङ्गीकर्तव्यः प्रमाणाभावात्, विलक्षणस्वभावत्वाद्भावानाम्। तस्माददोषः।

यद्वाऽस्तु सर्वगतं सामान्यम्, न च सर्वत्रोपलब्धिप्रसङ्गः– व्यक्तीनामभिव्यञ्जकत्वात्। सर्वगतमपि सामान्यं व्यक्तेरेवात्मा तत्समवेतं वा। संयुक्तसमवायसन्निकर्षेण च सामान्यस्योपलम्भः, तेन च संनिकर्षो व्यक्तिदेशे एव सम्भवति नान्यत्रेति न सर्वत्रोपलब्धिः। अभेदेऽपि जातिव्यक्त्योर्भेदस्यापि विद्यमानत्वान्नित्यत्वानित्यत्वादिवत् सर्वगतत्वाऽसर्वगतत्वमपि नानुपपन्नम्।

कार्यदर्शनानुमेया हि शक्तिरतो यत्रैवाभिव्यक्तिर्दृश्यते तत्रैव शक्तिरवगम्यते। अतएव न विजातीयव्यक्त्यन्तरे प्रतीतिः। शक्तिव्यवस्थैव किंनिबन्धनेति चेत्?। न वस्तुशक्तेरपर्यनुयोज्यत्वात्। उक्तंच—

"वह्निर्दहति नाऽऽकाशं कोऽत्र पर्यनुयुज्यताम्॥
न चान्या मृग्यते युक्तिर्यथा संदृश्यते तथा" (श्लो.वा.आ.२९)।

दर्शनाऽसिद्धे एव वस्तुनि युक्तिरन्वेषणीयेति भावः। तत्समवेतमिति। सर्वगतमपि सामान्यं येषु विशेषेषु समवेतं तेष्वेवाभिव्यज्यतेऽतो येभ्योनिवृत्तिस्तैरसम्बन्धित्वमेव वाच्यं, न तु तत्राभावः सर्वगतत्वाभ्युपगमादितिभावः। नन्वनन्तत्वादेव विशेषाणां जात्यापि सम्बन्धो न शक्यते ग्रहीतुमतः कथं तेन जातिरभिव्यज्यतां सकलविशेषोपस्थापकानुगतैकोपलक्षणाऽभावात्?। सत्यम्। नहि यथा शब्दार्थयोर्लिङ्गलिङ्गिनोर्वा सम्ब-

यत्तु कात्स्न्र्येन वा ऽवयवशो वा वृत्तिरिति विकल्पितम्, तदप्ययुक्तम्–भेदापेक्षं हि कात्स्न्र्यं, न च सामान्यस्य स्वरूपतोऽवयवतो वा भेदोस्ति एकत्वादनवयवत्वाच्च। निरवयवत्वादेवाऽवयवशोपि वृत्तिरसम्भाव्यैव। तस्माद् व्यक्तिषु जातिर्वर्तत इत्येतावदेवात्र वक्तुं शक्यते प्रमाणतोऽवगमात्, न कात्स्न्र्यभागविभागः प्रमाणाभावादसम्भवाच्च।

तथाऽवयविनोप्यवयवेषु न कात्स्न्र्यं सम्भवति, बहुत्वाभावात्तदपेक्षत्वाच्च कृत्स्नत्वव्यवहारस्य। अवयवशो वृत्तिरप्यवयवान्तराभावादयुक्तैव। किमिदानीमेकरूपैव सामान्यस्य व्यक्तिषु, अवयवेषु चावयाविनो वृत्तिः?। नेत्युच्यते– सामान्यं प्रत्येकं वर्तते, अवयवी तु व्यासज्येत्येवं विशेषः। व्यक्त्यन्तरमनपेक्ष्यैव व्यक्त्यन्तरे वर्तमाना स्वानुरूपां बुद्धिं जनय-

---

न्धोज्ञाततया कारणं तथा जातेरपि, किं तर्हि? प्रत्यक्षायास्तस्या व्यक्तिसम्बन्धः सत्तामात्रेणैव कारणमतो न कश्चिद्दोषः। दूषणान्तरमनूद्य निराकरोति। यत्त्विति। नचेति। स्वरूपतो भिन्ने वस्तुनि कात्स्न्र्यशब्दो भवेत्–यथा कृत्स्ना घटाः पट्य वेति। सामान्यं त्वेकमेवातस्तत्रकात्स्न्र्यशब्दानुपपत्तिरित्यर्थः। अवयवान्तराभावादिति। येष्ववयवेषु वर्त्तते ततोऽवयवान्तरसद्भावे आश्रयभूतेष्ववयवेष्वयवशोवृत्तिरिति वक्तुं शक्यते, नत्वेवमस्ति, अतोऽवयवशोऽपि वृत्ति र्न सम्भवति, तस्मादत्राप्यवयवेष्ववयवी वर्तत इत्येतावदेव वक्तुं शक्यते प्रमाणतोऽवगमादित्यर्थः। तुल्यन्यायेन जातभ्रान्तिः पृच्छति। किमिति। प्रतीतिरेवात्र

न्ती जातिः प्रत्येकं वर्तते इत्युच्यते, नतु कार्त्स्न्येन वृत्तिः। अवयवी त्ववयवान्तराण्यपेक्ष्याऽवयवान्तरे वर्तमानः स्वाकारां बुद्धिं जनयन् व्यासज्य वर्तत इति व्यपदिश्यते। न ह्येकस्यामेव व्यक्तौ गोबुद्धिवदेकस्मिन्नेव तन्तौ पटबुद्धिरुत्पद्यते।

संयोगस्येदानीं कथं संयोगिषु वृत्तिः? किं जातिवत्? किं वाऽवयविवत्?। उभयविलक्षणेति ब्रूमः। स हि संयोग्यन्तरमपेक्ष्य संयोग्यन्तरे वर्तते नाऽनपेक्ष्येति न जातितुल्यत्वम्। एकत्रैव च स्वानुरूपां जनयति बुद्धिम्–'इदमनेन संयुक्तमिदमनेन' इति, तेनाऽवयविनापि नातीव तुल्यत्वमित्युभयवैलक्षण्यम्।

अथ संयोगः किमेक एव द्वयोः संयोगिनोः? उत प्रतिसंयोगि भिन्नावेव संयोगौ?। काश्यपीयास्तावत् संयोगमुभयोर्व्यासक्तमेकं मन्यन्ते। वयं तु यथा 'इदमनेन सदृशमिदमनेन' इति प्रतियोगिनमपेक्ष्येतरत्रेतरस्यावगम्यमानं सादृश्यं प्रतिधर्मि भिन्नं भवति, तथा संयोगस्य तादृशबुद्धिविषयत्वाद् भेदमेव रोचयामहे। प्रकृतमनुसरामः–तस्मान्न वृत्तिविकल्पादपि जात्यपन्हवः।

यत्तु नित्यत्वाज्जातेः स्वविषयज्ञानजननाऽसामर्थ्यान्न ग्राह्यत्वमिति। तदसत्, नित्यानामप्यर्थक्रियासामर्थ्यं क्षणभङ्गनिराकरणे वक्ष्यामः। न च हेतुल-

---

प्रमाणमित्याह। नहीति।

प्रसङ्गात्संयोगस्योभयवैलक्षण्यं प्रश्नपूर्वकमुपपादयति।

क्षणं ग्राह्यत्वम्,ज्ञानजन्यफलभागित्वलक्षणं हि तदिति शून्यवादे वर्णितम्, तस्मादयमप्यदोषः ।

यत्तु स्वलक्षणैरेव स्वानुभवद्वारेण गवादिविकल्पोदयसम्भवादप्रामाणिकी जातिकल्पनेति, तदप्यऽसारम्—न हि जातिर्न दृश्यते येनैवमुपालम्भः स्यात्, उपजायमानं तु ज्ञानं स्वविषयभूतां जातिमुपस्थापयतीति नेदृशानां प्रलापानामवसरः ।

कथं चाऽत्यन्तविलक्षणानि स्वलक्षणान्येकरूपं विज्ञानं जनयन्ति ? ।

"तदतद्रूपिणो भावास्तदतद्रूपहेतुजाः"

इति स्थितेः । भवतो वा कथं विलक्षणानां विशेषाणामेकरूपसामान्यसम्बन्धकारणत्वमिति चेत् ?, स्वहेतुवशादिति ब्रूमः—कानि चित्स्वलक्षणानि स्वकारणादुत्पद्यमानान्येकेन केन चित्स्वसामान्येन तादात्म्यं समवायं वा भजन्ते ।

ननु हेतवो विलक्षणाः कथमेकविधसामर्थ्ययुक्ता·

सयोगस्येति । न चेति । न च हेतुत्वेनैव ग्राह्यत्वं येनोक्तदोषः स्यात्, किन्तु ज्ञानजन्यफलभागित्वेनातः सामान्यस्यापि ग्राह्यत्वं सम्भवतीत्यर्थः । ज्ञानजन्यफलभागित्वमेव नास्तीत्याशङ्क्य निराकरोति । यत्त्विति । इतीति । इति हेतोरीदृशानां प्रलापानामवसरोनास्तीत्यर्थः । वस्तुतस्तु स्वलक्षणस्यैवंरूपबुद्धिजनकत्वमेव न सम्भवतीत्याह । कथमिति । अत्रैव तात्सिद्धान्तस्थितिमाह । तादिति । अत्र चोदयति । भवतो वेति । परिहरति । स्वहेतुवशादिति । एतदेव विवृणोति ।

नि स्वलक्षणानि जनयन्ति ?। न जनयेयुर्यदि विलक्षणाः स्युः, तेपि त्वेकजातीया एव।

नन्वेवं तत्सम्बन्धसिद्ध्यर्थमपरापरजात्यपेक्षायामनवस्था ?। नैष दोषः– यथा तालबीजमेकजातीयं परिणामपरम्परया तालजातिसम्बद्धां व्यक्तिमुपजनयति, सापि तथैव स्वकारणभूतबीजसमानजातीयं बीजान्तरम्। तथैकजातीयाच्छुक्राद् गोजातीयव्यक्तिनिष्पत्तिः तस्यां च तज्जातीयशुक्रनिष्पत्तिरिति नाऽत्यन्तं तादात्म्यापत्तिः, तस्मादस्त्येकमाऽऽकृतिजातिसामान्यशब्दाभिलपनीयं शाबलेयादिष्वऽनुगतम्।

न च सादृश्यमेव सामान्यम्– तद्बुद्ध्यभावात्, स एवायमिति प्रतीतिर्न तत्सदृश इति। न च सर्वसामान्यापन्हववादिनः सादृश्यमपि सम्भवति भूयोऽवयवसामान्यात्मकत्वात् तस्य।

कानिचिदिति। मतभेदेन पक्षद्वयोपन्यासः। परिहरति। नेति। महाप्रकृतं निगमयति। तस्मादिति। स्वमतेन जातिरूपं सामान्यं प्रसाध्य सादृश्यमेव सामान्यमिति परमतमाशङ्क्य निराकरोति। न चेति। अयमाशयः–किमिदं सादृश्यं नाम?। यद्येकरूपत्वं ? तर्हि जातिरेव सा। न चान्यत्सादृश्यं परस्परविलक्षणानां व्यक्तीनां सम्भवति। यदि तासामपि किञ्चिदवयवसंस्थानादि सामान्यमुच्येत ? तर्हि शाबलेयसदृशोयमिति बुद्धिः स्यात्, न गौरिति। जात्यनङ्गीकारे च सादृश्यमपि दुर्लभमित्याह। न चेति।

॥ इत्याऽऽकृतिवादः ॥

इदानीं सौगतमतसिद्धमपोहरूपं सामान्यं निराकरो-

न चाऽतद्व्यावृत्तिरूपमपि सामान्यमऽनङ्गीकृतविधिरूपसामान्येन शक्यते प्रत्येतुम्, अगोव्यावृत्ति हि प्रतियताऽवश्यं प्रथममेव गौः प्रत्येतव्यः, न ह्यऽप्रतीते गवि तद्व्यतिरेकात्मनाऽगवां निरूपणं सम्भवतीति प्रथममवश्यं विधिरूपेण गौः प्रत्येतव्यः, न हि तेभ्यो व्यतिरेकरूपमपहायाश्वादिव्यक्तीनां प्रातिस्विकेन रूपेण ग्रहः सम्भवति तेषामनन्तानां बुद्धावनारोहात्, अनारूढेषु च तेषु तद्व्यावृत्तिरूपस्य गोः प्रत्येतुमशक्यत्वात्। गौगौरिति च विधिरूपं सामान्यमवगम्यमानं कथं निवृत्तिरूपं शक्यमङ्गीकर्तुम्?। तस्मादिदमतिपेलवं दर्शनम्। तस्मादस्ति जातिः।

॥ इति आकृत्यपोहवादः ॥

ति। न चेति। येन विधिरूपं सामान्यं नाङ्गीकृतं तेनाऽतद्व्यावृत्तिरूपं सामान्यं प्रत्येतुमेव न शक्यते। अतो विधिरूपं सामान्यमङ्गीकर्तव्यमित्यर्थः।एतदेवोपपादयति। अगोव्यावृत्तिमिति। अगवामित्यकारप्रश्लेषः। कथं न सम्भवतीत्यपेक्षायामाह। नहीति। तेभ्यो–ऽगोभ्यः। दूषणमुपसंहरति। तस्मादिति। तदुक्तम्—

"अगोनिवृत्तिः सामान्यं वाच्यं यैः परि कल्पितम् ॥
गोत्वं वस्त्वेव तैरुक्तमगोपोहगिरा स्फुटम् ॥
भावान्तरमभावो हि पुरस्तात्प्रतिपादितः ॥
तत्राश्वादिनिवृत्त्यात्माभावः क इति कथ्यताम्" (श्लो.वा.अ.२)]

ननु प्रागभावादि चतुष्टयेऽभावत्वमेव सामान्यं न वस्तु-

रूपं सामान्यमस्ति। नैष दोषः। सर्वो ह्यभावो भावाश्रित एव भवति। अतस्तत्राप्यभावत्वसामान्यमेवानुत्पत्त्यादिपर्यायप्रागभावादिरूपं न वस्तुरूपं सामान्यमस्ति। ननु परस्परविलक्षणेषु त्रिष्वपि क्षत्रियादिष्वब्राह्मण इति सामान्यबुद्धिरस्ति। न च तेषु वस्तुरूपं सामान्यमस्ति। बुद्धेश्च पुरुषत्वालम्बनत्वे ब्राह्मणोऽप्यब्राह्मण इति बुद्ध्या गृह्येत तस्यापि पुरुषत्वात्। न च क्षत्रियत्वादिकमेवालम्बनम्, सामान्यबुद्धेर्विशेषरूपालम्बनत्वाऽसम्भवात्। अतो ब्राह्मणाऽभाव एवात्र सामान्यं तच्चावस्तु। एवं गवादावप्यभावात्मकमेव सामान्यं सामान्यबुद्धेरालम्बनमस्तु कृतं भावरूपेणेति ?।

अत्र कश्चित् अक्षादिशब्दवदब्राह्मणशब्दोऽपि जातित्रयस्य वाचकः। अतो नेयं सामान्यालम्बना बुद्धिः, किन्तु क्षत्रियादिविशेषालम्बनैव, शब्द एवात्रसाधारणो नार्थः, गवादौ त्वर्थोऽपि साधारण एव गोत्वादिरूपस्ततो नोक्तदोषापत्तिरित्याह।

तदेतदयुक्तं प्रतीतिविरोधात् अघटादिष्वसम्भवाच्च। क्षत्रियादिषु परिमितेषु शक्येतापि साधारणशब्दत्वं ज्ञातुम्। वृक्षादिषु त्वनन्तेष्वघटादिशब्दस्य साधारणत्वं दुरधिगमम्। तस्मादेवं वक्तव्यम्। अब्राह्मणशब्देनात्र नञ्सामर्थ्याद्ब्राह्मणपर्युदासेन क्षत्रियादित्रयाधारं पुंस्त्वं प्रतिपाद्यते। कथमेकमेवाऽब्राह्मणपदं पुंस्त्वं प्रतिपादयति ब्राह्मणं च पर्युपस्यतीति चेत्। इत्थम्। अब्राह्मण इति हि समासपदं सावयवत्वाद्विग्रहवाक्यर्थे वर्तितुं शक्नोति। अतोब्राह्मणपदसमभिव्याहृतेन नञा तदभावं प्रतिपादयता तत्सम्बद्धं पुंस्त्वं लक्षणया प्रतिपाद्यते। यावदुक्तं भवति ब्राह्मण्याऽभावयुक्तः पुमानिति, तावदब्राह्मण इति। एवमघट इत्यादावपि

घटत्वाऽभावयुक्तं पार्थिवत्वादिकं सामान्यमेव प्रतिपाद्यत इति । ननु कथं ब्राह्मणत्वाऽभावयुक्तं पुंस्त्वमेव लक्ष्यते न वस्तुमात्रम् ?। उच्यते । सत्वद्रव्यत्वपार्थिवत्वप्राणित्वपुंस्त्वब्राह्मणत्वादिकक्षाभेदेन सामान्यं भवति । पूर्वपूर्वापेक्षया चोत्तरोत्तरोविशेषो भवति। तदिह पुंस्त्वविशेषे ब्राह्मण्ये नञा पर्युदस्ते तदभावयुक्तसामान्यापेक्षःशब्दस्तदनन्तरेण पुंस्त्वेनानुरुध्यते वस्तुत्वाद्यपेक्षया तस्यैव प्रथमं प्रतीतेः। अतो ब्राह्मणत्वान्निवृत्तं नरत्वमेव ब्राह्मणपदस्य प्रतिपाद्यमवशिष्यते । ननु श्रुत्यवगतब्राह्मण्यवदर्थावगतपुंस्त्वमपि नञा किं न प्रतिषिद्ध्यते ? । मैवम् । विरम्य व्यापाराऽभावात्। नहि श्रौतं ब्राह्मण्यं प्रतिषिध्य पुनर्लाक्षणिकं पुंस्त्वं नञा शक्यं निषेद्धुं सकृदुच्चरितस्य द्विरभिधानाऽसम्भवात् । तच्च प्रतीयमानं पुंस्त्वं निर्विशेषावस्थानासम्भवादर्थात् क्षत्रियादिभेदान्तरस्थं प्रतीयते लोकेऽप्यब्राह्मणपदात् क्षत्रियादिष्वेव प्रतीतिर्न वस्तुमात्र इति । कथं भेदान्तरस्थमेव पुंस्त्वं प्रतीयते न पुनर्ब्राह्मणस्थं? निषेधादिति चेत्?। नञोत्र पर्युदासवृत्तिनिषेधकत्वाऽभावात् ?.। उच्यते । पर्युदासवृत्तिरपि नञ् अर्थतः प्रतिषेधफल एव भवति, न हि ब्राह्मण्याऽभावयुक्तपुंस्त्वं ब्राह्मणे सम्भवति, तस्मात्क्षत्रियादिष्वेव वृत्तिर्न वस्तुमात्रे । किञ्च ब्राह्मणमात्ररहितवस्त्वन्तरापेक्षायां सादृश्यात्क्षत्रियादिष्वेव मतिः शीघ्रं भवति अभाववत्सादृश्यस्यापि नञ्वाच्यत्वात् । नन्वघट इत्यत्र न घटावयवसामान्ययोगः शरावादेः सम्भवति ? । सत्यम् । अवयवसामान्यमन्तरेणापि सम्बन्धिसामान्यमात्रेणापि तत्र सादृश्योपपत्तेः । अस्ति च मृत्तिकाविकारत्वादिना तत्रापि घटसादृश्यसम्भवात् । तदुक्तम्—

"सादृश्यमेव वा वाच्यमिष्टमब्राह्मणादिषु ॥

तच्चावयवसामान्याद्विनाप्येतेन लभ्यते" (श्लो. वा. अपो. ३०)॥

यत्र तर्हि नेक्षेतेत्यादौ नास्त्येव सादृश्यं, तत्र कथम्?। सादृश्यमन्तरेणापि साहचर्यादिना तत्र शब्दप्रवृत्तिसम्भवादिति ब्रूमः। तत्र हि ईक्षणसमभिव्याहृतेन नञा तदभावं प्रतिपाद्य तत्सहितस्तद्धेतुभूतः सङ्कल्पो नेक्षेत इत्येवं लक्ष्यते। वक्ष्यति च "न त्वयमीक्षणप्रतिषेधः, किन्त्वनीक्षणविधिः व्रतप्रक्रमा" दिति। उक्तञ्च—

क्वचिद्विनापि सादृश्यात्साहचर्यादिहेतुका॥
नञ्युक्तशब्दवृत्तिः स्याद्यथा वक्ष्यत्यनीक्षणे॥
ईक्षणव्यतिरिक्ता हि क्रिया तत्राप्यपेक्षिता॥
प्रत्यासत्तेर्न सङ्कल्पमतिक्रम्य प्रतीयते" (श्लो.वा.अ.३२)

प्रतिषेधवाचिनः कथमर्थान्तरे वृत्तिरिति चेत्?। न। सर्वत्रास्य निषेधवचनत्वाऽभावात्। तथाहि— आख्यातयोग्ययं प्रतिषेधमभिधत्ते, नामधात्वर्थयोगी तु न तदन्यमात्रे तद्विरुद्धे च वर्तते। यथाहुः—

"नामधात्वर्थयोगी च नैव नञ्प्रतिषेधकः॥
वदतोऽब्राह्मणाधर्मावन्यमात्रविरोधिनौ" (श्लो.वा.अपो. ३३)

नन्वेवमपि न पिबेदित्यादावाख्यातमात्रयोगिनो नञः प्रतिषेधपर्यवसानान्न वस्त्वालम्बनत्वसिद्धिः। मैवम्। तत्रापि वस्त्वालम्बनत्वसम्भवात्। औदासीन्यं नाम क्रियारहितमात्रस्वरूपमेव, तच्च वस्त्विति। यथाहुः—

"यत्राप्याख्यातसम्बन्धात्प्रतिषेधः प्रतीयते॥
तत्रौदासीन्यवस्त्वेव प्रतिपत्ताऽवलम्बते"(श्लो.वा.अपो.३४)

यदा चाभावबुद्धेरभावविशिष्टवस्त्वेवावलम्बनं नाभावमात्रं

तदा ऽवश्यमसाधारणशाबलेयादेरालम्बनत्वानुपपत्तेस्तदन्यद्गो-स्वरूपं वस्त्वेवालम्बनमापद्यत इति सर्वं समञ्जसम् । अत्रान्ये विशेषा वार्तिकेऽवगन्तव्याः ।

तार्किकास्तु, नञ् समासेऽब्राह्मणमानयेत्यत्र पर्युदासे पूर्वपदेन नञोत्तरपदार्थसदृशक्षत्रिये लक्षणा । अघटः पट इत्यादौ च प्रसज्यप्रतिषेधार्थेन सामानाधिकरण्यादभाववल्लक्षणा । व्यासेऽपि न घटः पट इत्यादौ यथा शुक्लः पट इत्यादौ शुक्लवल्लक्षणा । न पचतीत्यादौ क्रियासम्बन्धे । भूतले न घट इत्यादौ च प्रसज्यप्रतिषेधे नञो मुख्यार्थतेत्याहुः । नैयायिकास्त्वनुमानेन गवादिशब्दानामपोहाभिधानं निराकुर्वन्ति । तद्वार्तिककारैर्न्यायार्थान्यानपोहत्वं—

"पक्षीकुर्याद्यदा सर्वांस्तदा ऽथाऽवीतहेतुभि" ।

रित्यादिना ग्रन्थेनोपन्यस्य निराकृतं तत्तत्रैवावगन्तव्यं विस्तरभयान्नेह लिखितम् । प्रकृतमनुसरामः । उपपादितमर्थं निगमयति । तस्मादिति ।

इति अपोहवादः ।

नचौलूक्यादिमतसिद्धा जातिरेवाकृतिशब्दार्थत्वेन भवद्भिरुपपादिता, भाष्यकारस्तु "अथ गौरित्यस्य शब्दस्य कोऽर्थ" इति पृष्ट्वा "सास्नादिविशिष्टाऽऽकृतिरिति ब्रूम" इत्यनेन जातिविलक्षणं सास्नादिविशिष्टमाकृतिशब्दार्थमाह । नचैतत्सम्भवति. अवयविसम्बन्धिनो गोत्वस्यावयवेष्ववस्थानात् "द्रव्यगुणकर्मणां सामान्यमात्रमाकृति" रिति वक्ष्यमाणविरोधश्च । नैष दोषः । गोत्वोपलक्षणतया सास्नाद्युपादानात् । अस्ति हि तेषामेकावयविसम्बन्धो जात्यन्तरेभ्यो गोत्वेनासाधारण्यमतस्ते शक्नुवन्ति तदुपलक्षयितुं,

म्। तच्चोपलक्षणं विना गोशब्दवाच्यं विविच्य निर्देष्टुं न शक्यम्। यथाहुः—

"पिण्डे सत्तादिजातीनां बह्वीनां समवेतता ।
तेभ्यो विशेष्यते गोत्वं सास्नादिभिरसंशयम्"(श्लो.वा.व.१)

अथवा सास्नाद्येकार्थसम्बन्धित्वाद्गोत्वस्य तदनत्यन्तभेदात्तद्वैशिष्ट्यकीर्त्तनम् ।

अत्र कश्चिद्भाष्यगतरुचकाद्युदाहरणादाकृतिः संस्थानमिति मन्यते । तन्न, जातेरेवाकृतित्वेनाऽभिप्रेतत्वात् । नहि वाय्वग्निशब्दादौ किञ्चित्संस्थानमस्ति । नानासंस्थानपरिमाणेषु च तेष्वस्ति वायुत्वादिप्रत्यभिज्ञा । शाबलेयादौ च प्रतिपिण्डं संस्थानभेदात्कथं तत्सामान्यं स्यात् । रुचकाद्युदाहरणञ्च संस्थानातिरिक्तरुचकत्वादिसामान्याभिप्रायम् । त्रयानुगतसुवर्णत्वाभिप्रायं वा । वक्ष्यति च "द्रव्यगुणकर्मणां सामान्यमात्रमाकृतिरिति" नहि गुणकर्मसु संस्थानं सम्भवतीति । ननु यदि प्रत्यक्षा जातिस्तर्हि मनुष्यत्वादिवत् ब्राह्मणत्वादिकमपि सहसैव कथं न गृह्यते ? । सत्यम् । मातापितृसम्बन्धस्य तदुपलक्षणस्याऽनवगमादिति ब्रूमः । तदुक्तम्—

"तस्योपलक्षणं चापि कचित्केन चिदिष्यते ।
रूपादीनां विशेषेण देशकालाद्यपेक्षया ॥
सुवर्णं व्यज्यते रूपात्ताम्रत्वादेरसंशयम् ।
तैलाद्घृतं विलीनञ्च गन्धेन च रसेन वा ॥
भस्मप्रच्छादितो वह्निः स्पर्शेनेनोपलभ्यते ।
अश्वत्वादौ च दूरस्थे निश्चयो जायते स्वनैः ॥
संस्थानेन घटत्वादि ब्राह्मणत्वादि योनितः ।

एतेनाऽवयवी व्याख्यातः, तस्याप्यवयवेभ्यो भेदोऽभेदो वेति विकल्पे, भेदं समवायसम्बन्धमऽवयवगुणेभ्यश्च तत्र विशेषगुणानामुत्पत्तिमाचक्षते वैशेषि-

---

क्वचिदाचारतश्चापि सम्यग्राजादिपालितात् " इति ॥
(श्लो० वा० वन० २९)

क्वचिद्देशे सम्यग्राजानुपालितादप्याचाराद्ब्राह्मण्यादिनिर्णयः स च देशापेक्षः । यस्तु वसन्ताधानादिना ब्राह्मण्यादिनिश्चयः स कालापेक्षः । सर्वत्र तूपाध्यपेक्षैरिन्द्रियैरेव सुवर्णत्वादिनिर्णयः अपरोक्षभासादित्यर्थः । ननु यथा पङ्क्तिर्यूथं वनमित्यनेकेष्वेकत्वप्रत्ययो व्यामोहस्तथा गोत्वादिप्रत्ययोऽपि भविष्यति ?। मैवम् । रजतादिप्रत्ययवद्गवादिप्रत्ययस्य विपर्यासाऽभावात् । दूरत्वदोषेण हि बहुषु वृक्षेष्वेकं वनमिति प्रतीतिः। सन्निकृष्टस्य तु वृक्षेषु एकत्वबुद्धिर्निवर्तते जातिबुद्धिस्तु कथमपि न निवर्तत इत्यस्ति विशेषः। केचित्तु नानावृक्षगतं बहुत्वसामान्यमेव वनबुद्ध्या गृह्यते तत्र चैकत्वं वनत्वं च विद्यते ऽतो भवत्येकवचनोपपत्तिः । एवञ्च वनस्य सत्यत्वान्न तद्दृष्टान्तेनाकृतेर्मिथ्यात्वमित्याहुः । अत्रान्ये विषया वार्त्तिके वनवादेऽवगन्तव्याः ।

'आकृतिन्यायमन्यत्रातिदिशति । एतेनेति । यथैव भिन्नेष्वेकबुद्धिसद्भावात् सामान्यं सिद्ध्यति तथाऽवयवेषु सोऽयं घटोऽयमित्येकद्रव्यावभासादस्त्येवावयवेभ्यो भिन्नोऽवयवीत्यर्थः । तत्किमत्यन्तभिन्नोऽवयवी अभिन्नो वेत्याकाङ्क्षायां मतान्तरेण तावद्भेदमुपपादयति । तस्यापीति । तन्मते विशेषगुणलक्षणमाह । ये चेति । स्वसमवेतं विशेषणं

काः। ये च स्वसमवेतविशेषणविशिष्टाः स्वाश्रयस्यैकजातीयस्य परिच्छेदकास्ते विशेषगुणा इत्याहुः। वयं तु भिन्नाभिन्नत्वम्– नहि तन्तुभ्यः शिरःपाण्यादिभ्यो वाऽवयवेभ्यो निष्कृष्टः पटो देवदत्तो वा प्रतीयते, तन्तुपाण्यादयोऽवयवा एव पटाद्यात्मना प्रतीयन्ते। विद्यते च देवदत्ते 'अस्य हस्तः शिरः' इत्यादिः कियानपि भेदावभास इत्युपपन्नमुभयात्मकत्वम्। तस्मादवयवानामेवाऽवस्थान्तरमवयवी न द्रव्यान्तरम्। त एव हि संयोगविशेषवशादेकद्रव्यतामापद्यन्ते, तदात्मना च महत्त्वं पटजातिं च बिभ्रतः पटबुद्ध्या गृह्यन्ते, तेन पटात्मना तेषामेकत्वम्.

नेत्राद्येकाक्षगम्यत्वम्। स्वमतमाह। वयन्त्विति। उभयोक्तयुक्तिबलादेवोभयरूपतासिद्धिरित्यर्थः। ननु भिन्नाभिन्नत्ववादिनामन्यतमस्याप्यनवधारणात् स्थाणुर्वा पुरुषो वेति वत्संदेहात्किञ्चिदप्यबाधितं न सिद्ध्येत्? । सत्यं न सिद्ध्येत् यदि ज्ञानमेवाव्यवस्थितरूपमनेकमवगाहेत, यथा स्थाणुर्वा पुरुषोवेति, नत्वेवं, वस्तुविषयोह्यस्माकमनेकान्तवादोऽनेकाकारं वस्त्विवति। यत्र तु ज्ञानमेवाऽव्यवस्थितरूपं तत्र संशयादप्रामाण्यं भवति। इह त्वनेकरूपमेव वस्त्विवति निर्णयात्कुतोऽप्रामाण्यम्। यथाहुः—

"ज्ञानं संदिह्यते यत्र तत्र न स्यात्प्रमाणता।
इहानैकान्तिकं वस्त्वित्येवंज्ञानं सुनिश्चितम्" (श्लो.वा.वन.८०)

निगमयति। तेनेति। वृत्तिविकल्पश्चास्य वार्तिककारैरेव परिहृतः। तथाहि—

"वृत्तिश्चावयवेष्वस्य व्यासज्यैव प्रतीयते।
ततः कार्त्स्न्यादिसंप्रश्नः प्रत्याख्येयोऽत्र जातिवत्"(श्लो.वा.वन.८)

सापेक्षेष्वनेकेषु वृत्तिर्व्यासज्यवृत्तिः, सा चावयिनोऽवयवेषु प्रतीतिबलादेवाङ्गीक्रियते । यत्तु विकल्पान्तरं किं कार्त्स्न्येनैकैकत्र वृत्तिः किं वाऽवयवश इति ? तु जातिवदेव परिहर्तव्यमित्यर्थः । ननु यथा तन्त्वाद्यवयवा एव पटात्मना प्रतीयन्ते तथा सास्नादिसमुदायालम्बनैव गोत्वप्रतीतिः किं नाभ्युपगम्यते ? । मैवम् । पिण्डात्पिण्डान्तरेषु सास्नादिसमुदायस्य भेदात् । अतः सास्नाद्यतिरिक्तस्यैव गोत्वबुद्ध्यालम्बनत्वम् । वनबुद्धिरपि तर्हि वनान्तरेष्वपि सम्भवन्ती न समुदायालम्बना स्यात् । सत्यम् । अस्ति ह्यस्माकमत्र वृक्षत्वं बहुत्वसामान्यं च तदाश्रया वनमिति बुद्धिर्भविष्यति । नन्वस्मिन् पक्षे वनमित्येकवचनं, यदा हि वृक्षा हि बहवो वनमिति वार्तिकोक्तः पक्षस्तदा कथमेकवचनोपपत्तिः ? । नैषदोषः । जात्यभिप्रायेणैकवचनोपपत्तेः । यथाहुः—

"एकत्वेऽप्याकृतेर्यद्वद्बहुत्वं व्यक्त्यपेक्षया ॥
बहुत्वेऽपि तथा व्यक्तेरेकत्वं जात्यपेक्षया" (श्लो.वा.वन.८६)

तर्हि व्यक्तिसङ्ख्यावशेन कदाचिदेकस्मिन्नपि वृक्षसमुदाये वनानीत्यपि प्रयोगः स्यात् ? । न स्यादिति ब्रूमः । शब्दानां नियतशक्तित्वात् । केचिदेकत्वेनैवावच्छिन्नमर्थं सर्वदा वदन्ति, केचित्तु बहुत्वेनैव, केचिदुभयथापि प्रयोगभेदेन वदन्तीति । यथाहुः—

"एकानेकाभिधाने च शब्दा नियतशक्तयः ।
केचिद्व्यक्तिं स्वसङ्ख्याकां गमयन्त्यम्बरादिवत् ॥
एकोव्रीहिस्तु निष्पन्न इति जातिं स्वसङ्ख्यया ॥ ८७ ॥
पत्नीसन्नहनादौ तु व्यक्तिमाकृतिसङ्ख्यया ।
कापिञ्जलादिजातेस्तु प्रतीतिर्व्यक्तिसङ्ख्यया ॥ ८८ ॥

व्यक्तिजाती वदन्त्यन्ये द्रव्यावयवसङ्ख्यया ।
अस्मानिति यथैकस्मिन्पाशानादितिरित्यपि ॥ ८९ ॥
तत्र व्रीह्यादिशब्दानां सङ्ख्यायोगो यथारुचि ।
वनदारादिशब्दास्तु प्रवर्तन्ते व्यवस्थया ॥ ९० ॥
जङ्गमे स्थावरे चार्थे यथा यूथवनादयः ।
तत्र व्यक्तौ च जातौ च दारादिश्चेत्प्रयुज्यते ॥ ९१ ॥
व्यक्तेरवयवानां च सङ्ख्यामादाय वर्तते ।
वनशब्दः पुनर्व्यक्तीर्जातिसङ्ख्याविशेषिताः ॥ ९२ ॥
बह्वीराहाथवा जातिं बहुव्यक्तिसमाश्रिताम् " (श्लो. वा. वन.५) इति ।

एवं संयुक्तेषु परिगृहीतविततिविशेषु पङ्क्तिरिति बुद्धिरेकत्वावगाहिनी न निरालम्बना संयोगादिविशेषस्यालम्बनत्वात् । एवमन्यत्राप्यूह्यम् । नन्वत्र भाष्यकृता पूर्वं वृक्षातिरिक्तस्याऽसत्वमुपपाद्य पुनरपि "वनादिषु नैव प्रत्ययविपर्यासो न ते न सन्ती"तिभाष्येणाऽविरुद्धं वक्तव्योत्राऽभिप्रायविशेषः । उच्यते । लोकप्रसिद्धपदार्थव्यवहारित्वान्मीमांसकानां न स्वतन्त्रपदार्थाभ्युपगमोऽस्ति लोकदृष्ट्या चासत्वं पूर्वं यदि वनेनेत्यादिनोक्तम् । यदि तु नायं विशेषो घटत इति कश्चिदभिनिविशेत तं प्रतीदं भाष्यम् "अथवनादिष्विति" । वनस्य सद्भावेऽपि न काचिदस्माकं क्षतिरित्याभिप्रायः । अत एवाहुर्वार्त्तिककाराः—

" इति निगदितमेतल्लोकसिद्धैः पदार्थै-
र्व्यवहृतिरिह शास्त्रे न स्वतन्त्राभ्युपेतैः ।
भवति तु जनदृष्ट्या जातिपङ्क्त्यादिभेदो
यदि तु न घटतेऽसौ नैव बाधोऽस्ति कश्चित्" ॥

(श्लो. वा. व. ९७)

अवयवात्मना तु नानात्वमुपपन्नम् ।

यदपि कारणगुणा रूपादयः कार्ये गुणमारभन्ते इत्युक्तम्, तदपि गुणद्वयप्रतीत्यभावान्नातीवास्मभ्यं रोचते, यदि हि द्वौ गुणौ प्रतीयेयातां तन्तुष्वेकः पटे चापरस्ततः कार्यकारणभावं प्रतिपद्येयाताम्, न तु गुणद्वयं प्रतीयते, तन्तुरूपमेव शुक्लं तन्तुषु पटभावमापन्नेषु पटरूपतया प्रतीयते न तु रूपान्तरम् । यत्रापि नानारूपैः शुक्लकृष्णरक्तपीतैस्तन्तुभिरारभ्यते पटस्तत्रापि त एव वर्णाः पटगताः प्रतीयन्ते न रूपान्तरम् ।

ननु चित्रः पट इति प्रतीयते न तु शुक्लः पीत इति वा, तस्माच्चित्राख्यं रूपान्तरमत्रोत्पन्नम् । नैवम्—चित्रं नानारूपमित्यर्थः, चित्रशब्दो हि नानापर्यायो लौकिकानां प्रसिद्धः, ततश्चित्राख्यमेकमेव रूपं लोकविरोधादेवाऽयुक्तमङ्गीकर्तुम् । नानारूपाणामपि चावयवभेदद्वारेणैकस्मिन्नपि पटे समवायो नानुपपन्नः ।

एतेन संयोगजसंयोगो निरस्तो वेदितव्यः, यथा देवदत्तसंयोग एव तस्मिन् कुण्डलिनि सञ्जाते कुण्ड-

---

प्रसक्त्यानुप्रसक्त्यैतद्वार्तिकादेर्निरूपितम् ।
प्रमेयमधिकं मूलमनुसन्धीयतेऽधुना" ॥

॥ इति वनवादः ॥

इदानीमौलूक्याभिमतं कारणगुणप्रक्रमं निराकर्तुमाह । यदपीति । ग्रन्थोनिगदव्याख्यातः । प्रतीत्यभावादन्यदपि निराकरोति । एतेनेति । उपपादितमर्थं निगमयति । तस्मादिति ।

लिसंयोगो भवति, तथा तन्तुतुरीसंयोग एव तन्तौ पटभावमापन्ने पटतुरीसंयोगो भवति न संयोगान्तरं, प्रतीत्यऽभावादित्यलमतिविस्तरेण । तस्मादस्त्येवाऽवयवी ।

वृत्तिः स्वावयवेष्वस्य व्यासज्येति प्रदर्शितम् ।
तेनास्त्यवयविद्रव्यं सामान्यं चास्ति सर्वगम्॥१६॥

॥ इतिअवयविवादः ॥

वर्णानामभिधातृत्वमाकृतेश्चाभिधेयताम् ।
कथयित्वाऽथ सम्बन्धकथैव प्रकृतोच्यते ॥ १७ ॥

महाप्रकृतं निगमयति । वृत्तिरिति । व्याख्यातप्रायं चैतत् ।

॥ इति अवयविवादः ॥

अनन्तरोक्तप्रमेयस्य वक्ष्यमाणप्रमेयेणाऽसङ्गतिमाशङ्क्य सङ्गतिं कर्तुमाह । वर्णानामिति । नन्वत्र ग्रन्थकारेण "थ गौरित्यत्र कः शब्द"स्तथा "गौरित्यस्य शब्दस्य कोऽर्थ"इत्यादिभाष्यद्वयमनुक्रम्य वर्णानामभिधातृत्वमाकृतेश्चाभिधेयतोपपादिता । सम्बन्धोपपादनसमये "अथ सम्बन्धः क" इत्येतद्भाष्यं कथमुपेक्षितम् । प्रयोजनाऽभावादिति चेत् । न । तदनुसारेणैव सम्बन्धस्योपपादयिष्यमाणतया तत्सत्वात् प्रक्रमभङ्गापत्तेश्च तस्माद्वक्तव्योऽभिप्रायविशेषः ? । उच्यते । संज्ञासंज्ञिसम्बन्धस्य पूर्वमेवोक्तत्वात्प्रश्नस्तावदनुपपन्नः । "यच्छब्दे ज्ञातेऽर्थो विज्ञायत" इत्युत्तरमप्यनुपपन्नं सम्बन्धस्वरूपस्याऽकथनात् । अत एवाहुः ।

" किमौषधं ज्वरस्येति पृष्टो यदि वदेदिदम् ।
येनाऽसौ नश्यतीत्येवं किं तेन कथितं भवेत्" (श्लो.वा.स. ३)

अथायमभिप्रायः—सम्बन्धग्रहणपूर्विका हि प्रतीतिः सं-

ज्ञाप्यज्ञापकभावश्च सम्बन्धः प्रागुदीरितः ।
तन्नित्यत्वं यदाक्षिप्तं तत् समाधीयतेऽधुना ॥१९॥

एवं हि पूर्वमुक्तम्-यस्मात् प्रथमश्रवणे शब्दोऽर्थं न प्रत्याययति, तस्मान्नास्य स्वाभाविकमिन्द्रियवत् प्रत्यायकत्वम् । 'अस्यायमर्थः' इति पुरुषेण कथिते प्रत्याययति ततो नूनमस्य पुरुषकृतं प्रत्यायकत्वमिति पौरुषेय एव सम्बन्ध इति ।

ज्ञासंज्ञिसम्बन्धप्रतीत्युत्तरकालभावित्वात् न प्रतीत्यङ्गं संज्ञात्वमजानानस्यापि सम्बन्धान्तरदर्शनेनार्थप्रतीत्युपपत्तेः, अतोऽत्रापरितुष्यन् अविनाभावरूपसम्बन्धान्तराभिधित्सया पृच्छति "अथ सम्बन्धः क" इति । एतच्चायुक्तम् । उत्तरभाष्येऽविनाभावरूपसम्बन्धकीर्तनाऽभावात् । तस्मादयमभिप्रायो भाष्यकारस्य पूर्वोक्तएव सम्बन्धो मध्ये शब्दार्थविचारव्यवहितो, नित्यानित्यविचाराय पुनः स्मारयति । उत्तरभाष्येणापि अभिधानक्रियां प्रति शब्दस्य परकर्तृत्वं करणत्वं वा तदेव-शक्तिसंज्ञागमकत्वादिपर्यायमुच्यते । यच्छब्दज्ञानादर्थज्ञानपर्यं सम्बन्धश्च ज्ञाप्यज्ञापकत्वमेवेति भाष्यार्थः । भाष्यादेतदर्थाप्रतीतिरिति चेत् ? । न । "ननु कृतक"इति पूर्वमुपपादित इत्यनुमानभाष्यपर्यालोचनया तस्यैव प्रतीतेः नहि सम्बन्धान्तरस्य कृतकत्वं पूर्वमुक्तमिति । अत एव ग्रन्थकारोऽनतिप्रयोजनत्वाज्ज्ञाप्यमुपेक्ष्य पूर्वोक्तसम्बन्धानुभाषणेनाक्षेपसमाधानाभ्यां नित्यत्वाऽनित्यत्वविचारमारभते । ज्ञाप्येति । आक्षेपं तावदनुभाषते । एवं हीति ।

तत्राभिधीयते—न हि 'अस्यायमर्थः' इति सम्बन्धकरणमिदं, प्रसिद्धसम्बन्धकथनं ह्येतत्। कथमवगम्यते ?, अर्थान्तरकथने बहुभिर्निवारणात्—यो हि कश्चित् कस्मै चिद् गोशब्दस्याश्वं गवयं वाऽर्थमाह तमन्ये बहवो निवारयन्ति—नायमस्यार्थः, सास्नादिमानस्यार्थ इति। सम्बन्धक्रियापक्षे च देवदत्तादिवद् येनैव सम्बन्धः क्रियते स एवार्थ इति निवारणं नोपपद्यते, तस्मान्न तावदर्वाचीनाः पुरुषा अस्य शब्द-

---

समाधानं प्रतिजानीते। तत्रेति। प्रसिद्धेति। यदाह भाष्यकारः "सिद्धवदुपदेशात् यदि सम्बन्धुरभावान्नियोगतोनार्था उपलभ्येरन् ततोऽर्थापत्त्या सम्बन्धकर्तारमवगच्छामः, अस्ति त्वन्यः प्रकारो वृद्धानां स्वार्थेन व्यवहारमाणानामुपशृण्वन्तो बालाः प्रत्यक्षमर्थं प्रतिपद्यमाना दृश्यन्ते, तेऽपि वृद्धा यदा बाला आसन् तदाऽन्येभ्यो वृद्धेभ्यः तेऽप्यन्येभ्य इति नास्त्यादिरिति। अतो ऽर्वाचीनानां सम्बन्धवक्तृत्वमात्रं नतु कर्तृत्व"मित्युपपादितमर्थं निगमयति। तस्मादिति। अत्र वार्तिककारैः—

"समयः प्रतिमर्त्यं वा प्रत्युच्चारणमेव वा।
क्रियते जगदादौ वा सकृदेकेन केनचित्॥ १३॥
प्रत्येकं वापि सम्बन्धो भिद्येतैकोऽथवा भवेत्।
एकत्वे कृतको न स्याद्भिन्नश्चेद्भेदधीर्भवेत्॥ १४॥
भिन्नत्वे प्रतिसम्बन्धं शक्तिः कल्प्याऽभिधां प्रति" (श्लो० वा० सम्ब०)

इत्यादिना ग्रन्थेन विकल्पोपन्यासपूर्वकमिदानीन्तनकर्तृत्वं

स्यायमर्थोऽस्यायमर्थ इति वदन्तोपि तत्सम्बन्धकर्तृत्वेनाशङ्कनीयाः ।

यदि परमेवं स्यात्?— सर्गादिकाले भगवता प्रजापतिना सर्वमेव स्थावरजङ्गमं धर्माधर्मौ च सृष्ट्वा संव्यवहाराय च शब्दानामर्थैः सम्बन्धं कृत्वा धर्माधर्मप्रतिपादनाय च कृतसम्बन्धैः पदैर्वेदान् कृत्वाऽऽत्मजेभ्यो मरीच्यादिभ्यः शब्दार्थसम्बन्धो वेदाश्च प्रतिपादितास्तैरप्यन्येभ्यस्तैरप्यन्येभ्य इत्येवं पूर्वपूर्वेभ्यः प्रतिपद्योत्तरोत्तरेषां शब्दार्थप्रतिपत्तिर्व्यवहारश्चेति ।

तदप्ययुक्तम्—इत्थम्भावे प्रमाणाभावात् । प्रथमश्रुतावऽप्रतीतिरेव प्रमाणम्—सामयिकत्वे ह्यऽप्रतिपन्नसमयानामप्रतीतिः प्रतिपन्नसमयानां च प्रतीतिर्देवदत्तादिशब्दवदुपपन्ना भवति, स्वाभाविके तु प्रत्यायकत्वे प्रथमश्रवणेपि प्रतीतिः स्यादिति चेत्?, न स्वाभाविकमपि प्रत्यायकत्वमवगतं सदऽर्थप्रतिपत्तौ नि-

---

सम्बन्धस्य निराकृत्य—

"सर्गादौ च क्रिया नास्ति तादृक्कालोहि नेष्यते" ।

इत्यादिना महता प्रबन्धेन जगदादिपक्षो निराकृतस्तत्प्रपञ्चस्तत्रैवावगन्तव्यः । ग्रन्थकारस्तु तदनुसारेणैव सर्गादिपक्षं निराकर्तुमाह । यदि परमिति । निराकरोति । तदपीति । प्रमाणसद्भावं शङ्कते । प्रथमेति । शब्दानां प्रथमश्रवणेऽर्थस्य याऽप्रतीतिः सैव सम्बन्धस्य कृतकत्वे प्रमाणम् । स्वाभाविकत्वे तु तस्य प्रथमश्रवणेऽपि प्रतीतिः स्यादित्यर्थः ।

मित्त्वं नाऽप्रतिपन्नमिति युक्तैव प्रथमश्रवणेऽर्थस्या-ऽप्रतीतिः। नच सर्गादिर्नाम कश्चित्कालोऽस्ति, सर्वदा हीदृशमेव जगदिति दृष्टानुसारादवगन्तुमुचितम्। ननु स कालोऽभूत् यदा सर्वमिदं नासीदिति, ? प्रमा-णाभावात्।

मन्त्रार्थवादेतिहासपुराणादि प्रमाणमिति चेत् ?, न, वेदानां पौरुषेयसम्बन्धापेक्षिणां स्वयं च पौरुषेया-णां शाक्यादिग्रन्थवदऽतीन्द्रियार्थे प्रामाण्यासंभवात्, तदप्रामाण्ये च तन्मूलानां धर्मशास्त्रादीनां दूरनिरस्त-मेव प्रामाण्यम्। सर्वाभावे च सृष्टिरपि न सम्भवति मृत्तन्त्वाद्युपादानेन हि घटादीन्युपादीयन्ते, सर्वाभावे हि केनोपादानेन सर्वमिदमुपादेयम् ?।

परिहरति। नेति। इतीति। प्रथमश्रवणे प्रत्यायकत्वस्यैवान-वगमादर्थाऽप्रतीतिरित्यर्थः। वेदानामिति। एतच्च पौरुषेयत्व-वादिमते दूषणम्। इतोपि न सर्गादिकालोऽस्तीत्याह। सर्वा-भाव इति। तदुक्तम्—

"यदा सर्वमिदं नासीत्काऽवस्था तत्र गम्यताम्।
प्रजापतेः क्व वा स्थानं किं रूपं च प्रतीयताम्॥ ४५॥
तथा प्रवृत्तिः कथमाद्या च जगतः सम्प्रतीयते।
शरीरादेर्विना चास्य कथमिच्छाऽपि सर्जने"(श्लो.वा.सं४७)

ननु"प्रजापतिर्वा इदमेक एवासीत्सोऽकामयत प्रजाः पशून्सृजे-ये"त्युपक्रम्य ततोवै सप्रजाः पशूनसृजत"इति(१) श्रुतिरेवात्र प्र-माणं किं युक्तिकलापेनेति चेत्। न। अन्यपरसृष्ट्यादिवाक्यादुप-

(१) तैत्तिरीय संहिता २ का० १ प्र. १ अनुवाके।

स्यान्मतम्-आत्मैवैको जगदादावासीत् स एव स्वेच्छया व्योमादिप्रपञ्चरूपेण परिणमति बीजमिव वृक्षरूपेण। चिदेकरसं ब्रह्म कथं जडरूपेण परिणमतीति चेत् ?, न परमार्थतः परिणामं ब्रूमः, किं त्वपरिणतमेव परिणतवत् एकमेव सदनेकधा मुखमिवादर्शादिषु अविद्यावशाद् विवर्तमानमात्मैवात्मानं चिद्रूपं जडरूपमिव अद्वितीयं सद्वितीयमिव पश्यति, सेयमविद्योपादाना स्वप्नप्रपञ्चवन्महदादिप्रपञ्चसृष्टिः।

तथा च-"सर्वं खल्विदं ब्रह्म" "आत्मैवेदं सर्वम्" "नेह नानास्ति किं चन" इत्यादयो बहवोऽद्वैतवादाः। तथा-"इन्द्रो मायाभिः पुरुरूप ईयते" इति भेदावगतेर्व्यक्तमेव मायानिबन्धनत्वं दर्शितम्। तथा "लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान् वेद" इत्यादिनाऽनात्मदर्शने निन्दा, "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इति च नानात्वदर्शननिन्दा, सर्वमिदमद्वितीयमेव ब्रह्म पारमार्थिकम्, भेददृष्टिश्चाविद्योपादानेत्येतमर्थं प्रकटयतीति।

किमिदानीमसन्नेवायं प्रपञ्चः ?, ओमिति चेत् ?,

जातायाः प्रसिद्धेर्भ्रान्तिरूपत्वेनाऽप्रमाणत्वात्। अन्यपरत्वं च वेदस्य प्रयोजनवदर्थपरत्वादुपाख्यानमात्रस्यानुपपयोगात् स्तुतिनिन्दार्थत्वाङ्गीकारादिति।

वेदान्तिमतं शङ्कते। स्यान्मतमिति। ग्रन्थो निगदव्याख्यातः। एतमर्थमिति। अनात्मदर्शननिन्दा नानात्मदर्शननिन्दा चैतमर्थं प्रकटयतीति सम्बन्धः। कोऽसावर्थस्तमाह। सर्वमिदमिति।

न, प्रत्यक्षविरोधात्, यथा च प्रत्यक्षं प्रपञ्चसद्भावग्राहकं तथोक्तं प्रत्यक्षसूत्रे। न चागमेन प्रत्यक्षबाधः सम्भवति प्रत्यक्षस्य शीघ्रप्रवृत्तत्वेन सर्वेभ्यो बलीयस्त्वात्।

न च पौर्वापर्यन्यायेन प्रवृत्तमेव प्रत्यक्षमागमेन पश्चाद्बाध्यत इति वाच्यम्, आगमस्य प्रत्यक्षेण प्रवृत्तिनिरोधात्–आगमप्रवृत्तिसमयेऽपि हि भेदप्रपञ्चमुपदर्शयत् प्रत्यक्षमागप्रवृत्तिमेव निरुणद्धि, यथा खलूत्पत्तुमुपक्रममाण एव घटो दण्डेनाऽऽहन्यमानो नोत्पत्तुं प्रभवति तथाऽऽगमोपि। किं च प्रपञ्चाभावं प्रतियताऽवश्यमागमोपि प्रपञ्चान्तर्गतत्वादऽसद्रूपतया प्रत्येतव्यः कथं चागमेनैवागमस्याभावः प्रतीयेत?। असद्रूपतया हि प्रतीयमानो न कस्य चिदप्यर्थस्य प्रमाणं स्यात्, प्रामाण्ये वा नाऽसत्त्वम्।

कश्चित् पुनराह–नासत्त्वं प्रपञ्चस्य ब्रूमः प्रत्यक्षादिप्रमाणतः सिद्धत्वात्, नापि परमार्थतः सत्त्वम् आत्मज्ञानेन बाध्यमानत्वात्, तस्मात् सदसद्भ्यामनिर्वाच्योऽयं प्रपञ्च इति।

तदिदमसारम्—सतोऽन्यत्वमेवा ऽसत्त्वम्, तद् यदि प्रपञ्चः सन्न भवति व्यक्तमऽसन्नेवायम्, अस-

---

निरोधं प्रकटयति। आगमेति। दूषणान्तरमाह। किञ्चेति।

एतन्मतानुसारिण एवाभिप्रायमाह। कश्चित्त्विति। उक्तं च–

"प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत्।
गाहते तदनिर्वाच्यमाहुर्वेदान्तवादिनः" इति।

त्वाभावे वा सत्त्वापत्तिः, सदसत्त्वयोरेकनिषेधस्येतरविधिनान्तरीयकत्वात्। न च विधाद्वयरहिते विधान्तरं संभवति।

अथापि यन्न कदाचित्प्रतीयते तदऽसद् यथा शशविषाणम्, यत् प्रतीतं न बाध्यते तत्सद् यथाऽऽत्मतत्त्वम्, प्रपञ्चस्तु प्रतीयमानत्वाद्बाध्यमानत्वाच्च भावाभावाभ्यामनिर्वाच्य इति मतम्? । तदनुपपन्नम्— लोकविरोधात्, यद्धि प्रतीतं बाध्यते मृगतोयरज्जुसर्पादि तदऽसदेवेति लौकिकी प्रसिद्धिः, न हि शशविषाणादीनां मृगतोयादीनां च कश्चिद्विशेषो लोके। सोयं प्रपञ्चोपि बाध्यते चेत्? असन्नेवेति नाऽनिर्वाच्यत्वम्।

अथापि लोकप्रसिद्धिमनादृत्य वृद्ध्यादिवत् परिभाषारूपेणानिर्वाच्य इत्युच्यते?। तथाप्ययुक्तम्— प्रपञ्चस्य बाधाभावात्, न तावत्संसारावस्थायामाऽऽगमेन बाधः सम्भवतीत्युक्तम्,। मुक्तस्य तु बाधकज्ञानं नाशङ्कनीयमेव प्रलीनसर्वकरणत्वात्, करणाभावे च ज्ञानाऽसम्भवात्,। न चास्मर्यमाणस्य प्रपञ्चस्याभावः शक्यते प्रत्येतुम्, न च तस्यामवस्थायां सम्भवति स्मरणम्, सर्वसंस्काराणामुच्छिन्नत्वात्, तस्मान्न बाधसम्भवः।

यच्चाऽविद्याकृतोयं प्रपञ्च इति, का पुनरियमविद्या? किं भ्रान्तिज्ञानम्? किं वा भ्रान्तिज्ञानकारणभूतं

बाधाऽभावं विवृणोति। न तावदिति। असद्रूपतया हि प्रती-

वस्त्वन्तरम् ?। यदि भ्रान्तिः, सा कस्य ? न ब्रह्मणस्तस्य स्वच्छविद्यारूपत्वात्, न हि भास्करे तिमिरस्यावकाशः सम्भवति। न च जीवानाम्-तेषां ब्रह्मातिरेकेणाभावात्। भ्रान्त्यऽभावादेव च तत्कारणभूतं वस्त्वन्तरमप्यनुपपन्नमेव। ब्रह्मातिरेकेण भ्रान्तिज्ञानं तत्कारणं चाभ्युपगच्छतामद्वैतहानिः।

किंकृता च ब्रह्मणोऽविद्या ?, न हि कारणान्तरमस्ति। स्वाभाविकीति चेत् ? कथं विद्यास्वभावमऽविद्यास्वभावं स्यात्। स्वाभाविकत्वे चास्याः केन विनाशः स्यात् ?। आगमिकं ध्यानादि तज्जन्यं वा स्वरूपज्ञानं ब्रह्माऽविद्यां नाशयतीति चेत् ?, न, न ह्यागमो वा ध्यानादयो वा तज्जन्यं वा ज्ञानं नित्यज्ञानात्मकब्रह्मातिरिक्तमस्ति यदऽविद्यां नाशयेत्। तद्वरमस्मान्मायावादान्माहायानिकवादः, यत्र नीलपीतादिवैचित्र्यं कार्यकारणभावो बद्धमुक्तादिव्यवस्था च सन्तानभेदेन समर्थ्यते। नित्यमेकरसं

यमानो न कस्य चिदर्थस्य प्रमाणं स्यादित्युक्तमित्यर्थः। प्रपञ्चस्याविद्यकत्वं निराकर्त्तुमाह। यद्येति। भ्रान्त्यभावादिति। कार्यैककल्प्यत्वादज्ञानस्य तदभावेऽनुपपत्तिरित्यर्थः। यथाहुः—

"लौकिकी वैदिकी वाऽपि नाऽज्ञाने दृश्यते प्रमा।
कार्यदृष्ट्याऽथ कल्प्यं चेल्लाघवादेकमेव तत्"(वेदान्तमुक्ता.)इति।

नहीति। जीवानां तावदविद्योत्तरकालीनत्वात्पूर्वसिद्धाज्ञानकारणत्वं न सम्भवति। तस्माद्ब्रह्मैव कारणमिति वाच्यं, तच्चानुपपन्नं, विद्यारूपस्याऽज्ञानकारणत्वानुपपत्तेः। न हि भा-

निष्प्रपञ्चमात्मानमुपेयुषां तु समस्तलोकवेदव्यवहारोच्छित्तिरेव स्यात् ।

यदप्याहुः—अज्ञानजन्यः प्रपञ्चो ज्ञानेन विनाश्यते मृगतोयवत् स्वप्नप्रपञ्चवच्चेति । तदप्ययुक्तम्—यदि कुलालादिव्यापारस्थानीयेनाऽज्ञानेन घटवदुत्पन्नः प्रपञ्चो मुसलस्थानीयेन ज्ञानेन नाश्यते, तथापि नाऽसत्त्वं प्रपञ्चस्य स्यात्, उत्पत्तिविनाशयोगादनित्यतामात्रं स्यान्नाऽत्यन्ताभावः ।

केन च ज्ञानेन नाशः ?, नात्मज्ञानेन, विरोधाभावात् । निष्प्रपञ्चात्मज्ञानेनेति चेत् ?, न, तत्रात्मज्ञानांशस्याविरोधात् निष्प्रपञ्चत्वज्ञानं विनाशकमिति पारिशेष्यादापन्नम्—प्रपञ्चाभावश्च निष्प्रपञ्चत्वं, न च विद्यमाने प्रपञ्चे तदभावज्ञानमुत्पत्तुमर्हति । ज्ञानेन ह्युत्पन्नेन प्रपञ्चो नाशयितव्यः प्राक् च ज्ञानात् सद्रूप एव प्रपञ्चस्तस्मिन् सद्रूपेऽवस्थिते कथं तदभावविषयस्य ज्ञानस्योत्पत्तिः । तत्र ज्ञानोत्पत्तौ सत्यां प्रपञ्चस्य नाशः, तद्विनाशे च सति तदभावविषयज्ञानोत्पत्तिरितीतरेतराश्रयत्वम् ।

एतेन मृगतृष्णिकाजलस्य ज्ञानविनाश्यत्वं प्रत्यू-

स्करस्य तिमिरकारणत्वं दृष्टमिष्टं वा । ब्रह्मणश्च तत्कारणत्वेऽनिर्मोक्षप्रसङ्गः अतः कारणान्तराऽभाव इत्यर्थः । अन्यदप्याशङ्क्य निराकरोति । यदपीति । उक्तं न्यायमन्यत्रातिदिशति । एतेनेति । पूर्वकाले सत एव पश्चान्न विनाश्यत्वोपपत्तिरिति भावः ।

ढम्, न हि तज्जलं सत् पश्चान्नाश्यते ? प्रागपि हि तत्र नैव जलम्, अजलमेव हि रश्मिप्रतप्तमूषरं भ्रान्त्या जलात्मनाऽवगतं पश्चाद्बाधकेन यथावस्थितरूपमवगम्यत इत्यलमनेन बालजल्पितेन ।

॥ इत्यद्वैतमतनिरासः ॥

केचित्त्वौपनिषदाः—परमार्थत एवात्मा प्रपञ्चरूपेण स्वेच्छया परिणमतीति मन्यन्ते, तथा च "सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम्" तदैक्षत बहुस्यां प्रजायेय" (छा०उ०) इत्येकस्यैव सन्मात्ररूपतया प्रागवस्थितस्यात्मनोऽनेकव्योमादिभेदभिन्नप्रपञ्चरूपेण बीजस्येव वृक्षरूपेण परिणामो दर्शितः, "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः"(तै.उ.२ अ.) इत्यौपनिषदा वादा पुराणवादाश्चाऽस्मिन्नर्थे शतशो दृश्यन्ते । "पुरुष एवेदं सर्वम्" "नेह नानास्ति किञ्चन" इत्यादि तु धर्मिभेदाभावाभिप्रायम्, तद्यथैको वृक्षः प्रादेशमात्रादूर्ध्वं नानाशाखोऽवस्थितो दूरस्थैर्नाना वृक्षा इति गम्यते तद्वेदिनश्चान्ये तेभ्यः कथयन्ति—'नेमे नानावृक्षाः, किं त्वेक एवायं वृक्षो नानाशाखोऽवस्थितः' इति तथा नामरूपप्रपञ्चं

तत्रैव मतान्तरमाशङ्कते । केचिदिति । ननु सर्वस्य व्योमादिभेदभिन्नत्वे भेदाऽभावप्रतिपादनं विरुद्धमत आह । पुरुष एवेदमिति । ननु यदि सद्रूपस्यैवात्मनो व्योमादिप्रपञ्चः परिणाम इत्युच्यते कथं तर्हि तस्याऽसत्त्वं ? नहि बीजपरिणामस्य

नानारूपं पश्यताम्, मूलकारणस्यैकस्यात्मनोऽयं नानारूपः परिणाम इत्येवमजानतां तत्त्वकथनार्था एवंविधा वादाः—सर्वमेकस्यैव विस्तारो न किञ्चिदत्र नानाऽस्तीति ।

ये च पुनरसत्त्ववादाः प्रपञ्चविषया अविद्यावादा भ्रान्तिवादा मायावादाश्च ते सर्वे प्रपञ्चस्यानित्यत्वादौपचारिकाः । यथा मृगतोयरज्जुसर्पस्वप्नप्रपञ्चादयः किञ्चित्कालमाविर्भूय पश्चाद्विलीयन्ते तथा भेदप्रपञ्चरूपोब्रह्मपरिणामोप्याविर्भवति विलीयते चेत्याऽऽविर्भावतिरोभावधर्मकत्वसाम्यादऽसन्नित्युपचर्यते, तस्य चाऽसत्कल्पत्वे तद्विषयस्य ज्ञानस्यापि सिद्ध्यत्यौपचारिकं भ्रान्तित्वम् । मायानिबन्धनत्वं च—“ इन्द्रो मायाभिः पुरुरूप ईयते ” इत्यादिषु युक्तमुपचारेण वक्तुम् । “ आत्मैवैकः सत्यः ” इति च तस्यैव नित्यत्वादुच्यते, यथा “ गोअश्वा एव पशवोऽन्ये त्वऽपशवः ” इति, तथेदं द्रष्टव्यम् ।

श्चस्यासत्वं भवति तत्राह । ये चेति । असत्ववादस्यौपचारिकत्वं दर्शयति । यथेति । तस्य चेति । प्रपञ्चज्ञानस्याऽपि वस्तुतो न भ्रान्तित्वं बाधाऽभावादिति भावः । मायेति । मायाविद्ययोरल्पान्तरत्वादभेदेनोपन्यासः । इत्यादिषु वाक्येषु यत्प्रपञ्चस्य मायानिबन्धनत्वं तदप्यौपचारिकं वक्तुं युक्तमित्यर्थः । नन्वागमत एव सत्यत्वश्रवणात्तदतिरिक्तस्य मिथ्यात्वावगतेः कथमौपचारिकं मायिकत्वमत आह । आत्मैवेति । अनेन चात्मन एव नित्यतया सत्यत्वमुच्यते प्रपञ्चस्त्वनित्यः ततो निकृष्टो

यस्त्वेवंविधान् वादान् यथाश्रुतार्थान् गृह्णाति स पश्वन्तरेष्वऽपशुत्ववादम् " आदित्यो यूपः " इत्यादि च यथाश्रुतं गृह्णीयात् । अथ तत्र प्रमाणान्तरविरोधः ?, सोऽत्रापि समानः । अथार्थवादत्वा॰त्तत्र न यथाश्रुतार्थग्रहणम् ?, तदपि समानम्–प्रपञ्चस्याप्यऽसत्यत्वं वैराग्यजननार्थम्, आत्मनश्च परमार्थत्वं मुमुक्षूणामुत्साहजननार्थम् ।

विस्पष्टं चैतन्मृत्पिण्डविकारदृष्टान्तदर्शनात्–सर्वत्र हि दृष्टान्तोपादानं साध्यप्रतिपादकस्य तात्पर्याभिव्यक्त्यर्थम्, ततश्च यथा कारणभूतमृत्पिण्डविज्ञानेन मृन्मयो विकारः सर्वो विज्ञातो भवति–शरावादिविकारो हि वाचारम्भणं नामधेयमात्रं मृत्तिकेत्येव सत्यम्, एवं प्रपञ्चोपि सद्विज्ञानेन विज्ञातो भवति, विकारो हि वाचारम्भणं नामधेयमात्रं सदित्येव सत्यम्, इत्युक्ते ज्ञायत एतत्– यथाऽऽविर्भावतिरोभावधर्मा नानाविधो विकारः शरावादिः प्रपञ्चो, मृत्तिका च सर्वत्राऽनपायिनी तेषां कारणम्, कार्यकारणयोश्चावस्थामात्रभेदात् स्वरूपभेदाभावात्

यथा गवाद्यपेक्षयाऽन्येऽपशवः, न चैतावता प्रपञ्चस्य मिथ्यात्वमेव भवतीति भावः । एवंविधानिति । औपनिषदान्वादानित्यर्थः । कथमेतदर्थपरत्वमित्याकाङ्क्षायां दृष्टान्तेन तात्पर्यनिर्णयमाह । विस्पष्टमिति । सदिति । यत्सद्ब्रह्म तदेव सत्यमित्यर्थः । ततः किमत आह । कार्येति । सर्वामिति । व्यासरूपेणाविज्ञातमपीत्यर्थः । सति विज्ञाते—सद्रूपे विज्ञात इत्यर्थः ।

कारणज्ञानेन तत्सर्वं कार्यमवस्थाभेदेनाऽज्ञातमपि स्वरूपेण ज्ञातं भवति, तथा प्रपञ्चोप्याविर्भावतिरोभावधर्माऽनवस्थायी तत्कारणं चात्मा सद्रूपः सर्वानुयायी नाऽपायधर्मा, तस्मिन् विज्ञाते सर्वं तदात्मकमविज्ञातमपि व्यासरूपेण समासेन ज्ञातं भवतीत्येतदत्र विवक्षितमस्ति, तस्मादेकस्यैवात्मनः परिणामोयं भेदप्रपञ्चो न त्वऽसन्नेव। असत्त्वे हि कथं सद्विज्ञानेन विज्ञातः स्याच्छशविषाणवत्, न हि मृत्पिण्डे विज्ञाते सति शशविषाणं विज्ञातं भवति, तथा प्रपञ्चोपि स्यात्, ततस्तु प्रस्तुतहानिरेव स्यात्। एकोप्यात्माऽन्तःकरणोपाधिभेदाद् भिन्नो जीव इत्युच्यते जीवभेदाच्च बन्धमुक्तिव्यवस्थाप्युपपन्नेति।

तदिदमयुक्तम्-चिद्रूपस्यात्मनो जडरूपपरिणामाऽसम्भवात्। एकत्वे चात्मनः सर्वशरीरेषु प्रतिसन्धानं स्यात्-देवदत्तोऽहं यज्ञदत्तोहमेवेति, तथा देवदत्तशरीरे मे सुखं यज्ञदत्तशरीरे मे दुःखमिति, पादे मे सुखं शिरसि मे वेदनेतिवत् सर्वसुखदुःखोपलब्धिश्च स्यात्। अन्तःकरणभेदाद् व्यवस्थेति चेत् ?, न, अचेतन-

---

तथा प्रपञ्चोऽपि शशविषाणवदविज्ञात एव स्यादित्यर्थः। किमतो यद्येवमत आह। ततश्चेति। प्रपञ्चस्याऽज्ञाने च यत्प्रस्तुतं कारणे ज्ञाते कार्यं ज्ञायत इति तस्य हानिरेव स्यादित्यर्थः। इदं चेष्टं सिध्यतीत्याह। एकोपीति। तदेतद्दूषयति। तदिदमिति। परिहरति। नाऽचेतनत्वादिति। प्रतिसन्धानाऽभावे च नान्तस्करणभेदः प्रयोजकः किन्तु सुखदुःखानुभवितृचेतनभेद एव।

त्वात्-न ह्यन्तःकरणं सुखदुःखे अनुभवति अचेतनत्वात्, आत्मा त्वनुभविता स च सर्वत्रैक इति कः प्रतिसन्धानं वारयेत्. तस्मादिदमपि नातीव सुन्दरमिति ॥

॥ इत्यात्मपरिणामवादनिरासः ॥

आत्मभेदं प्रकृतिपरिणामं च जगत् साङ्ख्या मन्यन्ते, द्विविधं च साङ्ख्यम्-निरीश्वरं सेश्वरं च। निरीश्वरवादिनस्तावदाहुः— प्रकृतिरऽचेतना त्रिगुणात्मिका प्रधानशब्दाभिधेया महदादिविशेषपर्यन्तेन प्रपञ्चरूपेण चेतनानामुभोगाय परिणमतीति। सेश्वरवादिनोप्येवमाहुः,-इयांस्तु विशेषः- पुरुषशब्दाभिधेयमीश्वरं क्लेशकर्मविपाकाशयैरपरामृष्टमाश्रित्य प्रकृतिर्जगत् सृजतीति, यथा हि संस्कृतं क्षेत्रमधिष्ठाय तत्सम्पर्कवशाद्बीजमङ्कुरादिक्रमेण महान्तं वृक्षमारभते तथा सर्वव्यापिनमीश्वरमधिष्ठाय सर्वव्यापिनी प्रकृतिस्तत्सम्पर्कवशान्महदहङ्कारतन्मात्रादिक्रमेण परिणमन्ती विशेषान्तं प्रपञ्चमारभत इति । इतिहासपुराणेष्वपि प्रायेणैतदेवमतम् । सेयं प्रकृत्युपादाना सृष्टिः, ईश्वरस्तु निमित्तमात्रम्, क्षेत्रज्ञास्तु भोक्तारः, प्रकृतिरेव तु सर्वकार्याणां कर्त्रीति भोग्या सा च सर्वत्रैका, भोक्तृणां च भेदाद्

सच सर्वत्रैक एवेति प्रतिसन्धानापत्तिरित्यर्थः । एतन्मतदूषणोपसंहार पूर्वकं साङ्ख्यमतमुत्थापयति । तस्मादिति ।

बद्धमुक्तव्यवस्थोपपत्तिः । तथा च—

"अजामेकां लोहितशुक्लकृष्णां
बह्वीं प्रजां जनयन्तीं सरूपाम् ।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोन्यः ॥"

इति व्यक्तमेव भोग्यायाः प्रकृते रजस्सत्त्वतमोरूपाया एकत्वम्, भोक्तॄणां च भेदाद्बद्धमुक्तव्यवस्थानं दर्शितम्।

ऐकात्म्यवादास्तर्ह्यौपानिषदाः कथम्?, अवैलक्षण्येनेति ब्रूमः—भेदशब्दो हि वैलक्षण्यवचनो लोके प्रसिद्धः, तथा हि—सुसदृशेषु वक्तारो भवन्ति—'नाऽस्याऽस्य च कश्चिद् भेदोस्ति' इति, तथाऽऽत्मनामपि नरपशुतिर्यग्भेदभिन्नशरीरवर्तिनां शरीरसम्बन्धमपोह्य केवलं नैजरूपेण निरूप्यमाणानां पद्मरजःपरमाणुद्वयवन्न किं चिदपि वैलक्षण्यमस्तीत्यऽनेनाभिप्रायेणैकत्ववादा नानात्वनिषेधवादाश्च । एतदभिप्रायमेव चैतदपि भगवद्वासुदेववचनम्—

" विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः "

(अ. ५ श्लो. १८) इति

तथैव " इन्द्रोमायाभिः पुरुरूप ईयते " इति स्वयमविलक्षणोप्यात्मा नरपश्वादिविचित्रशरीरसम्पर्कवशाद् भ्रान्त्या स्वयमपि विलक्षणरूपः प्रतीयत इ-

---

जगत्प्रकृतिपरिणाम एव नात्मपरिणाम इति मन्यन्त इत्यर्थः ।

एतन्मतस्योपनिषद्विरोधमाशङ्क्य निराकरोति । ऐकात्म्येति ।

त्यर्थः। ये च मुक्तानां क्षेत्रज्ञानामीश्वरेण सहैकत्ववादास्तेप्यत्यन्तसाम्याद् वैलक्षण्याऽभावाच्च । तथा च श्रुत्यन्तरम्—

"यदा पश्यः पश्यते रुक्मवर्णं
कर्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति" ॥

इतीश्वरसादृश्यापत्तिमेव मुक्तस्य दर्शयति । तथा भगवता वासुदेवेनाप्युक्तम्-

"इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेपि नोपजायन्ते प्रलये न व्यथन्ति च" (अ. १४ श्लो. २) इति।

यत्तु—

"ममैवांशो जीवलोके जीवभूतः सनातनः" (अ. १५ श्लो. ७)

इति भगवद्वचनं तत् स्वामिभृत्यभावपरम्-यथा खल्वऽमात्या राज्ञोंशा व्यपदिश्यन्ते तथा जीवोऽपीश्वरांश इत्युच्यते, अन्यथा जीवत्वनाशात् सनातनत्वानुपपत्तिः । यान्यपि-

"विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति"

इत्यादीनि पुराणवचनानि तेषामयमेवार्थः-वैलक्षण्यमात्मनो ब्रह्मणश्चाऽत्यन्तमऽविद्यमानमेवाऽज्ञाननि-

---

अन्यथेति । परमार्थत ईश्वराऽज्ञानेनाज्ञानकृतजीवत्वानाशात् अनित्यत्वापत्तिर्जीवस्येत्यर्थः । नचैवमिष्टम्, अजवाक्येन

मित्तमऽज्ञाने विनष्टे स्वयमेव विलीयते, इति । विस्पष्टं हि परापरपुरुषयोर्भेदो गीतादिषूपदर्शितः–

"उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।"

"उपद्रष्टाऽनुमन्ता च कर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः"

इति । अलमति दूरं गत्वा, तस्मात् प्रकृत्युपादानेयं प्रपञ्चसृष्टिरिति नाऽनुपादानोपालम्भः ।

अत्राभिधीयते कथं खल्वेकरूपा प्रकृतिर्नरपशुतिर्यग्भेदभिन्नं प्रपञ्चमारभते ? न ह्यऽविलक्षणं कारणं विलक्षणं कार्यं निर्मातुमर्हति । क्षेत्रज्ञगतधर्माधर्मसहायवैचित्र्याद् वैचित्र्यमिति चेत् ?, न, अन्तःकरणवृत्तित्वाद्धर्माधर्मयोः, अन्तःकरणस्य च कार्यवर्गान्तःपातित्वात् सर्वस्य महदादेः कार्यस्य प्राकृतप्रतिसञ्चरे प्रकृतौ विलीनत्वाद् धर्माऽधर्मावपि तस्यामवस्थायामऽविद्यमानावेवेति न तद्बलेन वैचित्र्यम् ।

महदादिविकारारम्भे चास्याः किं कारणम् ?, स्वरूपमेवेति चेत् ? सर्वदाऽऽरम्भप्रसङ्गस्ततः प्रलया-

---

जीवस्य नित्यत्वप्रतिपादनात् । साङ्ख्यमतमुपसंहरति । तस्मादिति । अतो यदुक्तं सर्गादौ सर्वाभावे हि केनोपादानेन सर्वमिदमुपादेयमिति तत्परिहृतं प्रकृतेरुपादानत्वोपपादनादित्यर्थः ।

समाधत्ते । अत्राभिधीयते इति । प्राकृतप्रतिसंचरे–प्रकृतौ सर्वेषां प्रलय इत्यस्मिन्पक्ष इत्यर्थः । एतेन प्रकृतिशक्तिवैचित्र्यात्कार्यवैचित्र्यमित्यपि निरस्तम् । शक्तिवैचित्र्यस्यापि प्रवृत्तिकार्यतया धर्माऽधर्मतुल्यत्वात् । दूषणान्तरमाह । महदादीति ।

नुपपत्तिः । ईश्वरेच्छया विक्रियते इति चेत् ?, न, ईश्वरस्य समस्तक्लेशरहितस्याऽपास्तसमस्तकामस्येच्छाऽसम्भवात्, इच्छायाश्चाप्यन्तःकरणधर्मत्वात् तस्मिन् काले तदसम्भवात् ।

किं च प्राकृते प्रलये प्रकृतिमात्रमात्मानश्च केवलमवतिष्ठन्ते, सर्वे चात्मानो निर्विशेषाः सर्वेषां चैतन्यमात्ररूपत्वात्, न च धर्माधर्मकृतमपि वैलक्षण्यमात्मनां सम्भवति तयोरात्मधर्मत्वाभावात्, अन्तःकरणवृत्तित्वात्, तस्य च तदानीमभावात्, इत्युक्तम् । एवं च धर्माधर्मरहितेषु निर्विशेषेषु पुरुषेष्ववस्थितेषु सर्गकाले प्रकृतिः शरीरारम्भेणात्मनो बध्नाति चेत् ? ये पूर्वसृष्टौ मुक्ता ये चामुक्तास्तान् सर्वान् बध्नीयादऽविशेषात् । तथा येऽश्वमेधमनुष्ठाय फलमभुक्त्वा पूर्वसृष्टौ स्थिता ये च ब्रह्महत्याकारिणस्तेषां सर्वेषामैकविध्यमेव स्यात् पूर्वकृतयोर्धर्माऽधर्मयोर्नष्टत्वात् ।

ननु नाशो नाम नात्यन्ताभावः किं तु कारणे कार्याणां तिरोभावमात्रं विनाशः, उत्पत्तिरपि विद्यमानानामेव कारणे कार्याणामाविर्भावमात्रं, नह्यऽत्यन्ताऽसतामुत्पत्तिः सम्भवति शशविषाणस्याप्युत्पत्तिप्रसङ्गात्, असदुत्पत्तौ च सर्वत्र सर्वं स्यात्, नि-

---

लब्धावसरः शङ्कते । एवश्चेति । अत्र साङ्ख्यः स्वसिद्धान्तावष्टम्भेन शङ्कते । नन्विति । एतदेवोपपादयति । नहीति । अ-

यमो न स्यात्—तन्तुभ्यः पटो मृत्तो घट इति । यथाहुः—

"असदऽकरणादुपादानग्रहणात्सर्वसम्भवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्"
(सा. कारि. ९) इति ।

तथा-"नाऽसतो विद्यते भावो नाऽभावो विद्यते सतः" इति भगवद्वासुदेववचनम् । तस्मात् प्रलये धर्मादेः शक्त्यात्मनावस्थितत्वात् तद्वशेन युक्तं सृष्टि-वैचित्र्यम् ।

नैतदेवम्- नहि मृत्पिण्डावस्थायां वा कपालावस्थायां वा घटरूपमस्ति दृश्यादर्शनविरोत् ।

यत्तु-" नाऽसतो विद्यते भावः " इति वचनं तदात्माभिप्रायम्, पूर्वत्र हि—

" न त्वेवाहं जातु नासं नत्त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम्"(१ अ.श्लो.)

इत्याऽऽत्मानित्यत्वं प्रतिपादयितुमुपक्रान्तमेवानेनोच्यते-नाऽविद्यमानस्यात्मन उत्पत्तिर्न विद्यमानस्य विनाशः सर्वे एवात्मानोऽनुत्पत्तिविनाशधर्माणो नित्या इति, न पुनः कार्यजातस्य सर्वस्य नित्यत्त्वाभिप्रायम्, असर्वगतत्वादऽनुपलब्धिविरोधाच्चेत्युक्तम् ।

यदि परम्—उपादानोपादेययोरभेदमाश्रित्य मृ-

स्मिन्नर्थे संमतिमाह । यथाहुरिति । उक्तार्थं चैतत् । तदेतद्दूषयति । नैतदेवमिति । असङ्गतत्वादिति । कार्यजातस्य कृतक-

(१) असङ्गतत्वादिति टीकानुसारेणपाणेयुक्तः ।

दात्मनाऽऽदौ घटो ऽवस्थित इत्युच्यते ?, न च ताव-ता कार्यसिद्धिः—न हि मृदवस्थेन घटेनोदकाहरणं क्रियते तथा धर्माधर्मावपि स्वरूपेणाविद्यमानौ प्रकृत्यात्मना स्थितावपि न स्वकार्याय पर्याप्ताविति न तद्वशेन वैचित्र्यसम्भवः । प्रमाणमपि महदादिक्रमेण प्रकृतिपरिणामे किं चिन्नास्ति—पुरुषवचसां प्रमाणान्तराऽगोचरार्थे प्रमाणत्वासम्भवात्, वेदानामपि पौरुषेयत्वादितरपुरुषवचनवदप्रामाण्यात् ।

यदि तु सृष्टिप्रलयपरम्परामनादिमङ्गीकृत्य प्रतिसृष्टि—

"सर्वेषां चैव नामानि कर्माणि च पृथक् पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे" (मनुस्मृ.)

इत्यादिवचनै ऋतुलिङ्गन्यायेन तुल्यनामप्रभावव्यवहारवस्तूत्पत्त्या शब्दानामऽनाद्यर्थसम्बन्धानां वेदानां च नित्यत्वमाश्रित्य प्रामाण्यमङ्गीक्रियते ?, तथाप्येकस्य प्रजापतेः सम्प्रदायप्रवर्तनत्वे कृतकाशङ्का स्यादेव । अथ पुनः—

त्वेनाऽनित्यत्वावधारणात् प्रमाणविरुद्धं नित्यत्वाभिधानमसङ्गतं स्यादित्यर्थः। मृदादौ कारणे च घटादिकार्यसत्वमनुपलब्धिविरुद्धमित्यर्थः । अथ तु वेदनित्यत्वाङ्गीकारेण समाधीयेत तथापि दोष इत्याह । यदि त्विति । यदितु वेदानां नित्यत्वमाश्रित्य प्रामाण्यमङ्गीक्रियते इति सम्बन्धः । अथेति । अथ पुनरेवं कृतका-

" अष्टाशीतिसहस्राणि संप्रदायप्रवर्तकाः " ।

इत्यादिवचनानुरोधेन बहूनां महर्षीणां सृष्ट्यन्तराधीतं वेदं स्मरतां सुप्तप्रतिबुद्धन्यायेन सम्प्रदायप्रवर्तकत्वमाश्रित्य कृतकाशङ्कां निरस्य नित्यता समर्थ्येत ?, तथाप्यनुपादानं जगन्निर्माणमऽशक्यमभ्युपगन्तुम्, सृष्टिप्रलयवादाः पौराणिकाश्चाऽर्थवादतया नेतव्याः । भवतु वैवं तथापि नास्माकं काचित् क्षतिः सम्बन्धनित्यत्ववेदप्रामाण्ययोरविघातात् ।

॥ इति साङ्ख्यमतनिरासः ॥

वैशेषिकास्तु—पौरुषेयत्वमेव शब्दार्थसम्बन्धानां वेदानां चाङ्गीकुर्वन्तोऽनुमानेन सृष्टिप्रलयावीश्वरं च सिषाधयिषन्तः प्रयोगमारचयन्ति, त्रिविधं हि वस्तुजातम्—सम्प्रतिपन्नचेतनकर्तृकं घटादि, सम्प्रतिपन्नाऽतत्कर्तृकं व्योमादि, विप्रतिपन्नतत्कर्तृकं महीमहीधरदूर्वाङ्कुरादि, तत्रान्तिममऽधिकृत्योच्यते—'क्षित्यादिकं बुद्धिमत्कर्तृकं कार्यत्वाद् घटादिवत्, कार्यत्वं च क्षित्यादेः सावयवत्वाद् घटादिवत् ।

किं पुनः पृथिव्यादेः समवायिकारणम् ?, पार्थिवाऽऽप्यतैजसवयवीयपरमाणुजातं यथास्वं पृथिव्यप्ते-

---

शङ्कां व्युदस्य नित्यता समर्थ्येति सम्बन्धः । तथापि यत्पूर्वं दूषणं सर्वाऽभावे हि नोपादानेन सर्वमिदमुपादेयमिति तन्न शक्यं परिहर्तु मित्यर्थः । यस्मात्प्रकृत्यादीनामुपादानत्वं निरस्त मतिरिक्तस्य चाऽसम्भव इति भावः । अभ्युपेत्यापि सृष्टिप्रलयौ स्वपक्षसिद्धिमाह । भवत्विति । उक्तं च " श्रुति-

जोवायूनां समवायिकारणम्, न हि प्रलये परमाणूनां प्रलयोऽस्माकमस्ति सांख्यादिवत् । कार्यद्रव्याणि तु द्व्यणुकादीनि सर्वाण्येवेश्वरेच्छया विश्लिष्टावयवानि प्रलीयन्ते, परमाणवस्तु मिथोऽसंयुक्तास्तिष्ठन्ति व्योमादयश्च क्षेत्रज्ञाश्चात्मीयधर्माधर्मयुक्ता एवाऽवतिष्ठन्ते । सर्गकाले पुनरीश्वरेच्छां क्षेत्रज्ञाऽदृष्टं च निमित्तमासाद्य परमाणुषु कर्माण्युत्पद्यन्ते तद्वशाच्च मिथस्संयुक्ताश्चतुष्टयेपि परमाणवो द्व्यणुकादिक्रमेण यथास्वं पृथिव्यादिकं भूतचतुष्टयमारभन्ते । निमित्तभूतक्षेत्रज्ञाऽदृष्टवैचित्र्याच्च जरायुजाऽण्डजोद्भिज्जस्वेदजभिन्नं शरीरभेदमीश्वरेच्छाकारितसंयोगविशेषवशात् परमाणव आरभन्ते ।

नत्वेतदपि युक्तम्- नहीच्छामात्रेण प्रयत्नमन्तरेण परमाणुषु स्पन्दोत्पत्तिः सम्भवति, इच्छाकारितप्रयत्नवशेन शरीरस्पन्दोत्पत्तिरऽन्यत्वेपि दृश्यते । ईश्वरोपि प्रयतत इति चेत् ?, न, अशरीरस्य प्रयत्नासम्भवात् । सर्वगता अपि ह्यात्मानः शरीरप्रदेश एव प्रयत्नमारभन्ते न बहिः, अतः शरीरापेक्षः प्रय-

---

स्मृतिप्रामाण्यात्सर्गप्रलयावपीष्येत" इति ।

॥ इति साङ्ख्यमतनिरासः ॥

इदानीमौलूक्यमतेन सर्गप्रलयौ दूषयितु मनुवदति । वैशेषिकास्त्विति । चतुष्टयेऽपीति । पार्थिवाप्यतैजसवायवीया इत्यर्थः । एतदपि दूयति नात्विति । इच्छमात्रेणैव भगवतो जगन्निष्पत्तिः किं प्रयत्नेनेति चेन्न । अशरीरस्येच्छाया अप्यसम्भवादित्यर्थः ।

त्नः । प्रलयकाले च सर्वकार्याणां प्रलयादीश्वरशरीरमपि प्रलीनमिति कथमशरीरः प्रयतेत ? । नचाऽशरीरस्येच्छापि सम्भवति मुक्तात्मनामिव । नापि ज्ञानं सम्भवति- इन्द्रियादेरभावात् ।

नित्यमस्य ज्ञानं नित्या चेच्छा नित्यश्च प्रयत्न इति चेत्, न, सर्वज्ञानेच्छाप्रयत्नानामनित्यत्वव्याप्तेः। शक्यते हि प्रयोक्तुम्–क्षित्यादिकं नाऽशरीरिचेतनकर्तृकं न नित्यप्रयत्ननित्येच्छानित्यज्ञानकर्तृकं कार्यत्वाद् घटवदिति ।

ननु घटस्यापीश्वरकर्तृकत्वमस्त्येवेति साध्यहीनो दृष्टान्तः ? । तथापि कुलालस्यापि कर्तृत्वान्न केवलेश्वरकर्तृकत्वं घटस्य, ततश्चैवं प्रयोक्तव्यम्– क्षित्यादिकं न केवलाऽशरीर्याऽऽत्मकर्तृकं कार्यत्वाद् घटवदिति, वस्तुत्वाद् व्योमवदिति। हेतुदृष्टान्तौ सर्वथापि निर्दोषौ । तथा क्षित्यादिकं न बुद्धिमत्कर्तृकं शरीरिकर्तृकत्वविरहाद् व्योमवदिति साक्षादेव प्रतिसाधनं कर्तव्यम् ।

अथेश्वरशरीरं नित्यमङ्गीकृत्य प्रलयेऽपि सशरीरमेवेश्वरमभ्युपगच्छेत् ?, ततः सावयवत्वमीश्वरशरीरेऽनैकान्तिकं न क्षित्यादेः कार्यत्वं साधयेत्, स-

---

नचेति। केवलाशरीरात्मादीत्यादिशब्देन नित्यज्ञानेच्छाप्रयत्ना गृह्यन्ते । माऽस्त्वनित्यमीश्वरशरीरं ज्ञानादिवच्छरीरमपि तस्य नित्यं भविष्यतीत्याशङ्क्य निराकरोति । अथेति । क्षित्यादेः कार्यत्वसाधने यत्सावयवत्वं हेतूकृतं तदीश्वरशरीरे ऽनैकान्ति-

शरीरकर्तृकत्वं च दूर्वाङ्कुरादीनामनुपपन्नमनुपलब्धि-विरोधात्।

किं च प्रतिकार्यं प्रयत्नभेदेन भवितव्यम्, अन्यो हि पादसञ्चरणे प्रयत्नः अन्यश्च बाहूद्धरणे, तथा सति यद्यपीश्वरे प्रयत्नो नित्यः स्यात् तथापि तस्यैकत्वान्न विचित्रकार्योदयहेतुत्वं सम्भवतीति व्यर्थ एवासौ। यदि त्वनन्तकार्यानुरूपा अनन्ता एव प्रयत्नाः सर्वदैवेश्वरेऽवतिष्ठेरन्, तथा सति प्रलयकालेप्यवस्थानात्, संयोजकस्य च सर्गहेतोः प्रलयकालेप्यवस्थानात् उभयोः परस्पराविघातान्न सृष्टिः स्यात् न प्रलयः।

यच्च क्षेत्रज्ञादृष्टवैचित्र्यात् कार्यवैचित्र्योपपत्तिरिति ?, तदप्ययुक्तम्- नहि दृष्टकारणवैलक्षण्यमन्तरे-

---

कत्वान्न साध्यसाधनक्षममित्यर्थः। किञ्च सर्गाद्यकाले पृथिव्याद्यभावात् किंमयं तच्छरीरं स्यात् शरीरलक्षणाऽभावात् कथं शरीरमिति व्यवह्रियते। नह्यभोगायतनं शरीरं भवति। नापि हितकामस्येश्वरस्य दुःखप्रायजगत्सिसृक्षापि सम्भवति। न च साधनरहितस्य सृष्टिकर्तृत्वं सम्भवति। क्षेत्रज्ञगतौ धर्माऽधर्मौ साधनमिति चेत्। न। तयोरपि प्राक्सृष्टेरभावात्। कार्यापवर्गित्वात्तयोः सद्भाव इति चेन्न। विनाशे कार्यत्वस्यैव प्रयोजकत्वात्। नच धर्माधर्ममात्रेण कार्यसृष्टिः सम्भवति। लोके दृष्टमृत्तन्त्वादेरप्युपादानदर्शनात्। सृष्टेश्चानुकम्पाप्रयोज्यत्वे सुखमेव सृजेत्। अथ प्राणिगताऽशुभस्याप्यपेक्षणान्नैकरूपा सृष्टिस्तर्ह्यन्यदपेक्षमाणस्य स्वातन्त्र्यव्याघातः। जगत्सर्गे चास्य

णाऽदृष्टवैलक्षण्यमात्रात् कार्यवैलक्षण्यं सिध्यति, नह्यदृष्टशतेनापि तालबीजमन्तरेण तालवृक्षो निष्पद्यते। विनापि बीजमीश्वरमहिम्ना सर्वं सिध्यतीति चेत्?, न, तत्रैव प्रमाणाभावात्। नित्यत्वे हि वेदानामवसिते तत्प्रामाण्यबलेनेश्वरस्याऽपरिच्छेद्यो महिमा सृष्टिप्रलयौ च क्रतुलिङ्गन्यायमाश्रित्य सिध्येयुर्न वा। वेदांस्त्वनादृत्य दृष्टानुसारेण पर्वते

प्रयोजनमपि नास्ति आप्तकामत्वात्। नच तद्रहितस्य प्राकृतस्यापि प्रवृत्तिः सम्भवति। नाप्यनुकम्पया प्रवृत्तिः उक्तोत्तरत्वात्। यदि चानुकम्पानिमित्ता सिसृक्षा स्यात् सञ्जिहीर्षा तर्हि किं निमित्ता?। साप्यनुकम्पानिमित्तेति चेत्। न। विरुद्धयोः सिसृक्षासञ्जिहीर्षयोरेकहेतुकत्वापत्तेः। अनुकम्प्याऽभावे चानुकम्पाया अपि तदानीमसम्भवात्। क्रीडार्था प्रवृत्तिरिति चेन्न। कृतार्थत्वव्याघातापत्तेः। यथाहुः—

"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते।
एवमेव प्रवृत्तिश्चेच्चैतन्येनास्य किं भवेत्॥ ५५॥
क्रीडार्थायां प्रवृत्तौ च विहन्येत कृतार्थता।
बहुव्यापारतायां च क्लेशो बहुतरो भवेत्"॥ ५६॥
(श्लो. वा. सं.) इति।

किञ्च सर्गवत्संहारोऽपि न बुद्धिकारिणः सम्भवति निष्प्रयोजनत्वात्। नित्यत्वे हीति। तन्मते वेदानां पौरुषेयत्वेनानाश्वासात् नार्थनिश्चय इति भावः। यथा पर्वते वह्न्यनुमानं न तथाऽत्यन्तमलौकिकेर्थेऽनुमानं सम्भवतीति भावः। ननु विमतः सम्बन्धः सकर्तृकः शब्दार्थसम्बन्धत्वात् वृद्धिरा-

इवानुमानमऽत्यन्तालौकिकेर्थे प्रवर्तयतामुपेक्षैवोत्त-रमित्युपरम्यते। तस्मान्न सर्गादिकालेपि सम्बन्ध-करणम्।

अशक्यं च कर्तुं सर्वशब्दानां सम्बन्धकरणम्-यदा न कश्चिदपि शब्दः केनाप्यर्थेन सम्बद्ध आसी-त् तदा कथं सम्बन्धः क्रियेत?, सम्बन्धं हि कुर्वता-ऽवश्यं केन चिद्वाक्येन स कर्तव्यः- गौः सास्नादि-मानित्यादिना, न चाऽप्रसिद्धमर्थप्रतिपादकत्वेन सा-स्नादिशब्दमर्थप्रतिपादनाय शक्नोति कर्त्तोच्चारायितु-म्, तथा हस्तसञ्ज्ञादयोपि, प्रतिपादकत्वासिद्धेः।

नन्वेवमप्रसिद्धसम्बन्धस्य कथनमप्यनुपपन्नम्-य-द्यपि हि तदा वक्तुः प्रसिद्धसम्बन्धत्वात् सम्बन्धक-थनाय वाक्योच्चारणं सम्भवति तथापि श्रोतारोऽप्र-सिद्धसमस्तपदार्था बालाः कथं वाक्येन सम्बन्धं प्र-तिपद्येरन्? तस्मात् करणवत् कथनमप्यनुपपन्नम्। नैष दोषः-कथयितुस्तावन्न कर्तुरिवाऽशक्तिः- उपाय-सम्भवात्, प्रतिपत्तारस्तूपायाभावान्न प्रतिपद्यन्त इति दृष्टविरुद्धम्, दृश्यन्ते ह्यऽप्रसिद्धसमस्तपदार्था बाला वृद्धेभ्यः सम्बन्धं प्रतिपद्यमानाः।

देजित्यादिसम्बन्धवदित्यनुमानं भविष्यतीति चेन्न। सक-र्तृकत्वस्य स्मर्यमाणकर्तृकत्वप्रयोज्यत्वेन त्वदुक्तहेतोरप्रयोजक-त्वात्। नन्वगृहीतसम्बन्धाच्छब्दादर्थप्रतीत्यन्यथानुपपत्त्या सम्बन्धकर्तृकल्पनेति चेत्। न। अनादिवृद्धव्यवहारहेतुकानादि-सम्बन्धग्रहणापेक्षत्वेनान्यथानुपपद्यमानत्वात्। एतदेवाभिप्रेत्य

किं चास्त्युपायो बालानाम्- नाऽवश्यं सम्बन्धकथनवाक्येनैव वृद्धेभ्यो बालाः सम्बन्धं प्रतिपद्यन्ते, किं तु यदा वृद्धाः प्रसिद्धसम्बन्धाः स्वकार्यार्थेन व्यवहरन्ति तदा तेषामुपशृण्वन्तो बालाः सम्बन्धं प्रतिपद्यन्ते-यदा हि केनचित् 'गामानय, इत्युक्तः कश्चित् सास्नादिमन्तमानयति तदा समीपस्थो बालोऽवगच्छति—यस्मादयमेतद्वाक्यश्रवणानन्तरमस्मिन्नर्थे प्रवर्तते तस्मादस्माद्वाक्यादयमर्थः प्रत्यायित इत्येवं संमुग्धरूपेणावगतं प्रत्यायकत्वं पश्चाद्बहुषु प्रयोगेष्वन्वयव्यतिरेकाभ्यां वाक्यभागानां पदानां पदभागानां च प्रकृतिप्रत्ययानां वाक्यार्थभागेषु पदार्थेषु वि-

---

निगमयति । तस्मादिति । नचेति । अर्थप्रतिपादकत्वेनाप्रसिद्धं सास्नादिशब्दमिति सम्बन्धः । विविच्यत इति । अत्र प्रत्यायकत्वमित्यनुषञ्जनीयम् । उपपादितमर्थं निगमयति । तस्मादिति । यथाह सूत्रकारः उपदेश इति । अनेन प्रत्यक्षं वृद्धव्यवहारमुपदिशति प्रत्यक्षा हि व्यवहर्तारः, कल्प्यश्च सम्बन्धकर्ता । अव्यतिरेकश्च यथास्मिन्देशे सास्नादिमति गोशब्द एवं देशान्तरेऽपि । न चैवमेकः कर्तुं शक्तः अनेके च सम्बन्धकर्तारः सर्वेषु दुर्गमेषु कथं सङ्गंस्यन्ते । अथवा अव्यतिरेकश्च । नहि सम्बन्धव्यतिरिक्तः कश्चित्कालोऽस्ति अतः सर्वत्र सम्बन्धस्याव्यतिरेकात् न कर्तृकल्पना । किञ्च प्रमाणान्तरेणानुपलब्धे देवदत्तादावर्थेऽनर्थकं संज्ञाकरणमशक्यञ्च, विशेषज्ञानार्थं हि संज्ञाः क्रियन्ते, नचाज्ञायमानेषु तेषु तत्सम्भवति । तस्मादपौरुषेयः शब्दस्यार्थेन सम्बन्धः । अतः प्रमा-

विच्यते, तस्मान्न पौरुषेयः सम्बन्ध इति न तद्वशेन पुरुषापेक्षाऽस्तीति सिद्धमनपेक्षं वेदानां प्रामाण्यम् ॥

॥ इति सम्बन्धाक्षेपपरिहारः ॥

यच्चानन्तरफलानुपलब्ध्या चित्रादीनां न पश्वादिफलत्वमिति ?। स्यादेवं, यदि प्रत्यक्षादिपञ्चकमेव प्रमाणं स्यात् ? तदा ह्यनन्तरफलोपलम्भादेव तत्साधनत्वं स्यात् नाऽन्यथा, शब्दस्यापि तु प्रमितिजनकतया प्रत्यक्षादिवत् प्रमाणत्वात्, तेन च चित्रादीनां पशुसाधनत्वाऽवगमादसत्यप्यनन्तरोपलम्भे सिध्यति तत्साधनत्वम् ।

ननु प्रमाणान्तरविरोधादप्रामाण्यमित्युक्तम् ?। न,

णमग्निहोत्रादिवाक्यम् । पुरुषानपेक्षत्वात् । तस्माच्चोदनालक्षण एव धर्मो नान्यलक्षणः । बादरायणग्रहणमुक्तार्थम् ॥

इति सम्बन्धाक्षेपपरिहारः ।

एवं तावत्सम्बन्धनित्यत्वोपपादनेन स्वपक्षं प्रसाध्य "नन्वेवमप्यानिमित्तं शब्दः कर्मकाले फलाऽदर्शनात् कालान्तरे च कर्मण एवाभावा" (शा. भा.) दित्याक्षेपमनूद्य परिहरति । यच्चेति । नन्वसौत्रश्चित्राक्षेपपरिहारोऽनुपपन्नः ? । नानुपपन्नः । अर्थेऽनुपलब्धे तत्प्रमाणमित्यस्यात्रापि योजयितुं शक्यत्वात् । अत एव जैमिन्याशयाभिज्ञोभाष्यकारः परिहरतिस्म—

" सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्तिके "

इत्यभियुक्तोक्तेः । चोदयति । नन्विति । अनन्तरं फला-

तदऽभावात्, नहि शब्दः 'अनन्तरमेव चित्रा फलसाधनम्' इति ब्रूते येन विरोधः स्यात्, साधनत्वमेव प्रतिपन्नं तन्मात्रवचनात्, तस्य चापूर्वद्वारेण कालान्तरेपि तैलपानादिवत् फलसाधनत्वोपपत्तेः ।

यत्तु प्रागनुष्ठानाच्छास्त्रार्थावधारणवेलायां नाऽपूर्वमन्तर्भावितमित्युक्तम्, यद्यप्येवं, तथापि पश्चादेवमवगच्छति–साधनत्वमात्रेपि शब्देनोक्ते भ्रान्त्या मया साक्षात्साधनत्वमेव प्रतिपन्नं, तच्चेदानीमन्यथा जातम्, अतो नूनमस्य केनापि द्वारेण कालान्तरे फलमिति ।

प्रागपि च शक्यमेवाऽपूर्वमवगन्तुम्–अनेकेषामङ्गप्रधानकर्मणां क्षणिकानामपूर्वमन्तरेण यौगपद्याऽस-

---

नुपलब्ध्या साधनत्वबाधादित्यर्थः । परिहरति । नेति । विषयभेदेन प्रमाणान्तरविरोधाऽभाव इत्यर्थः । यथाहुः—

"प्रत्यक्षादिविसंवादो न शब्दे दोषमासजेत् ।
आनन्तर्यविसंवादो नाविशेषप्रवर्तिनीम् ॥
चोदनां बाधितुं शक्तः स्फुटाद्विषयभेदतः" (श्लो.वा.चित्रा.)

विरोधाभावं विवृणोति । नहीति । सामर्थ्यादानन्तर्यं चोदितमिति चेत् । न । अविशेषवृत्ते वाक्ये तदभावात् । कृष्यादिवत्कालान्तरेऽपि फलसम्भवात् । नन्वचोदितेऽप्यानन्तर्ये पाकादिवत्सम्भवात् किमित्यनन्तरमेव पशवो नभवन्ति ? । कर्मणां वैचित्र्यादितिब्रूमः । कानि चित्स्वत एव विप्रकृष्टफलानि । कानिचिद्देशकालापेक्षया विलम्बन्ते । कानिचिद्विरुद्धफलेन कर्मान्तरेणार्द्धभुक्तेन प्रतिबन्धात्स्वफलमददन्त्यवतिष्ठन्ते अतो नानन्त-

म्भवात्, पश्वादीनां च दृष्टकारणापेक्षत्वान्न क्षणमात्रेणोत्पत्तिः सम्भवतीत्यऽवश्यंभाव्यऽपूर्वम् । न च पश्वाद्युत्पत्तिमात्रं फलम्, उपभोगस्य तु चिरकालत्वाद् यावदुपभोगमवस्थास्यमानेन केन चिद्भवितव्यम्, न च क्रियायास्तावत्कालमवस्थानं सम्भ-

---

वेऽनियम इति । अथ चित्राऽनन्तरफला क्रियात्वात् मर्दनवदिति साध्येत ? तर्हि प्रत्यक्षाऽनुपलब्ध्या समानविषयया बाधः । उपसंहरति । इतीति । आनन्तर्याऽभावेऽप्यपूर्वद्वारेण चित्रादीनां पश्वादिफलत्वं सम्भवतीत्यर्थः । अत्रेदं चिन्त्यते । किमिहैव जन्मनि चित्रादीनां फलम् उतेह वा जन्मान्तरे वेत्यनियमः । केचित्त्विहैव मन्यन्ते तथा च योगसिद्ध्यधिकरणे वक्ष्यति । तन्न युक्तम् । इह जन्मनि चित्रादिकं विनापि यत्फलं दृश्यते तस्य निर्निमित्तत्वापत्तेः चित्रादिफलस्यैकजन्मक्षीणत्वात् । नन्वामुष्मिकस्वर्गफलज्योतिष्टोमादिकर्मशेषेणेहाकृतकर्मणामपि पश्वादिफलं सेत्स्यति अतो न निर्मित्तत्वापत्तिः ? मैवम् । स्वर्गादिफलसाधनत्वेन चोदितस्य कर्मणः फलान्तरसाधनत्वासम्भवात् । तस्माद्यथाचोदनमविशेषितकालमेव फलं नत्विहैवेति नियमः । उक्तञ्च—

"तस्मात्कालाऽविशेषेण चोदनार्थो यथास्थितः ।
स तथैवावगन्तव्यो नाधिको निष्प्रमाणकः" इति । २१
(श्लो.वा.चि.)

तार्किका अप्यैहिकफलत्वमेव चित्रादीनामभ्युपगच्छन्ति । यत्तु क्वचि त्तत्कारिणामनन्तरमेव फलं न भवति तत्कर्मवगुण्यादिति । तदप्यसत् । अकृतकर्मणां फलस्य निर्निमित्तत्वापत्तेः ।

वर्तीत्यऽपूर्वमङ्गीकर्तव्यमिति तद्द्वारेण युक्तं कर्म कालान्तरे फलदमिति नाऽनन्तरानुपलब्ध्या शास्त्रस्य बाधः ।

॥ इति चित्राऽऽक्षेपपरिहारः ॥

नन्वेवं स्वर्गस्यापि कालविशेषाश्रवणादनियमः स्यात् ? । न स्यात् षष्ठाद्ये तस्याऽऽमुष्मिकफलत्वसाधनात् । पश्वादीनामप्यैहिकत्वं योगसिद्ध्यधिकरणे वक्ष्यत इति चेत् ? । न । तत्राप्यामुष्मिकत्वमेवेति पूर्वपक्षं विधायैहिकत्वमप्यस्तीत्यानियमेनैव सिद्धान्तकरणात् । यथाहुः—

" यदा कदा चिद्भवदेतादिष्यते
फलं हि पश्वादि न साम्परायिकम् ।
तथा स्थितस्यैव च तस्य साधनं
विधीयते योऽपि भृशं त्वरान्वितः ॥ २४ ॥
साधारणं यत्तु फलं बहूनां
स्वभावतस्तादृशमेव चेष्टम् ।
सर्वस्य चासन्नतयैव काङ्क्षितं
वृष्ट्यादि तच्चैहिकमेव युक्तम् ॥ २५ ॥
कामिपदमविशिष्टं यद्यपि श्रूयते वा
भवति फलविशेषो नान्यथा काम्यते हि ।
फलति यदि न सर्वं तत्कदाचित्तदेव
ध्रुवमपरमभुक्तं कर्म शास्त्रीयमास्ते" ॥ २६ ॥ (श्लो.वा.)

इति चित्राक्षेपरिहारः ॥

एवं तावच्चित्राक्षेपं परिहृत्य सम्प्रति वाक्यान्तरे दृष्टविरोधं

यत्तु प्रत्यक्षविरुद्धं वचनमुपन्यस्तम्–" स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकं याति " इति–एतच्छब्देन प्रत्यक्षं शरीरं यज्ञायुधसंयुक्तमुपदिशतीति। तदभिधीयते–अर्थवादत्वादस्यान्यपरत्वान्न स्वार्थे प्रमाणान्तरविरोधो दोषः । न च विरोधोपि विद्यते न ह्यऽनेन शरीरस्य स्वर्गगमनमुच्यते । किं तर्हि ? आत्मनो यस्यैतच्छरीरम्, सोपि हि शरीरशरीरिणोरभेदोपचारेण शरीरस्थेन यज्ञायुधित्वेन प्रत्यक्षत्वेन च व्यपदिश्यते । आत्मनो वा स्वर्गगमनं शरीर उपचर्यते इति नास्ति विरोधः ।

यजमानशब्दोपि तस्यैव यागस्वामित्वात् कर्तृत्वाच्च वाचकः । न च शक्यते तस्य कापिलवदऽकर्तृत्वं वक्तुं श्रुतिविरोधात्, सर्वत्र हि कर्तृभोक्तृशब्दयोः सामानाधिकरण्यं दृश्यते, यथात्रैव–' यजमानः स्वर्गं लोकं याति ' इति । तथा "य एवं विद्वानग्निं चिनुते ऋध्नोत्येव " "य एवं विद्वान् द्विरात्रेण यजते स्वर्गमेव लोकमेति " तथोपानिषत्स्वपि " संकल्पादेवास्य पितरः समुत्तिष्ठन्ति " इति कर्तृत्वाभिधायिन्या षष्ठ्याऽऽत्मनः सङ्कल्पं प्रति कर्तृत्वमुक्तम् ।

परिहर्तुमनुवदति । यत्त्विति । परिहरति । तदिति । अर्थवादस्य निरालम्बनस्यानुपपत्तिमाशङ्क्याह । नचेति । सोपि हि यज्ञायुधित्वेन शक्यते वक्तुमिति सम्बन्धः । तदुक्तं—

"साक्षाद्यद्यपि सम्बन्धो नात्मनो यज्ञसाधनैः ।
तथापि लक्षणावृत्त्या शरीरद्वारको भवेत्" १ (श्लो• वा• आ•)

सम्भवति च सर्वगतस्याप्यात्मनो यागज्ञानप्रयत्नसङ्कल्पादिषु साक्षादेव कर्तृत्वम्, न हि वयं स्पन्दमेव क्रियामुपगच्छामो वैशेषिकवद् येनात्मनः कर्तृत्वं न स्यात्, धात्वर्थमात्रस्य क्रियात्वाद्। स्पन्देष्वपि प्रयोजकत्वेनास्य कर्तृत्वं सम्भवति, प्रयत्नेन ह्यसौ शरीरं स्पन्दे प्रयोजयति। साक्षात्तु न सम्भवति सर्वगते स्पन्दस्याऽसम्भवात्–इत्यनेनाभिप्रायेण पुराणेषूपनिषत्सु चाऽकर्तृत्ववादाः।

किं पुनः शरीरव्यतिरिक्तात्मसद्भावे प्रमाणम्?, प्राणनादि लिङ्गं सुखादयश्च–प्राणनादिशब्देन कोष्ठ्य-

---

ननु पुष्करपलाशवन्निर्लेपस्य कथं कर्तृत्वाद्युपपत्तिरत आह। नहीति। साङ्ख्यमत एवात्मनस्तथात्वं नास्माकं वेदप्रामाण्यवादिनामिति भावः। येनेति। व्यापकस्य स्पन्दाऽसम्भवादिति भावः। नन्वकर्तृत्वमात्मन उपनिषत्सु श्रूयते तत्राह। इतीति। किं पुनरिति। ननु यज्ञायुधवाक्यस्यादित्ययूपादिवाक्यवदर्थवादतयापि नेतुं शक्यत्वात् देहातिरिक्तात्मप्रतिपादनं व्यर्थम्?। सत्यम्। नैरात्म्ये हि साध्यसाधनसम्बन्धप्रतिपादकानां चोदनानामप्रामाण्यमापद्येत। तथाहि स्वर्गकामचोदनादिभिर्हि स्वर्गस्याऽऽमुष्मिकत्वाज्जन्मान्तरे फलोपभोगो बोध्यते, सोऽपि कर्तुरेव, नान्यस्य, तत्तस्य ज्ञानमात्रत्वे तेषां क्षणिकत्वात्कर्तृत्वभोक्तृत्वानुपपत्तेः शरीरचैतन्येऽपि तस्य विनिपातात् अतिरिक्तस्य च कस्य चिद्भोक्तुरनङ्गीकारात् इष्ट्यादेश्चादत्तफलत्वापातात् तद्वचनस्याऽप्रामाण्यं स्यादिति। यज्ञायुधिवाक्यसामर्थ्यच्छलेन देहातिरिक्तात्मप्रतिपादनं

स्य वायोरूर्ध्वाऽधोगमनवृत्तिविशेषस्य प्राणनादिशब्दवाच्यस्य हेतुभूतः प्रयत्न उच्यते, स च सुखादयश्च न शरीरधर्माः सम्भवन्ति. अयावच्छरीरभावित्वात् । ये हि कार्यद्रव्यवर्तिनो विशेषगुणा रूपादयस्ते विरोधिगुणान्तराद्वा द्रव्यविनाशाद्वा विनश्यन्ति, प्राणनादयस्तु तदभावेपि नश्यन्ति मृतावस्थायामिति न शरीरगुणाः ।

तथा ज्ञानमप्यऽयावच्छरीरभावित्वादेव न शारीरधर्मः । तथा ये प्रत्यक्षविषयाः शरीरगुणास्ते स्वयमिव परैरपि प्रत्यक्षेण गृह्यन्ते यथा रूपादयः, सुखादयस्तु प्रत्यक्षा अपि सन्तो न परप्रत्यक्षग्राह्याः, तस्मान्न शरीरगुणाः, तदिदमपि द्वयं सुखादीनां शरी-

---

तत्प्रामाण्यार्थमेवेति । यथाहुः—

" तस्माद्वेदप्रमाणार्थमात्माऽत्र प्रतिपाद्यते ।

यद्यपि प्रकृतं वाक्यं व्याख्यायेतार्थवादतः"६(श्लो.वा.आ.)

यथाभाष्यं तावदाह । प्राणनादीति । योऽसौ प्राणित्यपानिति उच्छसिति निमिषतीत्यादि चेष्टितवान् सोऽत्र शरीरे यज्ञायुधीत्यर्थः।युक्त्यन्तरमाह । सुखादीति । एतदेव विवृणोति। प्राणनादीति । कथं न सभवन्त्यत आह । अयावदिति । तदभावेपीति । द्रव्यविनाशाऽभावे शरीरे सत्यपीत्यर्थः । युक्त्यन्तरमाह । तथेति । तदिदमिति । अयावच्छरीरभावित्वं–परप्रत्यक्षाऽग्राह्यत्वं चेतिद्वयमित्यर्थः । ननु कार्श्यादीनामपि देहगुणानामयावद्देहभावित्वं दृष्टम् । कार्श्याद्यवस्थान्तरं तत्रास्तीति चेत् । न । अत्रापिमृत्युरेवावस्थान्तरमस्त्येवेति वक्तुं शक्य-

रगुणत्वं निवारयदन्यगुणतां सूचयति, योऽसावन्यः स आत्मा। किं च सर्व एव विशेषगुणाः कारणेपि वर्तमाना एव कार्यद्रव्यगुणतां भजन्ते, न च शरीरकारणभूतेषु पार्थिवपरमाणुषु चैतन्यमस्तीति कथं शारीरगुणता चैतन्यस्य स्यात्?। तस्मादन्यश्चेतनः।

कश्चित् पुनराह–सर्वथा वित्तिषु तावद्वेत्ताऽवभासते अन्यथा स्वपरवेद्ययोरनतिशयप्रसङ्गात्। न च शरीरस्य करचरणाद्यवयवसंनिवेशविशिष्टस्यास्ति तथाऽवभासः, अतोऽन्यः शरीरादात्मेति। तत्त्वयुक्तम्-संनिवेशाऽप्रतिभासेपि शरीरप्रतिभाससम्भवात्, न हि संनिवेश एव शरीरं शरीरधर्मो हि संनिवेशः,

---

त्वात्। अतो नाऽयावद्देहभावित्वेन शरीरगुणत्वनिवृत्तिरिति?। नैवम्। प्राणादीनां शरीरगुणत्वे तदपगमस्य निर्निमित्तत्वापत्तेः। तथाहि द्रव्यविनाशाद्गुणान्तरोपनिपाताद्वा गुणस्य विनाशो दृष्टः। न च प्राणाद्यपगमरूपस्य मृत्योरन्यतरदपि निमित्तमत्रास्तिपायमिति चेत्। न। तस्यात्मगुणत्वेन शरीरधर्मत्वाऽभावात्। अतो मृत्योः शरीरावस्थान्तरत्वाऽभावात्कार्श्यादितुल्यतेति। वस्तुतस्तु कार्श्यादीनां रूपादिवद्गुणत्वमेव नास्तीति। ननु कथं शरीरगुणत्वनिराकरणेनान्यगुणत्वसिद्धिरत आह। सूचयतीति। सुखादयः क्वचिदाश्रिताः गुणत्वाद्रसादिवत् यत्राश्रिताः स आत्मेति भावः। दूषणान्तरमाह। किञ्चेति। अत्रैव मतान्तरमाशङ्क्य निराकरोति। कश्चिदिति। अन्यथेति। वेदितुरनवभासे इत्यर्थः। न चेति। शरीरस्य तथावभासे तस्यैव वेत्तृत्वं स्यादिति भावः। नहीति। यदि सन्नि-

सम्भवति च धर्माऽप्रतिभासेपि धर्मिणः प्रतिभासः, अन्यथाऽऽत्मनोपि प्रतिभासो न स्यात् तद्धर्माणां सर्वगतत्वादीनामर्थवित्तिष्वऽप्रतिभानात्। न चैकान्तिकमऽर्थवित्तिषु वेत्तृभानम्, अर्थ एव हि तदा भासते न वेत्ता।

न च स्वपरवेद्ययोरनतिशयः नहि वेत्तृभासनकृतोयमऽतिशयः, किं तु कस्यचिदेव किं चिदाभासते नाऽन्यस्य—इत्येतावानऽतिशयो नान्यः, तस्मान्न ज्ञातृप्रतिभासेन शरीरविवेकसिद्धिः किं तु पूर्वोक्तादेव कारणात्=ज्ञानसुखादीनां शरीरगुणत्वाऽसम्भवात् ततोऽन्य एतेषामाऽऽश्रयः स एवात्मा।

सौगतास्त्वाहुः—

सिद्धे ज्ञानसुखादीनां गुणत्वे गुणिकल्पना।
न तु तत्सिद्धमस्माकं तावन्मात्रोपपत्तितः॥ १९॥

न ह्याश्रयमन्तरेण ज्ञानमात्रमनुपपन्नं स्वतन्त्रमेव ज्ञानं किं नेष्यते? सुखादयोपि ज्ञानविषयाः स्वतन्त्रा एव अन्यस्याश्रयस्यानुपलब्धेः। ज्ञानमेव च नीलमहं जानामीति ज्ञातृत्वेन विपर्यासितदर्शनैरध्यवसीयते नान्यः प्रमाणाभावात्।

वेश एव शरीरं स्यात् तदा तदप्रतिभासे शरीराप्रतिभासः स्यादितिभावः। न चेति। तत्प्रतिभासे अहमाकारोल्लेखः स्यादितिभावः। दूषणमुपसंहरति। तस्मादिति। मतान्तरमवतारयितुं स्वोक्तमर्थमनुवदति। पूर्वोक्तादिति। श्लोकचतुर्थपादं व्याचष्टे। नहीति। नन्वहं जानामीति नाश्रय उपलभ्यत

ननु ज्ञानस्य क्षणिकत्वात् कथं पूर्वेद्युरुपलब्धे ऽपरेद्युः स्मरणमिच्छा प्रत्यभिज्ञा च ? न हि स्वयमनुपलब्धे तानि सम्भवन्ति, न हि देवदत्तेनोपलब्धेऽर्थे यज्ञदत्तस्य स्मरणादीनि सम्भवन्ति ? । सत्यम्- न सम्भवन्ति सन्तानभेदे, समानायां तु सन्ततावेकेनोपलब्धेऽन्यस्य स्मरणाद्युपपन्नं दृष्टत्वात्, न ह्युपलब्धुः स्मर्तुश्चैकत्वं क्वचिदपि दृष्टम्, एकस्य स्थास्नोः पुरुषस्य क्वचिदप्यनुपलब्धत्वात्, तस्माज्ज्ञानमेव ज्ञातृ नान्यो ज्ञाताऽस्तीति ॥

अत्रोच्यते—

प्रत्यभिज्ञायते कर्ता यः पूर्वापरकालयोः ।
तस्य स्थास्नोः स्फुटो भेदो विज्ञानात्क्षणभङ्गुरात् ॥ २० ॥

विषयप्रत्यभिज्ञानानुपपत्तेर्ज्ञातुरेकत्वकल्पनायां स्यादप्येतदुत्तरम्-सन्तानैकत्वादेवोपपद्यत इति,

---

एव तत्राह । ज्ञानमेवेति । अत्राशङ्कते । नन्विति । पूर्वेद्युर्दृष्टे परेद्युरहमिदमदर्शमिति भवति प्रत्ययः स च प्रत्यगात्मन्येवोपपद्यते नान्यत्रेत्यर्थः । इच्छाप्युपलब्धिसमानकर्तृका सती ज्ञानातिरिक्तं स्थायिनमात्मानमुपकल्पयतीत्यर्थः । परिहरति । सत्यमिति । ननु योऽहमद्राक्षं स एमाहमनुपश्यामीत्युपलब्धुः स्मर्त्तुश्चैकत्वमिष्टमेव तत्राह । एकस्येति । संतत्यभेदेन तदुपपत्तिरिति भावः । यदुक्तं सन्तानैकत्वादेव तदुपपत्तिरिति तत्परिहरति । विषयेति । यदि विषयप्रत्यभिज्ञान्यथानुपपत्त्या ज्ञातुरेकत्वं कल्प्येत तदैतदुत्तरं स्यादित्यर्थः । प्रत्यभिज्ञास्वरूप-

यदा तु ज्ञातैवैकः पूर्वापरकालयोः प्रत्यभिज्ञायते-'योऽहं पूर्वमद्राक्षं स एवाहमनुपश्यामि' इति तदा प्रत्यभिज्ञयैव ज्ञातुरेकत्वावगमात्, विज्ञानस्य च क्षणिकत्वात् ततोऽन्यो ज्ञाता सिद्धो भवतीति ।

किमहंप्रत्ययगोचरो ज्ञाता स्यात् ? तथा सति शरीरमेव जानामि कृशोऽहं स्थूलोऽहं गच्छाम्यहमिति कार्श्यादिबुद्धिसामानाधिकरण्यादहम्बुद्धेर्गोचरः, आत्मनश्च सर्वगतस्य कार्श्याद्यनुपपत्तेः ।

उच्यते-ज्ञातृविषयस्तावदहंप्रत्यय इत्याविवादम्, यो हि परामृशति स स्वात्मानम्-'अहम्' इति

माह । योऽहमिति । योऽहमित्यादौ ज्ञातैवाहं प्रत्ययस्य विषयः । तद्यदाऽहंबुद्धिर्ज्ञात्रालम्बनी तदा ज्ञानातिरिक्तः एको ज्ञाता सिद्ध्यतीत्यर्थः । प्रयोगश्च-

ह्यस्तनाहंमतिग्राह्योज्ञाता ऽद्याप्यनुवर्तते ।

अहं प्रत्ययगम्यत्वादिदानींतनवोद्धृवत् ।

अत्र चोदयति । किमिति । शरीरमेवाहंबुद्धेर्गोचर इति सम्बन्धः । अतस्तस्यैवाहंबुद्धिगोचरत्वात् ज्ञातृत्वमापद्यत इति भावः । उक्तश्च—

"अहं यामीत्यहं शब्दः शरीरार्थः प्रयुज्यते ।

मन्तृत्वात्तस्य न ह्यात्मा गमनं प्रतिपद्यते" (१०८ श्लो. वा. आ.) ॥

समाधत्ते । उच्यत इति । परानिदमिदमिति परामृशतीत्यनुषङ्गः । कथं तर्हि देहेऽहं प्रत्ययः ? अज्ञातविवेकानां भ्रान्त्येति ब्रूमः । ज्ञातविवेकानां तु नास्त्येव । तेषामपि ज्ञातृ-

परामृशति, परान्–'इदम्' इति, तेन निस्संशयमऽस्य ज्ञातृगोचरत्वम्, शरीरस्य च ज्ञातृत्वं निराकृतम्, अतोऽत्यन्तसंसृष्टयोरेकत्वभ्रान्त्या सामानाधिकरण्यप्रतीतिरुष्णतोयप्रतीतिवद् भास्वरायःपिण्डप्रतीतिवच्च।

विषयकमहमिति जानामीति च ज्ञानमनुवर्तत एव। यथाहुः–

"जानाम्यहमितीदं तु ज्ञानं नैव निवर्तते।

तन्निवृत्तौ न तेषां स्याद् ध्यानं शिष्योपदेशने" (१३३ श्लो. वा. आ.)॥

समानबुद्धिधारणैव ध्यानं, न च स्वात्मन्यहं बुद्धेरन्या बुद्धिः सम्भवति अतोऽस्ति योगिनामप्यहंमानः। तथा जानामीत्येवमात्मानमनवगच्छतः कथं शिष्योपदेशे प्रवृत्तिः, दृश्यते च योगीश्वरस्यापि वासुदेवस्यार्जुनोपदेशे प्रवृत्तिरिति, अहंमानश्च– "अहं सर्वस्य जगत" इत्यादिभिरिति। फलितमाह। तेनेति। अस्य—अहं प्रत्ययस्येत्यर्थः। ननु शरीरमेवाहंप्रत्ययगोचरत्वात् ज्ञातृ? नेत्याह। शरीरस्येति। ज्ञानादिगुणत्वनिराकरणेन निराकृतमित्यर्थः। किञ्चैवं भूतचैतन्यवादी प्रष्टव्यः पञ्चभूतात्मके शरीरे किं सर्वाणि चेतयन्ते किं वैकामिति। आद्ये सर्वेषां समत्वात्परस्परमसम्बन्धापत्तिः। एकचैतन्ये तु इतरेण विनापि लोष्टादावपि पृथिव्यादिकस्य चैतन्यं स्यात् नहि तस्य चैतन्येऽन्यदपेक्षणीयमस्ति। प्रयोगश्च येयं शरीरगता भूतान्तरसंसृष्टा पृथिवी सा न चेतयते पृथिवीत्वात् लोष्टवत्। एवं जलादावपि दर्शयितव्यम्। ननु कार्श्यादिसामानाधिकरण्याद्देहविषयोऽहंप्रत्ययः स्यादत आह। अत इति। देहात्मनोरभेदभ्रमाद्देहगतं

तथा व्यतिरेकबुद्धिरपि दृश्यते—'ममेदं शरीरं कृशम्, इति षष्ठ्याऽस्मदर्थस्य शरीरव्यतिरेकात्, शरीरस्य च परविषयेदङ्कारास्पदत्वात्, ततोऽस्माद्विवेकावभासात् पूर्वोक्तन्यायेन च शरीरस्याऽज्ञातृत्वात् अभेदावगमस्य च संसर्गदोषवशेन भ्रान्त्याऽप्युपपत्तेः, पूर्वाभ्यस्तस्मृत्यनुबन्धेन च विना जातस्य हर्षभयशोकसम्प्रतिपत्त्यनुपपत्तेः। जातिस्मराश्च केचिदद्यत्वेपि देहान्तररहोवृत्तं वृत्तान्तं सम्बोधयन्त उपलभ्यन्त इत्युपलब्धिसिद्धः शरीरात्मनोर्भेदः।

'कार्श्यादिकमात्मन्यध्यस्यत इति भावः। भ्रान्तित्वे कारणमाह। तथेति। एवमिन्द्रियाणामप्यस्मदर्थाद्भेदपरामर्शात्सिद्धमज्ञातृत्वम्। यथाहुः—

" इदं म ईदृशं चक्षुर्मनोमे भ्रान्तमित्यपि।
इन्द्रियेष्वपि भेदेन व्यवहारश्च दृश्यते" (१२८ श्लो. वा. आ.) इति।

ननु तुल्यत्वे कथमभेदप्रतीतिरेव भ्रान्तिः स्यादत आह। तत इति। उक्तन्यायेन शरीरस्याऽज्ञातृत्वसिद्धेः ज्ञातृगोचराहंप्रत्ययविषयत्वविरोधात् ज्ञातुर्भिन्नेऽपि शरीरे तत्संसर्गकृतोऽयमभेदभ्रम इत्यर्थः। ननु मम शरीरमितिवन्ममात्मेत्यपि भेदव्यपदेशोस्ति नायमर्थो ममात्मना ज्ञात इति, ततश्चात्मनोऽन्यदात्मान्तरं प्रसज्येत ?। नैष दोषः। ज्ञानस्यैवावस्थारूपेणात्मनोभिन्नत्वात् ममेति भेदव्यपदेशोपपत्तेः। नचेह ज्ञातृज्ञानशरीरातिरिक्तं वस्त्वन्तरं प्रतीयते येनात्मान्तरापत्तिः स्यात् भेदस्याज्ञानहेतुकत्वात्। ननु नैतावता घटपटयोरिव शरीरात्मनोर्भेदः सिद्ध्यत्यत

यद्यपि चानेन प्रकारेण शरीरात्मनोर्विस्पष्टो भेदो न सिध्येत् तथापि तावदभेदोऽपि न विस्पष्टः-मम शरीरमिति विवेकस्यापि प्रतिभासात् । तत्र संमुग्धे तत्त्वे श्रुतार्थापत्त्या साक्षात् श्रुत्या वा निर्णयः-स्वर्गकामादिश्रुतयो हि शरीरातिरिक्तं परलोकफलोपभोगयोग्यं कर्तारमन्तरेणाऽनुपपद्यमानास्तमाक्षिपन्ति ताभिश्चाक्षिप्तं साक्षादेवोपनिषदः समर्थयन्ति-"अविनाशी वा अरेऽयमात्मा" इत्येवमाद्यः, इति सिद्धः शरीरातिरिक्तो मानसप्रत्यक्षरूपाऽहंप्रत्ययगम्यो ज्ञाता ।

कथं पुनर्ज्ञातुर्ज्ञेयत्वम् ? न ह्येकस्य कर्तृत्वं कर्मत्वं च स्वात्मनि क्रियाविरोधात् सम्भवति, तस्माज्ञा-

---

आह । तथापीति । तत्र श्रुतार्थापत्तिं दर्शयति । स्वर्गेति । श्रुतिमुदाहरति । अविनाशीति । ननु नास्तिकान्प्रति श्रुत्युपन्यासोऽयुक्तः न ह्यनेन ते प्रतिबोधयितुं शक्यन्ते । सत्यम् । उक्तयुक्त्यैव तत्प्रतिबोधनात् । यस्तु वेदवादी शिष्यः यो वा "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुपश्यति न प्रेत्यसंज्ञास्तीति" भूतचैतन्याभिधानाज्जातभ्रान्तिर्वेदविरोधमात्मनो मन्यते तत्प्रतिबोधनाय श्रुत्युपन्यास इति । विरोधपरिहारं च ग्रन्थकार एव 'यत्तु विज्ञानघन' इत्यादिना दर्शयिष्यति । गूढाभिसन्धिः पृच्छति । कथमिति । तत् किमात्मनो भानमेव नास्ति ? अस्तीत्याह । घटादीति । विषयवद्भासते न तु ज्ञातृत्वेनेति भावः । प्रतिबन्द्या परिहरिष्यन् पृच्छति । कः पुनरिति । ननु विषयवद्भासत इत्युक्तमेव ?। सत्यम् । तथापि तत्र संवित्तिक्रियाकर्तृ-

हंवित्तिर्नाम घटादिवित्तिव्यतिरेकेण काचिदस्ति, घटादिवित्तावेव तु विषयवदात्मा भासत इत्युक्तम् ।

कः पुनरयं स्वात्मनि क्रियाविरोधो नाम!, यस्यां क्रियायां यः कर्ता न सा तस्मिन्नेव स्वफलं जनयतीत्यर्थः । किं पुनः संवित्तिक्रियायाः फलम्?, भासनम् । किमिदं कर्तरि न भवति!, ओमिति चेत् !, कथं तर्ह्यसौ भासते? न ह्यसति भासने भासते इति शक्यते वक्तुम्, तस्मादर्थवित्तिष्वप्यात्मनो भासनाभ्युपगमे स्वात्मनि क्रियाविरोधस्तुल्य एव । व्यवहारयोग्यतामात्रं संवित्तेः फलं नान्यदिति चेत्? भवत्वेवम्. अस्ति तावत्फलं तच्च विषयेष्विवात्मन्यपि संवित्तितो जायत इत्यङ्गीकृतं भवद्भिः, अतस्तुल्यो विरोधः ।

यदि परमार्थविरोधमुद्भाव्य सत्यप्यात्मनः क्रियाजन्यफलभागित्वे कर्मसञ्ज्ञा कर्मविभक्तिश्च न भवतीत्युच्यते " परसमवायिक्रियाफलभागित्वं कर्मत्वम् " इत्यभिधानात् ? । तच्चाऽयुक्तम्–शब्दसाधुत्वं हि प्रयोगतोऽवगन्तव्यम्, अस्ति चात्मनः

स्वेनैव भासते ऽतस्तुल्यो दोष इत्याह । तस्मादिति । चोदयति । व्यवहारेति । तच्च घटादिष्वेव सम्भवतीति भावः । परिहरति । भवत्विति । भासनरूपस्य फलस्य त्वयाऽप्यङ्गीकारात् तुल्यो विरोध इत्यर्थः । यदीति । परसमवेतक्रियाफलभागित्वं कर्मत्वं तच्चात्मनि ज्ञातरि विरुद्धमित्यभिप्रायः । एतदप्ययुक्तमित्याह ।

स्वकर्तृकायामेव क्रियायां कर्मव्यवहारो लोके वेदे च–यथा तावद्भाष्य एव "स्वसंवेद्यः स भवति" इति कर्मवाचिकृत्यप्रत्ययप्रयोगः, वेदेपि–"आत्मानमुपासीत" "आत्मानं वेद" "आत्मा ज्ञातव्यः" इत्यनेकशः प्रयोगः ।

न च गन्तुर्गमने कर्मत्वम्, प्रयोगाभावात् । शब्दसाधुत्वे हि प्रयोगपरवशा वयं न स्वयमीश्महे, यथा हि चलनार्थत्वे समाने गच्छतिः सकर्मकः चलतिश्चाकर्मकः प्रयोगस्य तथा दर्शनात्, एवं ज्ञातुः कर्मत्वं गन्तुश्चाकर्मत्वं भविष्यति । तस्मान्मानसाहंप्रत्ययगम्य आत्मा । तथा च श्रुतिः–"स मानसीन आत्मा जनानाम्" इति । तेन यद्यपि विषयवित्तिवेलायामेवाऽऽत्मावभासस्तथापि न विषयवित्तिकर्तृतयाऽवभासः किं तु मानसाहंप्रत्ययकर्मतयाऽवभासो न तद्वित्तिकर्मतयाऽव्याप्तेः ।

ननु शरीरवदात्मन्यप्यहमभिमानो भ्रान्तिरेव ?, न, बाधाभावात् । योगिनामस्ति बाध इति चेत् ?, न, प्रमाणाभावात् ।

तथा च येऽपि योगस्य परां काष्ठामुपागताः ।

तच्चेति । लोके तावदुदाहरति । यथेति । नचैवं गमनक्रियाकर्तुरपि कर्मत्वापत्तिरित्याशङ्क्य निराकरोति । नचेति । उपपादितमर्थं निगमयति । तस्मादिति । स–आत्मा । जनानां मानसीनो–मनोगम्य इत्यर्थः । तदिति । तस्य भासमानस्य वित्तिकर्मतयैवावभास इति व्याप्तेरित्यर्थः । अन्यथासिद्धिमाशङ्क्य

योगेश्वरेश्वरास्तेऽपि कुर्वन्त्यात्मन्यहंमतिम् ॥२१॥
" अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ।"
" तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ! ।"
" यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।"
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ।"
" मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् ।"
एवमादावऽहंशब्दः परस्मिन् पुंसि हि ध्रुवम् ।

न हि महद्विकारोऽहङ्कारः कृत्स्नस्य प्रभवः, नापि क्षराऽक्षराभ्यामुत्तमः, नापि ब्रह्मशब्दवाच्ये प्रधाने गर्भं दधाति, पुरुषसंपर्ककृतत्वात् प्रकृतिक्षोभस्य । तथोपनिषत्स्वपि—" ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेदहं ब्रह्मास्मि " इति, मन्त्रवर्णोऽपि–"अहं मनुरभवं सूर्यश्च " इति । तस्मादहंप्रत्ययगम्यत्वमात्मनोऽनिच्छन्तः श्रुतिविरोधादेवोपेक्षणीयाः ।

यत्तु निर्मुक्ताहङ्कारममकारवचनम्, तदपि पौर्वापर्येण परामृष्यमाणं नाहङ्कारस्वरूपनिषेधार्थं भवति, एवं हि तद्वचनम्–' नास्य कश्चित् नायं कस्यचित् निर्मुक्ताहङ्कारममकार एवायम् ' इति, तदयमर्थः– यस्मान्नास्य कश्चित् तस्मान्निर्मुक्तममकारः, यस्मान्नायं कस्यचित् तस्मान्निर्मुक्ताहङ्कार इति । यद्यहङ्कारस्वरूपनिषेधः स्यात्, न पूर्वेण सम्बध्येत–' यस्मान्नायं

निराकरोति । नन्विति । पुरुषेति । महद्विकारस्यैवंरूपगर्भधारणाऽसम्भवादिति भावः । स्वमते श्रुतिविरोधं परिहरति । यत्त्विति । असम्बन्धमेव विवृणोति । यस्मादिति । इदानीमिन्द्रिया-

कस्यचित् तस्मादस्मिन्नऽहंभावो भ्रान्तिः' इति किं केन सङ्गतम् ?, तस्मान्नायमहन्तास्वरूपनिषेधः ।

किं तर्हि ?, जन्मसम्बन्धितयाऽऽत्मन्यहंमतिः–' अहमस्य पिता. अहमस्य पुत्रः' इत्यादि स भ्रम इत्येवं सङ्गतं भवति । अयमात्मा न कस्य चिदपि पुत्रादिरूपेण संबन्धी, जन्यजनकभावस्य शरीरविषयत्वात्, शरीरं हि शरीराज्जायते न त्वाऽऽत्माऽऽत्मान्तरात्, तस्मादन्यसम्बन्धितयाऽऽत्मन्यहंमतिः कृशादिमतिवच्छरीराद्विवेकमऽबुध्यमानानां भ्रान्तिरिति । तदिदमस्याऽन्यसम्बन्धित्वनिषेधेन पुत्रादिविषयस्नेहनिवर्तनेन वैराग्यजननार्थमुच्यते, नाहंकारस्वरूपस्याऽयं निषेधोऽनुपयोगादऽसङ्गतत्वात् प्रमाणान्तरविरोधात् " अहं ब्रह्मास्मि " इति वचनविरोधाच्च । तस्मादऽहंप्रत्ययगम्यो ज्ञाता शरीरातिरिक्त इन्द्रियव्यतिरिक्तश्च ।

कथमिन्द्रियभेदः ?, इन्द्रियाभावेऽपि ज्ञातुरेकस्य प्रत्यभिज्ञानात्–योऽहं रूपमद्राक्षं सोऽहं स्पृशामीति, योऽहमग्रहीषं सोहं स्मरामीति । मनस्तु प्रत्यक्षसिद्धस्य ज्ञातू रूपादिज्ञानेषु व्यतिरिक्तकरणाधीनत्वात् सुखादिज्ञानेषु भवितव्यं करणेनेत्येवं कल्प्यत इति नास्य ज्ञातृत्वमाशङ्कनीयम् ।

तिरेकं प्रश्नपूर्वकमुपपादयति कथमिति । मनसोऽपीन्द्रियत्वेनैव कल्पनात् न ज्ञातृत्वशङ्काऽस्तीत्याह । मनस्त्विति । ननु क्लृप्तमेवास्ति चक्षुरादिकं किं मनसेत्यत उक्तम् । रूपादीति ।

ये तु कर्तृतयैवात्मसिद्धिर्न कर्मतयेत्याहुः तेषामात्मनि स्मरणप्रत्यभिज्ञाने नोपपद्येयाताम्, तत्रापि हि पूर्वकालसंम्बन्धित्वेनात्मनः प्रतिभासोऽङ्गीकरणीयः, न च सांप्रते स्मरणे पूर्वकालसम्बन्धिनः कर्तृत्वं सम्भवतीति कथं कर्तृतया सिध्येत् ? तस्मादऽहंप्रत्ययकर्मतयैवात्मनः सिद्धिरिति रमणीयम् ।

अथ स्वप्रकाशत्वमात्मनः सुखादीनां च किं नेष्यते ?, स्वप्रकाशस्य कस्य चिदप्यदर्शनात्. सर्वस्यैव हि वस्तुनः परप्रकाश्यत्वनियमात् । स्वप्रकाशत्वे चात्मा सुषुप्तावपि प्रकाशेत, न च प्रकाशते, यथोक्तम्–" अचेतयन्नेव सुषुप्त इत्युच्यते " इति ।

ननु सुषुप्तावपि प्रकाशत एवात्मा स्वाभाविकपरमानन्दयुक्तः, अन्यथा कथम्–'सुखमहमस्वाप्सम्, इति प्रबोधे प्रतिसन्धानं स्यात् ?, अर्थान्तरं तु न किंचिच्छरीरमिन्द्रियमन्यद्वा वस्तु प्रकाशत इत्येतावान् स्वप्नजागराभ्यां सुषुप्तेर्भेदः । नैतदेवम्–संविद्विरोधात्

सुखादिज्ञानार्थं तत्कल्पनमित्यर्थः । अत्रैव मतान्तरमाशङ्क्य निराकरोति । ये त्विति । अनुपपत्तिं विवृणोति । तत्रापीति । एतत्कालसम्बन्धिनि स्मरणे पूर्वकालसम्बन्धिनः कर्तृत्वं न सम्भवति अतः कर्मतयैव सिद्धिरित्याह । तस्मादिति । वेदान्तिमतमुत्थापयति । अथेति । ततश्च न कर्मकर्तृविरोधोभविष्यतीति भावः । परिहरति । स्वप्रकाशस्येति । अर्थान्तरमिति । जाग्रदवस्थायामर्थान्तरप्रकाशः सुषुप्त्यवस्थायां त्वात्मन एव केवलस्य प्रकाश इति भेद

न हि सुप्तानामात्मा सुखं वा प्रकाशते, नह्यऽभासमानं व्यवहारमात्रेण प्रकाशत इति शक्यमङ्गीकर्तुम् ।

किं च—

सुप्वापादुत्थिताश्चैवं निर्विद्यन्ते हि कामुकाः ॥
वृथेयमन्तरेणैव कामिनीं यामिनी गता ॥ २२ ॥
आश्लिष्टामप्यबुद्ध्वैनां मृतवच्छयितं मया ॥
भुक्त्वा च परमानन्दं तस्य च स्मरणादयम् ॥ २३ ॥
स्वल्पाल्पसुखहान्यैवं निर्वेदो नावकल्पते ॥
तत्सुखं विस्मृतं चेत् स्यात्! सुखमस्वाप्समित्ययम्॥२४॥
व्यवहारो न युज्येत, दुःखाननुभवे त्वियम् ॥
सुखव्यवहृतिस्तस्माद् गुणवृत्त्येति निश्चयः ॥२५॥

प्रबुद्धा हि सुषुप्तावऽवगतं किंचिदपि दुःखमसंस्मरन्तः स्मरणानुत्पत्त्यैव सुषुप्त्यऽवस्थायां मे न किंचिदपि दुःखमासीदित्यवगम्य तत्रैव सुखव्यवहारं गुणवृत्त्याकुर्वन्ति, तथा च व्यवहरन्ति—एतावन्तं कालमहमात्मानमप्यबुद्ध्वा शयितोस्मीति । तस्मात् सुषुप्ताऽवप्रकाशान्नात्मनः स्वप्रकाशत्वम्, अतो मानसप्रत्यक्षगम्य एवायमिति स्थितम् ।

स पुनरयमात्मा- अणुः शरीरपरिमाणो विभुर्वेति

इत्यर्थः । निराकरोति । नैतदिति । सुषुप्त्यवस्थायां परमानन्दप्रकाशेऽल्पतरसुखभागी निर्वेदो न स्यादित्याह । भुक्तेति । ननु सुषुप्तावानन्दाप्रकाशे सुखमहमस्वाप्समिति व्यवहारः कथमत आह । दुःखेति । गुणवृत्तिमुपपादयति । प्रबुद्धा हीति । आत्मन्येव विचारान्तरमवतारयति । स पु-

चिन्तनीयम्। तत्राणुपरिमाणत्वे युगपच्छिरःपादयोर्वेदनानुपपत्तिः। अयौगपद्येऽप्यतिशैघ्र्याद् यौगपद्यावगतिरिति चेत्?, स्यादेवं यद्यऽणुत्वं कुतश्चित् सिद्धं स्यात्, तदसिद्धौ दृष्टानुसारादनणुत्वमेव युक्तम्। तत्र शरीरपरिमाणत्वे सावयवः स्यात्, द्विविधमेव हि निरवयवद्रव्यम्–अणु विभु वा, तदसौ शरीरसंमितः सन् सावयवः स्यात्, तत्र बह्वऽवयवकल्पना तावतां चान्यूनानधिकानामवयवानां पुत्तिकाहस्तिदेहयोरतिसङ्कोचविस्तारकल्पनं नातीव हृदयमनुरञ्जयति, तस्माद्विभुत्वमेव युक्तम्, तथा च श्रुतिः–"अनन्तमपारम्" इति, भगवद्गीतासु च वचनम्–

"नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः"

इति। ये चोपनिषत्स्वऽणुत्ववादाः पुराणेषु च "अङ्गुष्ठमात्रं पुरुषम्" इत्यादयस्ते सूक्ष्मग्रहणगोचरत्वाभिप्रायाः।

ननु विभुत्वे सर्वशरीरेष्वेक एवात्माऽस्तु किं नानात्मभिरभ्युपगतैः?, नैवम्–एकत्वे सति यथा करणभेदेपि कर्तुरेकत्वाच्चक्षुषा दृष्टमर्थं मनसा स्मरति त्वचा च प्रत्यभिजानाति–यमहदर्शं तमहं स्पृशामीति, तथा देवदत्तशरीरस्थेनात्मना दृष्टमर्थं यज्ञदत्तः प्रत्यभिजानीयात्, शरीरभेदेऽप्यात्मनः प्रत्यभिज्ञातुरेकत्वात्। कर्तुरेकत्वेपि मनोभेदाद् व्यवस्थेति चेत्?,

---

नारिति। ग्रन्थो निगदव्याख्यातः। नन्वेकमेवाद्वितीयमित्यादिश्रुतिरेवाऽत्र प्रमाणमत आह। ये त्विति। ते नैकान्ततः

न, करणत्वान्मनसः, करणभेदस्य चक्षुरादेर्भेदव्यवस्थापकत्वायोगादित्युक्तम् ।

चक्षुरादिकरणानामव्यवस्थापकत्वेपि मनः करणं व्यवस्थापकमिति चेत् ?, न, करणत्वाविशेषात् । स्यादप्येषा कल्पना यद्येकात्मत्वे दृढं प्रमाणं स्यात् ? न तु तदस्ति । ये त्वात्मैकत्ववादाः श्रुतिषु स्मृतिषु पुराणेषु वा ते "निरञ्जनः परमं साम्यमुपैति" "मम साधर्म्यमागताः" "उत्तमः पुरुषस्त्वन्यः" इत्यादिभिरात्मभेदवचनैः प्रत्यक्षादिभिश्च विरोधान्नैकान्ततः शक्नुवन्त्यात्मैकत्वं निश्चाययितुम् ।

वचनानां हि मिथो विरोधे सिद्धवस्तुविषयत्वेन च विकल्पासम्भवे प्रमाणान्तरान्निर्णयः स्यात्, तच्च प्रमाणान्तरं भेद एव समर्थमित्यैकात्म्यवादानामवैलक्षण्यपरत्वं पूर्वोक्तन्यायेनावगन्तव्यम्,

विस्पष्टं चैतद्वायुदृष्टान्तोपादानात्—

"वेणुरन्ध्रादिभेदेन भेदः षड्जादिसञ्ज्ञितः ।
अभेदव्यापिनो वायोस्तथा तस्य महात्मनः"

इति ।

नहि वायुद्रव्यं सर्वत्रैकं व्यक्तिभेदस्य स्पष्टत्वात्, अविलक्षणस्वभावस्य तु वायोर्वेणुरन्ध्रकृतं षड्जादिवैलक्षण्यम्, एवमात्मनोपि पशुमनुष्यादिवैलक्षण्यं देहसम्बन्धकृतं न स्वाभाविकमित्ययमेवार्थः । वा-

---

शक्नुवन्त्यात्मैकत्वं निश्चाययितुमितिसम्बन्धः । दृष्टान्तमेवोपपादयति । वेण्विति । सामान्याभिप्रायं—अवैलक्षण्याभिप्रा-

योरिति तस्येति चैकवचनं सामान्याभिप्रायम्, तस्मात् प्रतिशरीरं भिन्ना एवात्मानः सर्वगता नित्याः। एवं च बद्धमुक्तव्यवस्थापि युक्ततरा भवति।

॥ इति आत्मवादः ॥

कः पुनरयं मोक्षो नाम ?, विचित्रवासनावशेन विचित्रनीलपीतादिरूपेण प्रवहतो ज्ञानसन्तानस्य निरशेषवासनोच्छेदान्नीलपीतादिवैचित्र्यं हित्वा केवलं संविन्मात्रेणाऽवस्थानमिति केचित्।

अपरे तु दीपसन्तानस्येव ज्ञानसन्तानस्योपरमम्।

उभयमप्येतद्बाह्यार्थाभावमूलमिति तत्सद्भावप्रतिपादनेनैव निराकृतम्।

अपरे तु प्रपञ्चविलयमपवर्गमाहुः–अविद्यानिर्मितो हि प्रपञ्चः स्वप्नप्रपञ्चवत् प्रबोधेनैव ब्रह्मविद्ययाऽविद्यायां विलीनायां स्वयमेव विलीयते, तथा हि श्रुतिः–" यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाऽभूत् तत् केन कं पश्येत् " इति।

तदिदमपि प्रपञ्चस्याऽविद्यानिर्मितत्वानिराकरणेन परमार्थत्वप्रतिपादनान्निरस्तमेवेति। " आत्मैवेदं सर्वम् " इति सर्वस्यात्मा भोक्तेत्यर्थः, यथा " यः कामयेत राष्ट्रं स्याम् " राष्ट्रस्य भोक्तेत्यर्थः, यथा–"यः कामयेत सर्वमिदं भवेयम् " इति सर्वस्य भोक्ता

यमित्यर्थः। प्रसङ्गान्मोक्षस्वरूपं निरूपयितुमारभते। कः पुनरि-

भवेयमित्यर्थः, तथा–'आत्मा सर्वम्' इति सर्वस्यात्मा भोक्तेत्यर्थः ।

यत्तु " यत्र हि द्वैतमिव भवति " इति द्वैतभावस्य भ्रान्तित्ववचनम्, तदौपचारिकम्— यथा खलु स्वप्नप्रपञ्चेन्द्रजालमृगतोयादिः कियन्तं चित्कालं दृष्टिपथमापन्नः पश्चाद्विलीनो भोग्यतामतिवर्तते तथाऽयं शरीरेन्द्रियविषयरूपप्रपञ्चोऽप्यस्यात्मनः कियन्तश्चित्कालमुपभोग्यः सन् पश्चाद्विनाशादनुपभोग्यो भवति- इत्यनेन सादृश्येन भ्रान्तिरित्युपचारेणोच्यते पुरुषाणां विषयभोगेष्वास्थानिवर्तनेन मुक्तावऽभिरुचिं जनयितुम् ।

यदपि—" यत्र त्वस्य सर्वमात्मैवाभूत् " इति मुक्तावाऽऽत्मनोऽद्वितीयत्ववचनं? तदपि न प्रपञ्चस्वरूपनिषेधार्थं, किं तु सत एव प्रपञ्चस्यात्मसम्बन्धनिषेधार्थम्, अस्येति वचनात् न ह्यत्रैतावदुच्यते-' यत्र सर्वमात्मैवाभूत् ' इति । किं तर्हि ?, " यत्र त्वस्य सर्वमात्मैव " इति, तेनास्यायमर्थः–यत्र=यस्यामवस्थायां मुक्तावित्यर्थः, अस्य=आत्मनो दृश्यत्वेन दर्शनसाधनत्वेन दर्शनायतनत्वेन वा न किं चिदन्यत् सम्बन्धि विद्यते, किं त्वात्मैवास्य सर्वं नान्यत् किं चित् तदा केन कं पश्येदिति । यथा लोके यस्य न किं चिदपि बान्धवो वित्तं वास्ति स एवं वदति–' न

ति । मतान्तरनिरूपणग्रन्थः स्पष्टार्थः । मतान्तरनिराकरणमुपसंहृत्य स्वमतमनुसन्धत्ते । किन्त्विति । मोक्षशब्दस्यान्व-

मे किंचिदस्ति अहमेव सर्वम्' तत्र सम्बध्यन्तरं न किंचिदस्तीत्येतावद्विवक्षितम्, एवं मुक्तावात्मै-वात्मनः सर्वमिति सम्बन्ध्यन्तराभावमात्रं विवक्षितं न प्रपञ्चस्वरूपाभावः, तस्मान्न प्रपञ्चविलयो मोक्षः किं तु प्रपञ्चसम्बन्धविलयः। त्रेधा हि प्रपञ्चः पुरुषं ब-ध्नाति–भोगायतनं शरीरम्, भोगसाधनानीन्द्रियाणि, भोग्याः शब्दादयो विषयाः, भोग इति च सुखदुः-खविषयोऽपरोक्षाऽनुभव उच्यते, तदस्य त्रिविधस्या-पि बन्धस्यात्यन्तिको विलयो मोक्षः।

किमिदमात्यन्तिकत्वम्?, पूर्वोत्पन्नानां शरीरे-न्द्रियविषयाणां विनाशः अनुत्पन्नानां चात्यन्तिको-ऽनुत्पादः। कथमत्यन्तानुत्पत्तिः?, उत्पादकयोर्धर्मा-धर्मयोर्निश्शेषयोः परिक्षयात्, सोयं प्रपञ्चसम्बन्धो बन्धस्तद्विमोक्षश्च मोक्षः।

नन्वेवमशेषधर्मक्षयान्मुक्तस्य न किंचित्सुखं स्यात् ततश्चाऽपुरुषार्थो मोक्षः स्यात्? नैष दोषः– न हि धर्मजन्यो मुक्तस्यानन्दः तथा सत्युत्पत्तिमत्त्वा-द् विनाशी स्यात् तत्राऽपुनरावृत्तिश्रुतेर्विरोधः स्यात्। स्वाभाविकस्त्वात्मानन्दः संसारेणाभिभूतः सन् नि-र्मुक्तसंसारस्याभिव्यक्तो भोग्यो भवति, स्वाभावि-कत्वे चानन्दस्य "आनन्दं ब्रह्म" इत्यादिश्रुतिस-हस्रं प्रमाणम्।

र्थतां दर्शयति। सोयमिति। आनन्दमोक्षवादिमतेन ताव-

ननु सुखाभावेपि श्रुतिरस्ति-"अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" इति ?, सत्यम्- विषयसुखाभिप्रायं त्वेवञ्जातीयकम्, अन्यथाऽऽनन्दश्रुतिविरोधात्। अथ सुखाभाववचनबलेनाऽऽनन्दवचनमेव दुःखाभावाभिप्रायं किमिति न व्याख्यायते ?, सुखाभाववचनानामत्यल्पत्वात्तेषामेवान्यथाकरणं युक्तं न भूयसामानन्दवचनानाम्। किं चानन्दशब्दस्य दुःखाभावपरत्वेऽत्यन्तस्वार्थहानिः स्यात्, सुखशब्दस्य तु सामान्यवचनस्य विशेषव्याख्यानेपि नातीव स्वार्थहानिरिति तदेव युक्तम्।

ननु विषयमानोप्याऽऽनन्दोऽननुभूयमानोऽकिञ्चित्कर एव, न च मुक्तस्य सर्वकरणहीनस्यानन्दानुभवः सम्भवति। स्वप्रकाशोऽयमानन्द इति चेत् ?, न, संसारावस्थायामप्रकाशात्। ननु तत्राप्यानन्दस्वभावः पुरुषः प्रकाशत एव आत्मनि प्रेमोत्पत्तेः न ह्यसुखे प्रेमोत्पत्तिः सम्भवति नाप्यविज्ञाते सुखे।

त्परिहरति। नैषइति। अत्र चोदयति। नन्विति। समाधत्ते। सत्यमिति। प्रियाप्रियशब्दयोर्विषयजन्यसुखदुःखयोरेव प्रयोगदर्शनादितिभावः। तेषामेवेति। "विप्रतिषिद्धसमवाये भूयसां स्यात्स्वधर्मत्व"मितिन्यायेनेत्यर्थः। इतश्चैवमित्याह। किञ्चेति। प्रकारान्तरेण शङ्कते। नन्विति। नहीति। उक्तञ्चाभियुक्तैः—

"प्रेमाऽनुपाधिरसुखात्मनि नोपलब्धः
स प्रत्यगात्मनि कृमेरपि नित्यसिद्ध" इति॥

किमिदानीमस्माभिरात्मा सुखरूपोनुभूयते ?, सत्यमिति ब्रुवाणस्यातिसाहसिकस्य नोत्तरं वाच्यम् । यदि संसारिणोपि परमानन्दमनुभवेयुस्ततोमुक्तस्य न कश्चिदतिशय इति तदेवापुरुषार्थत्वं मोक्षस्यापद्येत, अतो बलादसुखरूपस्याप्यात्मनः प्रेमविषयत्वं दृष्टत्वादङ्गीकर्तव्यम् ।

अथ स्वप्रकाशोऽप्यानन्दः संसारावस्थायामभिभूतो न प्रकाशते ? । कोऽयं प्रकाशमानस्याऽभिभवो नाम ?, प्रकाशनिवारणं ह्यभिभवः, न च प्रकाशमानस्याऽप्रकाशनं संभवति, यदि तु नैव प्रकाशते संसारावस्थायाम् ?. तस्यामवस्थायामसतः प्रकाशस्य मुक्तावस्थायामुत्पद्यमानस्य कारणं वक्तव्यम्; विज्ञानमेव च प्रकाशाख्यस्य फलस्य कारणं तच्चेन्द्रियाधीनम्, न च मुक्तस्येन्द्रियाणि संभवन्तीति कथमानन्दानुभवः स्यात् ? ।

उच्यते—बाह्येन्द्रियाण्येव मुक्तस्य निवर्तन्ते, मनस्तु तस्यामवस्थायामनुवर्तते इत्यानन्दश्रुतिबलादेवाध्यवसीयते । एवं ज्ञानं च "नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते" इतिश्रुतेः, विज्ञानघनश्रुतेश्च, ते-

---

अनुभवविरोधादुपहासेन परिहरति । किमिति । दूषणान्तरमाह । यदीति । अभ्युपेत्याह । यदि त्विति । कारणं वक्तव्यं तच्च वक्तुं न शक्यत इत्यभिप्रायः । अशक्तिमुपपादयति । विज्ञानमेवेति । समाधत्ते । उच्यते इति । एवमिति । ज्ञानमपि सुषुप्त्यवस्थायां श्रुतिबलादेवाङ्गीक्रियत इत्यर्थः । अत्रमोक्षस्या-

स्मान्मुक्त्यवस्थायां मानसप्रत्यक्षेण परमानन्दमनुभव-
न्नात्माऽवतिष्ठते । तदुक्तम्—

" निजं यत्त्वात्मचैतन्यमानन्दश्चेष्यते च यः ।
यच्च नित्यविभुत्वादि तैरात्मा नैव मुच्यते" इति ।
यत्तु—" तस्मात्कर्मक्षयादेव हेत्वभावेन मुच्यते ।
न ह्यभावात्मकं मुक्त्वा मोक्षनित्यत्वकारणम् "
(श्लो. वा. सं.)

ऽभावात्मत्वप्रतिपादनपरवार्त्तिकविरोधं परिहरति । यत्त्विति ।
अत्र साङ्ख्याभिमतं मोक्षस्वरूपं निराकर्तुं—

"सुखोपभोगरूपश्च यदि मोक्षः प्रकल्प्यते ।
स्वर्ग एव भवेदेष पर्यायेण क्षयी च सः ॥ १५ ॥
नहि कारणवत्किञ्चिदक्षयित्वेन गम्यते" (श्लो. वा. सं.)
इत्युक्त्वा "तस्मात्कर्मक्षयादेवे"त्यादिना मोक्षस्वरूपमुक्तम् ।
तथा—
"न च क्रियायाः कस्याश्चिदभावः फलमिष्यते ॥१०७॥
तत्र ज्ञातात्मतत्त्वानां भोगात्पूर्वक्रियाक्षये ॥
उत्तरप्रचयाऽसत्त्वाद्देहो नोत्पद्यते पुनः ॥ १०८ ॥
कर्मजन्योपभोगार्थं शरीरं नः प्रवर्त्तते ॥
तदभावे न कश्चिद्धि हेतुस्तत्रावतिष्ठते ॥ १०९ ॥
मोक्षार्थी न प्रवर्त्तेत तत्र काम्यनिषिद्धयोः ॥
नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया ॥ ११० ॥
प्रार्थ्यमानं फलं ज्ञानं न चानिच्छोर्भविष्यति ॥
आत्मज्ञे चैतदस्तीति तज्ज्ञानमुपयुज्यते" । (श्लो. वा.सं.)
परमतमिति । परमतनिराकरणप्रसङ्गेनोक्तत्वादिति भावः ।

इतिवार्तिकं तत्परमतम्, इत्येवमानन्दमोक्षवादिनांमतम्।

अपरे त्वाहुः— अभावात्मकत्ववचनमेव स्वमतम् उपपत्त्यभिधानात्, आनन्दवचनं तूपन्यासमात्रत्वात् परमतम्, न हि मुक्तस्यानन्दानुभवः संभवति करणाभावात्। मनः स्यादिति चेत्?, न, अमनस्कत्वश्रुतेः-"अमनोऽवाक्" इति।

यत्तु-"न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते" इति, तज्ज्ञानशक्त्यभिप्रायम्, अन्यथा हि सुषुप्तावपि ज्ञानानुवृत्तिरुक्ता स्यात् सा च संविद्विरुद्धेत्युक्तम्। विस्पष्टं चास्य शक्त्यभिप्रायत्वम्, एवं हि श्रूयते "यद्वैतन्न पश्यति पश्यन् वैतन्न पश्यति, न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते, अविनाशित्वात् "न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत् पश्येत्"।

एवमन्यान्यपि वाक्यानि- "जिघ्रन् वैतन्न जिघ्रति न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यते" "न श्रोतुः श्रुतेर्विपरिलोपो विद्यते" "न स्प्रष्टुः स्पृष्टेर्विपरिलोपो विद्यते" "न ज्ञातुर्ज्ञातेर्विपरिलोपो विद्यते"

नन्वानन्दमोक्षस्य "स्वर्ग एव भवेदेषः" इत्यनेन दूषितत्वात्कथं वार्त्तिकानुसारि तन्मतं स्यात्। सत्यम्। मोक्षस्यानित्यत्वापत्तिरूपं दूषणमुक्तं तदुक्तरीत्या परिहर्तुं शक्यतेऽतो वार्त्तिकाभिमतमेवानन्दरूपत्वं मोक्षस्येति कस्य चिद्व्याख्यातुर्मतमित्यर्थः। स्वाभिप्रेतं वार्तिकाभिप्रायमाह। अपरे त्विति। एतदनन्तरं मतान्तरानुपन्यासादत्र च युक्त्यभिधानात्तदेव वार्त्तिककृन्मत-

इति, तत्र तत्र दृष्टिघ्रातिश्रुतिस्पृष्टिशब्दाश्चक्षुर्घ्राण-श्रोत्रत्वगिन्द्रियजन्यानां रूपगन्धशब्दस्पर्शविषया-णां विज्ञानविशेषाणां वाचकाः नार्थान्तरविषयाणां, नापि विज्ञानसामान्यस्य । न चैषां ज्ञानविशेषाणां सुषुप्तौ मुक्तौ वा कथं चिदप्यऽपरिलोपः सम्भवति न हि तदानीमिन्द्रियाणि सन्ति नापि गन्धादयो ज्ञा-यन्ते। तदुभयाभावे च न श्रुत्यादिशब्दवाच्यज्ञानवि-शेषाः सम्भवन्ति ।

ननु यथा प्रकाश्यासन्निधावपि सवितुः प्रकाश-कत्वं नित्यम्, एवमिन्द्रियाभावेपि नित्यैव दृष्टिरिति चेत् ?, स्यादेवं यदि ज्ञानमात्रं दृष्ट्यादिशब्दानां वा-च्यं स्यात् न तु तथास्ति, लोकप्रसिद्ध्यभावात्, यथा-लोकं च शब्दार्थावधारणं, न यथेच्छम्, न हि लोके गन्धादन्यद् घ्राणं जिघ्रतीत्युच्यते, गन्धमपि यदा घ्राणादन्येनानुमानादिना जानाति तदा न जिघ्रती-त्युच्यते, तस्माद् घ्राणादीन्द्रियजन्यगन्धादिविषय-ज्ञानविशेषवाचिनो घ्रात्यादिशब्दाः, न च तेषां सु-षुप्तौ मुक्तौ वा सम्भवत्यऽपरिलोपः, तस्माद् घ्राणा-दिशक्तावेव प्ररोचनार्थं घ्राणाद्युपचारः, यथा "तेन छत्रं क्रियते" इति शक्तिवर्तमानत्वेन प्ररोचनार्थं "क्रियते" इति वर्तमानत्वोपचारः, तस्मात् " न ज्ञा-

---

मित्यर्थः । एतस्यैव स्वमतत्वं स्थापयितुमानन्दमोक्षवादिमतं दूषयति । नहीत्यादिना । कथं न सम्भवत्यत आह । नही-ति । इन्द्रियविषययोरभावे च दृष्ट्यादिशब्दवाच्यानां ज्ञान-

तुर्ज्ञातेर्विपरिलोपो विद्यते" इत्येतदपि शक्त्यभिप्रायमेव ।

यत्त्वादित्यप्रकाशकत्ववदिति, किं तस्य प्रकाशकत्वमभिप्रेतम् ? यदि तिमिरोत्सारणम् ?, तन्नित्यमस्त्येव सर्वदा ह्यसावऽव्यवहितेषु देशेषु तिमिरमुत्सादयत्येव, न त्वेवमात्मा सर्वदा शृणोति सुषुप्तावऽश्रवणात् । अथ ज्ञानजनकत्वमादित्यस्य प्रकाशकत्वम् ? । न तन्नित्यम्, तत्सामर्थ्यमेव तत्रापि नित्यम्, तस्माज्ज्ञानशक्त्यभिप्रायमिदं नित्यत्वाभिधानम् ।

एषा ह्यत्र वचनव्यक्तिः—यदेतत् सुषुप्तौ मुक्तौ वाऽऽत्मा न पश्यति पश्यन्नेव=द्रष्टुं शक्नुवन्नेव न पश्यति नहि द्रष्टुरात्मनो या दर्शनशक्तिस्तस्याः कदाचिदपि लोपो विद्यते, सा ह्यविनाशिनीति, न द्रष्टुर्द्वितीयमन्यद्दर्शनसाधनं चक्षुर्व्यापाररूपं दृश्यं वा तस्यामवस्थायामस्ति यतो दर्शनं स्यात, यद्यपि दृश्यं रूपादिकं स्वरूपतस्तस्यामवस्थायामस्ति तथापि दृश्यता=दर्शनयोग्यता तस्यामवस्थायां नास्तीति तेन रूपेणाऽभावाद् दृश्यं नास्तीत्युच्यते तस्मात्साधनान्तरवैकल्यात् तस्यामवस्थायां न पश्यति न शक्तिवैकल्यात, शक्तिस्तु न कदा चिदपि लुप्यते इति।

विशेषाणामसम्भवात् " नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत" इति यथाश्रुतमनुपपन्नं स्यात् अतो ज्ञानशक्त्यभिप्रायमेव व्याख्येयमिति भावः । उपपादितमर्थं निगमयति । तस्मादिति । ननु ज्ञानवाचकस्य दृष्टयादिशब्दस्य कथं शक्तिपरत्वमत आह ।एषा

एवमन्येषामपि वाक्यानां योजना । तथा ज्ञानशक्त्यऽपरिलोप एव ज्ञानाऽपरिलोप उच्यते, ज्ञातिशब्दश्चात्रानुमानादिज्ञानपरः चक्षुरादिज्ञानानां स्वशब्दैरुक्तत्वात् ।

एवम्-" विज्ञानं ब्रह्म " " विज्ञानघनः " इत्यादीनामपि शक्तिपरत्वं वेदितव्यम् । स्वयमेव श्रुत्या शक्तिपरत्वं व्याख्यातम्--" विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति " इति भूतेन्द्रियनाशादात्मापि प्रमाणागोचरत्वमापन्नो विनष्ट इव भवतीति । न तस्येतः प्रेतस्य=मुक्तस्य संज्ञास्तीति । एवं याज्ञवल्क्येनोक्ते मैत्रेयी चोदयति स्म-'अत्रैव भगवान् मा मोहितवान्-विज्ञानघन इति न चास्ति संज्ञेति विरुद्धाभिधानात्' इति । षष्ठाध्याये तु विनाशाविनाशविरोधश्चोदयिष्यत इति विवेकः । एवञ्चोदितो याज्ञवल्क्यः परिहारमाह-"न वा अरे अहं मोहम्=" परस्परविरुद्धं " ब्रवीमि " " अलं वा अरे इदं विज्ञानाय " अत्रात्मतत्त्वं सर्वास्वऽवस्थासु

हीति । वाक्यान्तरं योजयति । तथेति । "न ज्ञातुर्ज्ञातेर्विपरिलोपोविद्यत"इत्यस्याप्येवं योजनेत्यर्थः । नन्वस्तु नाम ज्ञात्यादिशब्दानां शक्तिपरत्वं विज्ञानं ब्रह्मेत्यादीनां तु कथमत आह । एवमिति । नन्वेवं श्रुतहान्यश्रुतकल्पनाप्रसङ्गोऽत आह । स्वयमिति । श्रुतिकृतव्याख्याने नायं दोष इति भावः । एतदेव दर्शयति । विज्ञानेत्यादिना । षष्ठाध्याय इति । उपनिषद एव षष्ठाध्याय इत्यर्थः । श्रुतिकृतं व्याख्यानमुपसंहर-

विज्ञानाय समर्थमित्यर्थस्तेन विज्ञानघनत्वाभिधानं सामर्थ्याभिप्रायमिति व्याख्यातं भवति, सम्भवति च शक्तस्यापि ज्ञानाभाव इति नास्ति विरोध इत्यभिप्रायः, अनया श्रुत्या सर्वविज्ञानश्रुतयः शक्त्यभिप्राया व्याख्याताः ।

यदि शक्तिरस्ति तस्यामवस्थायां ततः केन ज्ञानानुत्पत्तिः ?, ज्ञानसाधनानामिन्द्रियाणां ज्ञेयानां च विषयाणामभावात्, तदाह–“ यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत तत् केन कं पश्येत् ?” इत्यादि, तदेतत् प्रागेव व्याख्यानम् । एवमर्थान्तरज्ञाने साधनाभावान्निराकृते सति आत्मानमेव मुक्तावस्थायां जानात्वित्याशङ्क्याह–“ विज्ञातारमरे केन विजानीयात् ” इति, न ह्यात्मापि विना साधनेन ज्ञातुं शक्यते, मनसा खल्वसौ संसारावस्थायां ज्ञायते। न च मुक्तस्य मनस्सम्बन्धोऽस्ति। अतः 'केनात्मानं जानातु' इति व्यक्त एव मुक्तस्यात्मज्ञानाभावो ज्ञानशक्तिमात्रस्याऽवस्थानं श्रुत्या दर्शितम्, तस्मान्निःसम्बोधो निरानन्दश्च मोक्षः।

ननु नाऽऽत्मनोऽन्यद्विज्ञानमानन्दो वा, किं त्वात्मैव ज्ञानमानन्दश्च “ विज्ञानं ब्रह्म ” “ आनन्दं ब्रह्म' ' इति श्रुतेः, आत्मा च सुषुप्तितुरीययोरपि भव-

---

ति । तेनेति । चोदयति । यदीति । परिहरति । ज्ञानेति । एवमिति । अर्थान्तरज्ञाने निराकृते सतीतिसम्बन्धः । निगमयति । तस्मादिति । वेदान्तिमतेन समाधातुं शङ्कते । नन्विति ।

तीति कथं विज्ञानस्य चानन्दस्य चाभावः ? । नैतदेवम्—यद्धि वस्त्वन्तरप्रकाशजननस्वभावं वस्तु=यस्मिन् सति किमप्यर्थान्तरं प्रकाशत एव तल्लोके विज्ञानशब्देनोच्यते, न चात्मनि सति किं चिदन्यत् प्रकाशत एव विद्यमानेऽपि तस्मिन् सुषुप्त्यऽवस्थायामर्थान्तरस्य कस्य चिदप्यदर्शनात्, अतो न ज्ञानमात्मा ।

ननु प्रकाशजननस्वभावोपि सहकारिवैकल्यान्न जनयेत् ? । सत्यं न जनयति, यस्मिंस्तु सहकारिसंनिधाने तत्कृते वाऽन्यस्मिन्नाऽऽगन्तुके सति नियमेन प्रकाशत एवार्थान्तरं तज्ज्ञानशब्दवाच्यम् । तथा गीतिश्रवण—प्रियालिङ्गन—चन्द्रदर्शन—मधुरास्वाद—सुराभिघ्राणादिजन्यमाऽऽल्हादमाऽऽनन्दसुखशब्दावऽभिदधाते । न चैवंरूपत्वमात्मनोस्ति, यथा ह्यन्यसुखेषु सुखरूपं प्रत्याभिज्ञायते नैवमात्मनि प्रत्यभिजानीमोयेनाऽऽनन्दशब्दस्याभिधेयः स्यात् ? ।

यदि पुनर्यदेवात्मरूपं प्रतीयते तस्यैव ज्ञानमिति चानन्दमिति च संज्ञेत्युच्यते ? न सा लौकिकी नापि वैदिकी । यदि परं वृद्ध्यादिवत् परिभाष्येत ? तदस्तु यथाकामम् । यत्तु " विज्ञानं ब्रह्म " " आनन्दं ब्रह्म "

निराकरोति । तदिति । यस्मिंस्त्विति । यस्मिंस्तु सति प्रकाशते एवार्थान्तरं तत्तज्ज्ञानशब्दवाच्यं ज्ञायते ऽनेनेत्यर्थकरणात् । नचात्मनि सति किञ्चिदन्यत्प्रकाशते अतो न ज्ञानरूपत्वमात्मन इत्यर्थः । एवमानन्दरूपत्वमपि न सम्भवतीत्याह । तथेति । सामानाधिकरण्यानुपपत्याऽभेदमाशङ्क्य निराकरोति ।

इति च सामानाधिकरण्यं तदू धर्ममात्रवचनत्वेन धर्मधर्मिणोरभेदान्नीलोत्पलादिवदुपपन्नम् ।

नन्वानन्दादिशब्दा गुणमात्रनिष्ठा न नीलादिवद् गुणिनि वर्तन्ते ?, सत्यं, न बाहुल्येन वर्तन्ते कदाचित्तु गुणमात्रवचनानामपि गुणिनि प्रयोगो भवति यथा शीतो मधुरो रसः स्निग्धो गुरुश्चेति रसशब्दो द्रव्ये प्रयुज्यते, अन्यथा शीतादिशब्दसामानाधिकरण्याऽयोगात् । किं च " रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति " इति मत्वर्थीयनिर्देशादात्मानन्दयोर्भेदोऽवगम्यते । तथा " आनन्दं ब्रह्मणो विद्वान् " " स एको ब्रह्मण आनन्दः " इति षष्ठ्याऽऽनन्दाद् ब्रह्म व्यतिरिच्यते ।

किं च ' न मे सांप्रतं किञ्चिदपि सुखं दुःखमेव तु सर्वात्मना मम ' इति सुखाभावे दुःखानुभवे चानुसन्धीयमानस्यात्मनः कथमानन्दरूपता स्यात् ? । किं च स्वप्रकाशानन्दरूपमात्मानमभ्युपगच्छतामऽऽस्माकं चैतावदऽविवादम्–सुषुप्तितुल्या मुक्तिरिति, संसाराऽनुवृत्त्यऽननुवृत्तिमात्रं भिद्यते अन्यत्सर्वं तुल्यम्, तथा च श्रुतिरपि–"ता एताः प्रजा अहरहर्ब्रह्मलोकं यन्ति अहरहरागच्छन्ति " इति सुषुप्तिं ब्रह्मलोकशब्देन वदन्ती तुल्यत्वमेतयोर्दर्शयति, सुषुप्तिश्चास्माकमपि गोचरो न च तत्रानन्दानुभवोऽस्तीति व्यक्तमेतत्, तस्मान्निरानन्दो मोक्षः, दुःखपरिलोपाच्च·

यत्त्विति । दृष्टान्तवैषम्यं शङ्कते । नन्विति । इतश्च भेद इत्याह । किञ्चेति । युक्त्यन्तरमाह । किञ्चेति । अस्तुनाम सुषुप्तितुल्यता

पुरुषार्थत्वम् ।

सुखलोपादऽपुरुषार्थत्वमपीति चेत् ?,
नैवमल्पं हि संसारे सुखं तदपि सूरयः ।
बहुप्रयाससाध्यत्वाद् दुःखमेवानुजानते ॥ २६ ॥
जन्ममृत्युजराव्याधिदुःखान्यनुदिनं नृणाम् ।
स्वयमेव विना यत्नान्निपतन्ति सहस्रशः ॥ २७ ॥
विहिताऽकरणान्नित्यं प्रतिषिद्धनिषेवणात् ।
महदामुष्मिकं दुःखं यन्नरैर्नैव गम्यते ॥ २८ ॥
बहुदुःखपरिष्वक्तं यन्नाम स्वल्पकं सुखम् ।
सुरापानादिसुखवद्वर्जनीयं विवेकिनाम् ॥ २९ ॥
एवम्भूतेऽपि संसारे ये रक्ताः सुखतृष्णया ।
न तेषामधिकारोस्ति मुक्तिशास्त्रे कथं चन ॥३०॥
संसारादुद्विजन्ते ये दृष्टलोकपरावराः ।
त एव खलु मुच्यन्ते न तु यः प्राकृतो जनः ॥३१॥
तेषामेवापवर्गाख्यः पुरुषार्थो महात्मनाम् ।
तेषामेवाधिकारश्च मुक्तिशास्त्रे मनीषिणाम् ॥३२॥
तेनाऽभावात्मकत्वेपि मुक्तेर्नाऽपुरुषार्थता ।
सुखदुःखोपभोगो हि संसार इति शब्द्यते ॥३३॥
तयोरनुपभोगं तु मोक्षं मोक्षविदो विदुः ।
श्रुतिरप्येतमेवाह भेदं संसारमोक्षयोः ॥ ३४ ॥
न ह वै सशरीरस्य प्रियाऽप्रियविहीनता ।
अशरीरं वाव सन्तं स्पृशतो न प्रियाऽप्रिये ॥३५॥
आनन्दात्मकमात्मानं ये वदन्ति स्वयंप्रभम् ।
तन्मतेपि च संसारान्मुक्तेरेतावती भिदा ॥३६॥

ततः किमत आह । नचेति । एतावतीति । संसारे सुखदुःख-

आत्मा ह्यानन्दरूपोसौ संसारेपि प्रकाशते ।
तावानेव स मोक्षेपि नाधिक्यं तस्य किञ्चन॥३७॥
अथ संसारवेलायामानन्दो न प्रकाशते ? ।
न ह्यऽप्रकाशनं युक्तं स्वप्रकाशस्य वस्तुनः ॥३८॥
यद्यसौ न प्रकाशेत किं तर्ह्यन्यत् प्रकाशते ? ।
आत्मस्वरूपमिति चेत्? ननु चानन्द एव तत्॥३९॥
तच्चेत् प्रकाशते नूनमानन्दोपि प्रकाशते ।
तेन शब्दादिविषयजन्ययोः सुखदुःखयोः–॥४०॥
निवृत्तिरेव संसारादपवर्ग इतीर्यते ॥.
ततश्च सुखलोपेन मुक्तेरऽपुरुषार्थता–॥ ४१ ॥
यद्यस्माकं भवेत्तर्हि तुल्यैषा भवतामपि ॥,
सुखहानिमतस्तस्य भूयोदुःखविवर्जनात्–॥ ४२ ॥
मोक्षस्य पुरुषार्थत्वमावयोरुभयोः समम् ॥,
सुखदुःखविहीनोऽतो मुक्तः स्वस्थोऽवतिष्ठते॥४३॥

किमिदं स्वस्थ इति ? । येऽस्यागमापायिनो धर्मा बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारास्तानऽपहाय यदस्य स्वं नैजं रूपं ज्ञानशक्तिसत्ताद्रव्यत्वादि तस्मिन्नवतिष्ठते इत्यर्थः । यदि तु संसारावस्थायामविद्यमानोप्यानन्दो मुक्तावस्थायां जन्यत

संस्पर्शः मोक्षेतु तदभाव इति । एवमनङ्गीकारे दोषमाह । आत्मा हीति । तस्मादेतदेव निष्कृष्टं मोक्षस्य रूपं वक्तव्यमित्याह । तेनेति । किमतो यद्येवमत आह । ततश्चेति । अथ सुखहानिमतोऽपि मोक्षस्य दुःखनिवृत्त्यैव पुरुषार्थत्वं तदस्माकमपि तुल्यमित्याह । तस्येति । उत्तरमाह । ये हीति । ये धर्मा बुद्ध्याः

इत्युच्यते ततो जनिमत्त्वादऽनित्यो मोक्षः स्यात् । केन चासावनुभाव्यः ? न हि स्वप्रकाशत्वं कस्य चित्सम्भवतीत्युक्तम् । न च मनसाऽनुभवः सम्भवति मुक्तस्य मनसोऽभावात् अमनस्कत्वश्रुतेरित्युक्तम् । अत एव 'नित्योप्यानन्दः संसारदशायामभिभूतत्वादननुभूतोपि मुक्तावऽभिभवे निवृत्ते मनसाऽनुभूयते' इत्येतदपि निरस्तम् ।

किं च सुखाविशिष्टात्मानुभवः पुरुषार्थो न सुखमात्रानुभवः, न च मुक्तावात्मानुभवः सम्भवति "विज्ञातारमरे केन विजानीयात्" इति कण्ठेनैव श्रुत्या निषिद्धत्वात्, "अलं वा अरे इदं विज्ञानाय" इति च श्रुत्या विज्ञानशब्दस्य शक्तिपरत्वं व्याचक्षाणया मुक्तौ शक्तिमात्रमवतिष्ठते न ज्ञानमिति व्यक्तमेवोक्तमिति श्रुतिविरुद्धं मुक्तस्य विज्ञानमशक्यमभ्युपगन्तुम्, न ह्यस्याः श्रुतेः प्रियाप्रियाऽस्पर्शश्रुतेश्च तत्त्वकथनं मुक्त्वा कथं चिदन्यपरत्वं सम्भवति । विज्ञानश्रुतयस्तु शक्तावेव विज्ञानोपचारं कुर्वन्ति प्ररोचनार्थतयेत्युपपन्नम् । एवमानन्दश्रुतयोपि पुरुषार्थत्वसामान्यात् सुखत्वोपचारेण प्ररोचनार्थ-

---

दिसंस्कारान्ताः तत्परित्यागेन स्वास्मिन्नवस्थानमित्यर्थः । इतोप्येवमित्याह । किञ्चेति । नन्वलंविज्ञानायेति ज्ञानसद्भावप्रतीतेर्न ज्ञानमवतिष्ठत इत्यनुपपन्नं तत्राह । न हीति । तत्कथनं ज्ञानाऽभावकथनम् । पुरुषार्थत्वसामान्यादिति । सुखदुःखाभावयोः पुरुषार्थत्वं समानमतो दुःखाऽभावे सुखत्वमुपचर्यते

तया प्रवृत्ताः । उक्तं चैतत्—'वचनयोर्विरोधेऽन्यतो निर्णयः' इति। विरोधश्चात्रानन्दप्रियाऽभाववचनयोः।

न चाऽभाववचनं वैषयिकाभिप्रायम् इतरत्तु स्वाभाविकाभिप्रायमिति शक्यं वक्तुम्, उभयत्रापि सामान्योपादानात् अत्यन्तसमानविषयत्वात्। अतः प्रमाणन्तरवशादाऽऽनन्दवचनं दुःखाभावपरम् इतरत्तु यथाश्रुतमिति न्याय्यम्। तस्मात् सुखदुःखादिसमस्तवैशेषिकात्मगुणोच्छेदो मोक्षः । सुखदुःखोच्छेदश्च धर्माऽधर्मयोरुच्छेदात् । धर्माधर्मयोरुच्छेदश्चोत्पन्नानां धर्माधर्माणामुपभोगेन नित्यनैमित्तिककर्मानुष्ठानेनात्मज्ञानेन च विरोधात्, उत्पाद्यानां च काम्यानुष्ठाननिमित्तानां धर्माणां तदऽननुष्ठानेनाऽनुत्पादात् विहिताकरण—प्रतिषिद्धानुष्ठाननिमित्तानां चाऽधर्माणां विहितानुष्ठानेन प्रतिषिद्धाऽकरणेन च परिहारात् असति शरीरारम्भे पूर्वशरीरनिपाते चाऽशरीरोऽवस्थितो मुक्तो भवति।

नन्वात्मज्ञानं क्रत्वर्थम्?, सत्यं, पुरुषार्थमपि तत

इत्यर्थः। वाक्यान्तरविरोधे सत्येवमेव कल्पयितुं युक्तमिति वृद्धसंमत्या द्रढयति । उक्तमिति । बहुकृत्वोऽपि पथ्यं वदितव्यमिति न्यायेनोक्तमेवार्थं पुनराह । तस्मादिति । उत्पाद्यानां, धर्माणामित्यग्रिमेण सम्बन्धः । एतदर्थसंवादकं वार्त्तिकमस्माभिः पूर्वमेव लिखितम् । तदत्रानुसन्धेयम्। यदुक्तमात्मज्ञानेन विरोधादिति । तत्राशङ्कते । नन्विति । पुरुषार्थत्वे हि निःश्रेयसफलतया विरोधः स्यादितिभावः । क्रत्वर्थत्वे ताव-

संयोगभेदात् । यत्तावत्–" अविनाशी वा अरेऽय-मात्मा " इत्यादिना शरीराद्यतिरिक्तनित्यात्मस्व-रूपसद्भावज्ञानं तत्पारलौकिकफलकर्मानुष्ठानौपयि-कत्वात् कर्मज्ञानवदेव सामर्थ्यतः क्रतुसंयोगात् क्रत्वर्थम् । यथा हि ज्योतिष्टोमादिवाक्याध्ययनं दृष्टे-नैवानुष्ठानौपयिकं ज्ञानं जनयतीति तदर्थतयैवाध्य-यनविधिना विधीयते तथा " अविनाशी वा अरे-ऽयमात्मा " इत्यादिवाक्यानामप्यध्ययनविधिरेव क-र्मानुष्ठानोपयोग्याऽऽत्मज्ञानार्थतां विधत्ते, तद् यदि प्रमाणान्तरेणात्मनः शरीरादिविवेको नैकान्ततः सि-ध्यति ततो दृढविवेकप्रतिपादकानामुपनिषद्वाक्यानां विस्पष्टमेव फलम्, यथोक्तम्–

"इत्याह नास्तिक्यनिराकरिष्णु-
रात्मास्तितां भाष्यकृदत्रयुक्त्या ।

त्संयोगं दर्शयति । यत्तावदित्यादिना तस्मादेतज्ज्ञानं दृष्टो-पयोगित्वात्क्रत्वर्थमित्यन्तेन । यानि पुनरित्यादिना विवेक इत्यन्तेन पुरुषार्थत्वप्रदर्शनम् । कर्मज्ञानवदितिदृष्टान्तार्थं विवृ-णोति । यथाहीति । दार्ष्टान्तिके योजयति । तथेति । नन्वनु-मानादिनाप्यात्मज्ञानं सिद्ध्यति किमनेनेत्यत आह । तद्यदी-ति । अहं स्थूलोऽहं गच्छामीत्यादिशरीर एवाहंमानदर्शनात् प्रमाणान्तरप्रप्रतिपादितोप्यात्मनः शरीरादिविवको न दृढरूपेण हृदयेऽवतिष्ठत इति भावः । अत्र वार्त्तिककृत्संमतिं दर्शयति । यथोक्तमिति । नित्यात्मसत्तामात्रेणैव वेदप्रामाण्यसिद्धेस्तन्मा-त्रमिह भाष्यकारेण प्रतिपादितं दार्ढ्यार्थर्थिभिस्तु वेदान्तनिर्हि-

दृढत्वमेतद्विषयः प्रबोधः
प्रयाति वेदान्तनिषेवणेन"(१४८ श्लो.वा.आ.)इति।

अथ त्वन्यतोपि सिध्यति ?, ततो यथैवान्यथापि क्रतुज्ञानसम्भवेऽध्ययनोपात्तवेदवाक्यावगतकर्मरूपाणामेव पुंसां कर्मस्वाधिकारः तथैवाध्ययनोपात्तोपनिषद्वाक्यावगतात्मतत्त्वानामेवाऽधिकार इत्यध्ययनविधिबलादेव कल्प्यते।

यत्त्वात्मसद्भावप्रतिपादनोपक्रमे विधिसरूपं वाक्यम्—"आत्मा वा अरे द्रष्टव्यः" इत्यादि तद्वक्ष्यमाणस्यार्थस्यातिगहनत्वान्महोपयोगत्वाच्च 'कथं हि नामालस्यं हित्वा श्रद्धाविशेषेण वक्ष्यमाणमर्थं प्रतिपद्येत' इत्येतावन्मात्रार्थम्। तस्मादेतज्ज्ञानं दृष्टोपयोगित्वात् क्रत्वर्थम्।

यानि पुनरितिकर्तव्यताविशेषयुक्तान्युपासनातेष्वेव श्रवणमननिदिध्यासनादिषु यतितव्यमितिश्लोकतात्पर्यार्थः। एतेन भाष्यकारस्याप्ययमेवाशयोलक्ष्यते अत्र नित्यत्वमात्रप्रतिपादकवेदान्तवाक्योदाहरणात्। अकर्तृभोक्त्रात्मप्रतिपादकवाक्यानुदाहरणाच्च। तदुदाहरणे हि कर्मशरणानां कर्मणि शैथिल्यापत्तेरिति। नन्वात्मज्ञानं स्वतन्त्रमेव निश्रेयससाधनत्वेन विहितं कथं तस्य क्रत्वर्थत्वमत आह। यत्विति। उक्तं च—

"आत्मा ज्ञातव्य इत्येतन्मोक्षार्थं न च चोदितम्।
कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्य लक्ष्यते" (१०३ श्लो. वा.सं.)

विवेकज्ञानस्य पारलौकिकफलेषु ज्योतिष्टोमादिषु प्रवृत्तिर्दृष्टमेव प्रयोजनमित्यर्थः। पुरुषार्थरूपमात्मज्ञानमुदाहरति। या-

त्मकानि विधीयन्ते तेषां क्रतौ दृष्टोपयोगाभावाद-ऽदृष्टफलत्वम् । अदृष्टं च फलं वाक्यशेषाद् द्विविधम्–अभ्युदयरूपं निःश्रेयसरूपं च, " सर्वान् कामानाप्नोति " " सोऽश्नुते सर्वान् कामान् " इत्याद्यभ्युदयफलम् । " न स पुनरावर्तते " इत्यादि निःश्रेयसफलमिति विवेकः ।

यत्तु " विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवाऽनुविनश्यति न प्रेत्य सञ्ज्ञास्ति " इत्यनेन ब्राह्मणेन भूतचैतन्यमुक्तमित्याशङ्क्यते तत् स्वयमेवब्राह्मणेनात्रैव '·मा ·भगवान् मोहान्तं प्रापितवान् पूर्वमऽजरामृतत्वमभिधायाधुना विनाशित्याभिधानात् ' इति पूर्वपक्षं चोद्याख्यमुक्त्वा सिद्धान्तपरिहार उक्तः– "अविनाशी वा अरे ऽयमात्मा अनुच्छित्तिधर्मा" इत्युक्त्वा, कथं तर्हि विनाशवचनमित्याशङ्क्य " मात्रासंसर्गस्त्वस्य भवति " इत्युक्तम्, मात्राशब्देन भूतेन्द्रियाणि धर्माधर्मौ च विकारशब्दवाच्या उच्यन्ते ।

नि पुनरिति । उपासनात्मकस्य तु ज्ञानस्य कर्मणि पुरुषे वा दृष्टप्रयोजनाऽभावात् अदृष्टापेक्षायां श्रुत्याद्यभावेन च क्रत्वर्थत्वाऽसम्भवात् वाक्यशेषोपनीताऽभ्युदयनिःश्रेयसफलतया पुरुषार्थत्वमेवेति समस्तार्थः ।

युक्तिभिः श्रुतिभिश्चात्मनित्यत्वे प्रतिपादिते ।
वाक्यान्तरोत्थितभ्रान्तेः शङ्केदानीं निरस्यते ॥

यत्त्विति । तत्स्वयमेव ब्राह्मणेन परिहार उक्त इति सम्बन्धः । उक्तश्च—

एतदुक्तं भवति—विज्ञानघनशब्देन ज्ञानशक्तिस्वभावस्यात्मनोऽभिधानं स ह्येतेभ्यो भूतेभ्यः समुत्थाय=मुक्तो भूत्वा तान्येवानुविनश्यति=भूतविनाशात् सोपि विनष्ट इव भवतीति, भूतस्थो ह्यसौ स्वयं प्रत्यक्षेण गृह्यते परैश्च शरीरचेष्टालिङ्गकेनानुमानेन, मुक्तस्तु प्रमाणपथातिवर्तनाद्विनष्ट इव भवतीति विनश्यतीत्युच्यते, तदनेन प्रकारेण मात्राणामेव विनाश इत्युच्यते नाऽऽत्मन इत्यविरोधः। तदुक्तम्—

"अविनाशी स्वरूपेण पुरुषः, या तु नाशिता।
मात्राणां साधिकाराणां, भूतादीनामसंज्ञिता"
(श्लो. १४७ वा. आ.)

इति।

किमिदम्—" भूतादीनामसंज्ञिता " इति ?। यदि तावत् " न प्रेत्य संज्ञास्ति " इत्यस्य व्याख्यानम् ?, तदयुक्तम्—न हि " न प्रेत्य संज्ञास्ति " इत्यनेन भूता-

---

"सदसन्नाश्यनाश्यात्मपरकीर्तनमूढया।
चोदितः पूर्वपक्षोयमितिसिद्धान्तमब्रवीत् " (१४६ श्लो. वा. आ.)

उक्तमेवार्थं स्पष्टयति। एतदिति। अत्रैव सिद्धान्तश्रुतिव्याख्यानपरवार्तिकमुदाहरति। तदुक्तमिति। अत्र पादत्रयेणैव सिद्धान्तश्रुतिव्याख्यानोपपत्तेश्चतुर्थपादानर्थक्यम्। तटस्थः शङ्कते। किमिति। प्रकरणार्थोपसंहारपरत्वमजानानस्य समाधानमाशङ्क्य निराकरोति। यदीति। स्वयं समाधत्ते। सत्यमिति।

दीनामसंज्ञित्वमुच्यते । किं तर्हि ? आत्मन एव मुक्तस्य संज्ञाऽभावोऽनेनोच्यते तस्यैवोपायाभावेन "तत्केन कं" इत्यन्तेन विज्ञानाभावोपपादनात् ? । सत्यं नेदमस्य व्याख्यानं प्रकरणार्थोपसंहारस्त्वयम्—यत एवं पूर्वोक्तेन न्यायेन भूतचैतन्यं न सम्भवति ब्राह्मणेनापि तथैवोक्तं तस्माद् भूतेन्द्रियाणामसंज्ञित्वमचैतन्यम्, अन्यस्तु तेभ्यो नित्यश्चेतनः, तस्य स्वर्गगमनसम्भवान्न " स्वर्गं लोकं याति " इत्यस्य प्रत्यक्षविरोधः ॥ ५ ॥

(इति पञ्चमाधिकरणं समाप्तम् ।)

स्वर्गं लोकं यातीत्यस्य न प्रत्यक्षविरोधइति सम्बन्धः । अत्र हेतुः नित्यस्य स्वर्गगमनसम्भवादिति । नन्वस्तु नाम नित्यत्वमात्मनस्तथापि मयैव कर्मकाले कृतस्यामुष्य कर्मणः फलमिदं मया भुज्यत इति अपरामृशतः कर्मण्यनुरागाऽभावात् नानुष्ठानं स्यात् । तथा स्वोपयोगे परोपयोगे वा न कश्चिद्विशेषः स्यात् योह्यस्य कर्मणः फलसाधनत्वं फलकालेऽनुसन्धास्यामीति निरूपयति स कर्मानुतिष्ठति नान्यः । एवं निषिद्धमपि न वर्जयेत् ततश्चानित्यपक्षवन्नित्यत्वपक्षेऽप्यात्मनः कृतनाशाऽकृतागमौ फलत इति । यथाहुः—

"नित्यः कर्तृत्वभोक्तृत्वे प्रतिपन्नोऽपि सन् यदा ।
न कर्मफलसम्बन्धं फलकाले च बुध्यते ॥ ८ ॥
मया यद्यत्कृतं कर्म तस्येदं भुज्यते फलम् ।
शुभाशुभं मयैवेति तदा कोऽस्य रसो भवेत् ॥ ९ ॥

अपरामृश्यमाने हि स्वकर्मप्रत्यये फले ।
न विशेषो भवेत् कश्चित्स्वपरात्मोपभोगयोः ॥ १० ॥
कुर्वन्नप्यशुभं कर्म तेनैवं चिन्तयेन्नरः ।
न स्मरिष्यामि भोगेऽहमिति नैतत् विवर्जयेत् ॥ ११ ॥
तत्र नित्यत्वपक्षेऽपि कृतनाशाऽकृतागमौ ।
फलतस्तुल्यरूपौ चेद्वृथा तत्प्रतिपादनम्" ॥१२॥ (श्लो. वा. आ.)

नैष दोषः । भोगकालीनस्मृतेः कर्मणि प्रवृत्तौ निवृत्तौ वा न कश्चिदुपयोगः, भोगस्य प्रवृत्त्युत्तरकालीनत्वात् । यस्तु प्रवृत्त्यङ्गभूतः शास्त्रतः फलसाधनत्वपरामर्शः स प्रवृत्तेः पूर्वमस्त्येव । भोगकालेऽपि विदुषामस्त्येव परामर्शः । अविदुषां तु तदभावेऽपि न दोषः । यथाहुः—

"नैष दोषो न भोगे हि स्मृतिर्न उपयुज्यते ।
न प्रवृत्ति र्निवृत्तिर्वा भोगकाले स्मृतेर्भवेत् ॥ १३ ॥
तदङ्गं यः परामर्शस्तदस्तित्त्वं च मृग्यते ।
प्राक् प्रवृत्तेश्च सोऽस्त्येव विदुषां शास्त्रतः स्फुटः ॥ १४ ॥
भोगकालेऽपि शास्त्रज्ञा विमृशन्त्येव केचन ।
तेषामेवाधिकारश्च माभूदविदुषां हि सः" (श्लो. वा. आ. १५) इति ।

इत्यात्मवादः ।

(इति पञ्चमाधिकरणं समाप्तम् ॥ ५ ॥

(षष्ठं शब्दनित्यताधिकरणम्)

कर्मैके तत्र दर्शनात् ॥ ६* ॥

*पूर्वाधिकरणे शब्दार्थयोः सम्बन्धो नित्य इत्युक्तं तच्च शब्दनित्यत्वाधीनमिति तत्सिषाधयिषुः प्रथमं शब्दाऽनित्यत्ववादिमतं पूर्वपक्षयति । सू० कर्मैके तत्र दर्शनात् ॥६॥ एके-नैयायिकाः कर्म-अनित्यं शब्दं वदन्ति तत्र शब्दविषयकप्रयत्नदर्शनात् यद्विषयः प्रयत्नः सोऽनित्य इति व्याप्तेः ॥ ६ ॥ सू०अस्थानात् ॥ ७ ॥ किं च अस्थानात्-अस्थिरत्वात् क्षणादूर्ध्वमनुपलब्धेरिति भावः ॥७॥ सू० करोतिशब्दात् ॥ ८ ॥ किं च यथा घटं करोतीति तथा शब्दं करोतीति अनित्यव्यवहारात् ॥ ८ ॥ इतोऽप्यनित्य इत्याह-सू० सत्वान्तरे यौगपद्यात् ॥ ९ ॥ देशान्तर इत्यपि पूरणीयम् । तथाच देशान्तरे अन्यदेशस्थे सत्वान्तरे प्राण्यन्तरप्रत्यक्षे यौगपद्य-मेककालिकत्वं दृष्टम् अयंभावः यथा लाघवान्नित्यत्वं तथा तेनैव हेतुना शब्दे एकत्वमपि सेत्स्यति । इत्थञ्च एकस्य वस्तुनः अपकृष्टपरिमाणस्य सन्निकृष्टविप्रकृष्टपुरुषप्रत्यक्षं युगपद् भवति इदमेकत्वे नित्यत्वेऽनुपपन्नमतोऽनित्यः शब्दो नानाचेति ॥ ९ ॥ सू० प्रकृतिविकृत्योश्च ॥ १० ॥ दध्यत्रेति दधि अत्रेति प्रकृतिस्थितौ प्रकृतिभूतेकारस्थाने यकाररूपोविकारोभवति यस्याः प्रकृतेः विकारः सोऽनित्य इति व्याप्तिरिति भावः ॥ १० ॥ सू० वृद्धिश्च कर्तृभूम्नाऽस्य ॥ ११ ॥ कर्तृभूम्ना-कर्तृबाहुल्येनास्य-शब्दस्य वृद्धिः-महत्त्वं दृश्यते अतोऽप्यनित्यः । पुरुषप्रयत्नस्य शब्दव्यञ्जकत्वपक्षे व्यञ्जकसहस्रेणापि व्यङ्ग्यस्य वृद्धिर्न दृश्यते यथा दीपसहस्रेणापि घटस्य, अतो व्यञ्जकत्वपक्षोऽयुक्त इति भावः ॥ ११ ॥

सू० समन्तु तत्र दर्शनम् ॥ १२ ॥ एवं व्यञ्जकत्वे बहूनि दूषणान्युक्तानि क्रमेण परिहर्तुं प्रक्रमते सममिति । मतद्वय इति क्षणमिति च पदद्वयं पूरणीयम् । मतद्वये क्षणं क्षणमात्रं दर्शनं शब्दप्रत्यक्षं सममविवादम ॥ १२ ॥ सू० सतः परमदर्शनं विषयाऽनागमात् ॥ १३ ॥ सतः सर्वदा विद्यमानस्य परं पूर्वोत्तरकालेऽदर्शनं प्रत्यक्षाभावः संस्कर्तुः व्यञ्जकस्य विषयं शब्दं प्रत्यनागमात् । अयं भावः स एवायं गकार इति प्रत्यभिज्ञानाद्

लाघवाच्च शब्दो नित्यः मुखोद्भूतवायुसंयोगविभागाः शब्दप्रत्यक्षप्रातिबन्धकीभूतं स्तिमितवायुं दूरीकुर्वन्तीति ततः प्रत्यक्षमिति अस्थानादित्यस्योत्तरम् ॥ १३ ॥ सू० प्रयोगस्य परम् ॥ १४ ॥ करोतिशब्दादित्यस्योत्तरमाह–शब्दं करोतीत्यत्र करोतिपदं प्रयोगस्य उच्चारणस्य परं तत्तात्पर्यकम् ॥ १४ ॥ सू० आदित्यवद्यौगपद्यम् ॥ १५ ॥ सत्वान्तरे यौगपद्यादित्यस्योत्तरमाह–आदित्यवदिति। यथा एकः सूर्यः नानादेशस्थैर्युगपदीक्ष्यते तथा आदित्यवद् महान् शब्दो न सूक्ष्म इति भावः ॥१५॥ सू० शब्दान्तरमविकारः॥१६॥प्रकृतिविकृत्योश्चेत्यस्योत्तरमाह–शब्दान्तरमिति। इकारस्थाने यकारः शब्दान्तरमन्यः शब्दः न इकारस्य विकारः तृणानां कट इव, तथासति कटकर्त्ता नियमेन तृणसम्पादनवत् यकारं प्रयुञ्जानो नियमेन इकारमाद्द्यात् इति भावः ॥ १६ ॥ सू० नादवृद्धिपरा ॥ १७ ॥ वृद्धिश्चेत्यस्योत्तरमाह–नादेति, परा अतिशायिता शब्दवृद्धिरिति भ्रमविषया नादवृद्धिः बहुभिर्भेरीमाघ्नद्भिर्वर्णात्मकशब्दमुच्चारयद्भिर्वा महान् शब्द इत्युपलभ्यते तत्र परमतं प्रतिपुरुषं शब्दावयवा उत्पन्नाः सन्तः ते महत्वच्छब्दे महत्त्वं सम्पादयन्तीति वक्तुमशक्यं परमते शब्दस्य गुणत्वेन निरवयवत्वादतोऽगत्या कर्णशष्कुलीमण्डलस्य सर्वां सरणिं व्याप्नुवद्भिः संयोगविभागैः नैरन्तर्येण असकृद्ग्रहणात् महानिवावयववानिव च प्रतीयते। संयोगविभागा नादपदवाच्यास्तेषामेव वृद्धिरिति भावः ॥ १७ ॥

सू० सि० नित्यस्तु स्याद्दर्शनस्य परार्थत्वात् ॥ १८ ॥ एवं परप्रापितदूषणान्युद्धृत्य स्वमते साधकं वक्तुं प्रक्रमते। नित्य इति। शब्दः नित्यः स्याद् दृश्यते व्यज्यते शब्दोऽनेनेति दर्शनमुच्चारणं तस्य परार्थत्वात् अन्यस्यार्थस्य प्रतिपत्त्यर्थत्वात्। अनित्यत्वे श्रोतुरर्थप्रतिपत्तिपर्यन्तं न तिष्ठतीति प्रतिपत्तिर्नस्यात् कारणाभावादिति भावः। १८ ॥ सू० सर्वत्र यौगपद्यात् ॥ १९ ॥ किञ्च सर्वत्र गोशब्दमात्रे यौगपद्यात् अबाधितप्रत्यभिज्ञाया युगपदुत्पत्तेः सएवायं गकार इति युगपदनेकेषां भवति नह्यनेके युगपद्भ्रान्ता अभवन्निति भावः ॥ १९ ॥ सू० सङ्ख्याभावात् ॥ २० ॥ दशकृत्वः गोशब्दोच्चारे दशवारमुच्चारितो गोशब्द इत्येव वदति नच दश गोशब्दा उच्चारिता इति।

शब्दस्यार्थप्रत्यायकत्वं स्वाभाविकमिति यदुक्तं तदाक्षिप्यते-शब्दस्यानित्यत्वात्, न ह्यऽभिनवस्य शब्दस्य वृद्धव्यवहारपरम्परया स्वाभाविकं प्रत्यायकत्वं शक्यते ग्रहीतुम्, अगृहीतमपि चेत् स्वभाव-

---

नन्वौत्पत्तिकसूत्रोपक्षिप्तशब्दार्थसम्बन्धनित्यत्वेन वेदप्रामाण्यसिद्धेरसङ्गतः शब्दाधिकरणारम्भः निष्प्रयोजनश्चायं विचारः असत्यपि नित्यत्वे वेदप्रामाण्यसिद्धेः अनित्यादपि शब्दादनिनित्यत्ववादिनामिवार्थप्रतीतिसंभवात् । शब्दव्यवहारानादितया च पुरुषानुप्रवेशाऽभावात् अनित्यत्वे संबन्धनित्यत्वं न सिद्ध्यतीति चेत् ? मा सैत्सीत् आनित्यत्वेऽपि तस्मिन्पुरुषस्वातन्त्र्याऽभावादेव प्रामाण्यसिद्धेरव्याहतत्वादित्याशङ्क्य सङ्गतिं तावत्करोति । शब्दस्येति । कथमनित्यत्वे प्रत्यायकत्वहानिरत आह । नहीति । नहि क्षणिकस्य सम्बन्धग्रहणं सम्भवति तद-

---

अतोपि शब्दः नित्य इत्याह सङ्ख्येति । शब्दे सङ्ख्याभावात् । स्पष्टम् ॥२०॥ सू० अनपेक्षत्वात् ॥ २१ ॥ इतोपि नित्य इत्याह अनपेक्षत्वादिति । अनपेक्षत्वात् शब्दनाशकारणस्य पामरादिसाधारण्येन ज्ञानाभावात् यथा घटपटादिदर्शनमात्रे असमवायिकारणादिनाशान्नाश इति निश्चिनोति तथा पामराणां शब्दे नाशकारणनिश्चयाभावान्नित्य इति भावः ॥ २१ ॥ सू० प्रख्याभावाच्च योग्यस्य ॥ २२ ॥ ननु शब्दो वायुपरमाणुप्रकृतिकः तदीयसंयोगैरुत्पन्नत्वात् तथा च शिक्षा "वायुरापद्यते शब्दता"मिति । वायुपरमाणुप्रकृतिकत्वादनित्य इत्याशङ्कायामाह प्रख्येति । योग्यस्य श्रोत्रेन्द्रियजन्यप्रत्यक्षविषयस्य शब्दस्य प्रख्याभावात् वायुविकारस्य श्रोत्रेन्द्रियाग्राह्यत्वादिति भावः ॥ १२ ॥ सू० लिङ्गदर्शनाच्च ॥ २३ ॥ "वाचाविरूपनित्यये"ति मन्त्रे नित्यया वाचेति लिङ्गम् ॥ २३ ॥ इति सुबोधिनी ।

अत्र षष्ठं शब्दनित्यत्वाधिकरणं सम्पूर्णम् । अत्र १८ सूत्राणि । आदितः २३ सूत्राणि ।

तश्चक्षुरादिवत् प्रत्याययेत्? प्रथमश्रवणेऽपि प्रत्याययेत्, तस्मादऽनित्यत्वे शब्दस्य देवदत्तादिशब्दवत् पुरुषकृतमेव प्रत्यायकत्वमापद्यते।

कथं पुनरनित्यत्वं शब्दस्य?, प्रयत्नाऽनभिव्यङ्ग्यत्वे सति तदनन्तरमुपलब्धेर्घटादिवत् तज्जन्यत्वमध्यवसीयते. अन्यथा किमिति तदनन्तरमेवोपलभ्यते न पूर्वम्, उपलब्धस्य च द्रागेव तिरोभावाद्विना-

---

नपेक्षायां च नेत्रादिवत्प्रथमश्रवणेऽपि प्रत्याययेत् अतः शब्दस्यार्थप्रत्यायकत्वाऽसंभवात् निर्निमित्तैव वेदादर्थप्रतीतिः स्यादितिभावः। कथं तर्हि लोके शब्दादर्थप्रतीतिः। निर्मूलैरपि विज्ञानैर्दृष्टार्थेषु गतिसंभवादिति ब्रूमः। शब्दैकसमधिगम्ये धर्मे तदनुपपत्तेः व्यवहारानादित्वेनोपपत्तिरिति चेत्। न। शब्दस्यानित्यत्वे तदनुपपत्तेः। तदिहाधिकरणे पदात्मकः शब्द उदाहरणं स किमनित्यः किंवा नित्य इति सन्देहे पूर्वपक्षेऽनित्यत्वं प्रश्नपूर्वकमुपपादयति। कथमिति। नन्वभिव्यक्तावपि प्रयत्नानन्तर्योपपत्तेर्नैकान्ततोऽनित्यत्वसिद्धिरित्याशङ्कानिराकरणाय सत्यन्तम्। अयं च सूत्रार्थः कर्म जन्यत्वमेके—नैयायिकादयः शब्दस्य मन्यन्ते, कुतः तत्र दर्शनात्। तस्मिन्कर्मणि सति शब्ददर्शनात् अतः कृतकत्वादनित्यः शब्द इत्यवगच्छामः। एतत्सूचितमनुमानं तूक्तमेव। अभिव्यक्त्यैवान्यथासिद्धिरिति चेन्न। अभिव्यक्तेः प्राक् शब्दसद्भावे प्रमाणाऽभावात्।अस्थानादित्यनेन सूचितं हेत्वन्तरमाह। उपलब्धस्येति। उच्चारणानन्तरं मुहूर्तमप्यवस्थानाऽभावाद्विनष्टः शब्द इत्यवसीयत इत्यर्थः। किञ्च शब्दं कुरु शब्दं माकार्षीरित्यादिकरोतिशब्दव्यवहारादप्यनि-

शित्वमध्यवसीयते । न चाऽसिद्धमनभिव्यञ्जत्वम्, अभिव्यक्त्यऽयोगात्, सा हि प्रतिबन्धकनिरासेन वा संस्कारविशेषाधानेन वा, न तावत् प्रतिबन्धनिरासः-प्रतिबन्धकानुपलब्धेः । स्तिमिता वायवः श्रोत्रमाच्छाद्यावस्थिताः शब्दोपलब्धिं प्रतिबध्नन्ति तेषु प्रयत्नोत्थापितैः कौष्ठ्यैर्वायुभिरुत्सारितेषूपलभ्यते शब्द इति चेत् ?, एवं तर्हि सर्वे शब्दाः सर्वगतत्वाच्छ्रोत्रं प्राप्याऽवस्थिताः प्रतिबन्धकेषूत्सारितेषु युगपच्छ्रूयेरन् ।

अथ संस्काराधानम् ? तत्रापि त्रैविध्यम्-शब्दस्य वा संस्कारमादध्युः कौष्ठ्या वायवः श्रोत्रस्य वोभयोर्वा । शब्दस्य चेत् ? तस्यैकत्वात् सर्वगतत्वादऽनवयवत्वेनाऽवयवसंस्कारायोगात् स्रुघ्नस्थैर्वायुभिः संस्कृतः शब्दः पाटलिपुत्रेऽप्युपलभ्येत, तदि-

---

त्यः शब्दः तदिदमुक्तं करोतिशब्दादिति । हेतुगतविशेषणाऽसिद्धिमाशङ्क्य निराकरोति । नचेति । शब्दसंस्कारपक्षे दूषणमाह । शब्दस्येति । नित्यत्वपक्षे सर्वगतोऽयं शब्दः तदयं संस्कृतः सर्वैः पुरुषैः श्रूयेत कृतकत्वे तु प्रादेशिकत्वान्नायं दोष इति भावः । ननु शब्दैकदेशो ध्वनिभिः संस्कृतः स दूरवर्तिनां श्रोत्रेणाप्राप्तः कथं ते शृणुयुरतआह । अनवयत्वेनेति । अत्र वार्त्तिककृत्संमतिमाह । तदिदमिति ।

"शब्दः संस्क्रियते यदि ।
निर्भागस्य विभोर्न स्यादेकदेशेऽपि संस्क्रिया"

इति श्लोकशेषः । नन्वाधारद्वारक एवास्य ध्वनिभिः सं-

दमुक्तम्-"तत्र सर्वैः प्रतीयेत" (श्लो. वा. श. ५२) इत्यादिना। श्रोत्रसंस्कारपक्षेऽप्ययमेव दोषः।

यदि काणाद-कापिल-वैदिकमतेनाऽऽकाशमशमहङ्कारो दिग्वा श्रोत्रं तस्यैकत्वात् सर्वगतत्वादनवयवत्वाच्च सर्वपुंसामेकमेव श्रोत्रं स्यात् तच्चैकदेशस्थैरपि ध्वनिभिः संस्कृतमिति कः सर्वेषां शब्दोपलम्भे प्रतिबन्धः?

स्कारः अतो य एवाधारः संस्कृतस्तत्समीपगतैरेव पुरुषैर्गृह्यते न दूरस्थैः। नैवम्। व्योमात्मादिवच्छब्दस्य निराधारत्वात्। आकाश एवाधार इति चेन्न। तस्य निरवयत्वेन प्रदेशसंस्काराऽसम्भवात्। श्रोत्रसंस्कारपक्षेऽप्युक्तमेव दोषमतिदिशति। श्रोत्रेति। काणादमते आकाशं श्रोत्रं साङ्ख्यमतेऽहङ्कारः मीमांसकमते दिक् श्रोत्रं तत्राप्येकत्वादिकं समानं अतः सर्वेषां शब्दोपलब्धिः स्यादित्यर्थः। अनित्यत्ववादिमते तु कर्णशष्कुल्या एव श्रोत्रत्वान्नायं दोष इति भावः। अत्रापि सम्मतिमाह। तदिदमिति।

" विभुत्वात्प्राप्तितुल्यता ॥ ५६ ॥
दूरभावेऽपि शब्दानामिति ज्ञानं प्रसज्यते ॥
श्रोत्रस्य चैवमेकत्वं सर्वप्राणिभृतां भवेत् ॥ ५७ ॥
तेनैकश्रुतिवेलायां शृणुयुः सर्व एव ते ॥
तस्यानवयवत्वाच्च न धर्माधर्मसंस्कृतः ॥ ५८ ॥
नभोभागो भवेच्छ्रोत्रं व्यवस्थाद्वयसिद्धये ॥
वैशेषिकोक्तसिद्धान्तेष्वेवं तावत्प्रसज्यते ॥ ५९ ॥
कापिलेऽपि विभुत्वेन श्रोत्रादेरियमेव दिक् "

इतिग्रन्थशेषः।

न्धिं वारयेत् ? तदिदम्—"आकाशश्रोत्रपक्षे च"इत्यादिना"श्रोत्रादेरियमेवादिक्"(श्लो.वा.श.५६-६०)इत्यन्तेन दर्शितम्। अस्मिंश्च पक्षे श्रोत्रस्य सर्वशब्दसाधारणत्वादेकशब्दोपलब्ध्यर्थमपि संस्कृतं श्रोत्रं प्रसङ्गात् सर्वान् शब्दान् घटार्थोन्मीलितमिव नेत्रं समानदेशस्थान् पटादीनऽवबोधयेत्, तदिदम्—" सकृच्च संस्कृतं श्रोत्रम् "(श्लो.वा.श.६०)इत्यादिना दर्शितम् ।

अयं च दोषः पूर्वोपक्षिप्तेऽपि शब्दसंस्कारपक्षे दर्शयितव्यः— सर्वे हि शब्दाः श्रोत्रदेशेऽवस्थितास्तत्रैकस्मिन् संस्क्रियमाणे बलादन्येषामपि संस्कारः स्यादेव, नहि समानदेशानां समानेन्द्रियग्राह्याणां कस्यचित्संस्कारः कस्यचिच्चाऽसंस्कार इति व्यवस्था सम्भवति घटादावदर्शनात्, तदिदमुक्तम्—" एत-

दूषणान्तरमपि श्रोत्रसंस्कारपक्षे दर्शयति । अस्मिंश्चेति । अत्रापि संमतिमाह । तदिदमिति ।

" सर्वशब्दान्प्रबोधयेत् ।
घटायोन्मीलितं चक्षुः पटं नहि न बुध्यते "

इति श्लोकशेषः । दूषणमेव दर्शयति । सर्वे हीति । अत्रापि संमतिमाह । तदिदमिति ।

" विषयस्याऽपि संस्कृतौ ।
समानदेशवृत्तित्वात्संस्कारो ह्यविशेषतः ॥ ६१ ॥
स्थिरवायुपनीत्याच संस्कारोऽस्य भवेन्न चेत् ।
दृष्टं चावरणापाये तद्देशान्योपलम्भनम् ॥ ६२ ॥
संस्कृताऽसंस्कृतत्वेच शब्दैकत्वे न सिध्यतः ।
एकावस्थाभ्युपेतौ सर्वैर्ज्ञायेत वा न वा" ॥ ६३ ॥

देव प्रसज्यते" (श्लो. वा. श. ६१) इत्यादिना।

उभयसंस्कारपक्षे तूभयेपि दोषाः समुच्चित्य दर्शयितव्याः, तस्मान्न प्रयत्नाभिव्यङ्ग्यः शब्दः, तज्जन्यस्त्वसौ प्रादेशिकश्च, श्रोत्रं च कर्णशष्कुल्येव, तथा सति हि कैश्चिदेव कश्चिदेव शब्दः श्रूयत इत्युपपद्यते, अन्यथा श्रोत्रव्यवस्था शब्दव्यवस्था चोभयमपि न स्यात्। किं च नानादेशस्थैश्च वक्तृभिरुच्चारितः शब्दो युगपन्नानादेशेषूपलभ्यते "तदेकस्य नित्यस्यानुपपन्नम्" इति (शा०) भाष्यं, तत्र नित्यस्यानुपपन्नमितिप्रतिज्ञा, एकस्येति हेतुः, नित्यो ह्यसावेकः स्यात् एकस्य चानुपपन्नं नानादेशेषूपलम्भनमिति।

इत्यादि शब्दगृहीतो ग्रन्थः। पूर्वपक्षमुपसंहरति। तस्मादिति। यस्मान्नित्यत्वे विभुत्वे च शब्दस्य क्वाचिदेव कस्याचिच्छ्रवणमिति व्यवस्था नावकल्पेत तस्मादित्यर्थः। अत्र "सत्त्वान्तरे यौगपद्या"दिति हेत्वन्तराभिधानार्थं चतुर्थं पूर्वपक्षसूत्रं तद्व्याख्यानार्थं भाष्यं 'नानादेशेष्वित्यादि' तदनुसन्धत्ते। किञ्चेत्यादिना। तदनुसन्धानं च पूर्वपक्षौपयिकार्थविशेषप्रदर्शनार्थम्। अत्र भाष्यपुस्तकेषु "नानादेशेषु च युगपच्छब्दमुपलभामहे" इति पाठः। ग्रन्थकारस्तु "नानादेशैश्च वक्तृभि" रित्यादिना सोपस्करं पठितवानित्यदोषः। नानादेशेषु सत्त्वान्तरे यौगपद्यात् युगपदुपलभ्यमानत्वात् न ह्यकृतक एको युगपन्नानादेशेषूपलब्धुं शक्यते कृतकत्वे तु कारणायत्तत्वेन सर्वमुपपद्यते इति सूत्रार्थः। भाष्यं व्याचष्टे। तत्रेति। अ-

ननु नावश्यं नित्यत्वे सत्येकत्वं भवति, अनेकान्येव हि गकारादीनि नित्यानि भवन्तु? इत्यत आह– "असति विशेषे नित्यस्य नानेकत्वम्"(शा.भा.) इति। एतदुक्तं भवति–प्रत्यभिज्ञाख्यविशेषप्रत्ययबलेन ह्यस्तनाऽद्यतनगकारयोरेकत्वावगमान्नित्यत्वमाऽऽश्रीयते अस्ति चासावऽविशेषप्रत्ययो युगपन्नानावक्तृभिरुच्चारितेपि गकारे, नहि तत्रापि प्रत्ययविशेषोस्ति, असति च विशेषे नित्यस्य नाऽनेकत्वं सम्भवति। अनेकत्वे हि प्रत्यभिज्ञाया अप्रामाण्यमस्माकमिव भवतोपि स्यात् तदप्रामाण्ये च नित्यत्वानुपपत्तिः, तस्मान्नित्यत्वे सत्येकत्वमङ्गीकर्तव्यम्, एकस्य चानुपपन्नं नानादेशोपलम्भनमिति।

वार्तिकेपि—

" यौगपद्योपलम्भाद्वा भेदो भेदाच्च कार्यता "

इति द्वयमुपाक्षिप्य यथा यौगपद्योपलम्भाद् भेदो भवति तथा दर्शितम्–"अविभुत्वे हि युगपत्" इत्या-

---

ग्रिमं भाष्यमवतारयति । नन्विति । भाष्यार्थमुपसंहरति । तस्मादिति । उपपादितमर्थं वार्त्तिकोक्तं करोति। वार्त्तिकेपीति । अविभुत्वेहीति । तत्रैव वार्त्तिकग्रन्थः ।

" अविभुत्वेऽपि युगपन्नैको नानावगम्यते।
कात्स्न्र्येन चावगम्यत्वादेकदेशे घटादिवत् ॥ ११ ॥
शब्दस्याऽविभुता तस्मादन्यतास्य मुखान्तरे ।
एकः सन्नेकदेशस्थो यदैकत्रप्रयुज्यते ॥ १२ ॥
तदा वक्त्रान्तरे न स्यादेकवक्तृमुखादिवत् ।

दिना "स्फुटेऽन्यत्वेऽवकल्पते"(श्लो.वा. ११) इत्यन्तेन। यथा च भेदात्कार्यता भवति नाऽकार्यस्य नित्यस्य भेदोऽवकल्पते तथा दर्शितम्–" नित्यत्वे त्वेकबुद्धिः स्यात्" (श्लो.वा.श.१४) इति। न हि नित्यत्ववादिना प्रत्यभिज्ञाया भ्रान्तित्वमिष्यते तथा च वक्ष्यते–"अपि चैकरूप्ये सति देशभेदेन कामं देशा एव भिन्नाः स्युर्न तु शब्दः"(शा.भा.) इति। न हि तदप्रामाण्ये नित्यत्वं सिध्यति प्रमाणान्तराभावात्, अतो नित्यत्वे सत्येकत्वं स्यात् तच्च नानादेशोपलम्भेन विरुध्यत इति, ततश्च यौगपद्योपलम्भाद् भेदो भेदे च प्रत्यभिज्ञाया अप्रामाण्यं तदप्रामाण्ये च नित्यत्वाभावात् कार्यत्वम्–तदेतदानुपूर्व्यं स्वतन्त्रसिद्धम्। दृढे चानित्यत्वे दीपवत् सादृश्यात् प्रत्यभिज्ञा भवति। तस्मादनित्यः शा·

कार्यत्वे स्यात् क्रियाभेदात्फलभेदः प्रतिक्रियम्॥ १३॥
तेनैकबुद्धिः सादृश्यात्स्फुटेऽन्यत्वेऽव कल्पते" इति।
नित्यत्व इति।
" न किञ्चिद्भाति कारणम्।
कामं देशा इति न्यायात्तच्चैकत्वं विरुध्यते" इति

श्लोकशेषः। श्लोकार्थमाह। नहीत्यादिना। भाष्यकारोक्तं न्यायं विवृणोति। तथेति। अपि चेत्यादिनतुशब्द इत्यन्तोभाष्यग्रन्थः। तस्यार्थमाह। नहीत्यादिना। अस्त्वेवं कथमेतावता कार्यत्वसिद्धिरत आह। ततश्चेति। स्वतन्त्रसिद्धम्—अनित्यत्ववादिशास्त्रसिद्धमित्यर्थः। पूर्वपक्षं निगमयति। तस्मादिति। अत्रान्यदपि पूर्वपक्षसूत्रद्वयम्।

ब्द इति प्राप्ते,

अभिधीयते—

प्रयत्नानन्तरं दृष्टेर्नैकान्त्यात् कार्यता ध्वनेः ।
तदभिव्यङ्ग्यपक्षेपि युज्यते तत्र दर्शनम् ॥ ४४ ॥

तद्यथा "प्रकृतिविकृत्योश्च"।अत्र दर्शनादिति शेषः।दध्यत्र इत्यत्र इकारः प्रकृतिः यकारोविकृतिः । न च नित्यत्वे प्रकृतिविकृतिभावः सम्भवति । यद्धि विक्रियते तदनित्यं अतः प्रकृतिविकृतिभावदर्शनादनित्यः शब्द इति । तथा "वृद्धिश्च कर्तृभूम्नास्य"। कर्तृणां भूम्ना बहुत्वेन वृद्धिः महत्वमस्य शब्दस्योपलभ्यत इति शेषः । बहुषु शब्दमुच्चारयत्सु महाञ्छब्दः श्रूयते ।स यद्यभिव्यज्यते तदा बहुभिरल्पैश्चोच्चार्यमाणस्तावानेवोपलभ्येत बह्वल्पप्रदीपाभिव्यक्तघटादिवत् कृतकत्वेतूपचितावयवत्वेन सर्वमुपपद्यते । तस्मात्कृतकः शब्द इति । उक्तं च ।

" हेतुवृद्ध्यनुसारित्वात्कार्यतास्य घटादिवत् ।
नहि दीपसहस्रेऽपि व्यञ्जके वर्द्धते घटः" (श्लो.वा. १.८) ॥
षड्भिः सूत्रैः पूर्वपक्षस्तावद्भिस्तन्निराकृतिः ।
पुनरन्यैस्तु सिद्धान्तः षड्भिरित्येष संग्रहः ॥ "

सिद्धान्तं प्रतिजानीते ।इति प्राप्त इति । अत्र पूर्वपक्षनिराकरणसूत्रषट्कमध्ये "समं तु तत्र दर्शन"मित्याद्यसूत्रम् । तदभिप्रायेणाह । प्रयत्नानन्तरमिति । वक्ष्यमाणयुक्तिकलापेन शब्दनित्यत्वे सिद्धे प्रयत्नानन्तरीयकत्वस्याभिव्यञ्जकत्वेनान्यथासिद्धतया कृतकत्वाऽप्रयोजकत्वमित्यभिप्रायः । तुशब्दः पक्षव्यावृत्यर्थः । तत्र प्रयत्नाख्ये कर्माणि सति यच्छशब्दस्याऽदर्शनं तदुत्पत्तिपक्षेऽभिव्यक्तिपक्षे च समं तुल्यमिति

यत्तु कथमभिव्यङ्ग्यत्वम्? इति, श्रोत्रसंस्कारेणेति ब्रूमः। यत्त्वाकाशस्याऽहङ्कारस्य वा श्रोत्रत्वे तत्संस्कारत्वे च सर्वत्र पुंसामुपलब्धिः स्यादित्युक्तम्, तत्र ब्रूमः—यदि तयोः श्रोत्रत्वे भवेदयं दोषः? तत् कर्णशष्कुली भवतु श्रोत्रं सा च प्रतिपुरुषं भिन्नेति नातिप्रसङ्गः। यद्यपि चाऽऽकाशमेव श्रोत्रं तत्तु न साक्षात् संस्क्रियते किं त्वऽधिष्ठानद्वारेण, ततश्च यद्यपि श्रोत्रं सर्वेषामेकं तथाप्यधिष्ठानानां भिन्नत्वात् तत्संस्कारव्यवस्थया श्रवणस्य व्यवस्था भविष्यति।

नन्वेकत्वे सतीन्द्रियस्य यद्यप्यधिष्ठानानि भिन्नानि तथाप्येकेनाप्याधिष्ठानेन संस्कृतेनेन्द्रियस्य संस्कृतत्वात् सर्वपुंसामिन्द्रियं संस्कृतमिति सर्वेषामुपलब्धिः स्यादेव। तदुक्तम्-

"नन्वेकस्मिन्नधिष्ठाने लब्धसंस्कारमिन्द्रियम्।
बोधकं सर्वदेहेषु स्यादेकेन्द्रियवादिनः।" इति।
(श्लो. वा. श. ७१)

सर्वदेहवर्तिनां पुंसामित्यर्थः। अत्रोत्तरम्—

"पुंसां देहप्रदेशेषु विज्ञानोत्पत्तिरिष्यते।
तेन प्रधानवैदेश्याद् विगुणा सा तु संस्कृतिः।"
(श्लो. वा. ७२)

इति। अयमर्थः—स्वशरीरे एव भोगायतने सर्वपुंसा-

सूत्रार्थः। उक्तं दूषणमनूद्य परिहरति। यत्त्वित्यादिना। उक्तेऽर्थे वार्तिककृत्संमतिमाह। तदुक्तमिति। सर्वदेहेष्वितिपदं व्याचष्टे। सर्वेति। अत्रोत्तरवार्तिकं पठति। अत्रेति। वार्त्तिकं व्याचष्टे। अयमर्थ इति। प्रधानसमानदेशत्वस्य

मपि ज्ञानमुत्पद्यते नान्यत्र, शब्दज्ञानाङ्गं चायमधिष्ठानसंस्कारः प्रधानसमानदेशत्वं चाङ्गानां गुणस्तेन देहान्तरवर्तिनः पुरुषस्य यत् स्वदेहे निष्पादयितव्यं विज्ञानं तस्य तद्देहगत एव संस्कारो निष्पादको भवति न देहान्तरगतः स हि तत्प्रधानभूतेन ज्ञानेन विदेशत्वाद् विगुणः ।

ननु संस्कार्यस्यैकत्वात् तदुद्धारत्वाच्च संस्काराङ्गभावस्य देशभेदोऽकिंचित्कर एव यथा बर्हिरेकत्वात् तत्संस्काराणामातिथ्याकालानामप्युपसदग्नीषोमीयाङ्गत्वं न विहन्यते तद्वदत्रापि स्यात् ? । न, अदर्शनात्—न ह्येकस्मिन्नऽधिष्ठाने सर्वेषां ज्ञानमुपलभ्यते, अतः साधारणमऽपीन्द्रियं विज्ञानसमानदेशसंस्कारसचिवमेव ज्ञानमुत्पादयति नान्यथेति दर्शनबलादध्यवसीयते ततोनातिप्रसङ्गः ।

न ह्यावश्यमेकमेवेन्द्रियम्—यद्यप्याकाशमेकमनवयवं च तथापि तस्य प्रादेशिकैर्घटादिभिर्ये संयोगास्तेपि प्रादेशिकास्ततश्च कर्णशष्कुलीसंयोगानां प्रतिपुरुषं भिन्नत्वात् तदवच्छिन्नस्य चाकाशस्य श्रोत्रत्वात् सत्यपि स्वरूपैकत्वेऽवच्छिन्नरूपाणां भेदाद्

व्यभिचारं शङ्कते । नन्विति । परिहरति । नेति । लोके कर्मोपलक्षणमिति न्यायेनात्र दर्शनबलादेवमङ्गीक्रियते इति भावः। नन्वाकाशमिन्द्रियं तच्चैकमेवेति तत्राह । न हीति । अस्त्वेवं प्रकृते किमायातमत आह । ततश्चेति । नह्याकाशमात्रं श्रोत्रं, किं तर्हि ? धर्माधर्मोपगृहीतविशिष्टशक्त्युपेतकर्णशष्कुल्यवच्छिन्नं

व्यवस्थासिद्धिः। एवमहङ्कारभागे दिग्भागे च श्रोत्रे द्रष्टव्यम्।

यत्तु,

"सकृच्च संस्कृतं श्रोत्रं सर्वशब्दान् प्रकाशयेत्" (श्लो.वा.६०)इत्युक्तम्,तत्रोच्यते-ध्वनयो हि ताल्वादिस्थानविशेषसम्पर्काद् विजातीया विलक्षणसामर्थ्या निष्पद्यन्ते ततश्च कश्चिदेव ध्वनिः कस्यचिच्छब्दस्यानुगुणं संस्कारमाधत्ते न सर्वसाधारणमित्युपलब्धिव्यवस्था कल्प्यते। शब्दसंस्कारपक्षेपि कश्चिदेव ध्वनिः कश्चिच्छब्दं संस्करोति न सर्वः सर्वमिति युक्ततरैव व्यवस्था।

दृष्टा च समानेन्द्रियग्राह्याणामप्यऽभिव्यञ्जकव्यवस्था-सावित्रं हि तेजो घटादीनामेवाऽभिव्यञ्जकं न

अतो यस्यैतादृशी कर्णशष्कुली नास्ति धर्माऽधर्मलोपेन वाताद्युपहतत्वात् तस्य सदप्याकाशं तदनवच्छिन्नत्वादयोग्यमिति स बधिरोभविष्यतीत्यपि व्यवस्था सिद्ध्यतीति भावः। ध्वनयोहीति। शब्दोपलब्धिव्यवस्थां दृष्ट्वा तद्बलेन प्रतिवर्णसंस्कारहेतुभूता ध्वनिजातिभेदाः कल्प्यन्ते तत्संयोग एव श्रोत्रस्य संस्कारो न स्थिरवाय्वपनयो येनातिप्रसङ्गः स्यादिति भावः। अथ ताल्वादिसंयोगविभाग एव शब्दस्य कारणं न वायवीय इत्युच्येत? तथापि तस्य विजातीयत्वाद्विलक्षणसामर्थ्याच्च व्यवस्थेति भावः। शब्दसंस्कारपक्षोक्तदूषणपरिहारोऽपि ध्वनिजातिभेदाश्रयणेन कर्तव्य इत्याह। शब्देति। ननु विजातीयानामेव प्रदीपादीनां घटव्यञ्जकत्वं दृष्टमत आह।

नक्षत्राणाम्, निम्बत्वक् चन्दनगन्धस्यैवाभिव्यञ्जिका न गन्धान्तराणाम्, तस्माददोषः ।

न च शब्दसंस्कारे सर्वपुंसामुपलब्धिप्रसङ्गः- ध्वनीनां प्रादेशिकत्वात्, तद्देशो शब्दः संस्क्रियते न सर्वत्र, अतः संस्कृतेन शब्देन यस्येन्द्रियं सन्निकृष्टं स एव शृणोति नान्य इत्युपपन्नम् ।

युगपद्देशभेदश्च स्यादेकस्यापि सूर्यवत् ।
ये विन्ध्यनिलया ये च कामरूपे व्यवस्थिताः ॥४५॥
प्राग्भागे ह्यात्मनः सर्वैर्दृश्यन् भास्वान् निरीक्ष्यते ।
प्रत्यग्भागे तथाऽस्तं यन्, मध्यान्हे चोपरि स्थितः॥४६॥
भिन्नाश्च तेषां प्राग्भागास्तथा प्रत्यक् तथोपरि ।
तेष्वस्य दृश्यमानस्य विस्पष्टा भिन्नदेशता ॥ ४७ ॥

तथा यस्मिन् यावद्दूरे देशे कैश्चित्सूर्योदयो दृश्यते तद्देशवर्तिनोऽन्येपि ततः परस्तात् तावति पश्यन्ति ततोऽप्यस्ति देशभेदः । न च सूर्यनानात्वमाशङ्कनीयम्, न हि केचिद्भिन्नं सूर्यं पश्यन्ति ।

दृष्टेति । एतदेव विवृणोति । सावित्रमिति । अस्मिन्नेव पक्षे दूषणान्तरं परिहरति । नचेति । अत्र वैशेषिकादयः—"संयोगाद्वा विभागाद्वा शब्दाद्वा शब्दनिष्पत्ति"रित्याहुः-तथाहि प्रथमं भेरीदण्डसंयोगात् वेणुदलविभागाद्वा शब्दोनिष्पद्यते । स च वीचीसन्तानवत् समानजातीयान् शब्दान् सर्वतः तनोति तेषु च सन्तन्यमानेषु स्वदेशप्राप्तः शब्दः श्रोत्रेण गृह्यत इति ? । एतच्चायुक्तं लोकविरोधात् । लोकोहि एकमेव शब्दं परस्मै श्रावयितुं विवक्षति । नतु शब्दान्तरं श्रावयितुं

शब्दान्तरं विवक्षति तेनेयं विवक्षानुसारिणी शब्दश्रुतिः, शब्दसन्तानपक्षेऽन्य एव शब्दो वक्त्रा विवक्ष्यते श्रोत्रा चान्यः श्रूयत इति न विवक्षानुसारिणी शब्दश्रुतिः स्यात् । अदृष्टचरशब्दानेकत्वकल्पने गौरवं च स्यात् । आरम्भकत्वं तु न केवलमदृष्टं प्रमाणविरुद्धं च निष्क्रियत्वात् । देशान्तरकार्यारम्भश्च सुतराममूर्तस्याऽभिघातमकुर्वतोऽनुपपन्न एव । या चेयमारम्भणीयं प्रति नातिदूरमारभत इति देशेयत्ता नच तस्याः किञ्चिन्निमित्तमस्ति अन्तिमोऽपि शब्दः शब्दान्तरमारभेतैवाविशेषात् । सदृशं सजातीयं वा करोतीत्येतदपि न दृष्टचरम् । यत्तु वीचीसन्तानवदित्युक्तं तदनुपपन्नं ? तत्र सक्रियत्वादभिघातकरणाद्वेगवत्त्वाच्च यथाक्रममारम्भोपपत्तेः । यथाहुः—

"वेगवत्सक्रियत्वाभ्यां तरङ्गाणां च युज्यते ।
कार्यदेशान्तरारम्भो यावद्वेगं च तत्क्रिया" (श्लो. वा. ९५) इति ।

देशान्तरे कार्यारम्भो यावद्वेगं चेत्युपपन्नमित्यर्थः । प्रयोगश्च शब्दो न शब्दारम्भकः शब्दत्वादन्त्यशब्दवत् । एवं संयोगविभागावपि न शब्दारम्भकौ संयोगविभागत्वात् तात्वादिसंयोगविभागवदिति । अतो भाष्यकारोक्त एव पक्षः साधीयान् । यदाह भाष्यकारः, "अभिघातेन हि प्रेरिता वायवः स्तिमितानि वाय्वन्तराणि प्रतिबाधमानाः सर्वतोदिक्कान्संयोगविभागानुत्पादयन्तो यावद्वेगमभिप्रतिष्ठन्ते तेन वायोरप्रत्यक्षत्वात्संयोगविभागा नोपलभ्यन्ते । अनुपरतेष्वेव तेषु शब्द उपलभ्यते नोपरतेषु अतो न दोषः अत एवानुवातं दूरादुपलभ्यते शब्दो न प्रतिवात"मिति(शा.भा.)। अभिघातेन हीत्यादिना यदुक्तं तत्प्रत्यक्षसिद्धं न कल्पनीयम् । स च वायुः शब्दविशेषा-

भिव्यक्तौ ताल्वादिस्थानविशेषसंयोगमनुरुध्यते स्थानविशेषवशेन शब्दविशेषोपलम्भात् । यावद्वेगमभिप्रतिष्ठन्त इत्येतदपि वेगवत्वादेव वायूनां शरादिवत् क्लृप्तमेव । यदपि स्तिमितानि वाय्वन्तराणीत्याद्युक्तं तदपि सर्वं क्लृप्तमेव । न स्तैमित्यं स्थिरत्वमेव नचतद्वायोः सम्भवति सदागतित्वात् । सत्यम् । सूक्ष्मत्वात्पदार्थान्तरानचालयन् स्थिरवद्भवतीति स्थिराभिधानम् । अत्र वार्त्तिककारैर्ध्वनिजन्यः संस्कार एव श्रोत्रमित्यादिभर्तृमित्रमतम्—

"इममेव च संस्कारं शब्दग्रहणकारणम् ।
केचित्तु पण्डितम्मन्याः श्रोत्रमित्यभिमन्वते" (श्लो.वा.श.१३१)
इत्यादिना महता प्रबन्धेन दूषयित्वा—
"श्रोत्रमाकाशदेशं च भौतिकेन्द्रियवादिन" (श्लो.वा.१४६) ॥
इत्यादिना तन्त्रान्तरविराधश्च प्रदर्श्य—
"यदि चावश्यकर्तव्यस्तार्किकोक्तिविपर्ययः ॥ १४९ ॥
ततो वेदानुसारेण कार्या दिक्श्रोत्रतामतिः ॥
दिशः श्रोत्रमिति ह्येतत् प्रलयेष्वभिधीयते ॥ १५० ॥
तच्च प्रकृतिगामित्ववचनं चक्षुरादिवत् ॥
दिक् च सर्वगता चैका यावद्व्योमव्यवस्थिता ॥ १५१ ॥
कर्णच्छिद्रपरिच्छिन्ना श्रोत्रमाकाशदेशवत् ॥
यावांश्च कणभुग्न्यायो नभोभागप्रकल्पने ॥ १५३ ॥
दिग्भागेषु समस्तोसावागमात्तु विशिष्यते" (श्लो.वा.श.)

इत्याद्युक्तं तत्तत्रैवावगन्तव्यम् । अत्र ग्रन्थकारेणानुक्तः परिहारसूत्रद्वयार्थ उच्यते । तत्र अस्थानादित्यस्यस्य परिहारसूत्रम् "सतः परमदर्शनं विषयानागमा"दिति । यत्परं कारणमनित्यत्वे कथितम् अस्थानादिति, तत्र सतोविद्यमानस्यैव शब्दस्य

अदर्शनं परं न त्वभावः। कुतः। विषयानागमात् विषयं शब्दं प्रति अनागमात्— उच्चारयितृमुखोद्गतवायवीयसंयोगविभागानां स्तिमितसमीरणापसारणेन शब्दाभिव्यञ्जकानामभावात्। सतोऽपि शब्दस्याऽग्रहणं नतु स्वरूपाऽभाव इति सूत्रार्थः। वार्त्तिककारैस्त्वस्थानादित्यस्य हेतोरनैकान्तिकत्वप्रदर्शनार्थत्वेनैतत्सूत्रं व्याख्यातम्। यथाहुः—

"कूपपूरणयत्नेन खं तिरोधीयते यदा ॥ ३३ ॥
अस्थानादित्ययं हेतुस्तदानैकान्तिकोभवेत् ॥
आकाशधीप्रबन्धोहि तदा तस्मिन्न तिष्ठति ॥ ३४ ॥
तिरोहितानभिव्यक्तेः शब्दबुद्धिप्रबन्धवत्" (श्लो.वा.श.)

नन्वप्रत्यक्षस्याऽऽकाशस्य किमिदान्तिरोधानं नाम। नाऽप्रत्यक्षमाकाशमिति ब्रूमः अपरोक्षाऽवभासात्। अप्रत्यक्षस्य प्रमाणान्तराऽसम्भवेनाऽसिद्ध्यापत्तेश्च। शब्दलिङ्गकमनुमानमेव प्रमाणमिति चेन्न। गुणत्वाऽभावेन गुण्यनुमापकत्वासम्भवात्। गुणत्वे वा वायुगुणत्वात् प्रसिद्धस्य गुणिनोऽनुमानम्। वायौ हि श्रोत्रं प्राप्ते शब्द उपलभ्यते यथा चम्पकद्रव्ये घ्राणसन्निकृष्टे गृह्यमाणस्य गन्धस्य तद्गुणत्वम्। यद्वा वायुरेव ताल्वादिस्थानसंयोगात् तत्तच्छब्दगुणको निष्पद्यते तस्मिंश्च श्रोत्रं प्राप्ते संयुक्तसमवायसन्निकर्षेण श्रोत्रेण शब्दो गृह्यते। अनित्यवायुधर्मत्वे शब्दे कथं नित्यतेति चेत्? गोत्वशुक्लत्वादिगुणवच्चैतादितिब्रूमः नीरूपस्यापि चापरोक्षावभासान्नानुपपन्नं प्रत्यक्षत्वम्। एवं दिक्कालयोरपि प्रत्यक्षता समर्थनीया। तयोरप्यपरोक्षावभासात्प्रमाणान्तराऽसम्भवाच्चेति दिक्। ननु नानुपलब्धत्वं हेतुः किन्त्वसत्त्वम्?। सत्यम्। तदप्यसिद्धत्वादसाधकम्। यथाहुः—

"अथ पूर्वापरासत्त्वं हेतुस्तत्राप्यसिद्धता ।
सत्त्वेव साधनाऽभावाच्छब्दोऽतो नोपलभ्यते"(श्लो.वा.४०)

हन्त तर्हि यदा व्यञ्जकं लब्धं तदा किन्न चिरमुपलभ्यते। उच्यते । वायवीया हि ध्वनयोऽभिव्यञ्जकाः तेच श्रोत्रं प्राप्यैवान्यतः प्रयाताः शब्दबुद्धिरपि तदनुवर्त्तिनी न चिरमनुवर्त्तते। यथा मेघान्धकारे विद्युज्जनिता घटादिबुद्धिरिति । तदुक्तं—

"क्षणिकं साधनं चास्य बुद्धिरप्यनुवर्त्तते ।
मेघान्धकारशर्वर्यां विद्युज्जनितदृष्टिवत् ॥ ४१ ॥
यथा घटादेर्दीपादिरभिव्यञ्जक इष्यते ।
चक्षुषोनुग्रहादेवं ध्वनिः स्याच्छोत्रसंस्कृतेः" (श्लो.वा.४२)

अत्रेदं चिन्त्यते किमिदं तमोद्रव्यान्तरमुतालोकाऽभाव इति। तत्र "द्रव्यगुणकर्मनिष्पत्तिवैधर्म्यादभावस्तम" इति काश्यपीयास्तन्न युक्तिसहम् । नीलबुद्धेर्निर्निमित्तत्वापत्तेः । अभावस्य नीलिमाऽभावात् । न चासतो नीलिम्नः किञ्चिद्ग्राहकं स्मारकं वास्ति। भूगुणारोपस्य च सादृश्यं विनानुपपत्तेः। नेदं रजतमितिवद्बाधाभावाच्च । अभावत्वे तु प्रतियोगिविशेषोल्लेखश्च स्यात् आलोकादर्शनमात्रेण तु तद्भ्रमोभवन् तच्छून्यभागेऽपि स्यात् । अतो द्रव्यान्तरमिदं वायुवन्नीलिमगुणकम् । वायुररूपः स्पर्शवान् इदं चास्पर्शरूपवदित्येतावान्विशेषः। ननु रूपान्तरग्रहणवदेतद्ग्रहणे आलोकापेक्षया भवितव्यम्? सत्यम्। अस्तु नामान्यत्र तथा एतन्नीलरूपग्रहणे त्वालोकापेक्षा नास्तीतिदर्शनबलादेवाभ्युपगम्यते निमीलितनेत्रस्याऽपि कानिचिच्चाक्षुषाणि तेजांसि निःसरन्त्येव यैर्नीलरूपं गृह्यते । वस्त्वन्तरमपि गृह्येतेति चेत्? एतावद्भिस्तद्ग्रहणाऽसम्भवात् । जात्यन्धानामुद्धृतनेत्राणां च यद्यन्धकारदर्शनमस्ति ततस्तेषामपि सन्ति कानिचित्तेजांसीति कार्यबलादेव

किं पुनरेकदेशस्थस्यैव सवितुर्नानादेशोपलम्भे कारणम्? उच्यते-अतिदूरवर्तिनोऽस्य यथावद्देशमजानन्तः स्वसंनिधिमध्यस्यन्तो देशभेदं मन्यन्ते। विस्पष्टं चैतत् तथाहि-योऽपराह्णे यस्मिन् यावद्दूरे देशे सूर्यं पश्यति—'अस्मिन् क्षेत्रेऽस्मिन् पर्वते सूर्यः' इति, स सवितारमीक्षमाण एव तद्देशो गतस्ततः पर-

---

कल्प्यते। अधिकन्तु टीकायामवगन्तव्यम्। भाष्यवार्त्तिककाराभ्यामनुपक्षेपात्प्रकृतविचारानुपयोगाच्चास्माभिर्न प्रपश्चितम्। औलूक्यादीनान्त्वेतदेव विचारसर्वस्वमिति तैः प्रपश्चितम्। ननु सजातीयानामेवाभिव्यञ्जकत्वं दृष्टं पार्थिवं घ्राणङ्गन्धेन गन्धानभिव्यनक्ति। आप्यं रसनं रसेन रसान्। न च वायवीयानां ध्वनीनां शब्देन साजात्यमस्ति। न च शब्दस्तेषां गुणोऽतः कथमभिव्यञ्जकत्वं स्यात्? । नैष दोषः। विजातीयानामप्यभिव्यञ्जकत्वदर्शनात्। दृश्यते हि तैजसः प्रदीपादिर्घटाद्यभिव्यञ्जकः।

यत्तु करोतिशब्दादित्युक्तं तस्यैतत्परिहारसूत्रं "प्रयोगस्य पर"मिति। यत्परं कारणमुक्तं कृतकत्वे शब्दं कुर्वित्यादि तत्प्रयोगस्य उच्चारणस्य नतूत्पत्तेः गोमयान्कुर्वितिसमाहारेऽपि करोत्यभिधानदर्शनात्। यथापादौ कुरु अवकाशं कुरु तथा शब्दप्रयोगं कुर्विति सूत्रार्थः। "सत्वाऽन्तरे च यौगपद्या"दितियदुक्तन्तत्परिहारसूत्रम् "आदित्यवद्यौगपद्य"मिति। यथा एक एवादित्योनानादेशेष्वनेकैर्गृह्यते तथा शब्दोपीति सूत्रार्थः। एतदभिप्रायेणाह। युगपदिति। एतेनपूर्वपक्षोक्तहेतोरनैकान्तिकत्वमुक्तं भवति। अत्र चोदयति। किं पुनरिति। समाधत्ते। उच्यत इति। दूरस्थस्य स-

स्तात् तथैव तं पश्यन्ति, तेनावगम्यते सर्वेषां देशाना-मऽग्रतः स्थितोऽसौ संनिहितवदवभासत इति । ये चादित्यापेक्षया स्तोकदेशाः पर्वतास्तेपि द्वियोजन-स्थितानां त्रियोजनस्थितानां च पुरुषाणां तुल्यवदव-भासन्ते, तस्मादेकत्वेपि सम्भवति नानादेशोपल-म्भः । तथैकमेव मुखं भिन्नेष्वादर्शेषु युगपद् दृश्यते।

ननु प्रातिबिम्बं नामार्थान्तरं तत्र दृश्यते ? । न, तस्याऽभावादनुपलम्भाच्च, न हि मूर्तमध्ये मूर्तान्तरं सम्भवति । किं च शरावस्थमुदकं भूमेरुपरि नाभि-दघ्ने धारयित्वा तस्योपरिष्टादरत्निदघ्ने स्वमुखं कुर्व-न्नुदकस्याधस्तादरत्निमात्रे मुखप्रतिबिम्बं पश्यति, त-स्मिंश्च देशे पार्श्वस्थाः पुरुषा न किंचिदपि पश्यन्ति तेन दृश्यादर्शननिरस्तः प्रतिबिम्बाख्योऽर्थो न श-क्योऽभ्युपगन्तुम्, तस्मादादर्शतेजसा जलेन च प्र-

---

भिध्यध्यासकृतो नानादेशभ्रम इत्यर्थः । अस्य । सवितुः । निगमयति । तस्मादिति । न हि स देशोऽस्ति यत्रोच्च-रितः शब्दो न गृह्यते अतो देशानवच्छेदादाकाशवद्विभुत्वमि-ति भावः । विभोरपि न सर्वं व्यापितया ग्रहणं व्यञ्जकाधी-नत्वादितिभावः । नन्वस्तु नामैवं तथापि कथं देशभेदभ्रान्तिः ? इत्थम् । व्यापको हि शब्दो यदा भिन्नदेशे युगपदुद्गतैर्ध्वनिभिर-भिव्यज्यते तदा शब्दोऽपि तत्तद्देशे ऽवगम्यते ध्वनीनां च पू-रितान्तरालत्वात् शब्दोऽप्यन्तराले ऽनवगम्यमानो विच्छिन्न इव भासते अतो ध्वनेरल्पदेशत्वाच्छब्देऽप्यविभुत्वभ्रान्तिरिति । उदाहरणान्तरमाह । तथेति ।

तिहतं नायनं तेजः परावृत्य गृह्णातीति युक्तम्। तस्मादनैकान्तिको नानादेशोपलम्भो न नानात्वं शब्दस्य साधयति।

शब्दो भिन्नदेशैर्ध्वनिभिः स्वे स्वे देशेऽभिव्यज्यमानो भिन्नदेशोऽवभासते, ध्वनयो हि श्रोत्रदेशमागत्यापि शब्दं व्यञ्जयन्तः स्वोत्पत्तिदेशमिव शब्दं भासयन्तीति दर्शनबलादभ्युपगम्यते।

ननु प्राप्यकारि श्रोत्रं, न च ध्वन्युत्पत्तिदेशः श्रोत्रेण प्राप्यते इति कथं तस्य श्रोत्रेण ग्रहणम्? तदग्रहे च कथं तद्विशिष्टशब्दग्रहः?। उच्यते—नायं श्रोत्रतस्तद्देशविशिष्टशब्दप्रत्ययः। किं तु? श्रोत्रं हि स्वदेशस्थितं शब्दं बोधयदपि न देशविशिष्टं बोधयति किं तु स्वरूपमात्रेण, यतस्तु दिश आगता ध्वन-

---

"जलपात्रेषु चैकेन नानेकः सवितेक्ष्यते।
युगपन्न च भेदस्य प्रामाण्यं तुल्यवेदनात्"(श्लो.वा.१७९)॥

दृष्टं च नेत्रप्रह्वाचिभेदादेकस्यापि चन्द्रा देरनेकधा दर्शनम्। यथाहुः—

"ईषन्निमीलितेऽङ्गुल्या यथा चक्षुषि दृश्यते।
पृथगेकोऽपि भिन्नत्वाच्चक्षुर्वृत्तेस्तथैव न"(श्लो.वा.१८२) इति।

अत्र ब्रूमो यदा तावज्जले सौरेण तेजसा स्फुरता चाक्षुषं तेजः प्रतिस्रोतः प्रवर्त्तितं स्वदेश एव गृह्णाति सवितार मनेकधेति। उपपादितं सूत्रार्थं निगमयति। तस्मादिति। अत्राशङ्कते। नन्विति। अस्तु नामाऽग्रहणं ततः किमत आह। तदिति। समाधत्ते। उच्यते इति। यदि ध्वन्युत्पत्तिदेशविशिष्ट

यस्तया विशिष्टं शब्दं बोधयन्ति, सा हि दिक् श्रोत्रप्राप्ता शक्यते श्रोत्रेण ग्रहीतुम्, यद्यपि न स्वातन्त्र्येण दिशः श्रोत्रग्राह्यत्वं तथापि शब्दे गृह्यमाणे तद्विशेषणतया दिगपि श्रोत्रेण गृह्यते इति दृष्टत्वादङ्गीक्रियते कालवत् । यथा हि कालो न स्वातन्त्र्येणेन्द्रियैर्गृह्यते अथ च विषयेषु स्वेषु गृह्यमाणेषु तद्विशेषणतया सर्वैरपीन्द्रियैर्गृह्यते तद्वत् । ततश्चास्यां दिशि शब्द इति विशिष्टग्रहणं तावत् सिद्धम् ।

ध्वनयश्च क्रमेण मन्दीभवन्तः प्रत्यासन्नाद् दूराद् दूरतराच्च देशादागतास्तीव्रं मन्दं मन्दतरं च शब्दं बोधयन्ति । बोधविशेषाच्च ध्वन्युत्पत्तिदेशः प्रत्यासन्नदूरादिरूपेणाऽनुमानाद् हृदयदेशमागच्छति तत्र यः शब्दस्य परमार्थदेशः श्रोत्रदेशस्तस्याऽग्रहणाद् दिग्विशिष्टस्य शब्दस्वरूपस्य ध्वन्युत्पत्तिदेशस्य च ग्रहणात् तयोः संसर्गभ्रमादेवंविधः प्रत्ययो भवति—प्राच्यां दिश्येतावदन्तराले शब्द इति, तस्मादभि-

---

शब्दग्रहणं स्यात्तदाऽयं दोषः स्यान्न तु तथास्तीत्यर्थः । साहीति । यस्मात्सा दिक् श्रोत्रदेशाभवतीति भावः । दृष्टान्तार्थं विवृणोति । यथेति । उपपादितं विशिष्टग्रहणं निगमयति । ततश्चेति । भ्रान्त्या तद्विशिष्ट ग्रहणं संभवतीति भावः । भ्रान्तित्वमुपपादयितुं भूमिमारचयति । ध्वनयश्चेति । ध्वन्युत्पत्तिदेशोनुमानाद्धृदयमागच्छति नतु श्रोत्रेण गृह्यत इत्यभिप्रायः । कथमेतावता भ्रान्तित्वमत आह । तत्रेति । ग्रहणादित्यत्रानुमानेन

व्यञ्जकदेशभेदादुपपन्नं नित्यस्यापि नानादेशोपलम्भनमित्यदोषः।

नन्वयं दोषो यदऽसतिबाधके भ्रान्तित्वम्, प्रत्यभिज्ञायां वा कः पक्षपातो येन सा भ्रान्तिर्न स्यात्?। अयमस्ति पक्षपातः—न ह्यऽसम्भवति तदभ्रान्तित्वे भ्रान्तित्वमङ्गीकर्तुं युक्तम्, नानादेशोपलब्धेस्त्वऽपरिहार्यं भ्रान्तित्वम्—अनित्यत्वपक्षेपि श्रोत्रगत एव परमार्थतो गृह्यते श्रोत्रस्य प्राप्यकारित्वात् न च वक्तृमुखगतो येन तद्देशग्रहणस्याऽभ्रान्तित्वं स्यात्।

यदपि सौगतोप्यऽप्राप्यकारित्वमेवाङ्गीकुर्वन्नऽभ्रान्तित्वं समर्थयते, तदयुक्तम्—अप्राप्यकारित्वे हि संनिकृष्टविप्रकृष्टस्थितौ युगपच्छब्दमुपलभेयाताम्, तयोस्तु क्रमेणोपलब्धिर्न कथं चिदप्यऽप्राप्यकारित्वे समर्थयितुं शक्या।

किं च क्षणिको वा शब्दः स्यात् स्थायी वा?। यदि क्षणिकः? ततः प्रत्यासन्नैर्गृहीतमात्रो नष्टः कथं विप्रकृष्टैः पश्चाद् ग्रहीतुं क्षमः। स्थायित्वं तु सौगतानामनभिमतमेव, । स्थायित्वे च प्रत्यासन्नानां

ग्रहणादिति ज्ञेयम्। चोदयति। नन्विति। बाधकप्रत्ययं विना भ्रान्तित्वे प्रत्यभिज्ञाया अपि भ्रान्तित्वं स्यादिति भावः। परिहरति। अयमिति। नन्वनित्यत्वपक्षे तत्र तत्र शब्दोत्पत्तिसंभवान्नानादेशोपलब्धेरभ्रान्तित्वमत आह। अनित्येति। अत्रैव मतान्तरमाशङ्क्य निराकरोति। यदपीति। दूषणान्तरमाह। किञ्चेति। तस्मादिति। यस्मात्स्थायित्वे क्षणिकत्वे वाऽप्राप्य

शब्दश्रवणं चिरकालमनुवर्तेत । तस्मादप्राप्यकारित्वासम्भवादवर्जनीयं नानादेशोपलब्धेर्भ्रान्तित्वम् । अस्मत्पक्षे तु ध्वनीनां क्रमेणाऽऽसन्नदूरगमनाद् गत्वरत्वेन चैकस्मिन् श्रोत्रे चिरमनवस्थानादुपपन्ना क्रमेणोपलब्धिश्चिरकालाननुवृत्तिश्च । तस्मान्नैकान्ततस्तावदनित्यत्वम् ।

कारित्वं न संभवति तस्मात्प्राप्यकारित्वमेव वाच्यं तदा च नानादेशोपलब्धेः भ्रान्तित्वमेव गतिरित्यर्थः । स्थायित्वपक्षोक्तं दूषणं स्वमते परिहरति । अस्मत्पक्ष इति । महाप्रकृतं निगमयति । तस्मादिति । अत्र ग्रन्थकारेण परिहारसूत्रद्वयं सिद्धान्तसूत्रं च परित्यक्तं तत्प्रसङ्गाद्व्याख्यायते । यदुक्तं यकारादिरूपेण विक्रियमाणत्वादिकारादेरनित्यत्वमिति । तस्यैतत्परिहार सूत्रम् "शब्दान्तरमविकार" इति । यस्त्वया दध्यत्रेत्यत्र इकारस्य यकारो विकार उक्तस्तच्छब्दान्तरमेव न विकारः । परमते शब्दस्य गुणत्वात् स्वमते च विभुत्वेन विकाराऽयोगात् । नन्विको यणचीति स्मृतिवशादिकारः प्रकृतिर्यकारो विकृतिरित्यवगम्यते ? । नैवम् । स्मृत्या प्रकृतिविकृतिभावप्रतिपादनात् । उक्तं हि शास्त्रादौ 'सिद्धे शब्दार्थसम्बन्धेनियमार्थं व्याकरणम्' इति । प्रकृतिविकारभावं च ब्रुवता दध्यत्रपदमसिद्धमेव साधितं स्यात् । अतोऽयमभिप्रायः सूत्रकारस्य । अचि परतः संहितायामेव यणन्तानां साधुत्वमन्यत्र चेगन्तानामिति । एतेन संप्रसारणं व्याख्यातम् । नापि सादृश्यात्प्रकृतिविकारभावावगतिः । इकारयकारयोः सर्वात्मना सादृश्याऽभावात् । यदुक्तं 'वृद्धिश्च कर्तृभूम्नाऽस्येति'

तत्परिहारसूत्रम् नादवृद्धिपरेति। या त्वया शब्दस्य वृद्धिरुक्ता सा ध्वनिरूपस्य संयोगविभागात्मकस्य नादस्यैव न शब्दस्य निरवयवत्वात्। बहुषु हयुच्चारयत्सु उत्पद्यमानाः संयोगविभागाः पृथक् पृथक् शब्दं व्यञ्जयन्तः स्वगतमुपचयं तत्रारोपयन्तः शब्दे महत्त्वव्यवहारमुपजनयन्ति, न स्वतः शब्दे वृद्धिरुपपद्यते निरवयवत्वात् एवं पदस्यापि। उक्तं च—

"वर्णोऽनवयत्वात्तु वृद्धिह्रासौ न गच्छति।
व्योमादिवदतोऽसिद्धा वृद्धिरस्य स्वरूपतः" इति (श्लो. वा. २१२)

भाष्यकारोप्याह "वायवीयाः संयोगविभागा नैरन्तर्येण क्रियमाणाः शब्दमभिव्यञ्जन्तो नादशब्दवाच्याः। तेन नादस्यैषा वृद्धिर्न शब्दस्येति"। ननु यदि वायवीयाः संयोगविभागा संयोगविभागविशिष्टो वायुरेव नादो न शब्दविशेषस्तर्हि वायोरश्रावणत्वात्तद्रूपस्य शङ्खादिनादस्य श्रवणं न स्यात्?। अत्र केचित् वायुगुणभूताः ध्वन्याख्याः शब्दविशेषा एव श्रोत्रेण गृह्यन्ते त एव च वायुना सह ताल्वादिभिः प्रेरिताः श्रोत्रं संस्कुर्वन्तः शब्दस्य व्यञ्जकाः इत्याहुः। ननु वर्णोच्चारणवेलायां ध्वनयो न श्रूयन्ते तत्कथं तेषां व्यञ्जकत्वम्। मैवम्। वर्णोच्चारणे ध्वन्युपलब्धेः सर्वजनीनत्वात्। तथा च दूरादधीयानेषु वर्णानशृण्वन्तोपि ध्वनिमात्रं शृण्वन्ति। ते च ताल्वादिसंयोगविशेषलाभे सति वर्णान्व्यञ्जन्ति स्वयं चोपलभ्यन्ते। भेर्यादिध्वनयस्तु केवलं स्वयमेवोपलभ्यन्ते। भाष्योक्तवायवीयध्वनिपक्षे तु ध्वन्याख्यशब्दाभावेऽपि वायुना नादेव शङ्खादिघोषश्रवणमुपपद्यते। अधिकं तु वार्त्तिकेऽवगन्तव्यम्। एवं तावत्षड्भिः सूत्रैः परपक्षं प्रतिक्षिप्य तावन्मात्रेण

अर्थप्रतिपत्त्यनुपपत्त्या तु नित्यत्वमेव युक्तम्, न हि प्रत्युच्चारणमन्यस्याऽन्यस्य क्रियमाणस्यार्थप्रत्याय-

---

स्वसिद्धान्ताऽसिद्धिं मन्यमान आह । 'नित्यस्तु स्याद्दर्शनस्य परार्थत्वादिति । सिद्धान्तसूत्रमेतत् । तुशब्दः पक्षं व्यावर्तयति नित्यः शब्दो भवितुमर्हति । कुतः । दर्शनस्य परार्थत्वात् दृश्यते शब्दोऽनेनेति दर्शनमुच्चारणं तस्य परार्थत्वात् अर्थप्रत्यायनार्थत्वात् । उच्चारितमात्रो विनश्यतीति चेच्छब्दः तदार्थावगत्यर्थं नोच्चार्येत । अगृहीतसङ्गतिकत्वेनार्थाविबोधकत्वाऽसंभवात् । अर्थवत्साद‍ृश्यादर्थावगम इति चेत् । नकश्चिदपि शब्दोऽर्थवान् सर्वेषामभिनवत्वात् । नन्वसिद्धोऽयं हेतुः पारार्थ्यस्य दर्शनधर्मत्वेन शब्दधर्मत्वाऽभावात् । स्वरूपेण सिद्धस्यापि पक्षधर्मत्वेनासिद्धिः । नैष दोषः । अर्थापत्तेरविवक्षितत्वात् । यथाहुः—

"अनुमानप्रयोगे हि वक्तुमित्यादि युज्यते ।
अर्थापत्तिरियं चोक्ता पक्षधर्मादिवर्जिता" इति (श्लो.वा.२३८)।

अर्थापत्तौ च द्वावेव दोषौ अन्यथा प्युपपत्तिरन्यथैवोपपत्तिः । तदिहापि यद्यनित्यत्वेऽप्यर्थप्रत्यायकत्वमुपपद्येत अनित्यत्व एव वा ततो दूषणं स्यादिति । अतोऽर्थप्रत्यायकत्वेन नित्यत्वमेवाङ्गीकर्तुं युक्तमिति सूत्रार्थः । ग्रन्थकारोप्येतत्सर्वमभिप्रेत्याह । अर्थप्रतिपत्त्यङ्गत्वाच्छब्दस्य नित्यत्वमेव युक्तमित्यर्थः । उक्तं च—

"फलवद्व्यवहाराङ्गभूतार्थप्रत्ययाङ्गता ।
निष्फलत्वेन शब्दस्य योग्यत्वादवधार्यते" इति (श्लो.वा.२३८)।

अनुपपत्तिमेवोपपादयति । नहीति । कथं न सम्भवती-

कत्वं सम्भवति, सम्बन्धग्रहणासम्भवादगृहीतसम्बन्धस्य चाऽप्रत्यायकत्वात् । न चान्यस्मिन् गृहीतसम्बन्धेऽन्यस्य प्रत्यायकत्वं सम्भवति–न हि गोशब्दे गृहीतसम्बन्धेऽश्वशब्दः प्रत्याययति । .

सत्यम्–असदृशो हि न प्रत्याययति यस्त्वऽन्योऽपि गृहीतसम्बन्धेनार्थवता शब्देन सदृशः शब्दः स प्रत्याययतीति चेत् ?, न, तदसम्भवात्—नहि कश्चिदपि मुख्योऽर्थवान् सम्भवति सर्वेषां तुल्यत्वेन सम्बन्धाऽग्रहणात्, न हि द्विस्त्रिर्वाऽनुपलब्धस्य सम्बन्धग्रहणं सम्भवति, अन्वयव्यतिरेकाऽभावात् ।

अथ व्युत्पत्तिसमये सदृशेषु शब्देषु द्विस्त्रेषूपलब्धेषु पश्चाच्छ्रूयमाणः सम्बन्धग्रहणं लब्ध्वाऽर्थवान्

त्यत आह । सम्बन्धेति । अगृहीतसम्बन्धस्यचार्थप्रत्यायकत्वेऽपूर्वोऽपि सर्वः शब्दः सर्वं प्रकाशयेदिति भावः । सम्बन्धज्ञानं च न क्षणिकस्य सम्भवतीति भावः । ननु कञ्चित्कालं शब्दोऽवस्थास्यति यावत्सम्बन्धदर्शनं व्यवहारश्च सम्भवति नैतावताऽनित्यत्वसिद्धिः । सत्यमेतत् । यद्यवस्थानं स्यात् कञ्चित्कालमवस्थाने वा कालान्तरावस्थानं को निवारयेत् । यथाहुः–

"सम्बन्धदर्शनं चास्य नानित्यस्योपपद्यते ।
सम्बन्धज्ञानसिद्धिश्चेद्ध्रुवं कालान्तरेस्थितिः" (श्लो.वा.२४२)

शङ्कते । सत्यमिति । परिहरति । नेति । असम्भवमेवोपपादयति । नहीति । तदुक्तं—

"कस्य चैकस्य सादृश्यात् कल्प्यतां वाचकोऽपरः ।
अदृष्टसङ्गतित्वेन सर्वेषां तुल्यता यतः" (श्लो.वा.२४८) ॥

भवति तदुत्तरकालास्तत्सादृश्यात् प्रत्याययन्तीत्युच्यते ? । तदयुक्तम्—य एवोपलब्धशब्दान्तरेण पश्चाच्छ्रूयमाणोऽर्थवान् निरूप्यते स एवाश्रुतशब्दान्तराणां पुरुषाणां प्रथमश्रुतोऽनर्थक इति विरोधापत्तेः, तदुक्तम्—

" अप्रतीतान्यशब्दानां तत्कालेऽसावऽनर्थकः ।
स एवान्यश्रुतीनां स्यादर्थवानितिविस्मयः " इति
(श्लो. वा. २९०)

अथाऽर्थवानेवायम्, अप्रतीतान्यशब्दास्त्वन्वयव्यतिरेकवैकल्यादर्थवत्त्वं न जानन्तीत्युच्यते ? । तथा सति तदुत्तरकालानामपि शब्दानामेवमऽर्थवत्त्वसम्भवात् किमिति सादृश्येन प्रत्यायकत्वम् । तदुक्तम्-"अथाऽस्य विद्यमानोपि" (श्लो. वा. २९१) इत्यादिना ।

अथोत्तरकालस्य शब्दस्य कांश्चिदगृहीतसम्बन्धान् प्रत्यऽप्रत्यायकत्वादानर्थक्यमेवाश्रीयते ?, ततो योऽसावऽर्थवत्त्वेनाभिमतः शब्दो यत्सादृश्यादुत्तरेषां प्रत्यायकत्वं सोपि केषां चिदऽप्रत्यायक इत्यन-

---

उक्तेऽर्थे वार्त्तिककृत्संमतिमाह । तदुक्तमिति । य एव हि कस्य चिच्छ्रुतशब्दान्तरस्य चरमश्रुतोऽर्थवान्स्यात् स एवाऽश्रुतशब्दान्तरस्यान्यस्य प्रथमश्रुतत्वादनर्थकः स्यादिति विरुद्धमापद्येतेति श्लोकार्थः । अत्रापि संमति माह । तदुक्तमिति ।

"कैश्चिदर्थो न गम्यते ।
तत्तुल्यमुत्तरस्येति किं सादृश्येन वाचकः" ।
इति श्लोकशेषः । तदुक्तमिति ।

र्थक एवेति सर्वेषामानर्थक्यं स्यात्,

तदुक्तम्–"अनर्थकत्वमस्य स्यात्"(श्लो.वा.२५१) इत्यादिना।

किं च व्युत्पत्तिकालवर्ती शब्दोऽर्थवान् उत्तरे तु व्यवहारकालवर्तिनस्तत्सादृश्यात् प्रत्याययन्तीति ब्रुवाणस्य विरुद्धमापद्यते–य एव हि केषांचित् व्युत्पत्तिकालवर्ती स एवान्येषां व्यवहारानुपातीत्येकस्यैवार्थवत्त्वं मुख्यं तत्सादृश्याद् गौणमिति विरोधः,

तदुक्तम्–"अर्थवत्सदृशत्वेन"(श्लो.वा.२५३)इति,

तस्मान्न सादृश्येन प्रत्यायकत्वमित्येकत्वमेव शब्दस्याऽऽश्रयितव्यम्।

अथ गत्वादिसामान्यमेकमाश्रित्य वाचकत्वं स-

"अथानन्यश्रुतीन्प्रति।

पूर्वस्मिन्नपि तत्सत्वात्सर्वानर्थकता भवेत्"

इतिशेषः। अन्यदप्युदाहरति। तदुक्तमिति।

"योवा श्रुत वतां तः।

मुख्योऽसावश्रुतीनां स्यात्तदेकत्वे न युज्यते"।

एक एव शब्दः श्रुतार्थवच्छब्दान्तरस्य गौणः अश्रुतार्थवच्छब्दस्य मुख्यः स्यात् नचैकस्य गौणत्वं मुख्यत्वं च युक्तमित्यर्थः। एतेच श्लोका ग्रन्थकारेणैव व्याख्यातप्रायाः। अत्रैव किञ्चिदाशङ्क्य निराकरोति। अथेति। व्यक्तीति। विवेकाऽग्रहणादेवात्र प्रत्यभिज्ञानव्यक्त्येकत्वमेवावगम्यत इति भावः। कथं निष्प्रमाणकमत आह। यत्रेति। अतोत्रेति। विवेकाग्रहणादेवात्र प्रत्यभिज्ञानव्यक्त्यैकत्वात् अतो भ्रान्तिरूपेत्यर्थः। किमिति नगृह्यत इति चेत्तत्राह। द्वेति। प्रकृतं निगमयति। अत इति।

मर्थ्येत ?, तन्न, तदभावात्–व्यक्तिभेदे हि सामान्यमात्मानं लभते नान्यथा ।

कश्चित् पुनराह–सत्यपि व्यक्तिभेदे निष्प्रमाणकमेव सामान्यम्, यत्र हि भेदावगतौ सत्यामेवाऽभेदावगतिस्तत्र सामान्यम्, इह तु सन्नपि व्यक्तिभेदो नावगम्यते, अतोऽत्र विवेकाग्रहणादेव प्रत्यभिज्ञा भ्रान्तिरूपा नालं सामान्यं साधयितुमिति ।

तत्त्वऽयुक्तम्–सति हि व्यक्तिभेदे कथमन्तरेण सामान्यं प्रत्यभिज्ञा स्यात् ? । विवेकाग्रहणादिति चेत् ?, कोयं विवेकाग्रहो नाम ?, ह्यस्तनाद्गकाराद्द्यतनस्य गकारस्य यद् व्यावृत्तं रूपं तन्न गृह्यते इत्यर्थः । किं तर्हि गृह्यते ? अद्योच्चारितेऽपि गकारेऽवश्यं किंचिद्रूपं गृह्यते. व्यावृत्तं चेन्न गृह्यते व्यक्तमनुवृत्तग्रहणम्. अनुवृत्तं च सामान्यमित्युच्यते. तस्मात् सिध्यति सामान्यम् । न च सादृश्यादेव प्रत्यभिज्ञासिद्धेरलं सामान्येनेति वक्तव्यम्, अवयवसामान्ययोगात्मकत्वात् सादृश्यस्य, वर्णानां चाऽनवयवत्वात् ।

ननु संबन्धिसामान्यमात्रं सादृश्यम्. अतोऽनवयवानामपि तालवादिस्थानसामान्यं सादृश्यं भविष्यति ? । न, अश्रावणत्वात्, श्रवणजन्या हीयं प्रत्यभिज्ञा तदस्याः श्रवणग्राह्यमेवालम्बनं वक्तव्यम्, न च तालवादिसामान्यं श्रावणम्. अतो गत्वादिसामान्यनिबन्धनेयं प्रत्यभिज्ञा सिध्यति । एवं सति

व्यक्तिभेदे सामान्यं तदभावात्तु नास्ति सामान्यमित्येव वक्तव्यम्, अतः सिद्धं प्रत्यभिज्ञया शब्दस्य नित्यत्वम् ।

किं पुनरिदं प्रत्यभिज्ञाख्यं प्रमाणम्?, प्रत्यक्षमिति ब्रूमः पूर्वानुभवजनितसंस्कारसध्रीचीनेन्द्रियजन्यत्वाद् ग्रहणस्मरणरूपमिदमेकं ज्ञानम्, तत्र पूर्वानुभूतोंऽशः स्मर्यते स्मर्यमाणेन तु तेन सहैकत्वविशिष्टं वर्तमानं रूपं प्रत्यभिज्ञया प्रत्यक्षेण गृह्यत इति वेदितव्यम्, तस्मान्नित्यः शब्दः । प्रदीपे तु प्रभामण्डलस्याऽवयवविश्लेषमन्तरेणाऽत्यन्तानुपपत्तेर्विश्लिष्टावयवस्य चाऽवयविनोऽवश्यम्भावी विनाशो विनष्टे च पूर्वस्मिन् प्रदीपे पश्चात्तनमऽवश्यं प्रदीपान्तरमेव भवति, दृढे च भेदे प्रत्यभिज्ञा सादृश्यनिमित्तेति कल्प्यते । शब्दे तु न किं चिद्भेदे प्रमाणमस्तीति विशेषः ।

ननु सर्वभावानां क्षणिकत्वात् कथं शब्दस्य नित्यता? । किं पुनः सर्वक्षणिकत्वे प्रमाणम्? प्रत्यक्षं तावत् तत्कालसत्तां बोधयति न कालान्तरनिषेधं करोति. नीलप्रत्यक्षमिव न पीतिमानं निषेधति । दृश्यादर्शनेन तु तस्य निषेधः, न च सम्प्रति कालान्तरं

ननु प्रदीपेऽपि स एवायमिति प्रत्यभिज्ञाऽस्त्येव नच तया प्रदीपस्य नित्यत्वमत आह । प्रदीपे त्विति । प्रदीपे तु प्रत्यक्षमेव भेदग्राहकं प्रमाणं, शब्दे तु न तादृशं किञ्चित्प्रमाणमस्तीति वैषम्यमित्यर्थः । प्रमाणाभावमेवोपपादयति । प्रत्य-

दृश्यं येन दृश्यादर्शनात् तन्निषेधः स्यात्, न चान्यद-पि प्रमाणं पश्यामः ।

पश्यामः–स्वभावहेतुकं प्रमाणं सत्तामात्रानुबन्धि साध्यविषयत्वादिति । कथं पुनः सत्तामात्रानुबन्ध-सिद्धिः ?, क्षणिकतायाः विपक्षे बाधकप्रमाणप्रवृत्तेः–क्षणिकत्वविपक्षे ह्यक्षणिकत्वे व्यापकानुपलब्ध्या बा-ध्यमाना सत्ता क्षणिकत्वेन व्याप्यमाना तदनुमा-पयति ।

किं पुनः सत्ताया व्यापकम् ?, क्रमाऽक्रमाविति ब्रूमः, तथा हि–अर्थक्रियाकारितैव सत्ता नान्या. न हि स भावः सत्तां लभते यो न कां चिदर्थक्रियामा-रभते, यतः स्वज्ञानस्यापि सर्वे भावाः कारणम्, य-दपि किंचिदऽज्ञायमानमपि सत्त्वेन सम्भाव्यते तदपि सर्वं विज्ञानं प्रत्याऽऽलम्बनत्वादर्थक्रियाकारि, तदऽ-र्थक्रियाकारितैव सत्ता, यदेवार्थक्रियाकारि तदेव प-

---

क्षमिति । क्षणिकत्वे प्रमाणं शङ्कते । पश्याम इति । सतो वस्तुनः स्वभाव एव क्षणिकत्वे प्रमाणम् । कथमित्यपेक्षायामाह । स-त्तेति । सत्तामात्रानुबन्धि यत्साध्यं क्षणिकत्वं तद्विषयत्वाद्वस्तु-स्वभावस्य । यत्सद्वस्तु तत्क्षणिकमिति नियमादिति भावः । एतदेव प्रश्नपूर्वकमुपपादयति । कथमिति । अत्रोत्तरम् । विपक्ष इति । अक्षणिकत्वे सत्ताया बाधकप्रमाणप्रवृत्तेः सत्तानुब-न्धसिद्धिरित्यर्थः । एतदेव विवृणोति । क्षणिकत्व इति । ननु स्थायित्वेऽपि सत्तोपपत्तेर्न क्षणिकत्वे सत्त्वं व्यापकत्वमित्यभि-प्रायेण पृच्छति । किं पुनरिति । उक्तमर्थं विवृणोति । तथाहीति ।

रमार्थसदिति । सा च क्रमयौगपद्याभ्यां व्याप्ता, न चाऽक्षणिकत्वे ते संभवतः– स्थायी हि पदार्थो न तावदऽर्थक्रियाः सर्वा युगपत्कर्तुमर्हति तथा सति द्वितीये क्षणे कृत्याऽभावादऽर्थक्रियाकारित्वविरहादऽसल्लक्षणापत्तेः क्षणिकत्वमेव स्यात् । नापि क्रमः संभवति– स हि भावः सर्वार्थक्रियासमर्थः किमिति कां चिदेवारभते नाऽन्याम्? समर्थस्य क्षेपायोगात्।

सहकार्यऽपेक्षया विलम्बत इति चेत्?, न, सहकारिणो ह्यऽकिंचित्करा अनपेक्ष्याः। किं चित्कराश्चेत्? यत्तैः क्रियते तदेव कार्यसाधनं स्यात् तदनन्तरं कार्यनिष्पत्तेः. भावस्त्वऽकारणमेव स्यात्– न ह्यागन्तुकेऽतिशये कार्यमारभमाणे भावस्य कारणता संभवति भिन्नत्वात्. अभेदे वा भावोपि तत्कालजन्मा क्षणिक एव स्यात् भेदाऽभेदौ तु विरुद्धावेव, तस्मान्नाऽक्षणिकस्य सत्ता सम्भवतीति सिद्धं सन्मात्रानुबन्धित्वं क्षणिकतायाः।

किं च कृतकानां भावानामवश्यम्भावी विनाशस्तेनापि क्षणिकत्वं घटादीनाम्, तथाहि–यद् येषां ध्रुवभावि न तत्र तेषां हेत्वन्तरापेक्षा, ध्रुवभावी च

अर्थक्रियां कुर्वत एव सत्तालाभ इति भावः। अस्त्वेवं कथमेतावता क्षणिकत्वसिद्धिरत आह । सा चेति। कथं न सम्भवतीत्यत आह। स्थायीति। युक्त्यन्तरमाह । किञ्चेति । येषां यद्ध्रुवभावि तेषां तत्र हेत्वन्तरापेक्षा नास्तीत्यर्थः। न्यायं प्रकृते योजयति । ध्रुवेति । विरुद्धव्याप्तोपलब्धिं विवृणोति ।

कृतकानां विनाश इति विरुद्धव्याप्तोपलब्धिः–ध्रुवभाविता हि निषिध्यमानहेत्वन्तरापेक्षित्वव्याप्ता अग्न्युष्णत्वादिषूपलब्धा स्वव्यापकमनपेक्षत्वमुपस्थापयन्ती तद्विरुद्धं सापेक्षत्वं प्रतिक्षिपति। अथ वा हेत्वन्तरापेक्षाणां वाससि रागादीनामध्रुवभावित्वव्याप्तेस्तद्विरुद्धं ध्रुवभावित्वं व्यापकविरुद्धोपलब्ध्या विनाशस्य हेत्वन्तरापेक्षां निवारयति, निरपेक्षश्च विनाशः स्वाभाविको जन्मानन्तरमेव भवतीति सिद्धः क्षणभङ्गः।

मुसलप्रहारादयस्तु विसदृशसन्तानहेतवो न विनाशस्य। प्रतिपत्तारस्तु सदृशपराऽपरोत्पत्त्या क्षणानां भेदमलक्षयन्तस्तत्त्वभ्रान्त्या विनाशमऽबुद्धा मुसलप्रहारानन्तरं विसदृशसन्तानदर्शिनस्तदैव विनाशं मन्यमाना मुसलादेर्विनाशहेतुतां मन्यन्ते। परमार्थतस्तु न केऽपि विनाशहेतवः, हेत्वन्तरजन्मा च विनाशो न तावद् भावादभिन्नो भवितुमर्हति हेतु-

---

ध्रुवभावितेति। निषिध्यमानं यद्धेत्वन्तरापेक्षित्वं तेन व्याप्ता यथाऽग्नेरुष्णत्वं ध्रुवभावित्वान्न हेत्वन्तरापेक्षं तथा नाशस्य ध्रुवभाविता हेत्वन्तरापेक्षां प्रतिक्षिपतीति सम्बन्धः। एवमन्वयमार्गेणोक्त्वा व्यतिरेकेणाह। अथवेति। रागादीनां हेत्वन्तरापेक्षित्वमध्रुवभावित्वेन व्याप्तं दृष्टमिति दृष्टान्तार्थः। फलितमाह। निरपेक्षश्चेति। विनाशस्य हेत्वपेक्षाऽस्तीति चेन्नेत्याह। मुसलेति। उत्तरग्रन्थो निगदव्याख्यातः। तदेतन्निराकर्तुमार-

भेदात्, भिन्नत्वे तु तस्मिन् जातेपि भावस्य पूर्ववदुपलब्धिः स्यात् पटजन्मनि घटवत्, तस्मात् स्वहेतुत एव भावा विनाशस्वभावा जायन्ते इति क्षणभङ्गसिद्धिः ।

किं च प्रयत्नरक्षितानामपि घटादीनां कियतापि कालेनाऽवयवक्षयविश्लेषवशेन विनाशो दृश्यते विनैव मुसलप्रहारादिभिः, सोयमुत्पत्तिप्रभृति किं चित् किं चिदऽन्यथात्वमन्तरेण नोपपद्यते, प्रत्यक्षेणैव चान्यथात्वमभिनवपुराणावस्थयोरऽज्ञातघटोत्पत्तिकालेऽपि पुरुषैरुपलभ्यते, न चैकस्यैव घटस्य नानारूपत्वं संभवति नानात्वैकत्वयोर्विरोधात्, तस्मात् प्रतिक्षणमन्यत्वं घटादेः । प्रयोगश्च भवति—

विवादाध्यासिता भावाः सत्त्वात् क्षणविनाशिनः ।
दीपवत्, प्रत्यभिज्ञापि स्यात् प्रदीपवदेव नः ॥४८॥

अत्राभिधीयते—न तावदर्थक्रियाकारितैव सत्ता सतो ह्यऽर्थक्रियाकारिता न तु सैव सत्ता—न च सर्वस्य भावस्यार्थक्रियाकारितानियमः अतत्कारिणोपि संभवात् । न च ज्ञानकारणत्वमपि सर्वस्य नियतम्—अज्ञायमानस्यापि स्वरूपसद्भावसंभवात् । न च सर्वेषां विज्ञानं प्रत्यालम्बनहेतुताऽतीताऽनागतानां भावानां संभवति, अविद्यमानानां हेतुत्वानुपपत्तेः । हेतुत्वे वा सर्वज्ञाननिष्पत्तौ सर्वेषां व्यापृतत्वात् क्रमानभ्युपगमेन च पुनर्व्यापारानुपपत्तेः, तल्लक्षणत्वाच्च

भते । अत्रेति । यदुक्तं किञ्चित्कराश्चेदित्यादि तत्परिहरति ।

सत्तायाः सर्वज्ञानानन्तरमेव समस्तस्य जगतः शून्यताप्रसङ्ग इति यत् किंचिदेतत्।

संभवति च भावानां क्रमेणार्थक्रियाकारणत्वम्, सहकारिव्यपेक्षया विलम्बोपपत्तेः। सहकारिणश्चाऽतिशयमाऽऽगन्तुकं भावाद् भिन्नाभिन्नं भिन्नमेव वा कुर्वन्त्येव, यथा बीजस्य क्षितिसलिलसंयोगेऽतिशयः, तदलाभे स्थायिनोपि बीजस्य प्रागङ्कुरानारम्भः, लाभे चारम्भ इति न काचिदनुपपत्तिः।

नन्वेवं संयोगस्यैव कारणत्वं स्यान्नतु बीजस्य? । नैवम्, संयोगमात्रात्तदुत्पत्त्यऽदर्शनात्—न हि क्षितिसलिलसंयोगोऽङ्कुरं जनयति। बीजविशिष्टस्य तु संयोगस्य कारणत्वे विशेषणीभूतस्य बीजस्यापि कारणत्वमङ्गीकार्यम्। यस्तु सहकार्यऽपेक्षां नानुमन्यते तस्य क्षितिसलिलसंयोगानपेक्षात् कुसूलस्थादेव बीजादङ्कुरो जायेत।

नन्वन्त्यक्षणप्राप्तः समर्थ एव भावोऽनपेक्षो जनयितुम्, निरपेक्षोप्यसौ सहकारिभिर्विना नास्तीति तैर्विना न करोति, कुसूलस्थं हि बीजमन्यदेव, अ-

---

सहकारिणश्चेति। भावाद्भिन्नाऽभिन्नं भिन्नमेव वा भावनिष्ठमतिशयं कुर्वन्ति अतो भावस्यैव कारणता नतु तस्येति भावः। चोदयति। नन्विति। तदनन्तरं कार्योपलम्भादितिभावः। अत्रैव विशेषं शङ्कते। नन्विति। अनपेक्षश्चेत्कथं सहकारिणमपेक्षतेऽत आह। निपेरक्षोपीति। स्वरूपलाभार्थमेव तस्य सहकार्यपेक्षा न

न्यचेदं क्षितिसंयुक्तं यतोऽङ्कुरो जायते ? । सत्यम्, इदं त्वत्र वक्तव्यम्–यदिदमन्त्यक्षणप्राप्तं क्षितिसलिलसंयुक्तमङ्कुरजनकं तद् यदि कृषीवलप्रयत्नविरहात् कुसूलस्थमेव स्यात् तदापि किमङ्कुरं जनयति ?, ओमिति चेत् ? किमर्थं तर्हि कृषीवलस्य प्रेक्षापूर्वकारिणः प्रयासः, विदुषां च स्वर्गापवर्गार्थं चैत्यवन्दनादिप्रयासः, तदुपदेशश्च देशिकानामनर्थकः स्यात्–अन्त्यक्षणप्राप्ताद्विज्ञानादेव धर्माधर्मानपेक्षात् स्वर्गापवर्गसिद्धेः, तस्मात्सहकार्यऽपेक्षाऽङ्गीकर्तव्या, ततश्च सहकारिसंनिधिक्रमेण सम्भवति स्थायिनोपि भावस्य क्रमेणार्थक्रियाकरणमिति विपक्षे बाधकप्रमाणाभावादऽनियता क्षणिकत्वेन सत्ता नालं तदऽनुमापयितुम् । न च ध्रुवभावितया विनाशस्य हेत्वन्तरानपेक्षत्वम्–घटसन्ताने कपालसन्तानस्य ध्रुवभाविनो मुसलप्रहारादिहेत्वन्तरापेक्षादर्शनादऽनैकान्तिकत्वात् ।

ननु हेत्वन्तरेण भावाद् भिन्ने विनाशे जाते विनाशिनोपि भावस्य पूर्ववदुपलब्धिः स्यात् तस्मात् स्वाभाविको विनाशः । किमिदं स्वाभाविकम् ?

कार्यजननार्थमितिभावः । परिहरति । सत्यमिति । विपक्ष इति । क्षणिकत्वविपक्षे स्थायित्वपक्षे अर्थक्रियाकारित्वे बाधकप्रमाणाभावादित्यर्थः । ततः किमत आह । अनियतेति । प्रभायाः क्षणिकत्वव्यभिचारादगमकत्वमित्यर्थः । उक्तदूषणपरिहारो–न चेत्यादिना । न चेति प्रतिज्ञायां हेतुः घटसन्तान इति । कि-

इति । भावस्वभावादेव विनाशो जायते न हेत्वन्तरादित्यर्थः ।

ननु भावादपि जातो विनाशो भावाद् भिन्नश्चेत्? तुल्य एव दोषः—पूर्ववदुपलब्धिः स्यादिति । अथाऽभिन्न एव विनाशो भावात्? ततो विनाशस्याऽप्रत्यक्षत्वाद् भावोऽप्यऽप्रत्यक्षः स्यात् । अत्यन्तविपरीतस्वभावयोश्च भावाभावयोरेकत्वाभिधानं साहसमात्रम् ।

अथापि विनाशो नाम न किं चिद् भिन्नमभिन्नं वा तत्त्वं तुच्छत्वादिति? । ततो जातस्य भावस्याऽसति विनाशे नित्यत्वमेव स्यादिति सुसमर्थितः क्षणभङ्गः । तस्माद् भिन्नेनापि विनाशेन भावस्योपलब्ध्यादि निरस्यत इत्यऽकामेनाप्यभ्युपगन्तव्यम् ।

यत्तु प्रतिक्षणमवस्थाभेद इति, भवतु. नैतावताऽवस्थावतो भावस्य प्रतिक्षणं विनाशेन भवितव्यं प्रमाणाभावात्, नानाऽवस्थानामपि युगपदेकस्मिन्

मिदमितिसिद्धान्तिप्रश्नः । भावस्वभावादिति—क्षणभङ्गवादिन उत्तरम् । ननु भावादपीत्यादिःसिद्धान्तिग्रन्थः । दोषमेवाह । पूर्ववदिति । यथा विनाशात्पूर्वकाले उपलम्भस्तथा विनाशोत्तरकालेऽप्युपलम्भः घटजन्मनि पटस्येवेत्यर्थः । एतच्चाभ्युपेत्यवादेनोक्तम् । वस्तुतस्त्वभेदएव न सम्भवतीत्याह । अत्यन्तेति । अन्यदप्याशङ्क्य निराकरोति । अथापीति । नानेति । नानावस्थानामपि अविरुद्धानामेकस्मिन्धर्मिणि युगपत्सम्भवात् विरुद्धानां च क्रमेण सम्भवात् नावस्थाभेदमात्रेण क्ष-

धर्मिण्यऽविरुद्धानां क्रमेण विरुद्धानां च संभवात्, ततश्च नूतनाद्यवस्थाः क्रमेणानुभूय पुराणावस्थां प्राप्तस्य प्रयत्नरक्षितस्यापि युक्तोऽवयवविश्लेषाद्विनाशः। न च सत्तया दीपदृष्टान्तमात्रेण घटादेरपि क्षणिकत्वम्–सत्तायाः संदिग्धविपक्षव्यतिरेकादऽहेतुत्वात्। प्रतिज्ञायाश्च प्रत्यभिज्ञाप्रत्यक्षविरोधात्।

न च सादृश्यात्तदुपपत्तिः–अवयवसामान्याऽसंभवात्, अनुवृत्तं हि सामान्यं भवति न च सर्वक्षणिकवादिनामनुवृत्तं किंचित्संभवति, सम्भवे वा न सर्वक्षणिकत्वम्, तस्मान्न सर्वभावानां क्षणिकत्वं न तरां शब्दस्य, तस्य ह्यन्तेपि विनाशो नास्ति यतः सूक्ष्मविनाशकल्पना स्यात्, तस्मान्नित्यः शब्दः। प्रयोगश्च भवति– नित्यः शब्दः श्रावणत्वाच्छब्दत्ववत्।

णिकत्वसिद्धिरिति तात्पर्यार्थः। विनाशस्तु युज्यत इत्याह। ततश्चेति। सत्ताया इति। विपक्षे स्थायित्वे सत्तायाः सम्भवाद्व्यभिचारेणाहेतुत्वमित्यर्थः। निराकरणमुपसंहरति। तस्मादिति। सूक्ष्मविनाशः प्रतिक्षणविनाशः। महाप्रकृतं निगमयति। तस्मादिति। युक्तिभिरुपपादितमर्थं प्रयोगेण द्रढयति। प्रयोगश्चेति। न चास्य वायुधर्मभूतैर्ध्वनिभिर्व्यभिचारस्तेषामपि श्रावणत्वादितिवाच्यम्। ध्वनिधर्मान्यत्वे सतीति विशेषणात्। यथाहुर्वृद्धाः—

"हेतुरेव त्वसौ स्पष्टो नित्यत्वस्योपलभ्यते।
भूतावयवधर्मास्त्यध्वन्यन्यत्वविशेषितः इति"।

न च शब्दत्वं नास्तीति भ्रमितव्यं प्रत्यभिज्ञानात्– अरण्ये हि गच्छन्तोऽश्रुतपूर्वं शब्दविशेषं श्रुत्वा कस्यायं प्राणिनः शब्द इति संदिहते, न च सामान्यदर्शनमन्तरेण विशेषसंशयो घटते । तथाऽवा-

---

अर्थापत्त्यभिप्रायेण वर्णितमपि सूत्रं प्रयोगाभिप्रायेण वर्णयितुं शङ्कते । न चेति ।

"अत्रोच्यते स्थिरः शब्दो धूमगोत्वादिजातिवत् ।
संबन्धानुभवापेक्षसामान्यार्थावबोधनात्" (श्लो.वा.श.३११)

यथा धूमत्वमग्नेर्गमकं गोत्वं च विषाणित्वस्येति दृष्टान्तार्थः । न चानित्यत्वानुमानेनास्य सत्प्रतिपक्षतेति वाच्यम् । तस्य दुष्टत्वात् । न तावत्कृतकत्वेन तत्साधनं कृतकत्वस्य परं प्रत्यसिद्धेः । नाप्यैन्द्रियकत्वं हेतुः आद्यमध्यमशब्दयोरैन्द्रियकत्वाऽसिद्धेः औलूक्यादिभिरन्त्यस्यैव तदङ्गीकारः । अथान्त्य एव पक्षोऽस्तु नैवं ? मीमांसकं प्रत्याश्रयाऽसिद्धेः तेनान्तिमशब्दानङ्गीकारात् । अविशेषेण तु सर्वशब्दपक्षीकरणे भागाऽसिद्धो हेतुः आद्यमध्यमेष्वव्याप्तेः । न च पक्षतावच्छेदकनानात्वे एव दूषणमिति वाच्यम् । एतस्य परिभाषामात्रत्वात् । आद्यमध्यमशब्दयोरनित्यत्वाऽसिद्धेः । किञ्चैन्द्रियकत्वस्य सामान्येष्वपि सत्त्वाद्व्यभिचारः । सामान्यवत्त्वेसतीति विशेषणेऽपि व्यभिचारः गोत्वादीनामपि सत्तासामान्ययोगित्वात् । व्यक्त्यतिरिक्तजात्यङ्गीकारे मीमांसकं प्रति तद्वत्त्वमसिद्धम् । अभेदाङ्गीकारेतु तार्किकं प्रत्यासिद्धिरिति दिक् । पक्षसाध्यहेत्वादिदूषणप्रपञ्चस्तु वार्त्तिके ऽवगन्तव्यः ।

प्रसङ्गादवान्तरसामान्यं साधयति । तथेति । अवा-

न्तरजातिरपि वर्गतृतीयगकारादिष्वनुवृत्ता ककारादिभ्यो व्यावृत्ता काचिदस्ति । तथा वर्गप्रथमेषु द्वितीयेषु चतुर्थेषु पञ्चमेषु च यथास्वमनुवृत्ताः सन्ति जातयः ।

कथमवगम्यते ? । प्रत्यभिज्ञानादेव, तथा हि-कियत्यपि दूरदेशे दकारमुच्चारितं श्रुतवतां गकारादिषु संशयो भवति, न चायं संशयो दत्वनिबन्धनो गकारादिष्वभावात्, अतोस्ति तृतीयादिष्वनुवृत्तमऽन्येभ्यो व्यावृत्तं रूपं यदुपलम्भादेष संशयः । तथा धकारोच्चारणे भकारादिषु संशयो नान्येषु, तेन चतुर्थेष्वप्यस्ति सामान्यम्, एवं प्रथमेषु द्वितीयेषु पञ्चमेषु च यथास्वं सामान्यानि, तैरेव दृष्टान्तैः शब्दस्य श्रावणत्वहेतुना नित्यत्वानुमानम् ।

ननु शङ्खादिनादानामनित्यत्वेपि श्रावणत्वादनैकान्तिको हेतुः ? । न, तेषामपि प्रत्यभिज्ञया नित्यत्वात् । यदि तेषु प्रत्यभिज्ञा नास्ति ततो, 'ध्वन्यऽन्यत्वे सति' इति विशेषणादऽव्यभिचारः । यदा चानित्यत्वं ध्वनीनां तदा कार्यस्याऽनाश्रितस्यानुपपत्ते-

---

न्तरसामान्यसाधनस्य प्रयोजनमाह । तैरेवेति । अत्र सांख्यानां सत्वरजस्तमःस्वभावः शब्दः आर्हतानां पुद्गलारब्धः औलूक्यानामाकाशगुणः । शिक्षाकारस्यार्थवाचकरूपेण शब्दात्मना परिणतोवायुरेव शब्दः । वैयाकरणानान्तु स्फोट एव शब्द इति । तदत्र नानामतातिरेकेण स्वमतं दर्शयितुमाह । यदा चेति । अस्त्वेकमेवाश्रयरूपं द्रव्यं तत्राह ।

राश्रयभूतेन केनचिद् द्रव्येण भवितव्यम्, तस्य चाऽनेकत्वे प्रमाणाभावादेकत्वे, द्रव्यस्यैकद्रव्याश्रितस्याऽभावाद् द्रव्यान्यत्वे, शब्दस्य संयोगविभागयोरनपेक्षकारणत्वाभावादऽकर्मत्वे सति पारिशेष्याद् गुणत्वमेव ध्वनीनां भवति ।

तत्र पार्थिवभेर्यादिगुणत्वे तरङ्गाद्याप्यद्रव्यगुणत्वे वा श्रवणप्राप्त्यऽसंभवान्न तद्ग्राह्यत्वं सिध्येत्, तस्मान्न पृथिव्यादिगुणत्वम् । वायुगुणत्वं तु युक्तम्—मुखशङ्खादिसंयोगाद् भेरीदण्डसंयोगादऽन्यतो वा निष्पद्यमाना वायवस्तच्छब्दविशेषगुणका निष्पन्नाः सर्वासु दिक्षु प्रविशमानाः श्रोत्रेण संयुज्यन्ते ततश्च संयुक्तसमवायात्तद्गतः शब्दः श्रोत्रेण गृह्यते । यस्मादेव वायुगुणः शब्दस्तस्मात् यत्कैश्चिदुच्यते–'शब्दलिङ्गमाकाशम्' इति तन्निरस्तम् । वर्णानां तु नित्यानां द्रव्यत्वमेवाङ्गी क्रियते ।

नन्वेषामपि शब्दत्वाद् ध्वनिवद् गुणत्वानुमानमिति चेत् ? । न, वर्णा न गुणा ध्वन्यऽन्यत्वे सति श्रावणत्वाच्छब्दत्ववद् दिग्वत् कालवच्चेति प्रतिसाधनसद्भावात् । यथा च दिक्कालयोः श्रावणत्वं तथा

एकत्व इति । द्रव्यत्वं त्वनेकद्रव्याश्रितमेव दृष्टं अत एकद्रव्याश्रितस्य द्रव्यत्वासम्भवात् नादस्य द्रव्यान्यत्वमित्यर्थः । कर्मत्वमपि न सम्भवति तल्लक्षणाऽभावादित्याह । शब्दस्येति । एवं गुणत्वे स्वमते वायुगुणत्वं वक्तुं परिशिनष्टि । तत्रेति । एवं शब्दमात्रस्य वायुगुणत्वे वर्णेषु विशेषमाह । वर्णानामिति ।

प्रागेवोक्तम् । यत्तु स्पर्शविरहितत्वे सत्येकेन्द्रियग्राह्यत्वाद्रूपादिवच्छब्दस्य गुणत्वमिष्यते, तस्यापि यथोक्तमेव प्रतिसाधनमित्यास्तां तावत् । तस्माद् ह्यस्तनाद्यतनयोः प्रत्यभिज्ञानाद्वर्णानां न तावत् प्रत्युच्चारणमन्यत्वम् । एवं चोच्चारणं शब्दस्य न कारणं किं त्वभिव्यञ्जकमिति सिद्धम् । न चोच्चारणादन्यत् कारणं संभवतीत्यऽकार्यत्वम्, अत एवाऽविनाशान्नित्यत्वसिद्धिः । इदमेव हि नित्यत्वम्–यत्स्वरूपसद्भावे सत्युत्पत्तिविनाशरहितत्वम् ॥

(इति षष्ठं शब्दनित्यताधिकरणं सम्पूर्णम् ।)

न तावादिति । अतो नोच्चारणं वर्णानां कारणमिति । एवं शब्दमात्रस्य वायुगुणतेतिभावः । कथं तर्हि तदनुविधानं वर्णानामतआह । एवमिति । ततश्च दर्शनस्य परार्थत्वादित्यस्य उच्चारणस्य शब्दाभिव्यक्त्यर्थत्वादित्यप्यर्थः सम्भवतीति भावः॥ अधिकरणार्थमुपसंहरति । अत इति । अत्र द्वितीयं सिद्धान्तसूत्रम् । सर्वत्र यौगपद्यादिति । इतोऽपि नित्यः शब्दः यतो गोशब्दात्सर्वत्र सर्वगवीषु युगपत्प्रत्ययो जायते । अत आकृतिवचनोऽयं नचाकृत्या शब्दस्य सम्बन्धः शक्यते कर्तुमिति सम्बन्धनित्यत्वद्वारा शब्दनित्यत्वं साध्यते । विनष्टे शब्दे तन्नित्यताया असम्भवात् । विनश्वराणामपि व्यक्तीनां जातिसम्बन्धोनित्यो दृष्ट इति चेत् । तत्र जात्याश्रयाणां व्यक्तीनामत्यन्तानुच्छेदात् सम्बन्धनित्यत्वम् । तद्ध्यनुच्छेदरूपेण सर्वथा सन्त्येव । गोशब्दानान्त्वनुच्छेदरूपेण स्थित्यभावात् । ननु सम्बन्धनित्यताया अभावात्कथं तद्द्वारा शब्दनित्यत्वसि-

द्धिः ? । नैषदोषः । सम्बन्धस्य कृत्रिमत्वेऽङ्गुल्या कश्चिदेकमर्थं निर्दिश्य सम्बन्धः क्रियेत अनेकव्यक्तिष्वङ्गुलिनिर्देशाऽसम्भवात् ततश्चैकव्यक्तिनिष्ठः सम्बन्धोन सार्वत्रिकः स्यादिति न सर्वगवीषु प्रत्ययः सिध्येत् । जातिमेव निर्दिश्य सम्बन्धःक्रियत इति चेत् । न । बहुजातिसान्निधाने हि सकृच्छ्रुतस्य गोशब्दस्य गोत्वमात्रशक्तिनिर्धारणा न स्यात् । यथाहुः—

"पार्थिवद्रव्यसत्वादि लाङ्गुलत्वादिसङ्करात् ।
विनाप्रयोगभूयस्त्वान्न स्याद्गोत्वाऽवधारणा" (श्लो. वा. श. ३६०) इति ।

नित्ये तु गोशब्दे सति बहुकृत्व उच्चारितः श्रुतपूर्वस्यान्यासु गोव्यक्तिष्वन्वयव्यतिरेकाभ्यामाकृतिवचनतामवगमयिष्यति । तस्मादपि नित्यः । प्रयोगश्चात्र वार्तिककारैर्दर्शितः—

"तस्मादकृत्रिमः शब्दोन कदाचिद्विनश्यति ।
नित्येन नित्यसम्बन्धादाकाशपरमाणुवत्" (श्लो.वा.श.३६१

अथ वा शब्दनित्यत्वमेवानेन सूत्रेणोच्यते न सम्बन्धनित्यत्वं नित्येत्यादिभाष्यपर्यालोचनयैवमर्थावगमात् । यथाहुः—

" बहुभिः श्रवणैरेष प्राणित्वादीनि वर्जयेत्
निकृष्टगोत्ववाचित्वं चिरेण प्रतिपद्यते" श्लो.वा.श.३६५)
तावत्कालं स्थिरं चैव कः पश्चान्नाशयिष्यति" ।

तथा परं सूत्रम् सङ्ख्याऽभावादिति । अष्टकृत्वो गोशब्द उच्चारित इति हि वदन्ति नाष्टौ गोशब्दा इति तेनैकत्वमवगम्यते भिन्नत्वे तु शब्दस्याष्टौ गोशब्दाइति सङ्ख्यया भाव्यं साच नास्ति अतः सएवायमिति प्रत्यभिज्ञानादेकत्वं शब्दस्य । सादृश्यात्प्रत्यभिज्ञानमिति चेत् । न । तादृश इति प्रतिपत्त्यभावात् कृत्वसुच् प्रत्ययानुपपत्तेश्च । योऽयं क्रियाभ्यावृत्तिगणनविहितकृत्वसुच्

प्रत्ययः स क्रियावतामभेदे भवति । तेन पूर्वोच्चारितस्यैव गोशब्दस्य पुनरुच्चारणक्रियैवानुवर्त्तत इत्यवगम्यते । तदुक्तम्—

" क्रियावतामभेदे हि क्रियावृत्तिषु कृत्वसुच् ।
तत्प्रयोगाद्ध्रुवं तस्य शब्दस्यावर्तते क्रिया"(श्लो.वा.श.३६७)

भुक्तवन्तोऽष्टकृत्वो ब्राह्मणा इति प्रयोगदर्शनाद् व्यभिचारी कृत्वसुच्प्रत्यय इति चेत् । नैषदोषः । कृत्वसुच्प्रत्ययेनाऽत्र प्रत्यभिज्ञानरूपप्रमाणान्तरोपस्थापनात् । नापि कृत्वसुचो व्यभिचारः एकब्राह्मणत्वाविवक्षयाऽत्र प्रयोगानिष्पत्तेः । "अत्र बुद्धिकर्मणी अपीत्यादिशङ्कापरिहारभाष्यं नहि ते प्रत्यक्षे, अथप्रत्यक्षे ? तेऽपि नित्ये एवेति"। तदनुपपन्नमिव प्रत्यक्षत्वेन हि नित्यत्वं साधयतो घटादिभिर्व्यभिचारः स्यात् । अप्रत्यक्षत्वेन चानित्यत्वसाधने व्योमादेरप्यानित्यता स्यात् । ततः परिहारभाष्यस्यायमभिप्रायो वर्णनीयः नास्माभिः प्रत्यभिज्ञा शब्दस्य नित्यत्वे हेतुत्वेनोक्ता येनानैकान्तिकत्वमुच्येत । किन्त्वनित्यत्ववादिनं प्रति प्रत्याभिज्ञाप्रत्यक्षविरोधोयमुक्तः । नच प्रत्यक्षस्यानैकान्तिकत्वं दूषणं स्यात् । अथवा लिङ्गत्वेऽपि प्रत्यभिज्ञाया नानैकान्तिकत्वं प्रत्यक्षत्वेन विशेषणात् न हि बुद्धिकर्मणोः प्रत्यक्षत्वमिति भाष्यार्थः । न च घटादिभिर्व्यभिचारः स्थायित्वमात्रसाधने तस्य दृष्टान्तत्वात् । नित्यत्वसाधनत्वे तु श्रौत्रप्रत्यक्षत्वमेव हेतुः शब्दत्वञ्च दृष्टान्त इति । ननु कर्मणः प्रत्यक्षत्वात्कथमप्रत्यक्षत्वाभिधानम् । नैषदोषः । परमाण्वाद्याश्रितकर्माभिप्रायत्वात् । प्रत्यक्षत्वाऽभिधानन्तु प्रत्यक्षद्रव्यवृत्तिकर्माभिप्रायं तस्य तु शब्दत्ववदेव प्रत्यक्षत्वान्नित्यत्वमिष्टमेवेति । यथाहुः—

" यत्कर्मातीन्द्रियाधारं तदप्रत्यक्षमिष्यते।
प्रत्यक्षद्रव्यवर्त्तिन्यो दृश्यन्ते याः क्रियाः पुनः॥
तासां वर्णवदेवेष्टं नित्यत्वं प्रत्यभिज्ञया"(श्लो. वा. श. ३९५

यदि नित्या एव ताः किमिति नित्यं नोपलभ्यन्ते?। व्यञ्जकाऽभावादिति ब्रूमः। किं तदभिव्यञ्जकमिति चेत्? कर्मोत्पादकत्वेन यत्त्वदभिमतं नोदनाभिघाताख्यं तदेवाभिव्यञ्जकमिति गृहाण। व्यञ्जकाऽभावाच्च सन्ततानुपलम्भः। यथाहुः—

" तत्र शब्दत्वकर्मत्वे नित्ये अपि सती यथा।
न नित्यमुपलभ्येते तथा मे बुद्धिकर्मणी"(श्लो.वा.श. ३९७)॥

बुद्धेश्चैकत्वेऽपि प्रयत्नभेदाद्भेदः कर्मणश्च देवदत्तश्चलति यज्ञदत्तश्चलतीत्याश्रयभेदाद्भेद इति। ननु कर्मणः संयोगविभागाख्यकार्यनाश्यत्वात् कथं नित्यत्वसिद्धिः?। सत्यम्। तत्तु कर्मणा द्रव्यसम्बन्धमेव नाशयति न कर्मस्वरूपम्। द्रव्यसम्बन्धनमेव चाभिव्यक्तिः। क्रिया हि जातिवदेव यस्मिन्द्रव्ये तादात्म्यं समवायं वा सम्बन्धं प्रतिपद्यते तत्रैव गृह्यते अतः सम्बन्धनमेव चाभिव्यक्तिः। बुद्धेश्चैतन्यरूपत्वादेव नित्यत्वम्। चैतन्यं चितिशक्तिः तच्च पुंसः स्वाभाविकत्वान्नित्यमेकं च। गोबुद्धिरश्वबुद्धिरित्यादिभेदस्तु विषयनानात्वात्। यथाहुः—

" बुद्धीनामपि चैतन्यस्वाभाव्यात्पुरुषस्य नः।
नित्यत्वमेकता चेष्टा,भेदस्तु विषयाश्रयः"(श्लो.वा.श.४०५)॥

ननु भाष्ये बुद्धेरेव नित्यत्वमुच्यते ननु तच्छक्तेः? । सत्यम्। चैतन्यमेव भाष्ये बुद्धिशब्देनोच्यते तत्तु समर्थं शक्तियुक्तमिति यावत्। यदि चैतन्यः पुमान् किमिति सर्वं सर्वदा न जानाति। मैवम्। शक्तस्यापि सहकारिसन्निध्यपेक्षणात्। उक्तश्च

" स्वरूपेण यथा चाग्निर्नित्यं दहनकर्मकः ।
उपनीतं दहत्यर्थं दाह्यं नान्यत् न चान्यथा"(श्लो.वा.श्र४०५)॥

ननु विषयान्तरसञ्चारे पूर्वबुद्धेर्भङ्गित्वाऽवगमात्कथं नित्यत्वम् ?। सत्यमेतत् । विषयोपनेतृचक्षुरादिकरणव्यापारभङ्गात्तन्निमित्तोप्यात्मविकारो भज्यत इति भङ्गबुद्धिर्न चैतन्यभङ्गादिति। ननु बुद्धिश्चैतन्यं चितिशक्तिः तस्याश्चाप्रत्यक्षत्वात्कथं प्रत्यक्षत्ववचनम्। सत्यम् चितिशक्तिरप्रत्यक्षा, अत्र तु चैतन्यस्वभावः प्रमातैव लक्षणया बुद्धिशब्देनोच्यते स च प्रत्यक्षो नित्यश्च तस्य ज्ञानाख्योविकारोऽप्रत्यक्षोऽनित्यश्चेति तदभिप्रायं पूर्वभाष्यम्, तदेवं भाष्यार्थः—यत्पूर्वपक्षवादिना बुद्धिकर्मणोर्नित्यत्वप्रसञ्जनं कृतं तद्यदि ज्ञानस्वरूपविकाराभिप्रायं तदयुक्तं तस्याऽप्रत्यक्षत्वात्। अथ चिच्छक्तिस्वभावपुरुषाभिप्रायं ? सतु नित्य एवेति। एवं शुक्लादिगुणानामपि नित्यत्वैकत्वेऽवगन्तव्ये। भेदबुद्धिस्तु भिन्नाश्रयसंसर्गात्। स्वरूपैकत्वे च तत एव प्रत्यभिज्ञोपपत्तेर्न गुणस्वरूपत्वातिरेकेण शुक्लत्वादिजातिः कल्पनीया। योप्ययमतिशुक्लोयमीषच्छुक्लइति भेदः सोपि संसर्गभेदात्। तथाहि—केवलद्रव्यसंसर्गेऽतिशुक्लं नीलादिसंसर्गे त्वीषदिति। यदपि धूसरस्वच्छभासुरपार्थिवाप्यतैजसेषु द्रव्येषु शुक्लस्य वैलक्षण्यं तदपि भिन्नजातीयद्रव्यसंसर्गभेदेनावगन्तव्यम्। ज्वालादेः क्षणिकत्वेऽपि प्रत्यभिज्ञाऽस्तीति चेत् ?। सत्यम्। सा यदि सामान्यविषया न दोषः कैश्चित्तस्य नित्यत्वानङ्गीकारात्, व्यक्तिविषया तु तद्गताऽभेदबुद्ध्यैव बाधिता नालं नित्यत्वं साधयितुं, प्रत्यभिज्ञा तु ज्वालादीनां सादृश्यादपि सम्भवति, शब्देतु नैवं बाधकमस्तीतिदिक्।

शब्दनित्यत्वे तु प्रयोगा वार्त्तिकेऽवगन्तव्याः। तथाऽपरं सूत्रम्-

"अनपेक्षत्वा"दिति। यथाऽभिनवं पटादिकं क्रियमाणमनुपलभ्यापि वर्तमानदशायां तन्त्वादिसंयोगापेक्षजन्मा पटादिरित्यध्यवसाय नूनमेतत्तन्त्वादिनाशात्तत्संयोगनाशाद्वा विनङ्क्ष्यतीत्यनित्यत्वमध्यवसीयते नैवं शब्दस्य किञ्चित्कारणमवगम्यते यद्विनाशाद्विनङ्क्ष्यतीत्यवधारणा भवति अतोऽवयवतत्संयोगादिकारणानपेक्षत्वादसम्भावितविनाशो नित्यएव शब्द इति सूत्रार्थः। ननु वायुरापद्यते शब्दतामिति शिक्षाकारवचनात्पटादिवदवयविद्रव्यविशेषः शब्दोऽतस्तद्वदेवावयवसंयोगविशेषविनाशात्सम्भवत्येवास्य विनाशइति शङ्कानिराकरणार्थं सूत्रम् । प्रख्याऽभावाच्चयोगस्येति । प्रकृष्टा प्रत्यक्षाख्य प्रख्या प्रत्यभिज्ञेति यावत् । वायवीयावयवयोगस्य अन्वयस्य कार्ये शब्दे प्रत्यभिज्ञाऽभावात् न तत्कारणकत्वं शब्दस्येति सूत्रार्थः। यदाह भाष्यकारः "वायवीयश्चेच्छब्दोभवेत् वायोः संनिवेशविशेषः स्यात् । न च तानस्य वायवीयानवयवान् शब्दगतान् स्पृशामः तस्मान्न वायुकारणकः शब्दः अतोनित्यइति । वार्त्तिकं च—

"शब्दो यथा पौद्गलिको निषिद्धः स्याद्वायवीयस्य स एवमार्गः।
तस्मादनिर्धारितहेतुभागः सर्वत्र साक्षाद्भवतीति नित्यः"
(श्लो. वा. ४४ श.)।

इतश्च नित्यः शब्द इत्याह। "लिङ्गदर्शनाच्च"। एतच्च वार्त्तिककारैः स्पष्टार्थत्वात्त्यक्तम्। अन्यपदं वाक्यमन्यार्थद्योतकं लिङ्गमित्युच्यते। तदत्र शब्दस्य नित्यत्वे दृश्यते "वाचा विरूपनित्ययेति"। रूपयतीति रूपं वाचः कर्त्ता तद्रहितत्वेन नित्या वेदवाक् विरूपनित्येत्युच्यते । तयेति श्रुत्यर्थः । इयं चाग्नि-

पदा ऋक् अतोऽत्रलिङ्गं तद्दर्शनान्नित्यः शब्द इति । उक्तं च—"अन्यपरं हीदं वाक्यं वाचोनित्यतामनुवदती"ति ।

भाष्य वार्त्तिकयोर्दृष्टमुपयुक्तं स्वदर्शने ।
ग्रन्थकारेण च त्यक्तं प्रमेयं लिख्यते मया ॥

नन्वस्तु नामैवं शब्दनित्यत्वं तथाप्यानुपूर्व्यनित्यत्वादनित्यत्वमापन्नं पदं हि वाचकमिष्टं तच्च क्रमाधीनं विशकलितानां वर्णानामवाचकत्वात् क्रमश्चानित्यः तथाहि देशतः कालतोवा क्रमोभवति। नच वर्णानां सर्वगतानां च स्वतः क्रमः सम्भवति । ध्वनयो हि क्रमवर्तिनः क्रमेण शब्दानाभिव्यञ्जयन्तः स्वीयं क्रमं वर्णेष्वपि दर्शयन्ति । क्रमरचना च पुरुषाधीना यथाविवक्षं तदुपपत्तेः अतः पुरुषपारतन्त्र्यादप्रामाण्यापत्तिः। अतो निष्फलमेव वर्णानां नित्यत्वप्रतिपादनम् । नहि तन्नित्यत्वे वाचकस्य पदस्य नित्यत्वं सिद्ध्यति । न हि परमाणूनां नित्यत्वादारब्धे घटादौ नित्यत्वं दृष्टम् । यथाहुः—

"वर्णाः सर्वगतत्वाद्धो न स्वतः क्रमवृत्तयः ।
अनित्यध्वनिकार्यत्वात्क्रमस्यातोविनाशिता ॥ २७९ ॥
पुरुषाधीनता चास्य तद्विवक्षावशाद्भवेत् ।
वर्णानां नित्यता तेन निष्फला परमाणुवत्" ॥ २८० ॥
(श्लो. वा. शब्द)

किञ्च क्रमं विना वर्णानां प्रतिपादकत्वाऽसम्भवात् क्रमस्य च वाचकत्वात्पदत्वं न क्रमविशिष्टानां वर्णानां तस्य चानित्यत्वाद्वाचकानित्यत्वमिति । अत्रोच्यते । न तावत्क्रमस्य पदत्वप्रसक्तिः वस्त्वन्तराधारस्य स्वतन्त्रस्य क्रमस्याऽदर्शनात् । अतोऽत्रगुणप्रधानभाव एव विचारणीयः किं क्रमविशिष्टा वर्णा

एव वाचकाः उत वर्णाश्रितः क्रम इति । एवञ्च सति क्रमवतां वर्णानामेव वाचकत्वं प्राधान्यात् न क्रमस्य । सर्वपदार्थाङ्गत्वेन तस्याऽवगमात् । न ह्यसौ स्वतन्त्र एव वस्त्वन्तरत्वेन क्वचिद्व्यवह्रियते अत एव विशिष्टा वर्णा एवास्माकं प्रतिपादकाः न क्रममात्रम् । नन्वस्तु नामैवं तथापि क्रमस्य पुरुषार्थत्वात्तद्विशिष्टवाचकस्यापि पौरुषेयत्वमापत्स्यते । तन्न । अत्राहुः—

"नच क्रमस्य कार्यत्वं पूर्वसिद्धपरिग्रहात् ॥ २८७ ॥
वक्ता न हि क्रमं कश्चित्स्वातन्त्र्येण प्रपद्यते ॥
यथैवास्य परैरुक्तिस्तथैवैनं विवक्षति ॥ २८८ ॥
परोऽप्येवमतश्चास्य सम्बन्धवदनादिता ॥
तेनैवं व्यवहारात्स्यादकौटस्थ्येऽपि नित्यता ॥ २८९ ॥
यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता"(श्लो.वा.श.)इति॥

ननु वर्णानामपि व्यवहारादेवानिदंप्रथमत्वरूपनित्यत्वमस्तुकिं कूटस्थनित्यतयेति चेत् । नैवम् । वर्णानामनित्यत्वे व्यवहारस्यैवानुपपत्तेः । तथाहि—वर्णेषु नित्येषु सत्सु तानेवादाय प्रयोगविशेषेण शक्यते क्रमविशेषोनिष्पादयितुं परमाणुभिरिव घटादीनि । वर्णाऽभावेतु किं मूला रचना स्यात् । नहि निरुपादानं कार्यरचनं सम्भवति । न च नित्यविभूनां क्रमानुपपत्तिरिति वाच्यम् । ध्वनिवशात्तदुपपत्तेः । ताल्वादिसंयोगविभागक्रमवशेन तत्प्रेरितानां ध्वनीनामपि क्रमो भवति । ताल्वादयो ध्वनयश्च जात्याऽनित्याः । तेन गकारौकारविसर्जनीयानां क्रममिच्छन् तदभिव्यञ्जकानां ध्वनिजातीयानां तदनुरूपेण क्रमेण प्रेरणं चिकीर्षन् ताल्वादिसजातीयानां स्था-

नानां संयोगविभागौ क्रमेणारभत इति तद्वशेन व्यापकानामपि वर्णानां क्रमग्रह इति ।

केचित्तु क्रमस्य कूटस्थत्वमेवाहुः—तथाहि पौर्वापर्यं क्रमः चिरक्षिप्रात्मकं च दीर्घादिरूपं, पूर्वापराचिरक्षिप्र-प्रत्ययाश्च कालालम्बनास्तेन ध्वनिभिर्वर्णेषु पूर्वापरभागेन व्य-ज्यमानः काल एव क्रम इति । ननु काल एव चेत्क्रमः स चैको विभुर्नित्यश्च कथं पूर्वापरेण रूपेण विभक्तो भासते । उच्यते । यथा वर्णो नित्यः सर्वगतोऽपि दीर्घादिरूपेण विभक्तो भासते ध्वन्युपाधिवशात् तथा कालोऽपि स्वयमभिन्नोऽपि आदित्यगतिक्रियोपाधिवशाद्भिन्नोभासते उपाधयश्च विनष्ट-वर्तमानानागताः सूर्यादिक्रिया इति तद्वशेन कालेऽप्यतीतादि-विभागः क्षिप्रत्वं चाल्पक्रियावच्छेदात् । बहुक्रियावच्छेदाचि-रत्वमिति क्रमस्य नित्यत्वे पदस्यापि नित्यत्वं सिद्धम् । यथाहुः–

"तस्मान्न पदधर्मोऽस्ति विनाशी कश्चिदीदृशः ।
तेन नित्यं पदं सिद्धं वर्णानित्यत्ववादिनाम्" ३०५ (श्लो. वा. श.) ॥

ननु ध्वनिधर्माः क्रमादयः कथं वर्णानामर्थं प्रत्याययतामङ्गं भवन्ति । अत्राहुः—

"परधर्मेऽपि चाङ्गत्वयुक्तमश्वगजादिवत्"(श्लो.वा.शब्द.)।

किं पुनः क्रमादीनां व्यवहारनित्यत्वे प्रमाणम् ? । अर्थाप-त्तिरेवेति ब्रूमः पूर्वोक्ता ह्यर्थापत्तिर्वाचकरूपस्यैव नित्यत्वं कल्प-यति न वर्णस्वरूपमात्रस्येति ॥

॥ इति शब्दाधिकरणम् ॥

(सप्तमं वेदस्यार्थप्रत्यायकताधिकरणम्)

सू—*उत्पत्तौ वाऽवचनाः[1] स्युरर्थ-स्याऽतन्निमित्तत्वात् ॥२४॥

यद्यपि पदपदार्थसंबन्धस्यापौरुषेयत्वाद् वृद्धव्य-

उत्पत्तौ वा ऽवचनाः स्युः । ननु पदपदार्थसम्बन्धस्य नि-

---

*एवं शब्दस्य शब्दार्थसम्बन्धस्य च नित्यत्वेऽपि चोदना धर्मे न प्रमाणमित्याक्षिपति । उत्पत्ताविति । उत्पत्तौ पदार्थज्ञानोत्पत्तौ सत्यां वाक्यवाक्यार्थयोः सम्बन्धा रचनाः पुरुषकल्पिताः स्युः अर्थस्य वाक्यार्थज्ञानस्य अतत्पदार्थज्ञानभिन्नं निमित्तं कारणं यस्य तत्वात् नहि पदार्थ एव वाक्यार्थः अतः पदस्य पदार्थे यथा शक्तिसम्बन्धः तथा पदसमूहरूप वाक्यस्य वाक्यार्थे न शक्तिसम्बन्धः किन्त्वन्यः स च पुरुषकल्पितः कृत्रिमः कथं धर्मे प्रमाणमिति पूर्वपक्षसूत्राभिप्रायः ॥ सिद्धान्तमाह—सू० तद्भूतानां क्रियार्थेन समाम्नायः । तेषु अग्नि होत्राद्यर्थेषु क्लृप्तानां प्रत्येकपदानां क्रियार्थेन—क्रियावाचिना पदेन सह समाम्नायः पठनं दृश्यते अतः क्रियावाचकपदघटितदसमूहादेव अपूर्वो वाक्यार्थग्रहः अर्थस्य वाक्यार्थज्ञानस्य तन्निमित्तत्वात् तत्पदार्थज्ञानं निमित्त कारणं यस्य तत्त्वात् । अग्निहोत्रं जुहुयात्स्वर्गकाम इत्यत्र च अग्निहोत्रनामकहोमेन स्वर्गं भावयेदिति वाक्यार्थ ज्ञानं न पदार्थो पस्थितिमन्तरा भवति किन्तु पदादुपस्थितानामर्थानां योग्यतया परस्परसम्बन्धज्ञानमेव वाक्यार्थज्ञानमिति भावः ॥ २५ ॥ सू० लोके सन्नियमात् प्रयोगसन्निकर्षः स्यात् ॥ २६ ॥ लोके—लौकिकशब्दे पदार्थं दृष्ट्वा पदार्थज्ञानपूर्वकं—सन्नियमात् प्रयोगाद्वेदेपि गुरुपरम्परया ज्ञानपूर्वकः प्रयोगस्य सन्निकर्षः—उपपत्तिः स्यात् ॥ २६ ॥ इति सुबोधिनी ।

अत्रसप्तमं वाक्याधिकरणं समाप्तम् । अत्र सूत्राणि ३ । आदितः अधिकरणानि ७—आदितः सूत्राणि २६ ।

१ सुबोधिनीकारेण रचना इति पाठः परिगृहीतः परन्तु भा-

वहारादेवार्थावगतिः सिध्यति तथापि वाक्यार्थरूपे धर्मे पुरुषसंकेतानपेक्षत्वान्न किं चिन्मूलं संभवतीत्य-ऽप्रामाण्यं धर्मे चोदनायाः—

तथा हि– प्रत्येकं वा पदानि वाक्यार्थमवगमयेयु-स्तत्संघातो वाक्यं वा पदार्था वा ?, न तावत् प्रत्येकं पदेभ्यो वाक्यार्थप्रतीतिर्दृश्यते, न च पदानां वाक्यार्थ-विशेषैः संबन्धग्रहणमस्ति न च संभवत्यऽनन्तत्वाद्वा-क्यार्थानाम्, । वेदार्थस्य च प्रमाणान्तरागोचरत्वात् तेन संबन्धग्रहणमत्यन्तासम्भाव्यम्, । अनन्तवाक्यार्थ-साधारणत्वाच्च पदार्थानां प्रत्येकं वाक्यार्थविशेषप्र

त्यत्वे साधिते पुरुषानुप्रवेशाऽभावात्प्रतिज्ञातं चोदनाप्रामाण्यं सिद्धमेवेति किं वाक्यविचारेणेत्याशङ्क्याह । यद्यपीति । अनेन पूर्वोत्तरविचारयोराक्षेपसङ्गतिर्दर्शिता ।

अत्र कश्चिन्न तावत्पदार्थनित्यत्वं साधितमाकृतिग्रन्थे तत्सद्भावमात्रप्रतिपादनात् अतः पदपदार्थसम्बन्धानामपौ-रुषेयत्वानुभाषणमनुपपन्नम् ? । उच्यते । शब्दनित्यत्ववदा-कृतेरपि नित्यत्वैकत्वे सिद्धे दृष्टैकगोव्यक्तेरपरदर्शनेन स एवायमितिनिश्चयात् यागादेर्हि स्वर्गादिफलसाधनत्वांशो धर्मः स च वाक्यार्थोनैकेन पदेनोच्यत इति सङ्केता-ऽग्रहणान्निर्मूलोवाक्यार्थप्रत्यय इत्यर्थः । निर्मूलत्वमेव दर्शयितुं यावत्सम्भवं मूलानि विकल्प्य निराकरोति । तथाहीति । ननु वाक्यस्य पदसङ्घातरूपत्वात्कथं पृथङ्निर्देशः ? ।

स्थाद्या लोचने तु अवचना इत्येव पाठः ईक्ष्यते–शब्दार्थसम्बन्धा-ना मुत्पत्तौ–नित्यत्वेऽपि चोदनाः–अवचनाः स्युः धर्मस्य प्रतिपाद-कानस्युरर्थस्य—वाक्यार्थस्य—अतन्निमित्तत्वात् पदार्थानां वाक्या-र्थेनाऽसम्बन्धादित्यर्थः ॥

तिपादनमनुपपन्नम्, अगृहीतसम्बन्धत्वादेव च पद-संघातवाक्यपदार्थानामपि न सम्भवति प्रत्यायकत्वम्। नचागृहीतसंबन्धः शब्दोऽर्थं प्रत्याययति–बालानामप्रतीतेः, प्रतीतौ व्युत्पत्तिवैयर्थ्याच्च।

यद्यपि पदमज्ञातसम्बन्धं न प्रत्यायकं तथापि पदसंघातो वा पूर्वपूर्ववर्णजनितसंस्कारसहितो वाक्यान्त्यवर्णो वा निरवयवो वाक्यस्फोटो वा सम्बन्धग्रहणाऽनपेक्ष एव वाक्यार्थं प्रत्याययिष्यतीति चेत्?। न, अव्युत्पन्नानामपि प्रसङ्गात्, व्युत्पत्तिवैयर्थ्यप्रसङ्गाच्चेत्युक्तम्। अथ पदार्थवेदनमपि वाक्यार्थप्रतीतावङ्गमऽतस्तद्रहितानामऽप्रतीतिर्न दोषः, व्युत्पत्तिश्च पदार्थानां नाऽनर्थिकेत्युच्यते!, तदयुक्तम्--यदि हि पदेभ्योऽर्थान्तरभूतं वाक्यं पदार्थव्यतिरिक्तं वाक्यार्थं साक्षादेव वाचकतया प्रतिपादयति कस्तदा पदार्थवेदनस्योपयोगः! तदनुपयोगे च पदार्थव्युत्प-

---

आकाङ्क्षादिमत्पदसङ्घातरूपत्वेन पृथङ्निर्देश इति ब्रूमः। इतोऽपि न सम्बन्धग्रहणमित्याह। वेदार्थस्येति। नन्वदृष्टसङ्गतीन्यपि चक्षुरादीन्यर्थं बोधयन्त्येव। सत्यम्। तेषां सत्तामात्रेणैव बोधकत्वं न तु शब्दस्य तथेत्याह। न चेति। अत्र चोदयति। यद्यपीति। अनन्तरोक्तदोषद्वयपरिहारं शङ्कते। अथेति। तद्रहितानां–पदार्थावगतिरहितानाम्। वाक्यार्थस्य याऽप्रतीतिः अङ्गवैकल्यात् सा दूषणमेव न भवतीत्यर्थः। दूषयति। तदिति। पदपदार्थव्यतिरेकेण वाक्यवाक्यार्थयोरर्थान्तरभूतयोरनवगमादिति भावः। असम्बन्धादिति। यथा पदपदार्थयोः सम्बन्धोऽस्ति

त्तिरनर्थिका वाक्यार्थं प्रतिपित्सताम्, न च पदार्था-द्वाक्यार्थावगतिः—असम्बन्धात् ।

न तथा पदार्थवाक्यार्थयोः सम्बन्धोऽस्तीत्यर्थः । किञ्च पदार्थानां परस्परमप्यसम्बन्धाद्वाक्यार्थावगतिर्दुर्लभा । तथाहि—जातिपदार्थपक्षे तावद्गोशब्देन गोत्वमात्रमभिहितं शुक्लपदन्तु तदेकवाक्यभूतं तस्यैव शुक्लगुणानुरागं प्रतिपादयतीति संसर्गो वाक्यार्थस्त्वाच्च पदानामेकवाक्यता । व्यक्तिपदार्थपक्षे तु गोशब्देनैव शुक्लकृष्णादिव्यक्तिषु सर्वास्वभिहितासु शुक्लपदं शुक्लसंसर्गं प्रतिपादयदपि तत्परत्वे सत्यानर्थक्यात्कृष्णादिव्यवच्छेदेनैव विशेषणं भवतीति भेदो वाक्यार्थः । तत्राद्ये पक्षे संसर्ग एव मुख्योवाक्यार्थः कृष्णादिव्यवच्छेदस्त्वार्थिकः द्वितीयपक्षे तु शाब्द एव कृष्णादिव्यवच्छेदः । तत्र पदाभिधेययोर्जातिगुणयोर्मिथोऽनुरागव्यवच्छेदाऽभावात् विशेषणविशेष्यत्वमनुपपन्नं अनुरागाऽसम्भवे च तन्निबन्धनो व्यवच्छेदोप्यनुपपन्नः । यथाहुः—

"गोत्वेन नहि शुक्लत्वं गोत्वं वा तेन रज्यते ।
अन्योन्यात्मन्यसद्भावाद्व्यक्तिगत्वाद्द्वयोरपि"(श्लो.३१वा.वा.)॥

ननु मास्तु परस्परानुरागस्तथापि व्यक्तिरेव ताभ्यामनुरज्यमाना वाक्यार्थोभविष्यति । मैवम् । तस्याः शब्देनाऽप्रतिपद्यमानाया वाक्यार्थत्वाऽसंभवात् । तदसम्भवाच्च न शब्दयोरप्येकवाक्यतासिद्धिः । इतश्च न संसर्गभेदयोर्वाक्यार्थत्वम् । यथाहुः—

"संसर्गे वापि भेदे वा वाक्यार्थे परिकल्पिते ।
पदार्थव्यतिरेकश्च नास्ति संसर्गभेदयोः"॥४९॥ (श्लो.वा.वा.)॥

पदार्थैरेव संसर्गभेदानुगृहीतैर्वाक्यार्थो नाम वस्त्वन्तरमेवारभ्यत इति चेत् । न । जातिगुणयोर्वस्त्वन्तरानारम्भक-

त्वात् वाक्यार्थातिरिक्तस्य तस्य प्रमाणान्तरेणानुपलम्भात्। अत्र वैयाकरणै रुक्ता वाक्यविकल्पाः—

" आख्यातं शब्दसंघातो जातिः संघातवर्त्तिनी ।
एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः ॥
पदमाद्यं पृथक् सर्वं पदं सापेक्षमित्यपि ।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायदर्शिनाम् ॥ "

तत्र तावदाद्यस्य पदस्यान्त्यस्य वा सर्वेषां वा प्रत्येकं मिथोऽनुग्रहापेक्षया संघातस्य वाक्यत्वकल्पनं । तदयुक्तम् । इतरेतरानुग्रहाऽसम्भवात् । तत्र न तावदाद्यस्येतरेतरैरनुग्रहः कश्चिद्दृश्यते नच सम्भवत्ययौगपद्यात् । किञ्चाद्यस्यैव सर्वैः संस्क्रियमाणस्य प्राधान्यात् वाक्यत्वं स्यात् । नाप्यन्त्यस्य सर्वेषां संहतानां पृथग्भूतानां वाऽनुग्रहः उक्तदोषात् अनुग्रहरहितानां च स्वतन्त्राणामेव वाक्यत्वे व्यस्तोच्चारितानां गौरश्व इत्यादीनां च वाक्यत्वं स्यात् । नाप्येकोऽनवयवः शब्दो जातिः संघातवर्तिनीति पक्षौ, पदस्फोटजातिनिराकरणेन निराकृतत्वात् । नापि क्रमो बुद्ध्यनुसंहृतिरिति पक्षः क्रमस्य बुद्ध्या निष्कृष्योपसंहर्तुमशक्यत्वात् । यथा च वर्णक्रमस्य पदत्वं निराकृतं तथा पदक्रमस्य वाक्यत्वमपि निराकर्तव्यम् । किञ्च वर्णक्रमस्य पदत्वं युज्येतापि अर्थप्रतीत्यौपयिकत्वात् क्रमान्तरे चार्थप्रतीत्यभावात् पदक्रमस्य तु वाक्यार्थप्रत्ययानौपयिकस्य कथं वाक्यत्वम् । औपयिकत्वे वा क्रमभेदे सति वाक्यार्थभेदः स्यात् । अस्तु तर्ह्याख्यातपदमेव वाक्यं प्राधान्यात् पदान्तरस्य तदर्थत्वात् । प्राधान्यं चाख्यातस्य पदार्थान्तरानुरक्तप्रधानभूतभावनाप्रतिपादकत्वात् । एतदप्ययुक्तम् । तदाकारज्ञानोत्पत्त्या-

वापि पदार्थानां परस्परं सङ्गत्यभावात् । कारकाणां क्रियाणां वा परस्परं सम्बन्धाऽप्रतीतेः । न तावद्द्रव्याणां परस्परं सम्बन्धः तादात्म्याऽद्यसंभवात् ।

यथाहुः—

"अत्यन्तभेदनिष्पन्नषष्ठ्यभावानपेक्षणैः ।

तृतीयाद्यपहारेण संनिधेरपि बाधनात् ॥"

हन्त तर्हि कारकविभक्तिश्रवणात् क्रिययैव सह द्रव्याणां सम्बन्धोऽस्तु ? । नैवम् । स्वरूपेण द्रव्याणां क्रियासम्बन्धाऽभावात् । न ह्यार्द्रैः काष्ठैः पाकक्रिया संभवति । शक्तिरेव कारकं न चार्द्राणां शक्तिरस्तीति चेत् । न । अमूर्तायास्तदसंभवात् । शक्तिविशिष्टं द्रव्यं कारकमिति चेत् । न, शक्तैरपि तैस्तिष्ठद्भिः पाकाऽसंभवात् । ज्वलनादिमुखेन तेषां पाकसंबन्ध इति चेन्न क्रिययोः परस्परान्वयाऽसंभवात् । काष्ठादीनां च ज्वलनोपक्षीणानां पाकसाधनत्वाऽसम्भवाच्चेतिदिक् । अत्राधिकं वार्त्तिकेऽवगन्तव्यम् । एवं धातुप्रत्ययवाच्ययोः क्रिययोरपि सङ्गतिर्न सम्भवति । भावनासंबन्धोहि साध्यतया साधनतया वा स्यात् । नोभयथापि सम्भवति साध्यसाधनवाचिन्योर्द्वितीयातृतीययोः पचतीत्यत्राश्रवणात् । नापि विध्यन्वयः संभवति सकृदुच्चरितस्य विधिप्रत्ययस्य श्रौतानेकव्यापाराऽसंभवात् । धात्वर्थान्वितभावनाविधानादर्थाद्धात्वर्थविधिरपि सेत्स्यतीति चेत् । न । धात्वर्थान्वयात्प्रागेव समानप्रत्ययोपादानलक्षणया प्रत्यासत्या केवलाया एव भावनाया विधानात् । मास्तु धात्वर्थविधानं तथापि पदश्रुत्या भावनायां विनियुक्तत्वात् तस्याप्यनुष्ठानं सेत्स्यति । मैवम् । विधिसम्बन्धं विना-

ऽनुष्ठानाऽसिद्धेः विध्यधीना हि प्रवृत्तिर्नाभिधानविनियोगमात्राधीनेति । यदा च समानपदोपात्तस्यापि धात्वर्थस्याऽविधानं तदा पदान्तरगतस्य सोमादेः कारकस्य वाक्यान्तरस्य च प्रयाजादेर्विध्यन्तस्य दूरापास्तं विधानं विधिना त्वसंगतस्य प्रयाजादेर्विध्यन्तसमाख्याऽपि निर्निमित्ता स्यात् । पदांशत्रयस्य विध्यसम्बन्धाद्भावनैव विधातव्या तदा तस्यां केवलायां पुरुषं प्रवर्त्तयितुमशक्यत्वात्तयाप्यन्वयासंभवात् निर्विषयत्वं विधेरितिदिक् । ननु माभूद्भावनाद्वारांऽशानां विधिः साक्षादेव भविष्यतीतिचेन्नेति ब्रूमः । समानप्रत्ययोपात्तभावनाऽवरुद्धस्य विधेरन्यत्र गमनाऽसम्भवात् पुरुषव्यापाराविषयत्वाच्च विधेः कारकाणां चातद्रूपत्वान्न साक्षाद्विधानमिति । एवमुपसर्गनिपातानामपि न केन चित्सङ्गतिः । न तावत्परस्परमुपसर्गाणां सङ्गतिरसम्भवात् । न च कारकस्यापि विशेषणतया भविष्यति । नैवम् । अर्थाननुरञ्जकत्वात् । अननुरञ्जकत्वं च—

"आनर्थक्यान्यवाचित्त्वविपरीतप्रसाधनात्" ।

न च प्रलम्बतेऽयमित्यत्र कश्चिदतिरिक्तोऽर्थोऽस्ति । प्रासाद इत्यादौ चान्य एवार्थः । प्रतिष्ठते इत्यत्र च विपरीत एवार्थः । न चैवंरूपस्य विशेषणत्त्वं सम्भवति । यथाहुः—

"येन स्वार्थाविरोधेन विशेष उपजन्यते ।
विशेषणं तदेवेष्टं नतु यस्यार्थनाशकम् ॥"

नन्वागच्छत्युद्गच्छतीत्यादौ आभिमुख्यादौ विशेषोपजननाद्विशेषणत्वं भाविष्यति । नैवम् । आभिमुख्यादेः कर्तृधर्मत्वेन धात्वर्थाङ्गत्वाऽभावात् । कर्तृसम्बन्धे चोपसर्गत्वविरोधात् । नापि भावनया सङ्गतिस्तदर्थानामंशत्रयानन्तर्भावात् । नञादयस्तु निपातविशेषा योयेनैव सम्बन्धुमिष्यन्ते तस्यैवार्थं

ननु सामान्यं पदार्थो विशेषो वाक्यार्थः सम्बन्धश्च सामान्यविशेषलक्षणः ॥ सत्यम् नियतविशेषावगति स्तु न सिध्यति सर्वविशेषसाधारणत्वात्सामान्यस्य, ततश्च गामानयेति पदावगतमानयनसामान्यं विशेषाक्षेपोन्मुखमपि न गोरेवानयनमाक्षिपेत्. ततश्च न गोरेवानयनं प्रतीयेत। न चाकाङ्क्षासं-

---

विवृण्वते न केन चित्सम्बन्धुमर्हतीति। किञ्च पदार्थपूर्वको वाक्यार्थो भवति। न ह्युपसर्गनिपातानां गवादिशब्दानामिव अयमस्यार्थ इति नियतः स्वातन्त्र्येण कश्चिदर्थोऽवगम्यते यद्द्वारेणैते वाक्यार्थान्वयं गच्छेयुरिति। स्यादेतत्। पदार्था एव वाक्यार्थः। न च गौरश्वः पुरुषोहस्तीत्यस्यापि वाक्यत्वप्रसङ्गः पदार्थमात्रस्य तदनङ्गीकारात् अर्थान्तरान्वितरूपविशेषस्यैव वाक्यार्थत्वाभ्युपगमात्। तथाहि—पदं केवलोच्चरितं पदार्थस्वरूपमेवाभिदध्यात्—पदान्तरसमभिव्याहृतं तु तदर्थान्तरान्वितरूपमिति। नैतदपि युक्तम्। यदि हि पदं केवलोच्चरितं किञ्चिदर्थस्वरूपमेवाभिदध्यात्। पदान्तरसमभिहारे चानयनान्वितं तदुज्झित्य क्वचिद्बन्धनान्वितं क्वचिदप्याश्वासोन स्यात्। सर्वत्रान्वितमेवाभिधत्त इति चेत्। न। केवलोच्चारणे पदार्थस्वरूपमात्रावगमात्। अथ पदार्थोऽसङ्गत एवार्थे वाक्यं प्रवर्तत इत्युच्येत? तर्हि पदार्थज्ञानस्य तत्र दृष्टोपकारिता न स्यात्। अज्ञातपदार्थस्यापि वाक्यार्थविगतिप्रसङ्गादित्यलमतिप्रपञ्चेन।

सम्बन्धमाशङ्कते। नन्विति। परिहरति। सत्यमिति। येन प्रतिनियतविशेषावगतिर्भवति स एव सम्बन्धो वाच्य इति भावः। अस्तु साधारण्यं किमेतावता स्यादिति तत्राह। ततश्चे-

निधियोग्यत्वैर्नियमः, सत्स्वपि तेष्वदर्शनात्, न हि प्रत्यक्षेण गामुपलभ्य 'कस्येयम्' इति जिज्ञासमानः संनिहितमपि देवदत्तं स्वामिनमध्यवस्यति, तस्मान्निर्मूलो वाक्यार्थः साङ्केतिकः । न च वेदे सङ्केतयितास्तीत्यऽप्रामाण्यम् ।

अथ वा वेदवाक्यानामपि पौरुषेयत्वमाश्रित्य पु-

ति । विशेषमात्राक्षेपेण तत्पर्यवसानसम्भवादितिभावः । सत्स्वपीति । एतच्च संनिधिमात्राभिप्रायेण दूषणं भवति । शाब्दसन्निधौ तु नैतद्दूषणं भवतीति चिन्त्यम् । उपपादितमर्थं निगमयति । तस्मादिति । ननु "चोदनालक्षणोऽर्थो धर्म" इत्युक्तं चोदना च वाक्यमेवातो वाक्यमेव वाक्यार्थप्रतीतेर्मूलमिति कथं निर्मूलत्वम् । सत्यम् । सदपि वाक्यमगृहीतसम्बन्धत्वान्न वाक्यार्थप्रतीतेर्मूलम् । सांकेतिकः—पारिभाषिकः । केचिद्वृद्धान्कृत्वाऽस्य वाक्यस्यायमर्थ इति संकेतः कृतो वृद्ध्यादिवत् । ततश्च वाक्यार्थावगतिः पुरुषाणामित्यर्थः । अयश्च सूत्रार्थः उत्पत्तौ चेति चकारोऽप्यर्थे । शब्दार्थतत्सम्बन्धानामुत्पत्तौ औत्पत्तिकत्वेऽपि नित्यत्वेपीति यावत् न चोदनायाः प्रामाण्यं यतोऽवाचकाः शब्दा वाक्यार्थस्य, ते हि सामान्यमभिदधति वाक्यार्थश्च विशेषरूपः । ननु पदाभिहिताः पदार्था एव वाक्यार्थं बोधयन्तु तत्राह अर्थस्याऽतन्निमित्तत्वात् इति । अर्थस्य पदार्थस्य अतन्निमित्तत्वात् वाक्यार्थबोधनिमित्तत्वाऽभावात् पदार्थानां वाक्यार्थबोधकत्वेऽशाब्दतैव वाक्यार्थस्य स्यात् उपपत्यन्तरं तु ग्रन्थकारोक्तमेव ज्ञेयम् । अथवा शब्दार्थसम्बन्धानामौत्पत्तिकत्वेऽपि वेदवाक्यार्थस्य धर्मस्याऽवचनाः अप्रतिपा-

रूपप्रामाण्यादेव प्रामाण्यमङ्गीकर्तव्यम्। युक्तं च सर्ववाक्यानां पौरुषेयत्वदर्शनादेव वेदवाक्यानामपि पौरुषेयत्वम्। अथ पुरुषाणामीदृशेर्थे प्रामाण्यं न संभवति ?, ततो ऽप्रामाण्यमेवास्तु न त्वनपेक्षं प्रामाण्यं सिध्यतीति पूर्वः पक्षः।

अत्र केचिदाहुः–

वाक्येनैव हि वाक्यार्थः साक्षादेवाभिधीयते।
उपलक्षणतश्चास्य सम्बन्धग्रहसम्भवः ॥ ४९ ॥
वाक्यं गोपदयुक्तं यत् तत्–सास्नादिमदन्वितम्।
वाक्यार्थं वदतीत्येवं व्युत्पत्तिः सुकरैव हि ॥५०॥
सत्यम्–व्युत्पत्तिरेवं स्यात् तथापि तु न वाक्यतः।
वाक्यार्थावगतिर्युक्ता तिरोभावेपि दर्शनात् ॥५१॥
पूर्वभागेषु वाक्यस्य विस्मृतेष्वपि दृश्यते।
वाक्यार्थावगतिः पुंसां पदार्थस्मृतिशालिनाम् ॥५२॥

दकाः स्युः अप्रमाणमिति यावत्। न च पदार्थानां तन्निमित्तभावोऽसम्बन्धादिति सूत्रार्थः। असम्बन्धोपपत्तिश्च ग्रन्थोक्तैवानुसन्धेया। ननूत्पत्तिशब्दस्य कथमौत्पत्तिकशब्दार्थत्वम् औत्पत्तिकशब्दलक्षकत्वेनेतिब्रूमः। यथा द्यावोरित्यस्य द्यावापृथिव्योरिति। वेदप्रस्थानाभ्यासवतोमहर्षेः प्रायेण सूत्रेषु छान्दसपदप्रयोगएव भवतीति न दोषः कश्चित्। एकदेशिमतेन तावत्पूर्वपक्षं परिहर्तुमाह। अत्रेति। सम्बन्धग्रहमुपपादयति। वाक्यमिति। देतदर्द्धाङ्गीकारेण निराकरोति। सत्यमिति। अस्त्वेवं तथापि त्वन्मते साक्षादेव वाक्याद्वाक्यार्थावगतिर्न सम्भवतीत्यर्थः। कथं नयुक्तेत्यत आह।

यथैव विस्मृतपूर्ववर्णानामन्तिमवर्णमात्रान्न पदार्थावगतिर्भवति तथैव वाक्यावयवेषु पूर्वपदेषु विस्मृतेषु वाक्यार्थावगतिर्न स्यात् । दृश्यते हि विस्मृतपूर्वपदानामपि दीर्घतमेषु वाक्येषु वाक्यार्थावगतिः । न च स्वरूपेण विस्मृतेऽपि स्मर्यमाणपदार्थवशादेव तद्वाचिपदयोगितां वाक्यस्यानुमाय ततो वाक्यार्थावगतिरिति वक्तुं युक्तम्, अस्यां प्रनाड्यां प्रमाणाभावात् । अनुसन्धीयमानैरेव हि पदार्थैः साक्षादेव हि वाक्यार्थप्रतीतिसम्भवे को नामेदृशीं कल्पनामवलम्बते । सम्भवति च पदार्थेभ्यो वाक्यार्थावगतिरिति वक्ष्यामः ।

येऽप्याऽऽकाङ्क्षितसंनिहितयोग्यार्थान्तरान्वितस्वार्थाभिधायीनि पदान्येव वाक्यार्थप्रतीतिनिमित्तमिति ब्रुवते, तेषामपि विस्मृतेषु केषु चित्पदेषु वाक्यार्थावगतिर्न स्यादिति तुल्यमेव दूषणम् । किं चैवं वादिनां प्रतिपदं वाक्यभेदः स्यात् न कचिदेकवाक्यता सिध्ये-

---

तिरोभावेऽपीति । एतदेव विवृणोति । पूर्वेति । श्लोकं व्याचष्टे । यथैवेति । दृश्यत इति । यस्मादेवमतोन साक्षाद्वाक्यादेव वाक्यार्थावगतिः त्वन्मते सम्भवतीति भावः । अत्र परिहारमाशङ्क्य निराकरोति । नचेति । अगत्या प्रनाड्याश्रयणमिति चेत् । न । सिद्धान्तनीत्या गतिसम्भवादित्याह । अन्वितेति । वक्ष्याम इति । स्वसिद्धान्तनिरूपणावसर इत्यर्थः । अन्विताभिधानमतमनूद्य प्रतिक्षिपति । येपीति । अस्मिन्नेव पक्षे दूषणान्तरमाह । किंचेति । ननु समभिव्याहृतयोः पदयोः स्पष्टमेवैकवाक्य-

त्-गामानयेति गोपदमानयनकर्मभूतां गां प्रतिपादयति तथाऽऽनयतिरपि गोकर्मकमानयनं तयोश्च भेदाद् भिन्न एव वाक्ये स्याताम् ।

अथान्वितभेदे सत्यप्येकस्यैवान्वितस्य प्रधानभूतत्वात् प्रयोजनैकत्ववशेन वाक्यैकत्वमुच्यते ? । तदयुक्तम्-नह्यनेकं विशिष्टं प्रतिपादयतां प्रयोजनैकत्वमात्रेणैकवाक्यता भवति, यदि स्यात् ? 'यजेत स्वर्गः फलं पशुर्हविरग्निर्देवता' इत्यत्राप्येकवाक्यता स्यात्- सर्वेषां द्रव्यदेवताफलविशिष्टयागानुष्ठानप्रयोजनत्वात् । तथा "दर्शपूर्णमासाभ्यां यजेत" इत्यस्य "समिधो यजति" इत्यादिभिरेकप्रयोजनत्वाद्वाक्यैकत्वं स्यात् ।

नन्विष्टमेवैकवाक्यत्वम्, यथा वक्ष्यति-"तद्वाक्यं हि तदर्थत्वात्"इति,(३अ.७पा.४सू.जै.)भाष्यकारोपि-"वाक्यं ह्येकं दर्शपूर्णमासाभ्यां सह धर्माणाम्"इति ? । सत्यम्, प्रकरणानुमेयं तु तत्रैकवाक्यत्वं न प्रत्यक्षम्, अन्यथा वाक्यविनियोज्यत्वापत्तेः । एवं गामानयेत्यत्रापि प्रत्यक्षैकवाक्यता साक्षान्न स्यात्. इष्यते

त्वं गम्यते ? सत्यम् । तथाप्यन्वितभेदाद्वाक्यभेदः स्यादित्याह । गामिति । नहीति । विशिष्टैकार्थप्रतिपादकत्वेनैवैकवाक्यत्वमिति भावः । अविदिताशयः चोदयति । नन्विति । अभिप्रायमुद्घाटयन्परिहरति । सत्यमिति । मया तु प्रत्यक्षमेकवाक्यत्वं तवापादितमित्यभिप्रायः । उक्तं दूषणं लौकिकवाक्येऽतिदिशति । एवमिति । भिन्नार्थे पर्यवसितत्वादिति भावः । दूषणमुपसंहरति ।

चासौ, तस्माद् यत्रैकवाक्यत्वं तत्राऽपर्यवसितव्यापाराणामेव पदानामेकस्मिन्नर्थे पर्यवसानं वक्तव्यम्।

त्वन्मते चाऽऽनयतिर्गवान्वितानयनं प्रतिपाद्य पर्यवस्यति गोपदमपि गव्येवाऽऽनयनान्विते पर्यवसितमिति स्यादेव वाक्यभेदः। न हि गोपदस्यानयने गवान्विते पर्यवसानं येनैकवाक्यता स्यात्। अथ गोपदमप्यानयनमेव गवान्वितमभिदध्यात्? अनेकार्थत्वं स्यात्—गोश्चानयनस्य चाभिधानात्, न हि गोरन्यतः सिद्धिर्यतस्तामनभिधाय तद्विशिष्टमानयनमेवाभिदध्यात्।

किं च 'अतिशोभनो राजपुरुषः' इत्यत्रातिशयान्वितस्य शोभनगुणस्य राजान्वितस्य च पुरुषस्य पुनः परस्परान्वयो गम्यते—समासे हि परस्परान्वयपूर्वकः पदार्थान्तरान्वयः, तेनाऽन्वितयोरेवात्रान्वयः। न चाऽसावऽभिधानतः सि-

---

तस्मादिति। अनेकार्थत्वं विवृणोति। गोश्चेति। ननु प्रत्येकमभिधानेऽनेकार्थत्वापत्तिः न त्वेवं, किन्त्वेकहेलयैवानयनान्वितं स्वार्थमभिधत्तेऽतोनानेकार्थत्वमत आह। नहीति। गोशब्दाद्गोरुपस्थितौ सत्यामेव तद्विशिष्टानयनाभिधानमिति व्यापारभेदाद्वाक्यभेदः स्यादेवेति भावः। इतोऽप्येवमित्याह। किञ्चेति। नन्वत्र समभिव्याहारवशेन शोभनगुणान्वितस्यैव पुरुषस्य प्रतीतेरेक एवान्वयः सिध्यति तत्राह। समासे हीति। ततः किमत आह। न चेति। असौ—अन्वितान्वयः अभिधानतो न सिद्ध्यति समासपदयोर्मध्ये केनाऽपि पदेनानभिधानादित्यर्थः। एतदे-

स्यति– पुरुषशब्दो हि पुरुषस्यैवाऽर्थान्तरान्वयम-
भिधत्ते तस्यैव स्वार्थत्वात् अतो नाऽन्वितान्वयमल-
मभिधातुम्, एवं शोभनशब्दोपि स्वार्थस्यैव शोभ-
नत्वस्यान्वयमाह नाऽन्यान्वितस्य, अतोऽन्वितयो-
रन्वयोऽवश्यं पदार्थनिबन्धन इत्यभ्युपगन्तव्यम्।

किं च 'रूढिर्योगाद्बलीयसी शीघ्रप्रवृत्तित्वात्' इ-
त्यविवादम्, अन्विताभिधाने च विपरीतं बलाबलं
स्यात्–अश्वकर्ण इति समुदायो यावद् वृक्षजातिं
स्मारयति तावदेवाऽश्वशब्दोपि वाजिनं कर्णशब्दो-
ऽप्यवयवं स्मारयत्येव, अतो न स्मृतिकाले तावद्विशे-
षः, अभिधानं तु योगवृत्तौ पदान्तरमनपेक्ष्य स्वा-
वयवाभ्यामेव शीघ्रं मिथो निर्वर्तते। रूढिस्तु प्रति-
योगिसंनिधानलिप्सया पदान्तरमपेक्षमाणाऽभिधाने
विलम्बत इति वैपरीत्यम्।

स्वरूपमात्राभिधानपक्षे तु पदान्तरापेक्षाभावाद-

वोपपादयति। पुरुषेति। कथं तर्हि तदवगतिः सूत्रात्? अतआह।
अत इति। अन्वितानामपि पदार्थानां पुनराकाङ्क्षादिवशेन परस्परा-
न्वय इत्यर्थः। इतोऽप्येवमित्याह। किञ्चेति। वैपरीत्यमेव विवृणो-
ति। अश्वेति। ननु रूढेः शीघ्रप्रवृत्तित्वाद्वृक्षजातिरेवादौ स्म-
र्यते तत्राह। अतइति। अलब्धात्मिकायास्तदसम्भवादिति
भावः। नन्वेवं सति कथं योगस्य बलवत्त्वासिद्धिरित्याशङ्क्यावि-
शेषमाह। अभिधानंत्विति। अस्मत्पक्षे तु नैष दोषो भवतीत्या-
ह। स्वरूपेति। अन्विताभिधानपक्ष एव पदान्तरापेक्षा स्या-
दिति भावः। रूढ्यर्थो यौगिकाद्बलवान् भवतीत्यर्थः। एत-

ऽक्षरश्रवणमात्रादेव रूढ्यर्थोऽभिधानसिद्धोऽवयवार्थलक्षिताद् यौगिकाद्वाक्यार्थस्थानीयाद्बलीयान् भवति । एवम्–'अतिमधुरं गोक्षीरम्' 'ईषन्मधुरमजाक्षीरम्' इति 'केतकीगन्धसमानः सर्पगन्धः' इत्यादि दर्शयितव्यम् । तस्मात्पदाभिहितैः पदार्थैर्लक्षणया वाक्यार्थः प्रतिपाद्यते । तत्र गामानयेत्यानयतिरानयनसामान्यमभिधाय तद्व्यक्तिं लक्षयति, गोपदमपि स्वार्थद्वारेणाऽऽनयनमेव गोकर्मकत्वाकारेण तत्संबन्धिस्वरूपेण लक्षणया प्रतिपादयति ।

दपि स्वरूपमात्राभिधानपक्षे सिध्यतीत्याह । एवमिति । यस्माद्वाक्यादेव वाक्यार्थप्रतीतिर्न सम्भवति तस्मादयमेव पक्षोऽङ्गीकार्य इत्याह । तस्मादिति । यद्यपि प्रत्येकं पदानि संहतानि वा न साक्षात् तन्मूलं तथापि पदार्थाः पदैः प्रतिपादिताः प्रत्यासत्यपेक्षायोग्यत्वसनाथाः मूलं भविष्यन्ति तद्भावे वाक्यार्थप्रत्ययस्य भावादित्यर्थः । पदार्थप्रतिपादने व्यापृतानां पदानां पुनर्वाक्यार्थेऽपि व्यापारान्तरे गौरवमदृष्टकल्पना दृष्टहानिश्च स्यात् । यथाहुः–

"पदार्थेषु प्रयुक्तानां पुनर्व्यापारकल्पना ।
पदार्थानां च सामर्थ्यं गम्यमानमपन्हुतम्" (श्लो.वा.वा११४)॥

वर्णेभ्योहि पदार्थेषु प्रतीतेषु तदनन्तरमेव वाक्यार्थप्रतीतेर्जायमानत्वात्सामर्थ्यं गम्यत इत्यर्थः । अत्र कश्चित्संमुग्धमेव पदं पदार्थस्य वाचकं प्रकृतिप्रत्ययरूपावान्तरभेदस्तु प्रक्रियामात्रतया वैयाकरणैः कल्पित इत्याहुस्तदयुक्तम् । प्रत्यक्षेण प्रकृतिप्रत्ययतद्वाच्यानां भेदाऽवगमात् दृश्यते हि वृक्षं वृक्षेण-

एवं यत्र यत्र वाक्ये यो योऽर्थो विशेष्यत्वेन विवक्षितस्तमेव स्वपदेन सामान्यवाचिना लक्षितं सन्तमितराणि पदानि स्वार्थाभिधानद्वारेण तत्सम्बन्धिरूपेण लक्षयन्ति । यत्राप्यन्वितस्यैव पुनरन्वयान्तरं तत्रापि लक्षितलक्षणापरम्परया सर्वस्य तस्य सिद्धिरित्येषा दिक् ।

ननु कर्मत्वेनाभिहिता गौस्तत्कर्मिकां क्रियां लक्षयन्त्यपि कथमानयनमेव लक्षयति ?, तदेकवाक्यतयेति ब्रूमः–लक्षणा हि साधारण्येनैव प्रवृत्ताप्येकवाक्यतया नियम्यत इति दर्शनबलादङ्गीक्रियते । योपि ह्यऽन्विताभिधानमिच्छति तेनापि सामान्यतः प्रवृत्ता लक्षणा पदान्तरैकवाक्यत्वेन नियम्यत इत्येतदऽङ्गीकृतमेव । यथा हि युगपदधिकरणवाचितायां द्वन्द्वमिच्छन्ति तत्र धवखदिरावित्यत्र खदिरप्रातिपदिकं द्विवचनोपपत्तयेऽर्थान्तरं लक्षयदपि धवमेव लक्षयति नार्थान्तरं तत्पदसमभिव्याहारादेव तथा स-

---

त्यत्र प्रकृत्येकत्वेऽपि प्रत्ययभेदात्कर्मत्वकरणत्वरूपार्थभेदः । तथा वृक्षं घटं चेत्यत्र प्रकृतितदर्थभेदे प्रत्ययाऽभेदेन कर्मत्वरूपैकार्थत्वमिति दिक् । अस्मिन्पक्षेऽन्वितान्वयोऽपि सिध्यतीत्याह । यत्रापीति । लक्षणा हीति । क्रियामात्रलक्षकत्वेन प्रवृत्ताप्यानयनपदैकवाक्यतयाऽऽनयनमेव लक्षयतीत्यर्थः । अन्विताभिधानवादिनाप्येतदङ्गीकृतमित्याह । योपीति । एतदेव दृष्टान्तेनोपपादयति । यथा हीति । एतच्च शाब्दिकानां मतम् । अस्यार्थः । अधिक्रियत इत्यधिकरणं पदार्थस्तस्य युगपद्वाच्य-

वंत्रास्तु । यत एवायमऽन्वयविशेषोऽविनाभावाद् ऽसिध्यन्नेकवाक्यतावशेनैव सिध्यति अत एव शब्दस्य प्रमाणान्तरत्वमनुमानात् ।

ननु प्रत्यक्षेण गवि देवदत्ते चाऽवगते सत्स्वप्याकाङ्क्षासंनिधियोग्यत्वेषु न परस्परान्वयप्रतीतिर्भवति तस्मान्न पदार्था वाक्यार्थं गमयन्तीति पदानामेवान्विताभिधानं युक्तम् ? । अन्विताभिधानेपि तुल्योयं दोषः—यौ तावदर्थौ प्रत्यक्षप्रतिपन्नौ तयोर्वाचकावपि शब्दौ तस्मिन् समये स्मृतिस्थौ भवतः न च तौ स्वार्थयोराकाङ्क्षादिसद्भावेप्यऽन्वयं प्रतिपादयतः ।

अथ यादृगवस्थितैः पदैरन्वयो वृद्धव्यवहारे दृश्यते तादृशान्येवान्वयं प्रतिपादयन्ति नान्यादृशानीत्युच्यते ? । तत् पदार्थेष्वपि तुल्यम्—तेऽपि हि पदार्था एकैकविशिष्टार्थप्रतिपादनाय समाहृता वा-

---

तायां एकेन पदेन पदार्थद्वयस्यैकदोपस्थापनं तस्मिन्द्वन्द्वो भवतीत्यर्थः । एतन्निरूपणं चाधिकारलक्षणे करिष्यते । अत्रान्विताभिधानवादी चोदयति । नन्विति । अतः पदार्थानां कारणत्वे व्यभिचारात् पदानामेवान्विताभिधानं युक्तमितिशङ्कार्थः । प्रतिबन्द्या परिहरति । अन्वितेति । तुल्यत्वं विवृणोति । याविति । यद्यपि तत्काले गोशब्ददेवदत्तशब्दौ स्मृतिस्थौ भवतः तथापि न तावदन्वयं प्रतिपादयत इति तुल्यो दोष इत्यर्थः । विशेषं शङ्कते । अथेति । यावदवस्थितैः—समभिव्याहृतैरित्यर्थः । साम्येन परिहरति । तदिति । साम्येन विवृणोति । तेपीति । ननु समाहारस्य पुरुषाधीनत्वादप्रामाण्यं स्यादत आह । तेषां

क्यार्थं प्रतिपादयन्तीति न दोषः । तेषां च समाहारे यत्र पुरुषस्य स्वातन्त्र्यं तत्र तद्बुद्ध्यधीनं प्रामाण्यम्, अस्वातन्त्र्ये चाऽनपेक्षम्, अतो न पदानामन्विते शक्तिः प्रमाणवती, निरस्तश्चायमन्विताभिधानवादो न्यायरत्नमालायामित्यास्तां तावत् ।

वाक्यस्फोटोऽपि पदस्फोटन्यायेनैव निरस्तः । वाक्यार्थस्य च निर्भागत्वं भागाऽवगमात् प्रसङ्गाद्यनुपपत्तेश्च निरसनीयम्-तथा हि—

प्रसङ्गतन्त्रबाधोहाऽतिदेशाधिक्रियाक्रमाः ।
प्रयुक्तिशेषभेदाश्च कथं निर्भागवादिनाम् ? ॥९३॥

यदा हि "अग्नीषोमीयं पशुमालभेत" इति नि-

चेति । वाक्यस्फोटनिरासोऽपि पदस्फोटनिरासवदवगन्तव्य इत्याह । वाक्येति । यथाऽनंशस्य पदस्य वैशद्यावैशद्ये न युज्येते तथाऽनंशस्य वाक्यस्याऽपि सामान्यविशेषतत्त्वानामनुभूयमानता वैशद्यं सामान्य तन्मात्रस्य वा वेदनमवैशद्यं नचैतन्निखिलसामान्यविशेषविरहिणः स्फोटस्य सम्भवति । तदारामन्यायेनचान्वयव्यतिरेकाभ्यामर्थावगमादनंशताऽनुपपत्तिः । ननु यदि विभागेनैव प्रकृतिप्रत्ययाभ्यामर्थद्वयाभिधानं तर्हि यत्र प्रकृतिमात्रं प्रयुज्यते अग्निचिदित्यादौ यत्र वा प्रत्ययमात्रं अधुनेति कथमत्रार्थद्वयाभिधानम् ? । तत्र प्रतीतिबलेन तन्मात्रस्यैव द्विशक्तत्वादिति ब्रूमः । शब्दस्वभावस्यान्यथाकर्तुमशक्यत्वात् । अत्रैकदेशानुमानेनोभयार्थत्वमिति केचित् । तन्न नहि केवलप्रत्ययस्य कदाचिदपि प्रयोगोऽस्ति यतस्तेन ज्ञातसाहचर्याच्चिनोतिस्तमनुमापयेत् । अधुनेति च इदंशब्देन वि-

भागस्य साङ्गप्रधानविधेरर्थो निर्भागः—न साध्यं न साधनं नाप्यङ्गानि तदा न पशुर्न प्रयाजा न पुरोडाशो न तदीयाः अनुयाजाः सन्तीति किं कुत्र प्रसज्जते? । एवं तन्त्रादिष्वपि दर्शयितव्यम् । तस्मादनेकपदार्थानुरक्तो वाक्यार्थः, स च पदार्थमूलो न निर्मूलो न च सङ्केतमूलः, तस्मान्नाऽप्रामाण्यं चोदनायाः । यत्तु वाक्यत्वात् पौरुषेयत्वमित्युक्तं तदुपरितनेऽधिकरणे निराकरिष्यामः ॥

इति सप्तमं वाक्याधिकरणं सम्पूर्णम् ।

नैव सर्वदा प्रयुज्यमानः कथमिदंशब्दमनुमापयेत् । नाप्यर्थैकदेशेन लक्षणया तत्प्रतीतिः लक्षणानुगतबुध्यभावात् क्विबन्तादिषु मुख्यत्वेनैव प्रतीतेः । दूषणान्तरं तुस्फोटवादोक्तमनुसन्धेयम् । अत्र स्फोटवादी पदतद्भागानामन्वयव्यतिरेकाऽसम्भवादानर्थक्यमाह । तथाहि—

"नामाख्यातादिसाकल्यवैकल्यानुगमे सति ॥
तदर्थानुगमो दृष्टः पदवाक्यान्तराश्रयः ॥ १६८ ॥
विप्राश्वः पचते यातं राजहस्तिन्यगादिति ॥
तथान्यरूपमन्यत्र राजा दध्यत्र गामिति" ॥ १६९ ॥

(श्लो. वा. वा.)

अस्यार्थः । पदवाक्यान्तराश्रय इति पदान्तराश्रयो वाक्यान्तरादर्थानुगमो दृष्टः । तत्र नामपदमाख्यातपदमित्यादिरूपेण पदान्तरत्वम् । पदभेदे च वाक्यान्तरत्वम् । तत्र साकल्यानुगमे तदर्थानुगमाऽभावादन्वयो नास्ति वैकल्यानुगमे तु सकलस्य वाचकरूपस्य व्यतिरेकेऽपि तदर्थसम्भवान्नव्यतिरेको-

ऽपि नास्ति । तत्रान्वयाऽभावोदाहरणं विप्रत्यादि । विप्रश-ब्दौतु स्वतन्त्रावुपसर्गार्थवाचिनौ दृष्टौ. तत्समुदायस्त्वन्यत्र-ब्राह्मणवाचकः ।

"अश्व इत्यपि नामेदमाख्यातं लुङि चेदृशम् ।
आख्यातं पचतेशब्दः पचते इति वा द्वयम्" ॥ १७१ ॥
स्त्रीद्वित्वं पुंवहुत्वं वा तेषष्ठ्यर्थचतुर्थ्यथ ।
पचते इति सर्वं वा चतुर्थ्यन्तं शतुः पदम् ॥ १७२ ॥
यातं लोण्मध्यमाद्वित्वमयातं लङि वा भवेत् ।
कर्तृनिष्ठाद्वितीयान्तं प्रथमान्तं नपुंसकम्" ॥ (श्लो.वा.वा.)

अयातमित्यत्र यातशब्दस्य साकल्यानुगमे स्वार्थाऽसम्भवः। तथा यातमयातमितिद्वयोः पदयोः प्रत्येकमाख्यात-निष्ठाप्रथमान्तद्वितीयान्तत्वेन त्रेधा त्रेधा विभागे तत्तदर्थव्यभिचारः ।

" राजहस्ती समासो वा राजलोण्मध्यमोऽथवा ।
हस्तिनीत्यथसप्तम्यामथस्त्रीप्रत्ययान्तरम् ॥ १७४ ॥
अगादिति लुङन्तं स्यादगो वा पञ्चमीपरः ।"

एवमेकरूपेऽपि पदे नानार्थविकल्पेन ततदर्थानुगमाऽभावः शब्दभेदानामपि पदानां न कश्चिदर्थो व्यवस्थितः शक्योनिश्चेतुं तदनिश्चये च तदधीनस्य वाक्यार्थस्याप्यनिश्चयः स्यात् । नि-र्भागवाक्यवादिनां तु प्रत्येकं वाक्यभेदात् वाऽस्ति व्यभिचा-रः । तथान्यरूपमिति तु व्यतिरेकव्यभिचारोदाहरणम् । रा-जेति शब्दो नृपवाचको दृष्टो, राज्ञेत्यत्र तच्छब्दव्यतिरेकेऽपि-नृपप्रतीतिर्भवति । तथा दध्यत्रेत्यत्र दधिशब्दव्यतिरेकेऽपि तदर्थप्रतीतिर्दृष्टा । गामित्यत्र गौरित्यस्य पदस्याऽभावेऽपि तदर्थप्रतीतिरिति व्यतिरेकव्यभिचारः । पूर्वपदव्यतिरेकेऽपि

पदान्तरादेवात्रार्थप्रतीतिर्भविष्यतीति चेन्न । पदान्तरस्य तत्र सङ्केतग्रहाऽभावात् । न च पदान्तरेऽपि व्यतिरेकग्रहोऽस्त्विति वाच्यम् । आनन्त्येन तत्र सङ्केतग्रहाऽसंभवात् । अत्राहुः-

" अत्रब्रूमः पदात्मा न सर्वेष्वेतेषु भिद्यते ।
केन चिद्धर्मभेदेन जरा राजादिवत्क्रमात् ॥ "

केन पुनरुपायेनायं धर्मभेदोऽवगम्यते क्रमान्यत्वन्यूनत्वादिभिरिति ब्रूमः । यथाहुः-

" पदावधारणोपायान्बहूनिच्छन्ति सूरयः ।
क्रमन्यूनातिरिक्तत्वस्वर वाक्यश्रुतिस्मृतीः" ॥ १८३ ॥
(श्लो. वा. वा.)

नदीदीनेत्यत्र क्रमान्यत्वम् । शुनः शुन इति न्यूनातिरिक्तत्वं शुनइति कर्मीभूतः शुनक उच्यते । शुन इति च वृद्धिमापन्नः । तत्र क्रमान्यत्वे न्यूनत्वे वा विकलस्य वाचकत्वाऽभावादेवार्थानवगतिरित्यविवादम् । अतिरेकेच पदान्तरत्वमेव । स्वरस्तु बहुव्रीह्यादिनिर्णयोपायः । भोक्तुकामः पचत इति वाक्यवशेनाख्यातं निर्णीयते पचते दक्षिणान्देहीत्यत्र नाम धातोरेकवाक्यवशेन शत्रन्तम् । श्रुतिः सामानाधिकर्ण्यं तत्र यातः पुनरायातीत्यत्राख्यातसामानाधिकरण्यादिति कर्तृनिष्ठा प्रथमान्तं नामपदं निर्णीयते । यातो देवदत्तयज्ञदत्तावित्यत्र द्विवचनान्तनामपदसामानाधिकरण्यादाख्यातमिति । शरणमत्र व्याकरणम् । यथा मातृपितृसम्बन्धानुभवनिमित्तस्मरणात् समानेऽपि मनुष्यत्वे ब्राह्मणत्वादिकं निर्णीयते तथा अश्वस्त्वं देदत्तेत्युक्ते ऽश्वपदं सङ्कीर्णमपि व्याकरणस्मृत्याऽऽख्यातमितिनिर्णीयते । एवमन्यदप्यूह्यम् । एतत्प्रपञ्चस्तु वार्त्तिके-

ऽवगन्तव्यः । नापि व्यतिरेकव्यभिचारः । दध्यत्रेत्यत्र दधिपदव्यतिरेकाभावेन प्रत्यभिज्ञया दधिशब्दार्थस्यैवावगमात् । कथं तर्हि वैलक्षण्यावगतिरिति चेत्? आनन्तर्यदोषादिति ब्रूमः। इकारान्तमप्यकारेण परेण संहितादोषाद् यकारान्तमिव भ्रान्त्यावऽगम्यत इति । अथवा पदान्तरमेवेदं पारमार्थिक एवायं यकारः दधिशब्दार्थप्रतीतिस्तु तत्समानार्थत्वात् । इकोयणचीति सूत्रेण समानार्थत्वाऽवगमात् । अनेन हीकारस्य स्थाने यकारोच्चारणं संहितायां भवतीत्युच्यते तेनेकारान्तपदसमानार्थत्वमस्य कथितं भवति । प्रत्यभिज्ञया: पदैकत्वमिति चेत् । न । प्रत्याभिज्ञाया अभावात् । पदैकत्वे ह्यनवगतसूत्रार्थः दधीत्यत्र व्युत्पन्नस्य दध्यत्रेत्यत्र तदर्थावबोधः स्यान्न त्वेवमस्ति । विकारानन्त्यात्सम्बन्धाऽग्रहणमिति चेत् । न । लक्षणेन तद्विदुक्तेर्वा सम्बन्धग्रहणसम्भवेनातिक्लेशाऽभावात् । ननु दध्यत्रेत्यत्राविभक्तस्याऽज्ञातावधेर्नार्थवत्त्वमतः कथं तदन्ताद्दध्यर्थप्रतीतिरिति ?। नैषदोषः । अवध्यग्रहणेऽप्येतस्मादेव पदान्तराद्दध्यर्थावगमेनार्थवत्त्वोपपत्तेः । अथवा ज्ञायत एवावधिर्नतु विच्छिद्योच्चार्यते तेन संहितायामेवास्य साधकत्वात् विभिद्यमानस्याऽसाधुत्वप्रसङ्गात् । यथा कुम्भकारादिसमासेन कदाचिदुत्तरपदं विच्छिद्योच्चार्यते एवमिहापि संहितायाम् । असंहितायां तु दधिपदमेव नित्यं प्रयोक्तव्यमिति । यथाहुः—

"ज्ञायते चावधिस्तत्र व्यञ्जनान्तेन तूच्यते ।
दधिशब्दावबोध्यत्वान्नित्यं नित्यसमासवत्" (श्लो. वा. वा. २३०) ॥ इति ।

एवं राजराजादिपदेष्वपि व्यतिरेकव्यभिचारः परिहर्तव्यः।

तत्रापि पदान्तरस्थाकिञ्चिदंशश्रूयमाणस्य तदर्थप्रतिपादकत्वात् । या तु ब्राह्मणकम्बलादौ ब्राह्मणार्थावगतिस्तत्रावध्यन्तरत्वेन पदान्तरत्वात् । अवध्यन्तरत्वेऽपि तत्पदमविकलमस्त्येवेति कथं तदर्थोनावगम्यत इति चेत् ? । न । उत्सर्गस्यापवादेन बाधात् । अत्रहि प्राच्यस्य पदरूपस्यावध्यन्तरमेवापवादकम् । यदा त्ववध्यन्तरं दूरीकृत्य प्राच्यरूपेण पदान्तरमुच्चार्यते तदा तदर्थावगतिर्भवत्येवेति न दोषः कश्चित् । यत्राप्यश्वकर्णादावन्यूनानधिकमेव पदद्वयं तत्रापि वाजिकर्णयोरनभिधानम् । उत्सर्गरूपाया अवयवप्रसिद्धेरपवादरूपया समुदायप्रसिद्ध्या बाधात् । पूर्वमेव वृक्षाद्यर्थावगमात् अर्थप्रकरणाधीनेन श्रोत्रा बोधितस्वार्थयोरपि न सर्वदा तद्बाधः । तथाहि—अश्वमानय, कर्णं विध्यतीत्यादौ व्यस्तप्रयोगे तावन्नावयवार्थयोः किञ्चिद्बाधकमस्ति । समस्तप्रयोगेऽप्यश्वकर्णं परिमार्ष्टीत्यादौ प्रमाणान्तरवशेन समुदायार्थबाधादवयवार्थनिर्णयः सिध्यतीति । ननु पदानां स्वपदार्थमात्रप्रतिपादनावसितानां न विशिष्टरूपवाक्यार्थबोधनसामर्थ्यं कल्प्यम् । यथाहुः—

"न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेपि पदानि नः ।
तन्मात्रावसितेष्वेषु पदार्थेभ्यः स गम्यते"(श्लो.वा.वा.२२९।) ॥

हन्त तर्हि पदार्थेभ्योवगम्यमानो वाक्यार्थो न शब्दः स्यात् । नैष दोषः । पदार्थानां शाब्दत्वे तद्द्वारा वाक्यार्थस्यापि शब्दप्रतिपाद्यत्वसंभवाद् वाक्यार्थे हि शब्दानां तात्पर्यं न पदार्थेषु तेषां प्रमाणान्तरासिद्धत्वात् । अतो यद्यप्यभिधाव्यापारः पदार्थेष्वेव पर्यवसितस्तथापि तेषु तात्पर्याऽभावात् वाक्यार्थपर्यन्तत्वतात्पर्ये च शब्दस्य प्रामाण्यात् सिध्यति शब्दप्रमेयतया वाक्यार्थस्य शाब्दत्वमिति । नाप्यसम्बन्धोपालम्भः

अविनाभावरूपस्य सम्बन्धस्य सद्भावात् । यथाहुः—

"सम्बद्धमेव चैतेऽर्थं गमयन्त्यविनाभुवम् ।
सामान्यं स्वविशेषेण विना नह्युपपद्यते" (श्लो.वा.वा.२२१)॥

हन्त तर्ह्यनुमानादेव वाक्यार्थावगतिरापद्येत ? । नैवम् । पक्षाद्यभावेनानुमानाऽसंभवात् । न तावत्पदार्था एव वाक्यार्थविशिष्टतया पक्षीक्रियन्ते त एव हेतवस्ततः प्रतिज्ञार्थैकदेशतेति । अथ वाक्यार्थमेव पक्षीकृत्य पदार्थानां हेतुत्वमुच्येत ? । तदप्यसत् । पूर्वमप्रतीतस्य पक्षत्वानुपपत्तेः पदार्थेभ्य एव हि तत्संसर्गात्मा वाक्यार्थोऽवगम्यते न ततः प्रागिति दिक् । एतद्दूषणप्रपञ्चस्तु वार्तिकेऽवगन्तव्यः । किञ्च त्रिलक्षणलिङ्गजन्या हि धीरनुमानं न चैवं तज्जन्या पदार्थैरेवागृहीतसम्बन्धैरियं जन्यते अतः प्रमाणान्तरमेव शाब्दमिति । अपि च ।

"भावनावचनस्तावत्तां स्मारयति लोकव"

दित्येतावदविवादम् । सा च यजते पचतीत्यादावाख्यातप्रत्ययान्वयेऽन्वयाद् यागपाकशब्दान्वयेव।ख्यातव्यतिरेके व्यतिरेकात् आख्यातप्रत्ययार्थ इति केचित् । धातुरेवाख्यातप्रत्ययसन्निधानानुगृहीतशक्तिर्भावनां वक्तीत्यपरे । अन्येपुनर्धातुप्रत्यययोरन्यतराऽभावेऽपि भावनाया अप्रतीतेस्समुदायार्थो भावनेत्याहुः । अस्तु नाम यः कश्चित्पक्षो नचात्र निर्बन्धेन प्रयोजनं किञ्चित् । प्रकृतमेव निरूपयामः । सा चेयं भावना स्वर्गकामो यजेतेत्याख्याताभिहिता साध्यसाधनेति कर्तव्यतांशा सामान्येनाक्षिप्यान्यतो विशेषमपेक्षते । एवं स्वर्गोऽपि कमिकर्मतयावगतः सिद्धे कामनाया अभावात्साध्यतयावगतोभावनामपेक्षते । तयोश्चाकाङ्क्षासन्निधियोग्यत्ववशेन परस्परान्वयोगम्यते क्रमसाध्यसम्बन्धा च भावना साधनमपे-

क्षते पदश्रुत्या च धात्वर्थ एव साधनत्वेनोपस्थाप्यते। गोदोहनादिद्रव्यस्यापि साधनत्वेन श्रवणात् कथं धात्वर्थस्यैव भावनान्वय इति चेत् । सत्यम् । तस्याप्यप्प्रणयनादिरूपधात्वर्थाश्रयेणैव तत्साधनत्वं न स्वरूपतः । निराश्रयस्य तदनुपपत्तेः । ननु धात्वर्थस्याप्यसिद्धत्वात् साध्यतयैवान्वयः किन्नस्यादिति चेत् । न । तस्यापुरुषार्थस्य विध्युपष्टब्धभावनया साध्यत्वेनाऽग्रहणात् । नन्वेवमपि तृतीयाऽभावात्कथं यागस्य करणत्वं ? स्वभावादेवेति ब्रूमः । नहि करणत्वं तृतीयया नियतं यतस्तन्निवृत्त्या निवर्तेत । सत्कदौ(?) तृतीयां विनापि करणत्वदर्शनात् । प्रयाजशेषे तृतीयासत्वेऽपि करणत्वाऽभावात् । कथं तर्हि यागेनेति तृतीयोपदर्श्यते स्वभावसिद्धमेव करणत्वसम्बन्धं स्पष्टीकर्तुमिति ब्रूमः । यथाहुः—

"न केवलं तृतीयैव करणत्वं नियच्छति ।
प्रमाणान्तरगम्येऽपि न किञ्चिद्विरुणद्धि सा"॥ २५७ ॥

तथा—

"प्रत्यासत्तिनिमित्तोऽयं सम्बन्धः कल्प्यते नयोः ।
तं च विस्पष्टमाख्यातुं यागेनेति प्रयुज्यते ॥ २५८ ॥
यथौपगवशब्दार्थे तस्यापत्यमितीदृशात् ।
कथयन्ति नचैतस्मिन्षष्ठ्यन्तोपगुसम्भवः" ॥ २५६ ॥

किञ्च यथा यागशब्दात् तृतीया भवति नैवं यजेतेत्यत्र धातोरप्रातिपदिकत्वात् । अतस्तदर्थव्याख्यानार्थं यागेनेति तृतीयान्तस्य प्रयोगः। एवं च लब्धसाधनसम्बन्धा भावना करणोपकारसाधनमुपायमात्रमपेक्षते प्रयाजाद्युपायश्च भाव्यमात्रम् । तयोश्चाकाङ्क्षासन्निधियोग्यत्वैर्मिथः सम्बन्धसिद्धिः । स चोपायः क्वचित्स्ववाक्यगतोलभ्यते । यथा रेवतीषु वारवन्तीयं कृत्वा यजेतेति । क्वचित्तु वाक्यान्तरगतो यथा प्रयाजादिः वाक्यान्तर-

गतस्याप्यपेक्षावशादन्वयः । उपायरहितानां करणानां फलसाधनत्वाऽसंभवात् प्रयाजानां च निष्प्रयोजनत्वापत्तेः । ननु-विश्वजिद्वत्स्वर्गप्रयोजनवत्त्वात् कथं प्रयाजादेर्निष्प्रयोजनत्वोपत्तिः । मैवम् । अपेक्षितसंनिहितक्रतूपकाररूपदृष्टप्रयोजनलाभे सति प्रयोजनान्तरकल्पनानुपपत्तेः । नन्वंशानां भावनासम्बन्धेसति परस्परसम्बन्धानुपपत्तेः परस्परसम्बन्धे वा न भावनासम्बन्धः स्यात् सम्बन्धद्वयविधाने वा वाक्यभेदप्रसङ्गात् । अत्राहुः—

"एकभावनयोपात्तास्त्रयोप्यंशाः परस्परम् ।
उपकार्योपकारित्वं पश्चादनुभवन्ति ते ॥
भावनापेक्षमाणा हि साधनं किं फलस्य मे ।
साधनानुग्रहः कोवेत्यनुस्यूतमपेक्षते ।
आकाङ्क्षैवमविच्छेदे सिद्धा शुक्लगवादिषु ।
एकक्रियागृहीतेषु सम्बन्धश्च परस्परम् ॥
द्रव्यद्वारेण चैतेषां विशेषणविशेष्यता ।" इति ।

ततश्च भावनामेव विशिष्टां विदधत्ययोऽर्थाद्यागादीन्विदधाति न साक्षादिति । तदुक्तम्—

" एवं पदार्थवाक्यार्थसधातैरुपकल्पितां ।
विशिष्टां भावनां प्राप्य वृत्तिर्विधिनिषेधयोः ॥

यत्तु प्रत्यासत्तिवशात्केवले भावनात्मनि पर्यवासितो विधि र्न पश्चाद्यागादानशान् विधातुमसामित्युक्तन् । तत्र ब्रूमः । न तावत्केवले भावनात्मनिविधिपर्यवसान भवति । अशत्रयाऽपरिपूर्णापा भावनाया अनुष्ठातुमयोग्यतया चेतनप्रवर्त्तनात्मकविध्यन्वयाऽसम्भवात् याग्यताया अपिसम्बन्धकारणत्वात् अयमत्र क्रमः । प्रत्यासत्तिशेषाद्विधिभावनयोदन्वयेन

भवितव्यमित्येतावत्प्रथममवगम्यते। ईदृशी चावस्था विधिसंस्पर्शइति विधिप्रक्रम इति चोच्यते। तथाच भवितव्यं यथावगतभावनान्वयो विधिरयोग्यत्वात्तामविदधद्यावदंशत्रयं परिपूर्णं परीक्ष्य पश्चात्सर्वांशसम्पूर्णामंशान्तरानपेक्षिणीं विदधातीति। यथाहुः—

"यद्यप्यन्यैरसंस्पृष्टां विधिः स्पृशति भावनाम्।
तथाप्यशक्तितो नासौ तन्मात्रे पर्यवस्यति॥ २७४॥
अनुष्ठेये हि विषये विधिः पुंसां प्रवर्तकः।
अंशत्रयेण चापूर्णां नानुतिष्ठति भावनाम्॥ २७५॥
तस्मात्प्रक्रान्तरूपोऽपि विधिस्तावत्प्रतीक्षते।
यावद्योग्यत्वमापन्ना भावनान्यानपेक्षिणी" ॥ २७६॥
(श्लो. वा. वा.) इति॥

नन्वस्तु नामैवं नामाख्यातसम्बन्ध उपसर्गनिपातानां तु कथं गवादिवत्स्वतन्त्राणामर्थावधारणाभावात्। सत्यमेवम्। तथाप्यन्यसहितानामेव प्रयोगनियमात् तदागमन्यायेनार्थवत्त्वं सिध्यति चकारागमे हि समुच्चयोऽवगम्यते न ततः प्राक्, वाचकत्वद्योतकत्वविवादस्तु नात्रोपयुज्यते द्वेधाऽपि वाक्यार्थोपयोगित्वसिद्धेः। तदुक्तम्—

"वाचकद्योतकत्वं तु नातीवात्रोपयुज्यते।
तद्भावाद्वाचकत्वं वा परस्यानुग्रहोऽस्तु वा" ॥ २७८॥

यत्तु नैषां क्रियया नाम्ना वा सम्बन्धः सम्भवतीत्युक्तम्। तत्राप्याहुः—

"ईषदर्थादयस्तावत्साक्षान्नाम्नैव सङ्गताः॥
अप्रयुक्तक्रियाद्वारा विशेषाऽधानतोऽपरे॥ २७९॥

आपिङ्गः प्रवयाश्चेति द्वयस्यैतन्निदर्शनम् ॥
क्वचित्प्रकृष्टतादीनां भावनोपनिपातिनाम् ॥ २८० ॥
इतिकर्तव्यतात्वेन प्रतिपत्तिपरिग्रहौ" (श्लो. वा. वा.) ॥

नन्वाभिमुख्यस्य कर्तृधर्मत्वात् कथं क्रियया सम्बन्ध इति चेत् ? क्रियैकार्थसमवायसम्बन्धेनेति ब्रूमः । न हि कर्तृस्वरूपाङ्गमभिक्रमणमानर्थक्यात् धातुसम्बन्धे च णमुलो विधानात्, अतः क्रियाङ्गमेवेति । ननु प्रासादः प्रतिष्ठते इत्यादावन्यार्थविरुद्धार्थाश्चोपसर्गाः धातोः स्वार्थशक्तिं लोपयन्तः कथं धातुना सम्बध्यन्ते । उच्यते । वाचकत्ववादिमते तावन्नैते विशेषणं किन्तु धातुभाग एव । तथाहि—शब्दान्तरात्तिष्ठतेः सकाशात् प्रतिष्ठतिरश्वकर्णशब्दवत् समुदायशक्त्यैव गमने वर्त्तते । अभिदधातीत्यादावपि समुदायशक्तिः तथा प्रलम्बतिरपि लम्बतेः सकाशात् शब्दान्तरं समानार्थं नतु लम्बतेः प्रशब्दो विशेषणमिति । द्योतकत्ववादिनस्तु विशेषणत्वमेव मन्यन्ते । यथाहुः—

"प्रशब्देनोपसृष्टस्य तिष्ठतेर्गतिशक्तता ।
नहि प्रशब्दवेलायां गमने जायते मतिः" ॥ २८३ ॥

ननु तिष्ठतिमात्रेणापि न गमने मतिर्जन्यते ततः कुत एतत् तिष्ठतिर्वाचकः प्रशब्दोद्योतकइति विपरीतमेव किं न स्यात् । उच्यते । धातूनां तावत्सामान्येन क्रियामात्रे शक्तिः क्लृप्तैवातस्तिष्ठतेर्गमनाख्ये विशेषे एव शक्तिकल्पनं भवति प्रशब्दस्य तु सामान्ये विशेषे चोभयत्रापि अक्लृप्तैव शक्तिः कल्पनीयेति गौरवम् । अतो द्योतकत्वमेव प्रशब्दस्य न वाचकत्वमिति । कथमेतावता विशेषणत्वं प्रशब्दस्य ? । धातोरर्थान्तराविषयकशक्त्यन्तरोद्भावनेनैव विशेषणत्वमिति ब्रूमः । औपसंदानिकी श-

क्तिरेव द्योतनमिति हि प्रसिद्धिः । अयमत्र विवेकः । तिष्ठतेर्गतिनिवृत्तिर्गतिश्चेतिद्वावर्थौ दधातेरपि धारणमभिधानं च । तत्रानुपसृष्टयोगनिवृत्तौ धारणे च शक्तिराविर्भवति । प्राभ्युपसर्गौ तु तां शक्तिमपोह्य गतावभिधाने च शक्तिमाविर्भावयतः । उक्तश्च—

"तेन शक्त्यपवादोऽयं भवेदर्थापवादवत्" ॥ २८७ ॥

अयं च द्योतकत्ववादिनोऽभिप्रायः । वाचकत्वपक्षेतु समुदायशक्तिरेवेति । अत्र केनचित्—कर्मणः कर्मसाध्यत्वान्न ज्ञानद्वारेण काष्ठपाकान्वय इत्युक्तं तन्निराकरणप्रसङ्गेन कर्तृत्वकरणत्वादिनिरूपणं वार्त्तिककारैर्महता प्रबन्धेन कृतं तत्तत्रैवावगन्तव्यम् । नन्वस्तु नामैवमुपसर्गाणां सम्बन्धः नञादेस्तु वस्तुस्वरूपविरुद्धप्रतिषेधविकल्पादिवाचकत्वात्कथं सम्बन्धः स्यात् । उक्तं च—

"स्वश्रुतेः प्रथमं वस्तु सद्भावेन निरूपितम् ।
कथं नञादिभिः पश्चादभावमुपनीयते" इति ॥

अत्रोच्यते । न तावन्नञा वस्त्वभावः क्रियते यतस्तस्य वस्तुना विरोधः स्यात् । किन्तु विद्यमानमेवाभावं वर्तमानमतीतमनागतं वाऽभिदधाति । त्रेधा हि नञो वृत्तिः पर्युदासाभावप्रतिषेधैः । तद्यत्र नाम्ना संयुज्यते अब्राह्मण इति तत्र ब्राह्मणवस्त्वन्तरपर्युदस्तं क्षत्रियाख्यवस्त्वेव नञा प्रतिपाद्यते । तथा नेक्षेतेत्यादौ धात्वर्थयोगेऽक्षिणपर्युदस्तमनीक्षणसङ्कल्पाख्यवस्त्वन्तरमेवोच्यते । तच्च वस्त्वन्तरपर्युदस्तत्वं वस्त्वन्तरस्याऽनुगुणमेव सर्ववस्तूनामितरेतराभावात्मकत्वात् । यत्राप्याख्यातसंयोगे नास्ति घटो नासीन्न च भविष्यतीति वा निवृत्तिः प्रतीय-

ते तत्रापि न वस्त्वभावोनञा क्रियते किं त्वज्ञानसंशयविपर्यय-मात्रनिवारणम् । यथाहुः—

"नामधात्वर्थयोगी च निषेधोऽन्यार्थभाग्भवेत् ॥ ३०१ ॥
तत्र वस्त्वन्तरोक्तं वस्त्वेवानुगुणं च तत् ॥
आख्यातप्रत्ययैर्योगे निवृत्त्यर्थः प्रतीयते ॥ ३०२ ॥
तत्र चाज्ञातसान्दिग्धविपरीतार्थवारणम्" (श्लो. वा. वा.)

नन्वस्तु रूपाभाववाचकस्य कथं शब्दान्तरसमभिव्याहारः । नैवम् । अभावस्य वस्तुत्वप्रतिपादनात् तदभिधायिनोनञो घटादिवत्तदुपपत्तेः(?) । ननु प्राप्तिपूर्वको निषेधो भवति तद्यदि घटसत्ता प्राप्ता कथं निषिध्यते नहि विद्यमानस्याऽविद्यमानता सम्भवति ? । स्यादेवं यद्ययं प्रतिषेधः स्यात् नत्वेवं, न हन्यान्न पिबेदित्यादाविव विधिसंयोगाऽभावात् । किन्त्वभावस्वरूपमात्रकथनं, नच तत्प्राप्त्यपेक्षम् । हन्त तर्ह्यभाववाचिनो नञः कथं सद्भाववाचिना घटशब्देन समभिव्याहारः स्यात् अस्तिनास्तिशब्दयोरिव विरुद्धार्थत्वात् ? । नैषदोषः । न ह्यत्र घटशब्देन घटस्य सत्वं बोध्यते किन्तु सदसत्वसाधारणं स्वरूपमात्रम् । तच्च प्रादेशिकत्वाद् घटस्य क्वचित्सद्भाववत् क्वचिच्चाऽसदिति न विरोधः सत्वबोधने तु पटोस्तीत्यस्तिशब्दप्रयोगः स्यात् । ननु मीमांसकानां मते जातिरेव शब्दार्थः तस्याश्च नित्यत्वात्कथं सत्वसाधारण्यम् । नैष दोषः । नास्तीत्यस्य व्यक्तिविशेषणत्वाङ्गीकारात् शब्दार्थरूपाया जातेस्तदसम्भवात् । यथाहुः—

"जातेरस्तित्वनास्तित्वे न च कश्चिद्विवक्षति ।
नित्यत्वाल्लक्ष्यमाणाया व्यक्तेस्ते हि विशेषणे"(श्लो॰वा॰वा॰३११)

नन्वेवमपि ब्राह्मणं न हन्यात् सुरां न पिबेदित्यादौ नञः प्रतिषेधवृत्तेरस्ति विरोधः—तथाहि—प्राप्तिपूर्वकः प्रतिषेधोभवति

यदि रागादिना पानं हननं वा तेनानुष्ठितं तदा कथं तस्याऽभावः कथ्यते यदि तु नानुष्ठास्यते ततः प्राप्त्यऽभावात्प्रतिषेधानुपपत्तिरिति । उच्यते । नाऽत्र नञो ऽभावार्थत्वं किन्तु चिकीर्षिताद्व्यापारान्निरुन्धनम् । सम्भवति च पुंसः पानादौ वैराग्यजननेन तदभावावस्थापनमित्यविरोधः । उक्तं च—

"विधिना युज्यते यत्र न हन्यान्नपिबेदिति ।
तत्राभावार्थता नैव स्वयं पुंसो रुणद्धि हि" (श्लो॰ वा॰ वा॰ १३९) ॥

एतत्प्रपञ्चस्तु न्यायरत्नाकरेऽवगन्तव्यः । प्रकृतमनुसरामः । इतश्च वाक्यार्थस्य निर्भागत्वं निरसनीयमित्याह । प्रसङ्गादिति । यदि निर्भागो वाक्यार्थः स्यात् तदा वाक्यार्थावयवपदार्थविषयः प्रासङ्गिकादिव्यवहारो न स्यादित्यर्थः । यथाहुः—

प्रासङ्गिकादि यत्कार्यं पदार्थोपनिबन्धनम् ।
आकाङ्क्षाविदितप्रश्नौ यौ च दृष्टौ पिकादिषु ।
असत्यं तदपोद्धृत्य न चैकं कल्पयिष्यति ॥ ३३८ ॥
असत्यैर्गम्यमानेर्थे सत्यता नेत्युदाहृतम् ।
स्वरूपेणासतोदृष्टं नोपायत्वं हि कस्यचित्" (श्लो॰ वा॰ वा॰ ३४०) इति ।

प्रसङ्गादित्यादिशब्दार्थं विवृणोति । तथाहीति । उक्तमर्थमुपपादयति । यदा हीति । उपपादितमर्थं निगमयति । तस्मादिति । अत्र सिद्धान्तसूत्रम् 'तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्' । तद्भूतानां तेष्वेव पदार्थेषु भूतानां वर्तमानानां पदानां क्रियार्थेन पदेन समाम्नायः समुच्चारणं नानपेक्ष्य पदार्थान् पार्थगर्थ्येन वाक्यार्थम् । कुतः । अर्थस्य पदार्थस्य तन्निमित्तत्वात्—वाक्यार्थप्रत्ययनिमित्तत्वात्, पदानि तावत्स्वा-

र्थानभिदधति पश्चात्ते पदार्था आकाङ्क्षादिवशेन वाक्यार्थमवगमयन्तीति सूत्रार्थः। अथवा ग्रन्थकाराभिप्रेत एवं सूत्रार्थो वर्णनीयः। इह केचिद्वाक्यमेव वाक्यार्थस्य वाचकमिति मन्यन्ते केचित्तु निर्मूलमेव वाक्यार्थज्ञानमित्याहुस्तेषामपीदं सूत्रेण निराकरणम्—तथाहि लोकसिद्धेषु पदार्थेषु वर्तमानानां पदानामेव वाक्यार्थज्ञानोपायत्वात् न वाचकत्वम्। कुतः। अर्थस्य तन्निमित्तत्वात्—पदार्थानामेव तन्निमित्तत्वोपपत्तेर्निष्प्रमाणकं वाक्यस्य वाचकत्वमित्यर्थः। नापि निर्मूलं वाक्यार्थज्ञानं अर्थस्य पदार्थस्य तन्निमितत्वात्—तन्मूलत्वात्। न चैवं वाक्यार्थस्याशाब्दत्वापत्तिः। यतस्तेषां क्रियार्थेन समाम्नायः। ननु यदि पदार्थेषु पदानि वर्त्तन्ते पदार्थाश्च वाक्यार्थस्य क्रियायाः विशिष्टभावनाया निमित्तं ततः कथं पदानां क्रियार्थत्वेन समाम्नायः सिद्ध्येत?। वाक्यार्थावगतावेव तात्पर्यादिति ब्रूमः तथाहि—पदार्थस्वरूपस्य प्रमाणं वाक्यार्थावगतावेव तात्पर्यमिति युक्तमेवोक्तं तेषां क्रियार्थेन समाम्नाय इति। यथाहुः—

"साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम्।
वर्णास्तथापि नैतस्मिन्पर्यवस्यन्ति निष्फले॥
वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्" (श्लो. वा. वा. ३४३) इति।

नन्वेवमपि पदैरनभिधेया भावना कथमर्थ इत्युच्यते? प्रयोजनतयेति ब्रूमः। क्रियार्थेन समाम्नाय इत्यत्रार्थशब्दस्य प्रयोजनवचनत्वात्। यथाहुः—

"प्रयोजनतया चैषामर्थमिच्छन्ति भावनाम्।
क्रियार्थेनेति तेनेह समाम्नायप्रयोजनम्" (श्लो.वा.वा.३४४)॥

यत्रापि लोके शुक्लो गौरिति निष्क्रियमेव वाक्यं श्रुतं तत्राप्यानीयतामित्यध्याहर्त्तव्यम् । आख्यातवर्जितपदस्य प्रयोजनाऽक्षमत्वात् । किं चान्वयव्यतिरेकाभ्यामपि पदार्थानां निमित्तत्वमवसीयते उच्चरितेभ्योऽपि पदेभ्यः कदाचिन्मानसादपचारात्पदार्थाग्रहणे वाक्यार्थाऽग्रहणात् । वाक्यमप्यत्र न गृहीतमिति चेत् ? । न, पदोच्चारणं विनापि शौक्ल्यादिपदार्थावगममात्रेण शुक्लगुणकद्रव्यावगमदर्शनात् । तस्माद्वाक्यव्यतिरेकेऽपि पदार्थचयेऽन्वीयमानः पदार्थनिमित्त एव वाक्यार्थप्रत्ययः एवं च सति सिद्धे पदार्थनिमित्तत्वोपपत्तावपि मानसादपचारादग्रहणं तत्रापि पदार्थाऽग्रहणादेव वाक्यार्थाग्रहणम् । नतु वाक्यग्रहणादित्युत्तरं युक्तम् । संविद्विरोधात् । यथाहुः—

"पश्यतः श्वेतिमारूपं हेषाशब्दं च शृण्वतः ।
खुरनिक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः ॥ ३५८ ॥
दृष्टा वाक्यविनिर्मुक्ता न पदार्थैर्विना क्वचित् ।
मानसादित्यतो न स्याद्वाक्यग्रहणमुत्तरम् ॥ ३५९ ॥
मानसेनापराधेन पदार्थान् ये न गृह्णते ।
ते तु वाक्यं गृहीत्वापि नार्थं गृह्णन्ति कर्हिचित्" (श्लो. वा. वा. ३६०) ॥

प्रयोगास्तु वार्तिकेऽवगन्तव्या विस्तारभयान्नेह लिखिताः । नन्वेवमपि लौकिकवाक्यवद्वेदेऽप्यानुपूर्व्याः पौरुषेयत्वम्—दृश्यते च लोके—

"नीलोत्पलवनेष्वद्य चरन्तश्चारुसंरवाः ।
नीलकौशेयसंवीताः प्रणश्यन्तीव कादम्बाः" इति ।

अतो वैदिका अपि पुरुषकृता इति । तन्निराकरणार्थमिदं सूत्रम् "लोकेसंनियमात्प्रयोगसन्निकर्षः स्यात्" । एतच्च व्य-

वहितविपरिणतानुषङ्गेण व्याख्येयम् । लोके सन्निकर्षात्-प्रमाणान्तरसम्बन्धात् प्रयोगसंनियमः स्यात् पुरुषार्थी-नप्रयोगव्यवस्था युक्ता स्यात् न त्विह प्रमाणान्तराऽगोचरा-र्थविषयत्वादिति सूत्रार्थः ॥

इति सप्तमं वाक्याधिकरणम् ॥

सू० *वेदांश्चैके सन्निकर्षं पुरुषाख्याः । ननु पदपदार्थ-

---

*अष्टमं वेदस्यापौरुषेयत्वाधिकरणम्—

वेदस्यानित्यत्वात् पौरुषेयत्वाद्धर्मे न प्रामाण्यं पुरुषदोषसम्भ-वादिति पुनराक्षिपति. सू. पू. वेदांश्चैके सन्निकर्षं पुरुषाख्याः ॥ १ ॥ काठकं काथुममिति पुरुषघटिताः आख्याः नामानि अतः सन्नि-कर्षमाधुनिकं सादीन् एके-नैयायिका आहुः ॥ इतोऽप्यनित्य इ-त्याह-सू०-अनित्यदर्शनाच्च ॥ २ ॥ अनित्यानां जननमरणवतां पुरुषाणां "बबरः प्रावाहणिरकामयत कुसुरविन्द औद्दा-लकिरकामयत" इत्यादिवेदेषु दर्शनात् तेषां पुरुषाणां जननात् प्रागिमानि वाक्यानि नासन्निति सादित्वादनित्यत्वं पौरुषेयत्वं सिद्धम ॥ सिद्धान्तमाह । सि० सू० उक्तन्तु शब्दपूर्वत्वम् ॥ ३ ॥ शब्दे पूर्वत्वं नित्यत्वमुक्तं साधितं प्राक्. शब्दे नित्यत्वं सिद्धे वेदेऽपि नित्यत्वं वाचा विरूपनित्ययेत्यप्यु-क्तम् । ! सू० आख्या प्रवचनात् ॥ ४ ॥ आख्या समाख्या प्रव-चनाद् अध्ययनेन कठेनाधीतं काठकमित्युपपन्ना ॥ सू० परन्तु श्रु-तिसामान्यमात्रम् ॥ ५ ॥ यद्यपि बबरः प्रावाहणिरित्यस्ति परन्तु श्रुतिः प्रावाहण्यादिशब्दः सामान्यमन्यार्थस्यापि वाचकम् प्र-त्यस्य उत्कर्षाश्रयः वहनशब्दस्य गतिः इकारस्य कर्ता तथा च उत्कृष्टगत्याश्रयः नापत्यार्थः प्रत्ययः तथा च वायुपरः सचानादिः बबर इति वायुशब्दानुकरणमिति नानुपपत्तिगन्धोपि ॥ ननु जरद्गवः कम्बलपादुकाभ्यां द्वारिस्थितो गायति मद्रकाणि । तं ब्राह्मणी पृ-च्छति पुत्रकामा राजन् रुमायां लशुनस्य कोऽर्थः" इति वद्धेदे "गावो वा एतत्सत्रमासत" इत्यादीनामसम्बद्धप्रलापानां सत्वात्

(अष्टमं वेदाऽपौरुषेयताधिकरणम)

सू-वेदांश्चैके संनिकर्षं पुरुषाख्याः

सङ्केतानपेक्षैरेव पदैः पदार्थाः प्रतिपाद्यन्ते तैर-

सम्बन्धनित्यतया वाक्यार्थप्रामाण्य उपपादिते चोदनैव प्रमाणमित्यवधारणसिद्धेराग्रिमविचारानर्थक्यमित्याशङ्काक्षेपान्तरानिराकरणेनार्थवत्त्वमुपपादयितुं वृत्तमनुवदीत । सङ्केतानपेक्षैरिति । अत्र केचिदाहुः-- सम्बन्धनित्यत्वाद्युपपादनेन चोदनाप्रामाण्याक्षेपे परिहृतेऽपि कठादिसमाख्यया शाखानां पौरुषेयत्वाऽवगमात् तदवयवानां चोदनानां पुनः प्रामाराायमाक्षिप्यते इति । तन्न युक्तम् । सामान्यप्राप्तौ सत्यां विशेषनियमार्था समाख्या भवति--यथर्त्विजां सामान्यतः पदार्थेष्वनियमेन कर्तृत्वे प्राप्त आध्वर्यवादिसमाख्या नियमः क्रियते । न चेह वेदानां सामान्येन कश्चित्कर्ता प्राप्तो यतः काठकादिसमाख्यया कठादयो नियम्येरन् ।प्रवचने-

---

कथं वेदः प्रमाणमत्राह-सू० कृते वा नियोगः स्यात्कर्मणः सम्बन्धात् ॥ ६ ॥ कर्मणः कर्मप्रतिपादकवाक्यस्य सम्बन्धात् परस्परसाकाङ्क्षपदघटितत्वात् गावो वा इत्यादीनामपि कृते कर्मणि स्तुतिद्वारा विनियोगः । अयं भावः "त एवं विद्वांसः संवत्सरमुपयन्त्यनार्त्ता" इति अनेन संवत्सरसाध्यसत्रयागः कार्य इत्युक्ते केनेत्युक्ते होमेनेति, कस्मै आर्तिनाशाय, कथमिति ज्योतिष्टोमो वैश्वानरोऽतिरात्र इत्यादिरीत्या सर्वं सम्बद्धम् । तत्समीपे गावः सत्रमासतेति न स्वार्थतात्पर्यकं किन्तु गवादयो जडा अपि कर्मानुष्ठानं चक्रुः किमुत विद्वांसोऽनुतिष्ठेयुरित्यत्राऽसंशय इति स्तुतौ तात्पर्यं तस्मात्सर्वं सम्बद्धमिति । अस्मिन्नधिकरणे ६ सूत्राणि । आदितः सूत्राणि ३२ आदितोऽधिकरणानि ८ प्रथमपादोऽत्र समाप्तः प्रथमाऽध्यायस्य ।

प्यनपेक्षितसङ्केतैर्वाक्यार्थ इत्युक्तम् । इदानीं तु किं पौरुषेयाणि वेदवाक्यानि, उताऽपौरुषेयाणीति चिन्त्यते । पौरुषेयत्वे तु संजातस्यापि वाक्यार्थप्रत्ययस्य स्वतः प्राप्तमपि प्रामाण्यं पौरुषेयस्येदृशेऽर्थे मूलप्रमाणासंभवाद् विप्रलम्भभ्रान्त्यादिमूलतयाऽपोद्यते।

तत्र —

वेदानां पौरुषेयत्वं वाक्यत्वाद् भारतादिवत् ।
काठकादिसमाख्यापि कृतकत्वे समर्थ्यते ॥ ९३ ॥

नन्वऽपूर्वात्मा वेदार्थोऽलौकिकः कथंचिदपि बुद्धावाऽऽरोपयितुमशक्यः, कथं तत्र पुरुषा वाक्यं रचयेयुः ? । भवानपि वा कथमीदृशे तस्मिंल्लिङ्गादेः श-

---

नापिच समाख्योपपत्तौ नैकान्ततस्तया काठकादिकर्तृत्वसिद्धिरतो वाक्यत्वादिवात्र पौरुषयत्वमाशङ्क्य निराक्रियते-इत्यभिप्रायवानाह। इदानीमिति । ननु पौरुषेयाणामप्याप्तप्रणीतानां इष्टमेव प्रामाण्यं कथं तेन चोदनाप्रामाण्याप वादोऽत आह । पौरुषेयत्व इति । ईदृशे, लौकिकप्रमाणाऽगोचरे । पूर्वपक्षमाह । तत्रेति। समाख्या त्वभ्युच्चयहेतुरत्रेत्याह। काठकादीति । नन्वेतदपि कर्तुरस्मरणादित्यनेन पूर्वमेव परिहृतम् । सत्यम् । अत्रत्यमेवानागतावेक्षणेन प्रसङ्गात्पूर्वमुक्तम् । इहैव तु वेदानां पौरुषेयत्वं निराक्रियते । तेनात्रैवेदमुपन्यसनीयं निराकरणीयश्चेति सर्वमनवद्यम् । किंच —

जायते वाक्यतापत्तिः पदानां रचनावशात् ।
नचसा पुरुषाऽभावे कथञ्चिदुपपद्यते । अतोऽवश्यमाश्रयणीयोवेदानां कर्त्तेतिसिद्धान्तिनः शङ्कामुपपादयति । नन्विति । प्रतिबन्द्या परिहरति । भवानपीति । यद्येवं

त्किं गृह्णीयात्? । अधिकारिनियोज्यान्वययोग्यं स्वर्गसाधनक्षमं कार्यरूपमित्यादिरूपेण कथं चिद् हृदयमानीय शक्तिग्रहणम्?। तथा वाक्यरचनाविधिः संभविष्यति, तस्माद्वाक्यत्वात् पौरुषेया वेदाः । तथा च काठकादिसमाख्या युज्यते, नहि प्रवचननिमित्ता समाख्या संभवति- प्रवचनस्यानेकपुरुषसाधारणत्वात् काठकविशेषणाऽसम्भवात्, कर्तृत्वं चैकस्यैवेति युक्तं विशेषणम् । किं पुनर्वाक्ये पुंसः कर्तृत्वम्? यः स्वातन्त्र्येण पदानि वाक्यत्वेन रचयति स कर्ता, स्वातन्त्र्यं चैकस्यैवेति युक्तं विशेषणम्। यस्तु यथैव पुरुषान्तरेणोच्चारितं तथैवोच्चारयामीत्येवमुच्चारयति नासौ कर्ता, तादृगुच्चारणं च बहूनामप्येकस्मिन् वाक्ये सम्भवतीति विशेषणानुपपत्तिः, तस्मात् कर्तृनिमित्तेयमिति प्राप्ते,

---

शक्तिग्रहणं तर्हि वाक्यरचनाप्येवं भविष्यतीत्याह। अधिकारीति। श्लोकार्थमुपसंहरति। तस्मादिति। ननु प्रवचनेनापि समाख्योपपत्तौ नैकान्ततस्तत्कर्तृत्वसिद्धिरित्युक्तं तत्राह। नहीति। किं पुनरिदं कर्तृत्वं यदेकस्यैव संभवति न बहूनामित्यभिप्रायेण पृच्छति। किमिति। उत्तरमाह। य इति। पूर्वपक्षमुपसंहरति। तस्मादिति। अयञ्च सूत्रार्थः चकारस्तुशब्दार्थः। एकेवादिनः सन्निकर्षः सन्निकृष्टकालत्वं लक्षीकृत्य कृतकान् वेदान् मन्यन्ते यतस्ते पुरुषाख्याः। पुरुषेणाख्यायन्ते कठादिरूपेण 'अधिकृत्य कृते ग्रन्थ' इत्याभियुक्तस्मरणात् अतः समाख्यातः पौरुषयत्वं वेदानामिति। ननु सामान्यप्राप्तौ सत्यामेव विशेषनि-

अभिधीयते—

उक्तं तु शब्दपूर्वत्वमाऽऽख्याप्रवचनादिति ।

वाक्यत्वात् पौरुषेयत्वं दृश्यादर्शनबाधितम् ।

प्रतिहेतुविरुद्धश्च हेतुः, तस्मादऽकृत्रिमाः ॥ ५४ ॥

यदि वेदानां कर्त्ता कश्चिदऽभविष्यत ततोऽव-श्यमध्येतृपरम्परया बुद्धादिवदऽस्मरिष्यत् न ह्यस्य विस्मरणं सम्भवति-तत्प्रत्ययेन हि तदा सर्वपुंसां वेदार्थानुष्ठानं प्रमाणान्तराऽगोचरत्वात् फलसाधन-त्वस्य, अतोऽर्वाचीनैः कथमसौ विस्मर्येत, यतः स कर्ताऽवश्यं स्मर्तव्यो न च स्मर्यते तेन स्मृतिरूपद-र्शनयोग्यत्वे सत्यप्यदृश्यमानः कर्ता शशविषाणव-

---

यमें समाख्या व्याप्रियत इत्युक्तं ? सत्यम् । इहाप्यस्त्येव सामान्येप्राप्तिः लौकिकवाक्यसाधर्म्यपदसङ्घातत्वादिदर्शनात् । उक्तं च—

"वचनान्तरसाधर्म्यात्कर्तुः सामान्यसंप्लवे ।

समाख्यया विशेषोयं कठादिरवधार्यते" (श्लो.वा.वे.१) ॥

अनित्यदर्शनाच्च। जननमरणवन्तः तथा ऽनित्या एव वेदा-र्थाः श्रूयन्ते"ववरः प्रावाहणिरकामयत।कुसुरविन्दुरौद्दालकिरका-मयते"त्यादि। अत एभ्यःप्राक् ते ग्रन्था नाभूवन्निति गम्यते अतो-ऽप्यनित्या वेदा इति। सिद्धान्तं प्रतिजानीते। इतिप्राप्त इति। "उक्त-न्तु शब्दपूर्वत्वम्" "आख्या प्रवचनात्" इति च सिद्धान्तसूत्रद्वयं भाष्यकारेण पृथक् लिखित्वा व्याख्यातं ग्रन्थकारेण तु प-रिहारसौकर्यायतदेकीकृत्य पठितम् । श्लोकार्थमुपपादयति । यदीति । अनादराद्विस्मरणमिति चेत् न एतादृशेविषये ऽनाद-

दऽभावात्मनाऽध्यवसीयते।

येऽपि हि पौरुषेयतां मन्यन्ते तेपि नैव परम्परया तत्र कर्तृविशेषस्मरणं शक्नुवन्ति वदितुम्, सामान्यतो दृष्टेन कर्तारमनुमाय स्वाभिमतं कर्तारं तत्र निक्षिपन्ति—केचिदीश्वरम्, अन्ये हिरण्यगर्भम्, अपरे प्रजापतिम्, न चायं नानाविधो विवादः परम्परया कर्तरि मन्वादिवत् स्मर्यमाणे कथं चिदप्यवकल्पते, न हि मानवे भारते शाक्यग्रन्थे वा कर्तृविशेषं प्रति काश्चिद्विवदते, तस्मात् स्मर्तव्यत्वे सत्यऽस्मरणाद् दृश्यादर्शनबाधितं सामान्यतोदृष्टं न शक्नोति कर्तारमवसाययितुम्।

सप्रतिसाधनश्च हेतुः 'वाक्यत्वात्' इति, विवादाध्यासितं वेदाध्ययनं गुर्वऽध्ययनपूर्वकं वेदाध्ययनत्वादऽद्यतनाध्ययनवदिति,॥

तदिदमाह सूत्रकारः—

"उक्तं तु शब्दपूर्वत्वम्" इति,

शब्दशब्देनात्र शब्दजन्यमध्ययनम्, तदयमर्थः—सर्वपुंसामध्ययनमऽध्ययनान्तरपूर्वकम्, सर्वे हि य-

---

रानुपपत्तेरित्याह। तदिति। दृश्यादर्शनेति। अतः स्मर्तव्यस्य सतः सर्वथैवास्मरणात् असत्यां सामान्यतः कर्तुः प्राप्तौ न समाख्यया विशेषनियम इतिभावः। उक्तेऽर्थे सूत्रं योजयति। तदिदमिति। शब्देनाऽत्र शब्दाध्ययनमुच्यते उच्चारणमिति यावत्। तत्पूर्वकत्वमध्येतॄणामौत्पत्तिकसूत्रादावुक्तमित्यर्थः। एतदेव विवृणोति। सर्वेति। सूत्रार्थमुपसंहरति। तस्मादिति। नन्व-

थैव गुरुणाऽधीतं तथैवाऽधिजिगांसन्ते, न पुनः स्वातन्त्र्येण कश्चिदपि प्रथमोऽध्येता वेदानामस्ति यः कर्ता स्यात्? तस्मादपौरुषेया वेदाः। समाख्यापि योग्यानुपलब्धिनिराकृते कर्तरि तन्निमित्ता न सम्भवतीति प्रवचननिमित्ताऽध्यवसीयते—प्रवचने एवातिशययोगेनाऽसाधारण्यं कठस्य सम्भवतीति न विशेषणत्वानुपपत्तिः।

यद्वा नायं पुरुषविशेषवचनः कठशब्दः किं तु नित्यस्य चरणविशेषस्यैवेयं संज्ञा तच्चरणैः पुरुषैः प-

---

प्राप्तस्यापि कर्तुः समाख्यैव मूलं कस्मान्न भवत्यत आह। समाख्याऽपीति। समाख्यायाः प्रवचननिमित्तत्वेनाप्युपपद्यमानत्वात् न कर्तृकल्पनामूलत्वम् "तेन प्रोक्त"मित्यपि स्मरणदर्शनात्। किञ्च दुर्बला हि समाख्या श्रुत्याद्यपेक्षया आदिमती च, कथं यथा श्रुत्यात्मकस्य शब्दराशेः कर्त्रुपस्थापकत्वेनाऽप्रामाण्यमापादयितुं शक्यमतोऽपि प्रवचननिमित्तेयमिति। ननु प्रवचनस्यानेकपुरुषसाध्यत्वात्कठस्य विशेषणत्वानुपपत्तिस्तत्राह। प्रवचन एवेति। प्रकर्षवशादसाधारणोपपत्तेर्विशेषणत्वं स्यादित्यर्थः। यथाहुः—

"स्मर्यते च वैशंपायनः सर्वशाखाध्यायी, कठ.पुनरिमां केवलां शाखामध्यापयांबभूव अतोऽन्यां शाखामनधीयानस्तस्यामसाधारण"इति। अथवा रूढिरेवेयमश्वकर्णादिशब्दवन्निर्निमित्तेत्याह। यद्वेति। यथाहुः—

"कामं वा निर्णिमित्तेयं शाखामेकां वदिष्यति।"

श्रुतेः शब्दस्यैवात्र साम्यमात्रं मत्वर्थः समानः नह्यत्र प-

रम्परयाऽधीयमाना शाखा काठकशब्देनाभिधीयते।

वाहणस्यापत्यं प्रावाहणिः किन्तु यः प्रवहणस्य कर्त्ता। यदाह—प्रशब्दः प्रकर्षे सिद्धो वहतिश्च प्रापणे। न त्वस्य समुदायः क्वचिद्वर्तते, इकारस्तु यथैवा ऽपत्येऽर्थे सिद्धस्तथा क्रियायामपि कर्त्तरि तस्माद्यः प्रवाहयति स प्रवाहणिरिति। बवर इति शब्दानुकरणम्। चापैण किदीविनेतिवत्। तेन योनित्योर्थो वा पुरुषस्तमेवैतौ शब्दौ वदिष्येते। एवमुदाहरणान्तरेष्यूह्यम्। ऋतुलिङ्गन्यायेन वा प्रतियुगमनुवर्त्तमाना-बवरादयः प्रवाहनित्यतया न वेदस्यानित्यत्वमापा दयन्तीति। किञ्च अयं वेदो नित्यः स्यादानित्यो वा। आद्ये नित्यमर्थमसम्भवादेव वर्जयिष्यति। अन्त्ये त्वप्रमाणत्वादेव सुतरामिति। दर्शिता च नित्या कृत्यर्थता भाष्ये। यथाहुः—

"अनित्यार्थाभिधायित्वं स्वयमेवैष मुञ्चति।
नित्याऽनित्यविकल्पेन वेदस्तादृथ्यवर्जनात्॥ १३॥
नित्यस्य नित्य एवार्थः कृतकस्याप्रमाणता।"इति।

ननु वनस्पतयः सत्रमासत' सर्पाः सत्रमासत गावो, वा एतत्सत्रमासते"त्यादीन्युन्मत्तबालप्रलापसदृशानि वाक्यानि श्रूयन्ते एतानि च जरद्गवादिवाक्यवदप्रमाणभूतानि कथमिव कृत्स्नस्य वेदस्याऽप्रामाण्यं नापादयेयुरिति। तन्निराकरणार्थमिदं सूत्रम्। कृत्ते वा विनियोगः स्यात् कर्मणः सम्बन्धात्। वाशब्दः पक्षव्यावृत्त्यर्थः। वृत्ते कर्मणि सत्राख्ये प्रशंसाद्वारेण विनियोगोविधिः स्यात्, कुतः? कर्मणः सम्बन्धात्। विनियुक्तं हि दृश्यते परस्परेण सम्बन्धार्थम्। कथं? ज्योतिष्टोम इत्याभिधाय कर्त्तव्य इत्युच्यते केनेत्याकाङ्क्षिते सोमेनेति, किमर्थमिति

तस्मादपौरुषेयत्वाच्चोदनानां प्रमाणता ।
चोदनेति प्रतिज्ञार्थः पादेनानेन साधितः ॥ ५५ ॥

यद्धि (इयं हि) चोदनासूत्रे प्रतिज्ञातम्-भेदशेषप्रयुक्तिक्रमनियमाऽधिकाराऽतिदेशोहबाधतन्त्रप्रसङ्गसर्वविशेषणविशिष्टे धर्मस्वरूपे चोदनैव प्रमाणं प्रमाणमेव चोदनेति तत्र चोदनैवेत्यवधारणेन यच्चोदनानिरपेक्षाणां तया सह तुल्यकक्षतया स्पर्धमानानां प्रत्यक्षादीनामप्रामाण्यं प्रतिज्ञातं तत् प्रत्यक्षसूत्रेण सा-

---

स्वर्गायेति, कथमितीत्थं अनयेतिकर्तव्यतयेति । एवं पदार्थैरेभिः संस्कृतं पिण्डितं वाक्यार्थमवगच्छन्तः कथमुन्मत्त बालवाक्यसदृशमिति वक्ष्यामः । ननु वनस्पतीनां सर्पाणां गवां वा सत्रकरणमनुपपन्नम् । मैवम् । स्तुतयो ह्येता सत्रस्य वनस्पतयो नामाऽचेतनाः त इदं सत्रमुपासितवन्तः किं पुनर्विद्वांसो ब्राह्मणा इति वक्ष्यति अप्राप्ता चानुपपत्तिरिति क्वचित् । सम्बन्धादित्यस्य स्थाने समत्वादिति पठित्वा व्याख्यातम् । कर्मणः अंशत्रयोपेतस्य सत्रभावनाख्यस्य ज्योतिष्टोमेन यजेतेत्यादिकर्मणा समत्वादिति । तत्तु भाष्यविरोधादुपेक्षणीयम् । तदेव मुपपादितं चोदनाप्रामाण्यमुपसंहरति । तस्मादिति । ननु प्रमाणरूपस्य समाप्तत्वादनन्तरं विधिभेदविचार एवारब्धव्यः किं त्रिपाद्याऽर्थवादादिविचारेणेति तत्राह । चोदनेति । अनेन पादेन चोदनाया एव प्रामाण्यमुक्तम् । अर्थवादादीनां तु त्रिपाद्या साधयिष्यते । अतः पादत्रयमपि चोदनासूत्रवदेव जिज्ञासासूत्रोक्तया 'कोधर्म' इत्यनयैव प्रतिज्ञया सङ्गच्छत इति नाऽसङ्गतिः नापि प्रमाणलक्षणसमाप्तिरिति भावः । एतदेव विवृणोति । इ-

धितम्। "औत्पत्तिकस्तु" इत्यादिना पादशेषेण प्रमाणमेवेत्ययमंशः साधितः। तदेवमस्मिन्नेव पादे चोदनासूत्रप्रतिज्ञातार्थविशेषे साधिते उपरितनं पादत्रयं चोदनासूत्रशेषतया न सङ्गच्छते, किं तु प्रथमे सूत्रे किं लक्षणो धर्म इति धर्मस्य प्रमाणं वक्तव्यत्वेन प्रतिज्ञातं तत्रानेन पादेन चोदनायाः प्रामाण्यमुक्त्वाऽर्थवादस्मृतिनामधेयानामुपरितनेन पादत्रयेण प्रामाण्यं प्रतिपाद्यते तेन चोदनासूत्रवदेव पादत्रयं जिज्ञासासूत्रोक्तया 'को धर्मः' इत्यनयैव प्रतिज्ञया सङ्गच्छते।

न चार्थवादादीनां प्रामाण्ये चोदनैवेति प्रतिज्ञाव्याघातः स्यादिति वाच्यम्, तुल्यजातीयापेक्षत्वादवधारणस्य, यथा 'शुक्लः पटः' इत्युक्ते कृष्णादीनामेव निवृत्तिर्न द्रव्यत्वादीनाम्, एवं चोदनैवेत्यवधारणेन प्रत्यक्षादीनामेव चोदनावत् स्वातन्त्र्येण प्रमाणिबुभूषतां व्यावृत्तिर्न त्वऽर्थवादादीनां चोदनैकवाक्यतया चोदनामूलतया च प्रमाणीभवतां चोदनाविषयेणावधारणेन प्रामाण्यं निरस्तं नापि साधितम्,

---

यमिति। ततः किमत आह। तदेवमिति। त्रिपाद्या हि चोदनासूत्रशेषत्वे चोदनासूत्रप्रतिज्ञातार्थे साधिते तदर्थोऽपि साधित इति न पृथगारम्भः स्यादिति भावः। चोदनामूलतयेति स्मृत्याचाराभिप्रायम्। न त्वनेनावधारणेनार्थवादादीनां निरस्तं नापि साधितमिति सम्बन्धः। तत्किमप्रामाण्यमेव तेषामभिमतं

उपरितनेन तु पादत्रयेण तत्साधयिष्यते । यथाऽऽह-

"इति प्रमाणत्वमिदं प्रसिद्ध-
मुक्त्वेह धर्मं प्रति चोदनायाः ।
अतः परं तु प्रविभज्य वेदं
त्रेधा ततो वक्ष्यति तस्य योर्थः॥" (श्लो.वा.वे.)

इति पदवाक्यप्रमाणपारावारपारीणमीमांसासाम्राज्यधुरन्धर-
महामहोपाध्यायविद्वद्वरश्रीमत्पार्थसारथिमिश्रप्रणीतायाः
शास्त्रदीपिकायाः प्रथमाध्यायस्य
प्रथमः पादः समाप्तः ।

नेत्याह । उपरितनेनेति । अस्मिन्नर्थे सम्मतिं दर्शयति । यथाहेति । अतः परमित्यनेनैतदाह नेह प्रमाणलक्षणं समाप्तम्-अर्थवादादिप्रामाण्याप्रतिपादनात् तेनाऽत्र सिद्धेऽपि चोदनाप्रामाण्ये तत्स्मरणं पादत्रयेण विध्यर्थवादमन्त्रात्मना वेदं त्रेधा विभज्य ततः स्तुत्यादिप्रयोजनप्रतिपादनं न तत्तद्वेदस्य धर्मं प्रति प्रामाण्यं प्रतिपादयिष्यत इति ।

नानाग्रन्थस्थितं सर्वं प्रमेयं फक्किकाश्च ताः ।
सङ्क्षिप्य लिखिता नात्र कल्पितं लिखितं मया ॥
येषामादर एव नास्ति विदुषां शास्त्रे न तेषामयं
ग्रन्थः क्वाऽप्युपयुज्यते जडधियां तन्त्रान्तराभ्यासिनाम् ।
येषां धर्मविचारणे सुकृतिनां श्रद्धादरौ तत्कृते
ग्रन्थोऽयं रचितो गभीरमनसां शास्त्रार्थकल्पद्रुमः॥

इति श्रीमत्पराशरगोत्रसकलशास्त्रविशारदमाधवात्मजरामकृष्णभट्टविरचितायां शास्त्रदीपिकाटीकायां युक्तिस्नेहप्रपूरण्यां सिद्धान्तचन्द्रिकाख्यायां प्रथमाध्यायस्य प्रथमः पादः समाप्तः ।

चौखम्बा-संस्कृत-ग्रन्थमाला ।
(ग्रन्थसंख्या १७)

प्रकरणपञ्चिका

नाम

प्रभाकरमतानुसारि—मीमांसादर्शनम् ।

महामहोपाध्यायश्रीशालिकनाथमिश्र-
विरचितम् ।
अङ्करोपनामक श्रीमुकुन्दशास्त्रिणा शोधितम् ।

काश्याम् ।

विद्याविलास-नाम्नि यन्त्रालये, हरिदासगुप्तेन
मुद्रयित्वा प्रकाशितम् ।
सन् १९०४ ईस्वी

वैक्रम संवत् १९६१

शुभम् ।

॥ श्रीः ॥

॥ विज्ञापनम् ॥

अयि सकलमीमांसारसपिपासवस्तत्रभवन्तो धिषणैकधना धीरवराः। इदं वो विदितमस्तु संप्रति सन्ति नानाविधा मुद्रिता अमुद्रिताश्च जगति लब्धप्रतिष्ठाः परश्शता मीमांसासन्दर्भा भट्ट मतप्रतिपादकाः। किन्तु तत्र गुरुमतस्य पूर्वपक्ष एव विलोक्यते न तु सिद्धान्तः, अत्र महामहोपाध्यायप्रभाकरापरपर्यायगुरुमतस्य राद्धान्तोऽस्ति, प्रभाकरशिष्यः शालिकनाथ इमं निबन्धं जग्रन्थ सोऽयं प्रकरणपञ्चिकाऽभिधः प्रबन्धः सर्वांशेनोत्तमतया ऽतीव प्राचीनतया च खण्डितोऽपि लोके प्रकाशमर्हतीति सुविचार्य प्रथमतः ७८ पत्रात्मक एव काशीविद्यासुधानिधिनामके पण्डितपत्रे श्रीमन्महाशयग्रिभिधसाहबानुमत्या विद्वज्जनमनोरञ्जनाय संशोध्य विठ्ठलशास्त्रिणा संमुद्य प्रकाशितः। ततो व्यतीतेषु कतिपयेषु वर्षेषु कस्य चिन्महाराष्ट्रब्राह्मणस्य सद्मनि तस्यैव पुस्तकस्य शतत-मपत्रमारभ्य षड्विंशतिर्जीर्णानि पत्राणि समुपलभ्य श्री ६ परम-गुरुवरबालशास्त्रिचरणैः पण्डितपत्रे संमुद्य प्रकाश्य समाप्तिमनायि लिखितश्चान्तिमे पत्रे समाप्ता चेयं प्रकरणपञ्चिकेति अत एवास्ये-यत्तापि सम्यगेव निश्चिता, यतो यावत्पर्यन्तं च खण्डितोऽस्ति तत् पत्रयोरधष्टिप्पणीदानेन विशदीकृतमस्ति। खण्डितोऽपि संस्कृत-प्रौढतया ग्रन्थस्यैकस्याध्ययनेन गुरुमतस्य व्यक्तमेव शीघ्रं ज्ञायमा-नतयाऽवश्यमेव सङ्ग्राह्योऽयं निबन्धराजः सम्प्रति पण्डितपत्रस्य कतिपयभागस्य दुर्लभतया बहुशोऽन्वेषणेन लब्धेऽपि परस्परनिरपे-क्षनानाग्रन्थकतिपयपत्रसंवलिततया प्रत्यङ्कं तस्य एकग्रन्थस्य कृते ऽनेकग्रन्थसङ्ग्रहप्रयासबाहुल्यं विलोक्य, अल्पेनैव मूल्येन विद्या-र्थिजनस्य सौलभ्याय पण्डितपत्रादुद्धृत्य श्रीमन्महामहोपाध्यायचि-त्रधरमिश्रस्य पुस्तकमेकं प्राप्य, तेन अडकरोपनामकमुकुन्दशास्त्रिद्वा-रा पुनरपि संशोध्य स्वकीयविद्याविलासनाम्नि यन्त्रालये मुद्र-यित्वा प्राकाश्यं नीतः। अत्र कृतेऽपि शोधनप्रयासे दृष्टिदोषात् सीसकाक्षरयोजनादोषाद् वा जातस्खलनं स्वयं संशोध्य सफल-यन्तु मत्परिश्रमं महाशया इति करयुगलमुकुलितं विधाय भूयो भूयः प्रणतः प्रार्थयामि श्रीमतो गुणैकपक्षपातिनो धीमतः।

चौखम्बासंस्कृतमासिकपुस्तकाध्यक्षो हरिदासगुप्तः।

मीमांसादर्शनम् ।

प्रकरणपञ्चिका ।

श्रीमच्छालिकनाथमिश्रविरचिता ।

श्रीगणेशायनमः ।

स्वाध्यायविधिवाक्यार्थविचारे प्रयतामहे ।
प्रभाकरगुरोर्दृष्ट्या मीमांसारम्भसिद्धये ॥ १ ॥

अत्र केचिदाचक्षते, न मीमांसाशास्त्रमारम्भणीयमिति, तद्धि वेदवाक्यार्थविचारोपायभूतन्यायनिबन्धनं, नच वेदवाक्यार्थो विचार्यो विचारस्य विषयभूतोऽस्ति, नाप्यसौ विचार्य निर्णीतः प्रयोजनमवकल्पतेऽपुरुषार्थत्वात्, पुरुषार्थत्वे हि तस्य नोदनैव प्रमाणं स्यात् । नचाविवक्षितार्था सा प्रमाणं भवितुमर्हति । ननु शब्दानामौत्पत्तिकत्वादर्थपरत्वस्य नाऽविवक्षितार्थता युक्ता ? सत्यमेवं वेदेनैव त्वन्यपरतामवगमयताऽविवक्षितार्थताऽऽपाद्यमाना न शक्या वारयितुं, तथाहि, स्वाध्यायोऽध्येतव्यं इति परप्रेरणात्मकविध्यवरुद्धा भावना तव्यप्रत्ययवाच्या प्रतीयते, साच स्वभावतो भाव्यं करणमितिकर्तव्यताञ्चापेक्षते, तत्र न तावदध्ययनमेव समानपदोपात्तं भाव्यतया सम्बन्धमर्हति, अपुरुषार्थत्वात्, तस्मिन्हि भाव्यतया स्वीक्रियमाणे पुरुषप्रवृत्त्यनुपपत्तेः, परप्रेरणात्मकविधिव्यापारभङ्गप्रसङ्गात् । नाप्येकवाक्यतया समभिव्याह्रियमाणस्य स्वाध्यायस्य भाव्यतया सम्बन्धोऽवकल्पते, विध्यानर्थक्य

प्रसङ्गात्, अन्तरेणापि हि विधिं प्रतीयतएवाध्ययनेन स्वाध्यायोऽवाप्यतइति । नच व्रीहीनवहन्तीतिवन्नियमार्थो विधिरिति शक्यते वक्तुम्, अक्रत्वर्थत्वादध्ययनस्य; न खल्वध्ययनस्य क्रत्वर्थत्वे किंचन प्रमाणमस्ति, अक्रत्वर्थश्च न नियमस्य विषयः । अवघातादयो हि क्रतावेव नियम्यन्ते न तण्डुलादिस्वरूपे । अवघातेनैव सम्पादितैस्तन्दुलैः क्रतुफलभावनासिद्धिरिति । प्रमाणान्तरस्याविषयत्वात्तेनैव सिद्धिरिति न किंचिद्विरुद्धं । स्वाध्यायस्वरूपग्रहणं त्वध्ययनेनैव सिध्यतीति नियम्यमानं मानान्तरविरुद्धं स्वयमनधीयमानस्यापि परपुरुषाधीयमानस्वाध्यायग्रहणदर्शनात् । नचाध्ययनस्वीकृतेनैव स्वाध्यायेन क्रतुफलभावनासिद्धिरिति, अक्रत्वर्थतया क्रतुसंस्पर्शाभावेन नियमानुपपत्तेरिति ।

एतेनैवार्थावबोधस्यापि भाव्यतया सम्बन्धो निरस्तो वेदितव्यः । तथा हि, यद्यप्यधीतात्स्वाध्यायात्फलवत्कर्मविबोधो दृश्यतइति तस्यैव भाव्यता ऽवसीयते तथापि विनापि विधिनाऽन्वयव्यतिरेकाभ्यामध्ययनस्यार्थावबोधसाधनत्वावगमाद्विधिरनर्थक एव । न चाध्ययनेनैवार्थावबोधो भावयितव्य इति नियमविधेरर्थवत्ता, प्रकारान्तरेणापि तत्संभवान्नियमानुपपत्तेः । नचाध्ययनेनैवार्थमवबुध्यानुतिष्ठतां क्रतुफलभावनासिद्धिरिति नियमः संभवति, अक्रत्वर्थत्वादध्ययनस्य । तस्माद्विश्वजिन्न्यायेन स्वर्ग एव भाव्यतया कल्पयितव्ये प्राप्ते फलमात्रे . यो निर्देशादित्यार्थवादिकमधुघृतकुल्यादि—तृप्तपित्रादिप्रसादलभ्यसर्वकामफलावाप्तिरेव भाव्यतया ऽवसीयते । नन्वाद्याध्ययने न किंचिदार्थवादिकं फलं श्रूयते, तत्रैषामर्थवादानामश्रवणात्, धारणजपयज्ञविध्यर्थवादा ह्येते,

तदाहुर्वार्तिककारमिश्राः ।

"आद्ये त्वध्ययने नैव काचिदस्ति फलश्रुतिः ।
धारणे जपयज्ञे च या सा ऽप्येवं निवारिता" ॥

इति । सत्यमेवं, तथापि तेषामतिदेशतोऽपि लब्धैर्युक्तैव तदीयफलस्य भाव्यता, तथाहि लिङादियुक्तेषु वाक्येषु द्वे भावनेऽवगम्येते शब्दभावनाऽर्थभावना चेति । तत्र शब्दभावना परप्रेरणात्मिका तस्याः पुरुषप्रवृत्तिर्भाव्या, तया च प्रेरणया सह यो लिङादीनां वाच्यवाचकभावः सम्बन्धः स तत्र योग्यतया करणं, तदाहुर्वार्तिककारमिश्राः; "लिङादयो हि प्रेरणां कुर्वन्त्यभिदधति चेति" प्रवर्त्तरुच्युत्पादनयोग्यतया चार्थवादिकी स्तुतिरितिकर्तव्यता । तदेवमध्ययनविधौ साक्षादश्रुतार्थवादके शब्दभावनायामितिकर्तव्यताभूतार्थवादकाङ्क्षिण्यां जपयज्ञाऽध्ययनातिदेशेनाऽर्थवादाः स्वीक्रियन्ते । तदाहुर्वार्तिककार मिश्राः "अनुषङ्गानुमानाद्यैर्लभ्यन्ते ऽन्ये ऽतिदेशत इति" ते चातिदिष्टा अर्थवादा अर्थभावनायां फलं समर्पयन्ति रात्रिसत्रवत्, एवमार्थवादिके फले भाव्यतया ऽवसिते ऽध्ययनं समानपदोपात्तं करणाकाङ्क्षापरिपूरकत्वेन समर्प्यते । एवञ्च यदेकस्मादपूर्वं तदेतरत्तदर्थमितिन्यायेन स्वाध्यायशब्दवाच्योऽक्षरराशिरप्यध्ययननिर्वृत्त्यर्थ एवावसीयते । एवञ्चान्यपरत्वादक्षराणां तेभ्योऽर्थप्रतिपत्तिरेवानुपपन्ना, व्युत्पत्तिविरहात्, वृद्धव्यवहारे ह्यनन्यपराण्येवाक्षराण्यर्थावबोधकतया व्युत्पन्नानि, व्युत्पत्त्यपेक्षश्च शब्दो ऽर्थावबोधकः । यः पुनरन्यपरेभ्यो ऽप्यक्षरेभ्यो ऽर्थावगमः स सामान्यतोदृष्टनिबन्धनान्यपरत्वभ्रान्त्या भ्रान्तिरेवेति मन्तव्यम् । अप्रतीयमानश्चार्थो न विचारस्य विषयः नापि प्रयोजनमिति विचारस्तावन्नारब्धव्यः, तदनारम्भे च तदुपायभूतन्यायपरिज्ञानमप्यनुपयोगि तदनुपयोगे च तन्निब-

न्धनं मीमांसाशास्त्रमनारम्भणीयमिति पूर्वः पक्षः ॥

राद्धान्तस्तु । स्वाध्यायो ऽध्येतव्य इति स्वाध्यायस्य कर्मत्वावगमात्स एव भाव्यतया ऽवसीयते, यद्यपि नित्यत्वान्निर्वर्त्त्यकर्मता नास्ति स्वाध्यायस्य विकार्यकर्मता वा, अध्ययनेन तस्य विकारानुपपत्तेः तथापि प्राप्यतया तस्य कर्मता नानुपपन्ना, अतएव प्राप्यकर्मोदाहरणं वृत्तिकारस्य वेदाध्ययनं, यच्च कर्म तदर्थैव क्रिया युक्ता, सो ऽयं श्रौतो विनियोगः, नच स्वाध्यायस्य सक्तुवच्छेषित्वमनुपपन्नं ? फलवदर्थावबोधोपयोगित्वात् । यद्यपि चार्थविबोधोपयोगित्वमध्ययनात्प्राङ्नावगम्यते तथापि पश्चाद्गम्यपि भवत्येव प्रयोजनं भाविनापि चोपयोगेन शेषित्वं नानुपपन्नम् अग्निवत् । उत्पन्नानां ह्यग्नीनां विनियोगावगमो नावगतविनियोगानामुत्पत्तिः आहवनीयादिशब्दानामलौकिकार्थतया प्राग्व्युत्पत्त्यवगमादर्थानवगतेः होमादिषु विनियोगासंभवात्, तथा चोक्तम् "भूतभाव्युपयोगं हि द्रव्यं संस्कारमर्हति" ननु चार्थावबोधोपयोगितया संस्कारविधिरनर्थक एवेत्युक्तं ? नानर्थको नियमार्थतया ऽर्थवत्त्वात्, ननु च नियमो न सम्भवति अक्रतुसंस्पर्शित्वादित्युक्तं, न, सम्भवति स्वाभाविकार्थपरत्वानुसारेण क्रत्वनुप्रवेशे तुल्यताया एवोचितत्वात्, यदि खल्वध्ययनविधेः क्रत्वनुप्रवेशिता नाश्रीयते तदा शब्दानां वृद्धव्यवहारव्युत्पन्नानां स्वाभाविकार्थपरता हीयते, जहत्स्वार्थत्वं च न न्याय्यमिति क्रतुफलभावनानुप्रवेश्ये वाध्ययनसंस्कारो युक्तः, तत्र कर्मविधिष्वेव नियमवर्णना अध्ययनाविर्भावितैरेव कर्मविधिभिरर्थमवबुध्यानुतिष्ठतां क्रतुफलभावनासिद्धिरिति, अर्थवादेषु त्वध्ययनाविर्भावितार्थवादप्ररोचिताः क्रियमाणाः क्रतवः फलभावनाया अलमिति । मन्त्रेषु पुनरध्ययनपरिगृही-

तैरेव मन्त्रैः क्रतुषु स्मरणीयपदार्थस्मरणं फलभावनानुगुणमिति, अध्ययननियमाश्रितश्च कालनियमो व्रतादिनियमश्च।

"श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि,।
युक्तश्छंदांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान्॥
भवत्पूर्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः।
भवन्मध्यं तु राजन्यो वैश्यस्तु भवदुत्तरमि"ति॥

एवञ्चान्यपरत्वादक्षराणां फलवत्कर्मावबोधोत्पत्तेर्विचारस्य विषयप्रयोजनलाभाच्छास्त्रस्यारम्भणीयत्वं विषयप्रयोजनलाभे च विचारस्याध्ययनानन्तरमुपनिपातितत्वाद् गुरुकुलस्थितेरर्थवत्त्वाच्चाविवृत्तिमध्ययनानन्तरमाप्तां स्मरद्वेदमधीत्य स्नायादिति स्मृतिवचनमपन्यायमूलं दर्शयन्नर्थावबोधपरतया स्वाध्यायस्य विवक्षितार्थतां मन्यमानः सूत्रकारो विचारस्य विषयं प्रयोजनं चाह "अथातो धर्मजिज्ञासे"ति। एतच्च व्याख्यातम्।

अथातो धर्मजिज्ञासासूत्रमाद्यमिदं कृतम्,।
धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनमि"ति।

तदयुक्तम्। न हि लिङादियुक्तवाक्येषु भावना भाव्यान्तरमपेक्षते अपूर्वस्य भाव्यस्य स्वशब्देनाभिहितत्वात्, लिङादयो हि भाव्यकोटिनिविष्टप्रधानभूतापूर्वोपसर्जनतापन्नामेव भावनामभिदधतीति विषयकरणीये निपुणतरमुपपादितम्, अतो न पूर्वपक्षे भाव्याकाङ्क्षायामार्थवादिकफलसम्बन्धः। नापि सिद्धान्ते स्वाध्यायस्य साध्यतयान्वयः कथं तर्हि विश्वजिदादिषु स्वर्गादिफलकल्पनं, यथा तत्तथा निशम्यतां, यदपूर्वं कार्यभूतं प्रतीयते तद्विषयत्वेन सम्बन्धकरणीभूतयागाद्यनुष्ठानाधीनात्मलाभं, नच विना कर्त्रा तदनुष्ठानोपपत्तिः?

नचाधिकारं विना कर्तृत्वलाभः ? नच नियोज्यमन्तरेणाधिकारसिद्धिः ? न वा विशिष्टो नियोज्यो ऽवकल्पतइति विशेषणभावेन स्वर्गकामना परिकल्पते, स्वर्गकामना चेन्नियोज्यविशेषणं ततोऽग्निहोत्रादिवत् स्वर्गस्यापि नियोगतः सिद्धिरिति । भवत्वेवम् अत्रापि तर्हि नियोज्यविशेषणतयैवार्थवादिकं फलं रात्रिसत्रवत्सम्बध्यतां ? न । अन्यतोऽनुष्ठानसिद्धेः, कुतोऽन्यतः ? आचार्यकरणविधिप्रयुक्तेः, कः पुनराचार्यकरणविधिः ?

"उपनीय तु यः शिष्यं वेदमध्यापयेत् द्विजः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते" ॥

इति स्मरणानुमितः शिष्यमुपनीय वेदाध्यापनेनाचार्यकं भावयेदित्येवं रूपः, अलौकिकं चाहवनीयादिवदाचार्यकमिति तन्निष्पत्त्युपायविधानं युक्तमेव, तत्रार्थादाचार्यी बुभूषत एवाधिकारो धनार्जननियमवत्, तत्र शिष्यं प्रति विहितद्धिताचरणदक्षिणादानदर्शनात्तल्लिप्सोरेवाचार्यभवनेच्छा । यथा दीक्षणीयया दीक्षितत्वसिद्धिः । तथा वेदाध्यापनेनाचार्यत्वसिद्धिः । उपनयनं च त्काप्रत्ययनाध्यापनसमानकर्तृकमवगम्यमानमेकप्रयोगतया विना समानकर्तृकत्वासंभवादङ्गाङ्गिभावेन च विना एकप्रयोगत्वानुपपत्तेराचार्यकभावनाकरणीभूतमध्यापनं प्रत्यङ्गत्वेनावतिष्ठते । तदाश्रितश्चाष्टवर्षं ब्राह्मणमुपनयीतेत्यादिनियमः, उपनयनं च स्वभावत उपनेयासत्तिप्रयोजनकमिति तद्द्वारेणैव तस्याङ्गत्वं, न चाध्यापनं प्रत्यनुपयोगिन उपनेयस्यासत्तिरध्यापनोपयोगिनीत्युपनेयस्य कर्मापेक्षायामुपनयनं प्रक्रम्य स्वाध्यायोऽध्येतव्य इत्यध्ययनं विधीयमानमुपनेयस्य कर्मेत्यवगम्यते, अध्ययनं चाध्यापनोपयोगीति सिद्धमेतत् । तेनायमध्येष्यमाणस्य माणवकस्योपनयनमध्यापना-

ङ्गमित्यध्यापनविधिः स्वाङ्गभूतमुपनयनं प्रयुञ्जानस्तस्यान्यथानुपपत्त्याऽध्ययनमपि प्रयुङ्क्ते। तत्प्रयुक्ताध्ययननिष्पत्त्या च लब्धसिद्धिरध्ययननियोगो नाधिकारान्तरमपेक्षते, अतो नायं विश्वजिन्न्यायस्य विषयः, नापि रात्रिसत्रन्यायस्य, अनन्यप्रयुक्तविषयनियोगगोचरत्वात्तयोः, अत एव प्रयाजादिनियोगेषु तयोरनवसरः। सिद्धान्ते तु कामश्रुतिप्रयुक्तमध्ययनमिति विद्यासाध्येष्वपि कर्मसु शूद्रादीनामधिकारः स्यात्, अतो ऽध्यापनविधिप्रयुक्तत्वादध्ययनस्य येषामेवोपनयनं तेषामेव तत्प्रयुक्तमन्त्रलाभाच्छूद्रादीनामनधिकारः। एवञ्च विध्यन्तरप्रयुक्ते ऽध्ययने न रात्रिसत्रन्यायेन पूर्वपक्षाशङ्कोचिता।

नचातत्प्रयुक्त्या पूर्वः पक्षः तत्प्रयुक्त्या च राद्धान्त इति युक्तं? अतत्प्रयुक्तत्वे कारणाभावात्। यच्चोक्तं नियमार्थो विधिरिति; तदयुक्तं। स्वाध्यायाध्ययनस्य नियोगनिष्पत्त्यर्थतया विधानेन वचनस्यार्थवत्त्वात्। स्वाध्यायो ऽध्येतव्य इति तव्यप्रत्ययेन विधिरभिधीयते, नचावहन्त्यादिष्विव क्रतुविषयनियोगानुवादो ऽयमवकल्पते? असंनिधानात् क्रतुनियोगानां। सन्निधानवशेनैव प्रकृतनियोगप्रत्यभिज्ञानात्तत्र क्रतुनियोगानुवादोपगमः; न चेह सन्निधानमस्ति, नापि पर्णमयी जुहूर्भवतीतिवत् पदार्थसम्बन्धमुखेन क्रतुविनियोगप्रत्यभिज्ञानं? स्वाध्यायस्य व्यभिचरितक्रतुसम्बन्धत्वात्, हुमिस्येत्रमादीनामनर्थकानां स्वाध्यायान्तर्गतिदर्शनात्। यत एवात्र नियोगः साध्यतयाऽवगम्यते अत एव स्वाध्यायस्य नेप्सितकर्मतया सम्बन्धोऽवकल्पते? एकस्मिन् वाक्ये साध्यद्वयविरोधात्। नच स्वर्गादिवत् स्वाध्यायस्य नियोज्यविशेषणतयाऽन्वयादविरोधः? अनियोगफलत्वात्स्वाध्यायग्रहणस्य, यदेव हि नैयोगिकं फलं तदेव

साध्यतया नियोज्यविशेषणं नान्यदिति तृतीये दर्शितम् "अनभिज्ञो भवान्विषयनियोज्यानामि" त्यत्र, अतोऽध्ययनविषयनियोगप्रतिपादनेनैव तस्यार्थवत्त्वान्न क्रतुप्रवेशकल्पनया नियमार्थता विधेः ।

अन्ये पुनरेवं पूर्वपक्षयन्ति; अध्यापनविधिप्रयुक्तमध्ययनमध्यापनाङ्गभूतं तन्निष्पत्त्यर्थतया च स्वाध्यायस्यान्यपरत्वादविवक्षितार्थतेति, तदयुक्तं, प्रयुक्तिमात्रेण तादर्थ्यानुपपत्तेः । स्यान्मतं; यथा प्रजापतिव्रतेषु स्वतन्त्रकर्त्रवगमात्तद्धेतुभूताधिकारसिद्ध्यर्थं नियोज्यपरिकल्पनं तथा प्रयुक्तिदर्शनात्तादर्थ्यमिति । तन्न । प्रयुक्तेस्तादर्थ्यव्यभिचारात् । असत्यपि तादर्थ्ये केवलोपकारकतामात्रेणाध्ययनस्य क्रतुविधिभिः प्रयुज्यमानत्वात् । कथं तर्हि पश्वेकत्वादीनामङ्गत्वं ? न तावद्विभक्तिरेव क्रतुसम्बन्धितयैकत्वमभिधत्ते येनारुण्यवद्वाक्येन विनियोगः स्यात् ? विभक्तयो हि प्रातिपदिकार्थगतमेव स्वार्थं श्रुत्याभिदधति, नापि करणभूतस्यैकत्वमुच्यते संख्यान्वितस्य वा करणत्वं ? करणत्वैकत्वयोर्युगपदभिधानात्, अतो न वैनियोगिकं शेषत्वं विभक्त्यभिहितायाः संख्यायाः । उच्यते च शेषत्वं तच्च प्रयुक्तिकृतमेव, मैवं, न तत्रापि शेषत्वमौपादानिकं किन्तु लौकिकमेकवस्तुसामर्थ्यमेव लिङ्गमुच्यते, संख्या च स्वभावत एव संख्येयावच्छेदिकेति संख्येयार्थैव, किं तु संख्येयभूतप्रातिपदिकार्थमात्रसम्बन्धे ग्राहकान्वयव्याघातापत्तेर्ग्राहकीयभूतपश्वादिसम्बन्ध औपादानिकः, सन्निधिसमाम्नानमात्रेण हि विभक्त्यर्थस्यापि ग्राहकं प्रत्यैदमर्थ्येनान्वितस्यैवाभिधानं, तदन्यथानुपपत्त्या च केवलाभिधाननिबन्धनं स्वरूपसम्बन्धमतिलङ्घ्य साधनीभूतसंख्येयसम्बन्धाध्यवसानमिति नौपादा-

निकं तत्रापि शेषत्वं। भवतु तर्हि लिङ्गादेवाध्ययनस्यापि अध्यापने विनियोगः। नैवं भवितुमर्हति सामान्यसम्बन्धसापेक्षत्वाल्लिङ्गविनियोगस्य न चास्य सामान्यसम्बन्धापादकं किञ्चिदस्ति प्रमाणं, ननु णिच्छ्रुतिः प्रकृत्यर्थभूतस्याध्ययनस्य शेषतामापादयतीति, तन्न, प्रयोजकव्यापारस्य प्रयोज्यव्यवहारोत्पत्तिहेतुत्वाद्विपरीतशेषत्वापत्तेः, वाक्यप्रकरणस्थानसमाख्यानानि त्वध्ययनस्याध्यापनं प्रति विनियोजकतया नाशङ्कनीयान्येव। ग्रन्थविरोधश्चाङ्गत्ववादिनां; यत एवमाह भगवान् "प्रयोज्यत्वादनङ्गत्वाच्च भवति संशय" इति॥

तस्मादनङ्गतयैव पूर्वपक्षणीयं, कथं पुनरनङ्गतया पूर्वपक्षयितुं शक्यते?, उच्यते, सर्वो हि विधिरधिकारपर्यवसायी, न चाध्ययनविधौ कस्य चिदधिकारोऽस्तीत्युक्तमेव साक्षादश्रवणात्, अध्यापनविधिप्रयोज्यतया कल्पनानुपपत्तेः, तत्र य एवासौ प्रयोजकविधावधिकारः स एव प्रयोजनमिति युक्तम् प्रथमोपनिपातित्वात्, यदपि यस्यानङ्गं तदपि तस्य प्रयोजनं भवत्येव आधानस्येव होमादय इति। ननु चानन्तरभाविकमवबोधफलकतया अध्ययनस्याध्येतुरेवाधिकारोऽध्ययने प्रतीयते इति तत्प्रयोजनतैव स्वाध्यायविधेर्युक्ता अन्तरङ्गत्वात्, न, तस्योत्तरकालभावित्वात्, तुल्यायां हि प्राप्तावन्तरङ्गता बलीयसी, न चानयोरधिकारयोस्तुल्या प्राप्तिः? प्रथमोपनिपातित्वात्प्रयोजकविध्यधिकारस्य उत्तरकालभावित्वाच्चार्थावबोधनिबन्धनस्याधिकारस्य, यदा चाध्यापनविध्यधिकारसिद्धिरध्ययनस्य प्रयोजनमित्यध्ययनविधिना बोधितं तदाऽध्ययननिष्पत्त्यर्थत्वात्स्वाध्यायस्यान्यपरत्वादविवक्षितार्थत्वम्। अविवक्षितश्चार्थो न विचारणीय इति वेदाध्ययनमात्रेणैव गु-

रुकुलस्थितेः कृतार्थत्वादध्ययनोत्तरकालं गुरुकुलनिवृत्तिरेव युक्तेति मत्वा स्मृतं वेदमधीत्य स्नायादिति। अत्र च न स्नानमदृष्टार्थं विधीयते किन्तु यो "ब्रह्मचारिणो न स्नायादिति"अस्नाननियमस्तस्य पर्यवसानमेतदध्ययनाङ्गतया नियमानां तन्निवृत्तौ प्राप्तमुच्यते। अस्नाननियमतुल्यतया च गुरुकुलवासादीनामपि निवृत्तिः प्राप्तैवेति सकलब्रह्मचारिधर्मनिवृत्तिरेवाध्ययनानन्तरमुच्यते। एवं चाध्ययनविधिना विचारस्यानाक्षिप्तत्वात्तदुपायभूतन्यायनिबन्धनं मीमांसाशास्त्रं नारम्भणीयमिति पूर्वः पक्षः।

राद्धान्तस्तु। यद्यपि प्रयोजकविध्यधिकारः प्रथमभावी तथापि तन्निष्पत्तिः प्रयोजनमिति न युक्तं किन्तु दृष्टार्थावबोधफलकतयाऽध्ययनोत्तरकालभाव्यप्यध्येतुरेवाधिकारः प्रयोजनतया युक्त आश्रयितुं कर्तृसमवायित्वात्। यत्कर्तृकं हि यत्कर्म तस्यैव तत्रैश्वर्यमिति युक्तम्, अन्तरङ्गत्वात्, नच सहसैव विधिदर्शनादत्राधिकारपर्यवसानकल्पनाकरणमस्ति? पर प्रयुक्त्यैवानुष्ठानस्य सिद्धत्वात्। यत्र खल्वधिकारपर्यवसानकल्पनामन्तरेण प्रागनुष्ठानं न लभ्यते तत्रानुष्ठानात्प्रागनवगतोऽधिकारः तदनुप्रवेशात्साध्यः; इह त्वध्यापनविधिप्रयुक्त्यैवाधिकारपर्यवसानकल्पनामन्तरेणानुष्ठानं लब्धमिति प्राथम्यमकिञ्चित्करम्। अन्तरङ्गत्वादध्येतुरेवाधिकारो युक्त इति। तदेवमध्ययनविधेरन्यप्रयुक्त्यैवानुष्ठानसिद्धेर्नियोज्यो नास्ति अधिकारी तु विद्यतएव, यदर्थं हि यत्कर्म स तत्राधिकारी। अर्थावबोधोपयोगेन चाध्येत्रर्थता ऽध्ययनस्येति स तत्राधिकारी, स चायमधिकारः प्रागध्ययनान्नावगम्यते अध्ययनोत्तरकाले चावगम्यते, स्वाध्यायाध्ययनं त्वेवमभिनिर्वर्त्तते।

"श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि, ।
युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान्, ॥
ततः परं तु छन्दांसि शुक्लेषु नियतः पठेत्, ।
वेदाङ्गानि रहस्यं च कृष्णपक्षेषु सम्पठेत्" ॥

इति, इत्थं चाध्ययने क्रियमाणे ऽङ्गाध्ययनसंस्कृतस्य वेदवाक्यादर्थावगमो जायते, इदानीमध्येता मन्यते मदुपयोगिकर्मावबोधकतया मदर्थमध्ययनमिति। सो ऽयं वेदाध्ययनमीमांसाश्रवणयोर्मध्येऽधिकारः सो ऽयं तात्कालिकः शास्त्रार्थः, इदमेव तावदधिकारमालोच्य पित्रादयो ऽर्थदानादिना कांश्चिदानमय्य पुत्रादीनुपनाययन्ति, प्रबुद्धाश्च केचन स्वयमेवात्मानम्; अन्यथाऽध्ययनासंभवात्, अनुपनीतस्याध्ययननिषेधात्, ।

"नाभिव्याहारयेद् ब्रह्म स्वधानिनयनादृते, ।
स शूद्रेण समस्तावद्यावद्वेदान्न जायते" ॥

इति। एवं तावदध्यापनविधिं स्मृत्यनुमितं कस्य चिदध्यस्वाध्यायभूतमाश्रित्य राद्धान्तवर्णना कृता।

. अन्येतु साक्षाच्छ्रुताध्यापनविध्यनुसारेणैवमाहुः। यद्यध्यापनविध्यधिकारप्रयोजनता स्वाध्यायाध्ययनविधेः स्यात् तदा ऽध्यापनविधेरपि स्वाध्यायान्तर्गतत्वादविवक्षितार्थत्वेन तत्प्रयुक्ततापि न सम्भवति, स्वशाखादि स्वाध्यायशब्देनोच्यते साक्षादधीतश्चाध्यापनविधिर्नूनं केषां चिच्छाखिनां स्वशाखान्तर्गतो भवेदिति स्वाध्यायस्याविवक्षितार्थत्वेन तस्याप्यविवक्षितार्थत्वान्न प्रयोजकत्वमवकल्पते इति पश्चाद्वाक्यार्थावबोधोपयोगितया ऽध्येतुरेवाधिकारो ऽध्ययनविधेः प्रयोजनमिति।

ननु स्वाध्यायो ऽध्येतव्य इति नियोगसिद्धेरवगमात्तद्वि-

ष्पत्त्यर्थत्वादध्यापनस्यान्यपरत्वादर्थविवक्षा दुर्भणैव, मैवं, यदि केवलं नियोगनिष्पत्त्यर्थतैवाध्ययनस्य स्यात्स्यादेतदेवं, यदा त्वर्थावबोधोऽपि प्रयोजनतया स्वीक्रियते तदार्थपरताऽप्यस्तीति नाविवक्षितार्थता, कथं पुनरेकस्मिन्वाक्ये प्रयोजनद्वयम्? उच्यते, शाब्दं नियोगनिष्पत्तिरेव प्रयोजनम्, आर्थं त्वर्थावबोधनमिति न विरोधः। यच्च तदर्थावबोधाख्यं प्रयोजनं तन्न केवलाध्ययनसाध्यमिति अध्ययनविधिरेव स्वप्रयोजनसिद्धये विचारमाक्षिपति, विचारस्य च न्यायनिबन्धनत्वान्न्यायानां मीमांसाज्ञानगम्यत्वात्मीमांसाज्ञानस्य गुर्वायत्तत्वान्न वेदाध्ययनानन्तरं गुरुकुलान्निवर्तितव्यमिति मन्यमानो भगवान्सूत्रकारः पूर्वपक्षनयमूलतां स्मृतेर्दर्शयितुं धर्मजिज्ञासोपदेशमुखेनाध्ययनानन्तरभाविनीं गुरुकुलनिवृत्तिं प्रतिषेधन्निदमाह "अथातो धर्मजिज्ञासा" इति। वेदवाक्यार्थविचारविरोधिनी च गुरुकुलनिवृत्तिरेव केवला निवार्यते न सकलेतरभिक्षाचरणब्रह्मचर्यादिधर्मनिवृत्तिः, असमाप्तसकलब्रह्मचारिनियमश्च न स्नातकइति न दाराधिगमनेऽधिक्रियते स्नातकस्य दाराधिगमस्मरणात् "स्नातकः सदृशीं भार्यां विन्देदि"ति, तस्माद् गुरुकुले स्थित्वा सकलेतरब्रह्मचारिधर्मान्परित्यज्य वेदार्थो विचारयितव्यः, अविचारितस्यानिर्णीयमानत्वात्, अनिर्णीतवेदार्थश्चेद् गुरुकुलान्निवर्तेत ततः कृतदारसंग्रहः श्रौताग्निहोत्रादिनित्यनैमित्तिकधर्माधिकारापातात्तदनुष्ठानं कर्तुमसमर्थः प्रत्यवेयात्, तस्मादध्ययनस्यानन्तरमेव वेदार्थो विचारयितव्य इति विचारोपायभूतन्यायनिबन्धनं मीमांसाशास्त्रमारब्धव्यमिति सिद्धम्।

शास्त्रमुखं नाम गुरोराविष्कर्तुं गभीरमपि भावम्।
शालिकनाथेन कृतं प्रकरणमेतत्प्रसन्नतरम्॥ १॥

इति प्रकरणपञ्चिकायां शास्त्रमुखं नाम प्रथमं प्रकरणम्।

नीतिपथो नाम द्वितीयं प्रकरणम् ।

अथासंस्पर्शिताशङ्का यथा शब्दस्य वार्यते ।
प्रभाकरगुरोः शिष्यैस्तथा यत्नो विधीयते ॥ १ ॥
अत्र लौकिकवाक्यानां व्यभिचाराभिमानतः ।
अर्थासंस्पर्शितां केचिदाहुः शब्दस्य वादिनः ॥ २ ॥
निश्चयोऽर्थस्य संस्पर्शः स चार्थाव्यभिचारिणः ।
प्रत्यक्षादेरेव भवेच्छब्दस्तु व्यभिचारवान् ॥ ३ ॥
विनाप्यर्थं हि शब्देन प्रतीतिरुपजायते ।
अङ्गुल्यग्रेऽस्ति करिणां यूथमित्येवमादिना ॥ ४ ॥
नचात्र शक्यते वक्तुं शुक्तौ रजतबोधवत् ।
अग्रहाद् भ्रान्तिरेषेति कारणस्याविशेषतः ॥ ५ ॥
दुष्टा हि हेतवः कार्यं सम्पूर्णं कर्तुमक्षमाः ।
तेन भेदाऽग्रहो युक्तः शुक्तिकारजतादिषु ॥ ६ ॥
इह तु ज्ञानहेतुर्यः शब्दः स न विशिष्यते ।
विशिष्यते यस्तु वक्ता स ज्ञानस्य न कारणम् ॥७॥
वक्तापि यदि विज्ञानहेतुः स्यादिन्द्रियादिवत् ।
ततस्तस्याऽपि दोषेण भवेदग्रहणं तदा ॥ ८ ॥
वक्ता तु केवलं शब्दव्यक्तावेवोपयुज्यते ।
ज्ञानं तु शब्दमात्रेण निरपेक्षेण जन्यते ॥ ९ ॥
न च तस्येह दुष्टत्वं किंचिदप्युपलभ्यते ।
दोषश्चाग्रहणे हेतुस्तदभावे स्फुटो ग्रहः ॥ १० ॥
तेन शब्दोपजनितं ज्ञानमेवेदमीदृशम् ।
अर्थं व्यतिक्रामतीति कुतस्तेनार्थनिश्चयः ॥ ११ ॥
येनापि हि विना यस्य सद्भाव उपपद्यते ।
निश्चयस्तत्र तेनेति सुभाषितमिदं वचः ॥ १२ ॥

नन्वेवमाप्तवाक्येभ्यः कथं व्यवहृतिर्भवेत् ।
व्यवहारो हि लोकस्य कथं स्यान्निश्चयं विना ॥१३॥
उच्यते व्यवहारो हि संदेहादपि लौकिकः ।
प्रायशो दृश्यते तेन न किंचिदिह दुष्यति ॥ १४ ॥
अपि चाप्तत्वमालोच्य वक्तुस्तत्रार्थनिश्चयः ।
मानान्तरवशेनापि कथंचिदुपपद्यते ॥ १५ ॥
वेदस्त्वलौकिकार्थत्वादभावाद्वक्तुरेव च ।
अहो बत दशां कष्टामुपनीतोऽपि पण्डितैः ॥ १६ ॥
अत्र प्रतिविधानाय यतन्ते मतिशालिनः ।
ज्ञानस्य व्यभिचारित्वं नयवीथ्यां निवारितम् ॥१७॥
श्रुयतामवधानेन गतिर्नरगिरामपि ।
अनुमानात्पृथग्भावं तासां नेच्छन्ति सूरयः ॥१८॥
वाक्यं हि पुरुषाधीनरचनं लौकिकं सदा ।
शङ्क्यमानायथार्थत्वं नार्थनिश्चायकं स्वतः ॥ १९ ॥
अन्योन्यानन्वितार्थानि पदान्यपि हि मानवाः ।
रचयन्तो विलोक्यन्ते तेन नान्वयनिश्चयः ॥ २० ॥
केचित्तावद् भ्रमेणैव केचिदाशयदोषतः ।
प्रमादात्केऽप्यशक्तेश्च केऽप्यनन्वितवादिनः ॥२१॥
तदुक्तानां पदार्थानां यद्यप्यन्वययोग्यता ।
तथाप्यनन्वितस्यापि दृष्टेर्नान्वयनिश्चयः ॥ २२ ॥
तत्र निश्चयशब्देन ज्ञानमेवाभिधीयते ।
अन्वयानिश्चये तेन ज्ञानमेवास्ति नान्वये ॥ २३ ॥
शङ्क्यमानायथार्थत्वरचनं तेन पुंवचः ।
श्रुतमात्रकमेवार्थे न तावन्निश्चयावहम् ॥ २४ ॥
यावद्वक्तुरविज्ञातं पूर्वभाविप्रमान्तरम् ।

विवक्षितार्थविषयमिन्द्रियार्थनिबन्धनम् ॥ २५ ॥
तस्य ज्ञानं च वाक्येन लिङ्गभूतेन गम्यते।
ज्ञात्वैवार्थं ब्रवीतीति य एवमवधारितः ॥२६॥
तस्य ज्ञानेन नियतं वाक्यं ज्ञानानुमापकम्।
ज्ञानं चार्थाविनाभावि तेनार्थे ऽपि विनिश्चयः ॥२७॥
ततोऽर्थे निश्चिते पश्चात्सो ऽर्थो वाक्येन गम्यते ।
तस्यां दशायां वाक्यस्य तस्य स्यादनुवादता ॥२८॥
पूर्वं च लिङ्गभूतत्वं वक्तुर्ज्ञानावधारणे ।
वक्तुर्ज्ञानप्रसूतं हि वाक्यं तत्कार्यमिष्यते ॥ २९ ॥
कार्यात्कारणसिद्धिश्च सर्वेषामनुवादतः ।
पौरुषेयमतो वाक्यं न शास्त्रमभिधीयते ॥ ३० ॥
एवञ्च सति लिङ्गस्य व्यभिचारो ऽयमीक्ष्यते ।
न शास्त्रस्येति तस्य स्यादर्थासंस्पर्शिता कुतः ॥ ३१॥
लिङ्गस्यापि न चैवायं व्यभिचारोऽस्ति किन्तु यः ।
लिङ्गालिङ्गे न शक्नोति विवेक्तुं मूढचेतनः ॥ ३२ ॥
तस्यालिङ्गे लिङ्गरूपसाधारण्यनिबन्धनः ।
लिङ्गसंव्यवहारोऽयं विपरीतः प्रवर्तते ॥ ३३ ॥
श्रुतिलिङ्गाधिकरणे विस्तरेणैवमीरितम्।
तेन न व्यभिचारोऽस्ति द्वयोर्लैङ्गिकशास्त्रयोः ॥ ३४ ॥
नन्वर्थ एव प्रथमं पुंवाक्येभ्योऽवगम्यते ।
अन्यथा हि कथं वक्तुर्धीर्विशिष्टा ऽनुमीयते ॥ ३५ ॥
अर्थेनैव विशेषो हि निराकारतया धियाम्।
नचाप्रतीतेनार्थेन विशेषश्चावऽकल्पते ॥ ३६ ॥
अत्र ब्रूमो ऽयथार्थत्वशङ्कया ऽर्थो न निश्चितः ।
अनिश्चितश्च न ज्ञात इति तावद्व्यवस्थितम् ॥ ३७ ॥

किंत्वज्ञाते ऽपि शब्दार्थे पदजाते श्रुते सति ।
विमर्शो जायते श्रोतुरीदृशो मतिशालिनः ॥ ३८ ॥
अन्योन्यान्वययोग्यार्थं पदजातं ब्रवीत्ययम् ।
आप्तस्तेनामुना नूनं ज्ञातस्तेषां समन्वयः ॥ ३९ ॥
न कदाचिदसंबद्धानर्थानेष विवक्षति ।
न वा ऽप्रतीतसम्बन्धानिति दोषो न कश्चन ॥४०॥
नन्वेवं तुरगारूढस्तुरङ्गं विस्मृतो भवान् ।
वेदप्रामाण्यसिद्ध्यर्थमुत्थितस्तत्प्रहीणवान् ॥ ४१ ॥
लोकावगतशक्तिर्हि वेदे शब्दो ऽवबोधकः ।
लोके च लिङ्गभावेन प्रतीतिर्भवताश्रिता ॥ ४२ ॥
स्वयं त्विह समाधानमाचार्येणैव दर्शितम् ।
शब्दस्यार्थेन सम्बन्ध इति दर्शयता सता ॥ ४३ ॥
अन्वितार्थाभिधायित्वे पदानां हि स्थिते सति ।
विशिष्टा वक्तृधीर्ज्ञातुं शक्यते नान्यथा यतः ॥ ४४ ॥
ज्ञातेषु हि पदार्थेषु श्रोता वक्तरि कल्पयेत् ।
अन्योन्यान्वयविज्ञानं नान्यथेत्युपदर्शितम् ॥ ४५ ॥
पदानां तत्पदार्थेषु शक्तिः स्वाभाविकी स्थिता ।
पुंवाक्येषु विसम्वादशङ्कया सा तिरोहिता ॥ ४६ ॥
वेदेषु त्वस्मर्यमाणकर्तृकेषु स्वरूपतः ।
प्रमाणान्तरसंस्पर्शरहितार्थावबोधिषु ॥ ४७ ॥
न कर्तुरनुमानं स्याद्वाक्यत्वादिति लिङ्गतः ।
न कर्ता शक्नुयाद्वाक्यं कर्तुं कार्यं हि लौकिके ॥४८॥
तेन वेदे विसम्वादशङ्का नास्ति कथं चन ।
अर्थनिश्चयहेतुत्वादर्थसंदर्शिता स्थिता ॥ ४९ ॥
व्यपगतवाङ्मलपङ्कः प्रोद्धृतपरयुक्तिकण्टकः प्रकरः ।
स्पष्टःप्रगुणतरोऽयं शालिकनाथेन नीतिपथः ॥५०॥

इति शालिकनाथमिश्रकृतौ नीतिपथो नामद्वितीयं प्रकरणं ॥ २ ॥

बहुधा जातिविषये विवदन्ते विपश्चितः।
प्रभाकरमतेनायं तेषां प्रयास उच्यते ॥ १ ॥

केचिदाचक्षते जातिरिति विकल्पविलसितमिति। एकेतु सतीमपि जातिमाश्रयेभ्यो ऽभिन्नामनुमन्यन्ते। अन्येतु भिन्ना-मप्यनुमेयामाहुः। अपरेतु भिन्नाभिन्नामिच्छन्ति, तथा चाजाता-वपि जातिव्यवहारो बहुलमुपलभ्यते केषां चिदिति तन्निरा-करणायेदमारभ्यते।

जातिराश्रयतो भिन्ना प्रत्यक्षज्ञानगोचरा।
पूर्वाकारावमर्शेन प्रभाकरगुरोर्मता ॥ २ ॥

नन्वाश्रयएव द्रव्यं जातेरसदिति सौगताः, तथाहि, न परमाणुषु चतुर्विधेषु पार्थिवाप्यतैजसवायवीयेषु जातिराश्रिता ऽभिमता; अनुवृत्ताकार—प्रत्ययवियोगात्। भिन्नेषु यदभिन्ना जातिरुपेयते तत्रानुवृत्ताकारावभासिनी बुद्धिरेव निबन्धनं; नच कस्यचन जन्तोः परमाणुषु करणपथविदूरवर्तिषु निपु-णमपि निरूपयतोऽनुवृत्ताकारावभासिनी मतिराविर्भवति। यापि चेयं परमाणुरिति मतिः सापि परिमाणलक्षणगुणाकार-णिका मीमांसकैरपि सङ्गीर्यते। पृथिवीत्वादिकमपि तत्तद्-साधारणगन्धादिगुणसमवायमात्रलब्धात्मलाभायां पृथिव्या-दिबुद्धौ निबन्धनम्। नच स्थूलेषु द्रव्येषु जातिः समवेया-त्? तेषामेव दुरुपगमत्वात्। न खलु स्थूलद्रव्यसम्भवो घटते?। तथा हि, द्व्यणुकादिक्रमेण स्थूलद्रव्यान्तरारम्भकत्वाऽनुपपत्तेः, नचैवैकैकद्रव्यव्यतिरिक्तमपरमारम्भकमस्ति। संयोगो ऽपि च तयोरनुपपन्न एव, स हि नैकैकद्रव्यसमवेतः? नाप्येकद्रव्य-समवेतः? एकैकातिरेकेणानेकस्यानुपपत्तेः। अनेनैव मार्गेण त्र्यणुकस्य त्रिभिर्द्व्यणुकैरारम्भणीयस्य महिमगुणशालिनः स-

म्भवो निरस्तः । तदेवं दुरीभूता स्थवीयसामवयविनामारम्भसंकथा । अपि चावयविनः किमवयवेषु प्रत्येकं कार्त्स्न्येन वृत्तिर्व्यासङ्गेन वेति चिन्तनीयं, न तावत् कार्त्स्न्येन वृत्तिमुपलभामहे ? एकैकावयवगतस्य तस्याप्रतिपत्तेः । एकैकावयवगते च कम्पे रागे वा सकलस्यावयविनः कम्परागप्रतीतिप्रसङ्गात् । तथावयवान्तरे च कम्परागविरहे कम्परागविरहसमासक्तेः । अवयवी च कम्पेत न कम्पेत रज्येत न रज्येत चेति विषमां दशामाविशेत । नापि व्यासङ्गेनावयविनो वृत्तिरवयवान्तराविरहात्, अवयवशालिनो हि केन चिदवयवेन क चन केनचित् कचनेति व्यासङ्गिनी वृत्तिरुपपत्तिमती । किञ्चैकैकत्रावृत्तेरवृत्तिरेव एकैकातिरिक्तानेकाभावात् । किञ्च सकलावयवग्रहण एव नियमेनावयवी ज्ञायेत, नच तथा सम्भवति ? अवयवान्तरेणावयवान्तरतिरस्कारात् । नच प्रकारान्तरेण वृत्तिरिति वदितुं शक्यम् ? अनुपपत्तेः प्रकारान्तरस्य । अवयवेभ्यश्चावयवी व्यतिरिच्यमानो ऽव्यतिरिच्यमानो वा न प्रमाणेन सङ्गच्छते, व्यतिरिक्तो हि तदग्रहेऽपि ग्रहणं कदाचिदनुभवेत्, न खलु भिन्नयोः सहोपलम्भनियमो घटयोरिव, तद्वदवयव्यपि भिद्यमानो नावयवैरेव सहोपलभ्येत । कस्याञ्चिदपि दशायामननुभूयमानेष्वप्यवयवेष्वनुभूयेत । नचावयविनमवयवानुभवमन्तरेण कचिदुपलभन्ते ? अव्यतिरिच्यमानस्तु नास्त्येवेति वचनभङ्गिमात्रेणोक्तं भवति । तदेवमवयविद्रव्यमुपपत्तिभिरनुमन्धीयमानमेकान्ततो लीयते । कथं तर्हि स्थूलावभासिनी मनीषा समर्थनीया ? इत्थम्, उत्तराधरभावेन निरन्तरमुत्पन्नाः परमाणव एव समधिगतैन्द्रियकज्ञानजननयोग्यदशाविशेषाः प्रत्यक्षमीक्ष्यन्ते तांस्तथानुभवतस्तद्धलभावी मा-

मस एष स्थूलविकल्पो विजृम्भते । दूरादिव तरुषु निरन्तरेषु समनुभूयमानेषु वनमिति मतिः; अतः स्थवीयसां द्रव्याणा-माश्रयाभिमतानामयोगाज्जातिरपि तदाश्रिता नाभ्युपगमम-र्हति । अपि च जातिरपि नेन्द्रियज्ञानेन प्रतीयते ? तस्या नि-त्यत्वेनाभ्युपगमात् । नहि नित्यं कस्मै चित्कार्याय पर्याप्तम् ? तद्धि न शक्तस्वभावं, नित्यं कार्योदयप्रसङ्गात् ? अशक्तस्वभावं तु नित्याविचिकित्सनायाशक्तिकं न किञ्चित् कुर्यात् । नचा-जनकमिन्द्रियज्ञानमनुभवति ? यो हि विषयः स्वस्यान्वयव्य-तिरेकौ ज्ञानमनुकारयति स प्रत्यक्षः । किञ्च, समुन्मिषितच-क्षुषश्चिराय विषयान्तरानुसन्धानव्यापृतस्य चित्तस्य पुरोव-र्तिनीं स्वस्तिमतीं कामाक्षीं वा साक्षात्कुर्वाणस्य न जातिरपरा ऽवभासते ! । अन्यच्च जातिरसौ पिण्डैः सहोत्पद्यते विनश्यति वा ! तथोपगमे स्वरूपहानिप्रसङ्गात्; एका हि जातिरने-काधिष्ठाना प्रतिज्ञायते; उत्पत्तिमती विनाशिनी चान्याऽन्या स्यात्, विरुद्धधर्माध्यासस्य भेदापादकत्वात् । सेयं नित्या जाति-रुदितवत्यां व्यक्तौ प्रतीयमाना नान्यत आगता ? निष्क्रियत्वात्, नच तत्रैवासीत् ? प्रागप्रतीतेः; नच स्थितिरपि युक्तिमती ? व्य-क्तिरेव हि तस्या देशो नाकाशादिः ? अनुत्पन्ना च व्यक्तिरिति काऽवतिष्ठतामाकृतिः ? नचोत्पाद्ये- ऽप्यवतिष्ठते ?. तदेषा जातिरवतिष्ठते नावतिष्ठते चेति सङ्कटमापतितम् । किञ्च व्य-क्तेरभिन्ना भिन्ना वोभयरूपा वा जातिरास्थेया ? तत्र नाभिन्ना ! तथाभावे व्यक्त्या सहोत्पादे विनाशे वा स्वरूपापहारापत्ति-रिति पुरस्तादुपन्यस्तम् । व्यक्तिमात्राङ्गीकारे च कोऽस्मत्पक्षस्य भेद इत्यपि चिन्तया ऽन्तः सीदन्तु बहवः ? अतो व्यक्तिमा-त्रमेव तत्त्वमिति वदतां साहायकमेवाचरितमनतिरेकिणीं जा-

तिमुररीकुर्वाणैः। भिन्नत्वेऽपि पिण्डग्रहणमन्तरेण ग्रहणापत्ति-रुभयप्रतीतौ च सम्बन्धप्रतीतिसमासक्तिः प्रसक्तैवेति चेत्? म-हदिदं वैयात्यं। कः खल्विह गवि गोत्वमिति मतिमभ्युपग-च्छेदन्यत्र निरस्तत्रपायन्त्रणात्। भिन्नत्वे च वृत्तिप्रकारो दु-र्निरूप एव, किं व्यासङ्गिनी वृत्तिरुत प्रत्येकपरिसमाप्तिमती-ति? एकत्र परिसमाप्तावन्यत्र न वर्तेतेति पुनरपि स्वरूपाप-हारः। अव्यासङ्गोऽपि कालत्रयवर्तिनीषु व्यक्तिष्वनुपपन्न ए-व। प्रत्येकञ्च गौरिति प्रत्ययो विकल्पमात्रमित्यङ्गीकृतं स्या-त्, नचोभयरूपता? विरोधात्। नचोपलम्भबलेन विरोध एव नास्तीति चतुरस्रं! तथाविधस्योपलम्भस्यैवासम्भावनीयत्वा-त्। अभिन्नाकारबुद्धिबोध्यं हि वस्त्वभिन्नमिति लौकिकाः, विलक्षणाकारबोधविषयश्च भिन्नं, तत्र यदि विलक्षणाकार-प्रतीतिसमये द्वे वस्तुनी विलक्षणेनाकारेणावभातस्तदा ऽभेद-प्रतीतिदशायामेक आकारो ऽनुभवनीयः; स जातिभागस्य पिण्डभागस्य वा तत्रैक द्विरवभासोऽयं स्यान्न तु जातिजातिम-तोरभेदावभासः। अथ विलक्षणावप्याकारौ तादात्म्येनावसी-येते इति मतम्। तत्रापि पर्यनुयोजनीयः किमिदं तादात्म्यं ना-मेति? यद्येकाकारतेति ब्रूयात् तर्हि पूर्वोक्तमेव दूषणमात्मसा-त्कृतं, शब्दयोः सामानाधिकरण्यं तादात्म्यमिति चेत्? अयु-क्तमेतत् गौर्वाहीक इत्यादावतादात्म्येऽपि दर्शनात्, उपचार-स्तत्रेति चेत् अत्रापि भिन्नजातिवादिन उपचारमेव मन्यन्ते; व-यन्तु विवक्षामात्रपरतन्त्राः शब्दा न वस्तुव्यवस्थापनायेशत इति सर्वत्र मन्यामहे। कथं तर्हि नानाभूतासु व्यक्तिषु बुद्धिर-नुवृत्तमाकारमुल्लिखन्ती समुपजायते? तेनास्या एव बुद्धेर्दृ-ढिम्नः कारणमनुमास्यामहे अस्ति तद्विशेषणं यदुपरागवशेने-

यमभिन्नाकारानुसन्धायिनी धीरुदीयत इति, तदपि न जाति साधनसमर्थं ? कार्यभूता हि बुद्धिरेषा कारणमाक्षिपन्ती यद्यनन्तरमेवोपजायते तदेव कारणं कल्पयति न पुनरप्रतीतमपरमपि किञ्चिदुपस्थापयति । सा चेयं स्वलक्षणविषयदर्शनसमनन्तरभाविनीति ता एव व्यक्तयः स्वनिर्भासा बुद्धी रूपजनय्य तन्मुखेन तामेकाकारानुभासिनीं धियमाविर्भावयन्ति, नितान्तभेदवतीनां च व्यक्तीनां कासां चिदेष महिमा न सर्वासामिति किमनुपपन्नम् ? यथा ह्यभिन्ना अपि चक्षुरालोकमनस्का एव सामग्री समुपनिपातिता एकविज्ञानोदयलक्षणं कार्यमारभन्ते, तथा व्यक्तयोऽपि किं नारभन्तइति नेदं प्रतिपत्तिकठिनम् । सा चेयं स्वाकारेणाभेदेनात्यन्तिकभेदयोगिनीनामपि व्यक्तीनामभेदं सम्पृचन्ती सम्पृक्तिरित्यनुगीयते । एषा च मनीषा न स्वलक्षणं विषयीकरोति तस्य विशदावभासित्वात्, अस्याश्चाभिलापसंसर्गयोग्यार्थप्रतिभासत्वात्, अभिलापानाञ्च विशदाकारमवभासितुमशक्तेः अभिलापमात्रेण तथाविधप्रतिपत्त्यभावात् । तेनैषा न स्वच्छाकारावभासिनी । नन्वेतत् प्रतीतिपराहतमुदितं गौरयमिति बुद्धौ विशदावभासात् ? उच्यते, न विशदावभासित्वमवजानीमहे तत्तु समानकालभाविनो निर्विकल्पप्रत्ययस्य स्वलक्षणावलम्बिनः प्रसादात्, तदभावे तथात्वानुपलम्भात् । नचैतद्वाच्यमेकमेव वस्त्विन्द्रियैर्निराकारमनुभूयते शब्दैश्चाविशदावभासमिति ? भिद्यमाने ऽपि बोधोपाये बोध्याभेदे बोधवैलक्षण्यानुपपत्तेः । नियताकारश्च स्वलक्षणमनियताकारश्चास्यां बुद्धौ चकास्ति, तदेवं विशदाविशदतया नियतानियततया च स्वलक्षणस्य विकल्पाकारस्य च भेदे सत्यपि विकल्पाः साक्षात्परम्परया

वा स्वलक्षणविषयदर्शनप्रभवतया स्वलक्षणग्रहणाभिमानिनो जायन्ते तत एव तत्र प्रवर्तयन्तः पुरुषं व्यवहाराङ्गभावमनुभवन्ति पारम्पर्येण वस्तुनि प्रतिबन्धादवस्त्वपि प्रतिबद्धं भवति मणिप्रभायां मणिबुद्धिवत्। यथा हि खलु मणिप्रभायां मणिधिषणायां मणिकिरणविषयिणी मणिबुद्धिरयथार्थतया भेदमजुषमाणापि मणिमनुप्रतिबद्धेति मणिसमधिगमनिमित्तं भवेत्; तथेयमपि वस्तुवः स्वलक्षणमगृह्णत्यपि स्वलक्षणादर्शनं दर्शनतो विकल्प इति स्वलक्षणप्रतिबद्धा सती तत्प्राप्तये प्रभवति। निर्विकल्पकप्रत्ययसमधिगतस्वलक्षणप्रापकतया च स्मृतिरियमुच्यते। तत एव च गृहीतग्राहित्वादप्रमाणमन्यथा वस्तुविषयतया वस्तुप्रापकतया चानुमानमिव प्रमाणमेव स्यात्? स चायं तस्याकारः प्रथमानो न ज्ञानस्यैव? बहिष्ट्वेनावभासात्। नचार्थगत एव? उक्तेन न्यायेन निरस्तत्वात्। किन्त्वयमसन्नेव ज्ञानमनुभासते शब्दमिव प्रतिशब्दः। एतत्तु शास्त्रचिन्तका विवेचयन्ति प्रतिपत्तारस्तु दृश्यविकल्पावर्थावेकीकृत्य ताभ्यामेवानुमन्यमाना व्यवहारेषु प्रवर्तन्ते प्रवृत्ताश्चार्थप्रातिलम्भेनाविसंवादं मन्यन्ते कथं पुनरेकत्वाध्यवसायो दृश्यविकल्पयोः? अतद्व्यावृत्ततया तत्सदृशत्वात्, यथा दृश्यस्यातद्व्यावृत्तता तथा विकल्पस्यापि। तस्माज्जातिप्रत्ययो विकल्पमात्रं परमार्थस्तु न जातिर्नाम किञ्चित्। अपि च द्रव्यसमवायिनी जातिरभिमता, नच गन्धादिव्यतिरिक्तं द्रव्यमुपलभामहे चक्षुरादीनां प्रत्येकं रूपादिष्वेव व्यापारादिति पूर्वपक्षसंक्षेपः।

अत्रोच्यते, संविदेव हि भगवती विषयसत्त्वावगमे शरणं, गवादिषु च स्थूलाकारावलम्बिनी बुद्धिरुदीयतइति निर्विवादं

नयवीथ्याश्च निर्णीतं प्रमाणं स्मृतिश्च प्रत्यय इति । ननु तदेवासदिति मन्यते; अवयव्यादीनामेकान्ततो ऽनुपपन्नत्वात् । उच्यते न दृष्टे काचिदनुपपत्तिः । ननूक्तावयविनोऽनुपपत्तिः, आरम्भकाभावात्, अनुपपन्नेयमनुपपत्तिः; कार्ये प्रतीतं कारणकल्पनायां प्रमाणम् ॥ न पुनः स्फुटावाधितं कार्यं कारणानिरूपणायापह्नवमर्हति; तेनावयवा एव समासादितसंयोगलक्षणासाधारणगुणा अवयविन उत्पादका भविष्यन्ति संयोगश्चैक एवामेकत्र वर्तते । एकैकत्र संयुक्तप्रत्ययानुदयात्, एकातिरिक्तानेकाभावे ऽप्येक एव स द्वितीय आश्रयः संयोगस्येति न दोषः । ननु द्रव्ये एव तथोत्पन्ने संयोगविकल्पमाविर्भावयतो न तु तद्व्यतिरेकी संयोगो नाम कश्चिद् गुणविशेषः, तन्न, प्रत्यभिज्ञायेते हि द्रव्ये अनुवृत्ते, कादाचित्की च तयोरपरेयं दशा दृश्यत इति भवत्येव भेदसिद्धिः स्थापिता मीमांसाजीवरक्षायां प्रत्यभिज्ञा, अतः संयोगलक्षणसाधारणगुणासमवायिकारणोपगृहीता अवयवा एव समवायिकारणमवयविन उपपद्यन्ते, यश्चायमवयविनो वृत्तिविकल्पे दोष उक्तः सो ऽप्यवयविनः प्रतीतौ स्थितायामनुपपन्नः । व्यासक्त एकावयवेष्ववयवी नैकत्र जातिवत्परिसमाप्तः, अवयवान्तरैरपि च विना स तस्य को ऽपि महिमा य एक एवानेकावयवानुस्यूत इति किं न कल्प्यते, यद्यपि चावयविन एकैकत्रावृत्तिस्तथापि नावृत्तिदोषः संयोगसचिवा एवावयवा जनकाश्च आश्रयभूता यतः, जनकतयैवाश्रयत्वात् समवायिकारणानाम् । अतएव संयोगः सद्वितीयाश्रय इति न दोषः; नच सकलावयवोपलम्भसापेक्षा तदुपलब्धिरवयविनस्तेभ्यो भिन्नत्वात् । नचैतावता एकावयवग्रहणमात्रेऽपि ग्रहणपर्यनुयोगो युक्तः ? कार्यानुगुणत्वात् कारणक-

ल्पनायाः; कार्यसिद्ध्यर्थं हि कारणं परिकल्प्यते न कार्यविनाशाय, तेन यावतावयवानां ग्रहणे तदुपलम्भस्तावतामेवावगमस्तदवगमनिबन्धनमिति दर्शनबलेनाभ्युपेयते । भिन्नत्वेऽपि तत एव सहोपलम्भनियमः उपेयोपायभावात्, उपेयभूतोऽवयवी उपायवर्तिनश्चावयवाः प्रत्येकं तु तेषां शक्यतएवासहोपलम्भोऽपि वक्तुम्, अवयवान्तरयोगिनो ऽवयविनोऽपि परिग्रहे इतरावयवव्यतिरेकोऽपि सुदर्श एव, इयश्च भेदसाधने युक्तिः । अन्वयव्यतिरेकाभ्यां हि वस्त्वन्तरत्वमवसीयते, अवगम्यमानोऽपि चावयवी विलक्षणो बुद्धिगोचरतामाचरत्येव, अवयवी हि स्थवीयानेको हृदयमागच्छति अवयवास्तु क्षोदीयांसो भूयांसश्च, स चायमवयवी महत्वाद्रूपवत्त्वाच्च चाक्षुषः स्पार्शनो वा, पार्थिवो वाम्भसीयो वा तैजसो वा, वायवीयस्तु महत्वात् स्पर्शवत्त्वाच्च स्पार्शन एव । अणुकस्तु चातुर्भौतिको ऽप्यमहत्वाद् प्रत्यक्ष एव । तस्य चामहत्वमवयवबहुत्वमहत्वप्रचयविशेषाणां महिमगुणकारणानामभावात् । गगनादीनां तु महतामपि रूपस्पर्शविधुरतया न प्रत्यक्षगोचरतेत्यलमति विस्तरेण । ननु सकलावयवसमाश्रितत्वादवयविनस्तिरोहितैरवयवैः सहेन्द्रियासन्निकर्षे कथमवयविना समागमः ? नचासङ्गतमेव बाह्यरिन्द्रियमवबोधकमिति प्रतिज्ञा युज्यते ? अवयवानामप्यसन्निकृष्टेन्द्रियबोध्यत्वापत्तेरिति, उक्तोत्तरमेतत्, भिन्नत्वादवयविनो ऽवयवान्तरसंयोगेऽपि संयोगबुद्धेः पटादिषूपपन्न एवेन्द्रियसन्निकर्षोऽवयविनः तदनया दिशा तावदुपपन्नमाश्रयद्रव्यमाकृतेः पृथुलम् । ननूक्तं रूपादिव्यतिरेकी द्रव्यं नोपलभ्यत इति, किमिदं पश्यतोहरत्वं, प्रतीयते हि महानवयवी रूपादिव्यतिरेकी, अत एव जपाकुसुमसन्निधानाभिभूतरूपमपि स्फ-

टिकद्रव्यं प्रत्यभिज्ञायेत, कथंनामागृहीतं प्रत्यभिज्ञायेत ? अपि च दर्शनस्पर्शनाभ्यामेकार्थग्रहणाद्रूपस्पर्शव्यतिरेकिद्रव्यं स्फुटतरप्रतीतं नापन्होतुमुचितं, वनादिषु बाधकप्रत्ययबलेन कल्पनेयं प्रसरति दूरतयान्तरालाग्रहणनिबन्धनोऽयमभेदग्रहव्यवहारः प्रवर्ततइति । अवयविनि तु बाधकज्ञानं नास्तीति पुरस्तादावेदितम् । तेनाश्रयद्रव्याभावाज्जातेरपलापः प्रलापमात्रमिति स्थितम् ।

यच्चेदमुदितं नित्यतया जातेरात्मविज्ञानजननेऽपि न शक्ततेति तदपि क्षणभङ्गनिराकरणपर्वणि विस्तरेण नित्यानामर्थक्रियाकारित्वसमर्थनेन प्रत्यूढम् । मा वा स्वविज्ञानमपि जातिर्जीजनत् तथापि कथङ्कारमसावप्रत्यक्षा ? न खल्वियमाज्ञा राज्ञः कारणभूतएव प्रत्यक्षेण प्रचरितव्यमिति, यत्तु यतः प्रतीयते स तस्य विषय इति सार्वलौकिकम् । ननु प्रत्यक्षमप्यविसम्वादादेव प्रमाणमविसम्वादश्च तस्मादात्मलाभात्, अन्यतस्तु भवतो नित्यभूतस्य वा ऽभावे ऽपि भावसम्भवान्नियमेन सम्वादायोगादिति बलादभ्युपेयं प्रत्यक्षस्य कारणमेव विषय इति । अत एव च प्रत्यक्षमनुमानं च द्वे एव प्रमाणे तयोरेवार्थाविसम्वादकत्वात् । प्रत्यक्षं साक्षादर्थेन प्रतिबद्धमनुमानं त्वर्थप्रतिबद्धलिङ्गजन्मतया पारम्पर्येण प्रतिबद्धम् । यस्य तु न साक्षान्नापि परम्परयाऽर्थप्रतिबन्धो न तस्य प्रामाण्यमुचितं तस्य तदविसम्वादनियमाभावात् । अर्थाविसम्वादि च प्रमाणं व्यवजिहीर्षमाणा लौकिका आद्रियन्ते । सिद्धेदयं मनोरथो यदि ज्ञानान्तरनिबन्धनो विसम्वादः प्रार्थनीयः । यद्विषयमेव च यद्ज्ञानं तेनैव तस्मिन् विषये पर्युपस्थापिते नास्ति प्रत्ययान्तरनिबन्धनाविसम्वादप्रार्थना

अर्थेनाप्रतिबद्धमपि च ज्ञानं स्वमहिमपर्युपस्थापितार्थमविसंवादकमेव संप्रवर्तते। तेनोत्पत्तिमात्रएव विज्ञानस्य परापेक्षा न प्रामाण्येऽर्थाविसम्वादलक्षणे। अतः सिद्धं शास्त्रादीनामपि अर्थप्रतिबन्धविरहिणां प्रामाण्यम्। एतदर्थमेव नयवीथ्यां सर्वं ज्ञानं विषया ऽव्यभिचारीति प्रतिपादितम्। अतो नित्याया-मपि जातौ भवत्येव प्रत्यक्षस्य प्रामाण्यम्। यत् पुनरुक्तमेकं-भावेन मनसा समाकलयतः कालाक्षीं स्वतिमतीं वा नास्ति जा-तिप्रतीतिरिति, तदसिद्धम्, आकारो हि सा, प्रतीयते चाकारे यदि परमर्थान्तरानुसन्धानविकलतया तस्यानुवृत्तिर्नावसीयते, अनुवृत्ता च जातिर्नानुवृत्तिः। अग्रहणे ऽपि च धर्मस्य धर्मिणो ग्रहणं नानुपपन्नम्। अत एव च पिण्डान्तरसमधिगमे पूर्वाकारप-रामर्शिनी मनीषा प्रत्यभिज्ञासमाख्यातोदीयते। यच्चोक्तमना-श्रयतया तत्रैव प्रागनवस्थिता निष्क्रियतया चान्यस्मादनाग-च्छन्ती स्वरूपहानिप्रसङ्गेन व्यक्त्या सहानुपजायमाना कथं स-म्बन्धमनुभवति जातिरिति? तदिदं मायामोहजननं यथाजात-जनोद्वेजनमात्रं, संयोगो ह्युभयकर्मजो भवति मल्लयोरिव, अन्य-तरकर्मजो वा स्थाणुश्येनयोरिव, संयोगजो वा यथा तन्तुतुरी-संयोगादुत्पन्नमात्रस्य पटस्य तुरीसंयोगः, स च कर्म प्राक्संनि-धानं वापेक्षते समवायस्तु संयोगाद्विभिन्नो न कर्म वा तत्र वा प्रा-क्सत्तामपेक्षते यत एव तु पिण्डस्योदयः समवायिकारणात् तत एव जातिसमवायो ऽपि तस्य सम्पद्यते, समवायश्च न वयं काश्यपीया इव नित्यमुपेमः, विनष्टायामपि व्यक्तौ न जाति-रन्यत्र याति न च तत्रावतिष्ठते न विनश्यति केवलं तद्व्यक्ति-समवायस्तस्या निवर्तते, तेन तस्यानुपलम्भनं, तथाहि न याति निष्क्रियत्वान्नावतिष्ठते व्यक्तिमात्राश्रयत्वात् तदभावेऽवस्था-

नासम्भवात्, न विनश्यति पिण्डान्तरेऽपि प्रत्यभिज्ञायमानत्वादिति। विनाशो हि नामात्यन्तिको ऽनुपलम्भ इत्यमृतकलायामुक्तम्, अतो न सङ्कटं किञ्चित्। यच्च पिण्डेभ्यो जातेरभिन्नत्वमुभयरूपत्वञ्च दूषितं तदस्माकं साहायकमेवाचरितं को हि नाम सचेतनः पदार्थान्तरमप्रत्यभिज्ञामभेदाश्रयेण साधयेत् ? को वा परस्परविरोधिनी एकस्य द्वे रूपे प्रतिजानीते ? भेदवादः पुनरस्माकमपि सम्मत एव। नच तत्रेहप्रत्ययापत्तिदोषः ? प्रतीत्य ह्याधारमाधेयञ्च सम्बन्धञ्च प्रतीयात्, सर्वञ्च रूपं रूपिग्रहणमन्तरेण न प्रतीयते ऽतो न समानेन्द्रियग्राह्यतया जातिरपि व्यक्तिप्रत्ययानुप्रवेशिनीति नेह प्रत्ययसम्भवः, कर्मणि त्वनुमेये भवत्येवेह प्रत्ययः। वृत्तिविकल्पे तु कृत्स्नसमाप्तिरेवाङ्गीकरणीया न चान्यत्रावृत्तिदोषः ? प्रत्यक्षावगमाद्वृत्तेः प्रत्यभिज्ञायाः स्थापितत्वात्। पृथग्ग्रहणं तु जातेरसिद्धमेव। व्यक्त्यन्तरे हि जातिः प्रतीयमाना प्राच्यपिण्डपरिहारेण प्रकाशते। उदीच्यपरिहारस्तु प्राक्तनसमधिगमसमये सिद्धमेवेति परिहृतनिखिलानुपपत्तिकमुपपादितं गवादिषु साधारणाकारानुभवसिद्धं जातितत्त्वमुपपन्नम्। प्रत्यक्षवेद्यत्वं जातेरिन्द्रियव्यापारानुविधानेन प्रतीतेः संयुक्तसमवायलक्षणश्च सन्निकर्षोऽपि नानुपपन्नः, गौरयमिति च मतिर्विशदतरार्थनिर्भासिनी न शक्यते ऽपवदितुम्। समसमयसम्भवनिर्विकल्पकदर्शनबलेनेत्थमियं प्रथत इति तथाभावे प्रमाणाभावात्। शब्दमात्रे तु केवलाकारपरिगृहीताकारिप्रतीते रूपान्तरानवभासाच्चाविशदावभासः। ऐन्द्रियके तु सम्वेदने प्रचुरतररूपावभासाद्विशदावगम इति नाबाह्यविषयत्वापत्तिः। नन्वेषा जातिप्रतीतिर्भिन्नामेव व्यक्तिमभेदेनागमयन्ती जायतइति भ्रान्ति-

रेषा न प्रत्यक्षं प्रमाणम् । इयन्तु भ्रान्तिर्निर्बीजा न युज्यत इति बीजभावेन जातिरनुमीयते तत्समवायश्च । दृष्टा हि सन्तापसञ्चारितदहनपरमाणुसम्वलितायोगोलके दहनाकारानुकारिणी प्रतीतिरिति । तदिदमुक्तोत्तरमपि पुनः पर्यनुयोज्यामहे विस्मरणापराधादिति मन्यामहे । भिन्ना हि जातिरवगम्यते । न खल्वाकारमाकारिणश्चैकमेव मन्यन्ते केवलं शब्दप्रयोगे समाधिर्वक्तव्यः । तत्रच लौकिकः प्रयोग एव शरणम् । प्रयोगश्च श्रुत्या लक्षणया गौण्या वा वृत्त्या नानुपपन्नः । समवायस्तु भवतु वस्त्वन्तरे सिद्धे ऽनुमेयः प्रत्यक्षेण तदनवगमात् आकृतिस्तु न प्रत्यक्षप्रमाणसिद्धा ऽनुमेया । नचानुमानमपि शक्यं शाक्येषु प्रतिबद्धृष्वित्यलमतिविस्तरेण ।

अत्र केचिद्गवादितुल्यतया द्रव्यगुणकर्मस्वपि सत्ताजातिमङ्गीकुर्वन्ति भवति हि सर्वेष्वेव सत्सदिति प्रत्ययानुवृत्तिरिति सम्वदन्तः तदिदमपरामृष्टजातितत्त्वानामुपर्युपरिकल्पितम् । पूर्वरूपानुकारिणी यदि धीरुदीयते ततो ऽभ्युपेयैव जातिः । नच नानाजातीयेषु द्रव्येषु सर्षपमहीधरादिषु गुणेषु गन्धरसादिषु समानाकारानुभवो भवति केवलं तु सत्सदिति शब्दमात्रमेव प्रयुज्यते । भवति च विनापि जात्या पाचकमीमांसकादिशब्दप्रवृत्तिः । नन्वेकशब्दप्रवृत्तिरपि नैकनिबन्धनमन्तरेणोपपद्यते ? सत्यमस्त्येवोपाधिरेकः प्रमाणसम्बन्धयोग्यतानाम । तत्रान्यः पण्डितम्मन्यो मन्यते । नन्विवमसमञ्जसमुच्यते सर्वत्र ह्युपाधिभेदमवगम्यौपाधिकशब्दानुविद्धः प्रत्ययो भवति न पुनः प्रागेव सह वा । इहच प्रमाणमेवजायमानमस्तीत्येवमेव जायते । प्रमाणोदयोत्तरकालं ह्यनया भवितव्यम् । किञ्च सत्यपि प्रमाणयोगे किञ्चिदस्तीति गम्यते किञ्चिन्नासी-

दिति तथान्यद्भविष्यतीति । तत्र प्रमाणसम्बद्धस्य वर्तमानत्वात् सर्वत्र वर्तमानसत्ताप्रत्ययेन भवितव्यम् । तदतिरेकिणि तु सत्त्वे तस्य त्रेधा व्यवस्थानायुक्तस्त्रिधाऽवभासः, अपिच भूमितलनिखातेषु चिरतरकालवर्तिषु प्रलीनज्ञातृपुरुषेषु लिङ्गादिरहितेषु सकलप्रमाणप्रत्यस्तमयेऽपि वर्तमानसत्तासन्देहः । स च प्रमाणसम्बन्धातिरेकिणीं सत्तामन्तरेणानुपपन्न इति । तदिदमनाकलितपरवचनस्य केवलं गलगर्जितम् । उक्तमस्माभिः प्रमाणसम्बन्धयोग्यतोपाधिः । यदि हि प्रमाणसम्बन्ध उपाधिरिति वदेम तत इत्थमुपालभ्येमह्यपि । योग्यता तु प्रमाणसम्बन्धातिरिक्ता प्रमाणेनावसीयतइति युक्त एवास्तीति प्रमाणोदयः । तस्याश्च त्रैकाल्यात् त्रैकाल्यावगमोऽपि समर्थित एव । तस्याश्च संशयिततापि युक्तैव । का पुनरियं प्रमाणसम्बन्धयोग्यता नाम ? ननु नामान्तरेण महासामान्यमेवेदमुररीकृतम् । नैतदेवं, यो हि महासामान्यं सत्तां सङ्गिरते सोऽपि स्वरूपमात्रं पदार्थानां मन्यतएव । अन्यथा शशशृङ्गादीनामनुत्पन्नातिवृत्तानाञ्च किमिति महासामान्येन सम्बन्ध एव न स्यादिति पर्यनुयोगे कः परिहारः ? तेन स्वरूपवत्त्वैव प्रमाणसम्बन्धयोग्यता । यस्यहि स्वरूपमस्ति तत् प्रमाणेन परिच्छिद्यते । त्रैकाल्यमपि स्वरूपस्यैव युक्तम् । नच महासामान्यस्य ? नित्यत्वात् । तथा संशयिततापि तस्यैव न पुनरसंशयिते स्वरूपे अपरः सत्तासन्देहो भवति । अथ नित्याया अपि सत्तायाः कः सम्बन्धो यः स त्रिकालः । तस्यैव त्रैकाल्यं कुतः । नान्यदत्रोत्तरं स्वरूपत्रैकाल्यादित्यतः । तस्मात्स्वरूपसत्तोपाधिक एव सच्छब्दो न पुनरेक आकारः सत्तानाम द्रव्यगुणकर्मणाम् । अपि च काश्यपीयानां जातिसमवायविशेषेषु स्वरूपसत्तोपाधिक एव सच्छब्द इत्यभ्युप-

गमः। तस्य च द्रव्यगुणकर्मस्वपि तथा भावोऽस्तीति। तदेव मपाकृते पदार्थस्वरूपातिरेकिणि महासामान्ये यदस्वमनीषा निर्मितकुतर्कबलेन सन्मात्रविषयं प्रत्यक्षमिति साधितं तद्दातिदूरोत्सारितम्। एतेनैव न्यायेन शब्दत्वमपि निरस्तं वेदितव्यम्। नहि ककारगकारयोरेकाकारमनुगतं परामृशन्ती मनीषा समुन्मिषति। योऽपि चायं शब्दशब्दः सोऽपि श्रोत्रग्रहणोपाधिबललब्धप्रवृत्तिरिति न जातु जातिकल्पनायै विभवति। तत इदमपहस्तितम्। यदाहुः "शब्दत्वमेव तत्तदभिव्यञ्जकध्वनिनिबन्धनया नानावर्णरूपया विषयीभवत् तस्यतस्यार्थस्यावगमाय कल्पत" इति।

अनयैव च दिशा ब्राह्मणत्वादि जातिरपि निवारिता। नहि नानास्त्रीपुरुषव्यक्तिषु पुरुषत्वादर्थान्तरभूतमेकमाकारमात्मसात्कुर्वन्ती मतिराविर्भवति नहि क्षत्रियादिभ्यो व्यावर्तमानं सकलब्राह्मणेष्वनुवर्तमानमेकमाकारमतिचिरमनुसन्दधतोऽपि बुध्यन्ते। यदप्याहुः, यद्यप्यपातसंजातया धिया ब्राह्मण्यं नावसीयते तथापि ब्राह्मणभूतमातापितृसम्बन्धानुसन्धानप्रभवायां बुद्धौ तच्चकास्तीति। तदपि च स्वमानसविसंवादि। अनुसन्दधानोऽपि मातापितृसम्बन्धं को जात्वेकमाकारमवबोद्धुं प्रभवति। यच्चोपदर्शितं, यथा विलीनमाज्यं तैलादव्यतिरिच्यमानं गन्धग्रहणसहकारिणा चक्षुषैव भिन्नमवगम्यतइति। तदपि न सुन्दरं। नहि तदानीं चाक्षुषस्य संवेदनस्य विषयातिरेकः किं त्वनुमानमेव तत्र सर्पिषो यस्तु निपुणदर्शी सूक्ष्ममपि रूपमीक्षितुं क्षमः स चक्षुषैवाज्यजातमपि प्रत्येति। न गन्धग्रहणमपेक्षते। नन्वेवं बह्ववहीनं किंनिबन्धनो हि तदानीमाहवनीयादिसाध्यकर्मसु केषांचिदधिकारो

नान्येषां; किं निबन्धना च ब्राह्मणशब्दस्य प्रवृत्तिव्यवस्था अत्रोच्यते। अनादौ संसारे जन्यजनकभावेन व्यवस्थितास्ताववत् काश्चिदेव पुरुषसन्ततयः सन्ति तासामन्योन्यव्यतिरेकजाताः स्त्रीपुंसव्यक्तयो ब्राह्मणशब्दवाच्याः। अनिदम्प्रथमतया च सन्ततेः सर्वेषां तत्सन्ततिपतितत्वात् सिद्धा ब्राह्मणशब्दवाच्यता। तेन सन्ततिविशेषप्रभवत्वमेव ब्राह्मणशब्दप्रवृत्तावुपाधिः। तत्प्रभवानामेव कर्मस्वधिकार इति न किञ्चिदवहीनं केपुनस्ते सन्ततिविशेषाः। न ते परिगणय्य निर्देष्टुं शक्यन्ते किन्तु लोकत एव प्रसिद्धाः प्रत्येतव्याः। तथा च तज्जन्यत्वे ऽवगते ब्राह्मणशब्दं प्रयुञ्जते लोकाः। कथंपुनस्तज्जन्यत्वमेव शक्यमवगन्तुं ? स्त्रीणामपराधसम्भवात्। सभवन्ति हि पुंश्चल्योऽपि स्त्रियः परिणेतारं व्यभिचरन्त्यः। उच्यते। उक्तमेतत् दृश्यादर्शनमेवाभाव इति। यत्र यावदुपलब्धिसामग्री तावत्यां सत्यामपि यासां व्यभिचारो न दृश्यते तासां नास्त्येव व्यभिचार इति लोकप्रमाणकमेतत्। अपिच अप्रमत्तैः स्त्रियो रक्षणीयास्तासु नास्त्येव व्यभिचारसम्भावनावकाशो यासु त्वस्ति माभूत् तदपत्येषु तत्सन्ततिप्रभवत्वनिश्चयः। नचैतावता यत्रापि निश्चयः शक्यस्तत्राप्यनिश्चय इति युक्तमिति। यच्च बह्वीषु ज्वालास्वेकवर्तिवर्तिनीषु ज्वालात्वं सामान्यं प्रत्यभिज्ञागोचरः कैश्चिदिष्यते तदपि गुरुरस्माकं न मृष्यति। स खल्वेवं निरीक्षांचक्रे अन्यथासिद्धा बुद्धिः सामान्यकल्पनाबीजम्। इयं तु भेदाग्रहणेन शुक्तिकारजतप्रत्ययवदुपपद्यतइति नालं सामान्यमुपस्थापयितुं। तेन भेदग्रहणपुरस्सरमभेदज्ञानं भिन्नेषु जात्यभ्युपगमे शरणमिति निरवद्यम्

शालिकनाथेन कृतं कृतमतिना जातिनिर्णयाख्यमिदम्।

बहुविधविवादहरणं प्रकरणमुरुणावधानेन ॥ ३ ॥

इति जातिनिर्णयाख्यं प्रकरणं तृतीयम् ॥ ३ ॥

यथार्थं सर्वमेवेह विज्ञानमिति सिद्धये ।
प्रभाकरगुरोर्भावः समीचीनः प्रकाश्यते ॥ १ ॥
तत्र तावदिदं केचिदूचिरे चारुचेतसः ।
भ्रमसन्देहविज्ञाने अयथार्थे उभे इति ॥ २ ॥
इदं रजतमित्येषा या शुक्तिशकले मतिः ।
सा चेदयथार्था भ्रान्तित्वं तदा तस्यास्तु कीदृशम् ॥ ३ ॥
यथावस्थितवस्त्वाभमपि ज्ञानं यदा भ्रमः ।
प्रमाणेषु तदाऽऽपन्ना सर्वेषु भ्रमरूपता ॥ ४ ॥
विवेकाग्रहणं भ्रान्तिरिति चेन्नैतदीदृशम् ।
सुषुप्ते ऽपि भ्रमापत्तेः सर्वभेदापरिग्रहात् ॥ ५ ॥
भेदाग्रहे गृहीते च यदि स्याद् भ्रमरूपता ।
दूरात् सामान्यमात्रस्य दर्शनं स्यात् भ्रमस्तदा ॥ ६ ॥
यथार्थदर्शनत्वे च बाधको ऽपि न युज्यते ।
अज्ञानभेदग्रहणो न बाधकमतिर्भवेत् ॥ ७ ॥
यथार्थतापि चैतस्याः कथमित्यपि चिन्त्यताम् ।
एषा ऽपि रजतत्वेन शुक्तिकामध्यवस्यति ॥ ८ ॥
रजतत्वं न शुक्तेश्च रजतस्य न शुक्तिता ।
तयोरन्योन्यभिन्नत्वं प्रत्यक्षेणावधारितम् ॥ ९ ॥
अथेयं रजतत्वेन न शुक्तिमवलम्बते ।
सामानाधिकरण्येन प्रतिपत्तिर्विरुध्यते ॥ १० ॥
रूप्यार्थिनः प्रवृत्तिश्च शुक्तौ स्यान्निर्निबन्धना ।
अग्रहो ऽपि न भेदस्य प्रवृत्तौ कारणं यतः ॥ ११ ॥
रजतप्रतिपत्तिश्च नेयमन्धस्य जायते ।

तेनेयमिन्द्रियाधीना संयुक्ते चेन्द्रियं धियम् ॥ १२ ॥
समर्थमुत्पादयितुं शुक्तिसंयोगि चेन्द्रियम् ।
तेन सैवेन्द्रियेणेह रजतत्वेन गृह्यते ॥ १३ ॥
स्यान्मतं शुक्तिकामात्रमिन्द्रियेणावसीयते ।
तदेव सदृशत्वेन रजतस्मृतिकारणम् ॥ १४ ॥
सदृशप्रत्ययेनेह संस्कारोद्बोधहेतुना ।
तदित्युल्लेखरहिता रजते भवति स्मृतिः ॥ १५ ॥
स्मृतावस्यां मनोदोषात् तदित्यंशो ऽवखण्डितः ।
तेनेन्द्रियानुकारित्वमन्यथासिद्धमित्यसत् ॥ १६ ॥
अनुभूतेऽपि विषये तत्परामर्शवर्जितम् ।
न बोधं स्मृतिमिच्छन्ति धारावाहिकबोधवत् ॥ १७ ॥
अपरोक्षपुरोवर्तिसामानाधिकरण्यतः ।
नेयं स्मृतिः किन्तु शुक्तौ भ्रान्तोऽयं रजतग्रहः ॥ १८ ॥
स्मृत्युद्बोधनिमित्तं च स्वप्ने किञ्चिन्न विद्यते ।
पीतशङ्खावबोधे च द्विचन्द्रग्रहणे तथा ॥ १९ ॥
दिङ्मोहालातचक्रादिभ्रान्तयश्च कथं पुनः ।
स्मृतित्वाश्रयणेनैता वर्णनीया यथार्थतः ॥ २० ॥
तेनेन्द्रियादिदोषेण जायन्ते भ्रान्तिबुद्धयः ।
बुध्यमाना वस्तुरूपमन्यथास्थितमन्यथा ॥ २१ ॥
स्थाणुर्वा पुरुषो वेति सन्देहो योऽपि जायते ।
अभावाद्यादृशोऽर्थस्य स यथार्थः कथं भवेत् ॥ २२ ॥
अत्र ब्रूमो य एवार्थो यस्यां संविदि भासते ।
वेद्यः स एव नान्यद्धि वेद्यावेद्यस्य लक्षणम् ॥ २३ ॥
इदं रजतमित्यत्र रजतञ्चाऽवभासते ।
तदेव तेन वेद्यं स्यान्न तु शुक्तिरवेदनात् ॥ २४ ॥

तेनान्यस्यान्यथा भानं प्रतीत्यैव पराहतम् ।
परस्मिन् भासमाने हि न परं भासते यतः ॥ २५ ॥
नन्वेवं रजताभासः कथमेष घटिष्यति ।
उच्यते शुक्तिशकलं गृहीतं भेदवर्जितम् ॥ २६ ॥
शुक्तिकाया विशेषा ये रजताद्भेदहेतवः ।
ते न ज्ञाता अभिभवाद् ज्ञाता सामान्यरूपता ॥ २७ ॥
अनन्तरञ्च रजते स्मृतिर्जाता तथापि च ।
मनोदोषात् तदित्यंशपरामर्शविवर्जितम् ॥ २८ ॥
रजतं विषयीकुर्वन्नैव शुक्तेर्विवेचितम् ।
स्मृत्याऽतो रजताभास उपपन्नो भविष्यति ॥ २९ ॥
धारावाहिकवन्नेयं स्मृतिरित्युदितश्च यत् ।
उच्यते ऽनन्यगतितः स्मृतिरत्राऽवगम्यते ॥ ३० ॥
न ह्यसन्निहितं तावत् प्रत्यक्षं रजतं भवेत् ।
लिङ्गाद्यभावाच्चान्यस्य प्रमाणस्य न गोचरः ॥ ३१ ॥
परिशेषात् स्मृतिरिति निश्चयो जायते पुनः ।
तस्मात् कारणसद्भावधारावाहीकधीषु तु ॥ ३२ ॥
प्रत्युत्पन्नेन्द्रियग्रामसामग्रीग्रहकारणम् ।
ग्रहणे स्मरणे चेमे विवेकानवभासिनी ॥ ३३ ॥
सम्यग्रजतबोधात्तु भिन्ने यद्यपि तत्वतः ।
तथापि भिन्ने नाभातो भेदाग्रहसमत्वतः ॥ ३४ ॥
सम्यग्रजतबोधश्च समक्षैकार्थगोचरः ।
ततो भिन्ने अबुध्वा तु स्मरणग्रहणे इमे ॥ ३५ ॥
समानेनैव रूपेण केवलं मन्यते जनः ।
अपरोक्षार्थबोधेन समानार्थग्रहेण च ॥ ३६ ॥
अवैलक्षण्यसंवित्तिरिति तावत् समर्थितम् ।

व्यवहारोऽपि तत्तुल्यस्तत एव प्रवर्तते ॥ ३७ ॥
समत्वेन च संवित्तेर्भेदस्याग्रहणेन च ।
मिथ्याभावोऽपि तत्तुल्यव्यवहारप्रवर्तनात् ॥ ३८ ॥
रजतव्यवहारांशे विसम्वादयतो नरान् ।
बाधकप्रत्ययस्यापि बाधकत्वमतो मतम् ॥ ३९ ॥
प्रसज्यमानरजतव्यवहारनिवारणात् ॥ ४० ॥
सन्निहितरजतशकले रजतमतिर्भवति यादृशी सद्या ।
भेदानध्यवसायादियमपि तादृक् परिस्फुरति ॥ ४१ ॥
साधारणं हि रूपं तस्या अस्याश्च विद्यते तेन ।
तन्मात्रप्रतिभानात् समानतामेव मन्यन्ते ॥ ४२ ॥
ततुल्यव्यवहारप्रसक्तिरपि युज्यते चातः ।
तद्विनिवारणकरणाद्बाधकता बाधकस्यापि ॥ ४३ ॥
एवं स्वप्नेऽपि वस्तूनि स्मर्यमाणानि सन्त्यपि ।
अनुभूतांशमोषेण भासन्ते गृह्यमाणवत् ॥ ४४ ॥
ग्रहणस्य विशेषो हि गृहीतग्रहणं स्मृतिः ।
सा गृहीतांशमोषेण गृहीतिरिति तिष्ठति ॥ ४५ ॥
संस्कारोद्बोधहेतुश्च तत्रादृष्टं प्रकल्प्यते ।
विपरीतख्यातिपक्षेऽप्येषा तुल्या हि कल्पना ॥ ४६ ॥
अदृष्टस्य तु हेतुत्वाज्जाग्रतस्तादृशी न धीः ।
अवस्थापि ह्यदृष्टस्य सामग्री फलसम्भवे ॥ ४७ ॥
पीतशङ्खावबोधे च पित्तस्येन्द्रियवर्तिनः ।
पीतिमा गृह्यते द्रव्यरहितोऽश्विव तिग्मता ॥ ४८ ॥
शङ्खस्येन्द्रियदोषेण शुक्लिमा च न गृह्यते ।
केवलं द्रव्यमात्रन्तु प्रथते रूपवर्जितम् ॥ ४९ ॥
गुणे द्रव्यव्यपेक्षे च द्रव्ये च गुणकाङ्क्षिणि ।

भासमाने तयोर्बुद्धिरसम्बन्धं न बुध्यते ॥ ५० ॥
सत्यपीतावभासेन समे भातो मती इमे ।
व्यवहारोऽपि तत्तुल्य एवमत्रापि युज्यते ॥ ५१ ॥
यत्तु नेत्रगतस्यापि कज्जलस्य न कालिमा ।
गृह्यते कारणं तत्र तेनेन्द्रियनिरोधनम् ॥ ५२ ॥
अतसीपुष्पसंकाशं यत् तावन्नेत्रमण्डलम् ।
तत्रस्थमञ्जनं यत्तद् तेजोवृत्तिनिरोधकम् ॥ ५३ ॥
मण्डलान्तरसंस्थन्तु यन्नाम नयनेऽञ्जनम् ।
तस्यानार्जवदोषेण नीलिमा नावगम्यते ॥ ५४ ॥
इन्द्रियोपरिभागेऽपि लिप्तेन स्वच्छभावतः ।
पित्तेन नायनं तेजः काचेनेव न रुध्यते ॥ ५५ ॥
प्रसरन्नायनं तेजो ग्राहकं नाश्रयस्थितम् ।
पित्तस्याऽग्रहणं सौक्ष्म्यात् प्रभायामिव तेजसः ॥ ५६ ॥
मधुरे तिक्तधीरेवं व्याख्याता पित्तवर्तिनः ।
तैक्ष्ण्यस्य रसहीनस्य गुडस्य च परिग्रहात् ॥ ५७ ॥
तथा द्विचन्द्रबोधेऽपि भिन्नमेवैन्द्रियं महः ।
भिन्ने जनयति प्रख्ये एकस्मिन्नेव शीतगौ ॥ ५८ ॥
सन्निवर्त्ती ते न भिद्येते तद्द्वित्वे सति मन्यते ।
भिन्नार्थबुद्धितुल्यत्वमत्रापि खलु पूर्ववत् ॥ ५९ ॥
स्मरतोऽप्येकतां तेन भ्रमोऽयमुपपद्यते ।
न हि स्मृतिप्रमोषेण सर्वत्रैव भ्रमो मतः ॥ ६० ॥
दिङ्मोहे दृष्टसामर्थ्याद् दिक्स्वरूपानवग्रहात् ।
दिगन्तरस्वरूपस्य स्मरणाच्च भ्रमो मतः ॥ ६१ ॥
अलातचक्रेऽलातस्य भ्रमतः सर्वतो द्रुतम् ।
निरन्तरं धियो जाताश्चक्रबुद्धिसमा मता ॥ ६२ ॥

कालभेदस्तु शीघ्रत्वाद्धियां तासां न लक्ष्यते ।
चक्रधीव्यवहारश्च तेनास्मिन्नपि युज्यते ॥ ६३ ॥
एतेनैव प्रकारेण सर्वभ्रान्तिषु पण्डितैः ।
ऊहनीया हेतुभेदा यथार्थज्ञानसिद्धये ॥ ६४ ॥
स्थाणुर्वा पुरुषो वेति सन्देहेऽपि यदा द्वयम् ।
स्मर्यते ऽन्योन्यनिर्मुक्तं तदार्थविरहः कुतः ॥ ६५ ॥
यदि चार्थं परित्यज्य काचिद्बुद्धिः प्रवर्तते ।
व्यभिचारवती स्वार्थे कथं विश्वासकारणम् ॥ ६६ ॥
नन्वत्राप्यरजतधीतुल्यताशङ्कया समः ।
अविश्वासस्तत्र दोषविरहाच्चेद् विनिर्णयः ॥ ६७ ॥
सममेतद् विपरीतख्यातिपक्षेऽपि दृश्यते ।
अहो बत महानेष प्रमादो धीमतामपि ॥ ६८ ॥
ज्ञानस्य व्यभिचारे हि विश्वासः किंनिबन्धनः ।
ज्ञानस्य व्यभिचारेऽपि ज्ञानं यत् सत्यमेव तत् ॥ ६९ ॥
अज्ञानमपि किन्त्वस्ति रूपभेदनिबन्धनम् ।
जिज्ञासा जायते येयं साप्यन्येन निवर्तते ॥ ७० ॥
यत्नेनान्विष्यमाणेऽपि रूपं तच्चेन्न दृश्यते ।
तदा पूर्वत्र संवित्तिर्नास्तित्वेनोपदिश्यते ॥ ७१ ॥
अयथार्थत्वपक्षे च ज्ञानं साकारमापतेत् ।
आकारो भासते यो हि ज्ञानएवावतिष्ठते ॥ ७२ ॥
अयथार्थस्य बोधस्य नोत्पत्तावस्ति कारणम् ।
दोषाश्चेन्न हि दोषाणां कार्यशक्तिविघातिका ॥ ७३ ॥
भस्मकादिषु कार्यस्य विघातादेव दोषता ।
अग्नेर्हि रसनिष्पत्तिः कार्यं जठरवर्तिनः ॥ ७४ ॥
विद्यमानवस्तुरूपग्रहणे प्रतिबन्धृता ।

दोषाणामुपपन्नेति भ्रान्तिर्ग्रहनिबन्धता ॥ ७५ ॥
विषयाव्यभिचारित्वं साधयितुं सर्वसंविदामेषा ।
निरमीयत नीतिविदा शालिकनाथेन नयवीथी ॥ ७६ ॥
मिश्रशालिकनाथेन नयवीथीति संज्ञितम् ।
कृतं लोकहितार्थाय प्रभाकरमतं यथा ॥ ७७ ॥

इति श्रीमहामहोपाध्याय-शालिकनाथमिश्रकृतिरियं
नयवीथी समाप्ता ॥

प्रमाणपारायणं नाम
पञ्चमं प्रकरणं ।

स्वरूपसंख्यार्थ फलेषु वादिभि-
र्यतो विवादा बहुधा वितेनिरे ।
ततो वयं तत्प्रतिबोधसिद्धये
प्रमाणपारायणमारभामहे ॥ १ ॥

किं पुनरिदं प्रमाणं नाम ? न तावदविसंवादिज्ञानं प्रमाणं ? स्मृतेरपि तथाभावप्रसक्तेः । अथ स्मृतिर्विकल्परूपतया परमार्थसत् स्वलक्षणमगृह्णन्ती सम्पृक्तिसन्तमाकारमवस्तुभूतमुल्लिखन्ती द्विचन्द्रादिबोधवन्नाविसंवादिनीति मतम् । एवमपि नानुमानं प्रमाणं स्यात् । तस्यापि विकल्परूपत्वात् । अथ विकल्परूप्यमनुमानमवस्तुविषयमपि वस्तुविषयमिवाध्यवसीयते इत्यध्यवसीयमानवस्तुभूतस्वलक्षणाविसंवादितया तत्प्रमाणं । स्मृतिरपि तथा स्यात् । सापि हि स्वलक्षणाध्यवसायिन्येव जायते । अपि चावस्तुभूतं स्वविषयं वस्तुतयाध्यवस्यच्छुक्तिकारजतबोधवत् कथमनुमानम-

विसंवादि? किञ्च यद्यनुमानं विकल्परूपतया स्वलक्षणं न गृह्णाति कथं तर्ह्यध्यवस्यत्यपि? नहि ग्रहणादन्यो ऽध्यवसायो नाम? यो ह्याकारो न गृह्यते स कथमध्यवसीयेतापि। प्रतीतिविरुद्धं चेदमुच्यते स्मृतिरनुमानवद् बाह्यं वस्तु न विषयीकुरुते इति। विकल्पभूतयोरपि तयोः प्रत्यक्षप्रतीतवस्तुग्राहकत्वप्रतीतेः। अथोच्यते, न वयं यथावस्थितार्थग्राहकमविसंवादकमभिदध्महे किन्त्वर्थक्रियासमर्थवस्तुपरिप्रापकं। यथाभूतं हि येन वस्तूपदर्शितं प्रवृत्तो ऽपि यदि तथाभूतमेव प्रतिलभते। तदा तदविसंवादिज्ञानं प्रमाणमुच्यते। तथा चोक्तम् "प्रमाणमविसंवादिज्ञानमर्थक्रियास्थितिः, अविसंवादनमि"ति। तथा न ह्याभ्यामर्थं परिच्छिद्य प्रवर्तमानोऽर्थक्रियायां विसंवाद्यतइति च। एवमपि स्मृतेः प्रामाण्यापत्तिः। अथ मतं स्मृत्वार्थं प्रवर्तमानो नियमेनार्थं न प्रतिलभते इति। एवमपि भूतार्थविषयमनुमानमप्रमाणं स्यात्। नहि तदुपदर्शितार्थस्य प्रतिलम्भोऽस्ति। अथ यद्यप्यनुमानप्रतीतस्य भूतस्य वस्तुनः प्राप्तिर्नास्ति तथापि तत्प्रतिबद्धलिङ्गजन्मतया तस्य प्राप्तियोग्यता तावदस्त्येव तावता च तस्य प्रामाण्यमिति। एवमपि स्मृतिः प्रमाणमापद्यते। स्मृतिरपि ह्यनुमानवदर्थे पारम्पर्येण प्रतिबद्धैव। यथाहि वह्निस्वलक्षणाद्धूमस्वलक्षणं ततश्च धूमदर्शनं ततश्च धूमविकल्पः तस्माच्चानुमानमित्यनुमानमर्थे पारम्पर्येण प्रतिबद्धत्वादर्थप्रापणसमर्थं। तथा स्मृतिरप्यर्थादनुभवः ततः संस्कारः संस्काराच्च स्मृतिरित्यर्थप्रतिबद्धैवेति तत्प्राप्तियोग्यतया प्रमाणमापद्येत। यदि मन्वीत सत्यामपि प्राप्तियोग्यतायां स्मृतेर्यत् तया प्रापयितव्यं स्वलक्षणं तदनुभवेनैव प्रापितमिति न प्रमाणं स्मृतिः। अनुमानं त्वप्राप्तस्वल-

लक्षणप्रापकतया प्रमाणमिति । एवमप्यर्थक्रियासमर्थवस्तुपरिप्रापकतामात्रं न प्रमाणलक्षणं किन्तु विशेषणमुपादेयम् अप्राप्तप्रापकमविसंवादिज्ञानं प्रमाणमिति । अथोच्यते, प्राप्तं प्रति प्रापकत्वमेवापरस्य नास्तीति । तदसत्, अर्थप्रतिबद्धता हि प्रापकता सा च ज्ञानान्तरस्यापि नानुपपन्ना । यद्युच्येत, न प्रापकतामात्रेण प्रामाण्यमपि तु प्रवर्तकतयापि; यत् प्रापयति च प्रवर्तयति च तत् प्रमाणमिति । एतदपि न किञ्चित् । प्रवर्तकतापि ज्ञानान्तरस्यापि घटतएव । प्रवृत्तियोग्यार्थोपदर्शकत्वमेव प्रवर्तकत्वं तच्च भूतार्थविषयानुमानस्येव स्मरणस्याप्यस्ति । प्रवर्तकत्वे च प्रमाणलक्षणानुवेशिनि निर्विकल्पकज्ञानानामप्रमाणता स्यात् स्वयं व्यवहारप्रवर्तकत्वाभावात् । तदुत्थास्तु विकल्पा एव प्रापकतया प्रवर्तकतया च प्रमाणभूताः स्युः । धारावाहिकज्ञानेषु च पूर्वज्ञानविषयार्थत्वादुत्तरेषां प्रमितित्वं न स्यात् । अथोच्येत, इष्यतएव तेषामप्रमाणतेति, तदयुक्तं, लोके तेषां पूर्वस्मादविशिष्टत्वात् प्रमाणभावस्य । लौकिकं च प्रमाणं परीक्षकैरप्यनुसरणीयम् । अथ भिन्नत्वादर्थक्षणानां सर्वेषामप्यप्राप्तप्रापकत्वमस्तीति । तदसत्, क्षणभेदस्यापरामर्शान्न तदपेक्षा प्रमाणवाचितेति । क्षणिकता च मीमांसाजीवरक्षायां प्रतिक्षिप्तैवेति कृतमतिविस्तरेण ।

नापि दृढमविसंवाद्यगृहीतार्थग्राहकं प्रमाणमिति प्रमाणलक्षणमुपपद्यते । धारावाहिकज्ञानानामुत्तरेषां पुरस्तात्तनप्रतीतार्थविषयतया प्रामाण्यापाकरणात् । नच कालभेदावसायितया प्रामाण्योपपत्तिः । सतोऽपि कालभेदस्यातिसौक्ष्म्यादनवग्रहात् । अपि च दृढमिति किं निवर्त्त्यं ? संशयज्ञानमिति चेत् । कः पुनरयं संशयः ? साधारणधर्मदर्शनादनैकशो विरुद्ध-

धर्मान्वितस्यानेकस्य च धर्मस्यावगमाद्वादिनामध्यवसीयमानविशेषाणां विप्रतिपत्तेश्चाध्यवसितविशेषे वस्तुन्यनियतविशेषणविषयं ज्ञानमिति तार्किकाः । यथा सन्तमसतिरोहितविशेषवस्तुनि दूरवर्तिन्यूर्ध्वतामात्रदर्शनेन किमयं स्थाणुरुत पुरुषो वेति । तथा प्रत्यक्षो वायुः स्पर्शवत्त्वात् पृथिवीवत् । अप्रत्यक्षो वायुररूपिद्रव्यत्वात् गगनवदिति । केचिन्नित्यं शब्दमाहुः । केचिदनित्यं । भवति वादिनां विवादात् तत्त्वजिज्ञासोस्तत्र संशयः । तदसत् । यौ हि धर्मौ संशय्येते ययोरेकमिदं विज्ञानं नोदयते किन्तु द्वे एते विशेषणस्मरणे । तयोश्च विशेषयोरेकस्यापि तस्मिन् धर्मिणि निश्चयो नास्तीत्येकान्तव्यवहारं प्रतिपत्ता प्रवर्तयितुमशक्नुवन् संशेत इवेति संशयव्यवहारः । ये च ते स्मरणे तयोर्गृहीतग्राहकतयैव प्रामाण्यं निरस्तमिति किं तद्ग्रहणेन । अविसंवादिग्रहणमपि सर्वज्ञानानामर्थाव्यभिचारादविशेषकम् । ननु शुक्तिकायां रजतमिदमिति ज्ञानं प्रतिबिम्बज्ञानं च व्यभिचारि दृश्यते । नैतदेवं यदि रजतज्ञानं रजतविषयं न स्यात् ततो व्यभिचरेदर्थम् । रजतविषये तु को व्यभिचारः । ननु नेदं रजतविषयं किन्तु शुक्तिकाविषयमेव । उच्यते, शुक्तिकाविषयमित्यस्य कोऽर्थः ? किं याऽसौ शुक्तिका व्यक्तिस्तामेव विषयीकरोत्यथ शुक्तिकात्वमेवेति ? न तावद्व्यक्तिरनेन विषयीकर्तुं शक्या । भिन्नत्वादाकारस्याकारिणश्च समीचीनरजतव्यक्तिरपि न रजतत्वबुद्ध्या गोचरीभवति । शुक्तिकात्वं पुनरभासमानमेव विषय इति नोपपद्यते । अथोच्यते । व्यवहारयोग्यतापत्तिर्विषयत्वमिति तथापि शुक्तिकात्वमविषय एव । नहि तद् व्यवहारयोग्यतामापद्यते । अवभासमानतैव च विषयत्वम् । तेन रजतत्वमेव वि-

षयः । तच्च पुरोवर्तिनि न सम्भवतीति तद्विषयिणी स्मृतिरेवायं कुतोऽस्या व्यभिचारः । प्रतिबिम्बज्ञानं तु मुखाद्यवभासं मुखादिविषयमेव । भासुरे हि दर्पणादौ नयनरश्मिर्निपतितः प्रतिहतः परावृत्तो मुखादिना सम्प्रयुक्तस्तदेव मुखादि ग्राहयति । नन्वेवमपि सव्यदक्षिणविपर्यासो देशविशेषपरिमाणत्वाल्पत्वमहत्वप्रतिभासश्च किंनिबन्धनः । अत्राभिधीयते, मुखादेर्देशो न गृह्यते दर्पणादीनां च ग्रहणमिति मुखादयस्तद्देशा इव भान्ति । अभिमुखेन मुखादिना नयनरश्मिः संयुक्त इति तथैव तदवगमात् सव्यदक्षिणविपर्यासोऽपि युक्तः । अल्पत्वमहत्त्वे च दर्पणादेरश्मिप्रतिघातहेतोरल्पतया महत्तया च दोषभूतया मुखादिपरिमाणाग्रहणाद्दर्पणादिपरिमाणग्रहणाच्च मुखादिष्विव भासेते । तेनात्रापि नास्ति व्यभिचारः । एवमादि च नयवीथ्यां निपुणतरमुपपादितमिति तयैव दिशा सर्वत्राव्यभिचारो वर्णनीय इति नेदमपि प्रमाणलक्षणम् ।

तत्राह । "प्रमाणमनुभूतिः" । नच स्मृतेः प्रामाण्यापत्तिरिति दर्शयति । सा स्मृतेरन्या । अथ का स्मृतिः । स्मृतिः पुनः पूर्वविज्ञानसंस्कारमात्रजं ज्ञानमुच्यते । नचैवं धारावाहीकोत्तरज्ञानानां स्मृतित्वम् । इन्द्रियार्थसन्निकर्षजत्वात् । पूर्ववत् । मात्रग्रहणाच्च प्रत्यभिज्ञाज्ञानस्य न स्मृतित्वम् । इन्द्रियार्थसन्निकर्षसचिवसंस्कारजत्वात् । अथ कथं स्मृतिर्न प्रमाणम् । अत्राह । न प्रमाणं स्मृतिः पूर्वप्रतिपत्तिव्यपेक्षणात् । स्मृतिर्हि तदित्युपजायमाना प्राचीं प्रतीतिमनुरुन्धयमाना न स्वातन्त्र्येणार्थं परिच्छिनत्तीति न प्रमाणम् । स्मृतिप्रमोषस्तर्हि प्रमाणम् । न । सोऽपि पूर्वप्रतीतिसापेक्ष एव । तज्जन्यसंस्कारमात्राधीन–जन्मत्वात् । धारावाहीकेषु तर्ह्युत्तरविज्ञानानि स्मृ-

तिप्रमोषादविशिष्टानि कथं प्रमाणानि । तत्राह ।

अन्योन्यनिरपेक्षास्तु धारावाहिकबुद्धयः ।

व्याप्रियमाणे हि पूर्वविज्ञानकारणकलाप उत्तरेषामप्युत्पत्तिरिति न प्रतीतित उत्पत्तितो वा धारावाहिकविज्ञानानि परस्परस्यातिशेरतइति युक्ता सर्वेषामपि प्रमाणता । यद्यनुभूतिमात्रं प्रमाणं ततो रजतमिदमिति भ्रान्तं यद्धि ज्ञानं तदपि प्रमाणं स्यात् ।

अत्रोच्यते । रजतमिदमिति नैकं ज्ञानं किन्तु द्वे एते विज्ञाने । तत्र रजतमिति स्मरणं तस्याननुभवरूपत्वान्न प्रामाण्यप्रसङ्गः । इदमित्यपि विज्ञानमनुभवरूपं प्रमाणमिष्यतएव । भ्रान्तिरूपता चात्र रजतज्ञानस्य स्मरणरूपस्यैव ग्रहणव्यवहारप्रवर्तकतया व्यवहारकाले विसम्वादकत्वात् । येऽपि चैकमिदं विज्ञानं मिथ्याभूतमित्यास्थिषत तेऽपि बाधकप्रत्ययाधीनं मिथ्यात्वमभ्युपगच्छन्तो नेदमंशस्य मिथ्याभावं वदितुमीशते तत्र बाधकाभावात् । बाधकप्रत्ययदशायामपीदमंशस्यानुवृत्तेः । एकमपि च विज्ञानमर्थावच्छेदमाश्रितभेदं प्रमाणमप्रमाणं च युक्तमेव । पीतशङ्खादिज्ञानं तर्हि प्रमाणं प्रसक्तं । तत्र हि पीतिमशङ्खस्वरूपश्च द्वयमप्यनुभूयतएव । नयनगतपित्तवर्त्ती हि पीतिमा ऽनुभूयतएवेति नयवीथ्यां निपुणतरमुपपादितम् । शङ्खस्वरूपे चानुभूतिर्निर्विवादैव । नायं दोषः । को नाम पीतशङ्खज्ञानमप्रमाणमाह प्रमाणमेव हि तद् यथार्थविषयत्वात् । विज्ञानद्वयं चैतदेकसाधारणरूपम् । तत्रैकविज्ञानसाधारणरूपावमर्शादेकमिव ज्ञानं सदृशव्यवहारप्रवर्तकतया व्यवहारदशायां विसम्वादमावहत् प्रमाणमपि सद्भ्रान्तमित्युच्यते । यत्र तु व्यवहारविसम्वादो नास्ति तत्र भ्रान्तिरपि न व्यपदिश्यते । यथो-

ष्णजलज्ञाने। तत्रापि हि न जलगतमौष्ण्यमनुभूयते किन्तु वन्ह्यवयवगतमेव। जलगतस्यौष्ण्यस्य वन्हिसंयोगेनोत्पादनानभ्युपगमात्। पाकजो हि गुणः पाकान्तरेणैव निवर्त्तते। जलगतस्य चौष्ण्यस्यानपेक्षितपाकस्यैवाग्निसंयोगविच्छेदेनैव निवृत्तिः। गत्वरा हि तेजोऽवयवाः सञ्चारितास्तेष्वन्यत्र गतेष्वपरतेजोऽवयवसञ्चरणविच्छेदे युक्तैवौष्ण्यस्य निवृत्तिरिति पीतशङ्खादिज्ञानतुल्यत्वमुष्णजलज्ञानस्य। तस्मात् पीतशङ्खादिज्ञानं प्रमाणमेव भ्रान्तञ्चेत्यनवद्यम्। यस्तु विपरीतख्यातिवाद्युष्णजलज्ञानमप्रमाणं भ्रान्तमाह तस्य सर्वलोकविरोधः।

कतिविधं पुनः प्रमाणमित्यत्राह। तत्र पञ्चविधं मानम्। अनेनैकादिसंख्या षडादिसंख्या च व्यावर्तिता। काः पुनस्ता विधा इत्यत्राह। प्रत्यक्षमनुमा तथा। शास्त्रं तथोपमानार्थापत्ती इति गुरोर्मतम्। किं पुनः प्रत्यक्षस्य लक्षणम्॥

केचिदाहुः। इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति। इन्द्रियस्यार्थेन सन्निकर्षाद्यदुत्पद्यते ज्ञानं तत्प्रत्यक्षम्। सच सन्निकर्षः षोढा भिद्यते। संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, संयुक्तविशेषणता चेति। तत्र संयोगात् पार्थिवाप्यतैजसानां द्रव्याणां चक्षुःस्पर्शनाभ्यां ग्रहणम्। प्राप्यकारिचक्षुर्बहिरिन्द्रियत्वात्। तैजसं च तद् रूपप्रतीतिहेतुत्वात् दीपवत्। तस्य रश्मयः प्रसरन्तो द्रव्येण संयुज्यन्ते। ते च पृथ्वग्रा इति पृथून्यपि द्रव्याणि व्यश्नुवते। नन्वेवं सान्तरग्रहणं न स्यात् प्राप्यकारित्वात् स्पर्शनवत्। किञ्च संयोगस्य गतिनिबन्धनत्वाद् गतिमतां च क्रमेणासन्नदूरगमनात् समकालमासेदुषां दवीयसां च पदार्थानां दर्शनं नोपपद्यते। उ-

च्यते । भोगायतनापेक्षिततया सान्तरग्रहणं तावदुपपन्नम् । समसमयसम्वेदने तु केचित् परिहारमेवं वर्णयन्ति । सकलानर्थान् व्याप्य युगपदवस्थितेन बाह्येन तेजसा सहैकीभूतास्ते चाक्षुषा रश्मयो युगपद्ग्रहणहेतव इति । तत्रापरे दूषयन्ति । इत्थं प्राप्तावभ्युपगम्यमानायामतिदूरव्यवहितानामप्यर्थानां ग्रहणं दुर्निवारमिति । अन्ये त्वाहुः क्षेपीयस्तया तेषां रश्मीनां कालभेदानवग्रहाद्यौगपद्याभिमान इति । तदप्यन्ये नानुमन्यन्ते । अतिसन्निकृष्टेषु वस्तुषु गतिकालभेदः पद्मपत्रशतव्यतिभेदवन्मा नामावसायि । अनेकयोजनसहस्रान्तरितेषु भूमिष्ठेष्वर्थेषु ध्रुवे च कालभेदानध्यवसायो न बुद्धिमनुरञ्जयतीति । वयं तु वदामः । अदृष्टसापेक्षत्वाददोषः । नयनरश्मिभिरेकीभूतेऽपि बाह्ये तेजसि यावानेव तस्य भागोऽदृष्टवशेनोपलब्धिहेतुतयोपात्तस्तावानेवोपलब्धये प्रभवति न सर्व इति न सर्वोपलम्भो युगपच्च भौमध्रुवादिदर्शनसिद्धिः । ननु प्राप्यकारिणि नयनतेजसि काचाभ्रपटलान्तरितेषु कथमुपलब्धिः ? तैर्नयनरश्मीनामप्रतिघातात् । ये पुनरप्राप्यकारि चक्षुराहुस्तेषां व्यवहितविप्रकृष्टार्थग्रहणं दुर्निवारं । सन्निधान इव विप्रकृष्टेऽपि स्फुटतरमणीयांसोऽप्यर्था गृह्येरन् । प्राप्यग्रहणे तु तेजसोऽवयवानामप्रचुरतया युक्तमस्फुटदर्शनं दवीयसां क्षोदिष्ठानां चादर्शनम् । अथ कस्मादणु पार्थिवादिद्रव्यमाकाशकालदिगात्मानश्च प्रत्यक्षेण न गृह्यन्ते । उच्यते । महत्त्वमेकद्रव्यत्वं रूपविशेषश्च सन्निकर्ष इव प्रत्यक्षत्वे हेतुः । अनेकद्रव्यानाश्रितत्वात् परमाणोरदर्शनम् । अमहत्त्वात् द्व्यणुकस्य । आकाशादीनां त्वरूपत्वाददृव्यद्रव्यत्वाच्चेति वेदितव्यम् । अत्रेदं त्रिविधं द्रव्यं, संयोगाद्दर्शनस्पर्शनाभ्यां गृह्यते । संयुक्तसमवेतसमवायाच्च तद्गतानां

रूपादीनां गुणानां कर्मणां च ग्रहणं । संयुक्तसमवेतसमवायाच्च गुणत्वकर्मत्वरूपत्वादीनां । समवायाच्च शब्दग्रहणं । कर्णशष्कुलीपरिच्छिन्नं हि गगनमेव श्रोत्रं । तद्गुणश्च शब्द इति तत्त्वालोके निपुणमुक्तं । समवेतसमवायाच्च शब्दत्वप्रतीतिः । संयुक्तविशेषणतया चाभावग्रहणं । अफलवती शाखेति ।

तदेतदयुक्तं । यदि महत्त्वानेकद्रव्यत्वरूपवत्त्वानि प्रत्यक्षत्वे निमित्तानि तदा वायोरप्रत्यक्षता स्यात् । न च वाच्यमिष्यतएवेति ? स्पर्शनेन तदुपलम्भात् । स्पर्शमात्रं तेनोपलभ्यते न द्रव्यमिति चेत् । न । शीतोष्णानुष्णाशीतेषु स्पर्शेषूपलभ्यमानेषु प्रत्यभिज्ञायमानत्वाद् द्रव्यस्य । यदा हि तैजसमुष्णत्वं जलगतं च शीतत्वं वायोश्चानुष्णाशीतत्वं स्पर्शनेन वायौ वाति प्रतीयते तदा प्रत्यभिज्ञायते द्रव्यं तदेवेदमिति । तेन न स्पर्शमात्रस्य प्रतीतिः । तस्माद्रूपवत्त्वमिव स्पर्शवत्तापि प्रत्यक्षे हेतुरित्युपसंख्यानं कर्त्तव्यं । यत्तु संयुक्तसमवेतत्वात्कर्मणः प्रत्यक्षमुक्तं । तदयुक्तम् । तस्य संयोगविभागलक्षणफलानुमेयत्वात् । एतच्च पञ्चिकाद्वये प्रपञ्चितम् । अत्रापि चानुमानपरिच्छेदे वक्ष्यामः । यत्तु संयुक्तसमवेतसमवायाद् गुणत्वादिग्रहणमिष्टं । तदपि तेषामभावादेवायुक्तं । समवेतसमवायाच्च शब्दत्वग्रहणमप्येवमेवानुपपन्नं । संयुक्तविशेषणतया चाभावग्रहणमग्रेव निराकरिष्यते । अन्यच्च समवेतविशेषणतापि सन्निकर्षान्तरं किमिति नेष्यते । यथाहि गोरश्वस्य चान्योन्याभावप्रतीतये संयुक्तविशेषणता नाम सन्निकर्षान्तरमाश्रीयते तथा ककारसकारयोरपीतरेतराभावावगमाय समवेतविशेषणतालक्षणं सन्निकर्षान्तरमुपगन्तुमुचितं । तस्मात् त्रिविध एव सन्निकर्षः प्रत्यक्षत्वे हेतुः । संयोगः संयुक्तसमवायः समवायश्चे-

ति । अव्यपदेश्यमिति किमर्थम् ? इन्द्रियार्थसन्निकर्षोत्पन्नस्य शाब्दताशङ्कानिवृत्त्यर्थं । यदा हि रूपं रूपमिति प्रतिपद्यते तदा शब्दसञ्जल्पसम्भवाच्छाब्दताशङ्का कस्यचित् स्यात् तन्निवृत्तये ऽव्यपदेश्यमित्युक्तं । नहीन्द्रियार्थ सन्निकर्षजे ज्ञाने शब्दस्य व्यापृतिरस्ति यतः शाब्दता स्यादिति । तदिदमयुक्तं । लक्षणं हि प्रत्यक्षस्य वक्तव्यं । येन च रूपेण सजातीयविजातीयेभ्यो भेदस्तल्लक्षणं । तत्र तावच्छाब्दाद्भेद इन्द्रियार्थसन्निकर्षजत्वेनैव सिद्धः । शब्दसञ्जल्पनानुविद्धस्य प्रत्यक्षस्य शाब्दत्वाशङ्का शाब्दपक्षेणैव निराकर्तुमुचिता । अनुमानत्वशङ्केव सर्वस्य शाब्दप्रत्यक्षस्य । अव्यभिचारिपदं च विपर्ययनिराकरणाय यदुक्तं तत् सर्वज्ञानानामव्यभिचारित्वादविशेषकमित्युक्तं । व्यवसायात्मकतापि संशयनिवृत्त्यर्थं न वक्तव्या । स्थाणुर्वा पुरुषो वेति हि स्मृतिज्ञानद्वयमेतत् । तच्च नेन्द्रियार्थसन्निकर्षजमिति न तस्य प्रत्यक्षत्वप्रसक्तिः । किञ्चाव्यभिचारिपदेनैव संशयस्यापि निवृत्तिः सिद्धा । तस्यापि यथाज्ञायमानार्थव्यभिचारित्वात् । व्यभिचारिता व्यसायात्मकता च न प्रत्यक्षलक्षणं किन्तु प्रमाणलक्षणमिति । तेन सामान्येन प्रमाणलक्षणं कृत्वा तद्विशेषस्य प्रत्यक्षस्य प्रातिस्विकं सजातीयविजातीयव्यावृत्तिसमर्थमेव लक्षणं वाच्यम् । इन्द्रियार्थसन्निकर्षोत्पन्नं प्रत्यक्षमिति। अस्मिन्नपि च लक्षणेऽनुमानादिप्रमितिः स्वात्मनि प्रमातरि च न प्रत्यक्षा स्यात् । अनिन्द्रियजत्वात् ।

अपरे पुनराहुः । प्रत्यक्षं कल्पनापोढमभ्रान्तमिति । कल्पना नाम जात्यादियोजना तया रहितं यद्विज्ञानं तत् प्रत्यक्षं । यथाभूतमेव तैमिरिकादीनां केशोण्डुकादिज्ञानं मा प्रत्यक्षं प्रसाङ्क्षीदित्युक्तमभ्रान्तमिति । तच्चतुर्विधमिन्द्रियजं ज्ञानं सर्व-

चित्तचैत्तानां स्वसंवेदनं मानसं योगिज्ञानं चेति। यदिन्द्रियाणामर्थस्य च सन्निकर्षादुपजायते तदिन्द्रियजं ज्ञानं पञ्चसु रूपादिषु पञ्चविधं। सर्वज्ञानानां स्वसंवेदनं विकल्पविरहात् प्रत्यक्षं। सुखादयश्च विज्ञानाभिन्नहेतुकतया न तस्माद्भिद्यन्ते इति तेऽपि स्वसंविदिता एव। मानसन्त्विन्द्रियजविज्ञानेन स्वविज्ञेयलक्षणानन्तरक्षणसहकारिणा जन्यते तस्य चेन्द्रियज्ञानग्राह्यानन्तर एव क्षणो ग्राह्यः। ननु जन्यज्ञानसमये जनकस्यार्थलक्षणस्यातीतत्वात् कथं ग्राह्यता? उच्यते। एतदेव ग्राह्यत्वमर्थानां यदुत्पादकत्वं स्वरूपार्पकत्वं चेति। अर्थाकारं हि प्रत्यक्षं ज्ञानम्। अन्यथा निराकारं हि संविचिमात्रं कथं रूपादिवित्ति व्यवस्थितां लभते। अतएवार्थसारूप्यं प्रमाणं। तस्यैव व्यवस्थाहेतुत्वात्। अर्थेन हि सारूप्यं विज्ञानं घटयति। नेन्द्रियादीति न तत् प्रमाणं। नन्वेकस्याकारस्य प्रतीतेस्तस्य च ज्ञानएव व्यवस्थितत्वात् कथमर्थस्य प्रत्यक्षता? उच्यते। योऽर्थो ज्ञानस्याकारमात्मनोऽन्वयव्यतिरेकावनुकारयति स प्रत्यक्ष इति न दोषः। अवश्यं च साकारता ज्ञानस्याश्रयणीया। अन्यथा स्वप्नादिष्वसति बहिरर्थे कस्याकारः प्रकाशेत? प्रकाशात्मकज्ञानबहिर्भूतश्चाकारः कथं प्रकाशते? जडस्य प्रकाशायोगात् अपि-चार्थस्य वित्तेश्च सहोपलम्भो नियतः सच भेदादनियमव्याप्तव्यापकविरुद्धोपलब्ध्या निवृत्तोऽभेदे व्यवतिष्ठमानमर्थमनुमापयति। भेदावसायस्तु द्विचन्द्रादिप्रतीतिवदनादिवासनानिबन्धन इति परिकल्पनीयं। भूतार्थभावनाप्रकर्षपर्यन्तजं च योगिज्ञानं प्रमाणं। प्रतीतमर्थं परोक्षमपि भावयतो यद्भावनायाः परमे प्रकर्षे सत्यपरोक्षावभासं ज्ञानं जायते तत् प्रत्यक्षं। स्पष्टप्रतिभासत्वेन निर्विकल्पकत्वात्। नहि विकल्पानुविद्धस्य

स्पष्टप्रतिभासतास्ति ।

तदेतदप्यनुपपन्नं । सविकल्पकज्ञानानां जात्यादियोजनया ह्रीयमानानामिन्द्रियजानां प्रत्यक्षत्वापाकरणात् । अथोच्यते । जातिगुणयोर्द्रव्यात् पृथक्त्वेनाग्रहणाद्भेद एव नास्ति । तेन ताभ्यामविद्यमानाभ्यां योजयित्वा जायमानं जातिगुणकल्पनाज्ञानं न प्रत्यक्षमिति । तदसत् । एकैकद्रव्यातिरेकेण द्रव्यान्तरे ग्रहणात् । पृथक्त्वेनाग्रहणस्यासिद्धेः । एकस्मिन्नपि च द्रव्ये द्रव्यान्तराद्व्यावर्तमाने ऽनुवर्तमानयोर्जातिगुणयोर्भेदावगमादिति जातिनिर्णये निर्णितं । कर्मकल्पना तु न प्रत्यक्षमित्यनुमतमेवानुमेयत्वात् कर्मणः । द्रव्यकल्पनातु विषाणी दण्डीति च न प्रत्यक्षतामतिवर्तते । इन्द्रियानुविधायित्वात् । नामकल्पनापि प्रत्यक्षा । इन्द्रियानुविधायित्वात् । देवदत्तो ऽयमिति तत्र यद्यपि वर्णात्मकं नाम स्मरणनिविष्टं तेन सह वाच्यवाचकभावोऽपि स्मृतिसमारूढ एव तथापि संज्ञा प्रत्यक्षतां न मुञ्चति । नहि संज्ञा तत्सम्बन्धो वा तदानीमेकज्ञाने विशेषत्वेन प्रतिभातः किन्तु तौ स्मृत्यारूढावेव । संज्ञिनि हि दृश्यमाने प्रागनुभूतौ तौ स्मृतिमारोहतः । अत एवोक्तम् ।

> " संज्ञा हि स्मर्यमाणापि प्रत्यक्षत्वं न बाधते, ।
> संज्ञिनः सा तटस्था हि न रूपाच्छादनक्षमा " ॥

इति । अतश्च नामयोजनयापि जायमानं ज्ञानं न प्रत्यक्षमिति येऽपि मन्यन्ते तेऽप्यनयैव दिशा निराकृताः । ऐन्द्रियके ज्ञाने नामयोजनाया असम्भवात् । अपि च जातिगुणयोरप्रत्यक्षत्वमिच्छतो न किञ्चित् प्रत्यक्षमवतिष्ठते । नहि रूपशून्या काचिदपि रूपिबुद्धिरस्ति । जातिगुणावेव रूपिणां रूपे । सर्वा हि प्रतीतिरेवमिति भवति प्रकारश्चैवं शब्दार्थः । जातिगुणौ चा-

र्थानां प्रकारभूतौ । ततश्च ताभ्यां योजयन्त्येव सर्वेन्द्रियप्रतीतिः समुत्पद्यते इति निर्विषयं कल्पनापोढपदमिति । अभ्रान्तपदमपि सर्वज्ञानानां स्थूलावभासित्वात् ग्राह्यग्राहकसंवित्तिभेदयोगित्वाच्च सौगतानां निर्विषयमेव । यच्च मानसं नाम प्रत्यक्षमुक्तं, तद्द्वारावाहिकैन्द्रियज्ञानान्नातिरिक्तं मन्यामहे । स्यान्मतम् अनुपरतेन्द्रियस्यैन्द्रियजं ज्ञानम् उपरते त्वनन्तरक्षणप्रभवं मानसमिति । तदयुक्तम् । इन्द्रियव्यापारोपरमस्यापरोक्षार्थप्रतीतिफलसम्भवे सत्यसिद्धत्वात् । यच्चातीतार्थविषयं मानसमुक्तं । तदयुक्तं । वर्तमानस्याकारस्य प्रतीतेः । नचायमाकारो वित्तेरेव ? वेद्यतया वित्तेः पृथगवभासनात् । वित्तिर्हि वित्तितया वेद्यश्चाकारो वेद्यतयावभाति अतो न तयोस्तादात्म्यमुपपद्यते । यच्चोक्तं भेदावभासो भ्रम इति तदपि कारणाभावादयुक्तं । न चार्थवित्तिभेदव्यवस्थैव भेदे हेतुः ? निराकाराणां वित्तीनां स्वभावत एव विशिष्टार्थसम्बन्धितयैव स्फुरणात् । सारूप्यं च यद्व्यवस्थाकरणमुक्तं । तदसिद्धं । स्थूलावभासित्वाज्ज्ञानानामणुरूपत्वाच्चार्थस्य । किञ्च यदि तत्सारूप्यं तत्समुत्पत्तिसंवेद्यतालक्षणं ततः समानाकारस्य समनन्तरप्रत्ययस्यापि वेद्यता स्यात् । स्वप्नादिष्वपि च बाह्यस्यैवार्थस्याकारः स्मृतौ प्रथतइति नयवीथ्यां साधितं । यच्च जडस्य प्रकाशायोगादित्यभेदकरणमुक्तं । तदयुक्तं । जडस्यैव प्रकाशसम्बन्धो घटते । तादात्म्ये तु नेष्यते एव । अपि च यदि ज्ञानानतिरिक्तस्यैव प्रकाशस्तर्हि ग्राह्यग्राहकसंवित्तीनां भेदस्य कथं प्रकाशः ? तस्यालीकस्य ज्ञानरूपाननुप्रविष्टत्वात् । यच्च सहोपलम्भनियमादभिन्नत्वमाकारस्य वित्तेश्चोक्तं तदप्यसारम् । भेदेऽप्यस्यार्थस्य नियमोपपत्तेः । यैव हि संवि-

त्तिः सैव तस्यार्थस्योपलब्धिरिति कथमसौ तां विना प्रकाशेत? यच्च स्वसंवेदनं सर्वस्य वित्तीनां प्रत्यक्षमुक्तम्। तदनुमन्यामहे। सुखादीनां यत् तदभिन्नहेतुतया तदभेदात् स्वसम्वेदनमिष्टम्। तदनुपपन्नम्। हेत्वभेदस्यासिद्धेः। अर्थस्य ज्ञानहेतुत्वात्। ज्ञानस्य च सुखादिनिमित्तत्वात्। असन्निहितेऽप्यर्थे तज्ज्ञानमात्रात् स्वप्नादिषु सुखाद्युपपत्तेः। यच्च योगिज्ञानं प्रत्यक्षमुक्तम्। तदसत्। प्रमाणविशेषो हि प्रत्यक्षं नच भूतार्थभावनाप्रकर्षपर्यन्तजस्य योगिज्ञानस्य प्रमाणतैव सम्भवति। स्मृतिरूपत्वात्। प्रमाणेन हि भूतार्थं परिच्छिद्य या भावना सा स्मृतिसन्ततिरेव। तत्प्रकर्षजमपि ज्ञानं स्मृतिविशेष एवेति न प्रमाणं नच प्रत्यक्षमित्यलमतिविस्तरेण।

यदपि मन्यन्ते। "सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमि"ति प्रत्यक्षलक्षणं तदप्यव्यापकत्वादलक्षणम्। आत्मनि हि लिङ्गजापि प्रतीतिः प्रत्यक्षत्वेनेष्यते। सकलप्रतीतीनां च स्वरूपं प्रति प्रत्यक्षताभिमतेति किं तर्हि इदं सत्संप्रयोगइति? उच्यते। शुक्तिकारजतज्ञानादिष्वपि प्रत्यक्षतामाहुस्ते निराक्रियन्ते? प्रमेयेषु हि तदेव प्रत्यक्षत्वेनोच्यते यद्विषयं ज्ञानं तेनैवेन्द्रियाणां सम्प्रयोगे यत् पुरुषस्य ज्ञानं जायते। न च शुक्तिसंयुक्ते चक्षुषि यद् रजते ज्ञानं जायते तदेवं विधं। तस्मान्न तत् प्रत्यक्षं। रजतज्ञानं हि रजतविषयं। न च रजतेनेन्द्रियं संयुक्तं। रजतस्य तत्रासन्निहितत्वात्। तस्मान्न रजतज्ञानं प्रत्यक्षं किं तर्हि स्मरणमेतदिति दर्शयितुं सूत्रमिदं वर्णनीयम्।

स्वाभिमतमिदानीं प्रत्यक्षलक्षणमाह। साक्षात् प्रतीतिः प्रत्यक्षं। ननु भावनाप्रकर्षजापि स्मृतिः साक्षात्कारवती प्रत्यक्षं प्रसज्यते। न। प्रमाणाधिकारात् अनुभूतिश्च प्रमाणम्।

तद्विशेषश्च प्रत्यक्षमिति न स्मृतौ प्रत्यक्षत्वापत्तिः।

प्रत्यक्षस्य विशेषमाह। मेयमातृप्रमासु सा। तत्र विभागमाह। मेयेष्विन्द्रिययोगोत्था। द्रव्यजातिगुणेष्विन्द्रियसंयोगोत्था सा प्रत्यक्षा प्रतीतिः। मेयेष्विन्द्रियसंयोगेन तत्संयुक्ते समवायेन तत्समवायेन च जायते। कानि पुनरिन्द्रियाणि? घ्राण-नयन–रसनत्वक्–श्रवणानि बाह्यानि आन्तरश्च मनः। किं पुनरेषामस्तित्वे भेदे च प्रमाणम्। उच्यते। विषयावबोधस्तावत् कादाचित्को दृश्यते। तस्य चात्मा समवायिकारणमसमवायिकारणेन च विना कार्यं न जायते इति। तच्च समवायिकारणप्रत्यासन्नं भवति। प्रत्यासत्तिश्च। द्विधा दृष्टा। तत्समवायस्तत्कारणसमवायश्च। अग्निसंयोगो हि पाक्यद्रव्यसमवेतोऽसमवायिकारणभूतस्तत्रैव गन्धादिकमारभते। तन्तुरूपाणि च पटकारणभूतेषु तन्तुषु समवेतानि पटस्य रूपारम्भेऽसमवायिकारणभूतानि। तत्र तावदात्मनो नित्यत्वात् तत्कारणसमवेतमसमवायिकारणं न भवतीत्यात्मसमवेतमेव गुणान्तरमसमवायिकारणमाश्रयणीयं। तत्र च नित्यद्रव्यसमवायिनो वैशेषिकगुणस्य द्रव्यान्तरसंयोग एवासमवायिकारणत्वेनावधारितः। पार्थिवपरमाणुषु हि रूपादयोऽग्निसंयोगमेवासमवायिकारणमाश्रित्योत्पद्यमानाः प्रतीता इत्यात्मनोऽपि बोधाख्यो धर्मो द्रव्यान्तरमेवासमवायिकारणमाश्रयति। तस्य च द्रव्यस्याश्रयभूतद्रव्यान्तरसद्भावे प्रमाणाभावाद्द्रव्यद्रव्यत्वं निश्चीयते। द्विविधं चाद्रव्यद्रव्यं। परममहदाकाशादिकं परमाणुरूपं च। तत्रास्य द्रव्यान्तरस्य परममहत्त्वोपगमे संयोग एवानुपपन्नः। संयोगकारणाभावात्। यो हि संयोगः साक्षात् प्रतीयते सोऽन्यतरकर्मजो वोभयकर्मजो वा संयोगजो वा तेन नियतकारण-

त्वेन संयोगस्यावगतत्वात् तदभावे संयोग एव नास्तीति निश्चीयते। नच परममहतोः साक्षात् संयोगो भवति न चाप्यनुमातुं शक्यते इति पारिशेष्यादणुत्वमेव तस्य द्रव्यान्तरस्याश्रीयते। अणुत्वे तत्कर्मवशादेव संयोगोदयोऽनुपपन्नो न भवति। तत्कर्मोत्पत्तौ प्रयत्नवदात्मसंयोग एव कारणं। शरीरकर्मवत्। प्रयत्ने चासत्यदृष्टवदात्मसंयोगस्य कारणता वायुतिर्यक्पवनवत्। तदुक्तम् "अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनमणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितान्येतानी"ति। सुखदुःखेच्छाद्वेषप्रयत्नानुभवे च तद् द्रव्यं मनः शब्दाभिधेयं निरपेक्षं कारणं। सर्वार्थस्मृतौ च पूर्वजनितसंस्कारोद्बोधसहकार्यनुगृहीतमिति वेदितव्यम्। एतेन यदाहुःषण्णामनन्तरातीतं विज्ञानं यत् तन्मन इति। तदपि निराकृतं। द्रव्यान्तरसंयोगस्यैव नित्यद्रव्यगतवैशेषिकगुणारम्भे ऽसमवायिकारणत्वेन दृष्टत्वात्। रूपग्रहणे रूपवदालोकस्य निमित्तत्वदर्शनाद्रूपवदेवेन्द्रियं रूपग्रहणनिमित्तमिति परिकल्पनीयं। तथा गन्धवदेव गन्धग्रहणे स्पर्शवत्। रसवच्च रसबोधे। शब्दवदेव शब्दग्रहणइति। तेन गन्धवत्त्वात् पार्थिवं घ्राणं गन्धग्रहणकारणम्। रसवत्त्वाच्चाम्भसं रसनं रसानुभवनिमित्तं। रूपवत्वाच्च तैजसं चक्षू। रूपालोकहेतुः। त्वगिन्द्रियं च स्पर्शवत्त्वाद्वायवीयं। शब्दगुणत्वाच्चाकाशं श्रोत्रेन्द्रियसम्बन्धापन्नस्यापि चार्थस्य विषयान्तरासक्तचित्तेनाप्रतिपत्तेर्मनःसंयोगापेक्षेन्द्रियाणामाश्रीयते। तेनाभ्यन्तराणां सुखादिनां ग्रहणे सन्निकर्षद्वयं कारणम्। आत्ममनः सन्निकर्षः संयोगारब्धः सुखादिमनःसन्निकर्षश्च संयुक्तसमवायलक्षणः। बाह्यरूपादिग्रहे च सन्निकर्षचतुष्टयं कारणम्। आत्ममनःसन्निकर्षो, मनइन्द्रियसन्निकर्षो, द्रव्येन्द्रियसन्निकर्षो,

रूपादीन्द्रियसन्निकर्षश्चेति ।

प्रमेयविभागमाह । द्रव्यजातिगुणेषु सा । सेन्द्रियसंयोगोत्था प्रतीतिः स्पर्शवन्महत्त्वयुक्तं च द्रव्यं पार्थिवमाप्यं तैजसं वायवीयं चतुर्विधमैन्द्रियकम् तथाविधद्रव्योदयकारणं च प्रमाणमिति निर्णयनिर्णीतम् । जातिसद्भावोऽपि जातिनिर्णये एवोक्तः । गुणास्तु रूपरसगन्धस्पर्शाः संख्या परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे सुखदुःखेच्छाद्वेषप्रयत्नाश्च प्रत्यक्षग्राह्याः क्वचिच्च द्रव्याग्रहणेऽपि रूपादीनां ग्रहणं रूपाद्यग्रहणे ऽपिच द्रव्यस्येति नास्ति द्रव्यगुणयोर्ग्रहणं प्रति नियमः । द्विधा चेयं द्रव्यजातिगुणेषु ।

सविकल्पाऽविकल्पा च प्रत्यक्षा बुद्धिरिष्यते ।

विभजते । आद्या विशिष्टविषया स्वरूपविषयेतरा । प्रथमं हि स्वरूपमात्रज्ञानं द्रव्यजातिगुणेषूपपद्यते । तच्च स्वानुभवसिद्धं । समाहितमनस्को विषयान्तरानुसन्धानशून्य इन्द्रियसंयुक्तं वस्तु साक्षादुपलभतइति स्वसंविदेवात्र प्रमाणम् । तस्यच न स्वलक्षणमात्रं विषयः । जात्याकारावग्राहित्वस्य स्पष्टत्वात् । नापि सामान्यमात्रविषयत्वं भेदग्रहणस्य प्रतीतिसिद्धत्वात् । लब्धरूपे क्वचित् किञ्चिदित्यादिच यदुच्यते तदितरेतराभावविषयम् । नतु वस्तुविषयम् । वस्तुभेदप्रतीत्यनन्तरकालं परस्पराभावो ऽवसीयते । घटश्च घटाकारतया विदित्वा पटश्च पटाकारतयायं स न भवतीतीतरेतराभावं प्रतिपद्यते । पटाकारविधानं च वस्त्वन्तरग्रहणानपेक्षमित्यप्रतिपद्याऽपि वस्त्वन्तरं तद्ग्रहो नानुपपन्नः । तस्मात् सामान्यविशेषौ द्वे वस्तुनी प्रतिपद्यमानं प्रत्यक्षं प्रथममुपद्यते किन्तु वस्त्वन्तरानुसन्धानशून्यतया सामान्यविशेषरूपता न

प्रतीयते । अनुगतं हि सामान्यमुच्यते व्यावृत्तश्च विशेषः। नच वस्त्वन्तरानुसन्धानमन्तरेणानुगतव्यावृत्ती प्रत्येतुं शक्येते। अप्रतिपद्यमानोऽपि ते शक्नोत्येव स्वरूपं तयोः प्रतिपत्तुमिति निर्विकल्पकमसामान्यविशेषविषयम् । सविकल्पकन्तु तत्पृष्ठभावी ते एव वस्तुनी सामान्यविशेषात्मना प्रतिपद्यते । ननु च वस्त्वन्तरानुसन्धाने नेन्द्रियं समर्थम् । इन्द्रियसामर्थ्यसमुत्थश्च प्रत्यक्षमिति कथं सामान्यविशेषात्मता प्रत्यक्षस्य विषयः । उच्यते । भवेदेतदेवं यदीन्द्रियाण्येव चेतनानि स्युः । ज्ञानानि वा । आत्मा त्वेकः सर्वानुभवितव्यानुभविता संस्कारवशेन वस्त्वन्तरमनुसन्दधदिन्द्रियसंयोगि सामान्यविशेषात्मना वस्तु शक्नोति प्रत्येतुम् । तथाहि । निर्विकल्पकेन सामान्यविशेषौ द्वे वस्तुनी प्रतिपद्यमानेनापि तयोर्भेदो ग्रहीतुं न शक्यते । न हि वस्तुभेदमात्रेण भेदसिद्धिः किन्तु धर्मान्तरग्रहेऽपि भेदबुद्धौ सहकारी । तेनानुगतव्यावृत्ती धर्मान्तरभूते अगृह्णतः सत्यपि सामान्यविशेषयोर्भेदे भेदबुद्धिर्नासीदुत्तरकाले च वस्त्वन्तरानुसन्धानेन ते प्रतीत्य भिन्नत्वमवसीयते। भेदे च सति विशेषणविशेष्यभावावसाय इति न निर्विकल्पकदशायां विशिष्टबुद्धिः । सविकल्पकन्तु विशेषणविशेष्यभावमनुगच्छति । गुणप्रतीतावपि निर्विकल्पकं न विशिष्टतया द्रव्यमवच्छिनत्ति । द्रव्यगुणयोर्भेदानवगमात् । अन्वयव्यतिरेकाभ्यां गुणजात्योर्द्रव्याद्भेदोऽवसीयते । नच निर्विकल्पकेऽन्वयव्यतिरेकानुसन्धानमस्तीति न तेन भेदग्रहणम् । अगृहीतभेदस्तु न विशिष्टतां ग्रहीतुमीष्टइति सविकल्पक एव विशिष्टप्रत्ययः। नामकल्पनायामपि शब्दवाच्यतायाः स्मर्यमाणाया एव विषयत्वं कर्मकल्पनाप्येवमेव व्याख्येया । प्रत्ययान्तरोपस्थिते चापि वि-

शेषणे विशिष्टप्रत्ययो भवत्येव । आत्मनः प्रमातृत्वान्निर्विकल्पकपृष्ठभाविनश्च सविकल्पकस्य गृहीतग्राहित्वेऽपि धारावाहिकन्यायेन प्रामाण्यं वेदितव्यं, विशेषणविशेष्यभावातिरेकेणागृहीतग्राहकताऽपि सम्भवत्येव सविकल्पकस्याबाह्यवस्तुविषयत्वञ्च जातिनिर्णये निर्णीतम् । नचेदमनिन्द्रियजं ज्ञानम् । इन्द्रियाधीनवृत्तित्वात् । अपरोक्षावभासो ह्ययं सविकल्पकप्रत्ययः । तादृशो नेन्द्रियव्यापारमन्तरेणास्ति ।

सम्प्रति मातरि मितौ च प्रत्यक्षं व्याख्यातुमाह ।

सर्वविज्ञानहेतूत्था मितौ मातरि च प्रमा ।
साक्षात् कर्तृत्वसामान्यात् प्रत्यक्षत्वेन सम्मता ॥

यावती काचिद्ग्रहणस्मरणरूपा प्रतीतिस्तत्र साक्षादात्मा प्रतिभाति । नह्यात्मन्यनवभासमाने विषया भासन्ते । सर्वा हि प्रतीतिरेवमुपजायतेऽहं जानामीति । न पुनर्जानातीति काचिद्बुद्धिरस्ति । तथाहि स्वपरवेद्ययोरनतिशयः स्यात् । नच प्रमान्तरविषयत्वेन नियमः सम्भवति । एकप्रतीतिविषयत्वे तु युक्त एव सहोपलम्भनियमः । तस्मात् सर्वैरेव ज्ञानहेतुभिरात्मनि साक्षात्कारवती धीरुपजन्यते नन्वेवं तर्हि सर्वं प्रत्यक्षं प्रसक्तम् ? यदि मात्रभिप्रायम्। इष्टमेव । प्रमेयाभिप्रायमिति चेत् । न । सर्वत्र प्रमेयस्यापरोक्षत्वनियमाभावात् । स्मृतिष्वनुमानान्तरेषु च न प्रमेयमपरोक्षम् । तेन प्रमेयापेक्षया प्रमाणान्तरव्यपदेश इति मन्तव्यम् । सर्वाश्च प्रतीतयः स्वयं प्रत्यक्षाः प्रकाशन्ते तासाञ्च युक्तमेव स्वात्मनि प्रत्यक्षत्वं मानत्वञ्च । मेयमातृप्रमाणानान्त्वेष प्रतीतिविशेषः । मेये मातरि च व्यतिरिक्ता प्रतीतिः साक्षात्कारवती मितौ त्वव्यतिरिक्ता । इदमहं स्मरामि गृह्णामीति त्रितयमेवात्र-

भासते। मेयमातृभयरूपा सम्विदेका। न तस्याः संविदन्तरं चकास्ति। नच सा नावभाति? तदनवभासे सर्वानवभासप्रसङ्गात्। किञ्चाप्रकाशस्वभावानि मेयानि माता च प्रकाशमपेक्षन्ताम्। प्रकाशस्तु प्रकाशात्मकत्वान्नान्यमपेक्षते। जाग्रतो हि मेयानि माता च प्रकाशन्ते। सुषुप्तस्य च न द्वयमपि प्रकाशते। नच तदानीं तन्नास्त्येव? प्रबोधे सति प्रत्यभिज्ञानात्। तत्र प्रकाशात्मकत्वे सुषुप्तिदशायामपि द्वयं प्रकाशेत। तस्मादप्रकाशात्मकमेतद् द्वयमित्यङ्गीक्रियते। प्रकाशस्य स्वप्रकाशमानस्य सत्त्वैव नाभ्युपेयते। तस्मादप्रकाशक एव मेयमातृप्रकाशः। किञ्च स्वत एव यदुपपद्यते न तत्र परापेक्षा युक्ता। मेयानां मातुश्च स्वतः प्रकाशो नोपपद्यतइति युक्ता तयोः परापेक्षा। मितौच काचिदनुपपत्तिर्नास्तीति स्वयम्प्रकाशैव मितिः।

तत्राहुः। स्वयम्प्रकाशा चेन्मितिरभ्युपेयते तदा निराकारस्य प्रकाशायोगादवश्यमाकारोऽभ्युपगमनीय इति कश्चायमाकारो ऽवसीयते। तेन प्रकाश एव तदाकार इति युक्तम्। किञ्च निराकारत्वे प्रकाशस्य प्रतिकर्म व्यवस्था नोपपद्यते नहि तस्य सर्वार्थेषु कश्चिद्विशेषः। अर्थाकारत्वे च यदाकारोऽसौ तस्येति घटते प्रतिविषयं व्यवस्था। तदाहुः। "नहि वित्तिसत्तैव तद्वेदना युक्ता, तस्याः सर्वत्राविशेषात्, तां तु सारूप्यमाविशत्स्वरूपतां घटयेत्" अतएव च सारूप्यमेव प्रमाणमित्युक्तम्। व्यवस्थापकतया हि प्रमाणत्वम्। सारूप्यञ्च व्यवस्थाहेतुः। न चक्षुरादिकं? तस्यानेकार्थसाधारणत्वात्। किञ्च वित्तिवेद्ययोः सहोपलम्भो नियतमुपलभ्यते न कदाचिदपि वित्तिमन्तरेण वेद्यस्योपलब्धिः नापि वित्तेर्वेद्यरहि-

तायाः। ये च परस्परव्यतिभिन्ना भावास्तेषां न सहोपलम्भो नियतः। नहि पटस्य घटस्य वा नियमेन सहोपलम्भस्तेन भेदादनियमव्यापान्नियमो व्यावर्तमानो ऽभेदएवावतिष्ठमानो ऽभेदं साधयति। तदुक्तं "सहोपलम्भनियमादभेदो नीलतद्धियोरि"ति। एतेनैव न्यायेनाहङ्कारास्पदीभूतस्याप्यंशस्य वित्तेरभेदो युक्तः। कथं तर्हि ग्राह्यग्राहकगृहीतयः परस्परविभिन्नाः प्रतिभासन्तइति। अत्राहुः।

भेदश्च भ्रान्तविज्ञानैर्दृश्येतेन्दोरिव द्वयम्।

तथाचापरमुक्तं।

"परिच्छेदो ऽन्तराऽन्यो ऽयं भागो बहिरवस्थितः।
ज्ञानस्याभेदिनो भेदप्रतिभासो ह्युपप्लव॥

इति। भेदभ्रान्तौ चानादिभेदवासनैव निमित्तम्। एतच्च विचारणीयं। सेयमाकारविशेषयोगिनी प्रतीतिः। किं बाह्यादर्थादुपजायते, किंवा समनन्तरप्रत्ययादिति। तदुक्तं।

"अथ बुद्धिस्तथाकारा यार्थाकारविशेषणा।
सा बाह्यादन्यतो वेति विचारमिदमर्हति॥

अत्र मन्यन्ते। समनन्तरप्रत्ययमात्राद्याकारविशेषो न घटते देशकालप्रतिनियमायोगात्। घटज्ञानानन्तरमपि हि पटज्ञानं जायते।

यदि घटज्ञानमात्रमेव पटज्ञानोत्पत्तौ हेतुस्तर्हि यदा यत्र पटो नास्ति तत्र तदापि पटज्ञानं स्यात्। नचैवम्। अतो ऽस्ति समनन्तरप्रत्ययादप्यधिको ऽर्थो ज्ञानाकारोत्पत्तिहेतुः। किञ्च यथा वीचिकाजलज्ञाने जलार्थिनः प्रवृत्तस्यार्थक्रिया न सम्भवति तथा सम्यग्जलज्ञानादपि स्यात्। न ह्यर्थशून्यत्वाविशेषे सम्यग्जलज्ञानमिदमिदं नेति विभागः परिकल्पते। तस्मात्

बाह्यो ऽप्यर्थो ऽस्तीति स्वीकर्तुमुचितम्। तदप्यपरे आकाशभ्रान्तमिदमिति मन्यन्ते। तथाहि न तावत्क्वचिदर्थस्याकारविशेषोपधायकत्वं साक्षादवगतम्। कल्पनीयन्तु तत्। तच्च दृष्टे समनन्तरप्रत्ययएव वरं कल्पनीयम्। कार्यभूतेनान्तरवैलक्षण्ये समनन्तरप्रत्ययस्यैव वैलक्षण्यं हेतुरस्तु। तेन किञ्चिदेव ज्ञानं कस्यचिदेव कुत्रचिदेव कदाचिदेव हेतुरिति प्रतिनियमसिद्धिरिति। बाह्यार्थशून्यविज्ञानवादी चार्थक्रियामपि ज्ञानरूपामेव मन्यते। तेन किञ्चिदेव ज्ञानमर्थक्रियाकारिसमर्थं किञ्चिच्च नेत्ययमपि नियमः सिद्धः। अवश्यं चार्थमन्तरेणापि विशेष्याकारज्ञानोत्पत्तौ समनन्तरप्रत्ययस्य सामर्थ्यमास्थेयम्। अन्यथा स्वप्नादिष्वाकारप्रतिभासप्रतिनियमो न स्यात्। नच देशान्तरकालान्तरवर्तिनामेव तत्र सामर्थ्यम्? अविद्यमानस्य सामर्थ्यायोगात्। अनुभवजनितात्संस्कारात्तत्राकारप्रतिनियम इति। अस्तु तावदेवम्। यो ऽपि स्वप्नावनुभवः सो ऽपि तर्ह्यत्रानुभवान्तरजनितात्संस्कारादेवास्त्वित्यनया दिशा किमर्थाभ्युपगमेन। संस्कारो ऽपि च पूर्वकज्ञानविज्ञानपरम्परा हि कार्यकारणभावेन प्रवर्तते। तेनार्थभवाकाराद्यन्नान्तरमुत्पद्यते तद्विशिष्टस्वभावं ततो ऽपि यदपरं तद्विशिष्टस्वभावमिति विज्ञानस्वभावविशेष एव वासनेत्यादिभिः शब्दैर्व्यपदिश्यते। अर्थक्रियाकारविज्ञानविसम्वादयोग्यश्च ज्ञानं प्रमाणमितरच्च नेति प्रमाणाप्रमाणभेदो ऽप्युपपन्नः। तस्माद्विज्ञानान्येवाकारविशेषयोगीनि हेतुफलभावेनानादिसन्तानवाहीनि सन्ति। तदतिरेकी न तु कश्चिदर्थो नामेति।

अत्रोच्यते। यत्तावदुक्तं ज्ञानस्य साकारत्वसिद्धये नार्थसारूप्यमन्तरेण प्रतिकर्मव्यवस्थासिद्धिरिति। तदयुक्तं।

न हि कस्य चिदप्यर्थस्य स्वरूपमनुभूतं साकारविज्ञानवादिना। ज्ञानाकारपर्यवसितत्वात्सर्वविज्ञानानां। यस्यच स्वरूपमेव नावसितं न तेनेह कस्य चित्सारूप्यकल्पनम्। नचापि ज्ञानाकारोदयवशेनार्थो व्यवस्थाप्यमानः सरूपतया परिकल्पयितुं शक्यते। असरूपादपि कार्यभूताकारोदयोपपत्तेः। तथाहि लाक्षारक्तबीजाङ्कुरावस्थायां विशेषानवगमे ऽपि रक्तकार्यस्योत्पत्तिर्दृश्यते। नहि यदाकारं ज्ञानमुत्पद्यते तदाकारोऽर्थस्तस्योत्पत्तौ निमित्तमिति किञ्चित्प्रमाणं प्रक्रमते। अपिच स्थूलाकारं ज्ञानमुत्पद्यते परमाण्वात्मकश्चार्थः। साधारणाकारा च बुद्धिरसाधारणश्च विषय इति सारूप्यं न भवति। किञ्च सारूप्यमात्रेण वेद्यत्वे वेद्यवेदकव्यवस्था नोपपद्यते। एकार्थविषयाणां सन्तसन्तरज्ञानानां वेद्यत्वापत्तेः। अथोत्पादकं सरूपञ्च वेद्यम्। तथापि धारावाहिकज्ञानेषु पूर्वपूर्वमुत्तरस्य वेद्यं स्यात्। अथाकारविशेषाधायकं वेद्यम्। एवमपि पूर्वपूर्वविज्ञानमात्रं वेद्यमापद्यते। पूर्वकमेव हि ज्ञानमाकारविशेषोदयेऽपि कारणमुक्तम्। अपिच निराकारत्वे संविदां प्रतिकर्मव्यवस्था नानुपपन्ना। अर्थप्रतिबद्धव्यवहारविशेषप्रवृत्त्यनुगुणो हि पुरुषस्य धर्मविशेषः संवेदनम्। तच्च स्वयंप्रकाशं यदर्थप्रतिबद्धव्यवहारानुगुणतया प्रकाशते तत्तदर्थसंवेदनमिति व्यवस्थाप्यते। सहोपलम्भनियमश्च भेदे ऽप्युपपद्यते। यैव सा नीलधीः सैव हि नीलस्योपलम्भः। कथञ्च नीलं नीलमन्तरेणोपलभ्यते। किञ्चेदमनिष्टमापद्यते। उपलम्भमन्तरेणाप्युपलभ्येतेति। सर्वस्यैव हि वस्तुन उपलम्भमन्तरेणैवोपलम्भ इष्यते। नह्युपलम्भन एवोपलम्भः। किञ्चोपलम्भोपलभ्ययोर्भेदो ऽसहोपलम्भानियमव्याप्त इति नियमस्ततो नि-

वर्तमानोऽभेदएवावतिष्ठमानस्तेन व्याप्तस्तं गमयेत्। उपलम्भोपलभ्ययोस्तु भेदे ऽपि नियम उपपद्यते। उपलभ्यमन्तरेणोपलम्भासम्भवात्। तेन च तयोर्भेदे ऽपि सहोपलम्भनियमो दृष्टो नाभेदं साधयितुं क्षमः। किञ्च वित्तिवेद्ययोर्भेदे ऽपि सहोपलम्भनियमो ऽस्तीति तस्यापि वित्तिरूपतापत्तेर्वित्तेरेकत्वं हीयते ततश्च भेदएव सहोपलम्भनियम इत्यापद्येत। किञ्च यो वित्तेर्वेद्यस्याभेदमाह सो ऽपि तावद्भेदप्रतिभासं नापजानीते तथाच कथमनुमानमुत्पत्स्यते। नहि प्रतीतिविपर्ययेणानुमानस्यात्मलाभो ऽस्ति। यद्यपि ज्वालादिष्वभेदानुमानं तदपि न प्रतीतिं स्वार्थाच्च्यावयति किन्तु सैवेयं ज्वालेति स्मरणग्रहणरूपे द्वे प्रतीती व्यवस्थितविषये दर्शयति। इह तु भेदप्रतीतिः प्रत्येतव्यादेव व्यावर्तनीयेति न तद्विरोधेनानुमानमुत्पद्यते। भेदश्च भ्रान्तविज्ञानैर्दृश्येतेन्दाविवाद्वये इतिचानुपपन्नं। नहि तत्राभेदो दृश्यते किन्त्वेकस्मिन्नेव चन्द्रमसि नेत्रवृत्तिभेदेन द्वे प्रतीती जायेते। तथेन्द्रियवृत्तिभेदाद्भिन्ने ऽपि चन्द्रमस्यर्थद्वयविषयप्रतिपत्तिद्वयं व्यवहारविमूढाः प्रवर्तयन्तीति तत्र तत्रोक्तम्। यच्चेदमुक्तं। स्वयंप्रकाशायाः संविदोऽभ्युपगताया नीलाद्याकारो ऽस्त्विति। तदप्ययुक्तम्। संविद्भिन्नस्यार्थस्य भासमानस्याकारस्य संविद्रपाश्रयणानुपपत्तेः। निराकारा संवित्कथं प्रकाशेतेति चेत्। निराकारेति किमुक्तम्? निःस्वभावेति चेत्। तन्नास्ति। संवित्स्वभावाभ्युपगमात्। अथ न नीलाद्याकारेति। नेयं राज्ञ आज्ञा नीलाद्याकारेणैव प्रकाशितव्यं नान्येनेति। प्रकाशे तु सति यद्यथाभूतं प्रकाशते तत्तथाभूतमित्यभ्युपगमो युक्तः। यच्चोक्तं स्वप्ने ज्ञानस्यैवाकारो ऽवभासतइति। तदप्ययुक्तं। तत्रापि हि बहिरवभासत्वात्संविदः। न च सा बहिर्विषया न

सम्भवति । पूर्वानुभवाहितभावनोद्बोधवशेन पूर्वानुभूतवस्तु विषयत्वात् । कथं तर्हि पूर्वानुभूतत्वं नानुसन्धीयते । कथं वा ऽनुभूयमानत्वाध्यवसानमिति । उच्यते । संस्कारोद्बोधनिमित्तेयं स्मृतिरिष्यते । संस्कारोद्बोधश्चादृष्टनिबन्धनः । तस्य सुखदुःखहेतुत्वात् । स्वप्ने ऽपि च सुखदुःखानुभवात् । तेन तावसेवांशे तददृष्टं संस्कारमुद्बोधयति यावत्येव सुखं दुःखं चोपपद्यते । नचानुभूतांशस्मरणे सुखदुःखोदय इति न तत्र संस्कारोद्बोधो नापि स्मृतिः । अत एव गृहीतसाधारणरूपावभासमात्रमवशिष्यतइत्यनुभवाध्यवसायो ऽपि समर्थितः । यत्पुनराहुः । जडस्य प्रकाशायोगात्प्रकाशात्मक एवाकार इति । तदपि न चतुरस्रं । जड इति किमुक्तम् ? अप्रकाशात्मक इति । अप्रकाशात्मकस्यैव प्रकाशव्यतिरिक्तस्य प्रकाश इति प्रकाशादेव सिद्धं । किञ्च चित्रपटज्ञाने नानाभूतानामाकाराणामेकप्रकाशात्मकत्वविरोधादसद्भूतत्वमेवाभ्युपगतं । चित्रावभासेष्वर्थेषु यद्येकत्वं न युज्यते । सैव तावत्कथं बुद्धिरेका चित्रा ऽवभासिनीति चोदयित्वोक्तम् ।

इदं वस्तुबलायातं यद्वदन्ति विपश्चितः ।
यथायथाऽर्थाश्चिन्त्यन्ते विविच्यन्ते तथातथा ॥

यथा यथा ऽऽकारा विचार्यन्ते तथातथा ऽघटमाना विविच्यन्ते शून्या भवन्ति असद्भवन्तीत्यर्थः एवञ्च ते तावदाकारा असद्भताः प्रकाशात्मनो न भवन्ति कथं प्रकाशन्ते । तथा ग्राह्यग्राहकसंवित्तीनां भेदोऽत्यन्तासद्रूपः प्रकाशाननुप्रवेशी कथं प्रकाशते । प्रमेयविमर्शोत्थास्तु बाह्यार्थापह्नव प्रकारा जातिनीर्णयएव प्रायशो निराकृता इति नेह प्रस्तूयन्ते । ये पुनर्जाग्रद्घटादिप्रत्ययानां स्वप्नादिप्रत्ययदृष्टान्तेन प्रत्ययत्वा-

दित्यनेन हेतुना बाह्यार्थशून्यत्वं प्रतिपादयन्ति तेषां बाह्यविषय-सकलप्रतीतिविरुद्धः पक्षः । दृष्टान्तीकृतस्यापि स्वप्नादिप्रत्यय-स्य बाह्यग्राह्यसमर्थनेन हेतोर्विरुद्धत्वं दोषो दृष्टान्तस्य च साध्य-विकलत्वमुद्भावनीयं । तस्मात्स्वयम्प्रकाशत्वे संविदो न बाह्य-ग्राह्यापन्हव इति स्थितं । यत्त्वाहुः ।

अङ्गुल्यग्रं यथात्मानं नात्मना स्प्रष्टुमर्हति ।
स्वांशेन ज्ञानमप्येवं नात्मानं ज्ञातुमर्हति ॥

तत्र यदि कर्मकर्तृत्वानुपपत्तिरुच्यते ततो न किञ्चिदवहीयते । नहि वयं कर्मकर्तृभावमभ्युपेमः । अथान्यप्रकाशरूप-तया स्वयंप्रकाशता निवार्यते ततः प्रतीतिविरोधः । किञ्च प्रतीतिबलेनैव यैरेकस्यात्मनः कर्तृकर्मभावो ऽभ्युपगम्यते ते कथमिव संविदो ऽपह्नवीरन् । अपि च ज्ञानमनु-मेयमिष्यते । तदनुमाने च नार्थसत्तामात्रं लिङ्गं तस्य तदविनाभावनियमाभावात् । अथार्थज्ञानमित्युच्यते । त-दपि नोत्पत्तिमात्रेण लिङ्गम् । अनवभासमाने उत्पन्नानुत्पन्नयो-रविशेषात् । न ह्यनवभासमानमेव लिङ्गं लिङ्गिनमनुमापयति । न चार्थज्ञानस्य ज्ञानान्तराधीनमवभासनं । ज्ञानान्तरानवग-मात् । तस्मादर्थज्ञानं स्वयम्प्रकाशमेवाभ्युपगन्तव्यम् । एतेन ये सुखादिवन्मानसप्रत्यक्षं ज्ञानान्तरमेव ज्ञानसद्भावे प्रमाणमा-हुस्ते निराकृताः । स्वयम्प्रकाशत्वेनाभ्युपपत्तौ पराधीनकल्प-ना ऽनुपपन्नेत्युक्तमेव । किन्तर्ह्यनुमीयते ज्ञानं । ननु न तत्सं-विदः स्वयम्प्रकाशाया भिन्नमुपलभ्यते । सत्यमत एवानुमीयते । ननु किं तदिति । न तद्भिन्नः । संविदुत्पत्तिकारणमात्ममनःस-न्निकर्षाख्यं तदित्यवगम्य परितुष्यतामायुष्मता ।

प्रमाणफलभावं विविनक्ति ।

मानत्वे संविदो बाह्यं हानादानादिकं फलं ।
ज्ञानस्य तु फलं सैव व्यवहारोपयोगिनी ॥

यदि प्रमितिः प्रमाणमिति भावसाधनं मानमाश्रीयते तदा संविदेवमानं स्वं । तस्याश्च व्यवहारानुगुणास्वभावत्वाद्धानोपादानोपेक्षाः फलं । प्रमीयतेऽनेनेति करणसाधने प्रमाणशब्दे आत्ममनःसन्निकर्षात्मनो ज्ञानस्य प्रमाणत्वे तद्फलभाविनी फलसंविदेव बाह्यव्यवहारोपयोगिनी सती ।

आपेक्षिकं च करणं मन इन्द्रियमेव वा ।
तदर्थसन्निकर्षो वा मानं चेत्पूर्वकं फलम् ॥

यदा च साधकतमस्य करणत्वादतिशयस्य च बाह्यापेक्षत्वादोलाकाद्यपेक्षमिन्द्रियमेव प्रमाणं तस्य वा विषयसन्निकर्षः तस्य वा मनः सन्निकर्षः प्रमाणं तदापि संविदेव फलं । तदर्थप्रवृत्तत्वात्साधनानां ये पुनः प्रमाणादभिन्नं फलमाहुस्ते च कार्यकारणयोरैक्याभावादेवोपेक्षणीयाः ।

इति श्रीमहामहोपाध्यायश्रीशालिकनाथमिश्रविरचिते
प्रमाणपारायणे प्रथमः परिच्छेदः समाप्तः ।

अथानुमानपरिच्छेदः ।

ज्ञानसम्बन्धनियमस्यैकदेशस्य दर्शनात् ।
एकदेशान्तरे बुद्धिरनुमानमबाधिते ॥ १ ॥

ज्ञातः सम्बन्धनियमो यस्य तस्यैकदेशस्य दर्शनादेकदेशान्तरे बुद्धिः साऽनुमानमित्यर्थः । कः पुनरयं सम्बन्धः ?

अविनाभावस्तादात्म्यतदुत्पत्तिनिबन्धन इति केचित् । द्विविधो ह्यर्थः । स्वविषयबोधजनकश्चातज्जनकश्च । तत्राद्ये प्र-

यक्षमेव प्रमाणम् इतरस्य तु सत्तानिश्चयो दुर्लभ एव। यज्जनितं हि यज्ज्ञानं तत्तेन विना सत्तामलभमानं तस्य सत्तां निश्चाययितुमलं। यस्य तु न स्वजनितं ज्ञानमस्ति तस्य सत्ता कुतो निश्चीयते न चार्थान्तरजनितं ज्ञानं तत्सत्तां निश्चाययितुमलमविसंवादनियमे कारणाभावात्। तस्य तु तदविनाभावित्वे युक्तो ऽविसंवादनियमः। पारम्पर्येणापि हि यद्यत् प्रतिबद्धं तत्तदविसंवादकं भवत्येव। धूमादिजन्यं हि पावकादिज्ञानं धूमाद्यविनाभावि। धूमादिकमपि पावकाद्यविनाभावीति तदविसंवादनियमोपपत्तिः। अविनाभावनियमश्च नाप्रतिबद्धस्योपपद्यते। प्रतिबद्धश्च तादात्म्येन तत्कार्यतया वा सम्भवेन्नान्यथा। तदुक्तम्।

कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्।
अविनाभावनियमोऽदर्शनान्न न दर्शनात्॥

सपक्षे दर्शनमात्रान्नाविनाभावनियमो नापि विपक्षेऽदर्शनमात्रादित्यर्थः। कार्यं हि कारणायत्तात्मलाभं न कारणेन विना भवितुमलमित्यविनाभावनियमकारणम्। यदात्मा च यो भावस्तद्विना सकथं भवेदिति तादात्म्येऽपि युक्त एवाविनाभावनियमः। कार्यकारणभावावगमस्तु प्रत्यक्षानुपलम्भदर्शने सम्भवति। सत्यग्नौ धूम उपलभ्यते ऽसत्यग्नौ सत्स्वपि तदितरेषु कारणेषु नोपलभ्यतइत्येतावदेव च कार्यस्य कार्यत्वं यत्तस्मिन्सत्येव भावो ऽसति च तस्मिन्नभाव इति। तन्मात्रानुबन्धसिद्ध्या च तादात्म्यसिद्धिः। तन्मात्रानुबन्धसिद्धिरपि विपक्षे बाधकप्रमाणप्रवृत्त्यायत्ता। बाधकं च प्रमाणमनुपलब्धिरूपमेव। सर्वप्रतिषेधानामनुपलब्धिनिबन्धनत्वात्। तदाह। यावान् कश्चित्प्रतिषेधः स सर्वोऽनुपलब्धित इति।

तदिदमनुपपन्नम् । तथाहि । अग्नौ सति धूम इति तावत्प्रत्यक्षेणावगम्यताम् असति त्वग्नौ धूमो नास्तीति किं प्रमाणम् । नन्वनुपलब्धिलिङ्गकमनुमानमेवेति । अनुपलब्धावपि तर्ह्यभावः पर्येषितव्यः । स तावन्न तादात्म्येन तन्मात्रानुबन्धेन हि तादात्म्यं सिध्यति । तन्मात्रानुबन्धसिद्धिरपि विपक्षे बाधकप्रमाणप्रवृत्तेः । अनुपलब्धिरेव च बाधकं प्रमाणम् । सर्वप्रतिषेधानामनुपलब्धिसाधनत्वात् बाधकप्रमाणभूतानुपलब्धावपि चोक्तेन न्यायेनानुपलब्ध्यन्तरापेक्षायामनवस्थाप्रसङ्गात् । नापि तदुत्पत्त्या ऽविनाभावसिद्धिः । कार्यकारणभावविपक्षानुपलब्धिसापेक्षत्वेना ऽनवस्थाप्रसङ्गादेव । तदेवं तदुत्पत्तेरविनाभावावसायो दुर्लभः तादात्म्येनापि तादात्म्यस्यानुपलब्धिनिबन्धनतन्मात्रानुबन्धसिद्ध्यधीनत्वादनवस्थाप्रसङ्गादेवाविनाभावो दुरवसेयः । किञ्च यदपि यस्य कार्यं तदपि तेन विना किमिति न भवति । कारणाभावादिति चेत् । कारणाभावे कार्यं न भवतीत्येतदेव कुतः । अकारणस्य नित्यं सत्त्वमसत्त्वं वा स्यादिति कादाचित्कत्वात् कारणेन विना कार्यं न भवतीति निर्श्चीयते । तदुक्तं ।

नित्यं सत्त्वमसत्त्वं वा हेतोरन्यानपेक्षणात् ।
अपेक्षातो हि भावानां कादाचित्कत्वसम्भवः ॥

इति । अतएव च कारणान्तरादपि कार्यस्य सम्भवो निरस्तः । कारणान्तरजन्मनो हि कार्यस्य द्वयमपि कारणं न स्यात् । एकत्र भवतो ऽन्याभावे ऽपि भावात् । ततश्चाकारणत्वापत्तेः कादाचित्कत्वविरोध इति चेत् । न । अनपेक्षस्य नित्यं सत्त्वमसत्त्वमित्यस्यैव निश्चयस्य प्रमाणाभावेनानवक्लृप्तेः । कादाचित्कत्वस्य सापेक्षत्वं व्यापकमुपलब्धम् । व्यापकाभावे च

व्याप्यं न भवतीत्यनपेक्षस्य कादाचित्कत्वानुपपत्तेस्तस्य नित्यं सत्त्वमसत्त्वं वा स्यादिति निश्चीयतइति चेत् । न । व्यापकाभावे व्याप्यं नास्तीत्यस्यैव निश्चयस्यानवकल्पनात् । किञ्चातदात्मनो ऽतत्कार्यभूताच्च रसाद्रूपानुमानं न स्यात् । यदि तादात्म्य-तदुत्पत्तिभ्यामेवाविनाभावनियमः । अथोच्यते । रसस्तावत्का-र्यतया रसहेतुमनुमापयति प्रवृत्तसामर्थ्यरूपोपादानकारणसह-कारी च स रसहेतू रसं जनयति तादृशस्वहेत्वनुमानेन रसाद्रूपहे-तोः प्रवृत्तसामर्थ्यस्यानुमानम् । प्रवृत्तसामर्थ्याच्च कारणात्कार्य-भूतस्य रूपस्यानुमानमिति । तन्न । लोकस्येत्थमप्रतीतेः । रूपमेव रसाल्लोकः प्रतिपद्यते । लौकिकी च प्रतीतिः परीक्षकैरप्यनु-सरणीया । यत्र तु कारणात्कार्यानुमानं न तत्र हेतोः कार्यत्वं नापि तादात्म्यमिति नाविनाभावः स्यात् । अपिच चन्द्रोद-यात्समुद्रवृद्ध्यनुमाने कृत्तिकोदयाच्च रोहिण्यासत्त्यनुमाने नै-षापि कल्पना सम्भवति । तादात्म्ये च यदनुमानं तदपि न साधीयः । सिद्धं हि लिङ्गं साध्यं लैङ्गिकम् । न सिद्धस्य सा-ध्यस्य च तादात्म्यमुपपद्यते । परमार्थतो वृक्षत्वशिंशिपात्वयो-र्भेदो नास्तीति चेत् । न । वस्तुभूतसामान्यवादिनां भेदाभ्युप-गमात् । काल्पनिकवादिनां त्वभेदो नास्ति भेदाभेदयोर्वस्तु-विषयत्वात् । अपिच काल्पनिकमेव धर्मधर्मिविभागमाश्रित्या-नुमानानुमेयव्यवहारः तत्र कल्पनावशाद्भेद एव वृक्षशिंशिपा-त्वयोः । अथ भेदे ऽपि शिंशिपामात्रानुबन्धित्वाद्वृक्षत्वस्य शिं-शिपात्वं वृक्षत्वाविनाभावि । एवं तर्हि साधनधर्ममात्रानुबन्धि-त्वेनैवाविनाभावित्वम् । तच्चाकार्यस्यातदात्मनोऽपि यदि सम्भवति तदा तस्यापि गमकत्वमुपपन्नम् । सम्भवति चान्य-स्यापि तदितीहैव वक्ष्यामः । एतेनैव न्यायेन ये ऽपि कार्यका-

रणभावसंयोगसमवायैकार्थसमवायविरोधाख्यान् पञ्च सम्बन्धावस्येदं कारणं कार्यं सम्बन्ध्येकार्थसमवायि विरोधि चेति लौकिकमित्यनुमानकारणमाहुस्ते ऽपि निराकृताः। समुद्रवृद्ध्यादौ यथोदितसम्बन्धाभावे ऽप्यनुमानदर्शनात्। संयोगसमवायैकार्थसमवायास्तु नानुमानोत्पत्तौ कारणम्। नहि कमण्डलुना छात्रानुमानम्। नापि रूपादेः पृथिव्याद्यनुमानम्। नापि रूपाद्रसानुमानमिति। यच्च विरुद्धस्यानुमानत्वोदाहरणम्। भूतं वर्षणकर्माभूतस्य वाय्वभ्रसंयोगस्यानुमापकम्। तथाऽभूतं वर्षणकर्म भूतस्य वाय्वभ्रसंयोगस्यानुमापकमिति। तदनुपपन्नं। भावाभावयोर्ह्यत्र गम्यगमकता। नच तयोर्विरोधो ऽस्ति। नियमानुगमव्याप्तिरूपास्तु सम्बन्धा एवानुपपन्नाः। क्रियागर्भत्वात्सम्बन्धस्य। अग्न्यादीनाञ्च धूमादीन्प्रति अनुगमननियमनव्यापनक्रियाऽसम्भवात्। तस्मात्कार्यकारणभावादय एव सम्बन्धा यस्य येन नियता अव्यभिचारिणः स हेतुरिति दर्शयितुं ज्ञातसम्बन्धनियमस्येत्युच्यते। धूमस्य हि कार्यकारणसम्बन्धो नियतो ऽग्नेस्त्वनियतः। तथा रसस्य रूपेण सहैकार्थसमवायलक्षणः सम्बन्धो नियतो न रूपस्य रसेन। गन्धस्य पृथिव्या सह समवायलक्षणः सम्बन्धो नियतो न रसादीनामिति। अनया दिशा सर्वहेतुषु सम्बन्धे नियमो ऽनुसरणीयः।

किंपुनः सम्बन्धनियमावगमे प्रमाणं? न तावत्प्रत्यक्षं। सन्निहितदेशवर्तमानकालवस्तुविषयनियमात्। येन हि प्रमाणेन सर्वदेशेषु सर्वकालेषु च धूमादीनामग्न्यादिसम्बन्धो ऽवगम्यते तेन तेषां सम्बन्धनियमो ऽवगम्यते। नच प्रत्यक्षं तत्र समर्थं। कतिपयदेशकालगतसम्बन्धावगममात्रेण च नियमो नावग-

म्यते । अग्नेरपि सम्बन्धनियमप्रसङ्गात् । नाप्यनुमानेन सम्बन्धनियमावसायो ऽनवस्थाप्रसङ्गात् । शास्त्रं त्वपूर्वकार्यार्थविषयनियतप्रामाण्यमत्र शङ्कामपि नायाति । तथोपमानमपि सादृश्यमात्रविषयं नात्र प्रमाणम् । अर्थापत्तिरपि सम्बन्धनियमसापेक्षा ऽनवस्थाप्रसङ्गादेव नानुमानवत्प्रमाणम् । सम्बन्धनियमकल्पनया च विना कस्यानुपपत्तिः । धूमादीनामग्न्यादिकार्यत्वस्येति चेत् । न । वन्हिकार्यस्यापि धूमस्यान्यकार्यत्वसम्भवात् । न दृश्यते तावदन्यकार्यतेति चेत् । सत्यं । तथापि शङ्कानिराकरणमशक्यं । कारणभेदे कार्यभेदादेकस्यानेकस्माद्भवो नोपपद्यते इति चेत् । न । यद्यपि क्वचित्कारणभेदे कार्यभेदो दृश्यते तथापि न सर्वत्रैव तथेति शक्यमवधारयितुम् । अतो ऽग्निकार्यस्यापि धूमस्य देशान्तरे कालान्तरे वा कारणान्तरादपि सम्भवाशङ्कया न सम्बन्धनियमाध्यवसानं युक्तम् । शतशो ऽग्नौ धूमदर्शनं शतशश्चानग्नौ धूमादर्शनं सम्बन्धनियममन्तरेण नोपपद्यतइति यद्युच्येत । तन्न । यत्र यदा च दर्शनमदर्शनं वा तत्र तदा चैव सम्बन्धभावाभावाभ्यां तदुपपत्तेर्देशान्तरे कालान्तरे च भावाभावानिश्चयायोगादिति नार्थापत्त्या सम्बन्धनियमसिद्धिः ।

कश्चित्तु मानसं प्रत्यक्षमत्र प्रमाणमित्याह । तदनुपपन्नं । मनश्चेद्बहिर्विषये कारणान्तरानिरपेक्षं प्रवर्तेत तदा सर्वः सर्वदर्शी स्यादविशेषात् । अथ भूयोदर्शनसंस्कारसचिवं बहिरपि प्रवर्तत इत्युच्यते । तन्न । संस्कारस्य स्मृतिमात्रहेतुत्वादधिकार्थपरिच्छेदासम्भवात् । किञ्च यद्यपि सर्वप्रमाणासाधारणं मनस्तथापि न सर्वं मानसं प्रत्यक्षं किन्त्वसाधारणकारणानुप्रवेशेन प्रमाणान्तरव्यवहारः एवं चेदसाधारणभूयोदर्शनसंस्का-

रानुभवेऽशात्प्रमाणान्तरमापद्येत । अपि च भूयोदर्शनापेक्षाविशेषादग्नावपि सम्बन्धनियमज्ञानं किं न स्यात् । तथाभूतमपि तद्व्यभिचरति ततो नानुमानमिति चेत् । धूमो ऽपि तर्हि न व्यभिचरिष्यतीति किं प्रमाणम् अपि चासत्यां गतौ मानसं प्रत्यक्षमित्याश्रीयते अस्ति चान्या गतिरिति वक्ष्यामः ।

अत्रोच्यते । वह्निधूमादीनां तावत्संयोगादिसम्बन्धः प्रत्यक्षादिभिरवसीयते । तत्रापि संयोगो विशेषणत्वेन गुणादीनां द्रव्यपरतन्त्रस्वभावत्वात् । विशेष्यतया च स्वतन्त्रभूतं द्रव्यं प्रकाशते । देशकालावपि विशेषणत्वेनैवावभासतः । सन्निहितदेशवर्तमानकालता हीदन्ता । सा च विशेषणमेव । एवञ्च देशकालाभ्यां संयोगादिसम्बन्धेन च विशिष्टौ द्रव्यभूतौ वह्निधूमाववगम्येते न पुनर्देशकालाभ्यां सम्बन्धस्य विशिष्टस्याव गतिः । तथाहि । संयुक्ताविमाविति प्रतियन्ति न पुनरयमनयोः संयोग इति देशकालानवच्छिन्नः प्रथममग्निधूमयोः संयोगलक्षणः सम्बन्धो द्वयोरवगम्यते । तत्रापि कदाचिदग्नेर्धूमासंयुक्तस्याप्यवगमात् संयोगासंयोगयोश्च परस्परविरोधात्कालभेदमाश्रित्याविरोधः कल्प्यते । तेनाग्नेर्धूमसम्बन्धस्य कालावच्छेदोऽनुप्रवेश्यते । धूमस्य तु कदाचिदप्यग्निसंयोगरहितस्यावगमो नास्ति । यद्यपि च घटादिवर्त्ती धूमो विनाप्यग्निसंयोगं वर्तते तथापि यादृशस्यानवच्छिन्नोदयस्य गगनतलवर्तिनो लिङ्गत्वमिष्यते तादृशस्य नास्त्येवाग्निसंयोगविरहिणो दर्शनमिति तस्याग्निसंयोगो देशकालानवच्छिन्नो धूममात्रानुबन्धी नियत इति निश्चीयते । तथा च सति धूमसत्त्वेव देशान्तरे कालान्तरे वा प्रमाणमपेक्षते नतु तस्यां सत्यामग्निसंयोगः । तस्य धूममात्रानुबन्धित्वेनावगमात् । नन्वग्नावसंयुक्तस्यापि दर्शना-

दृष्टो ऽप्यग्न्यसंयोगो धूममपि प्रत्याशङ्कामर्हति । उच्यते । वह्नेरार्द्रेन्धनोपाधिको धूमसम्बन्धयोगस्तदभावे भवत्येव वह्नेर्धूमसंयोगाभावः । धूमस्य तु वह्निसंयोगो नौपाधिकः । कथमसौ न भविष्यतीत्याशङ्क्यते । कथमनौपाधिकावगमः । प्रयत्नेनाप्यन्विष्यमाणे औपाधिकत्वानवगमात् । तच्चैतद्भूयोदर्शनायत्तमिति मन्वाना आचार्या भूयोदर्शनमदृष्टवन्तः । नन्वेवं सम्बन्धनियमावसायसमय एव यावद्धूमादिभावितया वन्ह्यादिसम्बन्धस्यावगतत्वाद् धूमादिसत्तानिश्चयादधिकं निश्चेतव्यं नावशिष्यते इत्यनुमानमप्रमाणं स्यात् । सत्यं । स्याद्यद्यनधिगतार्थगन्तृ प्रमाणमिति प्रमाणलक्षणं स्यात् । अनुभूतिस्तु प्रमाणमित्युक्तम् । धूमाच्चाग्निज्ञानमनुभवाकारप्रवृत्तं धारावाहिकवत् नचात्र स्मृतिप्रमोषकल्पना प्रत्युत्पन्नकारणसम्भवात् । अनुभवकारणासम्भवेन शुक्तिकारजतादिषु स्मृतिप्रमोषः प्रतीत्यनारूढो ऽप्याश्रितः । इहतु सम्बन्धनियमस्मरणमेकदेशदर्शनं ना ऽनुभवकारणमस्तीति यथाप्रतीत्यनुभूतिरूपतैवाश्रयितुमुचितेति युक्तमेवानुमानस्य प्रामाण्यं ।

केचित्तु देशकालातिरेकेण प्रत्यभिज्ञानरूपमनुमानमाहुः । तदयुक्तं । लिङ्गस्य हि देशकालावतिरिच्येते अशेषदेशकालवर्तिनस्तु लिङ्गस्य लैङ्गिकसम्बन्धः सम्बन्धनियमावधारणसमय एवावधृतो ऽन्यथा सम्बन्धनियम एवानवगतः स्यात् । एतेन

"विशेषे ऽनुगमाभावःसामान्ये सिद्धसाध्यता"

इति प्रत्युक्तं । धूमवता ह्युपलक्षितानां देशकालविशेषाणां सम्बन्धनियमावधारणात् । यो यो धूमवान्स सो ऽग्निमानिति ।

यः कश्चिद्येन यस्येह सम्बन्धो निरुपाधिकः ।
प्रत्यक्षादिप्रमासिद्धः स तस्य गमको मतः ॥

इति सङ्ग्रहश्लोकः । ज्ञातसम्बन्धनियमत्वं चैकदेशस्य स्मरणेनोपकारकं । लैङ्गिकैकदेशविषयं सम्बन्धनियमं स्मरतः पुरुषस्य नियतसम्बन्धैकदेशदर्शनाख्या बुद्धिस्तदनुमानम् । एकदेशश्चाश्रित उच्यते । एकदेशान्तरइत्यत्रैकदेशशब्द आश्रितवचन एव । न चाश्रितस्याश्रयमन्तरेण सम्भवो ऽस्तीति आश्रयाक्षेपे नैकदेशाभ्यां भिन्नस्याश्रयस्याक्षेपः। एकाक्षेपेणैवोपपत्तेः। अपि चान्तरशब्दो ऽपि समानाश्रय एव समर्थितो भवति। अतश्चैकाश्रयाश्रितयोरेव गम्यगमकतोक्ता । उदाहरणं तु महानसादौ ज्ञाताग्निसंयोगनियमस्य धूमस्य पर्वतोपरिवर्तिनो दर्शनात्पर्वतनितम्बगते ऽग्नौ ज्ञानं । ननु नितम्बोपरिदेशयोर्भेदान्नैकाश्रयाश्रितत्वमग्निधूमयोरिति कथमनुमानं । तस्माद्धूमाश्रितो ऽग्निसंयोगः साध्यते । तदाश्रितं च धूमत्वं हेतुरिति युक्तं । उच्यते । न तावदेवं सर्वत्र लोकस्य प्रतीतिः किन्तु पर्वतादिगतमप्यग्निं लोको ऽनुमिनोति । न चाश्रयभेद एकत्वात्पर्वतावयविनस्तदाश्रितत्वादग्निधूमयोः । नितम्बोपरिभागौ तु तस्यैवावयवाविति न कश्चिद्दोषः । अत्र च ज्ञातसम्बन्धनियमस्येत्यनेन ज्ञानशब्देनासाधारणस्याहेतुत्वमुक्तम् । यथा रसवती गन्धवत्त्वादिति । अस्येव हि गन्धाख्यस्यैकदेशस्य रसाख्येनैकदेशेनैकार्थसमवायलक्षणः सम्बन्धो नियतः सतु सम्बन्धनियमो न प्रतीतपूर्वः । पृथिवीव्यतिरेकेणान्यत्र गन्धस्यावर्तमानत्वात् । पृथिव्याश्च जिज्ञासितधर्मत्वात् । स चायमसाधारणः संशयहेतुरिति चेत् । तदयुक्तं। यो हि येन सम्बन्धो दृष्टः स तमुपकल्पयितुमलं यश्चोभयधर्मसम्बन्धी प्रतीतः स उभयोः, स्मृतिं जनयन्नेकस्योभयात्मकत्वविरोधात्संदेहमापादयति । यस्य तु केनचिदपि सह सम्बन्धो नावधारितः क्वचिदपि स्मृ-

र्ति जनयितुमक्षम इति कथं संशयं प्रब्रुवीत तस्माद्धर्मिस्वरूप-
वदसाधारणो ऽपि धर्मो न संशयहेतुः। सम्बन्धग्रहणेन च बाध-
कस्य हेत्वाभासत्वमुक्तं। यथा नित्यः शब्दः कृतकत्वादिति।
कृतकत्वस्य हि नित्यत्वेन सह सम्बन्ध एव नास्ति किन्त्वनि-
त्यत्वेनैव सहायं प्रतीतसम्बन्धनियमः स्वसामर्थ्येनानित्यत्वमुप-
स्थापयन्नित्यत्वं बाधते इति सिषाधयिषितधर्मबाधाद्बाधको हे-
त्वाभासः। नियमग्रहणेन च साधारणस्य निरासः। यथा
नित्यः शब्दः प्रमेयत्वादिति प्रमेयत्वस्य नित्यत्वेन सम्बन्धो ऽस्ति
ज्ञातश्च किं त्वनियतो नित्येष्वपि प्रमेयत्वदर्शनात्। संशयहेतु-
श्चायं नित्यत्वानित्यत्वोभयसम्बन्धावगमात्। उभयत्र स्मृतिज-
नकत्वादेकस्य च धर्मिणो नित्यानित्यत्वविरोधात्। स चाय-
मनैकान्तिक इति गीयते। तथैकदेशदर्शनादित्यनेकदेशभूतस्य
हेत्वाभासत्वमुक्तम्। यथा व्योम प्रत्यक्षं रूपवत्त्वादिति। रूप-
वत्त्वं व्योमैकदेशत्वेनासिद्धम्। उन्मीलिते हि चक्षुषि गृहोप-
द्वारादिषु यद्रूपमुपलभ्यते तत्तैजसमौदकं वेत्युक्तं तत्त्वालोके।
तथा यस्य पक्षं प्रत्येकदेशत्वमनेकदेशत्वञ्च तस्याप्यत एव नि-
रासः। यथा वेदः कृतकः उपाख्यानात्मकत्वादिति। विधि-
भागं ह्युपाख्यानात्मकता न व्याप्नोति। ननु धूमो ऽपि न हेतुः
स्यात्। कृत्स्नपर्वतव्यापकत्वाभावात्। मैवं। तत्रावयवी पर्वत
एकस्तस्यैकदेश एव धूमः। इहतु न वेदावयव्येक इति युक्तं
भागासिद्धत्वम्। दर्शनग्रहणेन स्वरूपासिद्धं हेत्वाभासं दर्श-
यति। यथा बुद्धो धर्माधर्मौ प्रत्यक्षमीक्षते सर्वज्ञत्वादिति नहि बुद्ध-
स्य सर्वज्ञत्वं केन चिदपि प्रमाणेनावगन्तुं शक्यतइत्युक्तं। तथा
विद्यमानस्याप्येकदेशस्य यावद् दर्शनं नास्ति। तावदहेतुत्वम्। य-
थाऽन्धकारे धूमस्य। एकदेशान्तरइति स्वतन्त्रस्याग्न्यादेर्गम्यत्वं

निराकरोति । अन्तरग्रहणेन च भिन्नाधारयोर्गम्यगमकभावो निराकृतः । ननु चन्द्रोदयात्समुद्रवृद्ध्यनुमाने कृत्तिकोदया-च्च रोहिणीसन्निधानकल्पने कथं समाश्रयत्वम् । अत्रोच्यते । एककालवर्तित्वं चन्द्रोदयसमुद्रवृद्ध्योः सम्बन्धस्तत्र काल एवैक आश्रय इति । तथा कृत्तिकोदयरोहिण्यासत्त्योरप्येकाहोरात्रवर्त्तित्वेन संबन्धः तेन कृत्तिकोदयादहोरात्रज एवासन्नरोहिण्युदयो ऽनुमीयते । एतेन मध्यगतनक्षत्रदर्शनादष्टमनक्षत्रास्तमयोदयानुमानमुक्तम् । अधो नदीपूरादुपरिवर्षणानुमान-मप्येवमेव वर्णयितव्यम् । एका हि नदी तत्राप्याश्रय इति । पित्रो-स्तु ब्राह्मणतया पुत्रस्य ब्राह्मणानुमानं केचिदिच्छन्ति तत्प्राभाकरा नानुमन्यन्ते । ब्राह्मणभूताभ्यां हि पितृभ्यामुत्प-त्तिरेव ब्राह्मणता नान्या । तेन ब्राह्मणशब्दवाच्यस्त्रीपुंसप्र-सूतत्वादन्यद् ब्राह्मण्यं नास्तीति नास्त्यनुमानानुमेयभावः । अ-बाधित इत्यनेन प्रमाणान्तरबाधिते विषये नानुमानमुत्पद्यतइति दर्शयति । यथा वन्हिरनुष्णो द्रव्यत्वादिति । ननु द्रव्यत्व-स्यानुष्णत्वेन सह सम्बन्ध एव नास्ति वन्हावेवासत्यनुष्णत्वे द्रव्य-त्वस्य दर्शनात् । तेन सम्बन्धनियमाभावादेवानुमानानुदयो न पुनर्बाधितत्वादिति । उच्यते । यदि बाधितविषये ऽप्यनु-मानमुत्पद्यते तदा द्रव्यत्वस्य सम्बन्धनियमाभाव एव न भवे-त् । वन्हेरप्यनुमानेनैवानुष्णत्वस्य सिद्धत्वात् । सर्वत्रानुमाने ऽनुमित्सितविषयनिरपेक्षमेव सम्बन्धावधारणमुपयोगि । द्र-व्यत्वस्यच वन्हिनिरपेक्षं सर्वत्राऽनुष्णत्वेन सह सम्बन्धनियमा-वधारणं जातमिति तद्बलेनानुमानोदये पाश्चात्यो ऽपि सम्बन्ध-नियमभङ्गो नात्मानं लभते । तस्माद्बाधितविषयत्वादेवानु-मानानुदयात्सम्बन्ध नियमो ऽपि भज्यतइत्यबाधितविषयत्वमनु-मानस्य कारणम् । अतो द्रव्यत्वं वन्हौ प्रत्यक्षबाधितविषयं

नानुमानमुत्पादयति । अनुमानबाधोदाहरणम् । शब्दः श्रोत्रग्राह्यो न भवति गुणित्वादित्यनुमानस्य विषयो ऽनुमानेन बाधितः । यद्विषया हि यत् । प्रतीतिर्यत्कारणिका तदिन्द्रियं तस्य ग्राहकमुच्यते । शब्दविषयायाश्च प्रतीतेरन्वयव्यतिरेकाभ्यां श्रोत्रकारणत्वमवगम्यते । अनुपहते हि श्रोत्रे शब्दप्रतीतिरुपजायते उपहते च नोपजायतइति श्रोत्रान्वयव्यतिरेकानुकारिणी शब्दप्रतीतिः श्रोत्रकारणिका तदन्वयव्यतिरेकानुविधायित्वं हि तत्कारणत्वे नियतसम्बन्धम् । अतः शब्दप्रतीतिः श्रोत्रकारणिका श्रोत्रान्वयव्यतिरेकानुविधायित्वादित्यनुमानेन श्रोत्रग्राह्यत्वमवधृतं सद् यो वादी नास्तीत्याह तस्यानुमानमनुमानेन बाध्यते । ननु सम्बन्धनियमग्रहणतत्स्मरणैकदेशदर्शनसापेक्षस्यार्थान्तरावगमनिरपेक्षोत्पत्तिकं प्रत्यक्षं शीघ्रजन्मतया ऽवश्यम्भावितया च विषयहानादुत्पत्तिं प्रतिबध्नाति अनुमानेन त्वनुमानस्य कथमुत्पत्तिप्रतिबन्ध इति वक्तव्यम् । उच्यते । येन नाम श्रोत्रग्राह्यत्वं शब्दस्य निराकर्तव्यं तेनावश्यं ग्राह्यग्राहकसम्बन्धः प्रथममवगन्तव्यः अन्यथा निषेधानवकल्पनात् । अवगतमेव वस्तु विषयान्तरे प्रतिषिध्यते नतु सर्वथानवगतमेव । तेनान्यत्र ग्राह्यग्राहकसम्बन्धमभ्युपगच्छताङ्गीकृता तावदन्वयव्यतिरेकानुविधायितालिङ्गकस्यानुमानस्य प्रवृत्तिरिति शीघ्रभाव्यनुमानमनुमानान्तरस्य विषयमपहरद्बाधकतां प्रतिपद्यते । यथानुमानपूर्वकानुमानात्प्रत्यक्षपूर्वकमनुमानं प्रथमभावि तथा प्रसिद्धाङ्गकमनुमानं प्रसाध्याङ्गकादनुमानादाशुतरभावीति वेदितव्यम् । शास्त्रेण चानुमानस्य विषयापहारः । यथा नास्ति कर्मफलसम्बन्ध इति । अवश्यम्भाविता च प्रत्यक्षवदागमस्याप्यनुसरणीया । उपमानबाधस्तु न गौर्गवयवत्सदृश

इति । अर्थापत्त्या चानुमानविषयापहारो यथा जीवन्देवदत्तो वेश्मन्यविद्यमानो बहिरपि नास्तीति ।

केचित्तु बाधितविषयत्वमिवासाधितविषयत्वमप्यनुमानकारणमाहुः । प्रमाणान्तरसिद्धे ऽपि विषये नानुमानं वर्तते यथा प्रत्यक्षावगते वह्नेरौष्ण्ये । तत्प्रभाकरमतानुसारिणो नानुमन्यन्ते । सिद्धविषयमेवानुमानमित्युक्तम् । तद्यथा सम्बन्धनियमावधारणसिद्धविषयं तथा प्रत्यक्षादिसिद्धविषयमपि किमिति नोपपद्यते । प्रमातारस्तु निवृत्तप्रमित्सास्तत्र सम्बन्धनियमानुसन्धानं प्रति नाद्रियन्तइति नानुमानमुदेति । यदि चानुसंहितसम्बन्धनियमैकदेशदर्शने ऽपि विषयसिद्धौ नानुमानमुत्पद्यते ततो भवेदेवासाधितविषयत्वमप्यनुमानकारणं नैवमस्ति । तस्मात्पूर्णमिदमनुमानकारणपरिगणनम् । नियतसम्बन्धैकदेशदर्शनं सम्बन्धनियमस्मरणं चाबाधकश्चाबाधितविषयत्वञ्चेति । यद्यबाधितविषयत्वमप्यनुमानकारणं कथं तर्हि ज्वालाभेदाग्राहिणो ऽनुमानस्योदयः । प्रत्यक्षेण हि सैवेयं ज्वालेत्यभेदे प्रतीते ऽपि गृहोदरादिवर्तिप्रभामण्डलदर्शनोद्भेदो ऽनुमीयते । प्रभावितातिर्हि तेजोवयवविसरणमन्तरेण नोपपद्यते । अवयवविसरणे चावयविनो नियतो विनाशः दृष्टो हि तन्तुविभागात्पटविनाशः । तेन विनष्टायां ज्वालायां दृश्यमाना ज्वाला ततो भिन्ना ऽनुमीयते । यथा परे विनष्टे दृश्यमानस्तन्तुस्ततो भिद्यते । पूर्वज्वाला विनष्टा विशीर्णावयवत्वात्पटवत् । दृश्यमाना ज्वाला विनष्टा या भिन्ना तस्यां विनष्टायामुपलभ्यमानत्वात्पटविनाशे पटान्तरवदिति । उच्यते । बाधितविषयत्वं यत्र निश्चितं तत्रानुमानं नोत्पद्यते यत्रतु विषयबाधा संदिग्धा तत्रानुमानमुत्पद्यतएव । इहतु सैवेयं ज्वालेतिप्रतीतौ

जातायामपि शङ्का ऽवतरत्येव । सादृश्येन शुक्तिकारजतयो-र्भेदानवसायादेवं विधा प्रतीतिर्भेदेऽपि दृष्टा। तेन किं भेदे ऽपि सादृश्यवशेन भेदाग्रहणादेवंविधा प्रतीतिरुताभेदेनैवेति शङ्को-दयाद्बाधितविषयत्वं सन्दिग्धमिति नानुमानोत्पत्तिप्रतिबन्धः। अत एव समानवर्तिकावर्तिनीषु वह्निषु ज्वालासु ज्वालात्वं सामान्यं नाश्रीयते। भेदाग्रहणेनापि प्रतीतेरुपपन्नत्वात्। व-न्हौ तूष्णत्वप्रतीतिरन्यथासम्भावयितुमशक्येति निश्चितं बा-धितविषयत्वमतस्तत्र युक्त एवानुमानविरोधः।

अन्ये पुनरसत्प्रतिपक्षत्वमप्यनुमानकारणमाहुः। यथोदि-तलक्षणो ऽपि हेतुर्यथोदितहेत्वन्तरप्रतिबद्धो नानुमानं जनयति किन्तु संशयं। तथा ऽप्रत्यक्षो वायुर्द्रव्यत्वे सत्यरूपत्वादित्यनेन हेत्वन्तरेण प्रतिबद्धः प्रत्यक्षो वायुर्महत्त्वे सति स्पर्शवत्त्वादित्ययं हेतुर्वायौ प्रत्यक्षत्वाप्रत्यक्षत्वसंशयमापादयति न त्वनुमानं जन-यितुमलमिति। तदनुपपन्नं। यथोदितलक्षणयोर्हेत्वोरेकत्र सम-वायाभावात्। भावे वा वस्तुनो नित्यसंशयितधर्मत्वापत्तेः। तथा-हि। अरूपत्वादित्ययं हेतुः स्पर्शेन्द्रियान्वयव्यतिरेकानुविधायि-तया वायुप्रतीतेरनुमानबाधितविषयः। इदञ्चानुमानं यथा शीघ्र-भावि तथोदितमेव प्राक्। प्रत्यक्षं हि निषेधता क्वचिदवश्यम् प्र-त्यक्षत्वमङ्गीकरणीयं, इन्द्रियान्वयव्यतिरेकानुविधायी प्रत्यक्षमि-त्यभ्युपेयं। ननु न स्पर्शनेन वायुः प्रतीयते किन्तु स्पर्शमात्रमे-व। नेत्युच्यते। स्पर्शान्तरप्रत्यये ऽपि द्रव्यप्रत्यभिज्ञानात्। यदि स्पर्शमात्रमेव स्पार्शनं भवेत्तदा स्पर्शभेदे ऽपि किं प्रत्यभिज्ञायेत। ननु वायोः स्पर्शभेदो न सम्भवति। अनुष्णाशितैकस्पर्श एव वायुः। तस्य तु तोयसम्पर्कात्तद्गतः शीतस्पर्शः प्रतिभाति। एवं तेजःसंयोगादुष्णस्पर्श इति। उच्यते। सत्यं वायोरनुष्णाशी-

त एव स्पर्शः तोयतेजोगतौ च शीतोष्णस्पर्शौ तथापि ताभ्यामभिभूते स्पर्शे शीतोष्णस्पर्शावपि प्रतियतोऽन्वयिनी प्रतिपत्तिः। सा च स्पर्शमात्रप्रत्यये नोपपद्यतइति वदामः । तस्मादनुमानबाधितविषयत्वादरूपत्वादित्यप्रत्यक्षत्वं नोपस्थापयति । स्पर्शवत्वादित्येतदेव निष्प्रतिपक्षमनुमानं जनयति । तस्माद्यथोदितलक्षणः सर्व एव सत्प्रतिपक्ष इति नेदं पृथग्लक्षणम् ।

प्रमेयमनुमानस्य दृष्टादृष्टस्वलक्षणं ।
प्रत्यक्षवच्च कर्तव्या प्रमाणफलवर्णना ॥

द्विविधमनुमानस्य प्रमेयं । किंचिद् दृष्टस्वलक्षणं । यथा वन्ह्यादिकं । किंश्चिचादृष्टस्वलक्षणं । यथा कर्मादिकं । कथं पुनर्यस्य स्वलक्षणं न प्रतीतं तदनुमातुं शक्यते । येन हि सह हेतोः सम्बन्धः प्रतिपन्नः स तस्माद्धेतोरनुमातुं शक्यते । न चादृष्टस्वलक्षणेन सह सम्बन्धनियमावधारणं कस्य चित्सम्भवतीति नादृष्टस्वलक्षणमनुमातुं शक्यते उच्यते । सामान्यतोऽपि सम्बन्धनियमावगमो भवत्येवानुमानोत्पत्तौ निमित्तं । यथा यत् कादाचित्कं तदागन्तुकाज्जायमानं यथा तन्तु संयोगेभ्यः पटः । कादाचित्कौ च द्रव्यस्य संयोगविभागाविति ताभ्यामागन्तुकं वस्तु प्रतीयते । न च द्रव्यमेवागन्तुकं तस्य प्रत्यभिज्ञानेन स्थिरत्वावगमात् । न च शक्यते वक्तुं भिन्नान्येव द्रव्याण्यत्यन्तसादृश्येनाप्रतीयमानभेदानि तत्प्रत्ययविषयाणीव भासन्ते ज्वालादिवदिति । द्रव्यभेदे प्रमाणाभावात् । ज्वालादिप्रमाणमुपन्यस्तमेव विभागसंयोगादिकार्योत्पत्तिस्तु यथाप्रतीते द्रव्यस्थैर्ये सत्यप्यागन्तुक कर्माभ्युपगमेनाप्युपपद्यत इति न द्रव्यभेदे प्रमाणमस्ति ।

अत्र कश्चिदाह । न कर्मादृष्टस्वलक्षणं प्रत्यक्षत्वात्कर्मणः ।

तदाह भगवान्काश्यपः " संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च रूपिद्रव्यसमवायाच्चाक्षुषाणि' इति । तथाहि । गच्छत्ययमिति प्रतीतिरिन्द्रियान्वयव्यतिरेकानुकारिणी । तदेव च प्रत्यक्षत्वे कारणं । न च वाच्यं कर्मफलभूतविभागसंयोगविशेषबलेनैवेयं प्रतीतिरिति । तन्निबन्धनत्वे स्थाणावप्येकश्येनवियुक्ते श्येनान्तरसंयुक्ते चापत्तेः । चलित्वा स्थिते ऽपि च चलतीति वर्तमानावभासप्रसक्तेः विभागसंयोगयोर्वर्तमानत्वात् । अतीन्द्रियेण च व्योम्ना संयोगविभागयोरप्यतीन्द्रियत्वात् पतति पतत्रिणि चलतीति प्रत्ययानुत्पत्तिप्रसङ्गात् । नचानुमातुमपि कर्म शक्यते । तद्धि न नित्यं । विभागसंयोगयोः सदोदयप्रसक्तेः अनित्यत्वे तस्याप्यसमवायिकारणमवश्यमाश्रयणीयं । तद्वरं विभागसंयोगयोरेवास्त्विति न कर्मानुमाने किञ्चिदपि लिङ्गं समर्थं । तदुक्तं ।

" नित्यत्वे च सदा जन्म स्यात्संयोगविभागयोः,
अनित्यत्वे ऽस्य यो हेतुस्तयोरेवास्तु तेन किं "

तदिदमसारं । प्रत्यक्षेण हि गच्छति द्रव्ये विभागसंयोगातिरिक्तविशेषानुपलब्धेः । यस्त्वयं गच्छतीति प्रत्ययः स विभागसंयोगानुमितक्रियालम्बनः । साच क्रिया न स्थाणावनुमीयते । उत्पततः श्येनस्य यो देशान्तरसंयोगस्तस्य ततो निष्पन्दनकल्पनात् । तद्गतकर्मान्तरानुमानप्रसङ्गात् । निपततश्च श्येनान्तरस्य प्राग्देशविभागोत्पत्तये कर्मान्तराश्रयणापत्तेश्च । श्येनयोस्तु कर्मणोरनुमितयोरुपपद्येते तयोर्देशान्तर संयोगविभागौ । तस्मात् स्थाणौ चलतीति न युज्यते । चलित्वा स्थितस्यापि च देशान्तरसंयोगेन क्रियाविनाशात् वर्तमानक्रियाप्रत्ययानुत्पादः । अतीन्द्रियत्वे ऽपि च व्योम्नो वि-

यति विततालोकावयवसंयोगविभागनिबन्धना पतति पतत्रि-
णी विशिष्टबुद्धिस्तद्बलेन च क्रियानुमानमपि सुकरमेव । न च
कर्मान्तरकल्पनमपि दोषः । कर्महेतोः संयोगविभागोत्पत्त्य-
सम्भवात् । तथाहि । शरीरे तावत्प्रयत्नापेक्षादात्मसंयोगात्कर्मो-
त्पत्तिरवकल्पते । संयोगो हि स्वाश्रये स्वाश्रयसमवेते वा द्रव्यान्त-
रे कार्यमारभत इति नियतं । यथा तन्तुसंयोगास्तन्तुषु पटमारभ-
न्ते प्रचयाख्यश्च संयोगो ऽवयवेषु समवेतः स्वाश्रयसमवेते
ऽवयविनि महत्त्वं जनयति । यो ऽपि संयोगः संयोगं जनयति
सो ऽपि तस्य स्वाश्रयस्वाश्रयसमवेतयोर्जनकः । तन्तुतुरीसंयो-
गो हि पटतुरीसंयोगस्य जनयितेष्यते । तस्य तुरीतावदाश्र-
य एव । पटो ऽपि तन्त्वाश्रितत्वात्स्वाश्रयसमवेतः । आत्मशरीर
संयोगश्चात्मनि शरीरे च समवेतः स कथं देशे कार्यमारभेत
तत्रासमवायात्तेन सह एकार्थसमवायाभावाच्च । कर्म तु स्वाश्रये
शरीरे जनयितुं शक्नुयादेवेति कर्महेतोर्विभागसंयोगावनुत्प-
द्यमानौ ततो ऽन्यत्कारणं कल्पयन्तौ कर्मानुमापयतः । एतेन
नोदनाभिघातात्मकौ कर्महेतू संयोगविभागौ व्याख्यातौ । नो-
दनाख्यो हि शरज्यासंयोगस्तयोस्तत्समवेते वा कार्यमाविर्भा-
वयितुमलमिति न ततः शरीराकाशगतौ हि संयोगविभागावु-
त्पत्तिं लभेयातां । तथा ऽभिघातात्मको ऽपि वेगवन्मुसलोलूखल-
समवेतः कथ मुत्पतत उर्ध्वं मुसलस्य चाकाशस्य च संयोग-
विभागावारभेत । यश्च वेगाख्यः संस्कारः कर्महेतुरिष्यते त-
तो ऽपि संयोगविभागावनुपपन्नौ । संस्कारस्य स्वाश्रयएव का-
र्यारम्भनियमात् । भावनाख्यो हि संस्कार आत्मसमवेत आ-
त्मन्येव स्मरणलक्षणं कार्यं जनयन्दृष्ट इति कथं वेगात्मा सं-
स्कारः शरवर्त्याकाशेन तेजोवयवैः स्तिमितैश्च वायुभिः सह

संयोगविभागावारभतइति न शक्यमाश्रयितुं कर्महेतुत्वभिमतादेव विभागसंयोगावुत्पद्येते इति युक्तमेव कर्मानुमानं। नच कर्मणः प्रत्यासन्नद्रव्यवर्तिकार्यारम्भनियमो ऽवधारितः तस्य कार्यावगम्यत्वात्। यादृशेन हि कार्येण यदनुमीयते तादृशमेव तस्य कार्यं। यदि च तस्याप्ययं नियमः स्यात्तदा कार्यमेव नोपपद्येत तच्च कर्म सर्वमेव विभागपूर्वकं संयोगमारभते। किञ्चित्तु वेगाख्यं संस्कारमपि। संयोगाच्च तस्योपरतिर्मूर्त्तद्रव्याणि च तस्याश्रयभूतानीत्यादि प्रमेयपारायणे प्रपञ्चितम्।

सर्वभावानां च शक्तिरदृष्टस्वलक्षणापि कार्येणानुमीयते। अग्नेर्यथाभूतादेव दाहो दृष्टस्तथाभूतादेव मन्त्रौषधिप्रणिधाने कार्यं न दृश्यते। न तत्र दृष्टमेव रूपं कारणम्। तस्याजनकावस्थातो विलक्षणत्वाभावात्कार्यानुदयप्रसङ्गात्। यच्च खलु अजनकदशातो निरतिशयं ततः कार्यं नोत्पद्यते कुण्ठादिव कुठारात्। यदा तु तत एव कार्यं दृश्यते तदा तदवस्थातो ऽस्यैव वैलक्षण्यं तीक्ष्णत्वमिव। अग्नौ च कार्यानुदयदशातो विलक्षणं न कार्योदयसमये प्रत्यक्षदृश्यं रूपमुपलक्ष्यते। भवितव्यञ्च वैलक्षण्येनान्यथाकार्यानुत्पत्तिप्रसङ्गादिति कार्योदये ऽतीन्द्रियं किञ्चिद्रूपं वह्नेरनुमीयते। तस्य मन्त्रौषधिप्रयोगेण विनाशात् कार्यं नोत्पद्यते। नच वाच्यं मन्त्रौषधादिभिरतीन्द्रियं रूपं न किञ्चिद्विनाश्यते किन्तु मन्त्रौषधादिसन्निधानेनैव कार्यान्वय इति। कारणवैगुण्ये कार्योदयविघातासम्भवात्। अथोच्यते मन्त्राद्यप्रयोगो ऽपि कार्योत्पत्तिनिमित्तं सम्प्रयोगे चाप्रयोगो निवर्ततइत्यस्ति कारणवैगुण्यमिति। तन्न। अप्रयोगस्य प्रयोगाभावरूपत्वात् स-

र्वभावानाञ्च भावकारणनियतत्वदर्शनात् । अभावस्य क्वचिदपि कार्ये जनकत्वाश्रयणानुपपत्तेः यच्च तदतीन्द्रियमग्रे रूपं तच्छक्तिसामर्थ्यादिवाच्यतया लोके प्रतीतं तस्य च कार्यानुत्पत्तौ द्वयी गतिरभिभवो वा विनाशो वा । यत्र कदाचिदपि पुनः कार्यं न दृश्यते तत्र विनाश एव वस्तुनः । यत्र पुनः प्रतीकारवशेन कार्योदयस्तत्राभिभवमात्रम् । तस्यचैवं वन्ह्यादिप्रसिद्धस्य सर्वभावेषु कार्योदयानुकूल्यं कार्योत्पादकानुमानेन परिकल्पनीयम् । तस्यच नित्याश्रयाश्रितस्य नित्यत्वमनित्याश्रयाश्रितस्य तदुत्पत्तिकारणादेवोत्पत्तिः । संस्काराच्चास्यायमेव विशेषः । संस्कारो हि नाम नित्येष्वनित्यो ऽनित्येषु च कारणान्तरायत्त इति ।

प्रत्यक्षवच्चास्यापि प्रमाणफलवर्णना कर्तव्या । यदानुमितिरनुमानमिति प्रमितिः प्रमाणमिति चावसीयते तदाग्न्यादिविषया लिङ्गदर्शनसापेक्षादात्ममनःसन्निकर्षादुत्पन्ना ऽधिगतिरेवानुमानं प्रमाणम् । फलं चोपादानादिक्रिया । यदा चानुमीयते ऽनेनेत्यनुमानं प्रमीयते चानेनेति प्रमाणमिति करणाश्रयणं तदात्ममनःसन्निकर्षो ऽनुमानम् । सम्बन्धनियमस्मरणमेकदेशदर्शनं चेतिकर्तव्यता । फलञ्च लौकिकविषयानुमितिः । साधकतमस्य वा करणाश्रयत्वात्तमबर्थस्य चातिशयरूपत्वाद्व्यवहितापेक्षया च सन्निहितस्यातिशययोगाल्लिङ्गदर्शनादीनां प्रमाणत्वम् ।

परप्रत्यायनेच्छूनामनुमोदय साधनम् ।
वचनं दूषणैः सार्धमर्थादेतेन वर्णितम् ॥

द्वेधाऽनुमानमुत्पद्यते । स्वयमनुसंहितया वा ऽनुमानोत्पादसामग्र्या परप्रयुक्तवाक्योद्बोधितया वा । तत्रानुमानोत्पत्ति-

सामग्रीप्रतिपादनेनैव तत्प्रतिपादकत्वात्त्रयस्वरूपमपि सूचित-मेव। तत्राबाधित इति प्रतिज्ञा। ज्ञातसम्बन्धनियमस्येत्यनेन दृष्टान्तवचनम्। एकदेशदर्शनादिति हेत्वभिधानम्। तदेवं त्र्यवयवसाधनम्। साध्यनिर्देशः प्रतिज्ञा यथा शब्दो नित्य इति। अनेन चानुमानस्य विषयो निर्दिश्यते। निर्दिष्टे च विषये तस्याबाधितत्वं शक्यते ऽवगन्तुमिति। तथा एकादेशान्तर इ-त्यनेनापि एकदेशान्तरभूतस्यानुमानमित्युक्तम्। तदपि प्रति-ज्ञावचनेन गम्यते। तेन साधनप्रयोगे प्रथमं साध्यनिर्देशाय प्रतिज्ञा कर्तव्या। एतेनैव प्रत्यक्षादिबाधितपक्षादिनिर्देशः प्र-तिज्ञाभास इत्युक्तं भवति। दर्शितानि प्रत्यक्षादिबाधोदाहर-णानि एकदेशस्य च साध्यत्वं दर्शयितुं सिद्धं धर्मिणमुद्दिश्य साध्यविधिर्दर्शयितव्य इत्यप्रसिद्धविशेष्यः पक्षाभासः। सर्वज्ञो वीतराग इति। प्रतिज्ञाभासस्तु माता मे वन्ध्येति उद्दिश्य हि मातरं न वन्ध्यात्वं विधातुं शक्यते। तस्या अन्वयायोग्यत्वे-नान्विताभिधानस्यासम्भवात्। यावज्जीवमहं मौनीत्यत्रानु-मानबाध एव न स्ववचनबाधः। शब्दश्रवणाद्धि कार्याच्छ-ब्दोच्चारयितृत्वमनुमीयते। शब्दानुच्चारकत्वञ्च मौनित्वमित्य-नुमानबाध एव। स्ववचनन्तु मौनितामाह न पुनरमौनितामिति न तेन बाधः। गम्यैकदेशान्तरसम्बन्धनियमश्च गमकैकदेशस्य दर्शनीयः परस्येति तदर्थं दृष्टान्तवचनं प्रयोक्तव्यम्। यावद्धि कस्मिंश्चिद्धर्मिणि एकदेशस्यैकदेशान्तरेण प्रमाणसिद्धः सम्ब-न्धनियमो न प्रदर्श्यते तावदनुमानमेवोत्पादयितुं न शक्यते। यत्र धर्मिणि सम्बन्धनियमो दृश्यते स दृष्टान्तो महानसादिः। स चेत्थं दर्शयितव्यः। पर्वतो ऽग्निमानिति प्रतिज्ञाय योयो धूम-वान्स सो ऽग्निमानिति यथा महानसादिरिति। यस्तु साध्यवि-

कलः साधनविकलस्तदुभयविकलः सम्बन्धनियमविकलश्च स दृष्टान्ताभासः । यथा शब्दः प्रयत्नोत्थस्तदनन्तरमुपलब्धे-र्मनोमोदकादिवदिति । मनोमोदकादिषु प्रयत्नोत्थत्वं नास्तीति तत्संबन्धनियमो हेतोस्तत्र दर्शयितुमशक्यः । शब्दो ऽनित्यो मूर्त्तत्वाद् घटवदिति । घटस्यामूर्त्तत्वं नास्तीति तस्य नित्यत्वेन सम्बन्धनियमो दर्शयितुं न शक्यते । तथा शब्दोऽनित्यः कृतकत्वाद्गगनवदिति । गगने ऽनित्यत्वं कृतकत्वञ्च नास्तीति न तत्र सम्बन्धनियमः शक्यो दर्शयितुं । यथा शब्दोऽनित्यः प्रमेयत्वात् द्रव्यवदिति । किञ्चिद्द्रव्यं नित्यं परमाण्वाकाशात्ममनोदिक्कालादिरूपम् । किञ्चिच्चानित्यं द्व्यणुकादि । तत्र प्रमेयत्वस्यानित्यत्वेन सह सम्बन्धनियमो नास्तीत्यशक्यमेव दर्शयितुम् । येन च वचनेन सन्नपि साध्यसाधनयोः सम्बन्धनियमो नाभिधीयते तदप्याभासमेव । तद्द्विविधमप्रदर्शितसम्बन्धनियमं विपरीतसम्बन्धनियमञ्च । यथा पर्वतो ऽग्निमान्धूमवत्त्वान्महानसवदिति । यद्यपि महानसे वह्निधूमौ स्तस्तथापि यावद्धूमस्याग्निना सह सम्बन्धो नोच्यते तावदगमक एव तथा तस्मिन्नेव प्रयोगे यदैवमुच्यते योयो ऽग्निमान्सस धूमवानिति तदापि गमकाभिमतस्य धूमस्य गम्याभिमतेनाग्निना सह सम्बन्धनियमस्यादर्शितत्वाद्धूमस्य न समर्थितं गमकत्वमिति साधनाभासत्वं । सम्बन्धनियमं स्मरत एकदेशदर्शनादनुमानमुत्पद्यते इत्येकदेशत्वं हेतुवचनं प्रयोक्तव्यम् । यथाग्निमत्त्वे साध्ये धूमवांश्चायमिति । तेन यस्यैकदेशत्वं नास्ति तस्याभासत्वमुक्तमेव । येन वचनेन सदपि दर्शयितुं न शक्यते तदप्याभासभूतमेव । यथा ऽवाचकशब्दप्रयोगादयः । असाधारणादयश्च हेत्वाभासाः सर्वएवात्रापि योजयितव्याः ।

दृष्टान्तहेतुवचनयोश्च प्रयोगे क्रमनियमो नादरणीय एकदेशदर्शनपूर्वकोदपि सम्बन्धनियमस्मरणादनतरं शब्दसाध्यज्ञानं जायते । तथा सम्बन्धनियमस्मरणपूर्वकमप्येकदेशदर्शनमनुमानमुत्पादयत्येव । तत्रैकदेशदर्शनपूर्वकसम्बन्धनियमस्मरणं कुर्वतो प्रतिज्ञानन्तरं हेतुवचनं प्रयोक्तव्यम् । पर्वतो ऽग्निमान्धूमवत्त्वादिति । दृष्टान्तपुरःसरे तु प्रयोगे प्रतिज्ञामुपादाय योयो धूमवान्ससो ऽग्निमान्महानसादिवदिति चाभिधाय धूमवांश्चायमिति हेतुवचनं वक्तव्यम् । अन्येतु प्रतिज्ञानन्तरं धूमवत्त्वादिति हेतुमभिधाय दृष्टान्तवचनं ततो ऽप्यनन्तरमुपनयनं प्रयुञ्जते धूमवाँश्चायमिति । तत्र हेतूपनयनयोरन्यतरप्रयोगेणापि साध्यसिद्धेरुभयोपादानमनर्थकमिति मीमांसकाः । तस्माद्धूमवत्त्वादयमग्निमानिति निगमनमप्यनर्थकमेव । यथोदितहेतुबलासिद्धत्वादर्थस्य ।

वैधर्म्यदृष्टान्तोपादानं च केचित्साधनवाक्ये कुर्वन्ति । यथा ऽग्निर्नास्ति यत्र तत्र धूमो ऽपि नास्ति यथा जलह्रद इति । तदनुपपन्नं । साध्यधर्मसम्बन्धबले हेतोर्गमकत्वं । तच्च साधर्म्यदृष्टान्तेनैव समर्थितम् । अथोच्यते । साधर्म्यदृष्टान्तमात्रेण साध्यधर्मवति हेतोर्वृत्तिरवगम्यते न तद्विरहिणो निवृत्तिः । न च तया विना हेतोः साध्यसम्बन्धनियमो ऽवकल्पते अतस्तदर्थं वैधर्म्यदृष्टान्तोऽप्युपादेय इति । तन्न । न हि साध्यधर्मवति हेतोर्वृत्तिमात्रं साधर्म्यदृष्टान्तेनोच्यते किन्तु नियत एव साध्यधर्मे सम्बन्धो दृश्यते । तथाहि । साधनधर्मोद्देशेन साध्यधर्मविधिः साधर्म्यदृष्टान्तेन क्रियते तत्र धूमवत्तयोपलक्षणेन सर्वधूमवतामुद्दिष्टत्वात प्रत्युद्देश्यं वाक्यपरिसमाप्तेः सर्वेषां धूमवतामग्निमत्ता विहितेति नास्ति सम्भावना विनाप्यग्निना

धूमो भवेदिति । उद्देश्यता च प्रथमप्रयोगेणावगम्यते धूमवानयमग्निमानिति। क्वचिच्च यच्छब्दप्रयोगेण सो ऽग्निमान्यो धूमवानिति । प्रत्युद्देश्यविधानबलेनैव सिद्धां व्याप्तिमन्यतो निवृत्तिं च स्पष्टीकर्तुं वीप्सावधारणवचनयोः प्रयोगः क्रियते । योयो धूमवान्ससो ऽग्निमानेवेति। तस्मात्सम्यक्साधर्म्यदृष्टान्तप्रयोगेणैव सम्बन्धनियमावगतेरनर्थकं वैधर्म्यदृष्टान्तोपादानमिति । अथोच्यते माभूद् दृष्टान्तद्वयोपादानं किन्तु विकल्पो ऽस्तु वैधर्म्यदृष्टान्तेनापि हि साध्यधर्मविरहिणामुद्दिश्य साधनधर्मविरहविधौ कृते सर्वसाध्यविरहिणां साधनधर्मविरहव्याप्त्यवगमादन्यत्र साधनधर्मो ऽवकाशमलभमानः साध्यधर्मवत्येव वर्ततइति साध्यधर्मसम्बन्धनियमावगतेर्वैधर्म्यदृष्टान्तेनापि हेतुत्वं समर्थितमेव भवतीति तुल्यकार्यतया साधर्म्यवैधर्म्यदृष्टान्तयोर्विकल्पो न्याय्य इति । तदयुक्तं । ऋजुमार्गेणार्थसिद्धौ न वक्रमार्गमाश्रयते यतः साधर्म्यदृष्टान्तश्च साध्यसम्बन्धाव्यभिचारावगतौ ऋजुमार्गः वैधर्म्यदृष्टान्तो वक्र इति न विकल्पो युक्तः । अतुल्यत्वादुपायभावस्य । स्यान्मतं यथा साध्यसम्बन्धाविनाभावो ऽनुमानमार्गः तथा तदभावाद्व्यावृत्तत्वमपि । तच्च वैधर्म्यदृष्टान्तेनोच्यते इति विकल्पाश्रयणमिति । तन्न । व्यावृत्तेरभावरूपायाः क्वचिदपि कारणत्वासम्भवात् । सर्वकार्याणि भावसाधनानीत्युक्तं । न च विपक्षव्यावृत्तिः शक्यते ऽवगन्तुं । विपक्षाणामनन्तत्वात् साध्यधर्मसम्बन्धाव्यभिचाररूपस्तु सम्बन्धनियमो यथा ऽवगन्तुं सुकरस्तथोदितमेव । तस्मात्सर्वत्र साधर्म्यदृष्टान्त एव केवलः प्रयोक्तव्य इति स्थितं ।

यत एवं विधं समानमतो दूषणमपि पक्षस्य प्रत्यक्षादिबाधितत्वमप्रसिद्धविशेष्यता च । हेतोः स्वरूपासिद्धत्वमेकदेशा-

सिद्धत्वमसाधारणत्वं साधारणत्वं बाधकत्वं चेति। दृष्टान्तस्य च साध्यविकलता साधनविकलता सम्बन्धनियमविकलता नियमशून्यता विपरीतनियमता। प्रतिज्ञादीनामवाचकता ऽप्रयोगश्चेति। प्रतिज्ञासामान्याच्च प्रतिज्ञाहानिरभिन्नैव। संन्यासो ऽपि दूषणान्तरपूर्वकत्वाद्दूषणमेव। दूषितपक्षो हि वादी प्रतिज्ञानमपह्नुते। अत एव च प्रतिज्ञान्तरमपि पृथग् दोषो न भवति। दूषितपूर्वप्रतिज्ञस्यैव प्रतिज्ञान्तरालम्बनत्वात्। हेतुप्रतिज्ञाविरोधे ऽपि न दूषणान्तरम्। अप्रसिद्धत्वे हेतोरसिद्धतैव दोषः सिद्धत्वे वा तद्ग्राहकप्रमाणबाधात्पक्षस्य दोषः। अप्रसिद्धविशेषणतात्वदृष्टस्वलक्षणस्याप्यनुमानान्न दोषः।

इति श्रीमहामहोपाध्यायश्रीशालिकनाथकृतौ
प्रमाणपारायणे द्वितीयः परिच्छेदः।

शब्दपरिच्छेदस्तृतीयः।

शास्त्रं शब्दविज्ञानादसन्निकृष्टे ऽर्थे बुद्धिः। शब्दविज्ञानापेक्षादात्मनः सन्निकर्षाद्यददृष्टार्थविषयं ज्ञानं तच्छास्त्रन्नाम प्रमाणं। कः शब्दो ऽभिमतः। वर्णाः। तेषामेव श्रोत्रग्राह्यत्वात्। श्रोत्रग्राह्ये हि वस्तुनि शब्दपदं वर्तते। न च सत्वशब्दत्वयोरतिप्रसङ्गः। सत्तादिसामान्याभावात्। अनुवृत्ताकारावभासिनी हि बुद्धिः सामान्यसिद्धौ निबन्धनं। न च द्रव्यगुणादिष्वनुवृत्ताकारं परामृशन्ती बुद्धिरुदेति यतो महासामान्यं सत्ताख्यं सिद्ध्येत्। नापि ककारखकारादिष्वेक आकारो ऽवभासते यतः शब्दत्वमभ्युपगच्छेत। सदादिप्रतीतिस्त्वौपाधिकी। प्रमाणग्रहणयोग्यतौपाधिकः सच्छब्दः। श्रोत्रग्राह्यतौपाधिकश्च शब्दशब्दः।

ननु वर्णातिरिक्तं पदमपि श्रौत्रमेव । तथाहि । नदीदीनेत्यादिषु वर्णाभेदे ऽपि पदान्यत्वं प्रतीयते। न च वाच्यं वर्णा एव पदं । नदीदीनेत्यादि तु क्रमभेदेन पदभेदबुद्धिरिति । वर्णानामक्रमिकत्वात् । देशनिबन्धनो वा क्रमो भवेत्कालनिबन्धनो वा । उभयविधो ऽपि न वर्णेष्वास्पदं लभते । तेषां सर्वगत्वान्नित्यत्वाच्च बुद्धिस्तु तेषां क्रमवती । तदनुरोधेन वर्णा अपि क्रमवन्त इति प्रत्येकं श्रवणेष्ववभासन्ते । एकक्षणवर्तिन्यान्तु पदबुद्धावेकस्यां बुद्धिनिबन्धनो ऽपि क्रमो नोपपद्यतइति कुतस्तद्भेदेनापि भेदप्रतिभासोपपत्तिः । किञ्च वर्णा बहव एकविषया च पदबुद्धिरिति वर्णेभ्यो भिन्नं पदं । यदि च वर्णेभ्यो भिन्नं पदं नावभासते ततस्तेभ्यो ऽर्थप्रत्यय एव नोपपद्यते । एकैकवर्णप्रतीतौ तावदर्थस्य नावगमः । न च सकलवर्णोपलम्भो युगपत्संभवति वर्णानां क्रमोच्चारणात् । उच्चारणानुसारित्वाच्चोपलब्धेः । वर्णानांच वाचकत्वे क्रमभेदे वक्तृभेदे चार्थप्रत्ययः स्यात् । तस्माद्वर्णेभ्यो ऽसम्भवन्नर्थप्रत्ययस्तदतिरेकिस्वनिमित्तपदप्रतीतिं प्रसाधयति ।

उच्यते । नदीदीनेत्यत्रापि वर्णातिरिक्तवस्त्वन्तरावभासो नास्ति । नकारादय एव हि प्रतीयन्ते । बुद्धिभेदस्तु क्रमभेदनिबन्धनः । नचेयमेका बुद्धिर्यतो वर्णानां बुद्धिनिबन्धनो ऽपि क्रमो न स्यात् । भिन्नवर्णविषया भिन्ना एव हि बुद्धयो निरन्तरतयैकतामिवापद्यन्ते । तथाहि । श्रवणेन्द्रियनिबन्धनास्तावद्वर्णोच्चारणानुबन्धिन्यो बुद्धय उच्चारणभेदेनोत्पद्यन्ते । एवं स्मृतिरपि प्रत्येकवर्णोपलम्भप्रतिभावितभावनावशेन भवन्ती न सर्वविषयैका ऽवकल्पते । भावनानां भेदात् । एकपदबुद्धिस्त्वेकार्थप्रतिपत्त्युपायत्वनिबन्धना ऽअर्थप्रतिपत्तिश्चा-

प्रत्यक्षं तावन्निमित्तं न शक्नोति कल्पयितुं । तस्य निमित्तत्वानुपपत्तेः। न तस्य सत्तामात्रेण निमित्तता । सर्वदार्थप्रत्ययापत्तेः। प्रत्यक्षं भिन्नपदावभासि न भवतीत्युक्तमेव तेन वर्णेष्वेव प्रत्यक्षेष्वर्थप्रतिपत्त्युपपत्तये कश्चिद्विशेष आश्रयितुं युक्तः। सर्वपूर्वपूर्वोपलम्भसापेक्षत्वादन्त्यवर्णस्य । उपलम्भस्य च क्षणिकतया स्वतो विशेष्टुमशक्यत्वात्पूर्वपूर्ववर्णोपलम्भजन्यः संस्कार एवाश्रीयते । स च स्मृतिहेतोस्संस्काराद्भिन्न एव। स्मृतिहेतुर्हि संस्कारो यदुपलम्भप्रभावितस्तत्रैवोपलम्भान्तरं जनयितुमलं नार्थान्तरम् इत्यर्थविषया ततः प्रतीतिरनुपपन्नेति तदतिरेकिणः संस्कारस्याश्रयणं । तस्य च कार्यकल्प्यत्वाद्यथाभावे प्रतीतिदर्शनं तथाभावएवोत्पत्तिरनुमीयते तेन क्रमविपर्यये व्यक्तिभेदे व्यवधाने च कार्यादर्शनात्तत्र संस्कारस्यानुदयादर्थप्रत्ययाभावः । यस्य यस्य चार्थस्य प्रतीतौ * यस्य यस्य वर्णस्य निमित्तभावस्तस्य तस्य तदर्थप्रतीत्यनुगुणसंस्कारार्थकत्वं स्वाभाविकं । सहायविरहात्तु कार्यानुदयः सहाप्तेश्च कार्योत्पत्तिरिति तेभ्य एवार्थप्रत्ययः। तस्मान्न प्रत्यक्षतो नाप्यनुमानतो वा वर्णव्यतिरिक्तपदोपपत्तिरिति वर्णात्मकमेव पदं।

कः पुनरर्थः। अभिधेयः । अभिधेय एव कः। येन सह शब्दस्या ऽपौरुषेयः सम्बन्धः। अथ कः सम्बन्धः। प्रत्याय्यप्रत्यायकभावः । न तर्ह्यपौरुषेयः सम्बन्धः। स्वभावतः शब्दस्याप्रत्यायकत्वात्। यदि हि स्वभावत एव शब्दो ऽर्थं प्रत्याययेत्ततः प्रथमश्रुतः किं न प्रत्याययेत्ततो ऽवगच्छामो ऽपेक्षते किञ्चिच्छब्द इति । देवदत्तादिपदेषु च पुरुषसंकेतायत्ता ऽर्थप्रतीतिर्दृष्टेति गवादिष्वपि तदपेक्षैवाश्रीयते । तदपेक्षा चेदर्था-

वगतिर्न तर्ह्यपौरुषेयं शब्दस्य प्रत्यायकत्वं ।

उच्यते । यद्यपि प्रथमश्रुताच्छब्दादर्थं नावबुध्यन्ते तथापि स्वाभाविकमेव शब्दस्यार्थप्रत्यायकत्वं पुनः संकेतापेक्षं । तथा हि । वृद्धयोर्व्यवहरतोरेकस्य वाक्यं श्रुत्वा परस्य प्रवर्तमानस्य प्रवृत्त्या बुद्धिमनुमापयति । तस्याश्च शब्दश्रवणानन्तरभावित्वाच्छब्दस्य हेतुतां तावदवधारयति । किन्तु तेषां पार्श्ववर्तिनां व्युत्पित्सूनां ततः शब्दात् स्वयमर्थमप्रतियतां पुनरेषां विचिकित्सोदयते यदि प्रत्यायकः शब्दस्ततोऽस्मानपि किमिति नार्थं प्रतिपादयति । अथाप्रत्यायक एव ततो वृद्धमपि कथमवबोधयति । तेषामेव विचिकित्सतां पुनरेषा कल्पना प्रसरति । नूनमस्ति कश्चिदस्य वृद्धस्य विशेषो यतोऽर्थमवबुध्यते। कोऽसौ विशेष इति निर्णीयतां । पुनः शब्दश्रवणे वृद्धव्यवहारावगतार्थप्रत्यायकत्वमात्रेण स्वयमर्थावगमदर्शनादर्थप्रत्यायकत्वावगम एव विशेष इति निर्धारणा जायते । न पुनः सङ्केतप्रतीतिर्वृद्धस्य विशेष इति कल्पना शक्या सङ्केतस्यैव तदानीमप्रतीतेः । व्युत्पन्नेतरशब्दार्थो हि सङ्केतवाक्यादर्थमवबुध्यमानः सङ्केतं प्रतिपद्यते नान्यथा । ननूत्तरकाले सङ्केतदर्शनात्किमिति सङ्केतभूतमेव प्रत्यायकत्वं नाश्रीयते । न । शब्दस्वभावत एवार्थप्रतीतिरूपकार्यसिद्धेः । यदि हि शब्दमात्रादर्थप्रतीतिर्न सम्पद्यते ततः सङ्केतोऽपि तत्कालमिति कल्प्यते नान्यथा उपपद्यते तु शब्दमात्रादेवार्थावगतिः प्राच्येन मार्गेण । नन्वेवं सति देवदत्तादिष्वपि कथं सङ्केतस्य कारणत्वम् । उच्यते । प्रत्यक्षपरिदृष्टस्तत्र सङ्केतो न तु कल्पयितव्यः । तेन देवदत्तादिषु । तस्यैवार्थप्रतीतिकरणत्वं । गवादिषु तु केवलकार्यदर्शनकल्पनीयो नावकाशं लभत इत्यपौरुषेय एतेषामर्थेन

प्रत्याय्यप्रत्यायकलक्षणः संबन्ध इति सिद्धम् ।

असन्निकृष्ट इति किमिदं । प्रमाणान्तरेणाप्रतीत इति । यद्येवं कथमसौ शब्दैरवबोध्यते । उक्तं वृद्धव्यवहारावगतसम्बन्धः शब्दोऽवबोधक इति । यश्चार्थो न प्रमाणान्तरेणावगम्यते कथं तद्विषयो वृद्धव्यवहारो ऽवसीयते । कथंतरां च तद्विषया प्रतीतिरनुमीयते । कथंतरां च वाचकशक्तिः शब्दस्य कल्प्यतइति । वाक्यार्थमातृकायामभ्यासो विधीयतामित्यत्रोत्तरं ।

स पुनरसन्निकृष्टोऽर्थो नियोगार्थ एव । नियोगो हि प्रमाणान्तरानवगतमपूर्वमर्थमवबोधयतीति वाक्यार्थमातृकायामुक्तं । न च नियोग एवैकस्तस्यावबोधकः विषयव्यतिरेकेण तदप्रतीतेः पदान्तराणामपि तदन्वयिस्वार्थपरतयैव व्युत्पत्तेस्तेन वाक्येनैव नियोगार्थः प्रतीयते । तत्र लिङादिप्रत्ययो नियोगार्थशरीरमेवाभिदधाति प्रकृतिस्तद्विषयं । पदान्तराणि च विषयविशेषणं नामधेयं नियोज्यं चाभिदधतीति नियोगार्थप्रतीतौ व्याप्रियन्ते । सन्निपत्योपकारकाङ्गवाक्यानि च यद्यपि नियोगान्तरशून्यानि तथापि प्रधाननियोगान्वितस्वार्थाभिधायकतया तन्नियोगप्रतिपत्तावेव पदान्तरवद्वर्तन्ते । विनियुक्तमन्त्रसमाम्नायो ऽपि द्रव्यभूतं नियोगजातं नियोगाङ्गतया समर्पयंस्तद्विशिष्टनियोगावगतावेवोपक्षीयते नियोगाङ्गता तु योग्यतया प्रयोगकाले नैयोगिककर्मतत्साधनस्मरणेन मन्त्रजातस्य । अनुवादा अपि विधेयस्तुतिमुत्पादयन्तः स्तुतिविषयनियोगप्रतिपत्तिपरा एवेति कृत्स्न एव वेदोऽवबोधे ऽपूर्वे कार्यात्मनि प्रमाणम् । अत एव को वेदार्थ इति जिज्ञासमानेभ्यश्चोदनासूत्रेण कार्यात्मा वेदार्थ इत्युक्तं ।

ननु सिद्धो ऽपि ब्रह्मात्मको वेदान्तानामर्थः प्रतीयते । उच्य-

ते। व्युत्पन्त्यपेक्षः शब्दो ऽर्थमवबोधयति। व्युत्पत्तिश्च वृद्धव्यवहारे। व्यवहारश्च कार्यप्रतीतिनिबन्धनः। कार्यप्रतिपादकतयैव शब्दव्युत्पत्तिः। तत्रापि कश्चिच्छब्दः साक्षादेव कार्यप्रतिपादकतया व्युत्पद्यते कश्चिच्च कार्यान्वितस्वार्थपरतया।

ननु विनापि व्यवहारं सिद्धार्थप्रतिपत्तिपरादपि लौकिकवचनात्सम्भवत्येव व्युत्पत्तिः। यथा पुत्रस्ते जात इति। अत्र हि मुखप्रसादादिभिर्लिङ्गैर्लौकैः श्रोतुर्हर्षोत्पत्तिरनुमीयते। हर्षोत्पत्तिश्च हर्षहेतुमन्तरेण न सम्भवति प्रियार्थप्रतीतिश्च हर्षहेतुरिति स्वात्मनि प्रतीतं तेन पुत्रस्ते जातइति वाक्येन प्रियो ऽर्थो बोधित इति कल्प्यते। पुत्र जन्मैवास्य प्रियमुत्पन्नमिति प्रमाणान्तरावगतमिति तदभिधायकत्वमेव कल्प्यते। प्रतिपदभावापोद्धाराभ्यां व्यवहार इव स्वार्थविशेषसम्बन्धाध्यवसायः। तथा व्युत्पन्नेतरपदविभक्त्यर्थाः काष्ठैः पचतीति वर्तमानोपदेशे ऽपि यत्पाके कारणं तत्काष्ठशब्देन प्रतिपाद्यत इत्यवगम्य प्रत्यक्षेण काष्ठानां करणभावमवगच्छन्तः काष्ठशब्दे व्युत्पद्यन्ते। किञ्चास्य शब्दस्यायमर्थ इत्यपि व्युत्पत्तिर्दृश्यते। न तत्र शक्यते वक्तुं कार्यान्वय्येव शब्दस्यार्थ इति। अपि च येन नामाकार्याभिधायित्वं तावता च कार्यान्विताभिधानस्याप्युपपत्तेर्न शक्यते। विशेषान्विताभिधानशक्तिः कल्पयितुं। लोके च सिद्धार्थान्येव प्रायशो वाक्यानि प्रश्नोत्तराणि दृश्यन्ते। कुशलं ते कुशलं ममेत्यादीनि।

अत्रोच्यते। सर्वपुरुषाणां तावद्वृद्धव्यवहारएव प्रथमं व्युत्पत्तिरङ्गीकरणीया। न खलु व्यवहारमन्तरेण सिद्धान्वाख्याने व्युत्पत्तिरवकल्पते। यद्यपि मुखप्रसादादिभिर्हर्षोत्पत्तिरनुमीयते। हर्षोत्पत्त्या च हर्षहेत्ववगमस्तन्निमित्तता च शा-

ब्दस्य तथापि पुत्रस्ते जात इति वाक्यस्य पुत्रजन्माख्यहर्ष-हेतुप्रतिपादकता हर्षहेतूनामानन्त्यादुरनुमाना । नच पारिशेष्येण तत्प्रतिपादकत्वाध्यवसायः । भूतभविष्यद्वर्तमानानां सन्निहितव्यवहितानां पारिशेष्यावधारणाया अत्यन्तदुष्करत्वात् । व्यवहारः पुनः प्रत्यक्षविशिष्टार्थविषय उपलभ्यमानस्तद्बुद्ध्यनुसारेण तद्गतामेव शब्दस्य वाचकतामनायासेनापादयन् व्युत्पत्तावुपायतां गन्तुमलम् । व्यवहारश्चेद् व्युत्पत्त्युपायः कः कार्यान्विताभिधानं शब्दानामपहरेत् । न हि कार्यावगमं विना व्यवहारोऽवकल्पत इत्युक्तं वाक्यार्थमातृकायाम् । एवं लोके यः सिद्धार्थपरतया पदानां प्रयोगः स लाक्षणिको भविष्यति । कार्यान्वयो हि परस्परपदार्थान्वयव्यभिचारीत्यविवक्षित्वा कार्यान्वयं परस्परपदार्थान्वयविवक्षयापि लोकाः शब्दं प्रयुञ्जते । विवक्षाबलेन च लक्षणया तत्परतापि तत्र निर्वहति । वेदे तु लक्षणानिबन्धनं किञ्चिन्नास्तीति स्वाभाविककार्यपरत्वं नापहर्तुं शक्यते । एवं सिद्धपरेऽपि वाक्ये या व्युत्पत्तिः सापि कार्यपरतां न विहन्ति । सर्वपदानामेव हि स्वाभाविकी वृद्धव्यवहारसिद्धा कार्यपरता । लाक्षणिकी च सिद्धपरतेति । सर्वव्यवहारेषु कार्यान्वयाव्यभिचारात् तदन्विताभिधायिता न शक्यते हातुमिति न सामान्येनार्थान्तरमात्रान्विताभिधानं शक्याश्रयणम् । अतश्च वेदान्तानामप्यात्मा ज्ञातव्य इत्यपुनरावृत्तये समाम्नातेन विधिनैकवाक्यतामाश्रित्य कार्यपरत्वमेव वर्णनीयम् । अथ सिद्धार्थप्रतिपत्तिपरत्वेन व्युत्पत्तेरभावाद्वृद्धव्यवहारावगतायाः पदानामन्विताभिधायिताया एवानुपपत्तेः कार्यपरत्वे च प्रमाणान्तरावगतात्मस्वरूपानुवादेनैव वर्णनं कर्तव्यम् । अपिच सिद्धार्थपरत्वेऽपि शब्दस्य न

वेदान्तानां परमानन्दादिरूपत्वे ब्रह्मणः प्रामाण्यमवकल्पते। तत्रहि ब्रह्मस्वरूपानुवादेनानन्दादिरूपविधिरास्थेयः। ब्रह्मस्वरूपञ्च प्रमाणान्तरसिद्धमेवाश्रयणीयम्। ब्रह्मशब्दस्य च लोके प्रमाणान्तरसिद्धात्मवाचित्वेन सिद्धेर्वेदे ऽपि स एवार्थः। तथाच सति नित्यप्रकाशपरमानन्दरूपविधिः सकलप्रतिपत्तिविरुद्धः। सर्वप्रतिपत्तिषु हि प्रमाणस्मृतिभूतास्वात्मा प्रकाशते। नच तत्र परमानन्दः संवेद्यते। नच सांसारिकदुःखाभिभूतत्वात्तस्याप्रकाशः। अभिभवानुपपत्तेः। अवच्छिन्नं हि दुःखमनवच्छिन्नश्चानन्द इति नाल्पीयसा महतो ऽभिभवः सम्भवति। स्वप्रकाशस्य चाभिभवावरणानभिव्यक्तीनामसम्भव एव। अभिन्नात्मनत्वप्रतिपादनमपि प्रमाणान्तरविरुद्धमेवेत्युक्तं तत्त्वालोके। सकलविकारशून्यतापि विज्ञानादिविकारोत्पत्तेःप्रमाणान्तरविरुद्धैवेति परस्परान्वयायोग्यतया नानन्दादिपरत्वम्। अजरामरत्वयोस्तु प्रमाणान्तरप्रसिद्धेरेवानुवादत्वादप्रामाण्यमिति।

नन्वशास्त्रमपि शाब्दमस्ति लौकिकम्। तत्किमिति न लक्षितम्। उच्यते। न शास्त्रव्यतिरिक्तं शाब्दमस्ति शब्दाद्धि यद्विज्ञानमसन्निकृष्टे तच्छास्त्रं स्यात्। नच वेदव्यतिरेकेण तत्सम्भवति। लौकिकं हि वाक्यं नार्थे स्वयं निश्चयमापादयति लौकिकवचसामनृतभूयिष्ठत्वादर्थव्यभिचारस्य शङ्कितत्वात्

नन्वेवमपि वैदिकमपि वचो नार्थनिश्चायकं स्यात् शब्दोत्थापितस्यार्थज्ञानस्य लोके ऽर्थव्यभिचारित्वात्। अथोच्येत वैदिकाद्वचनात् स्वतस्तावन्निश्चयो जायते। पश्चात्तनस्तु संशयस्तद्विरोधादात्मानं न लभते। यथा स्थाणौ समीपवर्तिनि स्थाणुरूपतया निश्चिते न पुनरूर्ध्वता स्थाणुपुरुषसंशयं प्रसूते। उपलब्धौ ह्यव्यवस्थितायां सन्देहो जायते। यदाच

निश्चितोऽर्थस्तदोपलब्धिर्व्यवस्थितेति संशयो न युक्तः। न-चाव्यभिचारनिश्चयपूर्वकं शब्दस्य निश्चायकत्वं येन व्यभिचारे निश्चयो न स्यात्। किन्तु स्वभावत इन्द्रियवच्छब्दो निश्चयहेतुरिति। तन्न। शब्दजनितं निश्चयमेवोभयथा दृष्ट्वा यः संशयः स निश्चयेनैव न शक्यते निराद्धुम्। वाक्यहेत्वन्तरो हि संशयो निश्चयेन विरुध्यते। यः पुनस्तत्प्रभव एव नासौ तेन निरुध्यते।

उच्यते। युक्तस्तावल्लौकिके वचसि सन्देहः। पुरुषा हि प्रायेणानन्वितान्येव पदान्याशयदोषेण वा भ्रमेण वा प्रमादेन वा ऽशक्त्या वा प्रयुञ्जाना दृश्यन्ते। ततश्च यद्यपि तदुक्तानां पदानामन्विताभिधानसामर्थ्यमस्ति तथाप्यनन्वितार्थत्वशङ्कया नान्वयो निश्चीयते। कथं तर्हि लौकिकवाक्येभ्यो व्यवहारप्रवृत्तिः। उच्यते। अर्थसंशयेनापि लोको व्यवहरति। सन्दिग्धायामपि दृष्टौ वृष्ट्यायत्तफले कर्माणि प्रवर्तन्ते। अथ वा ऽस्त्येव निश्चयोपायः। यो हि पुरुषो एवमवधारितो नायमशक्तो न प्रमादी सम्भवदेतदर्थविषयप्रमाणः सकलाशयदोषरहितश्च नायमविज्ञायार्थमन्वितार्थानि प्रयुङ्क्त इति तद्वाक्यप्रयोगस्यान्वयज्ञानपूर्वकत्वादन्वयज्ञानं तावदनुमीयते। अन्वयज्ञानाच्चान्वयो ऽप्यनुमीयते। ज्ञानं हि ज्ञेयाविनाभावि ज्ञेयानुमाने भवत्येव लिङ्गं। तदेवं लौकिकाद्वचसो लिङ्गभूताद्वक्तृज्ञानमनुमीयते। ततो ऽर्थं निश्चित्य व्यवहारः प्रवर्तते। एवञ्च निश्चिते ऽन्वये निवृत्तानन्वयाशङ्काद्वाक्यादप्यर्थनिश्चयो जायते। किन्तु तस्यां दशायामनुवादकतैव। अत एव लौकिके वचने न शाब्दं प्रमाणम्। अभिप्राये शब्दो लिङ्गम्। अभिप्रायो ऽप्यर्थे लिङ्गं। शब्दस्त्वर्थे पश्चान्निश्चयं जनयन्नप्यनुवादकत्वान्न प्रमाणं। नन्वश-

क्तप्रमादिविभ्रान्तदुष्टाशयप्रयुक्तानां पदानामनन्वितार्थत्वदर्शनाच्चा पुरुषान्तरवचनेष्वनन्वितार्थत्वाशङ्का जायते तन्निवृत्तिमात्रएव पुरुषस्य वक्तुः शक्तत्वाप्रमादित्वा ऽभ्रान्तत्वशुद्धाशयत्वज्ञानं व्याप्रियताम् । अर्थनिश्चयस्तु वाक्यादेवापास्तसन्देहादस्तु । माभूद्वक्तृज्ञानादनुमितादर्थनिश्चये जाते वाक्यस्यानुवादकत्वमिति । उच्यते । अभ्रान्तत्वं नाम पुरुषस्य यथार्थज्ञानयोगित्वम् । आशयदोषविरहश्च यथाविदितार्थविवक्षायोगः । शक्तत्वञ्च यथाविवक्षितपदप्रयोगसमर्थत्वं । शक्तस्यापि यथाविवक्षिताविक्षेपश्चाप्रमादो यस्यैतच्चतुष्टयमस्ति स प्रत्ययितः । तस्यैतदवगतं । सम्यग्ज्ञाननियतो ऽस्य वाक्यप्रयोग इति । तेन तदीयवाक्यश्रवणे तद्गतसम्यग्ज्ञाननिश्चयो जायत एव । समीचीनश्चेदं ज्ञानमुत्पद्यते यदर्थाविसंवादि यस्य यथाप्रतीयमानो ऽर्थो ऽस्ति तेन समीचीनज्ञाननिश्चयो ऽन्तर्भावितार्थनिश्चय एवेति न संशयनिवारणमात्रे पुरुषविशेषविज्ञानं व्याप्रियते किन्त्वर्थनिश्चय एवेति निश्चिते ऽर्थे निवृत्ते च संशये वाक्यमर्थनिश्चयं कुर्वदप्यनुवादकत्वान्न प्रमाणं ।

ननु तर्हि वक्तृज्ञानस्यान्यतो ऽनवगतस्यावगमकं पौरुषेयं वाक्यं तत्रैव शाब्दं प्रमाणमस्तु । न । तत्रानुमानत्वात् । वक्तृज्ञाने हि निश्चितसम्बन्धं प्रत्ययितवचनं । वक्ता तु धर्मी । ज्ञानविशेषयोगिवाक्यप्रयोगिते तस्यैकदेशाविति । अत एव च भगवान्काश्यपो वेदान्पौरुषेयान्मन्यमानः शब्दमनुमाने ऽन्तर्भूतमुवाच तस्येदं कारणं कार्यमिति लैङ्गिकमुक्त्वा एतेनैव शाब्दमप्युक्तमिति । वक्तृज्ञानं हि कारणं वाक्यं च कार्यम् । अत एवान्येनाप्युक्तं । वक्तुरभिप्रायं तु सूचयेयुरिति । स एव तथा प्रतिपाद्यमानतया आश्रय इति । ननु यदि वाक्याद्वक्तृज्ञानानुमानं वक्तृज्ञाना-

च्चार्थानुमानं तर्ह्यनवगते ऽर्थे कथं ज्ञानविशेषो ऽनुमातुं शक्यः। अर्थेनैव निराकारस्य ज्ञानस्य विशेषो नचानिर्ज्ञातो ऽर्थो ज्ञाने विशेषमापादयति। उच्यते। अनवगते ऽप्यर्थे ज्ञानविशेषोऽनुमातुं शक्यतएव। यादृशार्थप्रतिपादनयोग्यानि पदानि प्रयुक्तानि तादृशार्थविषयं ज्ञानमनुमीयते। नन्वेवं वेदस्य प्रामाण्यमपास्तम्। व्युत्पत्त्यपेक्षो हि वेदे शब्दादर्थावगमो वृद्धव्यवहारे च व्युत्पत्तिः। वृद्धवाक्यानि चेल्लिङ्गभूतानि न तर्हि स्वार्थे प्रमाणतया व्युत्पन्नानि। उच्यते। यावद्धि पदानामर्थविशेषवाचकत्वं नाश्रीयते तावद्वक्तृज्ञानविशेषो ऽपि नानुमीयते। विशिष्टाद्धि वाक्याद्विशिष्टं ज्ञानमनुमातव्यम्। नचार्थविशेषप्रतिपादकत्वादन्यो वाक्यस्य विशेषो ऽस्तीत्याश्रयणीयमर्थविशेषप्रतिपादनसामर्थ्यमेतेषाम्। अर्थप्रतिपादनसामर्थ्यावधारणमेव च व्युत्पत्तिस्तावतैवार्थप्रतीतिः। अनुवादकत्वे ऽपि च शब्दानामस्त्येव प्रतिपादकत्वम्। वेदेच व्युत्पत्तिवशेनार्थप्रतिपत्तौ जातायां प्रामाण्यमुपपद्यत एव। ननु वेदे ऽपि शङ्कया भवितव्यमित्युक्तम्। सत्यमुक्तमयुक्तं तत्। न तावदन्वयनिश्चयानुपपत्तिर्वेदे सम्भवति। अशक्त्यादिकर्तृदोषवशेन ह्यनन्वितार्थपदप्रयोगो लोके दृष्टः। नच वेदे कर्ता पुरुषो ऽस्ति। तेन तदाश्रितास्तावद्दोषा अनन्वितार्थपदवचने हेतवो वेदे शङ्कामपि नावतारयन्तीत्यर्थनिश्चयस्तावज्जायते। नच पौरुषेयवाक्यजन्यनिश्चयस्य व्यभिचाराद्वैदिके ऽपि निश्चये व्यभिचारशङ्कोचिता शङ्काया दर्शनमूलत्वात्। यथाभूते हि यद्दृष्टं तत् तथाभूतएव पुनः शङ्कामवतारयति। अपिच लौकिकस्यापि तत्र व्यभिचारो नास्ति। प्रत्ययितवचनाद्धयप्रत्ययितवचनमपि भेदेन न प्रतिपद्यमानः प्रत्ययितवचने दृष्टज्ञा-

नपूर्वकत्वं स्मरन् तच्च स्मरणं ग्रहणाद्विवेकेनानवबुध्यमानो ग्रहणव्यवहारं प्रवर्तयति । तत्र न कश्चिद्विचारः ।

ननुच पदसङ्घातात्मकतया वेदा अपि पौरुषेया एव । पदसङ्घाता हि पौरुषेया एव दृश्यन्ते भारतादिवत् । तथाच काठकादिसमाख्यापि वेदे प्रवर्तते । नचेयं प्रवचननिमित्ता समाख्येति कल्पयितुं युक्तम् । साधारणत्वात्प्रवचनस्य । बहवो हि प्रब्रूयुः । कर्ता पुनरसाधारणो भवति । कृतस्य करणायोगात् । असाधारण्येन व्यपदेशा भवन्ति । यथा वैयासिकी भारतसंहितेति । अतः पौरुषेयत्वेन वेदानां तदर्थस्य प्रमाणान्तरविषयत्वात्तद्विषये वक्तुः प्रमाणाभावादनन्वितार्थत्वाशङ्का तत्पदेषु भवन्ती केन वार्यते ।

उच्यते । पुरुषकृतत्वं तावद्वेदानां साक्षाद्भारतादिवन्न स्मर्यते । समाख्यातु पौरुषेयी प्रमाणान्तरानुसारिणी न शक्नोति स्वयमर्थव्यवस्थां कर्तुम् । यदि विचारयन्तः कृतकतामेव निर्णेष्यामस्ततः करणनिबन्धना समाख्या भविष्यति । अथ तु यत्नेनान्विष्यन्तोऽपि पौरुषेयतां नोपलप्स्यामहे ततः प्रवचननिबन्धनेति वक्ष्यामः । तदपि ह्यसाधारणं स्यात् । प्रकृष्टं हि वचनं कस्यचिदेव कुत्रचिदेव तावत्सङ्घातात्मकत्वं न पौरुषेयतामनुमापयितुमलम् । वेदार्थविषयवाक्यविरचनासामर्थ्यानुपपत्तेः । परस्परसंहतार्थया तावद्वेदा उन्मत्तप्रणीता इति न शक्यते वक्तुम् । उन्मत्तप्रणीतस्य चेयतो ग्रन्थराशेः प्रथममध्ययनं कथं प्रवर्तते । के हि सचेतस उन्मत्तोक्तमेतावन्तं ग्रन्थराशिं महता क्लेशेनाधीयीरन् धारयेयुरध्यापयेयुश्च । नच बुद्धादिग्रन्थवद्बुद्धिपूर्वकारिणा प्रोत्साहिता महत्यप्यायासे प्रवर्त्तेरन्नतो बुद्धिपूर्वकारिप्रणीता वेदा इति वाच्यम् ।

न हि बुद्धिपूर्वकारी वेदान् रचयितुमलम्। तदर्थस्य बुद्धावारोपयितुमशक्यत्वात्। प्रमाणान्तराविषयो ह्यपूर्वात्मा वेदार्थः स प्राग्वेदवचनेभ्यो बुद्धिस्थतामापादयितुमशक्यः। ननु बुद्धादिवचनान्यप्येवमेवापौरुषेयाणि स्युः। न। तेषां साध्यसाधनभावमात्रपरत्वात्। साध्यसाधनभावस्य कल्पयित्वापि बुद्धावारोपयितुं शक्यत्वात्। ज्योतिष्टोमादिषु दृष्टं स्वर्गसाधनत्वं चैत्यवन्दनादावारोपयितुं शक्यते। अपूर्वे त्वपूर्वत्वादेवारोपेणापि नावतरति। अथ कथं तुल्ये ऽपि लिङादिप्रयोगे बुद्धादिवचनानि साध्यसाधनभावमात्रपराणि न वेदवाक्यानि। उच्यते। बुद्धादिवचनानि तावत् साक्षाद् दृष्टकर्तृपुरुषाणि। तेन यदेव पुरुषाः प्रमाणान्तरेण बुद्धिस्थीकर्तुमीशते तद्विवक्षाप्रयुक्तान्येवेति निश्चीयते। पुरुषाश्च नापूर्वं बुद्धौ निवेशयितुमलम्। साध्यसाधनभावं त्वन्यत्र दृष्टं बुद्धिस्थीकृत्य विरचयितुं क्षमन्ते। वेदेषु तु साक्षात्कर्ता नोपलब्धः। तेन स्वमहिमानुसारेण तावदर्थो बोद्धव्यः। स चापूर्वात्मकः प्रतीयते। प्रतीते च तस्मिन् शक्तता तद्विषयवाक्यरचने बुद्धिपूर्वकारिणामिति पौरुषेयत्वं नानुमीयते। यत्र हि पदसङ्घाताः पौरुषेयैर्विरचयितुं शक्यन्ते तत्रैव पौरुषेयत्वं दृष्टमित्यशक्यविरचनेषु पौरुषेयत्वानुमानं न क्रमते। नच पौरुषेयत्वं विना पदसङ्घातात्मकतैव नोपपद्यते। उच्चारणवशेन हि पदानि संहततामापद्यन्ते। तच्चोच्चारणान्तरपूर्वकं वा स्यात्स्वबुद्धिप्रभवं वा दृश्यते ह्यन्येनापि प्रयुक्तमन्येनाधीयमानं भारतादिवत् यथा ऽद्यतनाः पुरुषा भारतादिकमुच्चारणान्तरमधीयते तथा वेदानपि सर्वपुरुषा एवेति किमनुपपन्नम्। अतः सिद्धमपौरुषेया इति। अपौरुषेयाश्चेन्नास्ति प्रमाणान्तरापेक्षा प्र-

सक्षवत् । अतः प्रमाणमनपेक्षत्वादित्युक्तम् ।

ननु चित्रया यजेत पशुकाम इत्यादिचोदनाः पश्वादिफलानुबद्धस्वार्थं बोधयन्ति । न च कर्मानन्तरं फलमुपलभ्यते । न च कालान्तरे फलं भविष्यतीति शक्यं । कर्माभावात् । अतः प्रमाणान्तरबाधादप्रमाणं शास्त्रं ।

उच्यते । न तावच्छास्त्रेणानन्तरभावितया फलं श्राव्यते येनानन्तरफलादर्शनेन बाधः स्यात् । नच कालान्तरे कर्माभावात्फलोत्पादासम्भवः । कालान्तरावस्थायिनो ऽपूर्वादेव फलोत्पत्त्यवगमात् । नच कालान्तरे प्रतिगहादिकारणान्तरदर्शनमपूर्वस्य फलसाधनतां बाधते । कामं प्रमाणद्वयसमर्पितमुभयं फलसाधनमस्तु। शास्त्रेण ऽपूर्वं फलसाधनमवबोधितम् । प्रत्यक्षादिभिः प्रतिग्रहादिकमिति । नच कालान्तरभाविनि फले कर्त्तुर्भोक्तृत्वमनुपपन्नं । नित्यत्वात् । बुद्धीन्द्रियशरीरेभ्यो हि भिन्नः पुरुषः कर्मणां कर्ता सच नित्यतया कालान्तरभावीन्यपि फलानि भोक्तुमलमिति न प्रमाणान्तरबाधादपि शास्त्रस्य प्रामाण्यमाक्षेप्तुं शक्यम् ।

अत्रापि शिष्टिः शास्त्रमिति ज्ञानं शास्त्रं । शिष्यते ऽनेनेति तु शब्दः स च द्विविधः प्रत्यक्षो ऽनुमेयश्च किं पुनः शब्दानुमाने लिङ्गम् । अष्टकाः कर्तव्या इति वचनं । कथम् । इयं तावत्स्मृतिस्त्रैवर्णिकैरेवाविगानेन परिगृहीता । नच निर्मूलायाः परिग्रह उपपद्यते । मूलं च न प्रत्यक्षादि सम्भवति। तस्य कार्यत्वविषयत्वाभावात्। स्मृतौ चापूर्वकार्यावगमात् शास्त्रं सम्भवति मूलं । ननुच तदपि मूलं नावकल्पते । प्रयत्नेनाप्योलाच्यमानस्यानुपलम्भात् । नचानुपलब्धः शब्दो ऽर्थमवबोधयति । नचार्थमनवगमयन्मूलं भवितुमर्हति । उच्यते । सत्यम् । वयमिव मन्वादयो ऽपि तच्छास्त्रं प्रत्यक्षं नोपल-

भन्ते अनुमानं तु तेषामप्यस्माकमिव सम्भवति। स्मृत्यन्तरं हि महाजनपरिगृहीतं दृष्ट्वा ते ऽपि तत्कर्तुः स्मृत्यन्तरानुमितं शास्त्रं मूलभूतमनुमातुं शक्नुवन्त्येवमनादित्वात्स्मृतिपरम्पराया लिङ्गभूतायाः सम्भवान्नानुमानविघातः। शब्दार्थसम्बन्धवत्। यथाहि वृद्धव्यवहारदर्शनेन प्रयोज्यवृद्धस्यार्थप्रतिपत्तिं प्रकल्प्य तस्याश्च शब्दश्रवणानन्तरभावित्वेन शब्दस्य तत्कारणतां प्रतीत्य कथं पुनर्ममा ऽप्रतिपादकः शब्दो ऽस्यार्थप्रतिपादक इति च वितर्क्य पुनः स्वयं ततः शब्दादर्थमवगम्य प्रतिपादकत्वेनावगतः शब्दो ऽर्थमवबोधयतीति निश्चित्य बुद्धस्यार्थप्रतिपत्तिसामर्थ्यं कल्पयित्वा स कथमनेन वृद्धेनार्थप्रतिपादकतया शब्दो ऽवधारित इति विचिन्त्य नूनमस्यापि वृद्धव्यवहारान्तरदर्शनमेव व्युत्पत्त्युपायभूतं ममेव वृद्धान्तरस्याप्यपरवृद्धव्यवहारान्तरदर्शनमेवेत्यनादिवृद्धव्यवहाररूपालिङ्गपरम्परां परिकल्प्य लोको व्युत्पद्यते। तथा स्मृतिपरम्परामनादिमेव कल्पयित्वा शास्त्रानुमानमपि कुर्वन्ति। नचानुमितस्य शास्त्रस्यार्थप्रतिपादकत्वमनुपपन्नं। लिप्यनुमितिवत्। सर्वदाच तस्याश्रवणमनाम्नातत्वात्। अनाम्नानमेव कस्मादिति चेत्। आचार्य्यैरनाम्नातत्वात् तदपि कथमिति चेत्। आचार्य्यान्तरैरनाम्नातत्वादिति न दोषः। नच तस्याशब्दत्वं। वर्णात्मकत्वात्। प्रत्येकञ्च वर्णानां श्रोत्रेन्द्रियग्राह्यत्वात्। वेदत्वं च तस्याप्यपौरुषेयं वाक्यरूपत्वात् तन्मात्रवर्त्तित्वाच्च वेदशब्दस्य। तस्मादनुमेयमपि शास्त्रमस्ति।

प्रत्यक्षमपि शास्त्रं किञ्चिदध्याहारापेक्षं पिण्डपितृयज्ञादिशास्त्रं वैदिकशास्त्रं च पिण्डपितृयज्ञादौ हि नियोज्यपदाश्रवणादपरिपूर्णं वाक्यं। ननु पदानामन्विताभिधायित्वेन व्यु-

त्पत्तेर्भवत्त्वेकपदप्रयोगेऽन्विताथान्तरापेक्षत्वादन्विताभिधानस्य तदसिद्धावपरिपूर्णता । अनेकपदप्रयोगे त्वन्विताभिधानस्य सिद्धत्वात्किं निबन्धनमपरिपूर्णत्वम् । उच्यते । अत्राप्यभिहितार्थस्यानुपपत्त्या भवत्येवापरिपूर्णता । अत्रापि लिङादिभिरपूर्वं कार्यरूपमभिधीयते । नचानुष्ठानमन्तरेण कार्यरूपता निर्वहति नच कर्तारमन्तरेणानुष्ठानोपपत्तिः । नचाधिकारमप्रतीत्य कर्मणि कर्तृतां प्रतिपद्यन्ते । कर्मणि चाधिकारो नियोगे नियोज्यस्यावकल्पते । यो हि ममेदं कार्यमिति प्रतिपद्यते स स्वकीयकार्यसाधनं कर्म स्वार्थतया प्रतिपद्यमानो ऽधिकारी स्यादिति नियोज्याश्रवणे ऽपि कार्यत्वानिर्वाहादुपपन्नमपरिपूर्णत्वम् । अतो लोके अपरिपूर्णवाक्यपरिपूरकतया ऽवधारितो ऽध्याहारो वेदे ऽप्याश्रीयते । कः पुनरयमध्याहारो नाम । अधिकृत्वस्य बुद्धौ निवेशनं । बुद्धौ सन्निहिते श्रूयमाणः शब्दः स्वार्थमन्वितमभिधत्ते । तस्य तु विशेषावगतो योग्यत्वं लाघवञ्च कारणं । तथाहि । यद्यपि जीवनमन्तरङ्गं नित्यञ्च तथापि तस्मिन्नियोज्यविशेषणे समाश्रीयमाणे विधेरपरमनुष्ठानाक्षेपकत्वं कल्पनीयं काम्ये त्वधिकारिविशेषणे तदर्थितयैव प्रधाने प्रवृत्तेर्विधेरनुष्ठानाक्षेपकत्वकल्पना न कर्तव्या । यद्यपि चोपात्तदुरितक्षयो ऽपि पुरुषैरिष्यते तथापि तस्योपात्तदुरितसत्तासापेक्षत्वाद्गौरवं । तस्मात्सकलपुरुषाभिलषणीयं सकलदुःखसम्भेदरहितं सुखं स्वर्गपदाभिधेयं नियोज्यविशेषणं कल्प्यते । कथं पुनस्तादृशसुखवाचकता स्वर्गशब्दस्या ऽवसीयते । उच्यते । ज्योतिष्टोमेन स्वर्गकामो यजेतेत्येवमादिसमाम्नायं सकलदुःखसम्भेदरहिताभिलाषोपनीतदीर्घतरसुखसाधनत्वेनार्थवादैः स्तूयमानं कर्म दृश्यते । स्वर्गशब्दो ऽपि लोके कस्मिंश्चिदर्थे श्रौत्या वृ-

त्या प्रयुज्यमानो दृश्यते। यो ऽप्यस्य चन्दनादौ प्रयोगः सो ऽपि प्रीत्यपगमे तत्रैवाप्रयोगात्प्रीतिसाधनवाचकत्वल्पने ऽपि प्रीतेरपि वाच्यत्वाश्रवणात्प्रीतिमात्रवाचकस्य तत्साधने लक्षणयापि प्रयोगोपपत्तेर्लाक्षणिक एव। तत्र यदि विध्युद्देशगतः स्वर्गशब्दस्तथा सुखे वर्तते ततो ऽर्थवादानां मुख्यैव वृत्तिः स्तुतावपि स्यादिति तादृशसुखवाचकता स्वर्गपदस्याश्रीयते, चन्दनादिष्वपि यो लाक्षणिकः, प्रयोगः सो ऽपि प्रशंसार्थः सुतरां ततः तद्विधसुखसाधनत्वापादनेनैवोपपद्यते। तथा च यावत्तावत्सुखसाधने स्वर्गशब्दं न प्रयुञ्जते किन्तु सातिशयप्रीतिजनके। स्वर्गपदाभिधेयसुखसम्भवे चोक्तेन न्यायेनाम्नाय एव प्रमाणं तदन्यथानुपपत्त्या च तदुपभोगयोग्यदेहदेशसद्भावो ऽपि नानुपपन्नः। सामान्यतोदृष्टानुमानं तु न नियोज्यकल्पनायां प्रमाणं। अध्यापनादौ व्यभिचारदर्शनात्। विध्यन्तरप्रयुक्त्या चानुष्ठानलाभाद्परिपूर्णतापि नास्ति विकृतिषु करणोपकारजनकपदार्थवर्गाणामनाम्नानात्तद्व्यतिरेकेणोपकारासम्भवात्तदभावे करणस्य कार्यसाधनासमर्थत्वात्कार्यस्य कार्यत्वानिर्वाहादपरिपूर्णत्वे सति परिपूरणार्थमध्याहारः कर्त्तव्यः। तच्च तावत्स्वतन्त्रपदार्थाध्याहारो नोपपद्यते विशेषावगमे कारणाभावात्। करणोपकाराध्याहारे ऽपि प्रकृतिवदपरिक्लृप्ताध्याहारे पुनरपि पदार्थानामभावे निर्वाहासम्भवात्प्रकृतोपकाराध्याहारः कर्त्तव्यः। तत्रापि प्रकृतीनां बहुत्वाच्चोदनालिङ्गसामान्याद्या बुद्धौ सन्निधीयते तदीयोपकाराध्याहारो युक्तः तदध्याहारे तथैवापरिपूर्त्तेः पदार्थाकाङ्क्षायां तदुपकारोपस्थापितैः पदार्थैरन्वितामभिधानम्। यद्यपि चासावुपकारः प्रकृतौ तत्पदार्थजन्यतया निर्ज्ञातः तथाप्यपूर्वप्रयुक्तत्वात्पदार्थानां प्राकृतापूर्वसम्बन्धस्यैव स-

तस्तस्योपकारस्य ते पदार्था जनका नापूर्वान्तरसम्बन्धस्येति सम्प्रति वैकृतापूर्वं सम्बन्धमुपगतः करणोपकारो न तत्पदार्थजन्यतयाऽवसीयत इत्यस्ति तज्जनकपदार्थाऽपेक्षेति पूर्वप्रतीतसम्बन्धेनोपकारेणोपस्थापितैः पदार्थैरन्वितो विध्यर्थः स्वशब्देनाभिधीयते । उपमानं तु प्राकृतोपकारपदार्थसम्बन्धे न प्रमाणम् । सादृश्यमात्रविषयत्वात् । अतोऽध्याहाराऽपेक्षमपि प्रत्यक्षं शास्त्रम् ।

तथा प्रत्यक्षमपि शास्त्रं वचनव्यक्त्यवधारणाय लोकप्रसिद्धन्यायाऽपेक्षम् । यावद्धि लोकप्रसिद्धन्यायानुसारेण वचनव्यक्त्यवधारणं न क्रियते न तावत्समीचीनार्थबोधोत्पादनक्षमं शास्त्रम् । तथाहि । उद्भिदा यजेत पशुकाम इति किं गुणविधिरुत नामधेयमिति सन्देहे न्यायाभासापादितगुणविधिनिराकरणं सम्यङ्न्यायानुसारेण कृत्वा नामधेयाऽध्यवसानेन व्यक्तिनिर्धारणं यावन्न क्रियते तावत्समीचीनवाक्यार्थबोधो नास्तीत्यनेन मार्गेण न्यायापेक्षं शास्त्रम् । अतएवेतिकर्तव्यताभूता वेदस्य स्वार्थमवबोधयतो मीमांसा । तथा चाहुः

धर्मे प्रमीयमाणे हि वेदेन करणात्मना ।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यतीति ॥

कियत्पुनः पदजातमेकं शास्त्रं । नच शक्यं वक्तुं यावतां पदानामेकार्थत्वं तावदेकं शास्त्रम् । अर्थभेदे तु शास्त्रभेदो मन्त्रवत् । यथा मन्त्रेषु यावता पदजातेनैकोऽर्थः प्रतीयते तावदेकं वाक्यमित्यवगम्यते तथा शास्त्रमपीति । युक्तं मन्त्रेषु प्रमाणान्तरप्रमितार्थेषु तत्र हि तत्त्वमन्यथात्वं वाऽर्थस्यावधारयितुं शक्यते । शास्त्रं तु प्रमाणान्तराऽप्रतीतार्थावबोधकं तदर्थस्य तत्त्वमन्यथात्वं वा शक्यते नान्यतोऽवसातुम् । उच्यते ।

शब्दानामर्थावच्छेदेनैव सर्वत्रैकतोपपत्तेः। पदतापि वर्णाना-मर्थावच्छेदेनैव। स त्वर्थोऽवच्छेदकः शास्त्रस्य शास्त्रादेवावग-म्यते। कः पुनरसौ। विषयः। साध्यश्च। कः पुनर्विषयो नाम। उच्यते। कार्यमेव हि विध्यर्थः कार्यश्च कृतिसाध्यम्। कृतिश्च प्रयत्नः। सच सर्व एव भावार्थसम्बद्धः। तेन कार्यं प्रतीयमानं कृतिविशिष्टं प्रतीयते। नान्यथा। कृतिरपि भा-वार्थेन विशिष्यते। तेन भावार्थः कृतिं विशिंषन् कार्यं वि-शिनष्टीति विषय उच्यते। यो हि येन विशिष्यते स तस्य विषयः। अतश्च यावति पदसङ्घ एको विषयस्तावत्येको नि-योगार्थः तदैक्याच्चैकं शास्त्रम्। तत्र नियोगाभेदस्यापि विष-याभेदोन्नेयत्वाद्विषयाभेदादेव शास्त्रमेकं व्यवस्थाप्यते तद्भे-दाच्च भिन्नम्। पञ्चधा च विषयभेदोऽवसीयते। तत्र यजति जुहोति ददातीत्यभिधानभेदाद्यागादीनां भेदोऽवगम्यते। दे-वतोद्देशेन द्रव्यत्यागो यागः। का पुनर्देवता कश्चोद्देशः। कश्च त्यागः। उच्यते। स्तोत्रं शस्त्रं यद्गुणवचनं यदुद्देशेन च हविषां त्यागश्चोद्यते सा देवता। तत्रैव याज्ञिकवृद्धानां देवताशब्द-प्रयोगात्। यत्र ह्याग्नेयादिदेशनार्थानुष्ठाने प्रवृत्तोऽग्निमुद्दिश्य हविस्त्यजति तत्रैवमाहुरग्निरत्र देवतेति। उद्देशश्च चतुर्थ्यन्तत-द्वाचकशब्दप्रयोगः। त्यागश्च सम्बन्धिनि स्वे औदासीन्यस-ङ्कल्पः। स चानभिसंहितपरस्वत्वापत्तिफलको यागः। देश-विशेषगतद्रव्यप्रक्षेपोपाधिकश्च स एव होमः। अभिसंहितपर-स्वत्वापत्तिफलश्च दानमिति। अभिधानभेदाद्यजत्याद्यनुब-न्धभेदावगमः। तथा विध्युच्चारणादसत्यप्यभिधानभेदे भावा-र्थभेदोऽवगम्यते। असन्निकृष्टार्थावबोधनस्वरसं हि सर्वमेव वि-ध्याम्नानम्। तदर्थबोधेनैवमवसीयते नूनं भिन्ना इमे धात्वर्था

इति । तद्भेदे विषयभेदाद्विषयिणो भेदोपपत्तेरसन्निकृष्टार्थावबोधस्वभावता विध्याम्नानस्य निर्वहति । नन्वेवं तर्हि पुरुषः स्वेच्छया पुनर्विधिमामनति तदापि तर्हि विषयभेदः स्यात् । न । स्वतन्त्रत्वादुच्चारणस्य । यद्धि न पूर्वोच्चारणदर्शनपूर्वकमुच्चारणं तदपौरुषेयं स्वातन्त्र्येण परिच्छेदकम् । यत्पुनरस्वतन्त्रं तत्पौरुषेयं प्रमाणान्तरोपात्तार्थावबोधकम् । नच तत्र भेदे प्रमाणमस्तीति न भेदो विषयस्य । शाखान्तरगतस्तर्हि विध्याम्नानाभ्यासो भेदकः स्यात् । नेत्युच्यते । अभ्यासाभावात् । यत्र ह्येकएव वक्ता पुनःपुनस्तमेवार्थमुच्चारयति तत्राभ्यासो व्यपदिश्यते । शाखान्तरगतं विधिं पुरुषान्तरं पठतीति नाभ्यासः शक्यते वक्तुम् । एवमपि पुरुषान्तराम्नानमेव कस्माद्भिन्नमर्थं न प्रतिपादयति । उच्यते । एकार्थप्रतिपादकत्वे ऽपि तदाम्नानस्यासन्निकृष्टार्थत्वोपपत्तेः । तस्य हि पुरुषस्य सो ऽप्यर्थो ऽसन्निकृष्ट एव यद्यपि पुरुषान्तरेण प्रतीतः। एकत्वं तु कथम् । वैषयैक्यात् । तदैक्यं चाभिधानैक्यात् । तथा साध्यमपि तत्रैकमेव । यद्येवं तर्हि य एवं विद्वान्पौर्णमासीं यजत इत्यत्रापि तद्भेदः स्यात् । न । अभ्यासकल्प्यस्य भेदस्यानिर्वाहात् । रूपभेदेन हि भेदो निर्वहति यागस्य हि द्रव्यदेवते रूपम् । ताभ्यां हि स रूप्यते । नर्ते हि ताभ्यां स भवतीति । यद्यप्यत्र द्रव्यमविहितमपि यत्किञ्चिदुपादाय क्रिया सिद्ध्यति यद्यपि चावाचनिकमपि ध्रौवमाज्यं द्रव्यं गम्यते तथापि देवता नाविहिता भवतीति विधानमन्तरेण तदलाभः । नच यजिरेव तदन्वितस्वार्थमाचक्षाणो देवतां विधातुमलम् । विशेषावगमे कारणाभावात् । नापि वार्त्रघ्नीममावास्यायामनूच्येते इति मन्त्रविधानान्मान्त्रवर्णिकदेवताश्रयणं सम्भवति ।

मन्त्रविधेरभावात् । आज्यभागयोर्ह्ययं विधिर्द्विवचनानुरोधादिति स्थितम् । तस्मादनुवादमन्तरेण रूपालाभादनुवादो ऽयमिति नाभ्यासात्कर्मभेदः । नन्वेवं तर्हि प्रकृतसर्वरूपवद्यागानुवादः किमिति न स्यात् । ततश्चानुदितानां दर्शपूर्णमासाभ्यां यजेतेत्यधिकारसम्बन्धाद्राजसूयवत्सर्वयजीनां प्राधान्यं स्यादङ्गत्वमाघारादीनां न सिद्ध्येत् । उच्यते । सर्वानुवादाश्रयणे दर्शपूर्णमासाभ्यामिति द्विवचनं नोपपद्यते । सर्वसमुदायानुवादद्वयेन सर्वेषामेव दर्शशब्दवाच्यता पूर्णमासशब्दवाच्यता चावगम्यते । ततश्च दर्शाश्च पूर्णमासाश्चेति कर्मधारयो ऽयं समासः । तत्र यजीनां विशेष्याणां बहुत्वाद्बहुवचनं स्यान्न द्विवचनम् । अतस्तदनुरोधेन केषांचिदेव तावद्य एवं विद्वान्पौर्णमासीं यजतइत्यनुवादो न सर्वेषां । तथा य एवं विद्वानमावास्यां यजत इति केषांचिदेवानुवादः । तेनानुवादद्वयेन समुदायद्वयापत्तेर्द्विवचनान्तोपपदवशेन तेषामेवाधिकारसम्बन्धः । तत्र केषां पूर्णमासीयुक्तोऽनुवादः केषाञ्चामावास्यायुक्त इत्यपेक्षायां काल निमित्तोपपदानुसारेणोत्पत्तिकालयोगिनामेवानुवाद इति निश्चयो जायते । अन्यथा विशेषाग्रहणादिति न सर्वानुवादो न सर्वेषां प्राधान्यमिति । तथा गुणान्तरयोगादप्यनुबन्धभेदोऽवगम्यते । उत्पत्तौ यत्कालानुबद्धं यत्कर्म प्रतीयते ततोऽन्येन कारकेणानुबद्धं तन्न शक्यतेऽवगन्तुमित्यनुबन्धभेदावगमः । तथा संज्ञान्तरादप्यनुबन्धभेदोऽवगम्यते । अन्याय्यं ह्येकस्यार्थस्यानेकशब्दवत्त्वमिति भेदस्तावदौत्सर्गिकः । यत्र तु बलीयसा प्रमाणेनानेकशब्दत्वमपि गम्यते भवति तत्रैक्यम् । तथा विधानान्तरादपि कर्मान्यत्वावगमः । विधानान्तरञ्च सन्निहिते कर्मण्यनेकगुणसंयुक्तकर्मग्रहणात् ।

तत्रहि गुणविधिस्तावन्न सम्भवत्यनेकगुणश्रवणादनेकगुण विधाने वाक्यभेदप्रसङ्गात्। गुणविशिष्टकर्मविधौ तु तस्यैवैकस्य विधानादेकवाक्यत्वनिर्वाहात् कर्मैव विधेयम्। विधीयते चेत्ततः प्रकृतादन्यत्वम्। तथाऽसन्निधानादप्यप्रत्यभिज्ञानात्कर्मविधानावगमाद्भेदावगमः। प्रकरणान्तरमपि कर्मणः प्रक्रियान्तरं विधानान्तरमेव। सङ्ख्या तु भावार्थमात्रभेदे प्रभवति न विषयभेदे। यथा सप्तदश प्राजापत्यानिति प्राजापत्यप्रातिपदिकोपात्तानां द्रव्यदेवतासम्बन्धानां नियोगविषयत्वं। तेच सकृदेवाभिहिताः सकृदेव सम्बन्ध्यन्ते दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेतिवदिति न भेदेन विषयभावं भजन्ते। साध्यभेदादपि शास्त्रभेदोऽवसीयते। यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति च। नहि यावज्जीवचोदना कामाधिकारे कालविधानार्था। लक्षणाप्रसङ्गात्। यावज्जीवनलक्षितो हि कालो विधेयः। किञ्च जीवनकालएव नियोगस्य प्राप्तत्वाद्यावदर्थसम्बन्धेन विधेयत्वं। तावांश्च कालो नानभ्यस्तेन प्रयोगेण शक्यते व्याप्तुमिति यजेतेत्यपि यागमभ्यसेदिति वर्णयितव्यं। ततश्चाऽभ्यासलक्षणाऽप्यपरेति जीवतोऽधिकारान्तरमेतदाश्रयणीयं। जीवने ह्यधिकारिविशेषणे सति जीवतोऽवश्यं यागेन भवितव्यमिति सिद्धा यागेन जीवनव्याप्तिरभिधीयते यावज्जीवमिति। ततश्च नियोज्यभेदान्नियोगस्यापि भेदोऽवश्यम्भावि। तद्भेदाच्च शास्त्रभेद एव। नियोज्यो हि स्वसम्बन्धितया ममेदं कार्यमिति नियोगमवबुध्यते तेन स्वकृतिसाध्यमपूर्वं प्रतिपद्यते। कृतिभेदेन च कार्यस्यापि भेदः। तेन नियोज्यः कृतिं भिन्दन् कार्यमपि भिनत्ति। अतो नियोगभेदस्यापि शास्त्रभेदहेतोर्नियोज्यभेदो-

भेयत्वात्तद्भेदेनैव शास्त्रभेदो व्यपदिश्यते । नियोज्यभेदेनावश्यं साध्यभूतस्यैश्वर्यलक्षणस्याधिकारस्य भेद इति साध्यभेदोपलक्षणीयोऽयं शास्त्रभेदः । साध्यभेदेन चानुबन्धभेदाभिन्नानामप्यङ्गप्रधानोत्पत्तिशास्त्राणामधिकारशास्त्रावस्थायां भेदः । एकस्याधिकारिनियोगस्य तावतां प्रतिपाद्यत्वादिति ।

एतच्च शास्त्राख्यं प्रमाणमनुमानतः स्पष्टभेदमेव । न ह्यत्र गम्येनार्थेन गमकशब्दस्य सम्बन्धनियमोऽवगतो नापि गम्यस्यार्थस्य किञ्चित्प्रत्येकदेशत्वं नापि च गमकस्येति सामग्रीभेदादनुमाना ऽऽशङ्कापि नास्ति । किं पुनरत्र निवर्तितम् । उच्यते । अर्थग्रहणेनाभिधेयवचनेन लौकिकवक्तुरभिप्रायज्ञानमशास्त्रम् । असन्निकृष्टग्रहणेन पौरुषेयवाक्याभिधेयस्यार्थस्य वक्त्रभिप्रायनिश्चयपुरःसरं यद्विज्ञानं तन्न शास्त्रमिति दर्शितं । तथा वेदेऽप्यर्थवादानां न स्वतन्त्राणां शास्त्रत्वं किन्त्वर्थवादतया विध्यर्थवादतया विध्यन्तरानुप्रवेशेनेति । शब्दग्रहणेनैवार्थस्या ऽशास्त्रत्वमुक्तं । यथा प्रकृतौ वाससि मिनोति वाससा चोपावहरतीति यस्मिन्नेव वाससि सोमो मीयते तेनैव तेनैव वाससोपावाह्रियत इति । एकत्वात्कर्मणो ऽचोदितमपि तदर्थात्सम्पन्नम् । अहर्गणे तु पृथक्त्वात्सोमस्यैकस्मिन्नपि वाससि नानाभूतस्यापि प्रमातुं शक्यत्वात् । उपावहरणं तु पुटीकृत्य वाससा नयनं तदेकेन न शक्यमिति मानवाससो ऽन्यत्तदर्थमुपादीयते । एकत्वं तु वाससः प्रकृतावार्थं न शास्त्रार्थ इति न चोदकेन व्याप्यत इति तत्र वासस एकत्वज्ञानं न शास्त्रमिति । विज्ञानादिति न्यायाभासाद्वाक्यस्य वचनव्यक्तिमवधार्य यत्तदर्थज्ञानं तन्न शास्त्रमिति प्रकटितं । नहि तच्छब्दविज्ञानाद्यादृशं तत्सम्यङ्न्यायाव-

धार्यवचनव्यक्तिकं शास्त्रं तादृशमविज्ञाय तद्ज्ञानमिति न शास्त्रम्।

इति महामहोपाध्यायश्रीशालिकनाथमिश्रकृतौ प्रमाणपारायणे तृतीयः परिच्छेदः समाप्तः।

उपमानपरिच्छेदः।

सादृश्यदर्शनोत्थं ज्ञानं सादृश्यविषयकमुपमानं। दृष्टगोः पुरुषस्य गवयं तत्सदृशं पश्यतो यद्गोविषयकं गवयसदृशज्ञानं तदुपमानं। किं पुनरिदं सादृश्यं। नेदं द्रव्यगुणकर्मसामान्यसमवायविशेषाणामन्यतमम्। एष्वपाठात्। उच्यते। विषयोऽस्य वित्तिसिद्धो ऽन्यो द्रव्यादिभावेभ्यः। सर्ववस्तूनि संविदेकशरणानि। अस्ति चेयं सदृश इति संवित्। सा च सर्वत्र विषयाव्यभिचारिणीति दर्शितं नयवीथ्याम्। अतः संवित्स्वभावसिद्धं सादृश्यं न पाठाभावादपन्हवमर्हति। तच्च न द्रव्यं गुणकर्मणोरप्याश्रितत्वात्। गन्धादयो ऽपि हि सदृशबोधगोचरी भवन्ति भवन्ति च कर्माण्यपि कर्मान्तरसदृशबुद्धिबोध्यानि। अत एव न गुणत्वं नापि कर्मत्वम्। अनुवृत्तप्रत्ययनिमित्तत्वाभावाच्च न सामान्यं। समवायस्तु सम्बन्धरूप इति न तत्र सादृश्यान्तर्भावः। विशेषाख्यं तु पदार्थं प्रमाणवादिनो नानुमन्यन्ते। सहि पृथक्त्वादतिरिक्तो नानुमातुं शक्यते। पृथक्त्वं हि परमाणूनां द्रव्यारम्भणलक्षणकार्योन्नेयं। तदतिरेकिणि तु विशेषे न किञ्चिदनुमानं। नच परमाणुपृथक्त्वमेव लिङ्गं। नित्यत्वात्। कार्यं हि स्यात्कारणस्य लिङ्गं। नच परमाण्वाश्रितं पृथक्त्वं कार्यमिति प्रमेयपारायणे निर्णीतम्। अतः प-

दार्थान्तरमेवेदं शक्तिवत्संख्यावच्चेति प्रमेयपारायणएवोक्तं। तच्च सादृश्यं प्रत्यक्षद्रव्यवर्त्ति प्रत्यक्षग्रहणावयवगुणकर्मसामान्यग्रहणनिबन्धनं प्रत्यक्षम् अन्यत्र सामान्यान्तबाहुल्यानुमेयं।

तदिदमुपमानं न प्रत्यक्षं तिरोहिते गवि चक्षुः सन्निकर्षातिवर्त्तिनि जायमानत्वात्। नच स्मृतिः। गोदर्शनसमये ऽप्रतीतगवयस्य तत्सादृश्यानुभावाभावात्। नानुमानं। लिङ्गाभावात्। एकदेशो हि लिङ्गं। नच गोर्गवयस्तद्गतं वा गोसादृश्यमेकदेशः। ज्ञानसम्बन्धनियमश्च हेतुः। न गोगतेन सादृश्येन सह कश्चिदपि गवयवर्त्तिनः सादृश्यस्य सम्बन्धो ऽस्तीति कुतस्तरां तस्य नियमावगमः। नचापि परस्परसदृशवस्त्वन्तरदर्शनसापेक्षेयं प्रतीतिर्यतः सम्बन्धनियमज्ञानबलभाविनीत्युच्यते। प्रथममप्येकं वस्त्वीदृशमीक्षमाणस्य परस्मिन्वस्तुनि सादृश्यमतिराविर्भवति। नन्ववयवसामान्यबाहुल्याच्चानुमानं सम्भवत्येव। गवयं हि गवावयवसामान्यबाहुल्यभाजं प्रतीत्यैवावधारणा जायते। यो यदवयवसामान्यबाहुल्यवान्स तत्सदृश इति। तेन गां गवयावयवसामान्यबाहुल्ययोगिनं स्मरतो गवयसादृश्यविषयमनुमानमुपपन्नमेव। तथाहि गवयवर्त्तिना गोसादृश्येन सहावयववर्त्तिनां सामान्यानामेकार्थसमवेतसमवायलक्षणः सम्बन्धो ऽस्ति गवये हि सादृश्यं समवेतं तस्मिन्नेवावयवास्तदीयाः समवेतास्तेषु तत्सामान्यानि समवेतानीत्युपपन्न एकार्थसमवेतसमवायलक्षणः सम्बन्धः। तन्नियमो ऽपि चास्त्येव सामान्यबाहुल्यस्य। गोधर्मतापि तस्योपपन्ना। समवेतसमवायलक्षणयोगित्वात्। अतो घटतएवानुमानसामग्रीत्युपमानमनुमानान्न भिद्यते। उच्यते। सम्बन्धनियमस्मरणमनुमानोदयकारणं। न पुनः सम्बन्धनियमावधारणमेव। अत्र चाव-

यवसामान्यभाजो गवयस्य सदृशता प्रतीयमानस्यैवोपमानहेतुत्वमिति कारणभेदादुपमानमनुमानाद्भिन्नं । प्रत्यक्षवत् ।

अत्र च सादृश्यदर्शनोत्थमित्यनेनैन्द्रियकस्य सदृशज्ञानस्योपमानता निराकृता । सादृश्यविषयकं ज्ञानमिति किं निराकृतम् । उच्यते । गोसदृशो गवय इति पुरुषवचनाद्गोसादृश्यं गवयस्य प्रतीत्य यत्तदवयवसामान्यबाहुल्यज्ञानं गवये जायते तन्नोपमानमित्युक्तं । यत्तु सदृशदर्शनमात्रेण कस्मिंश्चिदर्थे तत्सदृशस्वरूपमात्रे स्मरणं तस्योपमानत्वमेव न प्रसक्तं । प्रमाणलक्षणाधिकारात् । स्वरूपस्मरणं हि न प्रमाणं । प्रमाण विषयस्य चेदं लक्षणमाख्यायते । तेन तन्निवृत्त्यर्थं सादृश्यविषयग्रहणमयुक्तम् । एतेनैवासदृशाद्यत्सदृशभ्रान्तिविषयात्तत्सदृशविषयज्ञानं तदप्यनुमानं नाशङ्कनीयमेवाप्रमाणत्वादित्युक्तम् ।

यत्तु प्रसिद्धार्थस्य साधर्म्यादप्रसिद्धार्थसाधर्म्यमुपमानमित्युक्तं तदयुक्तम् । तथाहि । यादृशो गौस्तादृशो गवय इति श्रुतातिदेशवाक्यस्य वने गवयमुपलभमानस्यायं गवय इति प्रतीतिरुपमानफलमुच्यते । तत्र तावद् गोसदृशो गवय इति प्रथमावगतिः पुरुषवाक्यमात्रप्रभवा नोपमानं भवति । यदपि वनगतस्य गवये तद्गते च गोसादृश्ये ज्ञानं तदपि प्रत्यभिज्ञाप्रत्यक्षं । या त्वेतस्य गवयशब्दवाच्यतावगतिः सापि गवयशब्दप्रयोगादानुमानिकी । यस्य शब्दस्य यत्र प्रयोगस्तस्य तद्वाच्यतया सम्बन्धनियमोऽवगतः । वने च सञ्ज्ञिनमुपलभ्यैतस्यैव सा मया संज्ञावगतेति तज्ज्ञानं स्मरणमेवेति नोपमानस्यावकाशः । तस्माद्यथोक्तलक्षणमेवोपमानमिति स्थितम् ।

इति प्रमाणपारायणे उपमानं नाम
चतुर्थः परिच्छेदः ।

अर्थापत्ति परिच्छेदः ।

विना कल्पनयाऽर्थेन दृष्टेनानुपपन्नताम् ।
नयता दृष्टमर्थं या साऽर्थापत्तिस्तु कल्पना ॥ १ ॥

दृष्टेनार्थेन दृष्टस्यार्थस्यार्थान्तरकल्पनायामसत्यामनुपपत्तिमापादयता याऽर्थान्तरकल्पना सा ऽर्थापत्तिः । यथा जीवतो देवदत्तस्य गृहादर्शनेन बहिर्भावस्य दृष्टस्य कल्पना ।

नन्वेतद् गृहाभावदर्शनाज्जीवतो बहिर्भावकल्पनामनुमानमेव तथाहि । यो जीवन्नेकत्र नास्ति सोऽन्यत्रास्तीति स्वात्मन्येव प्रतीतं तेन प्रतीतसम्बन्धनियमादेकत्राविद्यमानत्वादन्यत्र विद्यमानत्वावगमोऽनुमानमेव युक्तम् । तथा हि । जीवत एकत्राऽभावान्यत्रा ऽभावावेककालत्वलक्षणसम्बन्धयोगिनौ समुद्रवृद्धिचन्द्रोदयवदेकदेशभूतौ च कालस्येति । यदा जीवन्नेव देवदत्तो गृहे नास्ति तदा बहिरस्तीत्यनुमानं भवति । तथैकत्राभावे सति विद्यमानत्वाद्यो यो गृहाभावे सति विद्यमानः स स ततोऽन्यत्रास्ति यथाहमेवेति प्रमातुरनुमानमुत्पद्यते ।

अत्रोच्यते । न तावद्विद्यमानत्वं लिङ्गं सम्भवति । स्वयं सन्देहास्पदीभूतत्वात् । विद्यमानता हि देवदत्तस्य गृहाधिकरणैव येन ताम प्रतीता तस्य बहिर्देशसम्बन्धेऽप्रत्याकलिते गृहाभावदर्शनेन देवदत्तस्य विद्यमानता प्रमाणान्तरप्रतीतापि सन्देहमावहति । गृहे देवदत्तोऽविद्यमानः कथं विद्यमान इति । प्रतीते ऽपि हि वस्तुनि पूर्वाप्रतीतरूपान्तरावगमः संशयमापादयितुमलमेव । देवदत्तस्य च विद्यमानता गृहसम्बद्धैवावगतेति तदभावप्रतीतौ बहिर्देशसम्बन्धे चानवगते सन्दिह्यते । तेन सा सन्देहग्रस्ता सती न लिङ्गतां गन्तुमलम् । बहिर्देशसम्बन्धावगमादपगतसन्देहा भविष्यति लिङ्गमिति चेत् । न ।

अनुमेयाभावात्। बहिर्देशसम्बन्धएव हि देवदत्तादेरनुमित्सितः स चेत्प्रतिपन्नो न मेयमवशिष्यते।

तथाहुर्वार्त्तिककारमिश्राः—

तेन मेयानपेक्षस्य सन्दिग्धत्वादहेतुता।
हेतुत्वं यावति स्वस्ति ततो नान्यत्प्रमीयते॥

तेन सन्देहास्पदीभूता विद्यमानता तावदवगत्यन्तरप्रसवसमर्था न भवति। नच गृहाभावो बहिर्देशसम्बन्धावगमे लिङ्गमित्युपपन्नम्। तस्य हि न केवलस्य लिङ्गत्वमभ्युपगमनीयं किन्तु जीवनविशिष्टस्य। शुद्धस्य गृहाभावमात्रस्य मृतेषु जनिष्यमाणेषु च विनापि बहिर्भावमुपपत्तेः। तदुक्तं—

गेहाभावस्तु यः शुद्धो विद्यमानत्ववर्जितः।
स मृतेष्वपि दृष्टत्वाद्बहिर्दृत्तेर्न साधकः॥

इति जीवनञ्च विशेषणभूतं सन्दिग्धमिति न तद्विशिष्टस्य लिङ्गत्वम्। तस्मात्केवलस्याभावस्यैव स्वयं निःसन्दिग्धस्य गमकत्वं युक्तम्। नच तस्य सन्देहापत्तौ किञ्चन प्रमाणमस्ति। ननु तस्य केवलस्य गमकत्वे मृतस्य जनिष्यमाणस्य च बहिर्देशसम्बन्धावगतिः प्रसज्येत। उच्यते। अर्थान्तरकल्पनायामनुत्पन्नायां यः ससंशयं कञ्चिदनुमापयितुमलं तस्य गमकत्वम्। तथा हि। बहिर्देशकल्पनायामजातायां गृहाभावो देवदत्तस्य विद्यमानता संशयमापादयन्बहिर्देशसम्बन्धस्य गमकः। मृतजनिष्यमाणयोश्चाभावो न कञ्चिदपि संशयमापादयतीति न गमकः। अतो नातिप्रसङ्गः। तदेव चात्र गम्यं यत्कल्पनायामसत्यां सन्देहापत्तिः कल्पनायाञ्च तद्विगमः। मा चैवं सत्यप्यभावस्य गमकत्वेनानुमानत्वम्। ज्ञानोदयप्रकारभेदात्। सम्बन्धनियमस्मरणोपकृतादेकदेशदर्शनाज्ज्ञानमनु-

मानम्। गृहाभावस्तु बहिर्देशसम्बन्धकल्पनायामनुत्पन्नायां सत्यां विद्यमानतायां संशयमापाद्य संशयसंशमाय बहिर्देश सम्बन्धं कल्पयतीति नानुमानत्वसम्भवः। धूमादिकन्तु लिङ्गं न कस्य चित्संशयमापाद्याग्निं गमयतीति नार्थापत्तिसम्भवः।

श्लोकौ च भवतः।

तत्सन्देहव्युदासाय कल्पना या प्रवर्तते।
सन्देहापादकादर्थादर्थापत्तिरसौ स्मृता॥
यत्कल्पनां विना योऽर्थः प्रतीतेऽप्येति संशयम्।
तेन तत्कल्पनामेके त्वर्थापत्तिं प्रचक्षते॥

यस्मिन्नकल्पिते योऽर्थः प्रमितोऽपि दृष्टरूपान्तराभावेन संशयरूपामनुपपत्तिं भजते सोऽर्थः स्वगतसन्देहव्युदासाय तस्यार्थान्तरस्य कल्पनां प्रसूते सा चार्थापत्तिः। प्रमाणप्रतीतश्चार्थो दृष्टरूपार्थान्तराभावेन संशयमापन्न एवार्थापत्तेर्जनक इति दर्शनबलादाश्रीयते। यथा ह्यनुमानस्य निश्चितं लिङ्गं जनकं तथाऽर्थापत्तेः सन्देहग्रस्तमिति नास्ति विरोधः। अतएव चानुमानादपि भेदः। निश्चित एव धूमोऽग्नेर्गमको न तस्य किञ्चिदर्थान्तरमनुपपत्त्यापादकमस्ति गृहाभावस्तु विद्यमानताया अनुपपत्तिमातनोति। तेन गृहाभावेन विद्यमानतैव बहिर्देशसम्बन्धकल्पनायामभूतायामनुपपत्तिमापादिता स्वात्मनो बहिर्देशसम्बन्धं कल्पयतीति भिन्नाऽनुमानादर्थापत्तिः। तदेवं गृहाभावो बहिर्भावकल्पनया विद्यमानताया अनुपपत्तिमापादयन्बहिर्भावं कल्पयति। अथ वा विद्यमानतैव गृहाभावेनानुपपत्तिमापादिता स्वोपपत्तये बहिर्देशसम्बन्धमुपकल्पयतीति। यस्तु मन्यते। गृहाभाव एवान्यथानुपपद्यमानो गमक इति।

तदयुक्तं। तथाहि का गृहाभावस्यान्यथानुपपद्यमानता।

यदि तावद्बहिर्देशसम्बन्धेन विना नास्तिता। जीवतो गृहाभावो बहिर्देशसम्बन्धेन विना नास्तीति। यद्येवं साध्याभावेन हेतुभावव्यतिरेकलक्षणोऽयम्। सच हेतुभावस्य साध्याभावनियतसम्बन्धित्वेन सम्पद्यते नान्यथा। न ह्यनन्तेषु साध्याभाववत्सु विपक्षेषु हेत्वभावनियमोऽन्यथाऽवधारयितुं शक्यते यावद्धेतुभावस्य साध्यभावेन सम्बन्धनियमो नावधार्यते। अवधारिते हि तस्मिन्नर्थापत्त्या साध्याभावे हेत्वभावनियमोऽवसीयते। द्वे हि कोटी। हेतुभावो हेत्वभावश्चेति। तत्र हेतुभावकोटौ साध्यभावेन सम्बन्धनियमे सिद्धे साध्याभावस्तत्रावकाशं न लभते। स यदि हेत्वभावकोटावपि न स्यात्तदा नोपपद्येतैव। तेन हेतुभावकोटौ साध्यभावेन सम्बन्धनियमो ऽवगतो हेत्वभावकोट्यप्रवेशकल्पनायामनुपजातायां साध्याभावस्यानुपपत्तिमापादयन्हेत्वभावकोटिनिवेशं कल्पयति। तथा सति हेत्वभावेन साध्याभावो नियतसम्बन्धः सम्पद्यते। तस्मात्साध्याभावेऽयं नास्त्येवेत्यवगम्य या प्रतीतिः सा सम्बन्धनियमावगमपूर्विकेत्यनुमानान्न भिद्यते। अथ गृहाभावस्य बहिर्देशकल्पनायामनुपपत्तिः संशय्यमानता न सा सम्भवति। न हि गृहाभावस्य संशयापत्तौ किञ्चित्कारणमस्ति। विद्यमानतायास्तु गृहसम्बन्धितयैव दर्शनाद् गृहाभावेन संशयमापाद्यत इत्युच्यते।

अत्र केचित् पीनो देवदत्तो दिवा न भुङ्क्त इति वाक्येन दिवासम्बन्धितयाऽवगतस्य भोजनस्य दिवानिषिद्धस्य पीनत्वानुमितस्यानुपपत्त्या रात्रौ भुङ्क्त इति वाक्यमेव कल्प्यत इति वदन्ति। तदयुक्तम्। अत्राप्यर्थस्यैव कल्पयितुमुचितत्वात्। यस्मिन्ह्यकल्पिते ऽनुपपत्तिस्तदर्थापत्त्या प्रतीयते।

रात्रिसम्बन्धे ह्यनवगते भोजनस्यानुपपत्तिः। कालान्तरं सम्बन्धाभावेन ह्येषाऽनुपपत्तिः सा कालान्तरसम्बन्धमेव कल्पयितुमलम्। अथोच्यते। अर्थसद्भावमेव कल्पयितुमर्थापत्तिः प्रवर्तमाना स्वार्थस्य सविकल्पज्ञानं वेद्यत्वात् सविकल्पज्ञानानां च शब्दपुरःसरत्वात् पुरोवर्त्तिनि शब्दएवार्थापत्तिः पर्यवस्यति स च शब्दः स्वार्थमुपस्थापयति। न चेदमाशङ्कनीयं लौकिकमैन्द्रियकं च सर्वं सविकल्पकं शब्दएवानेन न्यायेन पर्यवस्येदिति। यतो निर्विकल्पकदशायामिन्द्रियस्य लिङ्गस्य चार्थएव सामर्थ्यं दृश्यते तेन सविकल्पावस्थायामप्यर्थ एव तयोर्व्यापारः परिकल्प्यते। श्रुतार्थापत्तिबोधस्तु निर्विकल्पको न सम्भवति। शब्दव्युत्पत्तिपूर्वकत्वात्। व्युत्पन्नशब्द एव हि पूर्ववाक्यस्यार्थमवबुध्य तदन्यथानुपपत्त्याऽर्थान्तरमवबुभुत्सते। अथोच्यते। दृष्टार्थापत्तावर्थएवार्थापत्तेः प्रमाणत्वं दृष्टमिति श्रुतार्थापत्तेरपि तत्रैव प्रामाण्यं स्यादिति। तन्न। यस्मिन् खल्ववगते ऽनुपपत्तिः शाम्यति तत्रार्थापत्तेः प्रामाण्यं। शब्दे ऽपि चावगते शाम्यत्येवानुपपत्तिरतस्तत्रापि प्रामाण्यं नायुक्तमिति। अत्रोच्यते। रात्रिसम्बन्धे हि भोजनस्यावगते ऽनुपपत्तिरापतति। सा तावच्छब्दस्वरूपमात्रे ऽवगते ऽपि न शाम्यति यावत्ततः शब्दाद्रात्रिसम्बन्धो भोजनस्य नावगम्यते। नहि पीनो देवदत्तो दिवा न भुङ्क्त इति प्रयुज्य यदा पुनरेवमुच्यते यामिन्यामत्तीति तदा यामिनीशब्देऽत्तौ चाव्युत्पन्नस्य पूर्ववाक्यार्थविषयानुपपत्तिरुपरमति। अतो ऽर्थस्यैव साक्षादुपपादकत्वं न शब्दस्य। उपपादकविषयात्वार्थापत्तिर्दृष्टार्थापत्तौ प्रतीतेति न क्वचिदुपपादकावबोधे शब्दे प्रमाणतामर्हति। किञ्चान्यत्र तावत्सविकल्पके शब्दस्य स्मृतिविषयताङ्गीकरणीया। एवं चेद-

अपि स्मृतिविषय एव शब्दोऽस्तु माभूत्तस्य प्रमाणविषयता । अतः श्रुतार्थापत्तिरपि शब्दग्राहिणी न भवति किन्तूपपादकार्थग्राहिण्येवेति स्थितम् ।

इति श्रीशालिकनाथकृतौ प्रमाणपारायणे
पञ्चमः परिच्छेदः ।

अभावसम्भवैतिह्यप्रामाण्यनिराकरणं नाम षष्ठः परिच्छेदः ।

ये पुनरभावाख्यं षष्ठं प्रमाणमिच्छन्ति तत्प्रतिबोधनाय सम्प्रति यत्न आरभ्यते । तथाहि । सर्वं प्रमाणं प्रमेयाऽविनाभावि । नचाभावाख्यस्य प्रमाणस्य प्रमेयं किंचित् प्रतीतिबलसिद्धम् । एवमभावाख्यमपि प्रमाणं न शक्नोति स्वसामर्थ्येनैव प्रमेयमपकल्पयितुं । तथाहि । इह भूतले घटो नास्तीति तावदस्ति प्रतीतिः सा तावद्भूतलमात्रविषया न भवति सत्यपि घटे प्रसङ्गात् । अथ केवलभूतलविषयेत्युच्यते । तत्रापि चिन्तनीयं । किमिदं कैवल्यं । यदि तावद्भूतलस्वरूपमेव तदा सत्यपि घटे तस्याऽनपायान्नास्तीति धीः स्यात् । अथ भूतलधर्मः कैवल्यं तत्रेदं विचारणीयं । किं तत् प्रत्यक्षादिबोध्यमुत प्रमाणान्तरप्रमेयमिति । तत्र प्रत्यक्षप्रमेयं तावन्न भवति । इन्द्रियव्यापारमन्तरेण प्रतीतेः । नैतद्युक्तम् । व्यापृतेन्द्रिय एव हीह भूतले घटो नास्तीत्यवबुध्यते । नान्धादिः । अत्रोच्यते । क्वचित्कस्य चिदभावः प्रतीयते तेन यत्राभावः प्रत्येतव्यस्तद्ग्रहणायेन्द्रियव्यापारापेक्षा नाभावग्रहणाय । कथं पुनरयं विभागोऽवसीयते । उच्यते । भावग्रहणमात्रोपरतेन्द्रियव्यापारस्याप्यभावप्रतीतिदर्शनाद्भावमात्र एवेन्द्रियव्या-

पारापेक्षेति विज्ञायते । तथाहि । स्वरूपमात्रेण गृहादिकं। प्रतिपन्नवतो देशान्तरगतस्यापि तत्र भावान्तरसत्तां जिज्ञासमानस्याभावावगमो जायते। नच शक्यते वक्तुं गृहीतएव तत्रापि प्रागेवाभाव इति । भावान्तरस्यैव तदानीं बुद्धावनारोहात् । तेनेन्द्रियव्यापारानपेक्षाऽभावप्रतीतिर्नैन्द्रियकीति न प्रत्यक्षमेयं कैवल्यं। नच वाच्यं प्रवृत्तिनिवृत्ती द्वे गती सर्व प्रमाणानां तत्र प्रवर्तमानं प्रमाणं भावसाधकं निवर्तमानं त्वभावसिद्धिनिबन्धनमिति । या निवृत्तिः प्रमाणस्य स्वतस्तावदवगतिरूपा न भवति सा कथमभावसिद्धिमाविर्भावयति। प्रवृत्तिस्तु प्रमाणानामवगमात्मिका तात्र्यवस्थापयितुमलम्। अथ प्रमाणनिवृत्तिरवगत्यन्तरं जनयित्वाऽभावं व्यवस्थापयति। आयातं तर्हि प्रमाणान्तरं। भवतु प्रत्यक्षात्प्रमाणान्तरम्। अनुमानात्तु भेदो नास्ति। दृश्यस्य हि सत्ता दर्शनेन व्याप्ता। दर्शनं निवर्त्तमानं दृश्यमपि निवर्तयति। व्यापकनिवृत्तिर्हि व्याप्यनिवृत्त्या व्याप्ता। व्याप्याच्च व्यापकावगतिरनुमानमेव भवति। तदिदमयुक्तं। सर्वत्र हि व्याप्यं व्यापकं चावगम्य व्याप्तिरवसीयते। इह च व्याप्या च व्यापिका च निवृत्तिरेव। सा चोभयात्मिका न भावग्राहकप्रमाणावसेयेति न व्याप्त्यवधारणं सम्भवतीति कथमनुमानता। लिङ्गभूतप्रमाणनिवृत्त्यनवक्लृप्तश्चानुमानत्वासम्भवः। तस्माद्भावग्राहकप्रमाणाऽननुवृत्तिरेवाभावावगमं प्रसूते। तच्चाभावाख्यं प्रमाणं। यद्भावग्रहणयोग्यं तन्निवृत्तिरेवाभावमवबोधयतीति नातिप्रसङ्गदोषोऽत्र जायते। अतोऽभावाख्यमपि प्रमाणं स्वमहिम्नैव विषयमुपकल्पयति भावग्राहकप्रत्यक्षादि–प्रमाणपञ्चकवत्। अपि च कण्टकादिविरहिणि भूतलादौ यो निःशङ्कः पाद-

न्यासादिव्यवहारः प्रवर्तते स तावद्भूलमात्रपरिच्छेदनिबन्धनो नाभ्युपगमनीयः कण्टकादिसंयोगिन्यपि प्रसङ्गात्। अथ केवलभूतलादिपरिच्छेदनिबन्धन इत्युच्यते। तत्रापि विकल्पनीयं। किं केवलस्य भूतलादेः परिच्छेदाद्व्यवहारप्रवृत्तिः। अथ केवलाद्भूतलपरिच्छेदादिति। तत्राग्रिमपक्षपरिग्रहे भूतलादिस्वरूपातिरिक्तकैवल्यपरिच्छेदाभ्युपगमादङ्गीकृतमभावस्य प्रमेयत्वम्। पश्चिमपक्षावलम्बने तु भूतलमात्रपरिच्छेदे जाते श्लक्ष्णेषु कण्टकादिष्वनवगतेषु व्यवहारो यदि प्रवर्तते तदा सूक्ष्मकण्टकजिज्ञासा निष्फला भवेत्। प्रयत्नपूर्विकया हि जिज्ञासया केवलभूतलपरिच्छेद एव लब्धव्यः स चोद्गनापि प्रयत्नं लब्धो निष्फलं प्रयत्नपूर्वकं सूक्ष्मकण्टकाद्यन्वेषणं। कैवल्यपरिच्छेदपूर्वके तु व्यवहारे कैवल्यपरिच्छेदस्य प्रयत्नमन्तरेणाशक्यत्वाद्युक्त एव प्रयत्नः। दृश्यादर्शनं ह्यभावावगमकारणं। नच सूक्ष्माः कण्टकादयः प्रयत्नमन्तरेण दृश्यतामापाद्यन्त इति दृश्यत्वापत्तये युक्तैव प्रयत्नपूर्विका जिज्ञासा। अपि च शशादीनां शृङ्गाद्यनुमानं स्यादभावस्यापरिच्छेद्यत्वात्। अभावस्य तु प्रमेयत्वे बाधितविषयत्वेनानुमाननिरोधो युक्त इति। उच्यते। भूतलादिभावानामवगतिः। एका तावद्भावान्तरसंसृष्टविषया। अपरा च तदेकविषया। यापि च सा तदेकविषयाबुद्धिः। सा च द्वेधा। तदन्येषु प्रतियोगिषु बुद्धिः सैव तेषां प्रतियोगिनामभाव इत्युच्यते। यो ऽपि हि प्रमेयमभावमाह सोऽपि प्रतियोगिषु दृश्येषु तदेकविषयां बुद्धिं तावदवश्यमभ्युपैति नहि संसृष्टविषयबुद्ध्युदयेनाप्यदृश्ये प्रतियोगिन्यभावो ऽवगम्यते। किञ्च दृश्यादर्शनमभावावगमे प्रमाणं। न च प्रमाणमन्तरेण प्रमेयसिद्धिरस्तीति यत्राभावो ऽभ्युपग-

मनीयस्तत्रावश्यं दृश्यादर्शनमाश्रयणीयम्। तुल्योपलम्भयोग्यस्य चार्थान्तरदर्शनेन दृश्यानुपलम्भोऽवधार्यते। अतो दृश्यप्रतियोगिविषया तदेकोपलब्धिरेव वरमभावोऽस्तु। ननु यद्यभावो नास्ति कथं तर्हि यत्र प्राक् संसृष्टबुद्धिरासीत्तत्र तदेकविषया बुद्धिराविर्भवति प्रध्वंसाभावाभ्युपगमे तु सा स्यात्। अपिच विनापि तदेकविषयां बुद्धिमभावावगतिरस्ति। अनुमानाद्येकविषयाणां भावानामनुमानाद्यभावेऽभावो दृश्यते। तत्र तुल्योपलम्भयोग्यभावान्तरैकविषया बुद्धिर्नास्त्यथ चाभावो ऽवगम्यत इति तदेकविषयबुद्धिंव्यतिरेकेणाप्यभावोऽवगम्यते। अत्राभिधीयते। यस्यापि मते प्रध्वंसाभावः स्वीक्रियते तमपि प्रति पर्यनुयोगोऽयं शक्यते यस्य यत्र भाव आसीत् कथं तस्य तत्राभाव इति। स चेत् पर्यनुयुक्तो ब्रूते यत् कारणोपनिपातवशेन तस्मिन्नेवाभावो जायते ततो वयमपि वदितुं शक्ताः कारणोपनिपातादेव तदेकविषया बुद्धिराविर्भवती[ति]। यथैव स वादी प्रध्वंसाभावस्य कारणमाह तथैव तदेकविषयाया बुद्धेरपि वयं वदितुं क्षमाः। अत्रोच्यते। मुद्गराभिघातादिः क्षणिकोऽभावस्य कारणं स कथं कालान्तरे तदेकविषयां बुद्धिं जनयति। हन्त तर्हि कपालाद्युत्पत्तिस्तदेकविषयबुद्धिकारणमस्तु। एतेन देशान्तरनीते वस्तुनि तदेकविषया बुद्धिर्व्याख्याता। अत्रापि देशान्तरं नीतस्य तत्र स्थितिरेव तदेकविषयबुद्धिनिमित्तमिहाश्रयणीयम्। ननुच भवतु स्वकारणोपनिपातात्तदेकविषया बुद्धिः संसृष्टविषयाऽपि तु किमिति न स्यात्। तस्याः कारणविनाशात्सा न स्यादिति चेत्। अङ्गीकृतस्तर्हि नाशापरपर्यायोऽभावः। उच्यते। न वयमपि संसृष्टबुद्धेः कारणविनाशमभावं ब्रूमः

किन्तु भावान्तरोदय एव कारणविनाश इति ब्रूमः । ननु निरन्वयविनाशानां बुद्ध्यादीनां कस्य भावान्तरस्योदयो विनाशः । उच्यते । धर्मिणः स्वरूपमात्रेणावसानं तत्र भावान्तरम् । ननु किमिदं स्वरूपमात्रम् । न तावत्स्वरूपमेव तस्य धर्मोदयकालेऽप्यविनाशात् । तस्माद्धर्माभाव एव धर्मिणः स्वरूपमात्रमित्यङ्गीकरणीयम् । उच्यते । न भावातिरिक्तोऽभावोऽङ्गीक्रियते भाव एवत्वेकाकी सद्वितीयश्चेति द्वयीमवस्थामनुभवति । तत्रैकाकी भावः स्वरूपमात्रमुच्यते । योऽपि चाभावाख्यं तत्त्वान्तरमभ्युपैति तेनापि तावदेकाकि भावोपलम्भनमाश्रित्याभावप्रमितिरङ्गीकरणीया । न ह्यप्रतीते भावेऽभावः प्रतीयते । तत्र कीदृशस्य तावद्भावस्य प्रतीतिरभावावगतौ निमित्तमिति चिन्तनीयम् । किं सद्वितीयस्याथ भावविशिष्टस्याथवा भावाभावानपेक्षस्यैकाकिन इति । तत्र न तावत् सद्वितीयस्य भावपुरःसरमभावज्ञानं सम्भवति विद्यमानस्यैवाभावावगमप्रसङ्गात् । नाप्यभावविशिष्टभावा[illegible]य-निमित्ताभावावगतिः । आत्माश्रयदोषप्रसङ्गात् । अभावे हि प्रतीते तद्विशिष्टं भावमवसायाभावः प्रतिपत्तव्य इत्यभावावगतिरेवाभावबोधोदये कारणमिति व्यक्तमात्माश्रयत्वम् । किञ्चाभावप्रतीत्यनुप्रवेशिन्यां भावावगतौ नाभावाख्यं प्रमाणान्तरं स्यात् ।

स्वरूपमात्रदृष्टं हि वेश्माद्यर्थं स्मरन् पुनः ।
तत्रान्येनास्तितां पृष्टस्तदैव प्रतिपद्यते ।

इत्थंभावस्य प्रमाणान्तरत्वे युक्तिः । प्राक्तनस्वरूपावगतावेव चेदभावोऽपि प्रतीतो न प्रमेयमवशिष्यते । प्रमेयाऽऽन

वशेषे न प्रमाणान्तरमवकल्पते । तस्मादेकाकिभावप्रतीतेरेकाकिन्येवाभावप्रतीतिर्निमित्तमित्यास्थेयम् । अतोऽप्रतीतेऽप्यभावे स्वरूपमात्रं प्रतीयते इतीतरेतराभावो मात्रशब्देन प्रतिपाद्यत इति । अतो भावान्तरोदयादेव तदेकविषयबुद्ध्युदयः । संसृष्टबुद्ध्यनुदयो ऽपि स एवेति न किञ्चिद् दूषणम् । यच्च तदेकविषयबुद्धिव्यतिरेकेणाप्यभावोऽवगम्यत इत्युक्तम् । अत्रोच्यते । न प्रत्यक्षरूपैव तदेकविषयबुद्धिरभावरूपेष्यते किन्त्वनुमानाद्यात्मिकापि तदेकविषया बुद्धिरुत्पद्यते । सैवाभावो व्यपदिश्यते । ननु च तदेकविषया यदि बुद्धिरभावः कथं तर्हि घटाभावादिव्यवहारः । न हि तस्याः कश्चिदपि घटादिभिः सह सम्बन्धोऽस्ति । उच्यते । न तदेकविषयबुद्धिमात्रमभावोऽभिधीयते किन्तु दृश्ये प्रतियोगिनि या तदेकविषया बुद्धिः सा तदभावो व्यपदिश्यते । तेन यस्मिन् प्रतियोगिनि दृश्ये या तदेकविषया बुद्धिः सा तदभाव इति विशेषव्यपदेशः प्रवर्त्तते । तेनेह भूतले घटो नास्तीति किमुक्तं भवति दृश्येऽपि घटे भूतलमात्रमुपलभ्यत इति । तदेकविषयाच संवित्तिः स्वप्रकाशतया न प्रमाणान्तरमपेक्षते । किञ्च प्रमाणान्तरवादिनापि प्रमाणान्तराभावः सत्त्वमात्रेणाभावबुद्धिजनको नाभ्युपगमनीयः किन्तु विदितत्वेन । तथाहि । कस्यचिद्वस्तुनः क्वचिद्दृष्टस्य पुनस्तस्मिन्नेव दृश्यमानस्य दर्शनकालभाविनमभावं प्रतिपद्यते नासीदयमिहेति । तदा च तत्र दर्शनाभावो निवृत्तः कथमभावावगमं जनयेत् । यदि सत्तयाऽभावबोधकस्ततो भवेत् । बुद्ध्युपारूढस्य हि जनकत्वेऽतीतस्यापि सम्प्रत्यनुसन्धीयमानस्य घटत एवाभावबोधोपपादकत्वम् । तथा चक्षुरादिकं स्वसत्तामात्रेण स्वकार्य-

कारि न चातिवृत्तं स्वकार्यं जनयति लिङ्गञ्च बुद्धिविषयापन्नं लैङ्गिकावबोधे जनकमतीतमपि स्मर्यमाणं स्वकालवृत्तिलैङ्गिक मनुमापयति तथेदं द्रष्टव्यम् । एवं चातिपतितस्यापि प्रमाणाभावस्याभावावगमकत्वाद्बुद्ध्यारूढस्य जनकत्वमङ्गीकरणीयम् । तत्र यदि प्रमाणाभावो यः सोऽभावरूपस्तदा तस्याप्यवगतिर्विदितादेव कारणादङ्गीकर्त्तव्येत्यनवस्था । यदि तु भावान्तरसंवित्तिरेव प्रमाणाभावोऽभ्युपगम्यते ततस्तस्याः स्वयम्प्रकाशतया नानवस्था ऽऽपद्यते । तथाच सति भावान्तरसंवित्तिरेव स्वयम्प्रकाशा प्रमाणाभावरूपा प्रमेयाभावोऽस्तु किमपरेण प्रमेयाभावेन नास्तीत्यादिशब्दप्रयोगो ऽपि तस्यामेव स्वयम्प्रकाशायां भावान्तरोपलब्धौ युज्येत न पुनर्नास्तीत्यादिबुद्धिराविर्भवति बोध्यान्तरानवभासात् । योऽपि पदन्यासादिव्यवहारः सोऽपि दृश्ये प्रतियोगिनि तदेकविषयबुद्धिनिबन्धन इति दृश्यत्वापत्तये युक्तैव सूक्ष्मजिज्ञासा । तथाविधप्रतिपत्त्युदय एव चाभाव इति जाते तस्मिन्ननुमानं भावसाधकं न प्रवर्त्तते । ननु यथा प्रमाणाभाव एवावश्यम्भावितया प्रमेयाभावो ऽङ्गीक्रियते तथा प्रमाणसद्भाव एव तर्हि प्रमेयसद्भावः स्यात् । प्रमेयसद्भाववादिनापि हि प्रमाणसद्भावोऽवश्या ऽऽश्रयणीय इति प्राप्तो बाह्यार्थापलापः । नैतदेवम् । प्रमेयस्य हि बहिरर्थस्य स्वरूपान्तरप्रतिभासात् । प्रमितिर्हि प्रमित्येकरूपतयैव भासते । प्रमेयं नीलाद्याकारतया । अभावस्य तु स्वरूपावगतिर्नास्तीति न प्रमाणाभावादन्यः प्रमेयाभावः । प्रमाणाभावोऽपि च स्वरूपान्तरानवगमादेव न भावान्तरप्रमितेर्भिद्यते । भावान्तरप्रमितिश्च स्वयंप्रकाशरूपा न प्रमेयतामनुभवतीति प्रमेयमभावा-

ख्यस्य प्रमाणस्य नोपपद्यते। प्रमेयासद्भावाच्च न प्रमाणान्तरमवकल्पत इति स्थितम्।

यत्पुनः सम्भवाख्यं प्रमाणमिच्छन्ति। शतादिसंख्यापरिच्छिन्नेषु वस्तुष्वन्तरगतानां विंशत्यादिसंख्याग्राहकं तदनुमानान्न भिद्यते। तथाहि। ये महासंख्यायोगिनस्तेषामवयवेष्ववान्तरसंख्यायोगो दृश्यते तेनावयवानामवान्तरसंख्यायोगनियतसम्बन्धा महासंख्या अवयववर्त्तिनीमवान्तरसंख्यामनुमापयतीति व्यक्तमनुमानत्वम्।

ऐतिह्यमप्यप्रतीयमानमूलभूतप्रमाणान्तरपरम्परावचनमात्रं न प्रमाणतां प्रतिपद्यते। लोकेऽपि प्रत्यक्षादिप्रमाणव्यतिरिक्तः कश्चिन्नोपलक्ष्यते प्रतिभावितार्थनिश्चयसमर्थ इति न प्रमाणतां प्रतिपत्तुमर्हतीति पञ्चैव प्रमाणानीति। ननु यदिन्द्रियपथाऽतिवर्त्तिनि ह्रस्वज्ञानं तदप्रमाणान्तरं भवितुमर्हति। तथा हि। तत्तावन्न प्रत्यक्षम्। केवलह्रस्वदर्शने ह्रस्वबुद्ध्यभावात्। दीर्घदर्शनह्रस्वदर्शनपूर्वकम्। भवतु प्रत्यक्षम्। तत्प्रतीतौ पुनरजातायां यदिन्द्रियानिपतिते स्वरूपमात्रेणावसिते ह्रस्वज्ञानं तन्न प्रत्यक्षम्। नापि तदनुमानम्। ह्रस्वदीर्घयोः परस्परसम्बन्धनियमाभावात्। न शास्त्रम्। अपूर्वार्थत्वाभावात्। नोपमानम्। असादृश्यविषयत्वात्। नचार्थापत्तिः। ह्रस्वकल्पनायामसत्यां कस्यचिद्दीर्घत्वानुपपत्त्यापादकस्याभावात्। उच्यते। परिमाणविशेषा एते यदणुत्वं महत्त्वं दीर्घत्वमिति। परिमाणं च प्रत्यक्षद्रव्यवर्त्ति प्रत्यक्षमिष्यते। तदाह भगवान् काश्यपः। संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे चं रूपिद्रव्यसमवायाच्चाक्षुषाणीति। तेन दीर्घमप्रतियतः। परिमाणविशेषज्ञानं

ह्रस्वे वस्तुनि जातमेव किन्तु ह्रस्वशब्दस्तत्र न प्रवृत्तः । तत्प्रवृत्तेर्दीर्घप्रतीतिसापेक्षत्वात् । अल्पदेशव्यापि हि ह्रस्वमुच्यते ऽधिकदेशव्यापि च दीर्घम् । हस्तादिसंख्याल्पत्वमहत्त्वाभ्यां च देशस्याल्पत्वं महत्त्वञ्च । पूर्वापरभावनियमेन च संख्याल्पत्वमहत्त्वे अवधार्येते । तेन पूर्वसंख्यापरिच्छिन्न हस्तादिसंख्याव्यापि ह्रस्वशब्देनोच्यते । संख्यापरिच्छिन्नहस्तादिप्रमेयदेशव्यापिदीर्घशब्दवाच्यवस्तुप्रतीतिसापेक्षा ह्रस्वशब्दप्रवृत्तिः । तथा च ययोरल्पान्तरत्वेन साक्षादूनाधिकदेशव्यापिता न प्रतीयते तत्र दीर्घह्रस्वशब्दौ न प्रवर्तेते । हस्तादिना तु परिच्छिद्य तत्संख्याल्पत्वमहत्त्वे अवधार्य तौ प्रयुज्येते । संख्यानां च परस्परं पूर्वापरभावः प्रत्यक्षसिद्ध एवेति न प्रमाणान्तरं व्याप्रियत इति ।

तस्माद्यथोदितलक्षणविषयफलानि पञ्चैव प्रमाणानीति सिद्धम् ॥

इति महामहोपाध्यायश्रीशालिकनाथकृतौ प्रमेयपारायणे षष्ठः परिच्छेदः ।

समाप्तं चेदं प्रमाणपारायणं नाम पञ्चमं प्रकरणम् ।

अमृतकलानाम षष्ठं प्रकरणम्।

स्वरूपसंख्यार्थफलेषु वादिभि-
र्यतो विवादा बहुधा वितेनिरे।
अतो वयं तत्प्रतिबोधसिद्धये
प्रमाणपारायणमारभामहे ॥ १ ॥

अनुभूतिः प्रमाणं सा स्मृतेरन्या स्मृतिः पुनः।
पूर्वविज्ञानसंस्कारमात्रजं ज्ञानमुच्यते ॥ २ ॥
न प्रमाणं स्मृतिः पूर्वप्रतिपत्तेरपेक्षणात्।
अन्योन्यनिरपेक्षास्तु धारावाहिकबुद्धयः ॥ ३ ॥
तत्र पञ्चविधं मानं प्रत्यक्षमनुमा तथा।
शास्त्रं तथोपमानार्थापत्ती इति गुरोर्मतम् ॥ ४ ॥
साक्षात्प्रतीतिः प्रत्यक्षं मेयमातृप्रमासु सा।
मेयेष्वन्द्रिययोगोत्था द्रव्यजातिगुणेषु सा ॥ ५ ॥
सविकल्पाऽविकल्पा च प्रत्यक्षा बुद्धिरिष्यते।
आद्या विशिष्टविषया स्वरूपविषयेतरा ॥ ६ ॥
सर्वविज्ञानहेतूत्था मितौ मातरि च प्रमा।
साक्षात्कर्तृत्वसामान्यात् प्रत्यक्षत्वेन सम्मता ॥ ७ ॥
मानत्वं संविदां बाह्यं हानादानादिकं फलं।
ज्ञानस्य तु फलं सैव व्यवहारोपयोगिनी ॥ ८ ॥
आपेक्षिकश्च करणं मन इन्द्रियमेव वा।
तदर्थसन्निकर्षो वा मनश्चेत् पूर्वकं फलम् ॥ ९ ॥
ज्ञातसम्बन्धनियमस्यैकदेशस्य दर्शनात्।

एकदेशान्तरे बुद्धिरनुमानमबाधिते ॥ १० ॥
यः कश्चिद्येन यस्येह सम्बन्धो निरुपाधिकः ।
प्रत्यक्षादिप्रमासिद्धः स तस्य गमको मतः ॥ ११ ॥
प्रमेयमनुमानस्य दृष्टादृष्टस्वलक्षणम् ।
प्रत्यक्षवच्च कर्तव्या प्रमाणफलवर्णना ॥ १२ ॥
शास्त्रं शब्दविदा यदसन्निकृष्टार्थविज्ञानं ।
सादृश्यदर्शनोत्थं ज्ञानं सादृश्यविषयमनुमानं ॥ १३ ॥
सादृश्याद् दृश्यमानाद्यत् प्रतियोगिनि जायते ।
सादृश्यविषयं ज्ञानमुपमानं तदुच्यते ॥ १४ ॥
विनाकल्पनयार्थेन दृष्टेनानुपपन्नताम् ।
नयता दृष्टमर्थं या सार्थापत्तिस्तु कल्पना ॥ १५ ॥
अभावेन गृहे भावो बहिष्कल्पनया विना ।
नयतानुपपन्नत्वं कल्प्यमाना बहिर्यथा ॥ १६ ॥
गम्यस्यानुपपन्नत्वमिह कल्पनया विना ।
मानान्तराविरोधेन सन्देहापत्तिलक्षणम् ॥ १७ ॥
देशेन हि विनाभावो न कदाचन दृश्यते ।
विनाभावेन सिद्धो ऽपि तेन सन्देहमाच्छति ॥ १८ ॥
तत्सन्देहव्युदासाय कल्पना या प्रवर्त्तते ।
सन्देहापादकादर्थादर्थापत्तिरसौ स्मृता ॥ १९ ॥
गमकस्यानुमाने तु विपक्षाऽसत्त्वलक्षणम् ।
गम्यते ऽनुपपन्नत्वं विना गम्येन वस्तुना ॥ २० ॥
तत्सामग्रीविभेदेन भिन्ने एते परस्परम् ।
अर्थापत्त्यनुमानाख्ये प्रमाणे इति निश्चितम् ॥ २१ ॥
अभावाख्यं प्रमाणं ये षष्ठमाहुर्मनीषिणः
तेषां प्राभाकरैरेवं प्रत्यादेशोऽयमुच्यते ॥ २२ ॥

प्रमाणं खलु कस्यापि प्रमेयस्यावबोधकम्।
तस्याभावस्य किं तावत् प्रमेयमिति चिन्त्यताम् ॥ २३ ॥
ननु नास्तीति बुद्धौ तु बोध्यं यदुपकल्पितम्।
अभावस्य प्रमाणस्य तत् प्रमेयं भविष्यति ॥ २४ ॥
भूतलेऽत्र घटो नास्तीत्येषा या जायते मतिः।
सा न भूतलमात्रे स्यात् प्रसक्तेर्घटवत्यपि ॥ २५ ॥
केवले भूतले चेत्स्यात्कैवल्यं तत्र कीदृशम्।
स्वरूपमात्रं नो तावद्धर्मान्तरमथोच्यते ॥ २६ ॥
प्रमेयान्तरमेवात्र तावता ऽऽङ्गीकृतं भवेत्।
तच्च नेन्द्रियविज्ञानं तद्व्यापारानपेक्षणात् ॥ २७ ॥
स्वरूपमात्रदृष्टे हि भावे दूरगतोऽपि सन्।
कथंचिज्जातजिज्ञासो नास्तित्वं प्रतिपद्यते ॥ २८ ॥
तेन यत्राऽपि नास्तित्वं बुध्यते व्यापृतेन्द्रियः।
भावांशमात्रं तत्रापि प्रत्यक्षस्य प्रमाणता ॥ २९ ॥
नास्तित्वं च प्रमाणानामनुत्पत्त्यैव गम्यते।
नास्तित्वं प्रतिपत्तिर्हि तां विना नास्ति कुत्रचित् ॥३० ॥
योग्यप्रमाणानुत्पत्तेः कारणत्वपरिग्रहात्।
अतिप्रसङ्गदोषोऽपि नावकाशमुपाश्नुते ॥ ३१ ॥
अनुत्पत्तिश्च न ज्ञाता सती कारणमक्षवत्।
तेन लिङ्गत्वशङ्का ऽऽपि दूरादेव निराकृता ॥ ३२ ॥
अनुत्पत्तिश्च विज्ञानहेतुश्चेल्लिङ्गवद्भवेत्।
अनवस्था प्रसज्येत नास्तित्वं नापि सिध्यति ॥ ३३ ॥
किञ्च पादविहारादिव्यवहारश्च भूतले।
न भूतलपरिच्छेदमात्रेणैव प्रवर्तते ॥ ३४ ॥
प्रसङ्गस्तत्र दुर्वारः कण्टकाद्यन्विते ऽपि हि।
अथ केवलभूभागपरिच्छेदात् प्रवर्तते ॥ ३५ ॥

विकल्प्यं तत्र कैवल्यं ग्राह्यस्य ग्रहणस्य वा ।
ग्राह्यस्य चेत्पुरैवोक्तो दोषस्तर्हि प्रसज्यते ॥ ३६ ॥
ग्रहस्य चेत्तदा सूक्ष्मजिज्ञासा निष्फला भवेत् ।
जाता हि केवला संविद्वस्तुनो भूतलादिनः ॥ ३७ ॥
एका संसृष्टविषया तन्मात्रविषया परा ।
तन्मात्रविषया या च द्विधा साऽपि प्रभज्यते ॥ ३८ ॥
प्रतियोगिन्यदृश्ये च दृश्ये च प्रतियोगिनि ।
तत्र तन्मात्रधीर्येयं दृश्ये च प्रतियोगिनि ॥ ३६ ॥
नास्तितत्वं सैव भूभागे घटादिप्रतियोगिनः ।
ननु संसृष्टबुद्ध्या यः पुरस्तादवधारितः ॥ ४० ॥
कथं तन्मात्रधीस्तत्र जाता भावेन तस्य चेत् ।
शक्यते तदभावेऽपि वक्तुं यो यत्र सम्भूत् ॥ ४१ ॥
तस्याभावः कथं तत्र ब्रूयाच्चेत्तत्र कारणम् ।
तन्मात्रधिय एवास्तु वरं तत्कारणं ततः ॥ ४२ ॥
तस्याः सम्प्रतिपन्नत्वाद्वादिनोरुभयोरपि ।
चक्षुर्वदपरामृष्टं न कारणमदर्शनम् ॥ ४३ ॥
स्वापावस्थागतस्यापि कारणत्वप्रसङ्गतः ।
विशेषापादिका तस्य न निषेधस्य दृश्यता ॥ ४४ ॥
भावरूपविशेषो हि नाभावस्योपपद्यते ।
अदर्शने निवृत्तेऽपि पुनर्भावस्य कस्यचित् ॥ ४५ ॥
प्राङ्नास्तित्वं व्यपदिशन्त्यदृष्टस्य पुरा क्वचित् ।
दृश्यस्यादर्शनं तेन ज्ञानं सदवबोधकम् ॥ ४६ ॥
दृश्यादर्शनतस्तस्य ज्ञानं चेदव्यवस्थितम् ।
यदि तन्मात्रसंवित्तिरूपं तु स्याददर्शनम् ॥ ४७ ॥
तदा तस्याः स्वसंवित्तेरनवस्था निवर्तते ।
तेनावश्याभ्युपेतव्यो विमर्शो दृश्यगोचरः ॥ ४८ ॥

अदर्शनमभावो हि तन्मात्रानुभवात्मकम् ।
तन्मात्रानुभवश्चायं यद्दर्शनरूपतः ॥ ४९ ॥
विमृश्यते भूतलादौ तदभावः प्रपद्यते ।
तन्मात्रानुभवश्चायं न मेयः फलभावतः ॥ ५० ॥
किञ्च स्वयं प्रकाशो ऽसाविति न्यायविदो विदुः ।
नास्तीति शब्दस्तत्रैव स्वयंवेद्ये प्रवर्तते ॥ ५१ ॥
तेन नास्तीति विज्ञानन्यायेन न समागतम् ।
मेयाभावे ततो मानमभावाख्यं कथं भवेत् ॥ ५२ ॥
घटसत्ता न लभ्या हि नासत्ता चोदितक्रमात् ।
अभावव्यवहारो ऽपि निःशङ्कगमनादिकः ॥ ५३ ॥
तन्मात्रानुभवेनैव यथोक्तेन प्रवर्तते ।
यदा यत्र च दृश्यत्वे सत्यप्यनुपलम्भनम् ॥ ५४ ॥
तदभावव्यवहृतिस्तदानीं संप्रवर्तते ।
सूक्ष्मसम्भवजिज्ञासा ऽऽप्यतः सार्थकतां गता ॥ ५५ ॥
तां विना न हि दृश्यत्वं सूक्ष्मसत्ता ऽऽधिरोहति ।
व्यवहारप्रवृत्तिश्च दृश्या दृष्टिनिबन्धना ॥ ५६ ॥
तेन दृश्यत्वसिद्ध्यर्थं सार्थकं सूक्ष्मवीक्षणम् ।
नन्वेवं लक्षणग्रन्थस्यार्थस्तत्त्वस्य कीदृशः ॥ ५७ ॥
मीमांसार्णवसम्भूतं पीयतां समयामृतम् ।
प्रत्यक्षाद्यपरिच्छेद्यमभावाख्यं चतुर्विधा ॥ ५८ ॥
प्रमेयं साधयन् मानमभावाख्यं वदन्ति ये ।
तन्निराकरणार्थोऽयं यत्नो भाष्यकृता कृतः ॥ ५९ ॥
अभावोऽसंनिकृष्टस्य नास्तीत्यस्यावबोधकः ।
प्रमाणान्न भवतीति प्रमाणाभावतोच्यते ॥ ६० ॥
किं निराकरणस्येह फलमित्यथचेन्मतम् ।
उच्यते लक्षणग्रन्थः प्रत्यक्षादेः समर्थ्यते ॥ ६१ ॥

प्रमाणं कार्यगम्यं हि सर्वत्रेति विनिश्चितम् ।
निश्चयश्च प्रमाणस्य कार्यमित्यपि संमतम् ॥ ६२ ॥
निश्चयश्चेदमेवेति संवित्तिः सर्ववस्तुषु ।
सच वस्त्वन्तराभावसंवित्त्यानुगमे सति ॥ ६३ ॥
प्रमाणानुदयात्तत्र यद्यभावोऽवसीयते ।
तदा तेन सहैव स्यात् प्रत्यक्षादेः प्रमाणता ॥ ६४ ॥
लक्षणं क्रियमाणं हि तथा भूतस्य युज्यते ।
न कृतं च तथा तेन न कृतं साधु लक्षणम् ॥ ६५ ॥
इमां शङ्कां निराकर्तुं निराकरणमुच्यते ।
कथं पुनरियं शङ्का भवत्यत्र निराकृता ॥ ६६ ॥
अभावाख्यो नाम योऽस्ति यदयं प्रार्थ्यते पुनः ।
प्रमाणानामनुत्पादः साधु तल्लक्षणं कृतम् ॥ ६७ ॥
इति पूर्वप्रमाणानां लक्षणानि समादधत् ।
भाष्यकार इमं ग्रन्थं चक्रे नाऽऽभावलक्षणम् ॥ ६८ ॥
नन्वेवमपि पश्चाद्द शब्दं हित्वा कथं पुनः ।
भाष्यकारः प्रमाणानि चित्राक्षेपं न संदधत् ॥ ६९ ॥
उच्यते व्यवहारस्य हेतुभूतप्रसिद्धये ।
एवमाहोभयात्मापि व्यवहारः प्रतिष्ठितः ॥ ७० ॥
तत्र भावव्यवहृतिः पञ्चस्वेवोपलभ्यते ।
अभावव्यवहारस्तु दृश्यादृष्टिविमर्शतः ॥ ७१ ॥
सा हि भूभागसद्भागमात्रावच्छेदबन्धना ।
यद्वा भावव्यवहृतिरिति प्रागेव दर्शितम् ॥ ७२ ॥
मीमांसाजलराशेरशेषनयरत्ननिकषनिजधाम्नः ।
इति शालिकनाथ इमाममृतस्य कलामुदाहरद्धीरः ॥७३॥

इति प्रकरणपञ्चिकायाममृतकलानाम षष्ठं प्रकरणं समाप्तम् ।

निर्मलाञ्जनं नाम सप्तमं प्रकरणम्

अपौरुषेये संबन्धे सिद्धे शब्दार्थयोर्द्वयोः ।
प्रामाण्यं वेदवाक्यानामिति स प्रतिपाद्यते ॥ १ ॥

यदि पौरुषेय एव शब्दानामर्थैः सह संबन्धो भवेत् तदा प्रमाणान्तरगोचरेष्वेवार्थेषु पुरुषाणां सङ्केतकरणशक्तेरपूर्वात्मनि च वेदार्थे प्रमाणानामवकाशाभावात् तत्र संकेताभावादसंकेतिते च वाचकत्वाभ्युपगमे दुर्लभमेव वेदवाक्यानां प्रामाण्यमापद्यतइत्यर्थवानेवायमपौरुषेयशब्दार्थसंबन्धप्रतिपादनयत्नः ।

तत्र शब्दार्थसंबन्धं पौरुषेयं प्रचक्षते ।
जगदीश्वरनिर्माणं वदन्तो वेदवादिनः ॥

अनादौ हि वृद्धव्यवहारपरम्परायां सत्यां वृद्धव्यवहारप्रसिद्धो वाच्यवाचकभावः शब्दार्थयोरपौरुषेयः प्रसिध्येत् । तथाहि । वृद्धानां स्वार्थेन व्यवहारप्रमाणमुपशृण्वन्तो बालाः शब्दश्रवणसमनन्तरभाविना चेष्टाविशेषेण विशिष्टार्थविषयां मनीषां कल्पयन्तो वाच्यवाचकतां शब्दस्याध्यवस्यन्ति । तेऽपि वृद्धा यदा बाला आसंस्तदा तेऽप्यनयैव दिशा व्युत्पद्यन्तेस्म । येभ्यश्च वृद्धेभ्यस्ते व्युत्पत्तिमलभन्त तेऽप्यन्येभ्यस्तेऽप्यन्येभ्य इति विनापि संकेतयितारं पुरुषमुपपद्यत एव शब्दार्थयोरनादिवृद्धपरम्पराव्यवहारदर्शनसिद्धः

संबन्धः । नो खल्वनादितैव वृद्धव्यवहारपरम्पराया उपपत्तिमती । तथाहि विदांकुर्वन्तु भवन्तः । तरुभुवनादिकं सर्वं सावयवमवसीयते । यच्च नाम सावयवं तदवयवव्यतिषङ्गबलसमासादितात्मलाभम् । पश्यामो हि वयं तन्तुव्यतिषङ्गाधीनात्मलाभं पटं । कटं च वीरणसंयोगसंपादितसत्ताकं सावयवम् । एषा च दिक् क्रमादन्त्यावयविभ्योऽवतरन्त्याद्यणुकमवतिष्ठते । अर्थैश्च नियतसंयोगो नियतोऽन्यतरकर्मज उभयकर्मजो वाभ्युपगमनीयः । कर्म च परमाणुष्वदृष्टवत् क्षेत्रज्ञसंयोगादन्यस्य कारणस्याभावात् । नचादृष्टमलब्धप्रवृत्ति कार्याय पर्याप्तमचेतनत्वाद्वासीवत् । नचानधिष्ठितं प्रवृत्तिमुपलभते । न खल्वनधिष्ठिता वर्धकिना वासी वर्धनाय प्रवर्तते । तदेवमदृष्टमपि क्षेत्रज्ञसमवायि चेतनाधिष्ठितं कार्याय प्रवर्ततइति दर्शनबलेनावश्यमभ्युपेतव्यम् । नचेदमिह चिन्तनीयं य एव क्षेत्रज्ञास्त एव तेषामदृष्टानामधिष्ठातारो भवेयुरिति । तेषामज्ञत्वात् । न हि ते स्वसमवायिनी अपि धर्माधर्मलक्षणे अदृष्टे स्वरूपतः कार्यतो वा वेदितुमीशते । य एव यत् स्वरूपतः कार्यतो वा वेद स एव तस्याधिष्ठाता यथा तक्षा वास्याः । तस्मादन्यः क्षेत्रज्ञेभ्यः सकलक्षेत्रसमवायिधर्माधर्मलक्षणादृष्टसाक्षात्करणगोचरचिन्तनीयशक्तिविभवः कोऽपि चेतनातिशयोऽधिष्ठाता दिव्यप्रतिष्ठः स्वतन्त्रोऽभ्युपगमनीयः । नचेदं वाच्यं केन प्रमाणेन तस्य क्षेत्रज्ञेष्वसम्भाविनी धर्माधर्मसाक्षात्करणशक्तिरवगम्यतइति । यतो यत एव प्रमाणात् तस्य सद्भावोऽवगम्यते तत एव तस्य ज्ञानशक्तिरपि गम्यते । अन्तर्भावितज्ञानशक्तिरेवासौ सामान्यतोदृष्टानुमानगोचरः । अत एव कथमसावधिष्ठास्यतीत्यपि

पर्यनुयोगस्यानवकाशः। किं तस्याधिष्ठाने प्रयोजनमित्यपि पर्यनुयोगश्चेतनातिशयानुमानाङ्गीकरणपराकृतः। क्षेत्रज्ञो हि प्रयोजनमुद्दिश्य प्रवर्तते न च क्षेत्रज्ञविलक्षणो नापेक्षितप्रयोजन एव स्वतन्त्रः प्रवर्तते। अत एव स्वातन्त्र्यात् कादाचित्की तस्य प्रवृत्तिरुपपत्तिमती। स्वातन्त्र्यमपि तस्य सत्तानुमानसमधिगम्यमेवेति न पृथग्लक्षणसव्यपेक्षम्। अतः सिद्धं भुवनस्यादिमत्त्वमुत्पत्तिमत्त्वं च। तथा भावितया च विनाशित्वं। कृतका हि भावा ध्रुवभाविविनाशास्तथा दृष्टचरा घटादय इति वृद्धव्यवहारपरम्परया नानादित्वं। तेन बलात् पुरुषसंकेतवशादेव शब्दस्यार्थं प्रति बोधकत्वमास्थेयम्। अपि च देवदत्तादिशब्देष्वविवादा तावत् पुरुषसंकेतनिबन्धना वाचकता। तद्दर्शनाद्गवादिशब्दानामपि तथाविधत्वमेवमेवानुमातुमुचितम्। अयमेव हि सामान्यतो दृष्टस्य विषयो यदन्यत्र दृष्टमन्यत्रावगम्येत इति। देवदत्तादिषु स्वाभाविकं सर्वार्थविषयबोधकत्वमित्यपि न समीचीनं। प्रमाणाभावात्। संकेतानपेक्षत्वप्रसङ्गाच्च। न हि नियमे संकेतस्य व्यापारः प्राक्संकेतादनियतार्थप्रत्ययोदयप्रसङ्गेऽपि क्लेशमात्रफलमिदमुच्यते गवादिष्वपि नियतार्थप्रतिपत्तिः पुरुषसंकेतायत्तैव। स्वाभाविकी तु सर्वार्थप्रतिपादनशक्तिरुपयोगिन्येव विशिष्टार्थप्रतिपत्त्याविसलमनुना प्रतिपन्नार्थविघातिना निबन्धेन। किञ्च यथोदितप्रमाणबलसिद्धे भगवति सकलजगन्निर्माणप्रवीणे धर्माधर्मयोः साक्षात्कारिणि तत्कर्तृकत्वेनापि सिध्यति वेदानामपूर्वेऽर्थे प्रामाण्यमिति मीमांसकानां विद्वेषमात्रनिबन्धनोऽयं पौरुषेयत्वपक्षप्रतिक्षेपः। मन्त्रार्थवादानां च भूयसाममुमर्थमञ्जसा वदतामन्यथा वर्णनमिति।

औत्पत्तिकस्तु संबन्धः शब्दस्यार्थेन सम्भवः ।
वृद्धसंव्यवहारस्य प्रवाहानादिता यतः ॥

वेदार्थविदामग्रगस्य भगवतः सकलनयनिधेर्जैमिनेरपौरुषेयः शब्दस्यार्थेन संबन्धोऽभिमतः । स हि मेने । यद्यपि देवदत्तादीनां पुरुषसंकेतनिबन्धनं वाचकत्वं तथापि गवादिष्वनुमानं न शक्यते कर्तुम् । अर्थप्रतिपत्तिलक्षणस्य कार्यस्यान्यथाप्युपपत्तेरनैकान्तिकत्वादिति वृद्धव्यवहारनिबन्धनवाचकशक्तिज्ञानादपि बालानां शब्दार्थप्रतिपत्तिर्दृश्यते । तेनैकान्ततः संकेत एव कल्पयितुं न शक्यते । अपिच शक्तिज्ञाननिबन्धनार्थप्रतिपत्तिरिति प्रत्यक्षमेतत् । नच प्रत्यक्षे सति कारणे कारणान्तरमनुमातुं शक्यते । देवदत्तादिषु तु यस्य संकेतनिबन्धनार्थप्रतिपत्तिर्भवति तस्य संकेत एव कारणम् । तेष्वपि व्यवहारदर्शनादेव वाचा तामवगम्यार्थं प्रतिपद्यन्ते ये तेषामपि व्यवहारदर्शनप्रसूतं शक्तिज्ञानमेवार्थप्रतिपत्तिकारणं न संकेतः । किन्तु तत्र संकेतपूर्वक एव व्यवहारोऽर्थप्रतिपत्तिश्च । तथा च तत्पूर्वमपि वाचकत्वज्ञानम् । गवादिपदेषु तु सर्वेषां शक्तिज्ञानादेव व्यवहारसंभवादर्थावगतिरिति वैषम्यम् । ननु देवदत्तादिपदेषु दर्शनात् किमिति गवादिपदेष्वपि पूर्वभावी संकेत एव न कल्प्यते । प्रत्यनुमानग्रस्तत्वात् । शक्यते हि तत्रैवमनुमानं संभावयितुम् । पूर्वेऽपि पुमांसो गवादिषु शब्दात् सास्नादिमत्यर्थे वृद्धव्यवहारसिद्धशक्तिज्ञानादर्थप्रतिपत्तियोगिनः । गवादिशब्देभ्यः सास्नादिमदर्थप्रतिपत्तियोगित्वादधुनातनशब्दवदिति । तदेवं प्रत्यनुमानग्रस्तेऽनुमाने निरस्ते सकलप्रमाणविरहादपौरुषेयत्वमेव

सिध्यति शब्दार्थावगतेः। अत इदमपहस्तितम्। यदाहुर्बाह्याः।

यज्जातीयो यतः सिद्धः स तस्मादग्निकाष्ठवत्।
अदृष्टहेतुरपि नो विशिष्टः संप्रतीयते॥

इति। ननु च सिध्येदयं मनोरथो यदि तु वृद्धव्यवहारपरम्पराया अनादिता सा तु प्राचीननयनिवारिता। अत्र वदामः। भवतु सावयवं सर्वमवयवसंयोगारब्धसत्ताकमवयवसंयोगापाये च विनश्वरमिति तथाप्येकदैव सकलजनस्य समुत्पादो विलयश्चेति नास्ति नः प्रमाणम्। प्रत्युत यथादर्शनमेतावदवसातुमुचितं क्रमेण चोदयः क्रमेण च विलय इति। किञ्च यथाद्यतना जना मातापितृसंयोगनिबन्धनात्मलाभास्तथा पूर्वेऽपि जना जनत्वादिति शक्यमेवानुमातुम्। नच योनिजानां केवलेन धर्माधिपत्येन संस्वेदजानामिव सम्भवो घटते। जरायुजाण्डजानां तथा दर्शनासम्भवात्। दृष्टानुसारि हि सर्वत्रानुमानम्। तेन संस्वेदजेषु नियमेन दृष्टं न जरायुजाण्डजयोरप्ययोनिजत्वं शक्यतेऽनुमातुम्। नहि पाण्डिममात्रेण बाष्पादपि वह्नेरनुमानं किन्तु यादृशमेव पाण्डुरद्रव्ये नियमेन वह्निनियतं प्रतिसंपन्नं तादृशमेव तस्यानुमापकमुचितम्। यच्चेदमुक्तं धर्माधर्मौ चेतनातिशयाधिष्ठानाविति तदप्यसिद्धमेव। यस्यैव तौ क्षेत्रज्ञस्य स एवाधिष्ठाताऽस्तु। अथाज्ञत्वात् तस्याधिष्ठानं नोपपद्यते तर्ह्यन्यस्यापि कथमुपपद्यते। न हि तस्यापि परपुरुषवर्तिधर्माधर्मज्ञानमुपपद्यते कारणाभावात्। न हि तस्येन्द्रियाणि कारणम्। इन्द्रियाणां तत्रासामर्थ्यात्। नच केवलं मनः केवलस्य मनसो बाह्येष्वप्रवृत्तेः। न हि धर्माधर्मरहितस्येन्द्रियमनः सम्बन्धोऽस्ति ध-

र्माधर्मनिबन्धनत्वात् तत्संबन्धस्य । अथ कारणमन्यदेवेश्वरबुद्धेः । तदयुक्तम् । प्रसिद्धकारणत्वाद्बुद्धेः । प्रसिद्धानि हि कारणानि बुद्धेः । यत् कारणं च यत्कार्यं दृष्टं तत्कारणमेव तदिति युक्तम् । अन्यथा चेतनाधिष्ठाना वासी दृष्टेति कथं धर्माधर्मयोरपि तदधिष्ठितत्वं भविष्यति । अथाकारणा नित्यैवेश्वरबुद्धिरिति । तदप्यसुन्दरम् । बुद्धितत्त्वस्य नित्यत्वाभावात् । नित्या सती बुद्धिरेव न स्यात् । बुद्धिमता चाधिष्ठानं दृष्टं न पुनरन्येन । अथादृष्टमपि बुद्धेर्नित्यत्वमङ्गीक्रियते । तदा न चेतनाधिष्ठितत्वमेव किमिति नाङ्गीक्रियते । अथ सिद्धेऽधिष्ठातृत्वे ज्ञानमपि कल्प्यत इति । ज्ञानाननुबद्धस्याधिष्ठातृत्वस्य कारणाभावात् प्रतिक्षिप्ते ज्ञाने सत्यनुमातुमशक्तेः । तेन शक्यज्ञानमेवाचेतनं चेतनाधिष्ठितमिति व्याप्तिराश्रयणीया । तथा दर्शनात् । तक्षादयो हि शक्यज्ञानान्येव वास्यादीन्यधितिष्ठन्तो दृश्यन्ते नान्यानि । अपिचाधिष्ठानार्थोऽपि चिन्तनीयः । न तावत् संयोगो धर्माधर्मयोर्गुणत्वेन संयोगाभावात् । समवायोऽपि परपुरुषसमवायिनोर्धर्माधर्मयोरीश्वरं प्रत्यनुपपन्नः । वास्यादिषु तक्षादीनां करसंयोगादिरेवाधिष्ठानम् । तथा प्रवृत्तिरपि कीदृशी । न तावत् क्रिया गुणभूतयोर्धर्माधर्मयोः क्रियाभावात् । उत्पत्तिश्चेत् तर्हि सा क्षेत्रज्ञादेव समवायिकारणादात्ममनःसंयोगाच्चासमवायिकारणादभिसन्ध्यादिनिमित्तकारणोपगृहीतत्वात् फलदानमिति चेत् । न । देशकालावस्थादिसहकारिसहिताभ्यामेव फलं न चेतनव्यापारापेक्षम् । यदपि केचिदाहुः परमाणव एवेश्वरेच्छया प्रवर्तन्त इति । तदपि न युक्तम् । क्वचित् तथाविधस्याधिष्ठानस्यादर्शनात् । शरीरे तथा दर्शनादिति

चेत् । न । तस्य धर्माधर्मोपसंगृहीतत्वात् । नच परमाणव एवेश्वरस्य धर्माधर्मोपगृहीताः । नच तस्येच्छामात्रेण प्रवृत्तिः किन्तु प्रयत्नवशात् । नचेच्छायामपि हेतुरस्ति । नच नित्यैवेच्छा नित्यत्वप्रसङ्गात् । यथाऽचेतनत्वाच्चेतनाधिष्ठितत्वमनुमीयते तथा प्रयोजनाभावादप्यनधिष्ठानमिति ज्ञायते । कुतस्तदत्रानुमानं बलीय इति न विद्मः । तेन यत्रैव प्रयोजनं तत्रैव चेतनाधिष्ठितमिति व्याप्तिरभ्युपगमनीया । तथा दर्शनात् । अपिच व्याप्तिग्रहणपुरःसरमनुमानम् । अन्वयव्यतिरेकाभ्यां च व्याप्तिरवगम्यते । यथा च चेतनोऽधिष्ठातेति प्रतीयते तथा विग्रहादिमानपि । तेनानुमानं तथाविधमेवानुमापयेत् । नच तस्य धर्माधर्मौ परमाणून् वा प्रत्यधिष्ठातृतोपपद्यत इत्यनधिष्ठानमेव । तेन विग्रहादिमदधिष्ठानमेवाचेतनं चेतनाधिष्ठितमिति व्याप्तिराश्रयणीया । नन्वेवं सति प्रसिद्धस्याप्यनुमानस्योच्छेदः प्राप्नोति । यथाभूतेन हि महानसादिवर्तिना व्याप्तिरवगता न तथाविधस्यानुमानम् । यथाविधस्यानुमानं न तथाविधस्य व्याप्तिधीसमयेऽवधारणमिति । तदयुक्तं । देशकालाद्युपाधिपरित्यागेन सामान्येन हि संबन्धग्रहणम् । तेनेहापि भवत्वेतद्दास्यादिषु दृष्टं धर्माधर्मयोरपीति यादृशस्वरूपं व्यापकमुपलभ्यते तदेवात्रानुमातुं शक्यते नान्यत् । इह तु विग्रहवत्त्वाद्यपि व्याप्त्यनुप्रवेशीति तदनुमातव्यं न तदनुमातुं शक्यत इति वरं चेतनानुमानबाध एव तदनुबद्धस्य तस्यानुमानस्य स्यात् । नचेश्वरस्य सर्वज्ञानमपि सिध्यति ज्ञानहेत्वभावेन ज्ञानाभावनिश्चयात् । तेनानादिरेव वृद्धपरम्पराशब्दार्थावगमे हेतुर्न सृष्ट्यादावीश्वरकृतः सङ्केतः । तस्यैव कर्तुमशक्तेः । न खल्वाद्या जनाः सङ्केतस्यार्थमनवबुध्य-

मानाः सङ्केतं प्रतिपद्यन्ते । तस्मादनादिरेव वृद्धपरम्पराभ्युपगमनीया । एवं पुरुषस्य धर्मप्रतीतिं प्रति शब्दमन्तरेणोपायाभावान्न पौरुषेयत्वे वेदस्यापूर्वात्मके वेदार्थे प्रामाण्योपपत्तिरित्यपौरुषेयत्वाश्रयणम् ।

कथं पुनरपौरुषेयत्वं वेदानां । पुरुषस्य कर्तुरस्मरणात् । नचानुमानमपि कर्तुरुपपद्यते । प्रमाणान्तरेणाप्रतीते पुरुषाणां वाक्यस्य रचनायामशक्तेः । काठकादिसमाख्यापि न कर्तृसद्भावमुपकल्पयितुमलम् । प्रवचनेनापि तदुपपत्तेः । मन्त्रार्थवादाश्च न स्वातन्त्र्येणार्थमवगमयितुमीशते किन्तु विध्युद्देशानुसारेण तदनुगुणमर्थमिति न सिद्धार्थप्रतिपादनेनैषां प्रामाण्यमिति सिद्धमपौरुषेयत्वं शब्दार्थसम्बन्धस्येति ॥

दुस्तर्कतिमिरं भेत्तुं शिष्याणां दृङ्निरोधकम् ।
इदं शालिकनाथेन विहितं निर्मलाञ्जनम् ॥

इति महामहोपाध्यायश्रीशालिकनाथकृतौ प्रकरणपञ्चिकायां
निर्मलाञ्जनं नाम सप्तमं प्रकरणम् ॥

तत्त्वालोको नाम अष्टमं प्रकरणम्

आत्मतत्त्वे च बहुधा विवादाः सन्ति वादिनाम् ।
वयं प्राभाकरास्तत्र निर्णयाय यतामहे ॥

केचिद्बुद्धिमेवात्मानमिच्छन्ति । अन्ये बहिरिन्द्रियाण्येव । देहमेवापरे । तथैके बुद्धीन्द्रियशरीरव्यतिरेकिणमनुमेयमाहुः । केचित् तु मानसप्रत्यक्षगम्यम् । स्वयंप्रकाशं केचित् । चित् सकलप्रतिपत्तिसिद्धं त्वन्ये मन्यन्ते । क्षणिकं च केचिदाचक्षते । कूटस्थनित्यमपरे । परमाणुपरिमाणः शरीरपरिमाणः सर्वगत इत्यादि वादिनो विवदन्ते । सर्वक्षेत्रेष्वभिन्न इत्येके । प्रति क्षेत्रं च नानाभूत इत्यपरे । तत्र तत्त्वनिर्णयार्थमिदमारभ्यते ।

बुद्धीन्द्रियशरीरेभ्यो भिन्न आत्मा विभुर्ध्रुवः ।
नानाभूतः प्रति क्षेत्रमर्थवित्तिषु भासते ॥

ननु न बुद्धेर्बोद्धुश्च भेदमुपलभामहे । यतो घटमहमवबुध्य इति बुद्धेर्बोद्धारमभिन्नं प्रतिपद्यते । सत्यम् । द्विचन्द्रादिवद्बिम्बप्रतिबिम्बवच्चायं भ्रम इति प्रामाणिकाः । सहोपलम्भनियमेन बुद्धेर्बोद्धश्च भेदो निराक्रियते । भेदस्यानियमव्याप्तत्वात् । व्यापकविरुद्धनियमोपलम्भेन बाध्यमानत्वात् । तदाहुः ।

अविभागो हि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥

इति । येऽपि बुद्धेरन्यं बोद्धारमिच्छन्ति तेऽपि सत्या-मेव बुद्धौ बोद्धृतामाहुः । एवं च सैव परं बोद्ध्री भवतु कृत-मन्येन बोद्ध्रा । बोद्धा चात्मा भवतीति बुद्धिरेवात्मा । सा च स्वयंप्रकाशा कार्यकारणभावेनानादिसन्तानवाहिनी स्वा-पमदमूर्च्छादिष्वभिभूततया पुनरनुसन्धानपथं न याति । व-हति त्वसौ तास्वपि दशास्वन्यथा जागरादिषु बुद्ध्युदयास-म्भवा ऽऽपत्तेः । स चायमनादिबुद्धिसन्तानोऽनादिवासनानि-बन्धनसन्तानदर्शनाध्यासितभेदः समुदायवशवर्ती संसरति मार्गः साक्षात्कारोन्मूलितनिखिलसत्त्वदृष्टिवासनानुबद्धस्तू-च्छिन्नः समुदायः प्रतिमुच्यते तदा अहन्तासन्तानो भेदः । तदाहुः ।

प्रदीपस्येव निर्वाणं विमोक्षस्तस्य जायते ।

इति । देशिकानामनेकजन्माभ्यासस्वात्मीभूतब्रह्मादि-स्तम्बपर्यन्तजगद्व्यापिमहाकरुणानां विशुद्धचित्तसन्तानोऽनन्त इति । तदिदमसारम् । प्रतीतिसिद्धस्य बुद्धेर्बोद्धुश्च भेदस्य निराकरणासम्भवात् । सहोपलम्भनियमस्तु यथा विभेदेऽप्यु-पपद्यते तथात्रैव वक्ष्यामः । निराकृतश्चायं बाह्यार्थसिद्धावृजु-विमलायां । बुद्धिरेव परमस्खलं बोद्ध्रेति यदुक्तं तदपि का-ल्पनिके बोद्धरि युक्तं वक्तुं साक्षात्प्रतीतिसिद्धे तु नावका-शोऽस्यासत्प्रलापस्य । स्वापादिषु च बुद्धिरनुवर्तत इति यत् तदपि प्रमाणाभावादसारम् । जागरादिषु बुद्धेरत्रैव कारणं वक्ष्यामः ।

एवं तर्हि भवन्त्विन्द्रियाणि सचेतनानि बुद्धेर्बोद्धुश्च भे-दावभासो न घटिष्यते । भवेदेतदेवं यदि दर्शनस्पर्शनाभ्या-

मेकार्थानुसन्धानं न स्यात् । यदहमद्राक्षं तदहं स्पृशामीत्यनुसन्धातैकः प्रतीयते । स्मरणं चेन्द्रियार्थानां तत्तदिन्द्रियापायेऽपि यदुपलभ्यते तदिन्द्रियचैतन्ये नोपपद्यते ।

अस्तु देह एवात्मा न तत्रेमौ दोषौ प्रसज्येते । नैवम् । ज्ञाता ह्यात्मा नच देहस्य ज्ञातृता सम्भवति । नेति ब्रूमः । भूतान्तरसहितस्य भूतान्तरस्य कार्यारम्भकतेति वदामः । न पुनर्मिथोऽपि भूतानि न संयुज्यन्त इत्याचक्ष्महे । अतः संयुक्तभूतानां गुणान्तरोपलम्भो नानुपपन्नः । कथं पुनरारम्भकत्वसम्भवः । न तावत् पञ्चानां चतुर्णां वा सम्भूया ऽऽरम्भकत्वं सम्भवति । चाक्षुषाचाक्षुषद्रव्यारब्धस्य तत्समवायिनोऽचाक्षुषत्वापत्तेः । यत् खलु चाक्षुषाचाक्षुषद्रव्यारब्धतत्समवेतं तन्न चाक्षुषं वायुवनस्पतिसंयोगवत् । चाक्षुषश्च देहः । अतो न पञ्चभिश्चतुर्भिः समारब्धः । आकाशानिलयोरचाक्षुषत्वात् । कथं पुनरचाक्षुषं नभः । अचाक्षुषस्य सत्तापि किंप्रमाणिकेत्येतदपि चिन्त्यम् । उच्यते न चाक्षुषं व्योम द्रव्यत्वे सत्यरूपत्वात् । ननु नारूपं गगनं । तद्धि धवलमुत्पलपलाशश्यामलं चोपलभ्यते । उच्यते । धवलिमा हि प्रायेण तैजस एव नीहारे तौहिनोऽपि वा तदपगमे तदनुपलम्भात् । यः पुनर्निशि नीलिमेवावलोक्यते नासौ नभसः । कस्य तर्हि न कस्य चित् । कथं पुनर्गुणो न कस्य चित् । सत्यं । गुण एवायमप्रसिद्धः । ननु प्रतीतिबलेन सिद्ध एव । सिध्येद्यदि प्रसिद्धिरेव सिध्येत् । सा तु कारणाभावान्न सिद्धा । ननु चक्षुरेव कारणं । न । आलोकोपकारानपेक्षस्य चक्षुषोऽप्रकाशकत्वात् । तेनाप्रतीतावेवायं प्रतीतिभ्रमो मन्दानाम् । अत एव दिवानुपलम्भः । अन्यथा सौरीभिर्भाभिरनुगृहीतं चक्षुः

स्फुटतरं व्योम्नि नीलिमानं प्रकाशयेत् । रूपं च स्पर्शसहचरितमिति स्पर्शवत्त्वं नभसः स्यात् । ततश्च सर्वमूर्तद्रव्यप्रतिघातप्रसङ्गः ।

केचित् तु तमसो नीलिमा गगनस्येवोपलभ्यत इत्याहुः । तदसदित्येके । तमसो निष्पत्त्यनवक्लृप्तेः । रूपवत्त्वेन हि तमो द्रव्यं स्यात् तच्चानेकद्रव्यारब्धं सच्चाक्षुषं भवेत् । नच तानि द्रव्याणि सन्ति सन्ति चेद्दिवाप्यारभेरन् । अन्धानामिव नीलिमाभिमानो नभस एवेत्युक्तम् ।

यच्चेदमुच्यते छायैव तमः सा चलत्वाचलत्वमहत्त्वामहत्त्वदूरत्वासन्नत्वादिगुणयोगिनी वस्तुभूतेति । तदिदमप्यसारम् । अनवक्लृप्तेरेव । यच्चलाचलत्वादिकमुपन्यस्तं तदपि स्थूलदर्शितया । तथाहि । आलोकेऽपवारिते छायाप्यपेयते । ततोऽपवारितालोकभूभागादिभावव्यतिरेकिणी न रूपान्तरवच्छाया दृश्यते । तेन मन्यामहे व्यपवारितालोकभूभागादिकमेव छायेति । एतेन महत्त्वामहत्त्वदूरत्वासन्नत्वादीनि समर्थितानि । यत्तु तेजःप्रतिरोधि द्रव्यं तद्यथा यथा सञ्चरति तथा तथालोकः प्रतिमुच्यते प्रतिरुध्यते चेति चलतीव छाया प्रतिभाति । अन्यथा शरीरेऽपि चलति किमिति छायापि चलेत् । हेत्वभावात् । एतेन चलति शरीरे चलत्वं व्याख्यातम् । संख्यापरिमाणप्रचययोनि हि महत्त्वं तदभावे कथमिव छायायामुपपत्स्यत इत्यलमनया स्थूलदर्शनकथया नवबद्धया । ननु भूभागादेरेव छायात्वे कथं द्रव्यान्तरेणापदेशः । अस्येयं छायेति । अपवारितालोकभूभागादिरेव छायेत्युक्तम् । तत्र येनापवारणं तदपेक्षत्वाद्युज्यते व्यपदेशः । एवं च स्मृतिकाराणामपि नाक्रामेत् कामतश्छायामित्येवमा-

विव्यवहार उपपन्नः । योऽपि च शास्त्रकाराणां व्यवहारश्चित्रगृहादीनां तुल्यं छायालक्षणं कार्यमिति सोऽप्यालोकापवारणाभिप्रायेण वर्णनीयः । न त्वालोकापवारणे भूभागादेरेव दर्शनप्रसङ्गः । नैवम् । प्रचुरतरा ऽऽलोकावयवसंयोगस्तत्र वार्यतेऽल्पशस्तु तेजोऽवयवाः समन्ततः सञ्चरन्तः संयुज्यन्त एव । यत्र तु सर्वथा तेषामसंयोगः स महानन्धकार इति निरवद्यम् । यश्च विस्फारिताक्षे रूपादिषु विवरमध्यक्षमीक्षत इत्युच्यते तत्रापि तेजोऽवयवास्ते रूपनेमिलब्धावच्छेदास्तथा प्रतीयन्त इत्युक्तम् । नचैवं सत्याकाशस्यासिद्धिरेव । शब्दलक्षणगुणानुमानसिद्धत्वात् । ननु गुणतैव शब्दस्यासिद्धा द्रव्यत्वेन वादिभिरभ्युपेतत्वात् । यदाहुः ।

वर्णात्मकाश्च ये नित्याः शब्दाः सर्वगतास्तथा ।
पृथग्द्रव्यतया ते न तु गुणाः कस्य चिन्मताः ॥

इति । तदिदमसारम् । एकेन्द्रियप्रत्यक्षतया रूपादिवद्गुणत्वसिद्धेः । नच वायुनाऽनैकान्तिकता । तस्य वायोरतीन्द्रियतया ऽऽभ्युपेतत्वात् । येऽपि चैन्द्रियकं वा वायुमिच्छन्ति तेषामपि स्पर्शविरहे सतीति विशेषणोपादानाद्दोषः । एवं सिद्धगुणभावः शब्दो गुणिनमनुमापयति तत्र भूजलादिभावावगमकारणाभावाद् द्रव्यान्तरमेव तदवतिष्ठते । अप्रतीतसामानाधिकरण्यगुणभेदेन भेदानवगमात् । ननु मुखादिगतः शब्द उपलभ्यते । नेत्युच्यते । प्राप्यकारि श्रोत्रम् । बहिरिन्द्रियत्वात् । कार्येन्द्रियवत् । तत्र न तावच्छ्रोत्रं मुखादिदेशं गच्छति प्रत्यक्षा हि कर्णशष्कुली स्वदेशस्था दृश्यते । नापि मुखं श्रोत्रदेशमुपसर्पति तस्यापि स्वदेश एवोपलम्भात् । अतः

श्रोत्रगत एव शब्दो गृह्यते । भ्रान्तिस्त्वेषा मुखे शब्द इति । नच गुणभूतस्य शब्दस्य संयोगलक्षणप्राप्तिरुपपद्यत इति समवाय एव तस्य प्राप्तिः । एवं शब्दगुणत्वाच्छ्रोत्रस्य । यत्तु शब्दगुणकं द्रव्यमाकाशपदावेदनीयं तदेव श्रोत्रमिति सिद्धम् । ननु पार्थिवी कर्णशष्कुली श्रोत्रमस्तु । संयुक्तसमवायेन चाकाशगतं शब्दमुपलभताम् । नैतदेवम् । न हि साक्षात् प्रतीतिसम्भवे प्रणालीसंश्रयणमुपपन्नम् । नापि द्रव्यात्मकशरीरं गुणान्तरप्रादुर्भावापत्तेः । भूजलतेजांसि हि यथाक्रममनुष्णाशीतशीतोष्णस्पर्शानि । तैरारब्धं द्रव्यमेतत्त्रयविलक्षणस्पर्शमापद्येत चित्रपटवत् । यथा सितासितादितन्तुसमारब्धः पटस्तन्तुरूपविलक्षणरूपस्तथा शरीरमप्यारम्भकद्रव्यस्पर्शविलक्षणस्पर्शं भवेत् । अनुष्णाशीतस्पर्शं चैतदुपलभ्यते । एतेनाप्यात्मिकतापि निषिद्धा । किञ्च । गन्धस्य पार्थिवद्रव्यसमवेतस्यैकाकिनो गन्धान्तराऽऽरम्भकत्वानुपपत्तेरगन्धं शरीरं स्यात् । भूतेजसोरप्तेजसोरारम्भकत्वेऽरसत्वमगन्धत्वमेवं वेदितव्यम् । अतो रूपस्पर्शगन्धयोगि शरीरं पार्थिवमेव । ज्ञानं च विशेषगुणः कार्यद्रव्ये च विशेषगुणः कारणगुणपूर्वक एव रूपादिवत् । नच कारणभूतेषु पार्थिवेषु ज्ञानमस्ति । तदारब्धे द्रव्यान्तरे घटादावदर्शनात् । स्यादेतत् । मदशक्तिवच्चैतन्यमपीति । यथा मदशक्तिः पार्थिवेष्वणुष्वसत्यपि तदारब्धे द्रव्ये सुराख्ये निष्पद्यते तथा चैतन्यमपि निष्पत्स्यत इति । तन्न । शक्तेरविशेषगुणत्वात् । शक्त्याख्यो हि गुणः सर्वत्र द्रव्येषु तत्तत्कार्यविषयः कार्यसमधिगम्योऽभ्युपगम्यते । चैतन्यं तु न देहादन्यस्य विद्यत इति विशेषगुणोऽसौ । अपिच द्रव्यान्तरसंयोगादकार्यभूतेषु पार्थिवाणुष्वकारणपू-

र्थोऽपि मदशक्त्यारम्भो गुणो नानुपपन्नः । तदारब्धे सुरारब्धे कार्यद्रव्ये कारणगुणपूर्व एव । चैतन्यं तु न प्रत्येकं परमाणुष्वभ्युपगम्यते । तस्माच्छरीरादन्यस्य गुणो ज्ञानमिति देहव्यतिरिक्तपुरुषानुमानम् । स्यान्मतम् । गुणत्वमेव ज्ञानस्याप्रसिद्धमिति । तन्न । द्रव्याश्रयसंयोगविभागौ प्रति निरपेक्षकारणत्वाभावेन च गुणत्वसिद्धेः । न च वाच्यं द्रव्याश्रयत्वमेवासिद्धमिति । कार्यत्वात् । न हि कार्यं किञ्चिद्द्रव्यानाश्रितमात्मानं लभते । एवं सुखादिभ्योऽपि देहातिरिक्तपुरुषानुमानं वेदितव्यम् ।

नैतदेवम् । घटमहं जानामीत्यहंकारास्पदस्य दृष्टत्वादहं गच्छाम्यहं स्थूल इत्यादौ चाहंकारस्य शरीर एव प्रवृत्त्यविवादाच्छरीरमेव प्रत्यक्षं ज्ञातृ प्रतीयते । प्रत्यक्षविरोधे चानुमानमात्मानं न लभत इति वैशेषिको गुणो ज्ञानं न कारणगुणपूर्वकमिति पार्थिवपरमाणुष्वविद्यमानमपि शरीरे सम्भविष्यतीति न शरीरादन्यास्यानुमानं । ननु शरीरचैतन्ये मृतशरीरेऽपि तत् स्यात् । न । तस्य वायुगुणत्वात् । मरणेन शरीरं विगुणमित्यविवादम् । ननु ममेदं शरीरमिति देहातिरिक्तमहंकारो निविशते । न । अभेदेऽपि भेदावगमोऽयं शिलापुत्रशरीरवत् । अन्यथा ममात्मेत्यपि व्यपदेशादात्मान्तरमपरमाश्रीयेत । येऽपि च सुखादयस्ते चाहं सुखीत्यहङ्कारविषयमविद्विषयतयाऽवगम्यमानाः शरीरसमवायिन एव । अतो न तद्व्यतिरेकिणमात्मानमनुमापयितुमीशते । शरीरविकारहेतुत्वाच्च तेषां सुतरां शरीरगुणत्वम् । न ह्यन्यगुणो गुणिनं विकर्तुमुत्सहते । विक्रियते हि शरीरं नयनविकारमुखप्रसादरोमहर्षादिभिः । सुखादिषूत्पन्नेषु शरीरे विकारं प्रति समवायिकारणभूते त-

त्मसमवायासमवायिकारणेनापि भवितुं युक्तम् । नच शक्यते वक्तुं सुखादिमदात्मसंयोग एव शरीरसमवेतविकारेष्वसमवायिकारणमस्त्विति । प्रमाणाभावात् । सिद्धे ह्यात्मनि स्यादेषा कल्पना । साध्ये त्वव्यवहितानामेव कारणतोचितेति न देहातिरिक्तानुमाने सुखादीनां हेतुत्वम् ।

अत्रोच्यते । स्यादेतदेवं यदि देहातिरिक्तो नोपलभ्यते ज्ञाता । घटमहमुपलभ इति घटस्यानुभविता शरीरातिरिक्तः प्रतिभासते । शरीरं हि करचरणाद्यनेकावयवयोगि । नच घटाद्यनुभवसमये तस्यावभासोऽन्वयी । अवश्यं ज्ञातुरवभासो मेयानुभवेष्वनुवर्तत इत्यास्थेयम् । अन्यथा स्वपरसंवेद्ययोरनतिशयः । अहं गच्छामीति प्रतिपत्तिसमयेऽपि प्रत्येता शरीरातिरिक्तः प्रपत्तृमातृस्वभावो गन्ता देहं प्रतिपद्यमानः प्रतीयत एव । लाक्षणिकोऽहंशब्दानुविद्धस्तु शरीरे प्रत्ययः । ममात्मेत्यत्रापि लाक्षणिकः शरीर एव ममकारः । यस्तु चेतनस्तत्रास्मच्छब्दो मुख्यः । नच शरीरं चेतनम् । चेतनासमवायाभावात् । शरीरातिरिक्तवस्त्वन्तरसमवायिनी हि चेतना चकास्ति । नन्वात्मधर्मभूना चेच्चितिस्तर्हि विषयासंस्पर्शिनी कथं प्रति विषयं विभज्यते । उच्यते । प्रतिभाससिद्धा तावच्चेतनसमवायिनी चितिरनागतातीतसमवेदने व्यक्तमविषयाश्रितत्वं प्रतिकर्मप्रविभागस्तुल्यव्यवहारानुगुणत्वाच्चितेः । यद्व्यवहारानुगुणा या चितिस्तदीयासौ व्यपदिश्यत इति न किञ्चिद्धीनम् । नन्वेवं प्रथमदर्शनेऽपि देहव्यतिरेके सिद्धेऽन्येद्युर्दृष्टे परेद्युरहमिदमदर्शमिति प्रत्यभिज्ञोपन्यासोऽनर्थक एव । उच्यते । व्यतिरेकसिद्धावपि स्थिरतया क्रियावत्त्वसिद्ध्ये प्रत्यभिज्ञोपन्यस्ता । अस्थिरत्वे हि तत एव कादाचित्कका-

र्यसिद्धेस्तत्सिद्धये न क्रियानुमानं क्रमते। अक्रियस्य कर्तृत्वं भोक्तृत्वं चानुपपन्नम्। कर्ता भोक्ता च यज्ञायुधवाक्येनैवाक्षिप्तः समर्थयितव्य इत्युपयुक्तः प्रत्यभिज्ञोपन्यासः। यदा चायमात्मा प्रत्यभिज्ञायते तदाऽसौ चिदात्मा तस्य धर्मः। नासौ तन्मात्रप्रभवः कदाचिदुदियात्। सदा संनिहितकारणं हि कार्यमकादाचित्कं भवेत्। कारणासंनिधाननिबन्धो हि कार्योदयप्रतिक्षेपः। तस्माद्वयमात्मा समवायिकारणभूतः किञ्चिदसमवायिकारणभूतमपेक्षते। तत्र केचिन्मननलक्षणं व्यापारान्तरं तत्समवेतमेवासमवायिकारणमाहुः। तदनुपपन्नमिति मन्यामहे। यतस्तस्यापि किञ्चिदसमवायिकारणमनुसरणीयम्। तच्च वरं चितेरेवास्तु। तच्चात्ममनःसंनिकर्षाख्यम्। तस्य चासमवायिकारणं मानस एव परिस्पन्दः। तस्याप्यात्ममनःसंनिकर्षान्तरमात्मसमवेतं प्रयत्नमदृष्टं चापेक्षमाणमसमवायिकारणम्। प्रयत्नादृष्टयोश्चात्ममनःसंनिकर्षान्तरमेवेत्यनादिरेषा कार्यकारणपरम्परा बीजाङ्कुरवदिति वेदितव्यम्। मनसोऽभ्युपगमे च सकलात्मगुणोदय एव प्रमाणम्। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नादृष्टसंस्काराणां नवानामपि वैशेषिकगुणानां मनःसंयोगेनैवोत्पत्तेः। तत्र बुद्धिः स्वसंवेदनसिद्धा प्रमितिस्मृतिरूपा। सुखदुःखेच्छाद्वेषप्रयत्नास्तु मानसप्रत्यक्षवेद्यानि। नच दुःखाभावमात्रं सुखम्। दुःखाभावस्य दुःखानुपलम्भरूपत्वात्। तद्वियुक्तात्मन उपलब्धेरेव दुःखानुपलम्भरूपत्वात्। आत्मोपलम्भातिरिक्तसुखोपलम्भानुभवाच्च। संस्कारस्य तु स्मृतिलक्षणमेव कार्यमवगमकमनुभूतविषय एव स्मृतिर्भवतीत्यनुभवाधेयं कञ्चिदात्मनोऽतिशयमुपकल्पयति। अदृष्टं तु धर्माधर्मलक्षणमागमगम्यमेव। नच केवलादात्मम-

नःसंनिकर्षादेव रूपाद्यवगमः । अन्धादीनामभावादिति च- क्षुरादिबहिरिन्द्रियाण्यङ्गीक्रियन्ते । पञ्चधा च ग्राह्यरूपाद्यु- पलम्भलक्षणकार्यव्यवस्थानात् पञ्च चक्षुरादीनि कल्प्यन्ते । एवंप्रभृतीनि षडिन्द्रियाणि यस्मिन्नायतन्ते तदिन्द्रियायतनं शरीरं जरायुजाण्डजसंस्वेदजभेदभिन्नं त्रिविधम् । उद्भिज्जं शरीरं न भवत्येव । इन्द्रियायतनत्वे प्रमाणाभावात् । यदि श्मशाने जायते वृक्षः कङ्कगृध्रोपसेवित इति निषिद्धफलत्वस्म- रणादुद्भिज्जं शरीरमवतिष्ठते तदप्यनुपपन्नम् । अस्मिन्नंशे प्र- माणाभावात् । स्मृतेर्विमूलतया मुख्यार्थत्वानुपपत्तेः । नच वेद एव मूलमवकल्पतेऽकार्यार्थत्वात् । नचात्र विधिनिषिध्य- मानानुष्ठानात् प्रत्यवाय इत्यवगमकः । यद्यपि शंय्वधिकरण- सिद्धान्ता ऽऽलोचनया निषिद्धादपि कुतश्चित् प्रत्यवायोदयस्त- थापि वृक्षादिरूपशरीरफलतावगन्तुं न शक्यते । फलतया- ऽऽन्वयायोग्यत्वात् । यस्य ह्यन्वययोग्यत्वमवधारितं तस्य वा- क्यार्थानुप्रवेशित्वं यस्य त्वन्वययोग्यत्वाभावस्तस्य वाक्या- र्थानुप्रवेशित्वमपि नास्ति । वह्निना सिञ्चेदितिवत् । यो वेदे तथाभूतार्थप्रयोगः स गौणेनार्थेन लाक्षणिकेन वा वर्णनीय इत्यत्रापि गौण्या लाक्षणिकया वा वर्णनीयमिति त्रिविधमेव शरीरम् । यत् पुनरपार्थिवमयोनिजं शरीरं केवलधर्माधिप- त्यनिबन्धनं कैश्चिदभ्युपगम्यते तत् सर्वशरीराणां पार्थिव- त्वाव्यभिचारान्नानुमातुं शक्यते । सर्वशरीरेषु मनस्त्वक्चावि- शिष्टमिन्द्रियद्वयम् । मनश्चान्तःशरीरं परमाणुपरिमाणम् । तत् खलु द्रव्यभूतं संयोगगुणभागितयेष्यते । द्रव्यं च द्विविधम् । अनेकद्रव्यमद्रव्यद्रव्यं चेति । तत्र मनसोऽनेकद्रव्यत्वे कल्प- नागौरवम् । आरभ्या ऽऽरम्भकद्रव्याभ्युपगमप्रसक्तेः । अद्रव्य-

द्रव्यत्वाभ्युपगम आत्मना सह संयोगापह्नवः। न हि परमम-हतोरनवयवयोश्च संयोगोपपत्तिः। त्रिविध एव संयोगः। अ-न्यतरकर्मज उभयकर्मजः संयोगजश्चेति। तस्मात् परमाणुप-रिमाणं मनः। तच्च सदकारणत्वान्नित्यमाशुतरसञ्चारि च तत्। आशुतरेन्द्रियाधिष्ठानदर्शनात्। न हि तदधिष्ठितमि-न्द्रियं स्वविषयमवसाययितुमलम्। अन्यत्रासक्तचित्तस्य वि-षयान्तराप्रतीतेः। तस्य च मनसोऽनादिधर्माधर्मापेक्षः क्षेत्र-ज्ञेन सह संयोगः। देहान्तरसंयोगश्च तस्यादृष्टापेक्षादात्ममनः-संनिकर्षादुत्पन्नस्य कर्मणः प्रसादेन। सोऽयमात्मा भोक्ता भोगायतनं शरीरं भोगसाधनानीन्द्रियाणि भोग्याः सुखादय आन्तरा बाह्याश्च पृथिव्यादयश्च भुक्तिश्च वेदनेति पञ्चसु वि-धासु तत्त्वं परिसमाप्यते। केन पुनरस्य प्रमाणेनात्मनः प्र-मितिः। अप्रमीयमाणस्य सत्त्वोपगमो निर्निबन्धनः। तत्र के-चिदाहुः। मानसं प्रत्यक्षं सुखादिष्विवात्मनि प्रमाणमिति। तदयुक्तमिति प्राभाकरवराः। न ह्येकस्य कर्तृत्वं कर्मत्वं च स्वापेक्षमुपपद्यते। स्वात्मनि क्रियावृत्तिविरोधात्। नचाहं-संविद्वशेनाविरोधः। स्वयंप्रकाशत्वेन, विषयप्रतीतिगोचरत्वे-नापि तदुपपत्तेः। विषयैः सहोपलम्भनियमश्चैवं सत्युपपन्नः। अन्ये मन्यन्ते। प्रकाशाय हि प्रमाणमप्रकाशस्वभावेषु विष-येष्वपेक्ष्यते। प्रकाशस्वरसे त्वात्मनि प्रकाशापेक्षा मुधैव सं-वित्तिवत्। प्रमाणफलभूता संवित्तिरवश्यं स्वयंप्रकाशाभ्यु-पगमनीया। अन्यथोत्पन्नायामपि तस्यां विषयाणां विदित-त्वावेदने विदितत्वव्यवहारो न स्यात्। नच वाच्यं व्यव-हारयोग्यतैव विषयेषु पुरुषस्य संवित् सा व्यवहार उत्पन्ने फलेनानुमीयत इति। यतो व्यवहारप्रवृत्तेरपि पुरस्ताद्विदि-

तत्त्वं विषयाणामनुसन्धीयत इति सर्वजनसमक्षमेतत् । नापि मानसप्रत्यक्षसमधिगमनीया संवित् । स्वयंप्रकाशेनाप्युपपत्तौ सत्यां तत्कल्पनायां प्रमाणाभावात् । विषयेषु स्थायिषु स्वयंप्रकाशेष्वभ्युपगम्यमानेषु स्वापादिदशाः पुरुषाणामनुपपन्नाः स्युः । संविदि तु स्वयंप्रकाशायां नैष दोष आपद्यते । स्वापादिषु तस्या एवासत्त्वात् । विषयास्तु प्रत्यभिज्ञाबललभ्यस्थेमानः पुरुषाणां स्वापादिदशास्वपि न सन्तीति न शक्यमभिधातुम् । ततस्ते परायत्तप्रकाशाः । संवित्तिस्तु स्वप्रकाशेति सिद्धो दृष्टान्तः । प्रकाशायत्तोऽस्य सत्तोपगमो न प्रमाणायत्तः । एवं च तुरीयेऽपि प्रकाशो नोपरमते । अत एव च मोक्षस्य पुरुषार्थता । अन्यथा विच्छिन्नसकलोपलम्भनात् स्वापादविशिष्टः पुरुषैर्नेष्येत । एतदपि प्रामाणिका न साध्वित्याहुः । स्वरसप्रकाशत्वे पुरुषस्य जाग्रत्स्वप्नतुरीयेष्विव सुषुप्तेऽपि प्रकाशापत्तेः सुषुप्तापस्ताभ्यो न भिद्येत । न हि स्वारसिकस्योच्छेद आवरणं सम्भवति । यत् त्विदं केन चित् प्रलप्यते पार्थिवानामणूनां श्यामत्वं पाकपदावेदनीयेनाग्निसंयोगेन निवर्तत इति । तदसत् । अकृतकं सर्वमविनाशि दिगादिवत् । अकृतकश्च श्यामिमा पार्थिवानामित्यनुमानग्रस्तत्वान्नावरणीयम् । स्वारसिकता च पार्थिवानामणूनां श्यामतया न सिद्धा । लौहित्यस्येव तस्यापि पाकजत्वोपगमात् । सदकारणत्वमेव नित्यत्वम् । अकारणमपि चेदनित्यं न नित्यलक्षणं किंचिदवशिष्यते । तत्त्वविदस्त्वाचक्षते । नात्मा विषयानुविद्धोऽवभासते नच विषया बोद्धर्यनवभासमाने भासन्त इति तावत् सिद्धं । तत्र यदेतद्विषयेषु प्रमाणं तज्जानितैव या संवित् सा पुरुषं विषयांश्च विषयीकुर्वन्ती समुद्दीयते ।

तत्संवित्तिफलभागित्वेऽपि पुरुषस्य न कर्मता किन्तु कर्तृतैव गन्तृवत् । यथा गमनफलसंयोगिनो गन्तुर्न कर्मता किन्तु कर्तृतैव तथा बोद्धुरपि वेदितव्यम् । परसमवायिक्रियाफलयोगि कर्मेति कर्मज्ञाः । अत एव कर्मत्वकर्तृत्वे नात्मनः संभवतः । अत एव च सहोपलम्भानियमोऽपि विषयविषयवित्तीनामुपपन्नः । एवं च विषयवित्तिगोचरत्वादात्मनो विषयवेदनोपायोपरमे स्वापादिष्वप्रकाशो युक्त एव पुरुषस्य । तुरीयेऽपि सम्भूतसकलोपलम्भोपाय आत्मा सन्मात्रतयैवावतिष्ठते । नच मोक्षस्यापुरुषार्थता । सांसारिकत्रिविधदुःखोपरमरूपत्वान्मोक्षस्य । दुःखोपरमो हि पुरुषैरर्थ्यते । न चेदं युक्तम् । यथा निखिलदुःखोपरमरूपत्वात् पुरुषार्थत्वं तथा सकलसुखोच्छेदहेतुरूपत्वादपुरुषार्थतापीति । यतः सांसारिकं सुखं विवेकिनः साधनपारतन्त्र्यलक्षणया क्षयितालक्षणया च दुःखतया कवलितं दुःखमेवेति मन्यमाना नान्यं तमाद्रियन्ते विवेकिनः । एवं मोक्षायोत्तिष्ठते । एवं च परमाऽऽनन्दताऽऽभ्युपगमोऽपि मन्दफल एव । नच प्रमाणमपि तत्रैवावकल्पते । श्रुतीनां सिद्धवस्तुबोधकत्वाभावात् । प्रत्यक्षविरोधश्च । नच संसरन्तस्तथाविधमानन्दमनुभवन्ति । नचाभिभूततयाऽऽननुभवः । स्वारसिकस्य स्वप्रकाशस्याऽऽनन्दस्याभिभवायोगात् । नच प्रेमाऽऽस्पदतया आत्मन आनन्दतासिद्धिः । आत्मनि प्रेमासिद्धेः । शरीरोपघाते हि दुःखोदयात् तदुपघातपरिहारं सर्वे प्रार्थयन्त इत्यात्मनि प्रेमाभिमानः । किञ्च संसारिणां स्वारसिकः परमपरमाऽऽनन्दो नानुभूतपूर्व इति कथं निर्बन्धनमात्मनि प्रेम । अतो विषयविशेषसंभोग एवाऽऽनन्द इति सुन्दरम् । मोक्षस्तु सांसारिकदुःखोपशमात् पुरुषार्थ इति पुष्कलम् ।

कः पुनरेष मोक्षः। अविद्याऽस्तमय इति केचित्। एवमेवाद्वितीयमसंसृष्टं सकलोपाधिपरिशुद्धं ब्रह्म तदनाद्यविद्यावशेन शरीरादिसद्वितीयमिवोपाधिकलुषितावभासमानं लब्धजीवव्यपदेशं सद्बद्धमिव कल्प्यते। अतोऽनाद्यविद्यैव संसारो निखिलविकल्पातीतपरिशुद्धविद्योदयात् तदस्तमय एव मोक्षः। तदिदं श्रद्धाविजृम्भितमिति प्रमाणपरतन्त्राः। न खल्वद्वैतं कस्य चित् प्रमाणस्य गोचरः। स्यान्मतम्। प्रत्यक्षमेव विधिमात्रोपक्षीणव्यापारमपरिस्पृष्टान्योन्यभेदं तदेकमेव तत्त्वं साक्षात्करोतीति। तदसत्। सत्यं विधायकमेव प्रत्यक्षम्। तत्तु विदधदपि स्वरूपं रूपतया रसं च रसतया विदधाति न पुनः सर्वमेकरूपमेव। यथा रूपे तद्धारावाहिनी बुद्धिस्तथाभूतैव यदि रसेऽपि स्यात् तदा भवेदेव प्रत्यक्षेण साक्षात्कृतमद्वैतम्। न त्वेवमेतदिति सर्वप्रतिपत्तृस्वसंविदितम्। यच्च प्रमेयविकल्पेन सामान्यमेव वस्त्विति स्थापयित्वा सत्तया महासामान्यरूपत्वात् तावन्मात्रमेव तत्त्वमिति साधिते तदपि गगनग्रामकल्पम्। सत्यं न विशेषमात्रमेव वस्तु सत्यं च सामान्यविशेषात्मकं वस्तु नास्ति किन्तु सामान्यविशेषावन्योन्यसम्बद्धौ द्वे वस्तुनी। यथा च तत्राभावेष्विह प्रत्ययो नास्तीति तथा जातिप्रकरणे निर्णीतम्। अथागमादेवाद्वैतं सिध्यति। न। आगमस्य कार्यैकविषयतया सिद्धे तत्त्वे प्रामाण्यानुपपत्तेः। अपिच वाक्यार्थे आगमः प्रमाणमिष्यते। तत्रानेकपदार्थात्मनि वाक्यार्थे धियमुपजनयत् कथमद्वैतमवभासयेत्। अथेदमुच्यते स एष नेति नेतीति सकलोपाधिनिषेधेन नानाभूतवस्त्वन्तरापाकरणादद्वैतमागमेन साध्यत इति। तदप्यसारम्। यः खल्वेष इति सद्रूपतया प्रत्य-

यस्पृष्टः पदार्थः सोऽसत्त्वापादकेन नञर्थेन सह सम्बद्धुम-
योग्यः । अस्ति नास्तीतिवत् । अन्वयायोग्ययोश्च पदार्थयो-
रन्वयाभावान्न वाक्यार्थभवनम् । तर्हि निराकृतान्येव सर्वाणि
निषेधवाक्यानि । मन्द मैवं परिभाषय । नहि निषेधवाक्येषु
कस्य चिदात्यन्तिको निषेधः किन्तु कचिन्निषिध्यते । अद्वैता-
भिमानी तु भवानात्यन्तिकमेव निषेधमभिलष्यति । सोऽय-
मात्मीय एव बाणो भवन्तं प्रहरति ।

लभ्यरूपे कचित् किञ्चित् तादृगेव निषिध्यते ।
विधानमन्तरेणातो न निषेधस्य सम्भवः ॥ इति ।

प्रत्यक्षादिविरुद्धार्थत्वादद्वैतावबोधक आम्नायो न यथा-
वस्थितो वर्णयितुं न्याय्यः । यत् त्विदं प्रपञ्चेन साधितं प्र-
त्यक्षादिविरोधेऽप्याम्नायस्य बलीयस्त्वं तद्बलेन प्रत्यक्षादी-
नामेव भ्रान्तता कल्पनीयेति । तदपि मनोरथमात्रम् । प्रत्य-
क्षादिविरोधे पदार्थानामन्वययोग्यताविरहादाम्नायस्यैव त-
द्विरोधेऽनुदयात् । अतः प्रत्यक्षादिविरोधादाम्नाये गौणी
लाक्षणिकी वा वृत्तिरास्थेया । तत्रा ऽऽनन्दश्रुतयः स्वाभावि-
कदुःखाभावपरतया वर्णनीयाः । लौकिका ऽऽनन्दस्य चाल्प-
तया दुःखानुषक्ततया च व्याख्येयाः । एकत्वश्रुतयश्चैकास्मि-
न्नायतनएकस्यैव स्वामित्वमित्येवं पराः । इन्द्रो मायाभिः पु-
रुरूप ईयते इति देहात्माभिमानेन जन्मनि जन्मनि भिन्न इव
भातीत्यर्थः । अनेकदेहपरिग्रहेऽप्येक एवात्मेति नानात्वनि-
षेधस्यार्थः । एष नेति च शरीरादीनामात्मत्वनिषेधस्तदति-
रिक्तप्रतिपत्तिपरः । विज्ञानश्रुतयश्च चिच्छक्तियोगित्वाश्रया-
द्व्योमादिभ्यो विशेषापादनफलाः । सर्वात्मश्रुतयश्च सर्वस्या

ऽऽत्मार्थत्वात् तादर्थ्यनिमित्तोपचारात्। आत्मनि विज्ञाते सर्वमिदं विज्ञातमिदं विज्ञातमिति यदुच्यते तदात्मज्ञानस्य परमपुरुषार्थमोक्षफलत्वादस्मिन् विज्ञाते सर्वमेव ज्ञानं निष्फलमिति दर्शयितुमित्येषा दिक् । अथोच्येत । वित्तेर्भिन्नस्याप्रकाशा ऽऽत्मनः प्रकाश एवानुपपन्न इति यद्यत् प्रकाशते तत् तत् प्रकाशादभिन्नम् । प्रकाशात्मकं हि ब्रह्म । अतो ब्रह्मात्मकं जगदिति सिद्धमद्वैतमिति । तदिदं स्वपक्षविरुद्धम् । कथमेवं बुद्धिमन्तोऽभिदधति । एवं हि नानाभूतानामाकाराणां प्रकाशाभेदे प्रकाशस्यापि नानाभावापत्तेरद्वैतं दूरापास्तम् । अथोच्येत । विविधोऽयमाकारप्रपञ्चोऽविद्याध्यासवशादवभासत इत्येतदपि स्ववचनविरुद्धम् । सदात्मा प्रकाशस्तेन सह सदात्मान आकारास्तावदभिन्ना इति न घटते । तथाच सत्यप्रकाशात्मानस्ते कथमिव प्रकाशेरन् । अपिच । अप्रकाशात्मन एव प्रकाशः सम्भवतीति बाह्यार्थसिद्धावुक्तम् । अत एषोऽपि माहायानिकपक्षानुप्रवेशिनां ब्रह्मवादिनां मोह एव । अपिच । असन्तमसन्तं प्रपञ्चं कथमिवाविद्या प्रकाशयितुमलम् । न खल्वसत्ख्यातिरसिद्धा किं त्वग्रहणरूपैवेति नयवीथ्यां साधितम् । अतो नाविद्यास्तमयो मोक्षः । आत्यन्तिकस्तु देहोच्छेदो निःशेषधर्माधर्मपरिक्षयनिबन्धनो मोक्ष इति सिद्धम् । धर्माधर्मवशीकृतो जीवस्तासु तासु योनिषु संसरति । तयोरेकान्तोच्छेदेऽप्यपगतदेहेन्द्रियसम्बन्धः समुत्खातनिखिलसांसारिकदुःखबन्धनो मुक्त इत्युच्यते । कथं पुनरशेषधर्माधर्मपरिक्षयः । न तावदुपभोगेनैव । अनादिशरीरसन्ततिप्रञ्चितानां भोगसमये सञ्चीयमानानां कर्माशयानामनन्तानां क्षेप्तुमशक्तेः । उच्यते । यः खलु सांसारिकेभ्यो दुःखेभ्य उ-

द्विग्नस्तदनुषङ्गशबलेभ्यश्च सुखेभ्योऽपि गतस्पृहो मोक्षायो-त्तिष्ठते स तावद्बन्धहेतुभूतेभ्यो निषिद्धेभ्यः प्रत्यवायहेतुभूत-भ्योऽभ्युदयसाधनेभ्यश्च निवर्तमानः सन्नुत्पन्नपूर्वौ धर्माधर्मौ भोगेन कृतावपि क्षयं नयन् शमदमब्रह्मचर्यादिकाङ्गोपबृंहि-तेनात्मज्ञानेन नच पुनरावर्ततइत्यपुनरावृत्तये चोदितेन निः-शेषकर्माशयं नाशयन् मुच्यते। नचापुनरावृत्तेरर्थवादतया वर्णनमात्मज्ञानस्यापरार्थत्वात्। परार्थत्वे हि पर्णमयीन्यायेन फलश्रुतिरर्थवादतया वर्ण्यते। अपारार्थ्ये तु सैवाधिकारि-विशेषणं रात्रिसत्रवत्। नच कर्मविधिशेषभूतमात्मज्ञानं त-स्यापरार्थत्वात्। परार्थत्वे प्रमाणाभावात्। उपकारलक्षण-शेषत्वनिराकरणादित्यलमतिविस्तरेण।

ननु मुक्तस्यात्मनः सकलोपलभ्यातीतस्य सन्मात्राव-स्थितौ किं प्रमाणम्। उच्यते। सदकारणं च यत् तदविनाशि गगनवत्। सदकारणं चायमात्मेत्यविनाशित्वाभावः सिद्धः। परममहत्त्वं चात्मनः परिमाणं गगनवत्। यत्र यत्रात्मनो गुणा उपलभ्यते तत्र तत्र तावदात्मा वर्तत इति प्रमाणसिद्धं। गु-णिनमन्तरेण गुणस्यावृत्तेः। तत्र ह्येष संशयः किमयं गत्या संनिधीयते उत गतिनिरपेक्ष एवेति। तत्र गतिसव्यपेक्षत्वाश्र-यणे गतेरेव तावत् कल्पना। तस्याश्चासमवायिकारणं कल्प-नीयम्। नच तत्र किंचन प्रमाणमस्ति। अगच्छतोऽपि संनिधा-नोपपत्तेः। गगनवत्। अथोच्येत यत्रापि देहो न वर्तते त-त्रापि चेदात्मा संनिधीयते तदा शरीर इव तत्रापि तद्गुणा-नामुपलब्धिः स्यादिति। तन्न। यतः सर्वात्मगुणानामात्ममनः-संनिकर्षोऽसमवायिकारणम्। स च संयोग आत्ममनोविरहेणा-न्यत्र न वर्तते। मनश्च शरीरान्तरवतिष्ठतइत्युक्तम्। यत्रैव

धासमवायिकारणं तत्रैव कार्यमिति न बहिर्देहमात्मनो गुणोपलम्भः। नन्वेवं शरीरस्यापि गतिकल्पनमप्रमाणकमेव। न। तस्यैकत्र सतोऽन्यत्र दर्शनप्रसङ्गात्। आत्मनस्तु सतोऽपि सकलकरणपथातीतस्य दर्शनप्रसक्तिरापादयितुमशक्येत्यगत्या सर्वसंयोगिभिरात्मा संयुज्यते। तच्च परममहत्त्वमन्तरेण न सम्भवतीति नाणुपरिमाणः शरीरपरिमाणो वात्मा। शरीरपरिमाणत्वं च विना सावयवत्वमनुपपन्नम्। तादृशमपि महत्त्वमवयवबहुत्वमहत्त्वप्रचयविशेषाणामन्यतरस्मिन्नायत्तम्। नचावयवकल्पना प्रमाणवती। ननु सर्वगतत्वे पुरुषस्य शरीरान्तरेऽपि भोगप्रसङ्गः। नैवम्। यस्य तच्छरीरं यस्य तद्भोगायतनं यानि च यस्येन्द्रियाणि तानि तस्य भोगसाधनानीति नायतनान्तरे भोगप्रसङ्गः। ननु शरीरेन्द्रियसम्बन्धव्यवस्थापि किंनिबन्धना। उच्यते। धर्माधर्मसमवायनिबन्धनेति भवाननवबुध्यताम्। यदीयाभ्यां धर्माधर्माभ्यां यानि शरीरेन्द्रियाण्युपात्तानि तानि तस्यैव। धर्माधर्मव्यवस्थैव किमायत्तेति चेत्। तदुपायभूतकर्मसम्बन्धाद्व्यवस्था तत्समवायिकारणभूतशरीरेन्द्रियसम्बन्धनिबन्धनेत्यनादितया शरीरेन्द्रियधर्माधर्मसन्ततेः सर्वमुपपन्नम्। आह विभुत्वं चेदात्मनस्तदा सर्वशरीरेष्वेक एवास्तु गगनवत्। यथा गगनमेकमेव घटमणिकादितत्तदनेकसम्बन्धि तद्वदात्मापि किं नाभ्युपेयते किं प्रत्यायतनं भेदाभ्युपगमेन। उच्यते। यस्तावत् प्रतिपत्ता परायतनस्वामिनं स्वप्रयत्नपूर्वकात्मीयशरीरसमवेतसमानचेष्टादर्शनादनुमानतः प्रत्येति प्रयत्नवत्तया नासौ तद्ग्राहकैकरसस्वात्मभूततया। किन्तु ग्राह्यकोटिनिविष्टमनात्मभूतमेव। तेन प्रतीतिविरुद्धत्वाद्भेदस्य किं भेदाभ्युपगमेनेति वचनमकिञ्चि-

त्करम्। न हि परायतनं स्वमित्येवमनुमानमुदेतुमलम्। यथा मम शरीरे मदीयप्रयत्नपूर्वा चेष्टा तथा परशरीरे मत्प्रयत्ननिबन्धनैवेति प्रत्यक्षविरोधात्। प्रत्यक्षेण हि स्वात्मनि समवयत्प्रयत्न उपलभ्यते। नच परशरीरचेष्टानुगुणः प्रयत्नः स्वात्मनि पुरुषाणां प्रत्यक्षीभवतीति पर एव प्रयतिता परशरीरेऽनुमीयते। नचैवमनुमानेन परात्मप्रतीतौ कथमिदमुच्यतेऽग्राह्यो न गृह्यतइति। परेण न गृह्यतइत्येतदभिप्रायमेतद्भवतीति। उच्यते। ग्राहकैकरसतया परेण न गृह्यतइति तस्यार्थः। तस्मान्न विरोधः। किञ्च नानाव्यवस्थाना नानाभूताः प्रति क्षेत्रं पुरुषाः। धर्माधर्मसुखादिव्यवस्थादर्शनात्। अन्यथा ह्येकस्य धर्माधर्मादयः सर्वस्य भवेयुः। तत्र केचित् पण्डितमानिन आहुः। काल्पनिकी सुखादिव्यवस्था भविष्यति। यथैकस्मिन्नेव शरीरे पादादिवेदनाव्यवस्था न व्यतिकीर्यते तथा नानाशरीरेषु न व्यतिकरिष्यत इति। न हि पादगता वेदना शिरसि शिरोगता वा पादे। नच वेदना पादादिष्वेव समवेतेति शक्यते वक्तुम्। तेषामज्ञत्वात्। ज्ञाता हि वेदनाभिः सह सम्बध्यते दुःखविशेषरूपत्वात् तासामिति। तदिदं मन्दं बालजनमोहनमिति वृद्धाः। तथाहि पादे मे वेदना शिरसि मे वेदनेति सर्ववेदनास्वेको दुःखी प्रकाशते। पादादिषु तु सन्तापादिकं समवैति। तत्र सन्तापस्तेजसा सह संयोगः। शूलस्तु वायुना सहेति वातपित्तश्लेष्मणां क्षोभजेषु सर्वेषु वेदितव्यम्। अचेतनानामपि पादादीनां पित्तादिसंयोगो न विरुध्यते। तदर्थं दुःखमात्मन्येव समवैति। अथोच्येत। यथा प्रतिबिम्बभाव एकस्यैव मणिकृपाणदर्पणाद्युपाधिवशेन व्यवस्थितानि श्यामत्वादीनि तथैकस्याप्या-

त्मनो नानाशरीरोपाधिवशेन सुखादयो व्यवतिष्ठन्तइति । तदयुक्तम् । श्यामत्वादीनामौपाधिकानामुपपत्तिमत्त्वाद्विम्ब-सम्बन्धाभावात् । तेनैषा सम्भवति व्यवस्था । सुखादयस्तु नौपाधिकाः । किं त्वात्मसमवायिन एवेत्येकात्मवर्त्तित्वे व्य-वस्थानुपपत्तिः । किञ्च सिद्धे व्यक्तमेकत्वे स्यादप्येषा कल्पना ।

नानाविवादसम्भूततमःसङ्घातभेदिनाम् ।
एष शालिकनाथेन तत्त्वालोकः प्रवर्तितः ॥

इति महामहोपाध्यायमिश्रशालिकनाथकृतौ प्रकरणपञ्चिकायां तत्त्वालोको नामाष्टमः परिच्छेदः ॥ ८ ॥

॥ न्यायशुद्धिर्नाम ॥

शब्दनित्यत्वनिर्वचनपरं नवमं प्रकरणम् ।

अपौरुषेये सम्बन्धे शब्दः प्रामाण्यमृच्छति ।
स च नित्यत्वसिद्धौ स्यादिति तत् प्रतिपाद्यते ॥

यद्युच्चरितमात्रविनाशी शब्दो भवेत् तदा तस्य वृद्धव्यवहारेण स्वाभाविकी स्वार्थाभिधानशक्तिरवसातुमशक्या । भूयो भूयः प्रयोगदर्शने हि तत्तदस्वार्थपरिहारेण निष्कृष्य स्वार्थाभिधानसामर्थ्यमवधार्यते । नचोच्चरितमात्रापवर्गिणः शब्दस्य पुनः पुनः प्रयोगदर्शनमुपपद्यते । स्वार्थाभिधानसामर्थ्यानवधारणे च प्रथमश्रुत इव शब्दो नार्थमवधारयितुमलम् । अर्थं चानवबोधयतः प्रामाण्यमयुक्तमिति शब्दस्य प्रामाण्यमिच्छता युक्तमभिधानस्य नित्यत्वस्थापनमिति सप्रयोजनम् । ननु क्षणिकत्वे वर्णानां तत्सदृशादिविषयवृद्धव्यवहारपूर्वकमेव सम्बन्धाध्यवसानमुपपद्यते किं नित्यत्वस्थापनयत्नेन । उच्यते । प्रत्युच्चारणं भिन्नेष्वपि वर्णेषु गत्वादिकं कल्पयितुं शक्यते भेदाग्रहेणापि शुक्तिकारजतवदभेदप्रत्ययाभिमानोपपत्तेः । यत्र हि भेदमध्यवस्यत एवाभेदज्ञानं तत्रान्यथानुपपत्त्या सामान्याश्रयणं घटते । नचानित्यत्ववादिनो वर्णेषु प्रत्युच्चारणं साक्षाद्भेदाध्यवसानं सम्मतम् । ननु च युक्तं शुक्तिकारजतादिषु भेदाग्रहणादभेदव्यवहार इति सामान्यासम्भवो नेदं रजतमिति बाधकप्रत्ययोदयात् । इह तु सामा-

न्योपपत्तेर्भ्रान्तिकल्पना निष्प्रमाणिकैव नायं गकार इति बाधकाभावात्। उच्यते। न बाधकमात्रायत्तैव भ्रान्तिकल्पना किन्तु कारणदोषायत्तापि। दृष्टं चातिसादृश्याद्भेदाग्रहणाद्भ्रान्तित्वमिति साक्षादनुपजातेऽपि बाधके युक्तमेव भ्रमावधारणम्। अतो न गत्वादिस्तत्र सम्भवति।

अभिव्यञ्जकवैधर्म्यादभिव्यक्तेरसम्भवे।
प्रयत्नानन्तरं दृष्टेरभिधानं प्रयत्नजम्॥

पुरुषप्रयत्नानन्तरं हि श्रवणं शब्दस्य द्वेधाऽवकल्पते। प्रागजातत्वादनुपलब्धः प्रयत्नेन जनित उपलभ्यतामापद्यते। अनभिव्यक्तत्वाद्वाऽभिव्यज्यतइति। तत्र न तावत् प्रयत्नस्य शब्दं प्रत्यभिव्यञ्जकत्वं सम्भवति। आवरणापायेन वा किञ्चिदभिव्यज्यते सन्निधापनेन वा। नच शब्दस्यावरणमुपपद्यते। इन्द्रियसम्बन्धप्रतिबन्धेन ह्यावरणं कुड्यादिना घटादेरुपलब्धम्। नच शब्दस्येन्द्रियसम्बन्धः प्रतिबन्धुं शक्यते नित्यत्वात्। उत्पत्तिनिरोधो हि प्रतिबन्धः। नचासौ नित्यस्योपपद्यते। आकाशो हि श्रोत्रेन्द्रियं शब्दवत्त्वात्। शब्दोपलम्भकतया च शब्दवत्त्वं चक्षुर्वत्। यथा चक्षू रूपोपलम्भकं रूपवत्। तथा श्रोत्रमपि शब्दवत्। आकाशश्च शब्दवानिति स एव श्रोत्रं तद्गुणश्च शब्दस्तस्मिन् नित्यसमवेत इति न तस्यावरणसम्भवः। अतस्तदपनयेन नाभिव्यक्तिः। अत एव सन्निधानस्यासम्भवो नित्यसंनिधानादभिव्यङ्ग्यस्य। किञ्च। अभिव्यञ्जकाः समानदेशस्थानेकेन्द्रियग्राह्याः स्वैश्च युगपदेवाभिव्यञ्जयन्ति रूपादीनिव प्रदीपादयः। रूपं परिमाणं संख्येति सर्वं सकृदेव प्रदीपादिभिर्व्यज्यते। अतः सर्वश-

ब्दोपलम्भो दुर्निवार एव । किञ्च । आकाशविशेषगुणत्वा-
च्छब्दस्य मुघ्नस्थेनाभिव्यक्तः पाटलिपुत्रस्थेनाप्युपलभ्येत ।
सर्वदा चोपलम्भोपरमो न स्यात् । अथ श्रोत्रेन्द्रियसंस्कार
एव शब्दस्याभिव्यक्तिरिष्यते । न । सोऽपि खल्विन्द्रियस्य
संस्कारो न तावदुन्मीलनवदावरणापगमः । पूर्ववदावरणासं-
भवात् । न ह्यालोकेनेवाप्यायनं चाक्षुषस्य रश्मेः कोष्ठ्यानां
वायूनामाकाशस्यावयवसम्भेदासम्भवात् ।

सकृच्च संस्कृतं श्रोत्रं सर्वशब्दान् प्रकाशयेत् ।

यथा घटायोन्मीलितं चक्षुः पटमपि दर्शयति ।
तस्मादभिव्यञ्जकत्वेऽनुपपन्ने यदि प्रयत्नः कारकोऽपि न
स्यात् तदा तदपेक्षोपलब्धिर्न सम्भवेत् । तेनेदमित्थ-
मनुमानं प्रयोक्तव्यम् । शब्दः पुरुषप्रयत्नोत्पाद्यः । त-
दभिव्यङ्ग्यत्वे सति तदनन्तरोपलब्धेः । यो यो यदभिव्य-
ङ्ग्यस्तदनन्तरोपलभ्यः स तस्योत्पाद्यः । यथा घटः कुलाल-
व्यापारस्येति । केन पुनः प्रकारेण प्रयत्नेन शब्द उत्पाद्यते ।
तत्र केचिदाहुः । पुरुषप्रयत्नादीरितैर्वाय्ववयवैः स्थानविशेषा
ऽऽघातसंस्कारसंस्कृतैः सर्वतोविदिक्कैः संयोगा ऽऽकाशसमवायि-
कारणानुगृहीतैश्च स्वसमवेतः शब्द आरभ्यते । वायोश्च गतिम-
त्त्वात् तदारब्धः शब्दोऽपि गतिमान् कर्णशष्कुलीमण्डला-
वच्छिन्नेन नभसा श्रोत्रभावमापन्नेन संयुक्तः सन्नुपलभ्यते ।
वेगाख्यसंस्कारनिबन्धना च वायोर्गतिरिति तदपगमे गति-
विच्छेदाद्दूरे यच्छ्रोत्रं तत्रासमवायासत्त्वाच्छब्दो न श्रूयते । नचै-
तदुपपद्यते । वायवीयश्चेच्छब्दो भवेत् स्पर्शनेन बधिरैरुपलभ्ये-
त । स्यान्मतम् । अन्तर्भूतत्वाद् स्पर्शनेनानुपलब्धिरिति । तन्न ।
प्रत्यक्षोपलब्धावर्हत्वाद् । न ह्यसावभिभूतजरच्छ्रोत्रेण नोपल-

भ्यते। नच वाच्यं न स्पर्शनेन्द्रियग्राह्यो वायुरिति तदनुवि-धानेन तदवगतेः। अथ मतम्। स्पर्शमात्रं स्पर्शनेन्द्रियेणोप-लभ्यते न वायुद्रव्यमिति। तन्न। स्पर्शव्यभिचारेऽपि द्रव्यस्य प्रत्यभिज्ञानात्। अन्ये त्वाहुः। संयोगाद्विभागाद्वा आद्यः शब्दो निष्पद्यते। यथा ताल्वादिवायुसंयोगानुगृहीताद्वाय्वा-काशसंयोगादाकाशे शब्दः सञ्जायते तथा ताल्वादिवायुवि-भागोपकृताद्वाय्वाकाशविभागादाकाशएव शब्दः। स च शब्दः शब्दान्तरमारभते तदपि शब्दान्तरमिति कर्णशष्कु-लीमण्डलावच्छिन्ने नभसि श्रोत्रभावमापन्ने निष्पन्नः शब्दः श्रूयतइति।

नानाभावे प्रयत्नस्य नानाभावोपलम्भनात्।
वैलक्षण्ये च शब्दस्य वैलक्षण्येन कार्यता॥

किञ्च। अभिव्यञ्जश्चेत् प्रयत्नेन शब्दो न प्रतियत्नं भे-देनोपलभ्येत। न खल्वभिव्यञ्जकप्रदीपभेदेऽपि नानाभावेन भावानामुपलम्भः। कारकहेतुस्तु कार्यतो हेतुरिति सुप्रभेदः। अतः शब्दस्य प्रयत्नो जनयितेति निश्चीयते। अथ कारकवै-लक्षण्यानुविधायिनी कार्यवैलक्षण्यसिद्धिरविहिता। वैलक्ष-ण्येऽपि चाभिव्यञ्जकस्याभिव्यङ्ग्यवैलक्षण्यं न सम्भवति। श-ब्दस्तु प्रयत्नस्य मृदुत्वे बलवत्त्वे च मृदुर्बलवांश्चोपलभ्यमा-नस्तत्कार्यतां न जहातीति।

शब्दे तत्प्रत्यये स्पष्टे नानाव्यञ्जनकल्पनात्।
उपलब्धिव्यवस्थानमुपपन्नं भविष्यति॥

यदि शक्ष्यामः शब्दस्य स्पष्टप्रत्यभिज्ञानमुपदर्शयितुं तदा प्रयत्नस्य कारकत्वे निषिद्धेऽभिव्यञ्जकत्वे च स्थिते उपल-ब्धिव्यवस्थानं व्यञ्जकबहुत्वेन वर्णयिष्यामः। श्रोत्रमेव सं-

रिक्रयते तत्संस्कारकता ऽभिव्यञ्जकता । कोष्ठयो हि वायुः प्रयत्नवदात्मसंयोगादुत्पद्यते । स नाभेरुद्गच्छन्नुरःप्रभृतिष्व-ष्टसु स्थानेष्वभिघातेन संस्कृतो यावद्वेगमभिप्रतिष्ठमानः श्रोत्र-मनुप्राप्तः शब्दोपलम्भानुगुणसंस्कारमारभते । तत्संयोग एव श्रोत्रसंस्कारः । वेगवत्त्वाच्च वायोः कर्मोत्पत्तौ श्रोत्रविभागात् संयोगोपरमे शब्दस्यानन्तरमुपलम्भविच्छेदः । प्रयत्नभेदाच्च वायुकर्मभेदादुरःप्रभृतिस्थानसंयोगान्यत्वाद्व्यवस्थया शब्दश्र-वणम् । शब्दोत्पत्तिवाद्यप्युत्पादकभेदमतुमन्यत एव । अन्यथा कार्यभेदासम्भवात् । यत्तूपवर्णितं यथोन्मीलितसंस्कृतं चक्षुर्न समानदेशस्थानुपलभ्यान् व्यवस्थयोपलम्भयतीति । तदयुक्तं । तत्रैकत्वादभिव्यञ्जकस्य । एकमेव ह्युन्मीलनं सर्वोपलम्भानु-गुणनेत्रसंस्कारारम्भकमिति न तत उपलब्धिव्यवतिष्ठताम् । इह त्वेकत्वं संस्काराणामसिद्धम् । नन्वभिव्यङ्ग्यस्यैकेन्द्रिय-ग्राह्यत्वेऽभिव्यञ्जकस्यैकतैव प्राप्नोति । ये समानेन्द्रियग्राह्या-स्तेषामेक एवाभिव्यञ्जकः । यथाऽऽलोको घटादीनाम् । ए-कत्वे चाभिव्यञ्जकस्योपलब्धिव्यवस्था नोपपद्यते । अतो-ऽभिव्यञ्जकत्वासम्भवे कारकत्वे व्यवस्थिते भेदाग्रहणनि-बन्धनैव प्रत्यभिज्ञेति न्यायाकल्पना । अत्रोच्यते । एकेन्द्रिय-ग्राह्यतापि भवेदभिव्यञ्जकभेदोऽपि भवेदिति किमनुपपन्नम् । स्वाभाविकी हि यस्य सम्बन्धव्याप्तिस्तस्य लिङ्गत्वमाशङ्का-मानाशेषोपाधिपरिहारेण स्वारसिकसम्बन्धव्याप्तिनिश्चयः । इह तु न शक्यते निर्णेतुं किमेकेन्द्रियग्राह्यतया घटादीनां त-द्गतरूपादीनां चैकोऽभिव्यञ्जक उत रूपिद्रव्यत्वात् तत्सम-वायित्वाच्चेति । अतोऽनवधारितसम्बन्धव्याप्तिकमेकेन्द्रियग्रा-ह्यत्वं नाभिव्यञ्जकैक्यानुमानसमर्थम् । अतोऽभिव्यञ्जकत्वे

ऽपि प्रयत्नस्योपलब्धिव्यवस्थोपपत्तिः। ननु स्थिरवाय्वपनय एव संस्कारः। अपनीते च तस्मिन् सर्वशब्दोपलब्धिर्दुर्निवारा। उच्यते। नावरणापनयनं तस्याभिव्यञ्जकत्वं वायुना शब्दावरणासम्भवात्। किं त्वदृष्टेन रूपेण। एवं चापनेतृकोष्ठ्यवायुभेदात् स्थिरवायुविभागलक्षणयोर्वेगविनाशार्थम्। स्थास्नुद्रव्यसंयोगाद्धि वेगविनाशोऽन्यत्र प्रतीत इतीहापि तदर्थमेव स्थिरवायुकीर्तनं भाष्ये। ननु चैकत्वादाकाशस्य तस्य च श्रोत्रत्वात् तत्संस्कारे सर्वपुरुषेन्द्रियसंस्कारात् सर्वेऽपि शब्दमुपलभेरन्। नैष दोषः। धर्माधर्मोपरञ्जितकर्णशष्कुलीभेदात्। शष्कुलीसंस्कारो हि श्रोत्रसंस्कारः भिन्नाश्च प्रतिपुरुषं शष्कुल्य इत्यसंस्कृतशष्कुलीको न शब्दमुपलभते। अनुवातं च दूरादेव शब्दमुपलभते। बाह्यवायुनोदनानुगृहीतस्य कोष्ठ्यवायुवेगस्य दूरगमनहेतुत्वात्। शब्दाच्छब्दान्तरारम्भपक्षे तु नानुवातस्य कश्चिदुपयोगः।

अभिव्यञ्जकनानात्वाच्छब्दो नानेव लक्ष्यते।
नेत्रवृत्तिविभेदेन चन्द्रस्तैमिरिकैरिव॥

स्पष्टे तद्दूरे नानाभावोपलम्भः शब्दे तावदसिद्ध एव। किन्तु परस्परनिरपेक्षैरभिव्यञ्जकैः कोष्ठ्यवायुभिर्नानावक्तृसमुत्थैर्नानाभूतैर्भिन्नं श्रोत्रसंस्कारमारभमाणैर्नानाभूतशब्दबुद्धिं जनयद्भिर्नानेव शब्दो बुध्यते। चन्द्र इव तिमिरविभिन्नाभिर्नेत्रवृत्तिभिः।

नानादेशोपलम्भे हि सर्वेषां भ्रान्तिसम्मतिः।
कर्णच्छिद्रगतस्यैव शब्दस्य श्रवणं यतः॥

यदुच्यते कार्यत्वे शब्दस्य कारणदेशभेदान्नानादेशो ग-

गन इति । तदयुक्तम् । यद्यपि कृतकः शब्दस्तथापि संनिकृष्टविप्रकृष्टयोर्युगपच्छब्दोपलम्भनप्रसङ्गेन प्रतिवातानुवातयोश्चाविशेषाऽऽपत्तेर्नेन्द्रियं प्राप्तस्योपलम्भकम् । प्राप्तावपि नेन्द्रियं शब्ददेशमुपसर्पति प्रत्यक्षत्वाच्छ्रोत्रदेशे कर्णशष्कुल्याः प्रतिवातानुवातयोश्च तुल्योपलम्भाऽऽपत्तेः । शब्दे तु श्रोत्रपथं प्राप्त उपलभ्यमाने देशभेदः प्रतीयते । अतो भ्रान्तिरेषा नानादेशेषु शब्द उपलभ्यतइति ।

किंनिबन्धना भ्रान्तिः । अभिव्यञ्जकदेशनिबन्धनेति ब्रूमः । ताल्वादिस्थानाऽऽघातसापेक्षो हि कोष्ठ्यो वायुरभिव्यनक्ति । अतो वक्तृदेशोऽपि भवत्यभिव्यञ्जकदेशः । तेन शब्दं शृण्वतस्तदभिव्यञ्जकदेशोऽपि न तदविनाभावोपकल्पितो बुद्धिस्थो भवति । शब्दाभिव्यक्तिविशेषेण च दूरासन्नत्वे तस्य कल्प्येते । प्रत्यक्षोपलभ्यमानवक्तृविषये च शब्दश्रुतिविशेषे दिग्विशेषो नियतमवधारितः । अतो दिग्विशेषकल्पनाऽऽपि । यस्तु न तथा विवेक्तुमलं तस्याभिव्यञ्जकदेशं प्रति व्यामोहो दृश्यतएव । एवं चेन्द्रियाणां स्वानुभवासमर्थत्वाच्छ्रोत्रगतशब्दोपलम्भे तद्देशाग्रहणात् तदुच्चारणप्रदेशस्य प्रतीयमानत्वात्तद्गतत्वात् प्रतिपत्तेश्च तत्तद्देशगतशब्दव्यवहारं प्रवर्तयतीति घटत एवेयं भ्रान्तिः ।

वैलक्षण्यं स्वभावेन वर्णानां नच सम्मतम् ।
नादाल्पत्वमहत्त्वाभ्यां तथात्वभ्रान्तिसम्भवात् ॥

स्पष्टे तद्ग्रहे प्रयत्नस्तावद्वर्णानां जनको नेति स्थिते तदनन्तरोपलम्भनियमे वाऽऽभिव्यञ्जकत्वेन निर्णीतेऽभिव्यञ्जकवृद्धिह्रासयोश्चाभिव्यङ्ग्यवृद्धिह्रासहेतुत्वाभावाच्च शब्दो वर्धते

ह्रसते वा किन्तु बलवति प्रयत्ने महान् वायुरुद्वयते तस्य च भूयोंऽशाः कर्णशष्कुलीमण्डलस्य नेमिभागैर्बहुभिः सम्बध्यन्ते ततश्चाभिव्यञ्जकसंयोगबहुत्वाद्युगपदुपलम्भबहुत्वात् तेषां च विच्छेदाग्रहणान्महानिव शब्दोऽवभाति तरूणामन्तरालाग्रहणादिव महद्वनम् । यदा ते वाय्ववयवाः सहसा विलम्बेन वा संयुज्यन्ते तदोपलम्भो द्रुतो विलम्बितो वा यदा त्वेषामुच्चारणे तात्वादीनां संवृतत्वं भवति वा तदनुरोधेन वर्णोपलब्धिरपि मात्राकालैव भवतीति ह्रस्ववर्णव्यवहारसिद्धिः । यदा पुनर्विवृतत्वं वा तात्वादीनामेव सम्पद्यते तदा वर्णप्रतीतेरपि मात्राकालवृद्ध्या दीर्घादिव्यवहारसिद्धिः । वृद्धव्यवहारे तदनुरोधेनाप्यर्थाभिधानदर्शनात् तथैव प्रतिपादकत्वमप्याश्रीयते । नचैवमभिधानस्यानित्यत्वदोषस्तदुपाधिविशिष्टस्य वाचकस्य नित्यत्वात् । अतो वर्णानुपूर्व्यनित्यत्वे न कश्चिद्दोषः । आनुपूर्वीविशेषभाजां वर्णानां वाचकभूतानां नित्यत्वात् । नच शब्दस्याभिव्यक्तिरिति कथं तद्ग्रहणसम्भवः । उपलब्धे हि घटादिभावे तद्दर्शनेन पूर्वानुभवाहितसंस्कारप्रबोधेन स एवायमिति प्रत्यभिज्ञोदीयते । शब्दे पुनरुच्चरिततिरोहिते पुनरुत्तरकाले कथं प्रत्यभिज्ञोदय इति तत्रा ऽऽह ।

नावश्यं तद्ग्रहेणैव तत्संस्कारप्रबोधनम् ।
तेन हेत्वन्तरोद्बुद्धात् संस्कारात् तद्ग्रहोदयः ॥

यदि ह्ययं नियमस्तदुपलम्भ एव तत्संस्कारोद्बोधहेतुरिति यतो नोपपद्यते शब्दे प्रत्यभिज्ञा । संस्कारास्त्वनियतोद्बोधहेतव इति कारणान्तरवशेनोद्बुद्धात् संस्कारात् प्रथमसमागमसमयएव शब्दे प्रत्यभिज्ञा भविष्यति । ननु स एवायं ग-

कार इति प्रसिद्धस्तद्ग्रहः । न पुनर्भेदाग्रहणमिति । कथमेष निर्णयः । दृष्टो हि शुक्तिकायां भेदाग्रहणात् तदेवेदं रजतमिति प्रत्यय इति तत्राह ।

यदा भेदे प्रमा नास्ति शुक्तिकारजतादिवत् ।
तदा प्रतीतिसंसिद्धस्तद्ग्रहः केन वार्यते ॥

स्पष्टे हि शुक्तिकारजतयोर्भेदावसायिनि प्रमाणे सादृश्याद्भेदानवबोधादभेदप्रतीतिरिति कल्प्यते । शब्दे तु प्रत्यक्षसिद्धः प्रत्युच्चारणं भेदः कथं न सिद्धः । ननु महत्त्वाल्पत्वाभ्यां विभिन्नो वर्ण उपलभ्यते । नैतदेवम् । महत्त्वाल्पत्वे प्रतियतोऽपि वर्णप्रतीते महत्त्वाल्पत्वे एव भिन्ने अवभातो न वर्णाः । न वा ऽनुमानेनापि भेदोऽवगन्तुं शक्यतइति प्रागेव निवेदितम् । अतो भेदे प्रमाणाभावादभिन्न एवायं भिन्नावभास इति साक्षात्प्रतीतिबलेनैवावस्थापितम् । ननु च तद्ग्रहबलेनैवानुमानं निरस्तं निरस्ते चानुमाने तद्ग्रह इतीतरेतराश्रयम् । तत्राह ।

अनुमाननिरासेन तद्ग्रहत्वं न साध्यते ।
स्वयं प्रतीतिसिद्धत्वाद् भ्रान्तिशङ्का निवार्यते ॥

भेदाग्रहनिबन्धनेयं भ्रान्तिरिति शङ्का केवलानुमाननिरासेनापनीयते प्रतीतिबलसिद्धस्तु तद्ग्रहो न कारणान्तरमपेक्षतइति कथमितरेतराश्रयता । ननु किमिति तद्ग्रहबलाज्ज्वालायामपि भेदानुमानं न निराक्रियतइत्यत आह ।

ज्वालाभेदं विना भासो विततिर्नोपपद्यते ।
भेदाज्ञानेन सादृश्यात् प्रत्यभिज्ञा तु युज्यते ॥

अवयविनी ज्वाला । सर्वश्चावयवी स्वावयवसंयोगजा-

तन्त्वादिनाशेन विनश्यति । तन्तुव्यतिषङ्गजनितो हि पटस्त-न्तुविभागे विनाशी दृश्यते । प्रभा च गृहोदरादिवर्तिनी तै-जसं रूपम् । नच द्रव्याश्रिता रूपादयो द्रव्यं विरहय्य व-र्तन्ते । तेन तैजसाः परमाणवो नियतमभिभूतत्वादनुपलभ्य-माना अपि प्रत्यक्षतो यावत् प्रभावितति संनिधीयन्तइत्यङ्गी-करणीयम् । तेषु च देशान्तरमनुप्राप्तेष्वेतदाश्रयणीयम् । ए-तेषां संयोगा विघटन्तइति । विघटितेषु तेषु तदारब्धे द्रव्ये ऽपि नाशमुपेयुषि ज्वाला ज्वालान्तरमन्तरेण नोपपद्यते । भेदाग्रहणनिबन्धना तु प्रत्यभिज्ञा भ्रान्तिः शुक्तिरजतादिषु दृष्टत्वादुपपन्ना ।

विना तु शब्दभेदेन न किञ्चिन्नोपपद्यते ।
उक्तेन नीतिमार्गेण तद्ग्रहोऽतोऽत्र सम्मतः ॥

प्रत्युच्चारणं भेदव्यतिरेकेणापि प्रयत्नाऽनन्तरोपलभ्य-त्वादिकं तथोपपद्यते तथोक्तमेवेत्यप्रतिपक्षा प्रत्यभिज्ञा ।

सदसत्कारणत्वेन तस्माच्छब्दस्य नित्यता ।
एतदेव हि नित्यत्वं व्योमादिष्वपि सम्मतम् ॥

शब्दस्य प्रयत्न एव कारणतया सम्भावितः । स च प्र-त्यभिज्ञाबलेन द्वितीयादिदर्शनेष्वभिव्यञ्जकतामापादित इति प्रथमदर्शनेऽप्यसावभिव्यञ्जक एव । अतः कारणरहितत्वेन सत्त्वान्नित्यः शब्दो गगनादेरिव नास्या ऽनित्यतेति ॥

एषा शालिकनाथेन शब्दनित्यत्वसाधनी ।
प्रभाकरगुरोर्दृष्ट्या न्यायशुद्धिः परीक्षिता ॥

इति महामहोपाध्यायश्रीशालिकनाथमिश्रकृतौ प्रकरणपञ्चिकायां न्यायशुद्धिर्नाम नवमं प्रकरणम् ॥ ९ ॥

॥ मीमांसाजीवरक्षा नाम ॥

दशमं प्रकरणम् ।

प्रभाकरगुरोर्भावं परिभाव्या ऽभिधीयते ।
मीमांसाजीवरक्षेयं क्षणिकत्वनिराक्रिया ॥

तत्र सुगतमतानुसारिणः क्षणिकानेव सर्वपदार्थानभिदधति । किं पुनरेषां प्रमाणम् । न तावत् प्रत्यक्षं, क्षणिकतामीक्षितुं क्षमते स्तम्भादिभावविषये निपुणमपि निरीक्षमाणस्य क्षणिकत्वाध्यवसायाभावात् । स्यादेषा मनीषा क्षणिकता नाम भावस्वभावा ऽबहिर्भाविनी । तेन भावानुभावादेव प्रत्यक्षं क्षणितामपि साक्षात्करोतीति । तदिदं मनोरथमात्रम् । तथाहि संविन्निष्ठा विषयव्यवस्थितय इति स्थितिरविसम्वादा सकलवादिनां । तदियमपि क्षणिकता वस्तुस्वभावभूता सती संवित्सन्ततिमधिरोहन्ती तदव्यतिरेकिणी व्यवतिष्ठेत नान्यथा । नच तथा संविदमनुदीयमानामुदीक्षामहइति कुतस्तस्या ऽऽभास्वभावान्तर्भाविता । कुतस्तरां तदवबोधेनावबोधः । अथ मन्वीरन् क्षणिकता प्रत्यक्षमीक्षितापि न निश्चयपथमवतीर्णा तेनागृहीतेवावभातीति, तथापि तस्यां न प्रत्यक्षं प्रमाणम् । तत्र हि प्रत्यक्षस्य स्वभावतो विकल्पविरहितस्य तत्पृष्ठभाविना प्रत्ययव्यापारोऽनुगम्यते तत्र प्रत्य– ॥ * ॥

---

* इतः परं प्रकरणसमाप्तिपर्यन्तं नोपलभ्यते ।

*लिङ्गादिशब्द एव प्रमाणमिति साहसमगृहीतसम्बन्धस्य शब्दस्यावाचकत्वात्। अनवधारिते हि सम्बन्धिनि सम्बन्धबोधवैधुर्यात्। यद्‌ च तत्र स्वाध्यायाध्ययनविधिना सर्वे विधायका आत्मा च नियुज्यन्ते पुरुषं हि विधिः प्रेरयति यश्च येन प्रेर्यते ते ऽचेतना न युज्यन्ते न चा ऽचेतनानां नियोज्यत्वमपि सम्भवति। अनियोज्यत्वे किं तत्र युज्यते। तदप्यनुपपन्नम्। शब्दभावनासु सर्वशब्दानां स्वत एव सकर्तृत्वाद्विनियोगानपेक्षणात्। अथ न पुरुषप्रेरणे विनियुज्यन्ते किं त्वर्थविबोधने। तदपि न घटते। तत्रापि नियोज्यानपेक्षायास्तुल्यत्वात्। अध्ययनविधेश्चाक्षरसंस्काररूपाध्ययनविधायकत्वाभ्युपगमः। तथा चाहुः।

द्रव्यादीनां पुनः कस्मिन् स्वाध्यायोऽन्तर्गतो भवेत्।
संस्कार्यगणनायां च युक्तैवाक्षरसंस्क्रिया॥
स्वाध्यायो हि स्फुटं कर्म साक्षात्संस्क्रियते हि सः।

इति। संस्कारविधिश्च न संस्कार्यं नियुङ्क्ते प्रमाणान्तरावसितोपयोगस्य शेषित्वात्। संस्कारपर्यवसायी तु संस्कारविधिर्न संस्कार्यस्य कार्यं कल्पयेतेति। आत्मा चाध्ययनविधिना नियुज्यते विनियुज्यते वेति प्रतिपत्तिद्वयस्याप्यसम्भवात् अनुपपन्नम्। कथं च पुरुषप्रवृत्तिः तस्या भाव्या। न तावदनन्तरनिष्पत्तेः, विधिज्ञानस्य करणत्वाभावेऽप्रसङ्गात्। क्रियाफलं हि तदा पुरुषप्रवृत्तिः स्यात्। न च क्रिया स्वफलप्रसवाय करणमपेक्षते न च गमनं संयोगविभागा ऽऽरम्भे करणापेक्षम्। स्यान्मतम्। शब्दो विधिज्ञानं जनयित्वा

* एतत्पूर्वमपि किञ्चित् खण्डितमिति श्री ६ परमगुरुचरणबालशास्त्रिलेखविलोकनात्प्रतीयते स च लेखोऽस्य ग्रन्थस्य भूमिकातो द्रष्टव्यः।

तत्करणानुगृहीतः प्रेरणारूपं स्वव्यापारमारभतइति, न करणत्वाभावः क्रियानिष्पत्तावेव करणत्वात् । तदिदमलौकिकं। न हि कस्य चिद्वस्तुनः स्वज्ञानमुत्पादहेतुः प्रतीतं । एवं चार्थवादोदितप्राशस्त्यस्यापीतिकर्त्तव्यतात्वं विध्वस्तं । योग्यतया हि तस्य तथा भावः । न च प्रेरणोत्पत्तौ शब्दकर्तृकायां करणीभूतज्ञानानुग्रहयोग्यता तस्य शक्यते ऽवगन्तुं । पुरुषकर्तृकायां प्रवृत्तौ तस्य योग्यतावगमः शस्ते प्रवृत्तिदर्शनात् । स्यान्मतम् । अप्रशस्तपुरुषप्रवृत्त्यसम्भवे प्रेरणैव नोपपद्यते । तद्स न्न फलसम्भवायत्ता क्रियानिष्पत्तिः क्रियानिष्पत्त्यायत्तैव फलसिद्धिरिति लोके प्रतीतम्, अत एव तस्मिन् पक्षे निष्फले ऽपि प्रेरणासिद्धेः प्रवृत्तिः स्यात् । अथ फलमपीतिकर्त्तव्यतापदनिवेशि प्राशस्त्यवद्तस्तदभावे प्रेरणां निष्पद्यतइति चेत् । तर्हि फलमेवास्त्वितिकर्त्तव्यतांशपरिपूरकं किं प्राशस्त्येन । सत्यमेतद्, अस्ति तावत् तदपीति न त्यज्यते । एवं तर्ह्यश्रुतप्राशस्त्ये तदपेक्षा मा भूत् । ततश्च तदपि देशादिकल्पनमघटमानं केवलस्य विधेर्दर्विहोमवत्करणेतिकर्त्तव्यताकल्पना कल्पनामात्रमेव दर्विहोमवदिति च सिद्धो दृष्टान्तः । तत्र श्रौतद्रव्यदेवतास्मृत्याचारप्राप्ताचमनादीतिकर्त्तव्यतामात्रेणोपकारप्राप्तेरभिमतत्वात् । नह्येकस्यैव वस्तुनोऽनुग्राहकता ऽऽनुग्राह्यता च स्वात्मन्युपपद्यते । अथ शब्दः प्रेरणां करोत्येव प्रवृत्तिस्तु न तावन्मात्रेण किं तु तज्ज्ञाने सति । एवं तर्हि ज्ञानफलमेव प्रवृत्तिरस्तु न प्रेरणाफलं तस्मिन्सति भावादसति च अभावात् । तथा च सति शब्दभावनाविधिरिति न सिद्धम् । किञ्च शब्दोऽम्बरगुण इति प्राप्यकारीन्द्रियवादिनाभ्युपेयम् अन्यथा नभसः श्रोत्रभूतस्य शब्दस्य च प्राप्त्यसंभवात्संयोगसमवाय-

योरन्यतरस्य प्राप्तिरूपत्वात् संयोगस्यान्यतरकर्म्मजस्योभयकर्म्मजस्य संयोगजस्य द्रव्यत्वे शब्दस्य नभसा सहासम्भवात् तस्य त्रैविध्यनियमात् पारिशेष्यात्समवायः प्राप्तिरित्याकाशगुणः शब्दः । न च तस्य व्यापारसम्भवो,द्रव्याश्रितत्वाद्व्यापाराणां । कथं तर्हि शब्दस्याभिधानलक्षणो व्यापार आश्रीयते । यथा तत्तथा श्रूयतां । यत्तदात्मन्यर्थविषयज्ञानं शब्दविषयज्ञानानन्तरं जायते तच्छब्दकर्त्तृकतया यदा विवक्ष्यते तदा तदभिधानमित्युच्यते । परस्थे व्यापारे भवत्येव कर्तृता परिस्पन्द इवात्मन इति न कश्चिद्दोषः । कथं चासौ शब्दव्यापारोऽर्थभावनाविषयः । एकप्रत्ययवाच्यत्वादिति चेत् । तदुक्तम् ।

विधिभावनयोश्चैकप्रत्ययग्राह्यता कृतः ।
धात्वर्थात्प्रथमं तावत्सम्बन्धो ऽध्यवसीयते ॥

इति । तन्न । प्रत्ययस्य भावनाभिधानमस्मिन्पक्षे दुर्घटं यतः । ननु च सर्वाख्यातानां भावना वचनता करोतिसामानाधिकरण्यादध्यवसीयते । तथाहि भवत्यर्थस्य कर्तुः प्रयोजकव्यापारो भावना । सैव च कृतिः । भाव्यमानस्य क्रियमाणत्वात्तस्य कृतिकर्मत्वात् । किमकार्षीदपाक्षीत् करोति पचति किं करिष्यति पक्ष्यति इति प्रश्नोत्तरदर्शनात् । करोत्यर्थः सर्वाख्यातैरभिधीयतइति गम्यते । अन्यथा करोत्यर्थविषयप्रश्ने तदुत्तरानुपपत्तिः । तत्रापि सत्यामपि प्रकृतौ घञन्तादिषु करोत्यर्थानवबोधात् । आख्यातप्रत्ययसन्निधाने च तदवगमाद् आख्यातानामेव सो ऽर्थ इति निश्चीयते । तदसत् । किं करोतीत्यस्य प्रश्नस्य यद्यगमर्थः यत्करोति तत्कि-

मिति तत्र चेत्पचतीत्युत्तरं स्यात्। तदा पाकं करोतीति स्यात्तस्मिन्नर्थे पचतीति वर्त्तते। तथा च सिद्धेयदाख्याता-नां करोत्यर्थता। न चैतदेवमनवगते हि धातुवाच्ये व्यापा-रविशेषे तद्विशेष एवैवं पृच्छ्यते। तत्र पचतीत्युत्तरं तथा च न सिद्ध्यति धात्वर्थातिरिक्तकरोत्यर्थवचनता आख्यातानां। सर्वधात्वर्थाश्च कस्य चिदभूतस्य भवने ऽनुकूलतां भजन्तः क-रोत्यर्थतामापन्नाः करोतिना प्रष्टुं निर्देष्टुं च शक्यन्तइति त-द्विषयप्रश्नोत्तरे एवैति। किं च धातुवाच्यव्यापारविशेषविष-यत्वेनापि प्रश्नोत्तरयोरुपपत्तौ तदतिरिक्तकरोत्यर्थवाचकता ऽऽख्यातानां न शक्यते वक्तुम्। अपि च समयज्ञक्रियेषु देव-दत्तादिषु व्यापारभेदसम्भवात्। घटेतां प्रश्नोत्तरे व्यतिरिक्त-करोत्यर्थविषये किं करोति अथ गच्छति इति प्रश्ने गच्छतीति चोत्तरे गमनातिरिक्तव्यापाराभावादनुपपत्तिरेव स्यात्। धा-त्वर्थविशेषविषयत्वे तत्राप्युपपत्तिः। अथ संयोगविभागौ धा-त्वर्थः परिस्पन्दस्तु विभक्त्यर्थ इति तत्रापि धात्वर्थव्यतिरिक्तव्या-पारसम्भवान्नानुपपत्तिः। तन्न। परिस्पन्दस्यैव गमिवाच्य-त्वान्न केवले संयोगे विभागे वा गमेः प्रयोगः। स्थाणौ श्ये-नेन वियुक्ते संयुक्ते वा अप्रयोगात्। नापि द्वयो,रुत्पत्य निप-तिते श्येने स्थाणौ प्रयोगप्रसङ्गात्। एकक्रियाक्षणजन्यौ सं-योगविभागौ गमिवाच्याविति यद्युच्येत। तर्हि क्रियैवास्तु वा-च्या किमसावुपाधिकोटौ निवेश्यते। एवं ह्युपाधिसमाश्रयणगौर-वमेव परिहृतं भवति। अपि च वृद्धव्यवहाराच्छब्दार्थनिर्णयः। न चाख्यातानां भावनावचनत्वमन्तरेण कस्य चिद्वृद्धव्यवहार-स्यानुपपत्तिः। प्रश्नोत्तरे तु सम्बन्धज्ञानोत्तरकालभाविनी। अतो न तद्वशेन सम्बन्धिनिरूपणा कर्त्रादिसंख्यामात्रवाचि-

तथा आख्यातप्रयोगोपपत्तौ नाधिकं वाच्यं शक्यं कल्पयितुम्। अपि च पाकं करोति देवदत्त इत्यत्र तावत्पच्यर्थं पाकशब्दो. ब्रवीति तदनुगुणं प्रयत्नं करोतिराचष्टे। आख्यातं तु केवल-कर्तृसंख्यां वक्तीति सिद्धं तन्मात्रवाचित्वम्। अतो ऽन्यत्रापि तत्रैव वर्त्ततइति युक्तम्, एवं च पचति देवदत्त इति अस्य यद्विवरणं पाकं करोतीति। तदप्यनुपपन्नम्। पचतीत्यत्र यः पुरुषप्रयत्नो यत्सम्बन्धेन पच्यर्थः साध्यभूतः तं करोतिना प्रकृतिभूतेनोपादाय विवरणोपपत्तिः। यत्रापि प्रयोगो गमनं करोतीति न प्रयत्नो ऽपरो ऽस्ति। तत्रापि गमनस्य साध्यतां दर्शयितुं गौणः करोतिप्रयोगो द्रष्टव्यः। पक्षद्वये ऽपि तुल्यत्वात्। यस्तु देवदत्त ओदनं पचतीत्यादौ वृद्धव्यवहारे एव प्रकृत्यर्था-तिरिक्ते प्रयत्ने प्रयोगादाख्यातानां तदर्थतामाह। स इत्थं शि-क्षयितव्यः। वत्स किं न वेत्सि। अनन्यलभ्यः शब्दार्थ इति। इह च प्रकृत्यर्थाक्षेपेणापि प्रयत्नप्रतिपत्त्युपपत्तेर्न शक्यते तद्वा-चकताख्यातानामाश्रयितुमिति। ननु प्राभाकरा अपि भाव-नावाचकतां कथमाख्यातप्रत्ययस्येच्छन्ति। उच्यते। न सर्वा-ख्यातप्रत्ययानां भावनावचनत्वमभ्युपेमः किं तु कार्याभिधा-यिनो लिङादयः कार्यस्यान्यथानभिधानात् कृत्यभिधायिन इष्यन्ते। कृतिसम्बन्धि हि कार्यं कृत्यनभिधानेनाभिहितं स्यान्नह्यस्ति सम्भवः। कृतिश्च नाभिधीयते कार्यं च नाभिधी-यतइति। प्रथमतम्। यथा दण्डीत्यत्र प्रत्ययेन दण्डो नाभि-धीयते। अथ च तद्विशिष्टपुरुषप्रतीतिरित्येवमिहापि भवेदिति। तन्न। तत्राप्यप्रतीते दण्डे न तद्वति प्रत्ययः। अस्ति च तत्र प्रकृतिभूतो दण्डशब्दः। स च तस्य प्रत्याययिता न चेह तथा सम्भवति प्रकृतीनां पुरुषव्यापाराभिधाननियमात् पु-

रुषो हि चेतनः कार्यं लिङादिभिरवबुध्यते । न चासौ प्रकृति-सम्बन्धि स्वयं कार्यं बोद्धुमलमिति तदीयकृत्यभिधानमेषितव्यं । तस्य च कृतिः प्रयत्नरूपा न च सम्बन्ध्यननुभवे तदभिधायिन इति न दण्डिन्यायस्यायं विषयः । स्यान्मतं, यथा लिङा कर्त्रादिसंख्यामात्रवचनता क्रियाक्षेपेण च कर्त्रादीनां प्रतीतिः । तथेहापि क्रियाप्रयत्नमाक्षिपति माभूत्तस्य लिङ्वाच्यतेति । तदसत् । यद्यपि प्रकृत्यर्थभूतया क्रियया प्रयत्न आक्षिप्यते । तथापि तदायत्तसिद्धिकृतया कथमपूर्वं गम्यते । प्रयत्नाभिधाने तदवच्छिन्नतया ऽभिधीयमानं तदायत्तसिद्धिकमवगम्यते नान्यथा । न च कृत्यनवच्छिन्नं स्वरूपमात्रेण पूर्वमभिहितं कृतिमाक्षेप्तुमलम् । अवगतसम्बन्धं हि वस्त्वाक्षिप्यते । न च शब्दमन्तरेणा ऽपूर्वस्य प्रयत्नसम्बन्धावगमे कारणान्तरमस्ति । अतः कथं तत्प्रयत्नमाक्षिपेत् । तस्मादपूर्वकार्याभिधायिनां प्रयत्नाभिधानमवश्याश्रयणीयमिति विषयकरणीये निपुणतरमुपपादितमिथलमतिप्रसङ्गेन । तत्र न क्रियामात्रकं तावदहं बुध्वा प्रवृत्तो न चापि फलमात्रकम् । न क्रियाफलसम्बन्धमात्रं वा । क्रियाफलयोः साध्यसाधनतावगमे ऽपि न प्रवृत्तिरुपपद्यते । तृप्तिहेतोर्भोजनेऽतीते वर्त्तमाने वा ऽप्रवृत्तिर्भविष्यत्यपि तत्साधने सामुद्रविद्याख्यातइवानुष्ठानाभावात् । पुरुषाऽऽशयावगमस्तु प्रवृत्तिहेतुतया नाशङ्कितोऽपि स्वतन्त्रप्रवृत्तौ व्युत्पित्सोर्दूरोत्सारितत्वात् । किं तु कार्यतां बुध्वा प्रवृत्तो ममेदं कार्यमिति प्रतीत्याहं सर्वत्रप्रवृत्तः । तथाहि ।

आस्तां तावत्क्रिया लोके गमनागमनादिका ।
अन्ततःस्तनपानादिस्तृप्तिकार्यपि या क्रिया ॥
सा यावन्मम कार्येयमिति नैवावधार्यते ।

तावत्कदाऽपि मे तत्र प्रवृत्तिरभवन्नहि ॥

अत्रापर आह। सत्यं कार्यावगमादेव प्रवृत्तिरिष्टसाधनतैव तु कार्यता। न परा काचित्सैव प्रवृत्तिहेतुर्विधिरुच्यते तदाह।

अपेक्षितोपायतैव विधिरिष्टो मनीषिभिः।
ततो ह्यध्यवसायादिर्वा कस्मान्नाऽभिधानतः ॥

तथा।

पुंसां नेष्टाभ्युपायत्वात्क्रियास्वन्यः प्रवर्त्तकः।
प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्त्तनाम् ॥
कर्त्तुरिष्टाभ्युपाये हि कर्त्तव्यमिति लोकधीः।
विपरीतं त्वकर्त्तव्यमिति तद्विषये ततः ॥

तत्र तावदिदमेव वक्तव्यम्। अतीतस्य वर्त्तमानस्य चेष्टसाधनताऽस्ति नच तत्कार्यतयाऽवसीयते तेनान्या कार्यता अन्या चेष्टसाधनतेति। तथा च प्रवृत्तिरपि तन्मात्रावगमायत्ता न भवतीति। उपेक्ष्यैव तावत्तं फलसाधनताकार्यतयोर्भेदं विनिर्दिशति। फलसाधनता नाम या सा नैव च कर्त्तव्या।

कार्यता कृतिसाध्यत्वं फलसाधनता पुनः।
करणत्वं फलोत्पादे भिद्येते ते परस्परम् ॥

यद्यप्येकवस्तुनिवेशिता द्वयोः तथापि स्वरूपभेदोऽस्त्येव। तदेव हि वस्तु फलं प्रत्युपायभावात्फलसाधनमित्युच्यते। कृत्यधीनात्मलाभतया च कार्यमिति। किमिति इष्टाभ्युपायेष्वेव कर्त्तव्यताऽवगमोऽन्यत्र नेति। तत्राह।

किं तु स्वयं क्लेशरूपं कर्म यत्कार्यतां व्रजेत्।
फलसाधनता तत्र कारणं तेन कार्यता ॥

तद्भावभाविनी नित्यं तदात्मैव प्रतीयते ।

स्वभावेन हि कर्माणि दुःखोत्पादहेतुभूतानि । तेषु कार्यत्वावगमः फलसाधनतावगमनिबन्धनः । कार्यता हि न कृत्यधीनसिद्धिमात्ररूपा किं तु कृतिं प्रति प्रधानभूतं सत्तदधीनसत्ताकं तत्कार्यमुच्यते । तच्च कृतेः प्रधानं यदधिकृत्य कृतिः प्रवर्त्तते । न च दुःखं दुःखहेतुभूतं वा ऽधिकृत्य कृतेर्वृत्तिरुपपन्ना । नाप्यदुःखमदुःखहेतुं वा । किं तु सुखं सुखहेतुं वा । तत्र न तावत्स्वयं सुखरूपं कर्म । सुखसाधनमपि चेन्न स्यात् । न तस्य कृतिं प्रति प्राधान्याभ्युपगमो घटते । अतः कर्मसु कार्यत्वावगमः फलसाधनता ऽवगमनिबन्धन इति ज्ञापककोटिनिविष्टां फलसाधनतां कार्यता ऽनुरुध्यते न त्वसौ तदात्मैव । तथा चा ऽसाधनस्यापि सुखस्यैवास्ति कार्यता । सुखं हि सर्वः कार्यतया ऽवैति । न तस्य फलसाधनतामपेक्षते । तेन साधनतोत्तीर्णकार्यता ऽवगमेन मे प्रवृत्तिरिति निश्चित्य व्युत्पित्समानश्चैत्रं प्रवर्त्तमानं दृष्ट्वा ऽनुमिनोति, चैत्रोऽपि कार्यबोधात्प्रवर्त्तत इति । चैत्रस्य प्रवृत्तिर्द्धर्मिणी कार्यबोधनपूर्विकेति साध्यो धर्मः । बुद्धिपूर्वकत्वे सति प्रवृत्तित्वान्मदीयप्रवृत्तिवदिति । लिङादयश्च प्रवृत्तिहेतुभूतार्थाभिधायिनः कार्यमेवाभिदधते । तस्यैवावगतस्य प्रवृत्त्यनन्तरकारणत्वात् । इच्छा यद्यपिप्रवृत्तिहेतुस्तथापि सा लिङादिवाच्या न भवति तदवगमस्य प्रवृत्तावनपेक्षितत्वात् । उत्पन्ना हि सा प्रवृत्तिकारणं नावगता । नन्वेवमपि कथं लिङादीनां कार्ये व्युत्पत्तिरिति । अत आह ।

शब्दान्तराणि स्वार्थेषु व्युत्पद्यन्ते यथैव हि ।
आवापोद्वापभेदेन तथा कार्ये लिङादयः ॥

लिङादियुक्तवाक्यश्रवणे तद्भावभाविन्या प्रवृत्त्या विशिष्ट कार्यावगतिमनुमाय वाक्यस्य तावद्धेतुतामध्यवस्यति । तत्रापि कोऽर्थभागः केन शब्दांशेनाभिहित इति विवेचने लिङाद्या-वापेन कार्यावगतिदर्शनात्तदुद्धारे चादर्शनात्तएव कार्यावग-तिं कुर्वन्तीति शब्दान्तरवल्लिङादीनां कार्यवाचकत्वव्युत्पत्ति-सिद्धिः । ननु लोकव्यवहाराल्लिङादयो वाचकतया व्युत्पा-द्यमानाः प्रैषादिष्वेव वाचकतया व्युत्पत्तिमर्हन्ति । तत्रैव तेषां प्रयोगदर्शनादिति ।

कार्यमेव हि कर्तॄणां ज्यायः समकनीयसाम् ।
प्रवृत्त्यापेक्षया भेदात्प्रैषादिव्यपदेशभाक् ॥

प्रवर्त्यपुरुषापेक्षया ज्यायसा वक्त्रा प्रतिपाद्यमानं कार्यं प्रैष इति व्यपदिश्यते । समेना ऽऽमन्त्रणं हीनेनाध्येषणमिति प्रैषादिप्रतिपादका अपि च लिङादयः ।

कार्यमेव हि सर्वत्र प्रवृत्तावेककारणम् ।
प्रवृत्त्यव्यभिचारित्वाल्लिङाद्यर्थो ऽवधार्यते ॥

प्रवृत्तिर्हि बालेन स्वात्मनि कार्यावगमपूर्विका प्रतिप-न्नेति सर्वपुरुषानपि प्रवर्त्तमानान्दृष्ट्वा कार्यावगममेव बालः क-ल्पयतीति प्रेष्यादीनामपि प्रवृत्तिः कार्यावगमनिबन्धनेति । कर्त्तव्यमेव हि प्रैषादिव्यपदेशयोगीति सिद्धम् । वस्तुतस्तु प्रैषादीनामपि प्रवृत्तिव्यभिचारित्वात्कार्यस्य च प्रवृत्तिषु स-र्वासु हेतुभूतत्वात्प्रैषादिष्वपि लिङादीनां कार्यमेवार्थ इति निश्चीयते । केन पुनः प्रमाणेन बालः स्वयं कार्यमवगच्छ-ति यतः प्रवर्त्तेत इति अत आह ।

कृतिसाध्यं प्रधानं यत्तत्कार्यमवसीयते ।
तच्च मानान्तरेणापि वेद्यमोदनपाकवत् ॥

कृतौ सत्यां च भावादसत्यां चाभावादनुमानतः कृतिसाध्यता तावदवगम्यते । यदधिकृत्य कृतिः प्रवर्त्तते तत्कृतिप्रधानम् । प्रयत्नश्च कृतिः । स च मानसप्रत्यक्षवेद्य इति विशिष्टे प्रयोजनता ऽऽपि प्रयत्नस्य प्रत्यक्षवेद्यैव तेन प्रत्यक्षानुमानाभ्यामवगम्यते । यथा चौदनःपाकस्येति न किंचिदनुपपन्नम् । उपसंहरति ।

एवं कार्यात्मके ऽप्यर्थे व्युत्पद्यन्ते लिङादयः ।
तदन्वितेषु स्वार्थेषु तथा शब्दान्तराण्यपि ॥

एवमपि कथं मानान्तरावेद्यकार्यवाचिता लिङादीनामित्याशङ्क्य मीमांसामवतारयति ।

संप्रधार्यमिदं त्वत्र तत्कार्यं किं क्रियात्मकम् ।
यद्वा तद्व्यतिरेकीति ॥
को नु निर्णय इत्यत्राह ।
तत्र लोकानुसारतः ॥
प्रमाणान्तरविज्ञेया क्रिया कार्येति यद्यपि ।

प्रतिभाति ।

लोके हि लिङाद्युक्तवाक्यश्रवणे विशिष्टक्रियानुष्ठानदर्शनात्तद्विषया कार्यावगतिर्लिङादिभिः क्रियतइति युक्तम् । अवगतिप्रवृत्त्योरेकविषयत्वात् । नहि अन्यत्कार्यतया ऽऽवगम्या ऽन्यत्र बालः प्रवर्त्तते । किं च क्रियायां कार्यभूतायां लिङादियुक्तवाक्यप्रतिपाद्यमानयां शक्तिकल्पनालाघवं स्यादेव । तथाहि धातुरेव कार्यभूतं स्वार्थं ब्रवीतु तथा भूतार्थवाचिनस्तु धातोः परे लिङादयो भवन्तीत्याश्रयताम् लिङादिश्रवणे तु तथा भूतार्थतया धातुः प्रयुक्त इत्यवगम्य कार्यभू-

तंधात्वर्थावगमः संपद्यते । यथा लिङादिभ्यो वर्त्तमानाद्यध्यवसायः, तेष्वपि वर्तमानेऽर्थे वर्त्तमानाद्धातोर्लिङिसेव सूत्रार्थः । कर्त्रादिसंख्यामात्रवाचित्वमेव केवलं लडादीनामिव लिङादीनामप्यर्थ इति क्रियैव कार्यतया वेदे ऽप्यवगम्यतइति यद्यपि विवेकसमर्थानामवगतिर्भवति ।

तथा वेदे सिद्धान्ते ऽवस्थिते सति ।

स्वर्गकामादयः कार्यो नियोज्यत्वेन सङ्गताः ॥
स्वर्गकामादयः शब्दैर्वक्तव्या इत्यवस्थितम् ।

षष्ठाद्ये ह्येतदुक्तम् । लिङादिप्रयोगे तावत्कार्यावगतिरस्तीति निर्विवादम् । कृतिसाध्यं च कार्यं भवति । सति कर्त्तरि तस्यात्मलाभः । कर्तृलाभश्च स्वसम्बन्धिकार्यविबोधे सति भवति नान्यथा । तेन यद्यपि लोकानुसारेण क्रियाया एव कार्यतया बोध्यमानाया वाक्यार्थत्वात्तदन्वयित्वाच्चेतरेषामिति पदार्थानां कारकत्वादृते चान्यस्य क्रियान्वयित्वासम्भवाल्लोहितोष्णीषन्यायेन विशेषणभूतस्वर्गकामनासमर्पणपरतया कर्तृविशेषणत्वेन स्वर्गकामस्यान्वयोऽवगम्यते । तथापि स्वसम्बन्धिकार्यबोद्धृत्वेनैवान्वयो वर्णनीय इति नियोज्यसमर्पकत्वमेवा ऽऽश्रीयतइति एवमपि किमित्याह ।

नियोज्यः सर्वकार्ये यः स्वकीयत्वेन बुद्ध्यते ।

तथापि किमित्याह ।

स्वर्गादिः कामयोगाच्च साध्यत्वेनैव गम्यते ।

साध्यविषयैव हि सर्वत्र कामना भवति तेन तत्सम्बन्धात्साध्यभूतं स्वर्गादि काम्यमानतया पुरुषं विशिनष्टि ।

तेन साध्यत्वपर्यन्तस्वर्गादीच्छा विशेषिनः ।

तदेव शक्नुयात्कार्यं बोद्धुं यत्काम्यसाधकम् ॥

अत्र कश्चिदाह। यद्यपि कामनायोगात्साध्यता स्वर्गादीनामवगम्यते। तथापि प्रकृतकार्यसाध्यत्वावगमो निष्प्रमाणक एव। अन्यसाध्यस्यापि साध्यत्वसम्भवात्। न च यत्काम्यते तस्यावश्यं साधनमस्ति। मनोरथपरम्पराहृतचेतसो हि तन्नास्ति यन्न कामनाविषयीभवति। न च तस्य सर्वस्य साधनं भवति सर्वज्ञत्वमपि केचित्कामयन्ते न च तस्योपायसम्भवः। अथ तदिच्छावतोऽनत्साधने कर्तृता नोपपद्यते। तन्न। दृश्यन्ते हि ग्रामाभिगमनकामा हि यादृच्छिकीषु क्रियासु प्रवर्त्तमानाः। अपि च सर्वोऽभ्युपायार्थ्येव पुरुषस्तथापि प्रायशस्तद्विरोधिष्वेवेन्द्रियार्थेषु प्रवर्त्तमाना दृश्यन्ते। अत्रोच्यते। स्वर्गादिकं कामयमानस्य तदेव कार्यतया बोद्धुमवकल्पते। यदेव तस्य काम्यमानस्य सिद्ध्यनुगुणमन्यथा हि तत्कामिना सता तत्कार्यतया ऽऽनवबुद्धं स्यात्। अपरित्यक्ततत्कामनासम्बन्धो हि तत्साधनं कार्यतया ऽऽवबुध्यते। तस्माद्यत्कामिनो यत्कार्यतयोपदिश्यते तत्तस्य काम्यस्य साधकमिति नियोज्यकार्यान्वयानुपपत्त्यैव गम्यते। एवं सति किं फलमित्याह।

लिङादिस्तत्र कार्यं चेत् क्रियामेवावबोधयेत्।
समन्वयो नियोज्येन तदानीमेव हीयते।

कथमित्याह।

क्रिया हि क्षणिकत्वेन न कालान्तरभाविनः।
स्वर्गादेः साध्यमानस्य न शक्ता जननं प्रति ॥
इष्टस्याजनिका सा च नियोज्येन फलार्थिना।

कार्यत्वेन न सम्बन्धमर्हति क्षणभङ्गिनी ॥

कार्यविरोधि कर्मेति प्रमाणान्तरसिद्धम् । परिस्पन्दो ह्युत्तरदेशसंयोगोदयापवर्गिण्याशुतरविनाशिनी । स्वर्गश्च नियतदेशान्तरकालान्तरभोगः, । ननु प्रीतिमात्रवचनः स्वर्ग इति षष्ठाद्ये साधितं प्रतीतिसाधनेषु द्रव्येषु स्वर्गशब्दप्रयोगात् न च तेषु स्वरूपनिबन्धन एव तत्प्रयोगः । प्रीत्यपगमे तदभावात् । न च तत्साधनवचनता तदनभिधाने घटते । तदभिधानाभ्युपगमे न तद्वाचकतैव लक्षणया तत्साधने प्रयोगोपपत्तेः । तत्र शक्तिकल्पनापरिक्षयात् । अखण्डशब्दतया च दण्डिन्यायस्यासम्भवात्तदन्तर्गतस्य दण्डशब्दस्य दण्डप्रत्यायकत्वसम्भवात् । प्रीतेश्च कर्मानन्तरभावित्वमपि सम्भवत्येव । उच्यते, न प्रीतिमात्रवचनतया ज्योतिष्टोमादिचोदनासु स्वर्गशब्दस्य प्रयोगोऽवगम्यते । अर्थवादेषु दुःखासम्भिन्नाचिरतरोपभोग्याभिलाषोपनेयप्रीतिश्रवणात् । तत्र यदि विध्युद्देशगतः स्वर्गशब्दस्तथाविधप्रीतिपरप्रयोगतया वर्ण्यते । तदातिपरोक्षार्थवादपदानां वृत्तिराहता न भवेदिति तदानुगुण्येन तादृश्यामेव प्रीतौ स्वर्गशब्दः प्रयुक्त इति निश्चीयते । तथावस्था नियतमेवं देशान्तरभोग्या । अतो न कर्मानन्तरभाविनीति न तत्र कर्मण आशुतरविनाशिनः साधनता ऽऽवकल्पते । यस्मिन्हि पूर्ववर्त्तिनि यन्निष्पाद्यते तत्तस्य साधनमितिलोकप्रतीतिः अत एव च विनष्टस्यापि कर्मणः शास्त्रेण साधनत्वं बोध्यते इति ये ब्रुवते तेऽपि निरस्ताः । एवं चासावाशुतरविनाशिनी क्रिया स्वर्गकामिना नियोज्येन सह कार्यतया सम्बन्धुं नार्हति । स्वर्गं प्रति साधनत्वानुपपत्तेः ।

तस्मान्नियोज्यसम्बन्धसमर्थं विधिवाचिभिः।
कार्यं कालान्तरस्थायि क्रियातो भिन्नमुच्यते॥

ननु क्रियैव कार्यतयोच्यताम्। अस्तु सैव, स्वर्गसाधनतां कथमवलम्बिष्यते। उच्यते। वरं तस्या एव तदनुपपत्त्या चिरतरावस्थायिताकल्पना। न पुनरदृष्टस्याश्रुतस्य तदतिरेकिणो ऽर्थस्य कल्पना। यदि कर्मण एव शक्तिरवस्थायिनीत्यभ्युपगम्यताम्। तदिदमुभयमपि प्रमाणान्तरविरोधान्न कल्पनामर्हति। अविरोधि हि प्रतीतिसिद्ध्यर्थं कल्पयितुं शक्यम्। कर्मणश्चाशुतरनाशिनः चिरतरावस्थायिता प्रमाणान्तरनिरस्ता। शक्तिमति चातीते शक्तिरप्यतीतेति प्रमाणान्तरसिद्धमिति न सापि स्थायिनी शक्या कल्पयितुम्। अपि च आश्रये निवृत्ते किमाश्रया शक्तिरवतिष्ठताम्। अस्तु सैव स्वर्गसाधनमाश्रितेति चेत्,नान्यदीया शक्तिरन्यत्र वर्तते। प्रमाणान्तरविरोधादेव। किं च शक्तिमत्यसति शक्तिः फलं न युक्तम्। शक्तिमद्धि साधनं न शक्तिः। अन्यथा शक्तित्वं न स्यात्। ननु यागादिक्रिया देवता ऽऽराधनोपायभूता सती कार्यतयोच्यतां, सा तत्प्रत्यासत्तिद्वारेण कालान्तरेऽपि फलं जनयितुमलमेव। देवता फलदानसमर्था कर्मभिराराध्यते। साऽऽराधिता प्रसीदति, प्रसन्ना च कर्तॄन्कालान्तरेऽपि फलेन योजयत्येवेति। नैतदेवम्। यागादीनां देवता ऽऽराधनहेतुत्वे प्रमाणाभावात्। नहि देवता ऽऽराधनोपायहेतुभूतो याग इत्यत्र किंचित्प्रमाणमस्ति। ननु देवतापूजार्थ एव यजिः स्मर्यते। पूजा च सर्वा पूज्यमानार्थेत्यवगतम्। उच्यते। न स्मृतिः प्रमाणं,स्मृतित्वादेव। प्रमाणान्तरापेक्षया च स्मृतीनामर्थवर्णनम्। तदनुवर्तित्वात्तासाम्। न च प्रमाणान्त-

रेण देवता ऽऽराधनोपायता यागस्येत्युक्तम् । अतो देवतोद्देशेन द्रव्यत्यागो याग इति गौणं देवतापूजात्मकत्वमवगमयितव्यं, पूजापि पूज्योद्देशेनैव हि प्रवर्त्तत इति । अपि च सा कर्मभिराराध्यते या ऽऽराधनं प्रतिपाद्यते । नानादिग्देशगामिना पुरुषेणानुष्ठीयमानयागात्मकपूजावगमश्च देवताया इति प्रमाणान्तरविरुद्धमेव, तस्यानादित्वानुपपत्तेः । देवताधिकरणे च प्रपञ्चेनायं ग्रन्थो निरस्त इति नातीव यतितव्यम् । अथापि स्यात्पुरुषसंस्कारहेतुभूतैव क्रियाशब्देन कार्यतयोच्यते तस्याश्च स्वर्गकामादिपुरुषसम्बन्धात्पुरुषसंस्काराद्वेव कालान्तरे फलं भविष्यतीति । तन्न । पुरुषसंस्कारकत्वे प्रमाणाभावात् । नहि प्रमाणान्तरतः शब्दतो वा पुरुषसंस्कारहेतुता यागादीनामवसीयत इति कर्मण्यारम्भभाव्यत्वादित्यत्रोक्तम् । ननु क्रियैव कार्यतयोच्यतां फलसाधनता च तस्या एवाश्रीयतां, तदन्यथानुपपत्त्या तु किं चिदप्यपरं तज्जन्यं फलोदयानुगुणं कालान्तरस्थाय्यात्माश्रयं परिकल्प्यतां, मा भूत्तस्य लिङादिवाच्यतेति । उच्यते । तद्धि तदनुपपत्त्या कल्प्यते यद्यस्योपपादकम् । न च क्रियाजन्येनान्येन फलजनकेन कल्पितेन क्रियायाः साधनतोपपादिता भवति । नहि साधनसाधनं तस्य साधनं भवति । अवान्तरव्यापारो वा शक्तिर्वा तत्साधनतां निर्वाहयति । व्यापारयोगितयैव शक्तिमतां साधनता यतः । नचात्मसमवाय्यर्थान्तरं कर्मणामवान्तरव्यापारो नापि शक्तिरिति न तस्यार्थापत्तिगम्यता युक्ता । किं त्वन्विताभिधाने स्थिते नियोज्या ऽनुगुण्याच्छब्दवाच्यतैवोचितेति सूक्तम् । "नियोज्यसम्बन्धसामर्थ्यात्कालान्तरस्थायि कार्यं क्रियातिरिक्तं लिङादिभिरेवोच्यते" इति ।

अत्रैषा प्रक्रियाचोदनासूत्रे कार्यार्थता प्रतिपादिता । षष्ठाद्ये तस्यैव कार्यस्य स्वसम्बन्धितया बोध्यः स्वर्गकामादिर्नियोज्य इति व्युत्पादितम् । तस्य च कार्यस्य नियोज्यविशेषणीभूतकाम्योत्पत्तिहेतुत्वमिति पादर्यधिकरणे राद्धान्तितम् । तच्च तथाभूतं क्रियारूपं न भवति, तस्याः फलसाधनत्वायोगात्, देवता ऽऽराधनमुखेन तावत्फलसाधनता नास्तीति देवताधिकरणे व्युत्पादितम् । पुरुषसंस्कारमुखेन नास्तीति कर्माण्यारम्भभाव्यत्वादित्यत्रोक्तम् । कर्मणस्तच्छक्तेर्वा स्थायिता नेतीति चापूर्वाधिकरणे नियोज्यान्वयमुखेन मानान्तराऽपूर्वमात्मसमवायिकार्यं लिङादिरभिधीयतइति अनेकन्यायसाध्यम् । कार्यं च कृतिसाध्यम् । कृतिश्च पुंसां प्रयत्न एव । नचासौ भावार्थमन्तरेणास्तीति तत्सम्बन्धनियोग एवोच्यतइति भावार्थाधिकरणे स्थितम् । स च भावार्थः सम्बन्धमानस्तमवच्छिनत्तीति शब्दान्तराधिकरणे निर्णीतम् विषयभूतश्च भावार्थः करणीभवतीति पादर्यधिकरणे एवोक्तम् । स्वकार्यसाधने भावार्थे पुरुषस्यैश्वर्यमिति तत्रैवोक्तम् ।

कालान्तरावस्थायिनः कार्यस्य नियोज्यान्वययोग्यतामाह ।

तद्धि कालान्तरस्थानाच्छक्तं स्वर्गादिसिद्धये ।
सम्बन्धो ऽप्युपपद्येत नियोज्येनास्य कामिना ॥

ननु " भाष्यकारः प्रत्ययार्थतयाऽपूर्वमित्याह न क्रियादिभिन्नं कार्यमिति " यो मन्यते तं प्रत्याह ।

क्रियादिभिन्नं यत्कार्यं वेद्यं मानान्तरैर्न तत् ।
अतो मानान्तरापूर्वमपूर्वमिति गीयते ॥

नन्वेवमपि अपूर्वं वाक्यार्थः स्याद्, न नियोगः । नि-

योगश्च वाक्यार्थ इति प्राभाकराणामुल्लाप इत्यत्राह ।

कार्यत्वेन नियोज्यं च स्वात्मनि प्रेरयन्नसौ ।
नियोज्य इति मीमांसानिष्णातैरभिधीयते ॥

एवमपि कथं वाक्यार्थत्वमित्याह ।

कार्यस्यैव प्रधानत्वाद्वाक्यार्थत्वं च युज्यते ।
वाक्यं तदेव हि प्राह नियोज्यविषयान्वितम् ॥

उक्तं ह्येतत् यत्प्रधानतया प्रतिपाद्यते तद्वाक्यार्थ इति, कार्यं च प्रधानतयोच्यतइति इह तस्यैव वाक्यार्थत्वम् । नियोज्यान्विताभिधानं च प्रायिकमाधानाध्ययनाङ्गप्रधानोत्पत्तिनियोगानां नियोज्यशून्यानामभिधानाभ्युपगमात् । विवरणकारा ह्याधानविषयमपि नियोगान्तरमिच्छन्ति । क्रतुनियोगप्रत्यभिज्ञानाभावाद्, असन्निधाने हि तन्नियोगप्रत्यभिज्ञानं नोपपद्यते । नापि वर्णनादिविधिवदव्यभिचारितक्रतुसम्बन्धात्तन्मुखेन प्रत्यभिज्ञोपपत्तिः, प्रागाधानादाहवनीयादिशब्दानामर्थापत्तिज्ञाने क्रतुसम्बन्धानवगमात् । जुह्वादीनां त्वाकृतिवचनत्वात्प्रागेव विनियोगात्प्रत्यभिज्ञासम्भवः । नन्वग्नीनामपि साध्यत्वात्साध्यद्वयं कथमेकस्मिन्वाक्ये ऽन्वीयते । उच्यते । नियोग एवात्रापि प्रधानं साध्यम् । अनीप्सितकर्मता त्वग्नीनामनीप्सितकर्मत्वेऽपि तत्तदाधानजन्यं फलमग्निसमवायि तद्योगिन्याहवनीयादिशब्दे प्रयोगादाहवनीयादीनां च क्रतूपयोगित्वात्तत्सिद्ध्यर्थतयैव पुरुषप्रवृत्त्युपपत्तेरनुष्ठानलाभादलं प्रयोज्याभिधानेनेति । तथा ऽऽध्ययनविधावपि आचार्यकरणविधिप्रयुक्त्यैवानुष्ठानलाभान्नियोज्यशून्याभिधानमिति स्थितम् । प्रधानोत्पत्तिनियोगा अधिकारनियोगा ऽऽक्षिप्तस्वविषयानुष्ठाने-

नैव लब्धसिद्धय इति न तत्र नियोज्याभिधानान्वेषणम्। अङ्गोत्पत्तिनियोगा अपि विनियुक्तप्रयाजादिविषयत्वादधिकारनियोगा एव सिध्यन्तीति किं तेषु नियोज्यान्विताभिधानेन। कथं पुनः प्रयाजादिविधीनां विनियुक्तविषयत्वम्, उच्यते। साधिकारनियोगसंनिधौ प्रयाजादिवाक्यानि श्रुतानि, न तावत्स्वयागविषयनियोगान्तरमवगमयितुमीशते। अवघातादिवदनुवादकत्वसम्भवात्किं तु स्वरूपमात्रमेव योगस्य स्वपदार्थविशिष्टमुपपादयति, तच्च प्रयोजनाऽऽकाङ्क्षितया प्रयोजनीभूतेन साधिकारेण नियोगेनान्वीयतइति अधिकारवाक्यगत एव लिङ्शब्दस्तदन्वितं स्वार्थमभिधत्ते। स चान्वयः प्रयाजादीनामैदमर्थ्यमात्रेण ग्राहकग्रहणमित्युच्यते। करणोपकाराऽऽकाङ्क्षस्य च अपूर्वस्य यत्करणोपकारकत्वपरिकल्पनं सप्रकरणव्यापार इति। तत्र यत्तेषां करणोपकारजनकत्वकल्पनं तदौपादानिकं, नास्ति बहिःप्रयोजादिषु नियोगान्तरम्। न च नास्ति क्षणिकानां तेषां सम्भूयेतिकर्त्तव्यतात्वानुपपत्तेर्नियोगान्तरस्यावश्याश्रयणीयत्वात्। योऽसौ लिङादिः प्रागनुमानार्थतया शङ्कितः स इदानीं नियोगान्तरमभिधत्ते। अत एव चावघातादिवदेषां यज्यादिशब्दानामेवाङ्गवाक्यगतानामधिकारनियोगान्वितस्वार्थाभिधानं नाभ्युपगम्यते। तथा हि सति उत्पत्तावेवाङ्गतयाऽऽङ्गस्वरूपस्यान्यतिरश्चीनत्वान्नियोगान्तरविषयता न स्यात्। उत्पत्तिदशायां त्वनन्यनिष्ठतयाऽऽभिधानाद्युक्तं नियोगान्तरविषयत्वम्। कस्मात्पुनरन्यतिरश्चीनस्य नियोगान्तराविषयत्वम्। कार्यद्वयसम्बन्धावगमानुपपत्तेः। नह्येकं वस्तु युगपत्कार्यद्वयसम्बन्धि शक्यमवगन्तुम्। यच्च तन्नियोगान्तरं प्रयाजादिषु तत्राऽऽदभिधीयमानमधिकारनियोगाङ्गतैव शब्दे-

नाभिधीयते । अन्यथा विषयद्वयविनियोगविरोधाद्विसलमतिप्रसङ्गेन ।

ननु नियोगस्य काम्यमानफलसाधनत्वाभ्युपगमात्फलस्यैव प्राधान्यात्तस्यैव वाक्यार्थत्वमित्यत आह ।

आत्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये ।
कुर्वन्स्वर्गादिकमपि प्रधानं कार्यमेव नः ॥

यत्तदपूर्वं कार्यं तस्य नियोज्यान्वयं विना कार्यत्वानुपपत्तिः । अनुष्ठानं विना तदसम्भवात् । कर्त्रा च विना तदनुपपत्तेः । अधिकारिणा च विना कर्तुरभावान्नियोज्यत्वं विना तद्योगादकामसाधने च नियोगानवगमादित्यात्मसिद्ध्यर्थमेव नियोगः काम्यमानफलसिद्धिहेतुत्वमवलम्बते स्वामिवत् । यथा आत्मन एव संविदधानः स्वामी गर्भदासस्योपकरोति, तथा नियोगोऽपि नियोज्यस्येति न प्राधान्यपदप्रच्युतिः ।

ननु नियोगस्य फलसाधनत्वात्तस्य च सेतिकर्तव्यताककरणनिबन्धनसिद्धत्वात्तदनुष्ठानानन्तरं नियोगसिद्धेः फलसिद्धिः स्यात्,यानन्तरनियोगो निष्पद्यते तर्हि क्रियायामतीतायां कुतस्तत्सिद्धिरित्याह ।

विषयानुष्ठितौ सत्यां सिद्धो नहि विधिः फलम् ।
तदानीमेव कुरुते सहकारिव्यपेक्षया ॥

एषा ऽत्र दर्शनस्थितिः । प्रधानोत्पत्तिनियोगा अङ्गोत्पत्तिनियोगाश्च यथायथं संनिपत्योपकाराङ्गयुक्तस्वविषयमात्रानुष्ठानेनैव सिद्ध्यन्ति तत्र यान्यङ्गा ऽपूर्वाणि तानि संभूय प्रधानोत्पत्त्यपूर्वेषूपकुर्वन्ति तस्माच्च परमापूर्वं निष्पद्यते । यान्यपि चाङ्गाऽपूर्वाणि दक्षिणीयादीनां तेषामप्यारादुपकारकातिदेशिका-

ङ्गभाजामेकमुत्पत्त्यपूर्वमपरमप्यङ्गपूर्वं प्रधानवद्वेदितव्यमिति । अनया दिशा सकलमूहनीयम् । इत्थं यद्यपि कर्मानुष्ठानानन्तरमेव विनियोगसिद्धिः । तथा यत्फलस्यानन्तराभवनं तदुपपत्त्या कल्प्यते । अस्ति किंचिदपेक्षणीयमपरं यदसन्निधेः फलं नोत्पद्यते इति । नन्वेवं सति फलहेतुता ऽपूर्वस्य बाध्येतेत्यत्राह ।

सहकारिव्यपेक्षा च कारणत्वं न बाधते ।
मा वा बाधिष्ट सर्वत्र कार्ये पाकादिके यथा ॥

तथेत्यर्थः ।

"अतः पुरुषकारश्च दैवं च फलसाधनम्" ।

इत्याचार्याः, दैवमपूर्वमपेक्षणीयं सहकारि च पुरुषकारपदवेद्यम्। नन्वेवं भवतु काम्येष्वपूर्वकार्याभिधानं लिङादीनां, नित्यनैमित्तिकनिषेधाधिकारेषु कथं तेषु फलोदयं प्राभाकरा अनुमन्यन्ते। नहि फलं फलतया ऽन्वीयते, किं त्वधिकारिविशेषणतया, लब्धे तु जीवनादौ अधिकारिविशेषणे किं फलान्वेषणेन। नच फलमन्तरेण प्रवृत्त्यसम्भवः। स्वसम्बन्धिकार्यावगममात्रायत्तत्वात्प्रवृत्तेः । निरपेक्षः शब्दात्फलमन्तरेणापि स्वसम्बन्धिकार्यावगमः तावन्मात्रस्य लोके प्रवृत्तिहेतुत्वावगमात् । कार्यावगमोत्पादनायैव फलमुपयुज्यतइत्युक्तम् । ननु यथा शब्दात्कार्यावगतिः तथा निष्फलत्वादनुमानेनाकार्यताप्रतीतिरपीति कथं प्रवृत्त्युपपत्तिः । न । आगमविरोधेनानुमानस्या ऽऽत्मलाभाभावात्। एतावानेव प्रमाणव्यापारः। यत्प्रवृत्तियोग्यार्थदर्शनम्, । अन्यथा यदि कश्चित्कल्पिते फले न प्रवर्त्तते तदा किं कर्त्तव्यं तेन फलोदयान-

भ्युपगमे च प्राच्यमार्गासम्भवान्नित्यादिषु अपूर्वकार्याभिधानमप्रमाणकं तत्राह ।

एवं काम्याधिकारार्थपर्यालोचनयोत्थिता ।
व्युत्पत्तिः सर्ववाक्यार्थप्रतिपत्तिनिबन्धनम् ॥

उक्तमिदमन्यायश्चानेकार्थत्वमिति । तेन काम्याधिकारे सिद्धे ऽपूर्वकार्याभिधायकत्वे नित्यादिष्वपि स एवार्थो विरोधाभावादाश्रीयते । नित्याधिकारानुगुण्येन तु क्रियाकार्यत्वाभिधानं काम्येष्वनुपपन्नमिति सर्वत्रापूर्वमेव वाक्यार्थः ।

नन्वेवं वेदादेव व्युत्पत्तिः स्थिता स्यादित्याशङ्क्याऽऽह ।

व्युत्पत्तिरिह कार्येऽर्थे व्यवहारानुसारिणी ।
किं तु निर्धारणामात्रं वेदवाक्यविमर्शजम् ॥

तत्रैतदेव तावदुक्तवयम् । न केवलं वेदे लोकव्यवहारादेव शब्दार्थावधारणं किं तु प्रसिद्धार्थपदसम्बन्धादपि पदार्थान्तरान्वययोग्यार्थाभिधायकत्वे स्थिते तदनुरूपार्थाभिधायकता निर्णीयतएव । एतच्च यववराहाधिकरणे व्युत्पादितं, व्यवहारत एव सम्बन्धावधारणादुभयथाऽऽपि व्यवहारदर्शनात्समा विप्रतिपत्तिरिति पूर्वः पक्षः । पदान्तरसम्बन्धादपि पदान्तरार्थाध्यवसानं भवत्येव तेन वैदिकवाक्यशेषान्वयार्हताऽऽलोचनेन दीर्घशूकाद्यर्थमेवेति राद्धान्तः । तथा त्रिवृच्छब्दे यूपाहवनीयादिषु शक्त्यवधारणाल्लोकेऽपि चायं व्यवहारो बहुलमुपलभ्यते । तथा च सति वैदिकनियोज्यान्वययोग्यतया लिङादीनामपूर्वकार्याभिधायकत्वनिर्णयो नानुपपन्नः । अयं चापरो विशेषो यल्लिङादियुक्तानां वाक्यानां कार्यार्थत्वं तत्तावद्वृद्धव्यवहार एव सिद्धं, किं तु लिङादिप्रत्ययानां तद्वाच-

कता तच्चापूर्वमित्येतावन्मात्रं वैदिकपदसम्बन्धादवसीयतइति।

एकदेशिनमधुना निराकर्त्तुमुपन्यस्यति ।

व्यवहारत एवाहुर्व्युत्पत्तिमपरे पुनः ।
कार्ये मानान्तरावेद्ये क्रियादिव्यतिरेकिणि ॥

अस्यार्थः । के चिदेवमाहुः । लिङादियुक्तवाक्यश्रवणे प्रवृत्तिदर्शनात्कार्यावगतिनिबन्धनत्वात्प्रवृत्तेः कार्यमात्रमेव तेषामर्थः । न क्रियादिरूपता, तस्यां शब्दस्य प्रवृत्त्यनुपयोगित्वादिति क्रियानिष्कृष्टकार्याभिधायिता लौकिकव्यवहारादेव निर्णीयते इति ।

तदिदमयुक्तमिति प्रतिजानीते ।

सितेतरइव त्वेष पक्षश्चित्तं न कर्षति ।
चन्द्रातपामलन्यायप्रवासमलिनीकृतः ॥

कथमित्याह ।

कार्यमानान्तरावेद्यैः पार्श्वस्थस्तन्निबन्धनम् ।
व्यवहारं कथंकारं शब्दात्प्रागवबुध्यताम् ॥
व्यवहारमविज्ञाय तन्निबन्धनतद्गता ।
प्रतिपत्तिः कथं ज्ञेया शब्दशक्तिः कथन्तराम् ॥

इदमत्राकूतम् । यद्यपि कार्यमात्रमेव प्रवृत्त्युपयोगीति तावन्मात्रमेव शब्दार्थः, तथापि तस्य लोके क्रियागतस्यैव प्रवर्त्तकत्वदर्शनाद् शक्यते क्रियाश्रितता प्रसेतुम् । यथा कृतिमात्रस्य शब्दार्थत्वेऽपि व्यक्त्याश्रितताऽपि न प्रतिक्षिप्यते। तथा क्रियाश्रितत्वं प्रमाणान्तरप्रमितं न प्रतिक्षेपमर्हति । तेन क्रियातिरिक्तकार्याभिधायि न प्रसिद्धम् । यदि परं तन्निब-

न्धनव्यवहारदर्शनमेव स्यात् । तदा तद्दर्शनात्तद्धेतुभूतप्रति-पत्त्यन्यथानुपपत्त्या अनुमानेन शब्दस्य वाचकत्वाऽध्यवसानं भवेत् । न चैतदस्ति, तस्य शब्दादन्यतः प्रागनवमात्तनिब-धनव्यवहाराप्रतिपत्तिः । तदप्रतिपत्तौ च तद्धेतुभूतप्रतिपत्त्य-नुमानान्न शक्तिकल्पनोपपत्तिः ।

तत्ताकूतं विवृणोति ।

कार्यप्रतीतिमात्रं च प्रवृत्तेरनुमीयताम् ।
किं तु कार्या क्रियैवेह लोकदृष्ट्याऽऽवसीयते ॥

लोकप्रतीतं क्रियारूपत्वं च न शक्यते ऽपह्नोतुमिति कार्यमात्रार्थत्वे क्रियैव कार्यतया लिङाद्यर्थ इति निश्चीयते । न पुनःप्रमाणान्तरादपूर्वमिति । अन्ये पुनर्वेदार्थबोधकस्वार्थ-वचननिबन्धनप्रवृत्तिदर्शनेनातीन्द्रिये कार्ये लिङादयो व्युत्प-द्यन्तइत्याहुः । यदि आचार्यवचनादपि क्रियैव कार्यतया ऽऽव-गम्यते । तदा तस्याः स्वयं दुःखरूपत्वात्पुरुषार्थान्तरानुब-न्धनं विना प्रवृत्त्यसम्भवान्नियमेन सुखार्थिनः प्रवृत्तिर्न स्या-त्ततश्च संध्योपासनादौ पुरुषार्थोऽस्ति । तस्मात्क्रियातिरिक्त-कार्यमाचार्यवचनेभ्यो ऽवगम्यतइति ।

तान्प्रत्याह ।

वेदार्थाचार्यवाक्येषु प्रवृत्तिर्या ऽऽपि दृश्यते ।
तत्राप्येषैव सम्बन्धपरिज्ञानविधा भवेत् ॥

आचार्यवाक्यश्रवणादपि शिष्याणां या सन्ध्योपास-नादौ प्रवृत्तिः तत्रापि बालः स्वविषयनिरूपितं क्रियाकार्य-

त्वावगममेव कारणत्वेन परिकल्पयेत् । फलं विना च तदनुपपत्तेः फलावगममपि सम्भावयेत् । व्युत्पत्त्यनुसारेण वेदार्थमपि प्रतिपद्यमानो नित्यनैमित्तिकाधिकारयोरपि फलं कल्पयेत् । स एवं बाल्यदशायां व्युत्पन्नः स्वयमाचार्यपदवीमधिरूढो वेदार्थं प्रतीत्य शिष्येभ्य उपदिशन्क्रियामेव कार्यतया प्रतिपादयेत् नापूर्वं कार्यम् ।

उपसंहरति ।

तस्माल्लोकानुसारेण व्युत्पत्तिः कार्यमात्रके ।
तस्य त्वपूर्वरूपत्वं वेदवाक्यानुसारतः ॥

एवमपूर्वकार्याभिधायित्वे सिद्धे चोदयति ।

ननु लोकविरोधित्वं पक्षेऽस्मिन्नपि दृश्यते ।
सर्वदैव यतो लोके क्रिया कार्यैव गम्यते ॥

परिहरति ।

भवेदेवं विरुध्येते कार्ये ऽपूर्वे ऽपि लौकिके ।
प्रतिपत्तिवियोगौ चेत् क्रियाकार्यत्वगोचरौ ॥

यदि क्रियाकार्यत्वगोचरौ लौकिकत्वप्रतिपत्तिप्रयोगौ अपूर्वकार्याभिधायित्वपक्षाङ्गीकारे विरुध्येते ततो लोकविरुद्धत्वं स्यात् अस्मत्पक्षस्य । न चैतदस्तीत्याह ।

अपूर्वं हि क्रियासाध्यं साधिता साधनं क्रिया ।
तस्मादपूर्वसाध्यत्वं क्रियासाध्यत्वसङ्गतम् ॥
प्रमाणान्तरगम्यं हि लोकः शब्दैर्विवक्षति ।
क्रियाकार्यत्व एवातः प्रयोगो लक्षणान्वितः ॥

प्रतिपत्तिप्रयोगौ हि नावश्यं श्रौतवृत्त्यनुसारिणावेव ।

लक्षणयाऽऽपि लोकेदर्शनात् तेन यद्यप्युक्तेन न्यायेनापूर्वमेव कार्यं लिङादीनामभिधेयम् । तथापि तस्य क्रियाकार्यत्वाव्यभिचारात्तत्र लक्षणया तयोर्नानुपपत्तिः । क्रियासाध्यं त्वपूर्वं साधिता च सती क्रियासाधनं भवतीत्यपूर्वेण सह क्रियाकार्यत्वं नित्यसम्बद्धमिति शक्यते तल्लक्षयितुम् । यत्तु श्रौतपदार्थे लोके लिङादि न प्रयुज्यतइति, तत्तस्यापूर्वात्मनः प्रमाणान्तराप्रतीतत्वात्प्रतीतविषयत्वाच्च लौकिकप्रयोगस्य ।

यद्येषा लक्षणा किमिति तर्हि लोको नावगच्छतीत्याह ।

लक्षणानभिमानं तु मुख्यार्थानवधारणात् ।
यत्तु मुख्यार्थकुशलास्तेषां लाक्षणिकत्वधीः ॥

इति । मुख्यमर्थमविदित्वा लाक्षणिकमपि अर्थं श्रौतमिव मन्यते । म्लेच्छा इव यववराहाद्यर्थम् । मुख्यार्थविवेकिनां तु परीक्षकाणां लाक्षणिकत्वधीरिति ।

उपसंहरति ।

तस्मान्मानान्तरावेद्यं कार्यमर्थान्तरान्वितम् ।
वेदवाक्यं ब्रवीतीति संक्षेपो ऽयमुदाहृतः ॥

ग्रन्थस्य कर्तुश्च संज्ञां प्रयोजनं चाह ।

वाक्यार्थमातृकेयं प्रभाकरगुरुदर्शनानुसारेण ।
अनसूयुबोधनार्थं शालिकनाथेन संग्रथिता ॥
रचिता सच्चरितानामनुग्रहं कर्त्तुकामेन ।
वाक्यार्थमातृकाया वृत्तिरियं शालिकेनैव ॥

इति श्रीशालिकनाथमिश्रकृतायां वाक्यार्थमातृकावृत्तौ द्वितीयः परिच्छेदः ।

समाप्ता चेयं प्रकरणपञ्चिकायां वाक्यार्थमातृकावृत्तिः ।

विषयकरणीयं प्रकरणम् ।

प्रभाकरमतं सम्यगालोच्य क्रियते मया ।
विषयं करणं चैव विवेक्तुं युक्तिवर्णना ॥

ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिषु स्वर्गकामादिर्नियोज्यत्वेन सम्बध्यमानो नास्वर्गसाधने कार्ये बोध्यतया नेतुमलम् । क्रिया क्षणभाविनी न कालान्तरभाविनः स्वर्गादेः साधनायोपपद्यते इति कालान्तरावस्थायि क्रियातो भिन्नं कार्यमपूर्वं लिङादयो बोधयन्तीति स्थितम् । कार्यं च कृतीप्सितमुच्यते इति । कृतिरात्मव्यापारः पुरुषप्रयत्न इत्यनर्थान्तरम् । चेतनश्चात्मा कार्ये बोध्यतयाऽऽन्वयमुपैति । न चान्यव्यापाराभिनिर्वर्त्त्यमन्यः स्वसम्बन्धितया कार्यत्वेन संवेदयितुमलमित्यात्मनो मानसप्रत्यक्षसमधिगमनीयः प्रयत्नः स्वव्यापारः । अतस्तन्निर्वर्त्त्यमेवापूर्वं कार्यमात्मा मन्यते । प्रयत्न एव भवितव्ये ऽपूर्वे प्रयोजकभूतस्य भावयितुरात्मनो व्यापार इति भावनाशब्देनोच्यते । न च कार्याभिधानं कृतिमनभिदधतां लिङादीनामुपपद्यते इति कृतिमप्यभिदधति । अपूर्वं च । न च युगपदनेकाभिधानं दोषः । तथा ऽवगमात् । आनुगुण्याच्च । अवगतो हि प्रमाणेन लिङादीनां कार्याभिधायिता आनुगुण्यात् । कृतिर्गुणभूता प्रधानपदवर्त्तिन्यपूर्वात्मनि कार्ये, ऽविवादा च कर्त्रादिसंख्यावाचिता लिङादीनां कार्याभिधा-

यिनामपि । न चाभिधेयतामात्रेण भावनाया एव वाक्यार्थत्वं भाव्यमपूर्वं प्रति गुणभावेनाभिधानात् । प्रधानभावेनापूर्वस्याभिधानात् । तदेवं वाक्यार्थ इति न किं चिदनुपपन्नम् । अत एव भगवतो भाष्यकारस्य तत्रतत्र व्यवहारः पुरुषप्रयत्नः प्रकरणतो ऽपूर्वस्य नोच्यतइति । तस्य तथाविधस्य कार्यस्य नूनं केन चिद्भावार्थेनावच्छेदः । नहि प्रयत्नो भावार्थमन्तरेणास्ति । सर्वो हि पुरुषप्रयत्नः कं चिद्भावार्थमवश्यमाश्रयति । तेन विना तदभावात् । तेन प्रयत्नाविनाभावी भावार्थः प्रयत्नाभिनिर्वर्त्यमपूर्वमवच्छिन्नत्ति । अवच्छेदकतयैव विषयभावम् । यत्रैव हि यो भवति नान्यत्र स तस्य विषय इति विषयविदः, अनन्यत्र भावो विषयार्थः।अत एव भाव्य एवार्थो विषयः। भाव्यस्यैव पुरुषप्रयत्नगोचरत्वात् । तेन कार्याभिधायिभिः सह विषयबोधकतयैव भावार्थः कर्मशब्दः समभिव्याहारं प्रथममर्हति । तस्य प्रतिपत्त्यनुबन्धत्वात् । अविषयं ह्यपूर्वं कार्यं प्रत्येतुमशक्यम् । प्रतीतस्य च कार्यस्य साधना ऽऽकाङ्क्षा । तेन न जन्यजनकतया साधनतया भावार्थानामपूर्वेण सहान्वयः । किं तु प्रतीत्युपायतामेव मन्यमानो भगवानेवं ब्रूते । नह्यविषयान्नियोगान्नियोगज्ञानमुत्पद्यतइति । स च विषयीभूतभावार्थावच्छिन्नो विध्यर्थः कार्यात्मा प्रतीतः करणमितिकर्त्तव्यतां चापेक्षते । अन्यत्रापि साध्ये दर्शनात् । तत्र स एव भावार्थो विषयीभूतः करणमित्यवसीयते । कृतिव्याप्यत्वात् । यो हि यया कृत्या ऽन्यार्थप्रवृत्तया विषयीक्रियते स एव तत्र करणम् । यथा परशूद्यमननिपतनाभ्यां काष्ठगतद्वैधीभवनलक्षणकार्ये प्रवृत्ताभ्यां व्याप्यमानस्तयोरेव द्विधाभवनलक्षणफलावच्छेदलब्धद्वैधीकरणव्यपदेशयोश्छिदिधातुवाच्ययोः करणं, तथे-

हापि अपूर्वार्थप्रवृत्तपुरुषप्रयत्नव्याप्यमानो भावार्थस्तस्मिन्नेव प्रयत्ने अपूर्वभावनारूपे करणम्। ननु कथं प्रयत्नलब्धात्मा भावार्थो भावनायां करणं,भाव्यमानतया हि कर्मैव स्यात्। उच्यते। तत्र न कर्म तावदपूर्वार्थकृतिविषयत्वात्। सर्वस्यैव हि कारकाणि कर्तृव्यतिरिक्तानि तद्व्यापारव्याप्यानि नचैतावता तानि कर्मतां प्रतिभजन्ते। अनीप्सितत्वात्। क्व चिच्चानीप्सिते कर्मता दृश्यतएव। यथाऽग्निहोत्रं जुहोतीति। करणं तु यद्यपि स्वरूपनिर्वृत्तौ न सम्भवति। तथाप्यपूर्वभावनारूपता तदधीनेति नानुपपन्नम्। यथा परशोरेव। नहि परशुः कर्म। करणं तु भवति, अनीप्सितत्वात्। उद्यमननिपतनयोर्द्वैधीकरणभवनरूपतायास्तदधीनत्वात्। परशुसम्बन्धप्रभावेन शुद्यमननिपतने द्वैधाभवनफलनिष्पादकतया द्वैधाभवने कारणतां भजेते। अत उद्भिदा यजेतेति तृतीया निर्देशोपपत्तेः। अपूर्वभावनायां कारणत्वाद्यागस्य तन्नामत्वाच्चोद्भिच्छब्दस्य। एवं चापूर्वफलयोरेकैव भावना, एकत्वात्पुरुषप्रयत्नस्य,एकमेव च कारणं तद्भावनाव्याप्यत्वादेकैव भाव्यतेति। अत एव च साध्यविवृद्धिरिति प्राभाकराः। यदि विषयीभूतस्य करणता, हन्त तर्हि दर्शपूर्णमासाभ्यामित्यत्र तन्त्राभिहितानां तन्त्रेणैव प्रतिपत्त्यनुबन्धत्वाद्विषयभावस्यैकत्वादेकमेव कारणं स्यात्। ततश्च भेदेनेतिकर्त्तव्यतासम्बन्धो न स्यात्। उच्यते। न सम्यगवधृतमायुष्मता श्रुतिशालिनां वचः। यदेव विषयीभूतं तदेव करणं नान्यदिति। तस्यार्थः। प्रतीत्यनुबन्धतया च विषयभावः स यथाभिधानमवकल्पते प्रतिपत्त्युपायत्वादभिधानस्य। अतस्तन्त्राभिधानात्सहितानां विषयभावः करणं सिद्ध्यनुबन्धो नियो-

गस्य यथास्वभावं वेदितव्यम् । स्वभावाधीना हि साधकानां साधकतेति स्वभावभेदे हि भिन्ना साधकता । साधकत्वे च कृतिविषयत्वात्कारणतेतिभेदेन कारणभावः । नन्वेवं प्रत्येकं कारणभावाश्रयणे कारणान्तरनिरपेक्षणा किमिति नियोगसिद्धिहेतुता न भवति । नैवम् । यथाश्रुतकरणाधीनसिद्धित्वान्नियोगस्य । तत्र बहूनि करणानि तस्य श्रूयन्ते इति तथैव तस्य सिद्धिः । अनेककरणसम्पाद्यतापि एकस्य दृष्टा । यथा गमनस्याश्वेन शिबिकया वा गच्छतीति । भिन्नस्तत्र कारणव्यापार इति यद्युच्येत । अत्राप्युत्पत्त्यपूर्वाण्यवान्तरव्यापारभूतानि भिन्नानि सङ्गिरामहे एव । अत एव तद्भेदेत भिन्नत्वात्कारणभावस्य परमापूर्वप्रयुक्तत्वे ऽप्याज्यौषधसान्नाय्यधर्माणामसङ्करः । अपूर्वसाधननिवेशितत्वाद्धर्माणां तस्य च भेदात् । ये पुनर्यागादीनामपूर्वं चान्तरा भावनां नानुमन्यते । तेषां यागादीनां करणभावो दुर्घटः । अव्यापाररूपत्वादपूर्वस्य, व्यापारसम्बन्धप्रसवत्वाच्च करणभावस्य । गौणकरणत्वमिति चेत् । कथं तर्हि इति कर्त्तव्यतासम्बन्धः । करणं हि इतिकर्त्तव्यतया सम्बध्यते । गौणं च न करणं, नहि गौणो मुख्यधर्मः सम्भवति । ये ऽपि सर्वाख्यातेष्वेव भावनाभिधानमाहुः, तेषामपि मतमस्मभ्यं न रोचते । नहि कार्यानभिधायिषु लिङादिषु भावनाभिधाने प्रमाणमस्ति । यदपि करोति पचतीति उत्तरदर्शनप्रमाणमुपन्यस्तं, तदपि न । साधकव्यापारविशेषप्रश्नो ह्ययं किं करोतीति तत्र पचतीत्युत्तरेणापि तदेव निर्दिश्यते । यत्तु व्यापारमात्रवाचिधातूच्चारणमात्रं न क्रियते । तत्र तावन्मात्रस्यापभ्रंशत्वात्प्रत्ययान्तरोच्चारणं च प्रश्नेन सहासम्बन्धः । अत एवाचेतने व्यापारे वर्तमानापदेशादीनां प्रयोगः । लि-

ब्दादयस्तु चेतनमेवाधिकृत्य प्रयुज्यन्ते । न चाचेतनेषु गौणः प्रयोगः । मुख्यत्वे ऽप्यविरोधात्कर्त्रादिसङ्ख्यादिमात्रवचनत्वेन रथो गच्छतीत्यादिषु लडर्थः तेनाचेतने ऽपि मुख्य एव लडर्थ इति । धातूनामेव क्रियावाचित्वात्प्रथमोपनिपाती व्यापार एव धात्वर्थो युक्तः । जघन्यौ संयोगविभागौ किञ्चानेकार्थता ऽऽप्यापद्येत । केवलस्य संयोगस्यावाच्यत्वात्संयोगजे ऽपि संयोगे ऽच्छ गच्छतीत्यप्रयोगाद्विभागजे ऽपि विभागे प्रयोगानुपलब्धेः । न केवलस्य विभागस्य गमिवाच्यतेति किमनेन मनीषिकानिर्मितेन बालजल्पितेन मनोहारिणा निर्बन्धेन

शालिकनाथेन कृतं कृतिनामुपकारसिद्धये सम्यक्
समुदीक्ष्य वा गुरुमतं सम्यग्विषयकरणीयमिदम्

इति ।

प्रकरणपञ्चिकायाम् ।

अङ्गपारायणम् ।

व्याख्याविकल्पसम्भवमङ्गान्यधिकृत्य संशयं छेत्तुम् ॥
परमं प्रभाकरगुरोर्गम्भीरं भावमभिधास्ये ॥

इह चतुर्विधमङ्गजातं जातिगुणद्रव्यभावार्थात्मकं तत्र भावार्थात्मकमपि द्विविधं संनिपत्योपकारकमारादुपकारकं च तत्र संनिपत्योपकारकं चतुर्विधं, साध्यभूतोत्पत्तिप्राप्तिविकृतिसंस्कृतिभेदात् । यथाक्रमं संयवनदोहनविलापनप्रोक्षणादिरूपम्,संयवनेन प्रागभूतः पिण्ड उत्पद्यते । सदेव क्षीरं दोहनेन प्राप्यते । विलापनेन प्राचीं संहतावस्थामपबाध्येतरा द्रवावस्थाज्यस्योत्पद्यते । पार्थिवं ह्याज्यं गन्धवत्त्वात्स्वभावतः संहतरूपमग्नियोगेन द्रवीभवति । तदाह भगवान्काश्यपः । "सर्पिर्जतुमधूच्छिष्टानां पार्थिवानामग्निसंयोगाद् द्रवत्वमद्भिः सामान्य"मिति । तथा च शाब्दैरप्युक्तम् । अग्निसंयोगेनाज्यं द्रवीभवतीति च्विप्रत्ययप्रयोगाद्दति । प्रोक्षणं तु द्रव्यस्य न प्रागवस्थाध्वंसेन दशान्तरमादधातीति । श्लोकश्चात्र भवति ।

पूर्वावस्थाप्रहाणेन दशान्तरपरिग्रहः ।
विकारमाहुः संस्कारं केवलातिशयोदये ॥

इति । किं पुनरेषां चतुर्णामपि संनिपत्योपकारित्वे लक्षणं, यत्कारकविध्यपेक्षं फलं जनयति तत्संनिपत्योपकारकम् । यथा कर्त्तरि स्नानं, कर्मण्यवघातादि, अधिकरणे द-

द्व्यानयनमित्यूहनीयं, तत्र सन्निपत्योपकारकाङ्गवाक्येषु केचित्पृथग्विधीनभ्युपगच्छन्ति। ते हि मन्यन्ते। यद्यत्र पृथग्विधयो नाभ्युपगम्येरंस्तदा ऽधिकृताधिकारादङ्गत्वेनावघातादीनां न स्यात्। नच द्रव्यसंबन्धमुखेन प्रकृताधिकारापूर्वसंबन्धादङ्गता सिद्धिः। व्रीह्यादिशब्दानामाकृतिवचनत्वात्, यद्यपि कार्यप्रत्यासत्ततया व्यक्तीनां तल्लक्षणार्थो जातिशब्दः, तथापि व्यक्तिमात्रं लक्ष्येत नापूर्वविशेषसंबद्धा व्यक्तिः। न च प्रकृतात्रेयीवत्तदपूर्वसंबन्धव्यक्तिवशेनापूर्वसंबन्धस्तथापि यथाग्रयीन्यायेन संनिहितव्यक्तिपरिग्रहः, तथापि स्वरूपेणैव तासां प्रकृतव्यक्तिपरिग्रहेण प्रतीतिः, न पुनरपूर्वविशेषसाधनतया तस्य स्वरूपस्य लाक्षणिकत्वात्। न च लक्षितलक्षणायां प्रमाणमस्ति। तथाहि जात्या व्यक्तिर्लक्ष्यते। व्यक्त्या च साधनविशेष इति लक्षितलक्षणा प्रकरणाभावादयुक्ता। अतएव चाग्नेय्या ऽऽग्नीध्रमुपतिष्ठते इति सत्यपि प्रकृतपरिग्रहे न ऋगन्तरेणाग्नीध्र उपस्थातव्यः। अत एव च न तत्र विनियुक्तविनियोगविरोधः। कार्यान्तरसाधनतया चाग्नीध्रोपस्थाने ऽविनियोगात्। एवं च स्वरूपमात्रेणावघातादीनां संबन्धान्नापूर्वविशेष सम्बन्धसिद्धिः। दीक्षणीयावाङ्नियमनवत्। यथा स्वावान्तरापूर्वसम्बन्धाद्वाङ्नियमो नाधिकारापूर्वानुप्रवेशी तथा ऽवघाताद्यपि स्यात्। ततश्चाधिकारपूर्वं प्रत्यवघातादीनामङ्गता न स्यात्तदनङ्गत्वे च तत्प्रयुक्त्यभावादवघातादीनामनुष्ठानं न स्यात्। अतो ऽवघातादिषूत्पत्तिविनियोगो ऽङ्गीकरणीयः। तस्मिन् खल्वाश्रिते अधिकाराभावेन तस्यानुष्ठानानुपपत्तेरधिकारिणि कल्पयितव्ये प्रकृताधिकारापूर्वो ऽधिकृत एव प्रयाजादिष्विवाधिक्रियते इति उपायोपेयभावात्तदङ्गत्वसि-

द्धिरिति । तदिदं तत्र भवानुपाध्यायो न मृष्यति । अनभिज्ञो भवान्विषयनियोज्यानामिति । अवघातादिषु शब्दतो वस्तुतो वस्तुस्वभावतश्च प्रोक्षणादिषु शब्दत एव तुषकरणविमोचनादि दृष्टमदृष्टं च कार्यमङ्गीक्रियते । तत्र यदि नियोगो ऽप्यपर आश्रीयते कार्यभूतस्तदा कार्यद्वयमेकस्मिन्कार्ये नान्वीयते । न च यथा स्वर्गादिकं फलं तथा भूतमेव तद्भवितुमर्हति । तस्य च नियोज्यविशेषणत्वेनान्वयसम्भवात् । न च तुषकरणविमोचनादिनियोज्यविशेषणं क्रियाफलत्वात् यदेव नियोगात्फलं तदेव नियोज्यविशेषणतामनुभवति । साध्यविशिष्टो हि नियोज्यस्तदेव कार्यतया प्रतिपत्तुमर्हति यदेव तस्य साध्यं साधयति इति नियोज्यविशेषणस्य सिद्धिरवसीयते । यच्च क्रिया फलं न तन्नियोगात्सिध्यतीति न तद्विशिष्टो नियोगे नियोज्यतामश्नुते । न च प्रतीततुषकरणविमोचादिकार्यत्यागो युक्तः, प्रतीतहानादेव । ननु च नियोगाभिधायिलिङ्गादिप्रयोगवशेन नियोगो ऽपि प्रतीत एवेति तुल्यो दोषः । उच्यते । सन्निहिते विधौ विधिरवगम्यमानः स एव तावदवगन्तुमुचितः । तत्र यदि तद्विषयानुप्रवेशिता विषयस्य न स्यात् । भवेद्विध्यन्तरम् । अनुप्रविशति चावघातादिप्रकृतविषये तदर्थव्रीह्यादिसम्बन्धात् । तथा हि सन्निहिताधिकारिनियोगपरतयैवावहन्त्यादिभिः पदैरवघातादय उच्यन्ते । तथाभूतानां तेषां क्रियाकारकभावोपदेशात् । यदि स्वरूपमात्रावस्थितैर्व्रीह्यादिभिः सह सम्बन्धः स्यात्तदा तदधिकारसम्बन्धो न स्यात्तदीयसाधनविशेषलक्षणया व्रीह्यादिभिः पदैरवस्थापितो ऽवघातादिभिरन्वीयते न स्वरूपमात्रं एवं चोपदेश एव यत्रेऽत्रप्यवघातादयः सिद्धा भवन्ति, साधनभावस्याविशेषात् ।

अत एव चावघातादयो नियोगसाधनतया ऽप्राप्ता एव विधीयन्ते । नियमस्तु प्रयोजनम् । यदि नियोगाङ्गतया ऽवघातादयो न विधीयेरन् । तदा पुरोडाशमात्रसिद्ध्यर्थतया नखदलनाद्यप्याक्षिप्येत, नियोगाङ्गतया त्ववघातादिषु विहितेषु तैर्विना नियोगासिद्ध्यनुपपत्तेर्नियमेन तएवाक्षिप्यन्ते नियोगाङ्गता तु पक्षे ऽप्यप्राप्ता । नियोगस्यालौकिकतया तदङ्गस्यापि शब्दादन्यतो ऽनवगमान्नियोगाङ्गत्वाच्चावघातादीनां नियोगसम्बन्धः प्राप्तः स लिङादिभिरनूद्यते । ननु यद्यवघातादीनां नियोगसम्बन्धो ऽस्ति कथं तर्हि तेषां नियोगाविषयत्वम । उच्यते । किन्तु यस्य नियोगस्य सिद्धिरेव कार्यः स विषयः, अवघातादीनां च तुषकणविमोचनाद्यवान्तरकार्यं कुर्वतां नियोगाविषयत्वं, तेन नियोगाविषयत्वमङ्गता चेति सिद्धम् । विधेयास्त्ववघातादयो नियोगसिद्ध्यर्थतयोपादीयमानत्वात्तदुक्तं, " यत्तु तत्सिद्ध्यर्थमुपादीयते तद्विधेयमिति तत्र व्यवहार " इति । तदेवं नियोगप्रत्यभिज्ञोपबृंहितसन्निधानमात्रेणैवावघातादीनां नियोगाङ्गता न पदार्थान्वयमुखेनेति सिद्धम् । येषां पुनः पदार्थान्वयमुखेनानुप्रवेशो ऽभिमतस्तेषां प्रकरणाधीनस्य पाञ्चदश्यस्यानारभ्याधीतस्य च साप्तदश्यस्य सामिधेनीसम्बन्धमुखेनानुप्रवेशिनोरविशेषादुभयोरपि प्रकृतावेव नियोगो विकल्पश्च स्यात् । सन्निधानमात्रेण तु प्रकरणाधानस्य ग्रहणे शीघ्रं पाञ्चदश्यमधिकारानुप्रविष्टमिति तदवरुद्धे साप्तदश्यमधिकारविधौ चानुप्रविशति तेन विकृतावेव तस्य निवेश इति । यदि सन्निधानतो ऽधिकारविधावनुप्रवेशः तर्हि पर्णतादीनामनारभ्याधीतानां कथमनुप्रवेशः । उच्यते । जुह्वादयो ऽव्यभिचरितक्रतुसम्बन्धा इति तत्सम्बन्धमुखेन

क्रतुसम्बन्धसिद्धिः । तत्सम्बन्धेनैव च जुह्वादिषु पर्णतादि-
सम्बन्धात् । अत एव हिरण्यं भार्यमिति स्वतन्त्रमेवाधिकार-
नियोगविषयः । हिरण्मयस्य क्रतुसम्बन्धव्यभिचारात् । ये च
पदार्थस्वरूपानर्थकत्वापत्तेस्तत्सम्बन्धावस्थान्वयपूर्वकं ग्राहका-
न्वयमाहुः । तेषामिदमेव तावत्कथम्, आनर्थक्येन न भवित-
व्यमिति, वेदवाक्यत्वादिति चेन, वेदनानर्थकेन न भवितव्य-
मिति न राज्ञा ज्ञापितं, यस्यार्थो गम्यते तस्य मा भूदानर्थ-
क्यम् । अनवसीयमानार्थस्य त्वर्थवत्त्वं मनोरथमात्रविजृम्भि-
तम् । पक्षान्तरालम्बनेनाप्यर्थवत्ता भवत्येवेति परं संनिधान-
वशेन नियोगाङ्गताभ्युपगमः । सन्निधानमपि सम्बन्धे कार-
णमिति वाक्यविदः । सम्बन्धश्च गुणप्रधानभावमन्तरेण न
स्यात् । तत्र न च कार्यमन्यथा भवतीति नियोग एव प्रधा-
नम् । अङ्गमवघातादयः । यदि वा ऽनर्थको न नियोगस-
म्बन्धः तदा च तृच उत्तमः पर्यास इति द्वादशाह विधिवि-
रोधान्न क्रतुसम्बन्धे ह्येष पर्यास उच्यते । तेन तत्र पदार्थमात्र
सम्बन्धे एवातिः क्रान्तमिति आनर्थक्यं नास्ति । तथा हि-
रण्मय्यः स्रुचो भवन्ति इति स्रुचामव्यभिचरितक्रतुसम्बन्धानां
धर्मविधेरानर्थक्यं नास्तीति न प्रकृताधिकारसम्बन्धः स्यात् ।
किं चानर्थक्यपरिहाराय पूर्वसम्बन्धो ऽभ्युपेयेत किमिति स-
न्निहितापूर्वसम्बन्धे स आश्रीयते । यदि सन्निधानमात्रेण
ततश्च अग्नेस्तृणान्यपचिनोति नाग्निहोत्रे एव व्यवतिष्ठे-
त । अथ सन्निधानविशेषात्तदपूर्वसम्बन्धिनामग्न्यादी-
नां परिग्रहःतदा वरं संनिधानविशेषात्तदपूर्वसंबन्ध एवास्तु ।
किं परम्पराश्रयणेन । यथा क्रियाकारकभावेनान्विताभिधानं,
यथा प्रयोजनप्रयोजनिभावेन लोके प्रतिपन्नम् । नहि व्रीह्या-

दयः प्रयोजनतां प्रतिपत्तुमर्हन्ति इति तत्परित्यागेनापूर्वेण सह प्रयोजनप्रयोजनिभावेन संबन्धः। ये चावघातादिष्ववान्तरापूर्वाणि सङ्गिरन्ते तेषां मते प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्तीति प्रोक्षणं दीक्षणीयावाङ्गियमवदवान्तरापूर्वप्रयुक्तं स्यात्ततः स त्रैधातवीयायां वाङ्गियमो न स्यात्तथा नखनिर्भिन्नैः प्रोक्षणं न स्यात्तत्प्रयोजकं रूपं तत्र नास्तीति। नचैतद्वाच्यं,तुषकणविवेचनाधिकार्यमुखेनाधिकारापूर्वमेव प्रयोजकमिति। वाङ्गियमे ऽपि तथा प्रसङ्गाद्दीक्षणीयायामपि क्रत्वपेक्षितत्वोत्पत्तिरिति तदधिकार्यं नास्तीति ज्योतिष्टोम एव प्रयोजको वाङ्गियमस्य स्यात्। तद्दीक्षितत्वोत्पादिकायां त्रैधातवीयायामपि स्यात्। ननु चावघातादिष्ववान्तरविधयो नेष्यन्ते, कथं तर्हि "नचाविहितमङ्गं भवती"ति अङ्गेष्वेवान्तरविध्यवगमो भाष्यकारस्य। उच्यते। आरादुपकारके ऽनृतवदनप्रतिषेधे त्वावान्तरविधिरङ्गीकृतः। तद्व्यतिरेकेणाङ्गत्वानुपपत्तेः। स्वरूपेण क्षणिकत्वात्कर्मणामुपकारजननकाले तदनवस्थानादङ्गत्वं न घटतइति इहैव वक्ष्यामः। अत एव "संहन्यमानमन्त्रवचनो ऽप्रविपन्नस्योपकारिणि न पुरुषप्रयत्नश्रवणमनुवदति" इति वदति भाष्यकारो यत्र ह्यवान्तरविधिरस्ति तत्र पुरुषयत्नश्रवणं नानुवादः। यदेव तदवान्तरापूर्वं तत्कार्यतया लिङादिवाच्यम्। न च कृतिरूपपुरुषप्रयत्नानभिधाने कृत्यवच्छिन्नस्वभावस्या कार्याभिधानोपपत्तिरिति तदर्थं पुरुषप्रयत्नाभिधानं युक्तमिति नाविवक्षितः पुरुषप्रयत्नः। एवं नियोगप्रत्यभिज्ञोपबृंहितसंनिधिसमाम्नानादवघातादयो ऽवहन्त्यादिपदैरभिकारनियोगैदमर्थ्येनान्वयिनो ऽवगता सन्तस्तदन्वितावस्थैर्व्रीह्यादिभिः सह क्रियाकारकभावेनान्विता न प्रतिशेषतां प्रतिप-

द्यन्ते । किं पुनरवघातस्य व्रीह्यादिशेषत्वे प्रमाणम् । कार्यमिति ब्रूमः । तदा हि न कार्यमन्यार्थं भवति । कार्यत्वादेव । तेन यत्कार्येण संबद्धं तत्तावत्तदर्थम् । यदपि च कार्यैदमर्थ्यापन्नेन संबद्धं तेनापि सह यस्य साध्यसाधनभावस्तदपि तदर्थमेव कार्यैदमर्थ्यापन्नस्यान्यैदमर्थ्ये प्रमाणाभावात् । एवं च सर्वेष्वशेषशेषित्वं वेदितव्यम् । यदि कार्यत एवैदमर्थ्यावगमः । कथं तर्हि श्रुत्यादीनां विनियोगकारणत्वम् । द्वारविशेषसमर्पकतया कार्यविशेषकरतया हि शेषः शेषिणि शेषतामापद्यते । नान्यथा अकिंचित्करस्य शेषत्वानुपपत्तेः । तत्र श्रुतिः । व्रीहीनवहन्तीति द्वितीयात्मिका व्रीह्यादिगतं तुषकणविमोचनादिसमभिव्याहृतक्रियासाध्यभूतं समर्पयन्ती नियोगकरणतामनुभवति । न पुनरन्विततयैव शेषितां व्रीह्यादीनामवघातस्य च शेषतामाह । गां ददातीत्यादिषु व्यभिचारात् । क्रियाजन्यफलभागिता हि सर्वत्राव्यभिचारिणी द्वितीया वाच्या। न शेषिता, व्यभिचारित्वात् । क्रियाजन्यस्य फलस्य भागि कारकमेव तत्कर्म तच्च किं चिदीप्सितं भूतभाव्युपयोगात्। किंचिच्चानीप्सितमनुपयोगात् । तेनैव विशेषेण भगवतः पाणिनेः सूत्रद्वयम् । कर्तुरीप्सिततमं कर्म । तथायुक्तं चानीप्सितमिति । येषां मते शेषितैव द्वितीयादीनामर्थः । तेषां मते सुवर्णं भार्यमिति क्रतुधर्म एव स्यात् । श्रुतानुगुणाधिकारानुप्रवेशितैव न्याय्या यतः न स्वतन्त्राधिकारकल्पना एवमतः सुवर्णशेषित्वत्यागप्रसङ्गात् । क्रियाजन्यफलभागित्वे तु शब्दार्थे न श्रुतहानिरिति स्वतन्त्रकर्तृतावगमात् । तत्कारणभूताधिकारत्वेनैव न्याय्या प्रकृतनियोगाप्रत्यभिज्ञानाद् नियोगान्तरे स्थिरे प्रजापतिव्रताधिकारवत् कल्पनेनाधिकारकल्पनैवोचि-

तेति स्नानादिषु वस्तुस्वभावपर्यालोचनया लिङ्गात्कर्तृसंस्कार-रूपकार्याङ्गीकारः। तेन कर्त्तृविशेषितामानादीनां सामर्थ्या-त्सामर्थ्यमात्रं च लिङ्गम्। नाभिधानसामर्थ्यमेवं सति आज्यं जुहोतीत्यादिषु वाक्यादतिक्रमस्य होमः कार्यतया प्रतीयत-इति वाक्येनापि न विनियोगः सन्निपत्त्योपकारकारणम्। न च प्रकरणेन विनियोगः सम्भवति येषां प्रकरणं कल्पयति तेषां प्रकरणाधीनो विनियोग इतिकर्त्तव्यताकाङ्क्षाप्रकरणम्। तथाच करणोपकारः। कार्यभूतः कल्प्यते, तथासौ सन्निप-त्योपकारिणां द्वारमिति न तेषां प्रकरणेन विनियोगः। स्था-नसमाख्ययोरपि सन्निपत्त्योपकारकारिणि प्रति न कार्यक-ल्पकतेति न विनियोगकारणत्वम्। एवं सन्निपत्योपकारकाणां नियोगैदमर्थ्यमभिदधानतो विनियोगतश्च कारकैदमर्थ्यमुपा-दानतश्चाधिकारनियोगकरणीभूतयागाद्यैदमर्थ्यं विनियोगा-क्षेपो ह्युपादानम्। तत्कृतं प्रोक्षणादेः क्रत्वर्थत्वम्। यदि यदी-यप्रकरणोपकारता प्रोक्षणादेर्न स्यात् तदा केनापरेण प्रका-रेण तदन्विता विनियोगप्रतीतिर्निर्वहतीति नियोग एव तद-न्वितः प्रतिपन्नस्तस्य करणोपकारकताकल्प्यं करणैदमर्थ्यमा-क्षिपतीति तत्कृतमेव प्रोक्षणादेः क्रत्वर्थत्वं विनियोगात्पुनः करणैदमर्थ्यमेवेति। कथं पुनस्तेषां करणोपकारकता तुषक-णविमोचनादिकार्यपरम्परादानेनोपकार्यविशेषाधायकतया। नन्वेवं सति कारकानुप्रवेशिनामवघातादीनां करणशरीरविशे-षाधायकतया करणोपकारकत्वं, प्रयाजादीनां तु व्यतिरिक्त-कारकानुग्रहजनकतेति न सन्निरेक उपकारः क्रियते। ततश्च सन्निरेकेतिकर्तव्यतेति न स्यात्। उच्यते,उपकार्यविशेषायत्त-त्वादुपकारसिद्धेरुपपन्नमुपकार्यस्य हि विशेषस्योपकारकं क-

रूपयितुं शक्यते । नान्यस्येत्यवघातादिविनियोगादवगम्यते । एवं चेदुपपन्नमवघातादेरपि प्रयाजादिभिः सह करणोपकारजनकत्वम् । कस्मात्पुनः प्रयाजादिवदवघातादयो ऽप्युपकारका नाभ्युपेयन्ते । प्रकृताधिकारनियोगप्रत्यभिज्ञानात् । सम्भवति चात्र नियोगैक्यं तदीयव्रीहिसंस्कारगुणेनेत्युक्तम् । प्रयाजादितुल्यत्वे हि अवघातादीनामङ्गीक्रियमाणे उत्पत्तिनियोगान्तरमाश्रयणीयमिति वक्ष्यामः । तत्र संग्रहश्लोकाः ।

सन्निधानवशोत्पन्ना प्रकृता पूर्वभाविनी ।
भावाधिष्ठा त्वभिज्ञेति तदनुग्रहकाङ्क्षया ॥
अवहन्त्यादिभिः शब्दैः कार्यान्वितपदार्थकैः ।
प्रकृतापूर्वसम्बन्धएव स्वार्थो ऽभिधीयते ॥
तथा सति तदीयत्वं तेषां रक्षितुमिच्छता ।
व्रीह्यादिभिः पदैर्युक्ता कार्यसाधनलक्षणा ॥
क्रियाकारकसम्बन्धो ह्यतत्साधनगोचरः ।
शेषिबोधो ऽपि तस्यैव श्रौतत्वाद्यनुसारतः ॥

इति प्रकरणपञ्चिकाया अङ्गपारायणे
सन्निपत्योपकारकपरिच्छेदः ॥

अङ्गपारायणं नाम प्रकरणम् ।

आराादुपकारकं च द्विविधम् । अदृष्टप्रयोजनं दृष्टादृष्टप्रयोजनं च । समिधो यजतीत्यादिष्वस्य कारकगतं किं चित्प्रयोजनं न दृश्यते । तत्र केचित्तावदधिकारापूर्वसिद्ध्यर्थमेषामधिकृताधिकारमिच्छन्ति । ते हि मन्यन्ते उत्पत्तिनियोगास्तावत्समिदादिषु निर्विवादं संमताः । न च नियोगो नियोज्यमन्तरेणाभिधीयते । तथा च सति विश्वजिदादिषु नियोज्यपरिकल्पना न स्यात्तत्र च नियोज्ये कल्पयितव्ये यद्यनुषङ्गः फलपदस्य कल्प्येत यदि वा विश्वजिन्न्यायेन वाधिकारी कल्प्यते तदाधिकारापूर्वस्येतिकर्तव्यताकाङ्क्षा न परिपूर्णेति । न परमापूर्वाधिकारकत्वेनाधिकारिणि सत्युपायोपेयभावो गम्यते । नह्यन्यथाधिकृताधिकारभाव उपपद्यते । यस्य न परमापूर्वसाध्यश्च परमापूर्वाधिकारः । न च यथा स्वर्गकामो यजेतेत्यादौ साध्यस्वर्गविशिष्टाधिकारिणि स्वर्गयागयोरुपायोपेयभावः तथेहापि समिदादिपरमापूर्वयोः । तत्र च न कार्यमन्यार्थमिति न्यायेनाधिकारनियोगैदमर्थ्यमेव समिदादीनामवमीयते । तदिदं ग्राहकग्रहणमिति गीयते तत्रोत्पत्तिविशिष्टाग्नेयादिकरणावरुद्धे परमापूर्वे प्रकारान्तरेणैदमर्थ्यानुपपत्तेरितिकर्तव्यतात्वेनैव सम्बन्ध इति । तदिदमुपपन्नमिति प्राभाकराः । यदि सर्वस्य नियोगस्य नियोज्यान्विताभिधानमाश्रीयते । तत्र रा-

जघ्नीयकानामिज्यविशेषाणामुत्पत्तिविनियोगानामपि साधिकारत्वं स्यात्। ततो ऽभिषेचनीयतन्त्रमध्ये पठितानां विदेवनादीनामभिषेचनीयावान्तरापूर्वप्रकरणेन तदङ्गतैव न स्यात्। अथोच्येत नादृष्टार्थे नियोगो नियोज्यान्वितो ऽभिधीयते किं त्वनुष्ठानलब्धये। अभिषेचनीयावयवश्च परमापूर्वप्रयुक्त्यैव लब्धानुष्ठानाः परमापूर्वस्यापि तद्विषयत्वात्तेनैव स्वसिद्ध्यर्थं विषयीभूतास्विज्यासु प्रयुज्यमानासु तद्विषयोत्पत्तिनियोगा अपि लब्धसिद्धयो न स्वसिद्धये नियोज्यान्तरमाकाङ्क्षन्तीति। तर्हि प्रयाजादिनियोगा अपि विनियुक्तविषयत्वान्नाधिकारान्तरमपेक्षेरन्। स्यान्मतं विनियोग एव तेषामधिकृताधिकारमन्तरेणानुपपन्न इति। तदसत्। नियोगैदमर्थ्यमात्रेण प्रथमशब्देनावगताधिकारसंबन्धानां प्रकरणेनेतिकर्तव्यतात्वेन विनियोगात्। तथाहि अधिकारविधिसंनिधौ यजतीत्यादयो निरधिकारा एव तावदाम्नायन्ते। तत्र योसावधिकारविधिः स एव प्रयोजनभूतो निरधिकारैः समिदादिभिः स्वयमप्रयोजनभूतैरन्वितः शब्देनाभिधीयते। समिदादिवाक्यानि च द्रव्यदेवताविशिष्टानि यागस्वरूपाण्येव संनिधापयन्ति संनिधापनमात्रेण तैः सहाधिकारनियोगस्यान्वयः। यदि च संनिधानं नाद्रियेत तदा समिदादिष्वपि किमिति परमापूर्वाधिकारी कल्प्यते। तदेवं संनिधानमात्रतः सिद्धमुपकारैदमर्थ्यं कथं भवतीत्यपेक्षा। तथा साध्यभूतस्याधिकारापूर्वस्य कथमित्याकाङ्क्षा। तेन करणोपकार एव तेषां द्वारमाश्रीयते। तत्र यदैदमर्थ्येनान्विताभिधानं तद्ग्राहकग्रहणम्। यच्च तेषां करणोपकारद्वारपरिकल्पनं स एव प्रकरणविनियोगः। नन्वेवमवान्तरापूर्वाण्यपह्नुतानि। नापह्नोष्यामहे। यद्यपि प्रथमं लि-

ष्टादयो न व्यतिरिक्तं नियोगं प्रतिपादयितुमीशते । अवह-न्त्यादिष्विव शङ्क्यमानाधिकारनियोगानुवादकत्वात् । तथा-प्यधिकारनियोगं प्रति एषां क्षणभङ्गिनामवान्तरापूर्वाण्यजन-यतामङ्गतोपपद्यतइति पश्चादधिकारापूर्वाङ्गभावोपपादनायाश्र-यणीया अवान्तरापूर्वाणि लिङ्गाभिधेयान्युपेयन्ते । तदेतदीक्ष-णीयावाङ्मियमाधिकरणे व्युत्पादितम् । नन्वेवमाश्रयिष्यवा-न्तरापूर्वाभ्युपगमो यथा तथा तत्रैव वक्ष्यामः । यानि च ता-न्यवान्तरापूर्वाण्वितानि शब्देनाङ्गभूतानि अधिकारापूर्वं प्र-त्युपनीयन्ते । नन्वेवं तर्हि दीक्षणीयादिषु वाङ्मियमस्यावान्त-रापूर्वप्रयुक्तता न स्यात् । किं तु प्रोक्षिताभ्यायवहन्तीति त-त्पूर्वप्रयुक्ततैवापद्येत । न । तत्स्वरूपनिष्पत्त्यर्थत्वाद्यद्यप्य-वान्तरापूर्वाणां परमापूर्वाङ्गतया भावः तथापि स्वरूपनिष्प-त्त्यर्थ एव वाङ्मियमादिको धर्मः । न दीक्षणीयायामनुब्रूया-दिति दीक्षणीयासंबद्धावान्तरापूर्वस्वरूपसंबन्धावगमात् । न च तेषां स्वरूपपरित्यागेनाङ्गाङ्गिभावलक्षणा युक्ता । लक्षणैव यतः, न च स्वरूपार्थत्वेनानुमानम् । स्वरूपस्यैवानन्यगम्य-सिद्धत्वात् । शब्दैकगम्यसिद्धिकं सर्वमपूर्वमवघातादीनां तु प्रमाणान्तरावसेयसिद्धीनां विनापि प्रोक्षणं स्वरूपसिद्धेः स्व-रूपार्थत्वे ऽयुक्तं नियमनियोगस्यानुष्ठानम् । तदेवं स्वयमङ्ग-त्वाल्लब्धानुष्ठानेषु प्रयाजादिषु नाधिकारकल्पनावकाशः । ते-नैव प्रकारेण प्रधानविषयेषु व्युत्पत्तिनियोगेषु करणावान्तरा-भावो वेदितव्यः । यो हि तमवान्तरव्यापारं नाभ्युपगच्छति तस्य कारणभेदो न स्यात् । दर्शपूर्णमासादिषु तथाग्नेयादि-धर्मा उपांशुयाजादिषु भवेयुः । परमापूर्वप्रयुक्तत्वात्तत्प्रतिस-न्धानभावाविशेषात् । अवान्तरव्यापारभेदे तु युक्ता व्यव-

स्था । अन्यथा आग्नेयस्य करणता । अन्यथा उपांशुयाजादीनामिति । बृहद्रथन्तरयोः स्तुतिसाधनयोरपि अन्यथा साधनतेति धर्मव्यवस्था । तथा पार्वणहोमयोरपि । अत एव विकृतिषु बाधः । नहि यथाग्नेयस्या ऽपूर्वसाधनता । तथा सौर्यस्येति प्रकृतद्वाराभावेन पार्वणहोमयोर्बाधः । ये च मन्त्रवान्तरापूर्वाणि न साधनरूपाणि आचक्षते । न तेषामवान्तरव्यापारतेति प्राचीनसकलदोषप्रसङ्गः । कार्योत्पत्तिनिमित्ताभावेन हि अवान्तरव्यापारता । अन्यथा आश्रमादेरपि कृषिसमुत्पाद्यविलेखनवन्नवसस्याधिगमे ऽवान्तव्यापारतापत्तेः । नन्वेवमधिकारशून्यत्वे दीक्षणीयादिष्वतिदेशो न स्यात् । उच्यते । निरधिकाराणामपि कार्यत्वाविशेषादनिर्ज्ञातोपायत्वाच्च युक्तैव कथमित्याकाङ्क्षा । नन्वेवमङ्गीकृतमवान्तरप्रकरणम् । कर्तव्यस्य कथमित्याकाङ्क्षाप्रकरणमिति मीमांसकप्रसिद्धिः । नावान्तरप्रकरणं नाम प्रमाणमस्ति प्रमेयाभावे प्रमाणत्वानुपपत्तेः । यावदेव तान्यवान्तरापूर्वाणि नावगम्यन्ते तावदेव सर्वस्यारादुपकारकस्य पदार्थजातस्याविशेषेण प्रधानविधिपरिगृहीतत्वात् । पश्चात्तु सर्वेषामधिकारानुप्रवेशाविशेषान्नान्योन्यं तादर्थ्यमस्तीति नावातरप्रकरणविनियोज्यसम्भवः । यानि तु वाक्यादिभिस्तेष्ववान्तरापूर्वाणि निवेशितानि तत्र प्रतिष्ठितानि न परमापूर्वं संक्रमिष्यन्ति । नन्वेवं प्रयाजादिषु सौमिकविध्यतप्रसङ्गः । नायं दोषः । यदि निरधिकाराणामपि साधिकाराणामिव स्वारसिकाकाङ्क्षा भवेत् । भवेदेवम् । अननुष्ठेयत्वान्न स्वाभाविकीतिकर्तव्यताकाङ्क्षा । कथं पुनरकार्यताऽननुष्ठेयताच । नूनं भवान् अश्रुतपूर्वः सप्रमादः विविक्तं हि तत्रेदं गुरुणा । यदेव हि पुरुषेण ममेदं कार्यमिति

निरपेक्षमेवावगम्यते तदनुष्ठेयम् । यत्तु तत्सिद्ध्यर्थं प्रागसिद्धं सद्विनियुज्यते तत्कार्यम् । परमापूर्वं च निरपेक्षं कार्यमवगम्यते । कार्यावगमाद्धि फलावगतिः । न फलावगतेः कार्यतेति षष्ठाद्ये क्षुण्णम् । अतः सिद्धो ऽनुष्ठेयकार्यविवेकः । यदेव चानुष्ठेयं तत्रैव कथमित्याकाङ्क्षा न कार्यमात्रे । अतर्हीनस्तर्हि प्रयाजादीनामेव दीक्षणीयादिषु आकाङ्क्षापह्नवेनातिदेशः । न सम्यगवगतं मतमस्माकं भवता । अयं हि नो राद्धान्तः । स्वारसिकीतिकर्तव्यताकाङ्क्षानिरधिकाराणां नास्ति । कारणान्तरसमुत्था तु नापन्हूयते । तत्र दीक्षणीयादिषु प्रयाजादिदर्शनेनेति कर्तव्यताकाङ्क्षा कल्प्यते । स्वरसतो ऽप्याकाङ्क्षाशून्यस्य कारणान्तरोपनिपातनिबन्धनाकाङ्क्षा । यथा पटो भवतीति निराकाङ्क्षस्यापि पदद्वयस्य रक्तपटोच्चारणाद्रक्तं प्रत्याकाङ्क्षा अन्यथा रक्तः पटो भवतीत्यनन्वयप्रसङ्गः । एवं प्रयाजादिषु न किंचिदाकाङ्क्षोत्थापने कारणान्तरमस्तीति न सौमिकधर्मातिदेशः सिद्धश्च दीक्षणीयादिष्वैष्टिकविध्यन्तलाभः । ये त्वधिकृताधिकाराभ्युपगमेन साधिकारतामङ्गनियोगानामाहुः । तेषां प्रयाजादिषु रात्रिसत्रन्यायेनार्थवादिकफलकाम एवाधिकारी प्राप्नोति इति नाधिकृताधिकारसम्भवः । स्यान्मतमितिकर्तव्यताकाङ्क्षा प्रधानविधेर्न परिपूर्यतइति । मा परिपूरि प्रयोजनं तु परिपूर्णम् । न प्रमाणम् । अर्थवादपदानि प्रमाणांशोपनिपातीनि तेषां परोक्षात्प्रत्तिर्माभूदिति तत्प्रतिपाद्यफलकाम एवाधिकारी युक्तः । साधिकारविधिसंनिधिमात्रेण तु निरधिकाराणां प्रतीतेतादर्थ्येऽधिकाराकाङ्क्षा नास्तीत्यर्थवादपदानि अर्थवादमात्रपर्यवसायीन्येव । तथा पयोव्रतं ब्राह्मणस्येत्यादिषु भोजनाय प्रवृत्तस्य द्रव्यार्जन-

नियमवत्स्वर्गकाम्यपदवाधिकारिणो लब्धत्वान्न प्रधानप्रवृत्तस्या-
धिकारकल्पना शक्यते कल्पयितुम् । अथ स्वातन्त्र्यं पयोव्रता-
दीनामापद्यते । तथा नानृतं वदेदिति । प्रकरणाधीते ऽपि ।
निषिध्यमानक्रियाकर्तुरधिकारावगमान्न प्रकरणानुप्रवेशसम्भ-
वः । तथा भिन्ने जुहोतीति निमित्तस्याधिकारिविशेषणत्वाद्वि-
ना निमित्तकल्पनादधिकारिविशेषणलाभान्न होमस्य दर्शपू-
र्णमासाङ्गत्वलाभः । न वेदमिह साधनम् । भिन्नशब्दस्य यौगिक-
त्वात्प्रकृतिगामित्वे सति निमित्तवतो ऽप्यधिकारे ऽधिकृतस्या-
धिकार इति । प्रकरणे भिन्नस्य । विनियोगाद्धि प्रकरण-
संनिहितं यत्तत्र विनियुक्तम् । नच भिन्नस्य विनियोगो ऽस्ति ।
अपि चाधिकाराकाङ्क्षायामधिकारे कल्पयितुमुपक्रान्ते किमि-
त्यर्थेन संनिधानेनाधिकारः कल्प्यते वरं भवत्वनुषङ्गः साक्षा-
च्छ्रुतस्याधिकारपदस्य प्रधानवाक्ये तु श्रुते ऽधिकारपदे प्रधानेन
सहसंबन्धे सति सन्निहितानामश्रुताधिकाराणां साधिकारैद-
मर्थ्येनान्वितानामधिकाराकाङ्क्षैव नास्तीति अनुषङ्गनिराकरणे
मूलयुक्तिः । अभ्युच्चयमात्रं तु वरमनुषङ्गः । इतिकर्तव्यता-
काङ्क्षापरिपूरणमेवेति । अपि च प्रत्येकं समिधो यजतीत्यादिषु
प्रधानाधिकृतस्याधिकारावगमात्प्रत्येकमेव समिदादीनां प्रधा-
नोपायभावात् प्रत्येकमितिकर्तव्यताभावः स्यात् । अवान्तर-
विधयो हि तदा स्वविषयाणामुपायभूतं प्रकल्पयन्ति । कर-
णावरुद्धे परमापूर्वे करणतासम्भवात्करणोपकारजनकतयैवो-
पायभावकल्पनम् । ततश्चानपेक्ष्योपायभावमाश्रित्यैकस्यैव क-
रणोपकारसंपादकत्वात् विकल्पः समिदादीनां स्यादधिका-
रिविधिना तु तावत्तादर्थ्यमात्रग्रहणे तस्य तदन्वितस्यान्यथा-
नुपपत्तेस्तादर्थ्यसिद्ध्यर्थं करणोपकारजनकता स्यात्तदा वि-

कल्पे सति नित्यवदन्वयो नोपसंह्रियेत। मिलितानां तज्जनकताश्रयणे सर्वेषां तदन्वयोपसंहार इति न प्रत्येकमितिकर्तव्यताभावः। उपायोपेयभावे तु तादर्थ्येनान्वये सति वैकल्पिकत्वादुपायभावस्य तथैवान्वयो ऽपीति युक्तम्। किं चाधिकृताधिकारेण सर्वेषु साधिकारेषु सत्सु प्रयाजादेरितिकर्तव्यताकाङ्क्षा स्वारसिकीति सौमिकधर्मातिदेशस्तेषु स्यात्। नच वाच्यं सत्यामप्याकाङ्क्षायामितरेतराश्रयतया न तेषु सौमिकधर्मातिदेशः सोमो हि दीक्षणीयाभिरङ्गवान् दीक्षणीयादीन्यैष्टिकधर्मग्राहीणि, यदि चेष्टावपि प्रयाजादिषु सौमिकधर्माः प्रवर्त्तेरन्। तदा स्फुटतरमितरेतराश्रयत्वमिति। तदिदं बालजनजल्पितम्। सोमे हि विनाप्यैष्टिकधर्मप्राप्त्या दीक्षणीयादिमात्रनिबन्धन एवोपकारः तथेष्टावपि सौमिकधर्मनिरपेक्ष एवोपकारः। यदि परमतयोरङ्गनिबद्धयोरुपकारं गृह्णाति अत्र चोपकारक्लृप्तेरविशेषान्न कश्चिद्दोषः। निरधिकारेष्वङ्गेषु न स्वारसिकीतिकर्तव्यताकाङ्क्षा। किंतु लिङ्गबलोत्थापनीयेति दर्शितमादौ। तेन लिङ्गरहितेषु नाकाङ्क्षोदय इति न प्रयाजादिषु सौमिकधर्मातिदेशः। केचिदाहुः यदि संनिधिसमाम्नानमात्रेण प्रकृताधिकारानुप्रवेशो न भवति तदा ज्योतिष्टोमप्रकरणे समाम्नातस्य षोडशिन उत्तरे ऽहनि त्रिरात्रस्य गृह्यतइति वैकृतत्वमेव स्यात्। तदसत्। ग्रहणस्याबाध्यतया ग्राह्यमपेक्षणीयम्। तत्र प्रकृततया लोकतश्च स एव ग्राह्यत्वेनान्वयं याति स च ज्योतिष्टोमाधिकारसंबद्ध इति। तदनुप्रवेशः पश्चात्तु तस्य वाक्येन पुनर्द्विरात्रसंबन्ध इति नानुपपन्नं किं चित्। तदेवमारादुपकारकेषु प्रथमं तादर्थ्येनाधिकारनियोगं प्रत्यन्वितेषु साधिकारेण विधिनानुष्ठेयभूतेन करणोपकारे क्लृप्ते तं प्रति-

नाधिकारनियोगेन जनकत्वकल्पनम् । नच क्षणिकभावे तेषां परस्परं स्वरूपेणासंभवतां संभूयोपकारजनकतामापद्यते इति अवान्तरापूर्वाणि स्वीक्रियन्ते । एवमाश्रयिषु विनाप्यपूर्वेण द्रव्यदेवतासंस्कारमुखेन करणोपकारजनकसिद्धिरिति नापूर्वसमाश्रयणे किं च न प्रमाणं किं च इङ्ग्मालायां न तत्र दृष्टम् । दर्शितं हि तत्रैवं चतुर्था तुर्येन साक्षाद्द्रव्यदेवतोपकारो यागः किं तु स्वाङ्गभूतमन्त्राद्यंशमुखेन । न च यागे ऽधिकारानुप्रविष्टे तयोस्तत्र विनियोगोपपत्तिः । न चापूर्वमन्तरेण यागस्याधिकारानुप्रवेश इति अवश्याश्रयणीयमवान्तरापूर्वम् । तेषां चादृष्टतया न प्रयोजनत्वम् । दृष्टतया च द्रव्यदेवतासंस्कार एव प्रयोजकः । तत्रापि द्रव्यदेवतासंस्कारयोर्द्रव्यप्रतिपत्तिरेव प्रयोजिका यागे द्रव्यस्य साक्षाद्व्यापाराविति मन्तव्यम् । द्रव्यस्य तु न श्रुतिविनियोगः । न क्वचिद्द्रव्यस्य द्वारं श्रुतिः समर्पयति । नन्वप्राकरणिको ऽपि द्रव्यस्य विनियोगः साक्षात्करणोपकारजनकत्वाभावात्तस्य लिङ्गेन समाख्यया स्थानेन भावार्थ एव जनकतया संबन्धः । गुणदेवतयोस्तु वाक्ये न विनियोगः । नानाव्यापारत्वात्कारणानाम् । अङ्गसाधनतद्द्रव्योपादाने तदवच्छेदकयाऽस्यैव तयोरुपयोग इति न कारकतया विनियोगो विरुद्ध्यते । यातु सङ्ख्या उत्पन्नकर्मसमवायीया एकादश प्रयाजान्यजतीति उत्पन्नानां कर्मणां विधानामंप्रवात्कर्माश्रिता विधीयते । यद्यपि चोद्देश्यगतं विशेषणं वाक्यभेदभयेन विवक्षां नार्हतीति । प्रयाजादीनां साहित्यं न विवक्षितम् । तथापि तस्य पृथक्कानिवेशितत्वान्न प्रत्येकमभिसंबन्धः । किं तु समुदायेनैव । नचाभ्यासं विना तस्य प्रतिपत्तिरित्यर्थादभ्यासाश्रयणम् । प्राकृतक्रमानुग्रहाल्लब्धा-

धिकारविधौ च परिपूरणम् । यः पुनरुत्पद्यमानकर्मसमवेतः
नासौ विधेयः स हि विधीयमानानि कर्माण्यवच्छिनत्ति ।
नच तथा विधेयत्वसंभवः । बहुषु विहितेषु समप्रयोगेण परिल-
भ्यते एवेति न पृथग्विधेयत्वमवलम्बते अविधेयभूतावपि तौ
भावार्थावभिन्दन्न विधावुपकरोतीति स नान्वयी । यस्तु भि-
न्नप्रातिपदिकाभिधेयः सोऽरुणिमादिवन्न कर्मणि कारकतया
विधीयते । यः पुनरयं विभक्त्यभिधेयः । तस्य यद्यपि शक्त्या
प्रातिपदिकार्थसंबन्धः । तथापि तस्य तन्मात्रसंबन्धे प्रकरण-
समाम्नानायादितो ग्रहसंबन्धो नोपपद्यतइति ग्राहकीयावस्था-
संबन्धितैवौपादानिकीति निर्णीयते विनियुक्तस्य पश्वादेरुपा-
दानमनवच्छिन्नस्य न संभवतीत्यस्ति तदवच्छेदकभूतसङ्ख्या-
पेक्षा सङ्ख्यायाश्च प्रतीतग्राहकान्वयनिर्वाहायाश्रयापेक्षेति तद्-
वस्थासंनिधिताविधिः कल्पयति । उपादानलक्षणो विधिव्या-
पार आक्षेपापरपर्यायो मीमांसकैः प्रतिपन्नः । उत्पत्त्यधिका-
रनियोगप्रयोगविषयः प्रतिज्ञायते । तस्य च यथा प्रतीतविध्य-
नुपपत्तिरेव बीजम् । सौर्यञ्चरुं निर्वपेदित्यादौ साधिकारो वि-
धिः प्रसङ्गत उत्पत्तिं विनानुपपद्यमानः उत्पत्तिमाक्षिपति । नहि-
क्षणिकं यागमात्रमुत्पत्तिनियोगानपेक्षमधिकारसिद्धिसमर्थमिति
बहुधोक्तं विश्वजिदादिष्वधिकारमन्तरेणानुष्ठानासंभवात्कार्यरू-
पस्य विधेरवगतस्यानुपपत्तिरधिकारकल्पनाबीजम् । सङ्ख्या-
न्वितश्च विध्यर्थः प्रतीतः तदन्वयोपपत्तये ग्राहकीयदशासंब-
न्धितामापादयति । निमित्तएवेति योऽधिकारे साध्यभूतो वि-
धिरनुष्ठानापरनामालङ्करणस्य प्रयोजनमाक्षिपति । कामाधि-
कारे तु कामसिद्धिस्तदायत्तत्वान्मानसीप्रवृत्तिः प्रागेव प्राप्ता-
नुष्ठानप्रवृत्तावप्यप्रतिहता निमित्ततास्तीति विधिरप्रयो-

जकः । उभयत्राङ्गेषु क्रतुरेव प्रयोजकः । क्रतूपकारद्वारत्वात्तेषाम् । यदेव हि यस्य कार्यं तदेव तस्य प्रयोजकम् । क्रतूपकारश्चाङ्गानां कार्यमेतदेवानुष्ठाननिमित्तं यच्च विधिना स्वसिद्ध्यर्थमाक्षिप्यते तद्विधेयमिति तत्त्वज्ञाः । नन्वेवं विश्वजिदादावधिकारो ऽप्याक्षिप्ततया विधेय एव स्यात् । उच्यते । नाधिकारस्य नियोगसिद्धौ व्यापारः । किं तु कर्तृत्वस्य यत्प्रतिपत्त्यर्थश्चाधिकारापेक्षः इति एवं च विधिना स्वसिद्ध्यर्थमनाक्षिप्यमाणत्वान्न क्रमो विधेय इति मीमांसकानामुद्गारः । क्रमस्य पाञ्चमिकस्य न किं चिदभिधानमस्ति न चानभिहितस्य तस्य वैनियोगिकमौपादानिकं वा शेषत्वं घटते । न वा शेषभूतस्य विधिराक्षेपाय प्रभवति । यस्तु वषट्कर्तुः प्रथमभक्ष इति प्रथमशब्दाभिधेयः क्रमः स हि विनियोज्यो विधेयश्चेतिनिबन्धनकारः । अत एवासौ न नीलीयेतेति ततः पञ्चमे हि यस्तावच्छ्रौतक्रमः अध्वर्युर्गृहपतिं दीक्षयित्वेत्यादौ न तस्य किं चिदभिधानमस्ति । कथं तर्हि प्रतीयते । क्त्वाप्रत्ययो ऽपि हि समानकर्तृकेऽर्थे वर्तमानाद्धातोर्विधीयमानो ऽपि य एव प्रथमं प्रयुज्यते तत एव विधीयते तत्र क्त्वाप्रत्ययश्रवणात् । अथ वा प्रयोज्यत्वे स्थिते ऽर्थवित्तिरपि तथैव । यथा प्रयोगवाचित्वादर्थावगते यथावगति चानुष्ठानमिति क्रमो ऽपि तथाविध एवावगम्यते । अर्थादिष्वभिधानशङ्कारूपवदेव । अनभिधीयमानस्याप्यवगत्युपायभावस्तत्र तत्र प्रमाणं चिन्तित एव । यदि विध्यर्थं प्रति शेषत्वं क्रमस्य नास्ति । कथं तर्हि चोदनालक्षणत्वम् । न विधेयता चोदनालक्षणत्वे हेतुः । अधिकारस्य तदभावप्रसङ्गात् । अविध्यर्थस्तदन्वितः प्रतिपाद्येत इति चोदनालक्षणम् । तर्हि क्रमान्वितो ऽपि प्रयोगविधिरव-

सीयते इति तस्यापि चोदनालक्षणत्वमविरुद्धम्। क्रमविशेषपरिगृहीतप्रयोगावच्छिन्नो हि प्रयोगविधिः प्रतीयते। अत एवानङ्गत्वोपक्रमनियमस्य तदादरः। तदभावे प्रयोगानुपपत्तेः प्रयोगविधेश्च विशिष्टप्रयोगसाध्यत्वात्। तदेवं द्विविधर्मौपदेशिकत्वं वैनियोगिकमौपादानिकञ्च। तत्र न यथाधिकारं विनियुज्यते। अपि तु यथाविनियोगमधिकारः सामान्यतोऽप्यधिकाराश्रयणेन विनियोगसिद्धेः। यस्यापि प्रतिप्रकरणं व्यवस्थासिद्धये ग्राहकपूर्वको विनियोगः। यद्यपि च साधिकारस्यैव ग्राहकत्वम्। तथापि सामान्यतः स्वर्गकामावावधिकारिणि लब्धे साधिकारत्वे संपन्ने ग्राहकग्रहणे निवृत्ते नियुक्तेष्वङ्गेषु तदवच्छिन्ने विध्यर्थे कार्यात्मनि तदनुष्ठानसमर्थस्य स्वर्गकामिनोऽधिकार इति पश्चादधिकारिविशेषनियमः। अत एवान्धबधिरपङ्ग्वादीनामवेक्षणश्रवणातिक्रमणाद्यङ्गवति पञ्चार्षेयाणामार्षेयवरणलक्षणाङ्गभाजि आहवनीयादियोगिनि चानाहिताग्नीनामनधिकारः। तेषां तथाविधविध्यर्थसंपादने स्वाभाविकशक्त्ययोगादिति स्वयमूहनीयम्। येषां च न स्वाभाविकीशक्तिरपेता। तेषामधिकारो भवत्येव। अद्रव्याणामसमाधेयव्याधिविशेषपरवशेन्द्रियाणां च। ननु तेषामधिकारो न निर्वहत्येवापूर्वसिद्धिनिबन्धनत्वात्तस्य। तस्याः सकलाङ्गग्रामायत्तत्वात्। सत्यम्। कामाधिकारो न भवत्येव। तस्य सेतिकर्तव्यताकफलभावनाकरणविषयत्वात्फलकामस्य हि फलभावनां प्रति एककरणीभूते ऽधिकारो नावकल्पेत सर्वं च करणं सेतिकर्तव्यताकं करणतामनुभवतीति संमतम्। ततः साङ्गाननुष्ठाने सेतिकर्तव्यताकत्वम्। व्याघाताद्विषयाभावाद्विषयिणोऽप्यनुपपत्तेरधिकारविलय एव कामिनाम्।

निमित्ततश्च केवलभावार्थविषय एवाधिकार इत्यङ्गानुपसंहारेऽपि विषयप्रमोषान्नाधिकारावगमः । अनपेतश्चाधिकारो यावदुपसंहरणीयाङ्गसंपाद्यतामेव तदानीमवगमयति । औत्सर्गिकी तु सकलाङ्गायत्तसिद्धि-सिद्धैव । अनेनैवाधिकारेण निमित्ताधिकारे गौणो मुख्यश्च शास्त्रार्थ इति प्राभाकराणामुल्लापः । अस्ति च किंचिदङ्गं निमित्तायत्तविधानम् । तत्सत्येव । निमित्तेऽङ्गं यथा भिन्ने जुहोतीति तत्र चैष शास्त्रार्थः । सति भेदने भेदनहोमसहितोऽङ्गकलापः करणोपकारं कुर्वन्कार्यमारूढ इति । तदल्पत्वे तु एकल एवेति । यावच्च भेदादिकमावर्तते तावती होमस्यावृत्तिः । एष तावदौपदेशिकोऽङ्गकलापः कार्यनिबन्धनं केचिदन्ये मीमांसका मन्यन्ते । उपदेशो हि प्रतिप्रकरणमङ्गानां व्यवस्थित एव । अपूर्वग्रहणपूर्वकत्वाद्विनियोगस्य । यदि हि दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यनेन साधिकारं यागमुद्दिश्य समिधो यजतीति समिदादिविधिः स्यात् । तदानीमेवमुद्दिश्य विधानाद्यावद्यागमेव समिदादिविधिरिति यजिपत्सु सर्वापूर्वेषु समिदादिविधानादुपदेशो न व्यवतिष्ठेत । नहि तदा स्वर्गकामपदं दर्शपूर्णमासपदं च विशेषणायातम् । उद्दिश्यमानविशेषणविशेषणविवक्षायां वाक्यभेदापत्तेः । संनिधानमात्रेण त्वन्विताभिधानसिद्धेर्दर्शपूर्णमासाभ्यामित्यधिकारवाक्यत्वे सति समिदादीनां तदनुप्रवेशाद्विनियुक्तविषयतया व्यनुष्ठानसंपत्तेर्दर्शपूर्णमासाभ्यामित्यधिकारद्वारपरिकल्पनम् । तत्र चोपादानलक्षणेन विधिव्यापारेणाङ्गानां समुदितानामुपकारकत्वपरिकल्पनमिति प्रतिप्रकरणमङ्गव्यवस्था । क्व पुनः केषां कार्यनिबन्धनमङ्गत्वम् । प्राकृतानां वैकृतापूर्वेषु तदीयकरणे च यथायथमतिदेशमाचक्षते । प्राकृतानां प्राकृतस्थान-

प्रतीते ऽर्थान्तरसमूहमभिदधाति द्विविधशाब्दमुपदेशकं कार्यकं च। तत्र वैकृतापूर्वस्य साध्यभूतस्य सेतिकर्तव्यता ऽऽकाङ्क्षस्य विषयीभूते भावार्थे करणे लब्धे या परेतिकर्तव्यताकाङ्क्षा तस्यां च न प्रकृतिवदुपकारान्तरकल्पनोपपद्यते। क्लृप्तेत्युपकारान्तरे तज्जनकद्विविधपदार्थाकाङ्क्षा पश्चात्तनी सा प्रकरणानधीतपदार्थवर्गसम्बन्धेन न परिपूर्यते। प्राकृते तूपकारे स्वीकृते तत्तन्मुखेन द्विविधप्राकृतपदार्थोपस्थापनादाकाङ्क्षा परिपूर्यते इति प्राकृतमेवोपकारं स्वीकरोति। कः पुनर्हेतुः स्वीकरणे नानुमानम्। अव्यभिचरितलिङ्गसम्बन्धाभावाच्चोपपन्नम् तस्य सादृश्यमात्रविषयत्वात्सिद्धविषयावगाहिनोश्चानयोः कार्यप्रमाणानवतारात्। उच्यते। य एवासौ विनियोगाभिधायी लिङादिशब्दः स एव प्राकृतो प्रकारान्वितं स्वार्थमभिदधाति। प्रकृतावपि विध्यर्थपरिकल्पितोपकारिणान्वितं स्वार्थं लिङादिरेव वक्ति। अन्विताभिधाने चाकाङ्क्षायोग्यतासंनिधिश्च कारणम्। इह च प्राकृतस्योपकारस्यैवैवाकाङ्क्षायोग्यता च तावदविवादा। संनिधानं तु बुद्धेन प्राकृतनैवापूर्वेण लिङ्गविशेषेण प्राकृतमपूर्वं बुद्धौ संनिधीयते तच्च स्वोपकारं संनिधापयति। अत एवोपकारसम्बन्ध औपदेशिक इति तत्त्वविदः। यो हि ग्रन्थेन विध्यर्थेनैवोपस्थापितस्तस्मिन्नन्वयमेति स औपदेशिकः। प्रकृताविवोपकारः यथा विश्वजिदादावधिकारी। तदेवमुपकारसम्बन्धमुपेतः केन पदार्थवर्गेण जन्यत इति पश्चात्तस्यैव वैकृतस्यापूर्वस्याकाङ्क्षा भवति। ननु प्रकृतावात्मोपकारो निर्ज्ञातजनकभुतपदार्थवर्ग इति नाकाङ्क्षोदये कारणमस्ति। अत एव पदार्थानामतिदेशो नेति मन्यते। यदि पदार्थेष्वपि पश्चाद्भाविन्याकाङ्क्षा तदा तद्धेतुके

प्राकृतानां वैकृतापूर्वसम्बन्धे सति । को नामोपकारस्यैव पदार्थानामतिदेशं वारयेत् । अन्यत उत्थस्य ह्यन्येन सम्बन्धोऽतिदेश इत्यतिदेशविदः । अत्र ब्रूमः । यदि करणोपकारप्रयुक्ताः प्रकृतौ पदार्थाः स्युः । तदा निर्ज्ञातेषु जनकेषु पदार्थाकाङ्क्षा नावतरेत् । अपूर्वप्रयुक्तास्तु धर्मा इति मीमांसकाः । तथा सति यदपूर्वप्रयुक्तास्ते धर्मास्तत्संबन्ध एवोपकारे तेषां जनकता कल्पिता नान्यसंबन्धे । अतो वैकृतापूर्वसंबन्धस्यानिर्ज्ञातोपायस्योपेयाकाङ्क्षा नानुपपन्ना । येषां न प्रकृतिसाधनभावेन पदार्थानामनुष्ठानमेव केवलम् । तेषामौपदेशिकत्वादुपकारसाधनभावस्योहबाधौ न स्याताम् । आकाङ्क्षानिबन्धनेन प्रकृत्यपूर्वसंबन्धे यथोहबाधौ सिद्ध्यतः तथा तत्रैव वक्ष्यामः । एवं च सत्यां पदार्थाकाङ्क्षायां पश्चादुपकारेण ये प्राकृताः पदार्थां बुद्धिविषयतामापद्यन्ते ते ऽन्वयमासादयन्ति केन पुनः संबन्धेनोपकारस्तानुपस्थापयति । उच्यते । प्रकृतौ तेषां पदार्थानां तस्य चोपकारस्य जन्यजनकभावः प्रतीत इति तथापूर्वप्रतीत्या स्मृतिस्तेषु जायते । तेषु स्मृतिसंनिहितेषु लब्धान्वयेषु यथा प्रकरणाधीतेषु पश्चादुपकारसाधनत्वं मिलितानां साधनत्वं कल्प्यते । तदाहुः । वैकृतं पदार्थवर्गं प्राकृतमुपकाराद्यौकितम् । तथाविरुपकारे साधनमेकीकृत्य कल्पयति उपकारलक्षणाकार्योपस्थापितप्राकृतपदार्थान्वयजातं च विकृत्यपूर्वकार्यकं शाब्दमुच्यते । न च पदार्थानामपूर्वान्तरसंबन्धो ऽनुपपन्नः । अन्यदीपस्यान्यसंबन्धाभावादिति । तद्भावेनोपकारे ऽन्विते तज्जनकाकाङ्क्षायां कार्यतोऽन्वयावगमात् । अर्थश्चायमतिक्षुण्णऋजुविमलादिषु । तत्र प्राकृतानां संस्काराणां प्राकृतद्रव्यस्थानपतितपदार्थसम्बन्धनिश्चय ऊहापरनामापि कार्यरूपवशात् ।

प्रकृतौ यत्कार्यं प्रतीतमवघातादीनां तदेवेदमिति निश्चये सति यदपूर्वा ह्यवघातादयस्तदीयतण्डुलोत्पत्तिप्रकृतिद्रव्यमवघातादिभिः संस्कार्यमिति प्रकृतौ शास्त्रार्थः । विकृतावपि तादृशा एव नीवारादयः इति धर्मोहस्तेषु । एवं कृष्णलादिष्ववघातादिषूहितेषु द्वारभूतकार्याभावे च यो बाधनिश्चयः । सो ऽपि कार्यक एव तदेवं तद्विना बाधिताभ्युचितपदार्थजन्यप्राकृत उपकारो विकृताविति स्थितम् । तेषां चौपदेशिकानां कार्यसंबद्धानामनेकप्रधानसंबन्धे प्रयोगविशेषे तन्त्रमनुष्ठानम् । तथा देशकालकर्तॄणां प्रयोगानुबन्धभूतानां भेदो नावसीयते कार्यस्य वा । भिद्यमाने तु कार्ये कार्यार्थमनुष्ठानमावर्ततएव देशादिभेदे ऽपि प्रयोगभेदावगमात्, आवृत्तिरेवानुष्ठानस्य । यस्य च परार्थमनुष्ठितस्यापि कार्यं तन्त्रमिवावगम्यते । तस्यान्यत्राप्युपकारकत्वमेवेति सकृदनुष्ठानमिति ।

नानामितविषयाणां विधिसिद्धौ निमज्जताङ्गानाम् ।
प्रविततगम्भीराणां पारायणमेतदाचरितम् ॥

इति प्रकरणपञ्चिकायामङ्गपारायणं समाप्तम् ।

प्रकरणपञ्चिकायाम् ।

अतिदेशपारायणं नाम प्रकरणम् ।

विकृतौ ये पदार्थानामतिदेशं न मन्वते ।
करणस्योपदेशं च तेषामुत्तरमुच्यते ॥ १ ॥
प्राकृतेनोपकारेण पदार्थैश्चैव वैकृतः ।
प्रयोगविधिना स्वेन विधिरन्वित उच्यते ॥ २ ॥
पदवदाकाङ्क्षितं योग्यं संनिधानं प्रपद्यते ।
तेनान्विता हि विध्यर्थः स्वशब्देनैव भण्यते ॥ ३ ॥
साध्यभूतश्च विध्यर्थ उपकारमपेक्षते ।
तिवादिभिः प्राकृतश्च स योग्यः संनिधाप्यते ॥ ४ ॥
अन्यथा ऽनवगम्यत्वादाद्यऽप्यङ्गपुरःसरः ।
उपकारः प्राकृतो ऽसौ विकृतौ संनिधाप्यते ॥ ५ ॥
तथा ऽप्यपेक्षितत्वेन प्रकारं प्रथमं विधिः ।
स्वीकरोति पदार्थास्तु प्रतीतानप्यपेक्षते ॥ ६ ॥
पश्चात्तु तैरपि पुनरुपकारप्रसिद्धये ।
अपेक्षितैस्तद्वशेन प्राप्तैरन्वयमृच्छति ॥ ७ ॥
गुणप्रधानभावेन सर्वत्रैवान्वयो मतः ।
प्रधानं च विधिर्धर्मा गुणास्तं प्रति संमताः ॥ ८ ॥
अन्वितस्याभिधानं च न शब्दोपस्थितैः परम् ।
दर्शनात्पितृयज्ञादौ कल्प्येनाप्यधिकारिणा ॥ ९ ॥
संबन्धिना न सर्वेण सहसैवान्विताभिधा ।

संबन्धिनां संनिधानक्रमेण तु यथायथम् ॥ १० ॥
प्रकृतौ तु स्वशब्दत्वात्पदार्थानां पुरोन्वयः ।
उपकारस्य कल्प्यस्य पश्चादिति परं भिदा ॥ ११ ॥
व्युत्क्रमेणोपकारेण पदार्थैश्चैव वैकृतः ।
प्राकृतैर्विधिरन्वेति सो ऽतिदेशश्च सम्मतः ॥ १२ ॥
यस्य देशे विधिर्यस्मिस्ततो ऽन्यत्रापि तद्गतिः ।
अतिदेशः प्रकारस्य धर्माणां चैव युज्यते ॥ १३ ॥
अन्यत्रसो यथा ऽन्यत्र प्रकारो ऽन्वयमृच्छति ।
तथा धर्मा अपीष्यन्ते तेषामप्यतिदेश्यता ॥ १४ ॥
नन्वेवं बशमाद्येन विरोधस्तु प्रसज्यते ।
नैवं कार्यानपेक्षो ऽसावतिदेशो निवारितः ॥ १५ ॥
तद्द्वारेण संबन्धो धर्माणामेव चेद्भवेत् ।
अनपेक्ष्यप्रकारत्वात्तदा बोधो न सिध्यति ॥ १६ ॥
प्रकृतौ हि पदार्थानां सम्बन्धे ऽवगते यथा ।
द्वारं दृष्टमदृष्टं वा सम्बन्धार्थं प्रकल्प्यते ॥ १७ ॥
कार्यानपेक्ष्यसम्बन्धे तथैवावगते सति ।
द्वारं दृष्टमदृष्टं वा कल्प्यं स्याद्विकृतावपि ॥ १८ ॥
ततो न घटते बाधः कार्यलोपनिबन्धनः ।
दृष्टाभावे ऽप्यदृष्टस्य द्वारस्य खलु सम्भवात् ॥ १९ ॥
कार्यापेक्षा यदा धर्मा विकृतौ यान्ति सङ्गतिम् ।
तदा कार्यविलोपेन तेषां बाधः प्रसिद्ध्यति ॥ २० ॥
प्राप्नुवन्तो हि कार्येण धर्मा द्वारसमन्विताः ।
प्राप्नुवन्तीति न द्वारकल्पनावसरस्तदा ॥ २१ ॥
क्लृप्तद्वारावलोपेन तेषां बाधः प्रमाणवान् ।
अतिदेशेन धर्माणां प्राप्तानामपि सिद्ध्यति ॥ २२ ॥

कार्यानपेक्षसम्बन्धो धर्माणामुच्यते यदि ।
दशमाद्यविरोधः स्यात्तदानीं न च तत्तथा ॥ २३ ॥
तद्भावेन न किं धर्माः प्रकारो वापि गृह्यते ।
इत्येषा दशमाद्ये हि चिन्ता बाधप्रसिद्धये ॥ २४ ॥
पूर्वपक्षी च तत्राह पदार्थानां परिग्रहम् ।
नोपकारे हि धर्मेभ्यो विना शक्यं निरूपणम् ॥ २५ ॥
यद्यप्याकाङ्क्षति विधिः प्रकारं प्रथमं स्वयम् ।
तथापि तस्य प्रकृतावपि नैव स्वरूपतः ॥ २६ ॥
परिज्ञानं किं तु यथाश्रुतैर्धर्मैस्तथैव हि ।
तस्मात्पदार्थपूर्वैव सदा तस्या निरूपणा ॥ २७ ॥
अतः पूर्वप्रतीतत्वात्पदार्थैरेव वैकृतः ।
विधिः सम्बन्धमाप्नोति तान्गृहीत्वा तु स स्वयम् ॥ २८ ॥
उपकारं प्रकृतिवत्कल्पयत्यात्मसिद्धये ।
अतश्च प्राकृते द्वारे लुप्ते बाधं तु नार्हति ॥ २९ ॥
राद्धान्ती तु वदत्येवं सत्यं धर्माः पुरः सराः ।
तथापि तेन गृह्यन्ते तदानीमनपेक्षणात् ॥ ३० ॥
प्रकारं हि पुनः साध्यरूपो विधिरुपेक्षते ।
न पदार्थानिति हि तान्प्रतीतेनाप्युपेक्षते ॥ ३१ ॥
प्रकारेणैव सम्बन्धे प्रथमं प्रतिपद्यते ।
प्रकारकल्पितैः पश्चात्पदार्थैरिति दर्शितम् ॥ ३२ ॥
धर्माणामन्यदीयानां कथमन्यत्र सङ्गमः ।
इति चेदुपकारे ऽपि तुल्यमेतद्यथोच्यते ॥ ३३ ॥
नोपकारस्य संबन्ध इति हास्यमिदं वचः ।
यद्यसौ नान्यदीयः स्यात्कथं तर्ह्यतिदिश्यते ॥ ३४ ॥
अन्यत्र ह्यन्यदीयस्य देशो ऽतिदेश उच्यते ।

तद्भावेन तस्मात्सौ विरोधश्चेन्न विद्यते ॥ ३५ ॥
तद्भावोपपत्त्यर्थं पदार्थेष्वपि तत्समम्।
प्रतिपत्तिविरोधो ऽयमन्यदीयान्यसङ्गमे ॥ ३६ ॥
मुखान्तरेण सम्बन्धे स च नास्ति कथञ्चन।
ये तु नेच्छन्ति धर्माणां सम्बन्धं वैकृतैः सह ॥ ३७ ॥
अपूर्वे प्राकृताङ्गानां ग्रन्थस्तेषां विरुद्ध्यते।
सप्तमाष्टमयोस्तेषां प्रकारप्राप्तिचिन्तनम् ॥ ३८ ॥
न युक्तं तत्र चिन्ता हि षट्के ऽस्मिन्कार्यबन्धना।
नियोगो ऽप्यथ कार्यं चेत्तदर्थमपि चिन्त्यते ॥ ३९ ॥
चतुर्थाध्यायचिन्तापि षट्के ऽस्मिन्नापतेत्तथा।
कार्यतो ह्युपदेशार्थाद्विध्यर्थाद्यत्प्रतीयते ॥ ४० ॥
यथा तस्योपदिष्टत्वं तथाध्यक्षेण वक्ष्यते।
तेन विध्यर्थमुत्सृज्य कार्यमन्यत्समाश्रितम् ॥ ४१ ॥
द्वारभूतमियं चिन्ता कार्यषट्के विधीयते।
अतिदेशः पदार्थानां तेन षट्के ऽत्र चिन्तितः ॥ ४२ ॥
तस्यैव हेतुभूतः स उपकारो ऽपि दर्शितः।
षड्भिर्दीक्षयतीत्यत्र प्राकृतानां च वैकृतः ॥ ४३ ॥
अङ्गभूतैरनङ्गानां बाधश्चैवं प्रसज्यते।
प्रधानबोधबाह्यत्वादुपकारप्रसिद्धये ॥ ४४ ॥
नैव प्रयुक्तिमात्रेण क्रियते प्राकृतं पुनः।
अतः कार्यातिदेशो ऽयं सम्मतस्त्वौपदेशिकः ॥ ४५ ॥
उपदेशप्रमेयेण विध्यर्थेनोपकल्पितः।
प्रकृतावुपकारस्य यदपूर्वेण कल्पना ॥ ४६ ॥
नियोज्यस्य च वृद्धानामुपदेशेन सम्मता।
उपदेशो हि नामात्र ग्रन्थसन्दर्भ उच्यते ॥ ४७ ॥

स च प्रमाणं विध्यर्थे कार्यरूपे ऽवधारितः ।
यो ऽर्थः प्रतीयते यस्मात्स परं नौपदेशिकः ॥ ४८ ॥
विध्यर्थः स्वप्रतीत्यर्थं यमाक्षिपति सो ऽपि च ।
अपर्यवस्यन्विध्यर्थो ऽयं प्रकल्पयितुं क्षमः ॥ ४९ ॥
औपदेशिकता युक्ता तस्याप्यक्षत्रोध्यता ।
उपकारविशेषं च विधिः कल्पयितुं क्षमः ॥ ५० ॥
न पदार्थविशेषं तु वैकृतः प्राकृतो यथा ।
उपकारविशेषस्य कल्पनायां क्षमो ऽपि यत् ॥ ५१ ॥
प्रकृतेरेव गृह्णाति लाघवं तत्र कारणम् ।
क्लृप्तकल्प्यविरोधे हि लघुः क्लृप्तपरिग्रहः ॥ ५२ ॥
स्ववाक्यानामलिङ्गैश्च क्लृप्तो ऽसौ संनिधाप्यते ।
पदार्थभेदप्राप्तिस्तु नोपकारं विना भवेत् ॥ ५३ ॥
तत्प्राप्तेः कार्यतस्तेषां प्रकारश्चोपदेशतः ।
विकृतौ कार्यतो धर्माः प्रकारश्चोपदेशतः ॥ ५४ ॥
उपदिष्टे ऽपि च वैतस्मिन्नतिदेशपदाभिधा ।
निवार्यते ऽस्ति तस्यार्थे देशो ऽन्यतत्वं निजाद्विधेः ॥ ५५ ॥
उपदिष्टातिदिष्टत्वं न ह्येकस्य विरुद्ध्यते ।
नोपदेशातिदेशौ हि प्रमाणे इति संमते ॥ ५६ ॥
उपदेशातिदेशौ हि प्रमाणे भवतो यदि ।
तदा विरोधो जायेत न चैवमिव संमतम् ॥ ५७ ॥
तेनोपदेशमेयत्वादुपदेशत्वमिष्यते ।
अन्यस्मिन्नन्यताभावादतिदेशो ऽपि युज्यते ॥ ५८ ॥
उपदेशः कार्यरूपप्रमाणद्वयसंश्रयौ ।
यद्वावुभौ नोपदेशमतिदेशं च संश्रितौ ॥ ५९ ॥
अतिदेशाश्रयत्वे हि बाधे तन्त्रेच भूयसी ।

उपदिष्टार्थविषया चिन्ता नैवोपपद्यते ॥ ६० ॥
द्वारकार्याश्रयत्वे तु सर्वासामुपपन्नता ।
चिन्तानामिति चिन्तेह युक्ता कार्यसमाश्रया ॥ ६१ ॥
नन्वेवमुपदिष्टत्वं पदार्थानां प्रसज्यते ।
कार्यवत्तैरपि यतो विध्यर्थोऽन्वित उच्यते ॥ ६२ ॥
उच्यते शाब्दतैवं स्यान्नोपदेशप्रमेयता ।
प्रमाणद्वयभेदोऽयमुपस्थाननिबन्धनः ॥ ६३ ॥
उपदेशोपस्थितो यो वाक्यार्थान्वयमृच्छति ।
स औपदेशिको ज्ञेयः स च द्वैधमुपस्थितः ॥ ६४ ॥
ग्रन्थेनोपस्थितश्चैव विध्यर्थोपस्थितस्तथा ।
यथोपकारः प्रकृतौ नियोज्यो वा श्रुतो यथा ॥ ६५ ॥
प्रकारोपस्थितो यश्च द्वेधा नासावुपस्थितः ।
तेनौपदेशिको नासौ केवलं कार्यबन्धनः ॥ ६६ ॥
पूर्वनिबन्धनिबन्धनमपनेतुं सम्यगीहमानेन ।
शालिकनाथेन कृतः कृतिनामानन्ददो यत्नः ॥ ६७ ॥

इति श्रीशालिकनाथमिश्रविरचितायां प्रकरणपञ्चिकायामतिदेशपारायणं नाम प्रकरणं संपूर्णम् ॥
समाप्ता च प्रकरणपञ्चिका ।

प्रकरणपञ्चिकापूर्तिः ।

मीमांसाजीवरक्षा नाम दशमं प्रकरणम् ॥१०॥

प्रभाकरगुरोर्भावं परिभाव्याभिधीयते ॥
मीमांसाजीवरक्षेयं क्षणिकत्वनिराक्रिया ॥ १ ॥

अत्र सुगतमतानुसारिणः क्षणभङ्गिनः सर्वानेव भावानभिदधाति। किं पुनस्तेषां तत्र प्रमाणम् । न तावत् प्रत्यक्षं क्षणिकतामीषितुं क्षमते । स्तम्भादिभावविषये निपुणतरनिरीक्षमाणस्य क्षणिकत्वाध्यवसायाभावात् ॥ स्यादेषा मनीषा— न क्षणिकता नाम भावस्वभावाऽबहिर्भाविनी तेन भावानुभावादेव प्रत्यक्षं क्षणिकतामपि साक्षात्करोतीति। तदिदं मनोरथमात्रं मन्यन्ते मतिमन्तः। तथा हि। संविसिद्धा विषयव्यवस्थितय इति स्थितिरियमविवादा सर्ववादिनाम्। तदियमपि क्षणिकता भावस्य स्वभावभूता सती संवित्तिमधिरोहन्ती तदव्यतिरेकेण व्यवतिष्ठते, नान्यथा । न च तथा संविदमुदीयमानामुदीक्षामहे इति कुतस्तस्या भावस्वभावान्तर्भाविता। कुतस्तराञ्च तदवबोधेनावबोधः । अथ मन्वीरन्— क्षणिकता प्रत्यक्षमीक्षितापि न निश्चयपथमवतीर्णा, तेनागृहीतेवावभातीति । तथापि न तस्याः प्रत्यक्षं प्रमाणम् । यत्र हि प्रत्यक्षस्य स्वभावतो विकल्पविरहिणः पृष्ठभाविना सविकल्पकप्रत्ययेन व्यापारोऽनुगम्यते, तत्र प्रत्यक्षं प्रमाणमिति सौगताः। यत्र च दृष्टमेतद् इति प्रत्ययो नोदीयते न तत् प्रत्यक्षमिति स्वतः सिद्धान्तध्वान्ताक्रान्ताशयानां वाङ्मात्रविलसितम् ॥ यदपि केचिदूचिरे— प्रत्यक्षं ज्ञानं क्षणिकम्, स्वकालाकलितवस्तुविषयतया क्षणिकतामवगमयतीति । तदपि बालिशभाषितम् । एकक्षणमात्रवर्त्तिता हि क्षणिकता । न तत् प्रत्यक्षेणेदानीमेव व्यवस्थितिं प्रतिपद्यते। कालान्तरं प्रत्यौदासीन्यात् । प्रत्युत प्रत्यभिज्ञालक्षणं प्रत्यक्षमेव क्षणिकतां दूरमुपक्षिपति । पूर्वापरकालाकलितभावावकल्पनात् । अनुमानमपि सम्बन्धानुसन्धाननिबन्धनं क्षणिकतां न पक्षीकर्तुं क्षमते। तया सह कस्यचिल्लिङ्गस्य सम्बन्धबोधविरहात्। न खलु-

ऽप्रतीते सम्बन्धिनि सम्बन्धबुद्धिराविर्भवति । न चैतदुभयातिरेकि प्रमाणं सुगतमतानुसारिणो मन्यन्ते ॥

तदिदमाकाशभ्रान्तमित्यपहसन्ति सौगताः । ते हि स्वभाव-हेतुकानुमानसमधिगमनीयां क्षणिकतामाचक्षते । किं पुनस्तदनु-मानम् । यत् सत् तत् क्षणिकम् । सन्तश्च सर्वे भावा इति । भाव-मात्रानुबन्धिनि सम्बद्धे स्वभावो हेतुर्भवति । यथा शिंशपात्वं वृक्षत्वे । शिंशपामात्रानुबन्धि हि वृक्षत्वम् । तथेहापि सत्तामात्रानु-बन्धिनी क्षणिकता । कथं पुनस्तन्मात्रानुबन्धसिद्धिर्विपक्षे साधक-प्रमाणप्रवृत्तेः । अक्षणिके हि व्यापकानुपलब्धिः सत्तां बाधते । अर्थ-क्रियाकारिता हि सत्ता, नापरा काचिदस्ति । सा च क्रमयौग-पद्याभ्यां व्याप्ता तृतीयराशिविरहात् । अनयोः परस्परप्रतिपक्षतयैक-प्रतिषेधस्येतरविधिनान्तरीयकत्वात् । न च क्रमयौगपद्ये अक्षणिकेषु सम्भवतः । ते तु निवर्तमाने सत्तामपि निवर्त्तयतः, वृक्षत्वं शिंश-पात्वमिव । कथञ्च क्षणिकेषु क्रमयौगपद्याभ्यामर्थक्रियाविरहः । अत्राहुः । अक्षणिको हि भवन् किमर्थं क्रियाजननस्वभावो भवेत् । अतः स्वभावो वा नापरः प्रकारोऽस्ति । तत्राग्रिमपक्षपरिग्रहे सर्वा-सामर्थक्रियाणामेकस्मिन्नेव क्षणे कृतकत्वात् । कृतस्य च करणानु-पपत्तेः । अनन्तरक्षणेऽर्थक्रियासामर्थ्यशून्यत्वादसल्लक्षणत्वापत्ते-रक्षणिकत्वहानिः । द्वितीयविकल्पावलम्बने तु कापि ततोऽर्थक्रिया-नोदीयत इत्यसल्लक्षणत्वापत्तिरेव । स्यान्मतम् । समर्थोऽपि स्वभा-वतो भावः सहकारिसमवधानवशेन कदाचित् करोति तदभावाच्च तदानेति*। तदपि विमर्दं न क्षमते । स हि सहकारी किञ्चिदारभते वा न वा । आरभ्यमाणोऽप्यर्थक्रियासाधनत्वाभिमतभावस्वभाव-भूत उतास्वभावभूतो वेति विकल्पनीयम् । अनारम्भपक्षेऽपेक्षार्थो-ऽभिधातव्यः। न खल्वनुपकारकं प्रत्यपेक्षार्थवती । स्वभावभूतारम्भे च भावस्याप्युत्पत्तिरापतति । न ह्युत्पद्यमानोऽनुत्पद्यमानस्वभावो भवति । विरुद्धधर्माध्यासस्य भेदापादकत्वात् । भावोदयाङ्गीकार-पक्षे लाक्षणिकत्वपरिक्षयः । अतः स्वभावभूतारम्भाभ्युपगमे भावस्य प्राग्वा साधकत्वम् । नाक्षणिकात् क्रमेणार्थक्रियासिद्धिः । तत एवाह्याग*रर्थक्रियोदयः । तदभावे भावात् तदभावे चाभावात् । न

---

* एतच्चिह्नाङ्कितस्थलेषु संदिग्धम्, आदर्शे त्रुटितं चास्ति ।

च तद्व्यतिरेकाव्यतिरेकाभ्यामन्यः प्रकारोऽस्ति । परस्परविरुद्ध-योरेकत्र समवायप्रतीतिविरहात् । ननु क्षणिकोऽपि भावः किमर्थ-क्रियाजननस्वभावः ? किं वा नेति प्राचीं विकल्पानां * नास्तीति वर्तते । तत्र समर्थस्वभावस्य सहकारिव्यपेक्षा न स्यात् । न ह्यसम-र्थादर्थादर्थक्रियोदीयते ॥ श्रूयतां परमरहस्यं सौगतानाम् ॥ अन्त्य-क्षणप्राप्तः समर्थ एव भावः कार्यमप्येकैकमेवारभते । किमिति तर्हि सहकारिभिर्विनापि न करोति । निरपेक्षस्य जनकत्वे सहकारिताऽपि तस्य कीदृशीति वक्तव्यम् । अत्र वदामः । यत्तावदिदमुक्तम् विना-ऽपि सहकारिभिः किमिति न करोति । तत् तावत् सुगतमतं कौशलविरहविजृम्भितम् । क्षणिको हि भावो न सहकारिभिर्विना-ऽस्ति । कथमेतत् करिष्यति । यस्त्वस्ति नासौ स इति ॥ इति न किञ्चित् क्षीणम् ॥ सहकारिभिर्विना किमिति न भवत्येवेति पर्य-ऽनुयोगे हेतुस्वभावैरुत्तरं वाच्यम् । तेन तथा भवन्ति, भावयन्ति चेति । एककार्यकारिता चान्त्यक्षणवर्त्तिनां सहकारिता । ननु ते-ऽप्यन्यनिरपेक्षा एव जनकाः किमिति न कार्यान्तरमारभन्ते । अत्रापि वयमनीशाः, भावास्तु यदारभन्ते तदारभन्तामित्यनुमन्तुमेव वयं प्रभवामः । तेनामी जनका अपि तदेव जनयन्तीति पश्यतामस्माकं तावत्येवाभ्युपगमाः । नन्वेकेन कृतेऽपरः किं करोतीति । भवेदेतदे-वं पर्यायेण क्रियायाम् । सहक्रियायां तु कृत इत्येव नास्ति । नन्वेवमेकस्मादपि तत्सिद्धेः किमपरे कुर्वन्ति । नैतदेवम् । न ते प्रेक्षापूर्वकारिणो येनैवं पर्यालोचयेयुः । अन्योऽपि * मिद *मस्माभि-र्विना समर्था वयम् । इह तु न भवाम इति । ते तु हेत्वधीनसन्निधाना न न भवितुं न क्षमन्त इति कानुपपत्तिः । ननु कथमेकं कार्यमनेक-स्मादुत्पद्यते । कारणभेद एव हि कार्यस्य भेदे हेतुः । अन्यथाकस्मि-कत्वापत्तेः । उच्यते । न सहकारिकारणभेदाद् भेदः कार्यस्य । किन्तु सामग्रीभेदादिति हेतुबिन्दौ कृतपरिश्रमाणामनायाससमधिगम्यम् । तस्मान्न क्षणिकत्वेऽप्यक्षणिकत्वदृक्षसदृक्षपर्यनुयोगावकाशः । बीजादीनां हि क्षणपरम्परापरिणामे न तादृशाः क्षणाः सञ्जायन्ते । यतोऽनपेक्षितहेत्वन्तरप्रवृत्तेरनन्तरमङ्कुरं प्रादुर्भवति । नन्वेवमपि परापरेषु बीजादिक्षणेषु तदेवेदमिति प्रत्यभिज्ञा नोपपद्यते । अपि च सप्रत्यभिज्ञप्रत्यक्षविरोधे कथमनुमानमात्मानं लभत इत्यपि वा-च्यम् । लाभे वा वह्नावपि शैत्यानुमानप्रसङ्गः ॥ समाधिरभिधी-

यते ॥ ये ते क्षणास्तेषामात्यन्तिकभेदसदृशतया दृष्टमपि प्रत्याकलयितुमनीशस्य भेदाग्रहणनिबन्धनोऽभेदग्रहणव्यवहारः प्रवर्तते। शुक्तिकायामिव रजतव्यवहारः। न चानुमानोदयविरोधः।अर्थक्रियाऽन्यथानुपपत्तेः। प्रत्यभिज्ञा तु भेदाग्रहणेनाप्युपपद्यते इति निरवद्यम्। अत एव च वृद्धा वदन्ति— भवति वै प्रत्यक्षादप्यनुमानं बलीय इति। युक्तं चेदमेव पश्यामः। यत्तदेवेदमिति विज्ञानद्वयमिति एकविज्ञानोदये स्यातम्। अपि च कृतकानां भावानामवश्यम्भावि विना कारणान्तराभावादिन्द्रियं सन्निहिते व्याप्रियते। न पुनः पूर्वसम्बन्धिता रूपतामुपस्पृशति। पूर्वानुभवभाविता च भावना नेदन्तामपरकालयोगात्मिकामिति। तदिदं ज्वालाप्रत्यभिज्ञानेन व्याख्यातम्। अपि च कृतानां भावानामवश्यम्भाविविनाशः प्रतीयते। अतोऽपि शक्या क्षणभङ्गिताऽनुमातुम्। तथाहि। यद्येषा ध्रुवभाविनी, तत्र तेषां हेत्वन्तरापेक्षा नास्ति। ध्रुवभावी च कृतकानां विनाशः, इति विरुद्धव्याप्तोपलब्धिलिङ्गमनुमानं विनाशस्य हेत्वन्तरापेक्षितां प्रतिक्षिपति। ध्रुवभाविता हि निषिद्ध्यमानहेत्वन्तरापेक्षित्वविरुद्धनिरपेक्षत्वव्याप्तोपलब्ध्या हेत्वन्तरानपेक्षितामुपस्थापयति। सा च स्वविरुद्धं हेत्वन्तरापेक्षित्वं निराकरोति। ये हि हेत्वन्तरापेक्षास्ते ध्रुवभाविनो न भवन्ति। यथा वाससि रागादयः। अतो हेत्वन्तरापेक्षत्वविरुद्धतन्निरपेक्षत्वव्याप्तध्रुवभावित्वस्य योपलब्धिः, सैवाध्रुवभावित्वस्यानुपलब्धिः। विनाशस्य हेत्वन्तरापेक्षा नास्ति। तथा यदि भावा अपि स्वहेतुभ्यो हेत्वन्तरं विनाशं प्रत्यपेक्षेरन्। ततस्तस्य हेत्वन्तरस्य सन्निधाननियमे प्रमाणभावात् कश्चित् कुतोऽपि न विनश्येत्। स्वहेतोस्तु विनश्वरस्योत्पन्नस्योदयानन्तरमप * इति क्षणभङ्गुरत्वसिद्धिः॥ अपि चेदं चिन्तनीयम्॥ किं कृतका भावाः स्वहेतुभ्यः समुपजायमाना विनश्वरा एव जायन्ते अविनश्वरा वा। विनश्वरा उदयानन्तरमेव लीयन्त इति क्षणभङ्गिनः। अविनश्वरस्वभावास्तु न कदाचिद्विनश्येयुः। न च हेत्वन्तरात्तेषां विनाशादयः। विकल्पासहत्वात्। स हि जायमाने विनाशो भावादव्यतिरेकी व्यतिरेकी वा। न तावदव्यतिरेकी। हेतुभेदात्। व्यतिरेकिणि तु जाते भावस्य प्राग्वदुपलब्ध्यादिप्रसङ्गः। तेन तिरोधीयत इति कल्पनायामपि तिरोधानं प्रत्येष विकल्प इत्यलमतिप्रसङ्गेन॥

अत्र केचिदेवं समादधति ॥ तत्तेदन्ते परस्परसंवलिते समाकलयदेकं प्रत्यभिज्ञासमाख्यातं प्रत्यक्षविज्ञानं क्षणभङ्गानुमानं निरुणद्धीति ॥ न चेदमिह समीचीनम्। द्वे एते विज्ञाने ग्रहणस्मरणरूपे यथायथं तत्तामात्र इदन्तामात्रे च व्याप्रियमाणे नालमुभयानुभवसम्भवसमयवर्तितामर्थस्यावभासयितुमिति। प्रतीतिविरोधात्। यथैव खल्वभिन्नदेशकालं वस्त्वेकतया चकास्ति। तथात्रापि भिन्नदेशकालमप्येकतयैव परिस्फुरतीति। तथाविधसंवेदनोदयश्च नैकविज्ञानमन्तरेणेत्येकमेवेदं विज्ञानमुररीकरणीयम्। कार्यसद्भावोपपादनायाप्रतीतमपि कारणं परिकल्पनीयम्। न पुनः कारणमुखनिरीक्षणेन स्पष्टदृष्टकार्यविपर्ययः पर्यालोचनीयः। तेन यद्यपि केवलादिन्द्रियात् केवला*पूर्वानुभवसमासादितजन्मनो भावनाभिधानात् संस्कारात्। नेदमेवंविधं विज्ञानमुदेतुमर्हति। तथापि तयोरन्योन्यसमवधानसमासादितदशान्तरयोरिदं कार्यमित्याचार्या* न चेदमप्युचितम्। प्रत्यक्षमेवेदं न भवतीति सत्यपि संस्कारोपयोग इन्द्रियव्यापाराधीनजन्मतयाऽस्य प्रथमसमागमसमयभाविनः सकलवादिनामपहस्तितविवादानां प्रत्यक्षसम्मतादविशेषात्। न चेदं प्रमाणाभासमिति किञ्चन प्रमाणमस्ति। बाधककारणदोषसंवेदनान्तरविरहान्नेदमेवानुमानं बाधकमिति मिस्तचित्तमनुरज्यते। परस्पराश्रयदोषसमासक्तेः। यावत् खल्वेतद् विज्ञानमबाधितम्, तावदनुमानमेव नोदेतुं प्रभवति सञ्जातवति चानुमाने बाधितमिदं भवति इति विशदतरमितरेतरकारणत्वम्। अबाधितविषयता चापि कारणमनुमानोदये। अन्यथा हुतवहे शीतता किमिति नानुमीयते। नन्वेवं तर्हि कथं ज्वालादीनामेकत्वादवधारितानामनुमानतो भेदसिद्धिः। अत्र सिद्धान्तसारमुदीयन्ति। सामान्यविशेषात्मकानि सर्ववस्तूनि। तत्र ज्वालादिषु प्रत्यक्षं सामान्यविषयमनुमानं तु विशेषविषयमिति भिन्नगोचरप्रचारिणोः प्रत्यक्षानुमानयोर्विरोधाभावाद् न प्रत्यक्षेणानुमानोदयविरोधः। कथं पुनरक्षणिकस्यार्थक्रियाकारिता क्रमेणेति वद। स खलु सहकारिसमवधानोपहितविशेषो भावस्तां तामर्थक्रियां क्रमेणैव सम्पादयति। ननु विकल्पितं सहकारिभिः किं व्यतिरिक्तोऽव्यतिरिक्तो विशेष आधीयत इति दूषणानि चेह विकल्पयुगले पूर्वमावेदितानि। अत्रापि त एव प्रतिनियामनुक्रम*यद्भिनायमेकान्तोऽस्माकं भिन्नान्येव सर्ववस्तू-

नि, न भिन्नानि चेति। किन्तु सर्वभावेष्वभेदाभेदौ सङ्गिरामहे । तत्र भेदमात्रविकल्पसम्भाविनि दूषणान्यभेदाश्रयणेन परिहृतानि । अभेदमात्राश्रितानि च भेदावलम्बनेनेति । नन्वेतेन भेदाभेदौ कथमेकत्र विरोधिनौ निविशेते। तत्राहुः— नेमौ विरोधिनौ सहदर्शनात् । सहानवस्थानलक्षणो हि विरोधः । अनवस्थानञ्च दर्शननिबन्धनं नास्ति विरोधः । तदिदमविचारितरमणीयमिति गुरूणां नानुमतम् । स हि न ददर्श भेदाभेदावेव तावदेकत्र न सम्भवतः। विरोधात् । न हि तयोः सहदर्शनमुपपद्यते । एकाकारप्रतीतिरेव खल्वभेददर्शनम् । विलक्षणाकारप्रतीतिश्च भेददर्शनम् । तत्र यद्येक आकारः प्रतीतः, तदा विलक्षणाकारप्रतीतिर्नास्ति । विलक्षणाकारे च प्रतीते नैकाकारप्रतीतिरेव नास्ति । तेन भिन्नाभिन्नविशेषाश्रयणेनार्थक्रियासमर्थनमघटमानम् । न च प्रत्यभिज्ञानानुमाविरोधः । प्रत्यभिज्ञाया एव परीक्षणीयत्वात् । दृष्टा शुक्तिकायां तदेवेदं रजतमिति मतिः । सा च सादृश्यवशेनैव भेदाग्रहणनिबन्धनैवेति युक्तात्रापि परीक्षा । तत्र परीक्ष्यमाणस्यार्थक्रियानुपपत्त्या क्षणिकत्वे निर्णीते सदृशापरम्परापत्तिविप्रलम्भोऽयमिति निश्चीयते । भवति च विमृशतो*हुतवहादिष्वनुमानवेशेन जाताया अपि प्रतीतेर्विपर्ययः । हुतवहादिषु चौष्ण्यप्रतीतिरुपजाता परीक्ष्यमाणापि नानान्यथापपद्यत * इति न विपर्ययानुमानोदयः । तस्मादलमनेन नानाटकपक्षपतितेन* दर्शनेनातिनिर्बन्धेन ॥

गम्भीरतरगुरुदर्शनसागरपारदृश्वानस्तु सम्प्रति समाधिमभिदधति । स्तम्भादिषु प्रथममनुभूतेषु पुनरन्तरा तिरोधानादिवशेन विच्छिन्नोपलम्भेषु पुनरनुभवतः स एवायमिति तावज्जायते मतिः । तत्र यद्यर्थक्रिया स्थिरादपि कथञ्चिदुपपद्यते ततो भेदाग्रहणनिबन्धनोऽयमभेदभ्रम इति किमतिकल्प्यते । उपपद्यते च स्थिरादपि सहकारिवशोपजातागन्तुकक्रियादिरूपविशेषभाजः क्रमेणार्थक्रिया। स च विशेषो व्यतिरिक्त एव भावादर्थक्रियाकारिणम् । न च स एवार्थक्रियाकारी, भावस्तूदास्त इति चतुरस्रम् । तथा विधिविशेषालीढतैव तस्य साधनता, यदन्तरमर्थक्रियोदयः, तद्विशेषयोगितयैव भावेषु साधनत्वव्यवहारो लौकिकानाम् । कथं पुनरसौ विशेषस्तस्येति व्यपदिश्यते तदाश्रयतयैवानुमानात् । कथं पुनस्तदाश्रयतैव स्वहेतुवशेनेति मत्वा निवर्त्ततां भवान् । अलमस्माभिर्दूर-

मनुयातैः। अथ कस्माद् भावस्यैव भेदो नानुमीयते प्रत्यभिज्ञानानुगुण्यादिति वदामः। दृष्टानुसारि चानुमानमुचितम्। दृष्टोपपत्तिमुखत्वात्। यथा चार्थक्रियाकारिता, तथेदमपि दृश्यते स्थावरो भाव इति तदनुगुणमनुमानमुचितम्। तेन स्थावरेऽप्यर्थक्रियाव्यापकक्रमयौगपद्यानिवृत्तेरसिद्धो व्यापकानुपलम्भा*तदसिद्धेन विपर्यये बाधकाभावादसिद्धतन्मात्रानुबन्धिनी क्षणिकतां न सत्ता साधयितुमलम्। अनैकान्तिकत्वादिति। न चार्थक्रियाकारितैव सत्ता किन्तु प्रमाणसम्बन्धयोग्यता। स्वरूपसत्ता च प्रमाणसम्बन्धयोग्यता। अतोऽर्थक्रियामकुर्वन्नपि सन्निति न किञ्चिद्वद्यम्। यत्त्विदमुदितम्। अनपेक्षाभावा विनाशप्रतीतिः। तदपि विमृश्यमानं जातुषमिवाभरणं विशीर्यते। कं खलु भवन्तो विनाशमभिमन्यन्ते। प्रध्वंसाभावो विनाश इति चेत्- कः पुनः प्रध्वंसाभावः। दधिन क्षीरं नास्तीत्येवमादिका भावविषया संविदिति यद्युच्येत, तदाऽमृतकलायामुदिता नीतिरुद्धरणीया। न हि नास्तीति बुद्धिरस्ति। किन्तु दधिस्वरूपमात्रानुभव एव स्वयम्प्रकाशे शब्दप्रयोगमात्रमे*तसैव* पयसो नास्ति। तादृशश्चे*तस्मिन् दधिस्वरूपमात्रोपलब्धिः। न च तां प्रति पयस एव निरपेक्षस्य हेतुता। अनुपनिपातिते हेत्वन्तरे पयस एवोपलब्धेः। न चेदं पयोऽन्तरमुपलभ्यत इति शक्यं वक्तुम्। प्रत्यभिज्ञानस्याभेदसाधकत्वात्। ननु च हेत्वन्तरापेक्षित्वे ध्रुवभाविता नोपपद्यते। ध्रुवभावितेव कुतोऽवगम्यते। दर्शनादिति चेत्। हेत्वन्तरेणैवावश्यं भवितव्यमिति। न च बालावयं *येनैवंविधवादाद् भीषयामहे। यत् पुनरिदं स्वहेतुभ्यो भावानामपि नश्वराणामुत्पत्तौ हेत्वन्तरायत्ते विनाशे,व्यतिरेकिणि जातेऽपि पूर्ववद् भावस्योपलब्ध्यादिप्रसङ्ग इति। अत्रोच्यते। उक्तमस्माभिः। यथा तन्मात्रोपलब्धिते एव विनाश इति। तेन तस्या हेतुसद्भावात् तथैव भवितव्यम्। अनुपलब्धिरपि तस्य सैवेत्युपलब्धिरेव तस्य नोपलब्धिस्तन्निबन्धनत्वाभावव्यवहार इति सर्वमनाकुलम्॥

सुगताशीविषविषमक्षणभङ्गविषानलावलीढायाः॥
मीमांसाया विहिता तत्त्वमयी जीवरक्षेयम्॥ १॥

श्रीः

श्रीशालिकनाथविरचिता

वाक्यार्थमातृकावृत्तिः ।

गम्भीरविततमर्थं वाचा सङ्क्षिप्तया निबद्धमपि ॥
न विदन्ति ये समग्रं कृपया तदनुग्रहः क्रियते ॥ १० ॥

तत्र कार्यार्थवादिन एव भाट्टं भावनामपूर्वं च वाक्यार्थान् प्रतिजानीते । तत्रापूर्वमेव वाक्यार्थ इति साधनीयम् । तस्य मूलं पदानामपि तथाविधायितेति तामेव तावदादौ परिशोधयति । अत्र ये प्रत्यस्तमितपदविभागं वाक्यमेव वाक्यार्थस्य वाचकमित्याचक्षते, ये च वाक्यान्त्यवर्ण एवेति, ये च पदैरभिहिताः पदार्थानभिहिताः परस्परान्वयमात्मनोऽवगमयन्ति इति तन्निरासाय प्रतिजानीते—

पदेभ्य एव वाक्यार्थप्रत्ययो जायते यथा ।
तथा वयं निबध्नीमः प्रभाकरगुरोर्मतम् ॥

पदेभ्य एव, न वाक्याद्, नाप्यन्त्यवर्णाद्, नापि पदार्थेभ्य इत्यर्थः। तं प्रकारं वक्तुमुपक्रमते—

पदैरेवान्वितस्वार्थमात्रोपक्षीणशक्तिभिः ।
स्वार्थाश्चेद् बोधिता बुद्धौ वाक्यार्थोऽपि तथा सति ॥

वाक्यार्थप्रतिपत्तौ हि पदानाम् अनुपायत्वे तदन्यथानुपपत्त्या वाक्यमेकं तदुपायभूतं कल्प्यते । यद्यपि व्युत्पत्त्यनपेक्षाच्छब्दादर्थो नावगम्यते । यद्यपि चानन्त्याद् वाक्यानां तदर्थानां च वैदिकस्य चार्थस्य नित्योपायत्वाद् व्युत्पत्तिरशक्या । तथापि काल्पनिकपदपदार्थव्युत्पत्तिसंस्कृताद् वाक्याद् वाक्यमवगच्छतीत्याश्रीयते । यदि वा काल्पनिकत्वे पदपदार्थानां प्रमाणभावादेकैकवर्णोच्चारणेऽर्थानवबोधात् क्रमोच्चारितानां च युगपच्छ्रवणासम्भवात् पूर्ववर्णजनितसंस्कारसहितोऽन्त्यो वर्णः प्रत्यायकः । तस्य च पारमार्थिकपदपदार्थव्युत्पत्तिः सहकारिणीति पक्षः स्वीक्रियते । यदि वा पदैः

सुकरव्युत्पत्तयोऽनन्विता एव स्वार्था अभिहिता वाक्यार्थमवबोधयन्तीत्यङ्गीक्रियते । यदि तु पदान्येव अन्वितान् स्वार्थानभिदधतीति शक्यते साधयितुं, तदा वाक्यार्थस्यावबुद्धत्वान्नैताः कल्पना आत्मानं लभन्ते ॥

कथं पुनः पदानामन्वितस्वार्थमात्रबोधकत्वे वाक्यार्थावगतिः सिद्ध्यतीत्यत्राह—

प्रधानगुणभावेन लब्धान्योन्यसमन्वयान् ।
पदार्थानेव वाक्यार्थं सङ्गिरन्ते विपश्चितः ॥

ननु तेषां भूयस्त्वाद् भूयांसो वाक्यार्था वाक्यानि च स्युरित्यत्राह—

भूयांसो यद्यपि स्वार्थाः पदानां ते पृथक्पृथक् ।
प्रयोजनतया त्वेकवाक्यार्थं सम्प्रचक्षते ॥
तत्प्रतीत्येककार्यत्वाद्वाक्यमप्येकमुच्यते ॥

कथं पुनरेकस्य प्रयोजनत्वमित्यत्राह—

प्रतिपत्तिर्गुणानां हि प्रधानैकप्रयोजना ॥

यद्धि प्रधानभूतं तदेव कथं नाम विशिष्टं प्रतीयते इत्येवमर्थं गुणानां प्रतिपादनम् । तेन तत्रैव तात्पर्यम् । तदेव प्रमेयम् । तात्पर्यविषय एव शब्दस्य प्रामाण्याभ्युपगमात् तस्य तथाभूतस्य प्रतिपत्तेर्नैकपदनिबन्धनेति वाक्यमेव तत्र प्रमाणम् । अत एव च षष्ठाद्ये, न पदं नाम किञ्चन वाक्ये न पदार्थनामकं च न वाक्यार्थ इत्युक्तम् । पृथग्भूतं पदं नाम किञ्चन प्रमाणास्ति । पृथग्भूताश्च पदार्था न प्रमेयाः सन्तीत्यर्थः । एतच्च तत्रैव स्पष्टमुक्तम् ॥

सम्प्रति वाक्यमेव वाचकं वाक्यार्थस्येति ये ब्रुवते, ये च वाक्यान्त्यवर्ण एवेति, तन्निराकरणायाह—

व्यवहारेषु वृद्धानां वाक्यश्रवणभाविषु ।
आवापोद्धारभेदेन पदानां शक्तिनिश्चयः ॥

यद्यपि वृद्धव्यवहारपूर्विकैव सर्वा व्युत्पत्तिः । वाक्यैरेव च व्यवहारः । तथापि यत्पदावापे यस्यार्थभागस्यावापः, यदुद्धारे चोद्धारः, तस्मिन्नेवार्थे तस्यैव वाचकशक्तिरवसीयते । न च तथा वाक्यार्थप्रतिपत्तिर्नोपपद्यते । वक्ष्यमाणत्वान्न्यायस्य । येन कार्यबलेन वाक्यमेकं प्रत्यक्षपरिदृश्यमानवर्णभेदापह्नवे न कल्प्येत । कि-

त्र, शिशो गामानय, शिशो गां बधान । अर्भक गामानय, अर्भक ! गां बधान, डिम्भ गामानय, डिम्भ गां बधानेत्यष्टानां वाक्यानामष्टौ वाचकशक्तयः कल्प्याः । पदवादिनस्तु सप्तानां वाक्यानां सप्तशक्तय इति । अनयैव दिशा शुक्लामितिपदप्रक्षेपे वाक्यवादिनोऽष्टावपराः कल्प्याः । पदवादिनस्त्वेकैव । अपारमार्थिके च पदविभागे किमाश्रिता व्युत्पत्तिरभ्युपायमुपैतीति चिन्तनीयम् । ये पुनर्वाक्यान्त्यवर्णस्य वाचकतामाहुः, तन्मतेऽपि यावत्पदपदार्थविभागस्य पारमार्थिकत्वाद् घटेतैव व्युत्पत्तिः । ननु वाच्यवाचकसम्बन्धग्रहणमेव व्युत्पत्तिरित्युच्यते । न च वाक्यान्त्यवर्णवाचकत्ववादिनां पदं पदार्थस्य वाचकम् । अतस्तन्मतेऽपि निर्विषयैव व्युत्पत्तिः । उच्यते । न निर्विषया । निमित्तनैमित्तिकभावस्याभ्युपगतत्वात् केयमबाधकस्य निमित्तता । नैष दोषः । वाक्याद्धि यत्पदप्रयोगेऽन्विते सति यत्पदार्थान्वितो वाक्यार्थः प्रतीयते, तत् पदं तस्यार्थस्यावाचकमपि भवति निमित्तम् । किन्तु तन्मतेऽपि शक्तिकल्पनागौरवं पूर्वोक्तन्यायेन तुल्यमेव । येऽप्याहुः— वाक्यमेव स्मृत्यारूढं वाक्यार्थं प्रतिपादयतीति । तेषामपि प्राच्यकल्पनागौरवदूषणमशक्यपरिहारम् । भाष्यकारवचनं च पूर्ववर्णजनितसंस्कारसहितोऽन्त्यो वर्णः प्रत्यायक इति निर्विषयम् । अशक्यं च महावाक्यस्य सकृत् स्मरणम् । तस्मात् पदानामेव वाचकशक्तिराश्रयणीया ॥

अत्र केचिद्वदन्ति— ननु वृद्धव्यवहारप्रयुक्ते वाक्ये पदानां वाचकशक्त्यवधारणमेव नोपपद्यते । पुरुषवाक्यानामर्थं प्रति लिङ्गाभावेन प्रमाणत्वाभ्युपगमात् । वाक्याद्धि कार्यभूतात् प्रत्ययितस्य वक्तुस्तदर्थविषयं पूर्वविज्ञानं कारणभूतमनुमीयते । तस्य च ज्ञानस्य ज्ञेयाव्यभिचारित्वाज्ज्ञेयभूतार्थनिश्चय इति न वाचकशक्त्यवगमः । उच्यते । न नूनं भवान् नीतिपथोक्तमर्थं सम्यगाकलयति । परिहृतं हि तत्रेदम् । बालो हि व्युत्पद्यमानः प्रयोज्यवृद्धस्य शब्दश्रवणसमनन्तरभाविनीं विशिष्टचेष्टानुमितामर्थप्रतीतिं शब्दकारणिकामवगच्छति । स तथा व्युत्पन्नः कदाचित् कस्यचिदन्वितार्थपदरचनं वाक्यमुपलभते । तथोपलभमानस्य चैष विमर्शो जायते । सम्भाव्यमानानन्वितार्थपदरचनमिदं वाक्यं कथं वृद्धस्याऽर्थनिश्चयं कृतवत् । वृद्धस्यापि पुरुषायत्ते वाक्येऽनन्विताथपदरचन-

शङ्का ममेव सम्भवतीति तस्यैवं विचिकित्सोदये पुनरेष निश्चयो जायते। नूनमनेनायं प्रयोक्तेत्थमवधारितोऽन्वितार्थान्येव पदान्ययं प्रयुङ्क्त इति तथाविधपदप्रयोगनियमश्चास्यानुपलब्धेऽन्वय उपपद्यत इत्येवमन्वयोपलम्भमनुमिमानेनान्वयो निश्चीयते चान्वये वाक्यमेतदनुवादकभूतमर्थस्येति। एवं चेदनुवादकतया तस्यार्थस्य तद्वाक्यं बाधकमेवेति पूर्ववाचकशक्तिज्ञानं, नायथार्थमिति मन्यते। यदि परमया प्रागनुमानपुरःसरोऽर्थनिश्चयोऽस्येति नावगतम्। याऽपि चेयमस्यानिश्चिते चान्वये विशिष्टवक्तृज्ञानानुमा, साऽपि पदानां स्वरूपमात्रावगमादेव नोपपद्यते। किन्तु विशेषावगमात्। न च शक्तेरन्यः पदानां विशेषोऽवगम्यते। ततो मयेवानेनाप्यमीषां पदानां वाचकशक्तिरवधारिता। तेन विशिष्टान्वयवाचकपदप्रयोगात् तद्विषयं वक्तुः पूर्वज्ञानमनुमितवानिति गम्भीरोऽयं नीतिमहाह्रदः॥

अत्र केचिदाचक्षते— भवतु पदानां पदार्थेषु शक्तिज्ञानं, तथाऽप्यन्विताभिधानं न सिद्ध्यतीति। तथाहि। प्रतियोगिनामनन्ततयाऽन्वयानन्त्यात् तदानन्त्ये चान्वितानामप्यानन्त्यात् सम्बन्धग्रहणं दुष्करम्। अगृहीतसम्बन्धस्य च पदस्य वाचकत्वम्। एकस्माच्छब्दात् सर्वार्थप्रतीतिप्रसङ्गात्। सामान्यान्वयाभिधानं च नाशङ्कनीयमेव। वाक्येभ्यो विशेषान्वयावगमात्। स्वरूपमात्राभिधानेनापि च वाक्यार्थप्रतिपत्तावन्विताभिधानाश्रयणे शक्तिकल्पनागौरवात्। तथा पदेनान्वितस्वार्थोऽभिधीयमानः, किमभिहितेन पदार्थान्तरेण अन्वितोऽभिधीयते ? उतानभिहितेनेति विकल्पनीयम्। अनभिहितेन चेत् पदार्थान्तरप्रयोगवैयर्थ्यम्। एकस्मात् पदार्थाच्च सर्वार्थप्रतीतिप्रसङ्गः। अभिहितेन चेत् तदपि तर्हि पदमन्विताभिधायितया पदार्थान्तरोत्थमर्थाभिधानमपेक्षत इतीतरेतराश्रयं प्राप्नोति। तस्मात् पदान्तराभिधानानपेक्षस्वरूपमात्राभिधानमेवार्थानां पदैः क्रियते। ते च तथाभूताः पदैरर्था अभिहिता आकाङ्क्षासन्निधियोग्यतावन्तो वाक्यार्थमवगमयन्ति। न तेषां सम्बन्धग्रहणापेक्षा शङ्कनीया। यतः पदधर्मोऽयं, नायमर्थधर्मः। तदाह भाष्यकारः— पदानि हि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि॥

अथेदानीमभिहिताः सन्तो वाक्यार्थमवगमयन्तीति, तदेतन्निराकर्तुमुपाक्रमते—

प्रोप्यन्ते चोद्ध्रियन्ते च स्वार्था अन्वयशालिनः ।
अन्वितेष्वेव सामर्थ्यं पदानां तेन गम्यते ॥

अत्राह— सत्यमन्वितपदार्थविषयावेवावापोद्धारौ, तथाप्यन्विताभिधानमशक्यम् । पारम्पर्येणापि तदुत्पत्तेः । तथाहि— पदैरनन्वितोऽभिहितोऽर्थोऽन्वितप्रतिपत्तेर्निमित्तं भवतीति पदानां पारम्पर्येणान्वितेष्वपि हेतुत्वम् । तदाहुर्वार्तिककारपादाः—

न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः ।
तन्मात्रावस्थितेष्वेषु पदार्थेभ्यः स गम्यते, इति ॥

पदार्थप्रतिपादनं च वाक्यार्थप्रतिपत्तये प्रयुक्तानां पदानामवान्तरव्यापार इति च तेषामेव व्यवहारः—

वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम् ।
पाके ज्वालेव काष्ठानां पदानां प्रतिपादनम्, इति ॥

एतमाशङ्कामुपेक्ष्यैव तावद् दोषान्तरं परिहरति—

आकाङ्क्षासन्निधिप्राप्तयोग्यार्थान्तरसङ्गतान् ।
स्वार्थानाहुः पदानीति व्युत्पत्तिः संश्रिता मया ॥
आनन्त्यव्यभिचाराभ्यां तथा दोषो न कश्चन ॥

यत्तावदुक्तम्, आनन्त्याच्छब्दशक्त्यवधारणानुपपत्तिः।अगृहीतशक्तेश्च वाचकत्वे व्यभिचारप्रसङ्ग इति । तदनुपपन्नम् । उपलक्षणाश्रयणेनाऽपि सम्बन्धबोधसौकर्यादाकाङ्क्षितेन योग्येन सन्निहितेन चान्वितं स्वार्थं पदं वक्तीति व्युत्पत्तिराश्रीयते । तेन,

यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते ।
तदन्वितः पदेनार्थः स्वकीयः प्रतिपाद्यते ॥

उक्तार्थः श्लोकः ॥ का पुनरियमाकाङ्क्षा ? । प्रतिपत्तुर्जिज्ञासा । किन्निबन्धना पुनरसौ । अविनाभावनिबन्धनेति केचित् । क्रिया हि कारकाविनाभाविनीति तां प्रतीत्य कारकं जिज्ञासते । एवं कारकमपि बुद्ध्वा क्रियामिति । तदयुक्तमिति मन्यन्ते । जिज्ञासा तथा तदीयजनकतत्क्रियातत्कारकान्तरादिजिज्ञासाप्यापाद्यते । अथ प्रयोजनाभावात् कारकातिरिक्तमन्यन्न जिज्ञास्यते, तर्हि क्रियामात्रावगमेऽपि यत्र कारकज्ञानेन प्रयोजनं नास्ति तत्र जिज्ञासा न स्यात् । अनुष्ठेयतया हि क्रियायामवगतायां कारकमन्तरेण तदनुष्ठानानुपपत्तेः। कारकज्ञानं प्रयोजनवद् वर्त्तमानोपदेशादौ त्वनुष्ठेयतया नास्ति

कारकज्ञानेन प्रयोजनम् । अथ च तत्रापि वाक्यमपरिपूर्णं मन्यन्ते, साकाङ्क्षार्थाभिधायितया चापरिपूर्णता। अत एव च तत्राध्याहारमपि कुर्वन्ति । यत्रापि चानुष्ठेयक्रियावगमः, तत्रापि च निःशेषकारकजिज्ञासा स्यात् । तथा, देवदत्त! गामानयेति करणानुवादाभावदपरिपूर्णता स्यात् । अथैककारकज्ञानेनाऽपि तावदनुष्ठानोपपत्तेर्न कारकान्तरजिज्ञासा, तर्हि देवदत्त! गामानय दण्डेनेति प्रयुक्तेऽपि दण्डशब्दे तदाकाङ्क्षा न स्यात् । ततश्चानाकाङ्क्षितत्वात् तस्य तदन्वयो न स्याद् वाक्यार्थे । अथ दण्डपदोच्चारणात् तत्राकाङ्क्षा परिकल्प्यते । अपदार्थस्यानन्वये तत्पदोच्चारणमनर्थकं स्यादिति ॥

एवमप्यरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणातीत्यनन्वयप्रसङ्गः । न हि वेदपदोच्चारणेनानर्थकेन भवितव्यमिति किञ्चन प्रमाणमस्ति। अतो न तत्राकाङ्क्षोदये किञ्चित् कारणमस्तीति सोमं क्रीणातीत्यतोऽधिकस्यानन्वितता स्यात् । अपि च लौकिकत्वात् क्रियाकारकयोर्यत्किञ्चित्क्रियाकारकोपादानेऽपि तत्सिद्धेरपि विघाताभावाति व विशेषजिज्ञासा घटते । अज्ञाते हि ज्ञानेच्छा घटते, न पुनर्ज्ञातेऽपि ॥

अत्रोच्यते, अभिधानापर्यवसानमभिधेयापर्यवसानं च जिज्ञासोदयनिबन्धनम् । एकपदप्रयोगे हि द्वारमित्यभिधानमेव, न पर्यवस्यति । न ह्यनुच्चरिते प्रतियोगिसंनिधायिनि पदेऽन्वताभिधानं शक्यते । वृद्धव्यवहारवशेनान्वितार्थप्रतिपादनपरता पदानामवधारितेति तदर्थं प्रयुक्तैव प्रतियोगिजिज्ञासा। वस्याप्यभिहितान्वय इति राद्धान्तः, तन्मतेऽपि पदार्थस्य पदार्थान्तरेणान्वयासामर्थ्यात् तदुपपत्तये युक्तैव प्रतिज्ञा सा । तस्यां च सत्यामपरिपूर्णवाक्यपरिपूरकतया लोके व्यवहारस्य विहितत्वात् प्रकरणादिवशेन योग्यप्रतियोग्यध्याहारः क्रियते । अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीत्यादिष्वनेकपदप्रयोगादन्विताभिधानेऽप्यभिहितस्य कार्यस्यापूर्वात्मनोऽनुष्ठानं विना कार्यत्वानुपपत्तेः । कर्ता च विना तदसम्भवादधिकारादृते च तदयोगान्नियोज्यमन्तरेण च तस्यानवकल्पनात् तदुपपत्तये युक्तैव नियोज्यजिज्ञासा । तस्यां सत्यामपरिपूर्णत्वावगमाल्लौकिकवदध्याहारे कर्तव्येऽन्तरङ्गत्वे परिधेरनुष्ठानाक्षेपो मा कल्पय्येतेति तत्परित्यागेन काम्यनियोज्यविशेषणे स्थिते सर्वकामिपुरुषव्यापिस्वर्गस्यैव नियोज्यविशेषणत्वयोग्यत्वात् स्वर्गकामो नियोज्योऽध्या-

ह्रियते । तथाचाध्ययनविधावन्यप्रयुक्तानुष्ठाननिर्वाहिकार्यभावे नियोज्यो नाध्याह्रियते । अयौगिकत्वाच्चापूर्वे कार्ये नियोज्यत्वस्याध्याहारमन्तरेणाकाङ्क्षा निवर्तते । अलौकिकत्वादेव च, सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इत्यादौ करणोपकारमन्तरेण विधेः सिद्ध्यसम्भवात् तज्जिज्ञासा, तज्जनकपदार्थजिज्ञासा च । अत एव तदभावे भाष्यकारो वाक्यानां न्यूनतामाशङ्क्य परिहृतवान् ॥

नन्वेवं तर्हि यत्र पदत्रयं प्रयुज्यते— गामानय शुक्लामिति लोके, तत्र हि कारकद्वयस्यासम्भवान्नाकाङ्क्षाऽस्तीति कथमन्विताभिधानम् । गामानयेत्येतावतैव परिपूर्णत्वाद्वाक्यस्य । सत्यम् । पदान्तरानुच्चारण एवम् । उच्चरिते तु तस्मिन् तस्याप्यानयतिसन्निधानादेकवाक्यस्यावगमादानयत्यन्वितस्वार्थाभिधायित्वादाकाङ्क्षां विना च तदसम्भवादानयतेराकाङ्क्षापरिकल्प्यते । तथाचोक्तं भाष्यकारेण—भवति च रक्तं प्रत्याकाङ्क्षेति । तेनात्रान्विताभिधानसिद्ध्यर्थमेवाकाङ्क्षा । यदि परमयं विशेषो, द्वारमित्यादौ तस्यैव पदस्यान्विताभिधानायाकाङ्क्षा, गामानय शुक्लामिति तु पदार्थान्तरस्येति ॥

अन्वितस्याभिधानार्थमुक्तार्थघटनाय वा ।
प्रतियोगिनि जिज्ञासा या साकाङ्क्षेति गीयते, इति सङ्ग्रहश्लोकः ॥

सा चेयमाकाङ्क्षा भवन्ती व्युत्पत्तावुपलक्षणमाश्रीयते । किमिति पुनः सन्निधियोग्यत्वे एव नाश्रीयते । साकाङ्क्षेणान्विताभिधानदर्शनात् । अयमेति पुत्रो राज्ञः पुरुषोऽयमपनीयतामिति पुत्रपदसम्बन्धनिराकाङ्क्षो राजा, न पुरुषेणान्वीयते । कस्मात् पुनरनयोः पुत्रपुरुषयोः सन्निधियोग्यत्वाविशेषेऽपि पुत्रेणैव राज्ञः सम्बन्धो, न पुरुषेण । उच्यते । न्यायसापेक्षत्वाद् वाक्यस्यार्थप्रतिपत्तेः । नित्यसापेक्षेण पुत्रेणैव राजा सम्बद्ध्यते । तत्सम्बन्धिनिराकाङ्क्षश्च न पुरुषसम्बन्धमनुभवतीति । आकाङ्क्षाऽपि व्युत्पत्त्युपलक्षणमाश्रीयते ।

परिपूर्णेन योग्यस्य समीपस्याप्यनन्वयः ॥
व्युत्पत्तौ तेन शब्दानामाकाङ्क्षाप्युपलक्षणम्, इति सङ्ग्रहः ॥

सा चेयमाकाङ्क्षा प्रतियोगिषु सर्वेषु न सहसैवोपजायते, किन्तु कारणोपानपातक्रमेण । तथाहि— विषयमन्तरेणापूर्वं कार्यं प्रत्येतुमेव न शक्यत इति प्रतिपत्त्यनुबन्धभूतविषयापेक्षा प्रथमं विधेः । अथ प्रतिपन्ने विषयसम्बन्धिनि विध्यर्थे नियोज्यमन्तरेणासिद्ध्य ,

सम्भवान्नियोज्याकाङ्क्षा । तथाच विषयीभूते च भावार्थे च करणलब्धे वैकृतापूर्वाणां करणोपकाराकाङ्क्षा । लब्धे च तस्मिंस्तज्जनकपदार्थाकाङ्क्षेति । तथाचाहुः—

प्रतियोगिषु सर्वेषु नाकाङ्क्षोदेति तत्क्षणात् ।
कारणोपरिपातानुपूर्व्येण तु यथायथम् ॥

तत्क्रमेणान्विताभिधानमपि क्रमेणैव । श्लोकश्च भवति—

जिज्ञासा जायते बोद्धुः सम्बन्धिषु यथा यथा ।
तथा तथैव शब्दानामन्विताार्थाभिधायिता ॥

अथ यथा सन्निधिकथनं तथा बुद्धौ विपरिवृत्तिः । सा च न शब्दनिबन्धनैव, केवलाऽन्विताभिधानव्युत्पत्तौ उपलक्षणम् । अध्याहृतेनापि लोकेऽन्विताभिधानदर्शनात् । न च वाच्यं शब्द एवाध्याह्रियते । स चार्थमुपकल्पयतीत्यनुपयोगादप्रमाणकत्वाच्च । यद्यप्यर्थापत्तिप्रमाणकोऽध्याहारः, तथापि शब्दकल्पनमनुपपन्नम् । येन हि विनाऽनुपपत्तिः, तदेवार्थापत्तिप्रमेयम् । नचार्थानां शब्दमन्तरेणानुपपत्तिः स्यान्मतम् । अर्थकल्पनायैवार्थापत्तिः प्रवर्त्तमाना तस्यार्थस्य सविकल्पकज्ञानवेद्यत्वात् । सविकल्पकज्ञानानां च शब्दपुरःसरत्वात् पुरोवर्त्तिनि शब्द एव पर्यवस्यतीति । तदसत् । यथैव शब्दपुरःसरेऽपि सविकल्पकज्ञाने लिङ्गस्येन्द्रियाणां च निर्विकल्पकदशायामर्थ एवावधारितशक्तित्वान्न शब्दमात्रे पर्यवसानम् । तथा दृष्टार्थापत्तौ साक्षादुपपादकेऽर्थ एवार्थापत्तेः प्रामाण्याऽभ्युपगमात् । श्रुतार्थापत्तावपि तत्रैव तस्याः प्रामाण्यं युक्तं, न शब्दे । तस्य साक्षादनुपपत्तिशमनासमर्थत्वात् । किञ्च सर्वत्र सविकल्पकज्ञाने शब्दस्मरणाविपरिवर्त्ती न प्रमेयतां प्रतिपत्तुमर्हति। सविकल्पकज्ञानेषु पूर्वप्रतीयमानता च शब्दस्य नातीव प्रमाणवती। किन्त्वर्थप्रतीतावेव समानकालं शब्दस्मरणमिति प्रतीत्यारूढम् । तेन श्रुतार्थापत्तिः शब्दविषया । न च शब्दानुपपत्त्या शब्दकल्पनैवोचिता । तस्य स्वतोऽनुपपत्त्यभावात् । अन्विताभिधानानुपपत्त्या तु कल्पना प्रसरन्ती योग्यप्रतियोग्यर्थविषयैवावतिष्ठते । तस्यैवाकाङ्क्षितत्वात् । दशमाद्यन्यायेन पदार्थवत् पूर्वप्रतीतस्यापि शब्दस्योपेक्षणीयत्वात् । न च द्वारमिति यत्राध्याहारस्तत्राप्याव्रियतां संव्रियतामिति वा कल्पयितुमर्थापत्तेः प्रभविष्णुता । सामान्यकल्पना-

मात्रहेतुत्वात् । तस्मादपरिपूर्णपरिपूरकतया लोकत एवाऽध्याहारस्याऽभ्युपपत्तिः । तत्र योग्यतया प्रकरणादिवशेन च विशेषावधारणादर्थ एव च परिपूरक इत्यनुपयोगी शब्दस्याध्याहारः । अतो विश्वजिदादौ नियोज्येन च सर्वत्र च करणोपकारेण विकृतिषु च प्रकृतपदार्थैरशब्दोपस्थापितैरपि सिद्धमन्विताभिधानम् । आकाङ्क्षावच्च सन्निधावपि सन्निधापकक्रमेणैव क्रमो वेदितव्यः । तदनुसारेण चान्विताभिधानमपि तथैवेति ॥

सन्निधिः शब्दजन्मैव व्युत्पत्तौ नोपलक्षणम् ।
अध्याहृतेनाप्यर्थेन लोके सम्बन्धदर्शनात् ॥
सहसैव न सर्वेषां सन्निधिप्रतियोगिनाम् ।
सन्निधापकसामग्रीक्रमेण क्रमवानसौ ॥
यथा यथा सन्निधानं जायते प्रतियोगिनाम् ।
तथा तथा क्रमेणैव शब्दैरन्वितबोधनम्, इति सङ्ग्रहश्लोकाः ॥

तौ यथोक्तावाकाङ्क्षासन्निधी प्राप्तमाकाङ्क्षितं सन्निहितं योग्यं च यत् पदार्थान्तरं तेन सङ्गतमित्यर्थः । किं पुनरिदं योग्यत्वं नाम । यत् सम्बन्धार्हत्वम् । सम्बन्धार्हमिति कथमवगम्यते । सम्बन्धित्वेन दृष्टत्वात् । नन्वेवं तर्हि कथमपूर्वे कार्येऽन्विताभिधानं वेदे । तेन सह कस्यचित् सम्बन्धादर्शनात् । उच्यते । सामान्यतो योग्यतावधारणं विशेषप्रतिपत्तावुपाय इत्यदोषः । यदपि तदपूर्वं तदपि कार्यमेवेति दृष्टचरकार्यसम्बन्धं यत् तद् योग्यमित्यवसीयते ॥

सामान्येनैव योग्यत्वं लोके यदवधारितम् ।
तदन्विताभिधानस्य व्युत्पत्तावुपलक्षणम् ॥

अन्ये तु यदयोग्यतया नावधारितम् । तद् योग्यम् । तेन प्रमाणान्तराप्रतीतेनापि विध्यर्थेनान्विताभिधानं सिद्ध्यतीत्याहुः । तदिदमसारम् । यथा प्रमाणान्तरावेद्ये वस्तुनि कस्यचिद् योग्यताऽवधारयितुं न शक्यते तथैवायोग्यताऽपीति सर्वस्य सर्वेण प्रकारेण तस्मिन्नन्वयः स्यात् । भावार्थस्यैव विषयत्वेनान्वयोऽनुपादेयविशेषणविशिष्टस्यैव नियोज्यतयान्वय इति नियमो नोपपद्यत इत्यलमतिप्रसङ्गेन ।

नन्वन्विताभिधानपक्षे व्युत्पत्तावुपलक्षणाश्रयणमेव गौरवमित्यत्राह— पदार्थेष्वपि चैवैषा सामग्र्यन्वयबोधिनी ॥

यस्यापि मते पदार्था एवाऽन्योन्यान्वयमवगमयन्ति, तेनाऽपि प्रतिनियतान्वयबोधसिद्ध्यर्थमिदमाश्रयणीयमेव । आकाङ्क्षासन्निधियोग्यतावन्त एव पदार्था अन्वयं बोधयन्ति, नान्ये इति । एतदेव कथमिति पर्यनुयुक्तेन वृद्धव्यवहारे तथा दर्शनादिति परिहारो वाच्यः । तस्मादुभयपक्षसाधारणत्वान्नेदं दूषणम् ॥

नन्वेवमपि केन विशेषेणाभिहितान्वयं परित्यज्यान्विताभिधानमाश्रितमिति । अत्राहुः—

किन्तु तेषामदृष्टैषा शक्तिर्मानान्तरोद्गता ।
कल्प्या विशिष्टार्थपरपदसंस्पर्शभाविता ॥

पदार्थानां हि शब्दादन्यतः प्रमाणात् प्रतीयमानानामन्योन्यान्वयबोधकत्वं न प्रतीतमिति शब्दाभिधेयानां तदवगमशक्तिः कल्पयितव्या । तस्याश्चोत्पत्तौ शब्दसंस्पर्श एव हेतुरित्याश्रयणीयम् । शब्दो हि विशिष्टार्थप्रतिपत्तिपरतया लोकव्यवहारेषु प्रयुज्यमानो दृष्टः । न चासौ साक्षाद्वाक्यार्थप्रतिपादने समर्थ इति पदार्थान् अवान्तरव्यापारीकरोतीति च यद्यन्योन्यान्वयबोधने समर्थाः स्युस्तदा तेषामवान्तरव्यापारता स्याद्, नान्यथेति विशिष्टार्थावबोधपरशब्दसंस्पर्शादेव तेषामेषा शक्तिराविर्भवतीति शब्दस्यापि पदार्थशक्त्याधानशक्तिराश्रयणीया । स्यादेवम् । यदि मानान्तरावसेयानां पदार्थानामन्योन्यान्वयावगमे सामर्थ्यं न स्यादिति । अस्ति तु श्वैत्यस्यानवधारिताश्रयविशेषस्य प्रत्यक्षदृष्टस्याश्वस्याप्रतिपन्नगुणविशेषस्य च प्रत्यक्षहेषाशब्दानुमितस्य पदनिक्षेपशब्दाऽनुमितस्य चाज्ञातकर्तृभेदस्य धावनस्य श्वेतोऽश्वो धावतीत्यन्वयबोधकत्वदर्शनात् ॥

तदाहुर्वार्त्तिककारपादाः—

पश्यतः श्वेतमारूपं हेषाशब्दं च शृण्वतः ।
खुरनिष्पेषशब्दं च श्वेतोऽश्वो धावतीति धीः ॥
दृष्टा वाक्यविनिर्मुक्ता, इति ॥

आरूपमव्यक्तरूपमित्यर्थः । तेन गुणिविशेषो न प्रत्यक्षमवसीयत इत्यर्थः ॥

अत्रोच्यते— किं येनैव पुरुषेण श्वैत्यसमानाश्रयौ हेषाध्वनिपदनिक्षेपशब्दाववगतौ, तस्यैवेयं श्वेतोऽश्वो धावतीति धीः? उत यस्यापादानानध्यवसायः, तस्यापीति । किमतः । यदि तावदप्रत्याकलित-

हेषाध्वनिपद्विहारनिर्घोषाः पादा न स्युरित्युच्यते, तदा प्रतीतिविरोधः । स ह्येवं प्रतिपाद्यते । भवितव्यमस्मिन् देशे नूनमश्वेन भवितव्यं च केनाचिद्धावतेति । अथाश्वसम्बन्धिनमेव खुरपुटटङ्कारवमभ्यासवशाद्वेति, तदासावश्ववर्तिनीमेव वेगवतीं गतिमनुमिनोतीति । न पुनः केवलमेवावगम्य तस्याश्चान्वयः पदार्थसामर्थ्येन अवबुद्ध्यते । योऽपि तस्मिन् देशे नास्त्यन्योऽश्वादिति निश्चित्य पारिशेष्याद्पादानाध्यवसायेऽपि हेषाध्वनेः श्वैत्यसमानाधिकरणमश्वत्वमप्यध्यवस्यति । तस्या विग्रहाभाव इव बहिर्भावावगतावर्थापत्तिः । योऽयं श्वेतः स एषोऽश्व इत्यत्र प्रमाणम् । यस्तु श्वैत्यसमानाधिकरणौ हेषाध्वनिखुरपुटटङ्कारावध्यवस्यति, तस्याप्यश्वत्वे वेगवति च गमने श्वेनवर्तिन्येवानुमानं, न स्वतन्त्रयोरिति प्रमाणान्तरेणासम्बद्धावभातानां पदार्थानां क्वचिदन्योन्यसम्बन्धबोधकत्वमनुमानार्थापत्तिव्यतिरेकेण प्रतीतम् । अपि च यदि पदार्थावगतिमात्रादेवान्वयावगमः, तदा कस्मिन् प्रमाणे कस्यान्तर्भाव इति वाच्यम् । न तावच्छाब्दे । शब्दाभावात् । पदार्थाभिधानावान्तरव्यापारेण हि यच्छब्दादन्यज्ञानं तच्छाब्दमित्येष वो राद्धान्तः । कस्माच्चास्य शाब्देऽन्तर्भावः । प्रमाणान्तराभ्युपगमे तु शाब्दस्योच्छेदः । शब्दावगतपदार्थविषयेऽपि तस्यैव प्रामाण्यप्रसङ्गात् । तस्माच्छब्दाभिहितानां पदार्थानामन्यत्रादृष्टार्थे वाक्यार्थबोधनसामर्थ्ये कल्पयितव्यम् । तदाधानशक्तिश्च शब्दानामपीति कल्पनालाघवाच्छब्दानामेवान्वितस्वार्थावबोधनशक्तिमात्रं कल्पयितुं न्याय्यम् । तेन पारम्पर्येण पदानामन्वितेषु सामर्थ्यमिति निरस्तम् ॥

नन्वनन्तप्रतियोग्यन्वितस्वार्थबोधनविषया अनन्ता एव शब्दस्य शक्तय इति कल्पयितव्याः स्युः । अभिहितान्वयवादे त्वेकस्मिन् अर्थे एकस्य शब्दस्यैकैव शक्तिरिति । तन्न । एकयैवाकाङ्क्षितसन्निहितयोग्यान्वितस्वार्थाभिधानशक्त्या प्रतियोगिभेदेन कार्यभेदोपपत्तेश्चक्षुरादीनामिव यथैवैकया दर्शनशक्त्या चक्षुर्घटादिप्रतियोगिसहायभेदाज्ज्ञानानि भिन्नानि जनयति, तथा शब्दोऽपि प्रतियोगिभेदादिति मन्तव्यम् । किञ्च पदार्थेष्वपि तुल्यमेतदिति न किञ्चिदेतत् ॥

अन्ये त्वाहुः—आकाङ्क्षासन्निधियोग्यतावन्तः पदार्था वाक्यार्थीभवन्ति, न पुनर्वाक्यार्थमेव बोधयन्तीति । तदिदमतिमन्दम् ।

वाक्यार्थावगतेः कारणाभावप्रसङ्गात्। अनुपायत्वे हि पदानामन्वय-प्रतीतौ पदार्था अपि चेन्न कारणमकारणिकैवापद्येत । स्यान्मतम् । क्रियापदेन कारकपदेन वा साकाङ्क्षेऽर्थेऽभिहिते यदेव पदान्तरेण योग्यप्रतियोगिपदार्थान्तरं सन्निधाप्यते, तदेव तस्य सम्बन्धित्वेनावतिष्ठत इति । सत्यमेवम् । अवगतिस्तु तत्सम्बन्धस्य किंनिबन्धनेति वाच्यम् । अथ पूर्वपदार्थे साकाङ्क्षे यत् पदान्तरमुच्चरितम्, तत् सम्बन्धितयैव स्वार्थमुपनयति प्रत्ययवत् । यथा प्रकृत्यर्थे पूर्वप्रतीते प्रत्यय उच्चार्यमाणः स्वार्थं तद्विशिष्टमेवाभिधत्ते। तथा पदान्तरमपि । तदुक्तं, प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इति। प्रकृतिः स्वार्थं प्रत्ययाऽर्थविशेषणत्वेनोपनयतीति प्रत्ययेन सह तदर्थमाहेत्यर्थः । स चोक्तसिद्ध्यर्थे विशिष्ट पदार्थे प्रत्ययो यत् प्रयुज्यते तत् पूर्वतरविज्ञानप्रकृत्यर्थो विशेषणादित्यङ्गीकृतं तर्हि द्वितीयस्य पदस्यान्विताभिधानं प्रथमस्य तथापि नास्तीतिचेन्न । वाक्ये पदानां प्रयोगक्रमनियमाभावात्। यदेव कदाचित् प्रथमं तदेव कदाचिद् द्वितीयमिति सर्वपदानामेवान्विताभिधानमापतितम् । अभिहितान्वयवादी च प्रकृतिप्रत्यययोरप्यन्वयव्यतिरेकाऽवधारितव्यतिरिक्तशक्तिकयोरभिहितान्वयमेव पदवदिच्छति । तथा च—

प्रकृतिप्रत्ययौ ब्रूतः प्रत्ययार्थं सहेति यत् ।
भेदेनैवाभिधानेऽपि प्राधान्येन तथोच्यते ॥
पाकं हि पचिरेवाह कर्त्तारं प्रत्ययोऽप्यकः ।
पाकयुक्तः पुनः कर्त्ता वाच्यो नैकस्य कस्यचिद्, इत्याह ॥

किञ्च प्रत्ययश्चेदन्विताभिधायी तदा तदविशेषात् पदानामप्यऽन्विताभिधायिता किमिति नाभ्युपेयते । किमर्थवैशसेन । यदि प्रकृतिप्रत्यययोरप्यन्विताभिधानमस्ति, न तर्हि द्वारमित्यत्रान्विताभिधानानुपपत्तिनिबन्धनाकाङ्क्षया विध्रियतां संव्रियतां वेत्यध्याहारः । उच्यते । द्वारमिति प्रथमेयं प्रातिपदिकादतिरिक्तार्थाभिधायिनी । तेनात्र केन सहेत्यस्यान्वितस्याभिधानं व्यतिरिक्तार्थे प्रत्यये प्रविशेत्यादौ योऽध्याहारः, सोऽभिहितार्थानुपपत्त्यैव विश्वजिदादिवदिति न दोषः ॥

वार्तिककारपादास्तु लाक्षणिकान् सर्ववाक्यार्थानिच्छन्तः पदार्थानामन्वयावबोधशक्तिकल्पनां निराकुर्वन्ननन्विताववस्थौ हि पदा-

ऽर्थोऽभिहितोऽन्वितावस्थां स्वसम्बन्धिनीं लक्षयति । अवस्थावतो हि सम्बन्धादवस्थावत्यभिहिते भवत्येवावस्थापि बुद्धिस्था । सर्वत्र च सम्बन्धिनि दृष्टे सम्बन्ध्यन्तरे बुद्धिर्भवतीति क्लृप्तमेव । तेन नास्ति पदार्थानामन्वितबोधने शक्तिकल्पनेति । तदाहुः—

वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैव हि लक्ष्यते, इति ॥

अत्रापरे ब्रुवते— नेयं लक्षणा । स्वार्थापरित्यागात् । स्वार्थपरित्यागेन हि गङ्गादिषु लक्षणा दृष्टेति । ते तु न मीमांसातन्त्रान्तःपातवैकल्येनैवमाहुः । लक्षणीयवशेन हि क्वचित् स्वार्थस्य त्यागः । सङ्ग्रहो वा सृष्टीरुपदधातीति लक्षणस्यापि स्वीकारः । गुणिनां लक्ष्यमाणत्वात् तदन्तर्गतत्वाच्च सृष्ट्यर्थस्य । तथा पौर्णमासीं यजत इत्येकवचनानुपपत्त्या पौर्णमासीशब्दो यागवचनो यागसमुदायलक्षणार्थम् । न च समुदायपरिग्रहे समुदायित्यागः । तदाश्रयत्वात् तस्य । तथेतरेतरद्वन्द्वे द्विवचनबहुवचनानुपपत्तेरर्थान्तरसहितावस्था लक्षणाऽऽश्रीयते । नचावस्थावत् परित्यागः । तथा निषादस्थपत्यधिकरणपूर्वपक्षे षष्ठ्यर्थलक्षणा स्यादित्युच्यते । न तत्र प्रकृत्यर्थस्य त्यागोऽप्यापद्यते । तथा रथघोषेणेत्यत्र रथस्यापरित्यागः तथा मेधमित्येकवचनान्तस्य गणलक्षणया मन्त्रस्य प्रकृतौ निवेशः । न च गणिनोरग्नीषोमयोस्तत्र हानमिति सर्वार्थापरित्यागेऽपि युक्तैव लक्षणा ॥

अत्रोच्यते । कथं पुनरियं लक्षणा ।

वाच्यस्यार्थस्य वाक्यार्थे सम्बन्धानुपपत्तितः ।

तत्सम्बन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते, इत्युत्तरश्लोकः ॥

गङ्गायां घोष इत्यादिषु श्रौतस्य गङ्गार्थस्य वाक्यार्थेऽन्वयासम्भवात् तं परित्यज्य तत्सम्बन्धाल्लब्धबुद्धिसन्निधेः कूलस्य वाक्यार्थान्वयिताध्यवसीयते । अत एवाहुः— अनुपपत्त्या सम्बन्धेन च लक्षणा भवति इति । इह च गामानयेत्यादौ न श्रौतस्यार्थस्यान्वयाऽयोग्यत्वं, नापि अन्वितावस्थस्यानयनसम्बन्धाकृता । अन्वितार्थस्यान्वयान्तरासम्भवात् । अथ मा भूदेषा लक्षणा, किन्तु क्रियावगता कारकान्वयिनीमात्मनो दशामवगमयति । अविनाभावादिति । उच्यते । शाब्दत्वं तावदित्थमपह्नुतमन्वयावगमस्य, किन्तु सामान्यतो दृष्टानुमानगोचरताभ्युपगता भवति । तथा विशिष्टान्वयावगति-

रनुपपद्यमाना निर्मूलमापद्यते । अथ विशेषान्वयं विना व्यवहारानवकल्पनादनर्थकं शब्दोच्चारणमिति तदाश्रयणम् । एवमपि प्रेक्षापूर्वकारिणां स्वार्थैकवाक्यमात्रप्रयोगिणां वचनाद् विशेषान्वयावगमः । वेदे त्वानर्थक्येन न भवितव्यमिति प्रमाणाभावान्न शक्यते विशेषोऽवगन्तुम् । न च लोकेऽप्यानर्थक्यमापद्यत इत्येतावता कारणेनोपायान्तरेणापि विशेषान्वयाध्यवसानं युक्तम् । न हि दग्धुकामस्योदकोपादानमनर्थकमिति जलस्य दाहशक्तिराविर्भवति । काममानर्थक्यम्। न पुनः सामान्यतो दृष्टस्य विशेषावसायिता । अथाकाङ्क्षितसन्निहितयोग्यान्वयपरता वृद्धव्यवहारे पदानामवगतेति व्युत्पत्त्यनुसारेण विशेषान्वयावगमः । तन्न । तत्र वृद्धव्यवहार एव तत्परता पदानां वा पदार्थानामुपायभावेन कथं नाम निर्वहति । चिन्ता सा हि पदानां पदार्थानां वा शक्तिकल्पनां विनाऽनुपपन्नेति मन्यामहे ॥

सा च पदानामेवेत्याह—

प्राथम्यादभिधातृत्वात् तात्पर्यावगमादपि ।
पदानामेव सा शक्तिर्वरमभ्युपगम्यताम् ॥

प्रथमभावीनि पदान्यतिलङ्घ्य नार्थेषु वाक्यार्थबोधनशक्तिराश्रयितुं युक्ता । किञ्च, पदानि तावदभिधायकानीति निर्विवादम् । तेन तेषामभिधानशक्तिःसम्प्रतिपन्नेति तस्या एवान्वयपर्यन्तता कल्पयितुं सुकरा । पदार्थानां तु बोधनशक्तिरेव कल्प्या । तेन धर्मिकल्पनातो वरं धर्मकल्पनेत्यन्विताभिधानशक्तिः पदानामेव कल्पयितुमुचिता । किञ्च पदान्यभिधायकानीष्यन्ते । तत्र यदि स्वरूपमात्रविषयामेव पदार्थबुद्धिमादध्युः । तदाप्यभिधायकता हीयते । तस्या बुद्धेः सम्बन्धग्रहणसमयजातपदार्थबोधकसंस्कारोन्मेषप्रभवत्वात् । अवश्यं हि सम्बन्धस्मरणसिद्ध्यर्थं सम्बन्धिभूतार्थस्मरणसंस्कारोद्बोधोऽङ्गीकरणीयः । तस्मात् सम्बन्धग्रहणसमयानधिगतान्वितार्थप्रतिपादनाभ्युपगम एव शब्दानामभिधायकतेति तामङ्गीकुर्वता पदानामन्विताभिधायकताश्रयणीया । यस्तु पदमभ्यधिकाभावात् स्मारकान्न विशिष्यत इति तदा भावनावचनस्तावत् तां स्मारयति । लोकवदिति च आचार्यवचनदर्शनात् स्मारकतामेव पदानामभिधायकत्वमाह । तं प्रत्याह । तात्पर्योपगमादपीति । येनापि वादिना पदानां स्मारकत्वमेव पदार्थेष्वङ्गीकरणीयं, सोऽपि

वाक्यार्थप्रतिपत्तिपरतां पदानामभ्युपेत्यैव । अन्यथा वाक्यार्थस्याशाब्दत्वप्रसङ्गः। एवञ्चेत् पदानामेव साक्षाद्वाक्यार्थबोधनशक्तिरस्तु, किं परस्पराश्रयप्रपञ्चात् । तेन पदार्थेषु पदानां स्मारकत्वातिरिक्तं येऽभिधायकत्वमाहुः, तेषां शक्तित्रयकल्पना । एका तावत् पदानामभिधायकशक्तिः । अपरा च पदार्थगता अन्वयबोधनशक्त्याधानशक्तिः । पदार्थानां चान्वयज्ञापनशक्तिरिति । स्मारकत्ववादिनस्त्वभिधानशक्तिं हित्वा शक्तिकल्पनालाघवादुक्तेनैव न्यायेन पदानामेव शक्तिकल्पना न्याय्या। उचितत्वादन्विताभिधायीनि पदानीति स्थापितम् ॥

सम्प्रति पूर्वोक्तमितरेतराश्रयदोषं परिहर्तुं यथा पदेभ्यो वाक्यार्थप्रतिपत्तिस्तथा दर्शयति—

पदजातं श्रुतं सर्वं स्मारितानन्वितार्थकम् ।
न्यायसम्पादितव्यक्ति पश्चाद्वाक्यार्थबोधकम् ॥

यस्तावदगृहीतसम्बन्धः, यस्य च सम्बन्धग्रहणसंस्कारो नोत्पन्नः प्रध्वस्तो वा स वाक्यार्थप्रतिपत्तौ नाधिक्रियते । यस्त्वनवभ्रष्टसम्बन्धग्रहणसंस्कारः । स पदं श्रुत्वा नूनं तावदिदं स्मरति, इदमिदमस्याकाङ्क्षितसन्निहितयोग्यप्रतियोग्यन्वितस्य वाचकमिति । एवञ्च स्मरता स्मृतमेवानन्वितमपि स्वरूपमन्वयभाजाम् । नचैकपदश्रवणे वाक्यार्थावगतिरितिकश्चिन्मन्यते। अभिहितान्वयवादिनोऽपि हि यावत् पदान्तरमर्थान्तरं नोपस्थापयति, तावदन्वयावगमो नास्ति । पदार्थस्यान्वयावबोधिनः पदार्थान्तरापेक्षत्वात् । प्रतियोगिसापेक्षत्वादन्वयस्य । अतस्तन्मतेऽपि सर्वपदैरनन्वितस्वार्था अभिधीयमानाः पश्चात् तेभ्यः सर्वेभ्यः स्मृत्यारूढेभ्यो वाक्यार्थप्रतिपत्तिरङ्गीकरणीया ॥ तदाहुर्वार्तिककारपादाः—

तेऽपि नैवास्मृता यस्माद् वाक्यार्थं गमयन्ति नः ।
तस्मात् तत्स्मरणेष्वेव संहतेषु प्रमाणता, इति ॥

अत एव तत्रभवत आचार्यस्य वाक्यलक्षणं संहत्य अर्थमभिदधति पदानि वाक्यमिति । नन्वन्विताभिधानवादिना कथं वाक्यार्थप्रतिपत्तिः । श्रूयमाणेन हि पदेन योऽर्थो नावबोधितः, स कथमन्तर्हितेन तस्मिन्नवभासेत । उच्यते । अभिहितान्वयवादिनोऽपि नायं नियमः श्रूयमाण एव पूर्ववर्णजनितसंस्कारसहितोऽन्त्यो वर्णः पदा-

ऽर्थप्रतिपादक इति बाल्यदशाधीतत्वात्। प्रागनवधृतार्थादङ्गपरिज्ञानसंस्कारात् पश्चात् स्मृतादपि वेदार्थावगमदर्शनात्। तेन स्मृत्यारूढस्यावगमकत्वमदोषः। श्रूयमाणेन हि पदेन प्रतियोगिसापेक्षत्वादन्विताभिधानस्य प्राक् सहकारिविरहादर्थो नाभिहितः। पश्चादभिधीयत इति किमनुपपन्नम्। येऽपि वादिन एवमाहुः— एकमेव पदमन्विताभिधायकमस्तु, इतराणि च पदानि प्रतियोगिसन्निधापनमात्र एव व्याप्रियन्ताम्। न या गृह्यमाणविशेषता, प्राथम्येन प्रधानपदत्वेन वा विशेषग्रहणात्। अत एवमाहुः— प्रधानं पदं वाक्यमाद्यं पदं वाक्यमिति। तान् प्रत्याह। सर्वमिति। प्रथमस्यैव स्याद् वाक्यता यदि सर्वपदार्थानां प्रथमपदार्थान्विता स्यात्। नचायं नियमः। अरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणातीति क्रयमात्रान्वयित्वादारुण्यस्य। किञ्च वाक्ये पदानामानुपूर्व्यनियमाभावात् कदाचित् तदेव प्रथमं सदन्विताभिधायकम्, अन्यदा नेति न युक्तम्। तथा प्रधानपदस्यापि वाक्यत्वमयुक्तम्। सोमपदेन सह सर्वेषामनन्वयात्। यद्यप्यरुणादीनां सर्वेषां सोमं प्रत्यैदमर्थ्यमस्ति। तथाप्यस्मिन् वाक्ये क्रय एवारुण्यादीनामैदमर्थ्येन क्रियाकारकभावेन चान्वयः। क्रयद्वारेण तु सोमं प्रत्यैदमर्थ्यमात्रम्। अथ यत् प्रतिपादनपरं वाक्यं, तत् प्रधानमित्युच्यते, इह तु क्रय एव सर्वकर्मकरणावच्छिन्नः प्रतिपाद्यते। तेन क्रीणातीत्येव प्रधानं पदं, तदन्वयिता च सर्वेषामरुणादीनामिति। अत्रोच्यते। वाक्यस्य यत् तावत् तात्पर्यं तदव्यवस्थितम्। क्वचिदाख्यातपरत्वमेवाग्निहोत्रं जुहोतीति। क्वचिद् गुणविधिपरत्वं, दध्ना जुहोतीति। तेन प्रधानपदत्वस्यापि सर्वेषां पदानां सम्भवात् सर्वेषामेव पदानामन्विताभिधानशक्तिराश्रयणीया। तथाच सति यत्रापि गुणपरत्वम्। तत्रापि क्लृप्तशक्तिकतयान्विताभिधायकत्वमविरुद्धम्। पदार्थेष्वपि चैतत् तुल्यमेव। नन्वेवं गामानयेत्यादौ परस्परपर्यायता सर्वशब्दानां स्यात्। यथा गामित्यनेनान्विताभिधानम्। तथानयेत्यनेनापि। उच्यते। द्वावेतावर्थौ, यदानयनान्वितं गोत्वम्। गवान्वितं चानयनमिति। तेनैकैकेनैकैकस्यार्थस्याभिधानात् कुतः पर्यायत्वप्रसङ्गः। पदार्थेष्वपि चैतत् समानम्। ननु क्रीणात्यर्थस्यारुण्याद्यनेकान्विताभिधानादावृत्तिलक्षणो वाक्यभेदः स्यात्। न। तन्त्रोच्चारणाद्। वैरूप्ये च

तन्त्रतानुपपत्तेर्वाक्यभेदः स्यात् । न्यायसम्पादितव्यक्तीति किमिदं, यावन्न्यायेन वचनव्यक्तिः सम्पाद्यते, तावत् पदजातं वाक्यार्थस्याऽवबोधकं न भवति । लोकव्यवहारानुपपत्तिभिर्न्यायैर्यावदिदं विधेयमिदमनूद्यमिदं प्रधानमिदं गुणभूतमिदं विवक्षितमिदमविवक्षितमित्यादि न सम्प्रधार्यते, तावन्न कश्चिद्वेदवाक्यार्थमवबुध्यते । तदुक्तं वार्तिककारपादैः—

तावदेव हि सन्देहो वेदवाक्ये श्रुते भवेत् ।
यावन्न वचनव्यक्तिस्तस्य स्पष्टावधार्यते ॥
ज्ञात्वा च वचनव्यक्तिं मीमांसान्यायकातराः ।
प्रलीयन्ते समस्ताश्च वेदवाक्यार्थसंशयाः, इति ॥

अत एव मीमांसाया वेदवाक्यप्रतिपत्ताविति कर्तव्यतात्वम् । तदुक्तं तैरेव—

धर्मे प्रमीयमाणे हि वेदेन करणात्मना ।
इतिकर्त्तव्यताभागं मीमांसा पूरयिष्यति ॥

ननु लोके द्रागेव वाक्यार्थावगतिर्नैयतीं सामग्रीमपेक्षते । उच्यते । अत्यन्ताभ्यस्तेषु वाक्येषु स्यादेवम् । अदृष्टपूर्वेषु स्मृत्यादिवाक्येषु लोकेऽपि नानाविधविवादोत्थानात् कुतो द्रागेवार्थनिश्चयः । अपि च कारणाभावेनापि लोकस्यायमविवेको नास्ति । तदुक्तम्—

बहुजातिगुणद्रव्यकर्मभेदावलम्बिनः ।
प्रत्ययात् सहसा ज्ञाता ज्ञेयलाक्षणिकात्मकान् ॥
न लोकः कारणाभावान्निर्धारयितुमिच्छति ।
बलाबलादिसिद्ध्यर्थं वाक्यज्ञास्तु विविञ्चते, इति ॥

यच्चेदं सर्वपदानामन्विताभिधायित्वमुच्यते, तत् सर्वेषु श्रौतार्थेषु पदेषु । लाक्षणिकगौणार्थपदप्रयोगे तु यदेव श्रौतार्थं पदं तदेवाऽन्विताभिधायकम् । इतरत्तु पदं प्रतियोगिसन्निधापनपरमेव । तत्र वाचकत्वानवधारणात् स्वार्थस्यापि तत् तदानीमवाचकम् । अन्वयाऽयोग्यत्वात् । किन्तु तदर्थेन स्मृतेन यत् स्वसम्बन्धिसदृशं वा स्वयमन्वययोग्यमुपस्थाप्यते, तेनान्वितं श्रौतार्थमेव पदं स्वार्थमभिधत्त इति दर्शनरहस्यमिदम् । न च सर्वपदान्येव लाक्षणिकानि गौणानि वा वाक्ये सम्भवन्तीति निरवद्यम् । क्वचिदभिधानं निमित्तं क्वचिदभिहितोऽर्थ इति च यदुक्तं तच्छब्दोपस्थापितता

दर्शयितुं गौणमभिहितत्वग्रहणम् ॥

कथं पुनरन्विताभिधायिना पदेन स्वरूपमात्रेण स्मारयितुं शक्य-मित्याह–

अन्वितस्याभिधानेऽपि स्वरूपं विद्यते सदा।
तेन स्वरूपमात्रेऽपि शब्दो जनयति स्मृतिम् ॥

एवं सम्बन्धग्रहणान्तर्गतं स्वरूपस्मरणमुक्तम्। सम्प्रति स्वरूप-मात्रस्मरणमपि पदादेव नानुपपन्नमित्याह–

यथार्थेनाप्रमाणेन स्वपदं स्मार्यते क्वचित्।
पदेनाप्यप्रमाणेन तथार्थः स्मारयिष्यते ॥

न हि यत् प्रमाणं, तत् स्मरणकारणमेव प्रमाणं तत्। यस्य तु येन सह कदाचित् प्रत्यासत्तिः प्रतीतपूर्वा, सा तत्र संस्कारोद्बोध-द्वारेण शक्नोत्येव स्मृतिं जनयितुम्। अस्ति च स्वरूपस्यापि तदभि-धेयान्तर्गत्या शब्देन प्रत्यासत्तिरिति शक्नोति। तत्रापि शब्दस्मृतिं जनयितुमर्थवत्। यथा निर्विकल्पकदशाप्रतीतमर्थस्वरूपमात्रमनभि-धेयमपि शब्दं स्मारयति, तथा शब्दोऽप्यर्थमिति किमनुपपन्नमेतेन। पदोच्चारणानन्तरा पदार्थस्वरूपप्रतीतिः सदर्थिता। अभिहितान्वय-वादिनोऽपि सा न प्रमाणम्। अभ्यधिकार्थपरिच्छेदाभावात्। अनधि-गतार्थगन्तृ प्रमाणमिति सिद्धान्ताभ्युपगमात्। तदुक्तम्—सर्वस्या-ऽनुपलब्धेऽर्थे प्रामाण्यं स्मृतिरियमिति। यदि पुनः स्मृतिरेषा नाभ्यु-पेयेत तदा प्रमाणस्मृतिसंशयविपर्ययेभ्यः प्रतिपत्त्यन्तरानभ्युपगमात् पदात् स्वपदार्थप्रतीतिः क्वान्तर्भाव्यतामिति वाच्यम्। अत एवाभि-हितान्वयवादेऽपि स्मारकत्वमेवास्मभ्यं रोचते ॥

इतरेतराश्रयमिदानीं परिहरति–

स्मृतिसन्निहितैरेवमर्थैरन्वितमात्मना।
अर्थमाह पदं सर्वमिति नान्योन्यसंश्रयम् ॥

स्वार्थस्वरूपमात्रस्मरणे हि न पदं पदान्तरमपेक्षते। स्मृतिसन्नि-हितमपीदं भवत्येव सन्निहितम्। नास्ति तेनेतरेतराश्रयत्वम्। ननु वृद्धव्यवहारेण व्युत्पत्तिः। अन्वितप्रतिपत्तिनिबन्धनश्च व्यवहारः। अतस्तद्दर्शनादन्वितप्रतिपत्तिरेवानुमातुं शक्या। न त्वनन्वितपदार्थ-मात्रस्मरणम्। उच्यते। व्यवहारानुमितान्वितप्रतिपत्त्यन्यथानुपपत्ति-रेवानन्वितस्वार्थस्मरणसम्भवे प्रमाणम्। दर्शितं ह्येतत्। नानन्वित-

प्रतिपत्तिमन्तरेणान्वितप्रतिपत्तिरुपपद्यत इति । अत्र कश्चिदाह- यदि स्मृतिसन्निहितमाश्रित्यान्विताभिधानं परैः क्रियते, तदा स्मरणस्य प्रत्यासत्तिनिबन्धनत्वादनेकेषां चार्थानां प्रत्यासत्तिसंभवात् तेषु स्मृतिसन्निहितेष्वगृह्यमाणविशेषत्वादुखायां पचतीति नोखा पचत्यर्थान्वितैव केवलाभिधीयेत । सा हि निर्वापाद्यन्विताऽपि प्रतिपन्नैवेति स्मरणात् तदन्विताप्युखाऽभिधीयेत । तथा पचत्यर्थोऽपि पाकादिकमुखोऽवगत इति तत्स्मरणात्तैर्दनान्विताऽभिधीयेत । अभिहितान्वयवादे तु नायं दोषः । एकैकस्यार्थस्याभिधेयत्वादिति ॥

अत्रोच्यते । पदात्तावत् पदार्थप्रतीतिः स्मरणाद् भिन्ना वदितुं न शक्यते । तेन स्मृतानामेवान्वयबोधकत्वमित्याश्रयणीयम् । तथा च तुल्यो दोषः । अथ शब्दैः स्मारितानामन्वयबोधकत्वाद् वृद्धव्यवहारे तथा दर्शनाददोषः । मतान्तरेऽपि तुल्यमेतत् । नचायमेकान्ततः । वृद्धव्यवहारेऽध्याहृतेनाप्यर्थेनान्विताभिधानदर्शनादित्युक्तम् । अथ शब्दैर्बहवोऽर्था स्मार्यन्ते, किन्तु तेषां कतमेनान्वयावबोधकत्वमिति । अभिहितान्वयवादे त्वभिहितेनान्वयबोधकत्वं युक्तमेवेति । तदसत् । स्मारकत्वातिरेकिणी का अन्याऽभिधायकता या व्यवस्थानिबन्धनम् । अथोच्येत । स्मारकत्वं नाम प्रत्यासत्तिनिबन्धनम् । तेन तद्व्यतिरेकिणी अभिधेयाभिधायकतालक्षणा प्रत्यासत्तिरङ्गीकरणीयेति । नैतदेवम् । स्मारकत्वेनैव वृद्धव्यवहारे दर्शनात् । स्मारकत्वोपपत्तेः प्रत्याययेयुः । प्रत्यायकता हि वाच्यवाचकता, सा च यद्यप्यग्निधूमाऽऽदीनां सम्बन्धान्तरापूरिका दृष्टा, तथापि शब्दे तथा नाश्रीयते । किन्तु वाचकत्वावगमादेव वाचकत्वम् । एवं स्मारकत्वावगमादेव स्मारकत्वमिति, किं प्रत्यासत्त्यन्तराश्रयणेन । अपि चान्वितार्थवादिन एवेदं प्रतिनियतान्वयत्वमुपपद्यते यत् पदार्थान्तरान्विताभिधायकतया स्मार्यते । तदन्वितस्यैव वृद्धव्यवहाराऽवार्यत्वदर्शनात् । यत्राऽप्यध्याहारः, तत्रापि सन्निधापकवशेन विशेषान्विताभिधानलाभ इति लोकत एव ज्ञातमिति न कश्चिद् दोषः । ज्ञातं तावदेतद् यदनेन पदेनान्वितो वार्थ इति । यद्यन्येनाप्यन्विताभिधानं स्यात्, तदा वाक्यभेदो भवेत् । न चासावेकवाक्यत्वसम्भवे न्याय्यः । तदुक्तम्—

सम्भवत्येकवाक्यत्वे वाक्यभेदश्च नेष्यते, इति ॥

अत एव यथाकथञ्चिदेकवाक्यत्वोपपत्तौ वाक्यभेदस्यान्याय्यत्वात् । लोके लक्षणा गौणी च वृत्तिर्वाक्यभेदादेव । अन्यथा वाक्यं भित्वा किमित्यध्याहृत्य योग्यमर्थान्तरं सर्वदान्येव मुख्यार्थानि नाश्रीयन्ते । वेदेऽप्येकवाक्यत्वबलादेवार्थवादेषु गुणवादाश्चाश्रयणं विभक्तिव्यत्ययवर्णनम् । औदुम्बराधिकरणे वा कथञ्चित् पशुवाचकत्वम् । चित्राधिकरणे रूढिपरित्यागेन पञ्चदशान्याज्यानि भवन्तीतिवत् कथञ्चिन्नामधेयत्वाश्रयणम् । वाजपेयाधिकरणे च वाक्यभेदभयादेव नामधेयत्वाश्रयणम् । पौर्णमास्यधिकरणे चानेकगुणविधाने वाक्यभेदापत्तेः समुदायानुवादकत्वसिद्धिः । प्रकरणान्तराधिकरणे च वाक्यभेददोषादेवाग्निहोत्रपदस्य गौणवर्णनम् । ग्रहाधिकरणे चैकत्वस्याविवक्षितत्वम् । अर्द्धमन्तर्वेदि मिनोत्यर्द्धं बहिर्वेदीत्यत्र देशलक्षणावत्त्वम् । क्षौमाधिकरणे च पुंद्वयविधानहानम् । आकृत्यधिकरणे चोभयपदस्याविवक्षा । वारुण्या निष्कासेन तुषैश्चेत्यत्र निरपेक्षत्वत्यागः । पर्युदासाधिकरणे च नञर्थस्य लाक्षणिकत्वमित्यादि बहुतरं दृश्यते । तत्र यदि व्याह्रियमाणस्य पदस्याभिधेयं परित्यज्यान्येन सहान्वयो लक्ष्यते, तदाप्येकवाक्यता हीयेत । तदर्थमेवेदमुक्तं, न्यायसंवादितव्यक्तीति ॥

एकवाक्यत्वं हि नाम महान्वयः । तदनुसारेण योऽर्थः, सोऽत्र वाक्यस्याश्रयणीयः । वृद्धव्यवहारव्युत्पत्तियन्त्रितायां शब्दार्थावगतौ ये न्याया वृद्धव्यवहारे वाक्यर्थावगतिहेतुतया विदिताः,तानपरिजहता वाक्यार्थो बोद्धव्या इतिसर्वासामेवानुपपत्तीनामनवकाशः । भवतु तर्हि पदार्थान्तरेण तावदन्विताभिधानमेकवाक्यत्वबलात् तत्स्मारितेन स्वयं स्मारितेन च तदेकवाक्यत्वानुगुणेनार्थान्तरेणापि किमित्यन्विताभिधानं न भवति । उच्यते । पदद्वयेनैवान्विताभिधानसिद्धेराकाङ्क्षोपशान्तेः । अथ नोपशान्ताकाङ्क्षा, तर्हि को नाम तत्रान्विताभिधानं वारयेत् । अत एवैकपदोच्चारणे तदर्थसम्बन्धमुखेन बहुष्वपि स्मृतिसन्निहितेषु यस्यार्थस्य केनचित् प्रकारेण विशेषो गृह्यते, तेनैवान्विताभिधानम् । अगृह्यमाणे तु विशेषेऽनध्यवसायादप्रतीतिरेव।अत एव विकृतिषु तत्सादृश्येन यदपूर्वं स्मर्यमाणं स्वोपकारकं स्मारयति तदीयेनैवोपकारेण परिपूरणम् । अतो यत्र बहुतरधर्मसाधारण्यनिबन्धनं सादृश्यमन्यस्योद्भूतम्, तत्रैव शीघ्रं

स्मृत्युपपत्तेस्तदीयोपकारकपरिग्रह एव । दर्विहोमेषु तु सर्वापूर्वाणामविशेषाद् विशेषो ग्रहीतुमशक्य इत्यनध्यवसाय एव प्राकृतस्योपकारस्येति तत्रैवोपकारकताऽपि।यथावृद्धव्यवहारावगमं वाक्यार्थावबोधः । तत्र यदेव पदेन अनवगृहसम्बन्धग्रहणसंस्कारस्य पुरुषस्य नियमेन स्मार्यते । तेनैवान्विताभिधानं पदान्तरस्य दृश्यते, नान्येन । स्वार्थं हि सर्वं पदं नियमेन सम्बन्धस्मर्तॄणां स्मारयति, नार्थान्तरम् । ततश्च तेनैव पदान्तरस्यान्वितस्वार्थबोधकतेति न कश्चिद् दोषः । किञ्च यद्यभिहितेनैवान्वितस्वार्थबोधनाभ्युपगमे प्रतिनियतान्वयबोधो घटते, नान्यथा, तर्हि कल्प्यतां पदानामनन्विताभिधानशक्तिरपि । द्विरभिधानमेवापद्यत इति चेदापद्यतां, न कश्चिद् दोषः । पूर्वं केवलं पदमनन्वितस्वार्थमभिधत्ते । प्रतियोगिपदान्तराभिहितवस्त्वन्तरसहायप्राप्त्या तु तत्तदन्वितमर्थमाह इति न कश्चिद् दोषः ॥

इत्थमपि चास्मन्मते शक्तिकल्पनालाघवमस्ति । पदार्थगतान्वयबोधनशक्त्याधानशक्तिकल्पनात्यागः । तुल्यायामपि शक्तिकल्पनायां पदानामेवान्वितबोधनशक्तिराश्रयितुमुचितम् । न पदार्थानां प्रथमाऽवगतत्वाद्वाक्यार्थे च तात्पर्यस्यावगतत्वादिति ॥

कथं तर्हीदं भाष्यं, पदानि हीत्यादि । तत्राह—

अन्वितेषु पदैरेव बोध्यमानेषु शक्तिभिः ।
अन्वयार्थगृहीतत्वान्नान्यां शक्तिमपेक्षते ॥

आशङ्कितोत्तरमिदं भाष्यम् । किमाशङ्कितम् । यद्यन्विताभिधायीनि पदानि तर्हि नान्वयाभिधायीनि । तत्सिद्ध्यर्थं पदानां शक्त्यन्तरं कल्प्यमिति । अत्रेदमुत्तरम् । यत् पदमन्विताभिधायकम् । अन्यथान्वित एवासौ, नाभिहितः स्यादित्यन्वितरूपेणार्थेनान्वयः स्वीकृतः । तं विना तदसम्भवादिति नापरा तद्विषया पदानां शक्तिः कल्पनीया ।

कथं पुनरसावर्थगृहीत इत्याह—

प्रतीयन्नन्वयं यस्मात् प्रतीयादन्वितं पुमान् ।
व्यक्तिजातिमिवार्थोऽसाविति सम्परिकीर्त्यते ॥

अन्वयवानेव ह्यन्वितः । सोऽन्वयाप्रतीतौ न प्रतीत एव स्यात्, किन्तु स्वरूपमात्रमेव । न च तदन्वितमुच्यते । तस्मात् तदन्वयं

प्रतिपाद्यमानोऽन्वितं यं प्रतिपाद्यते। यथा व्यक्तिं प्रतिपद्यमानो जातिम्। अयं तु विशेषः। अन्वयवानेवान्वित उच्यत इत्यन्वयोऽप्यभिधानानुप्रविष्टः। व्यक्तिमत्त्वैव जातिस्वरूपं न भवति। किन्तु व्यक्तेराकारभूता जातिस्ततो भिन्ना। सा चेत्राकृतिः शब्दाभिधेया न व्यक्तिशक्तिरभिधानानुप्रवेशिनी, किन्तु आकारभूता जातिर्व्यतिरिक्ताऽपि वस्तुस्वभावेन व्यक्तिमन्तरेण प्रतीतिमनुभवति। एतावता च साम्येन, दृष्टान्तो न सर्वात्मना॥

नन्वेकविज्ञानारूढा कथं व्यक्तिरनभिधेया। शब्दोत्थापितविज्ञानविषयता ह्यभिधेयता। अस्ति च व्यक्तेरपि तथाभाव इति। कथमनभिधेयतेति श्रूयतामवधानेन सर्वस्वं प्राभाकराणाम्। सत्यमेकसंविद्विषयता जातिव्यक्त्योः। तथापि चिन्तनीयमिदम्। कथमेषा संविदुभयविषया जायत इति। किमस्योभयविषयत्वे शब्दमात्रस्यैव व्यापारः? उत जातिमात्रविषयत्वे शब्दस्वरूपमात्रेण व्याप्रियते। व्यक्तिविषयत्वे जात्यभिधायकतया जातेरन्यथा बोधयितुमशक्यत्वादिति। तावदनन्तासु व्यक्तिषु सम्बन्धग्रहणाशक्तेराकृत्युपलक्षितासु च। यद्यपि सम्बन्धग्रहणं सुकरं, तथापि तद्रूपत्वेनैव शब्दशक्त्यवगमात्। उपलक्षणत्वे कारणाभावात्। चिह्नभावेन च क्रियान्वयासम्भवादाकृतिविषयत्वं तावच्छब्दस्वरूपनिबन्धनम्। एवञ्चेत् तदभिधायकतयैव व्यक्तिविषयत्वे शब्दव्यापार इति निश्चीयते। तेनाकृतिर्न व्यक्तिं गमयति। किन्तु शब्द एव तदभिधायकतयेति। आकृतितो व्यक्तिरुच्यते। अतोऽन्विताभिधानायान्वयस्यार्थगृहीतत्वादसावन्वयो नाभिधीयते। तेन व्यतिषिक्ताभिधानं वदन्न व्यतिषङ्गाभिधानं, निष्कृताधानं न भवति। व्यतिषक्ततोऽवगते व्यतिषङ्गस्य व्यतिषङ्गं विनाभिधानानुपपत्तेः। भाष्याक्षराणामयमर्थः। पदान्यन्वितमभिधाय निवृत्तव्यापाराणि नान्वयं पृथगभिदधति। अथेदानीमन्विताः प्रतिपन्ना अन्वयमपि प्रतीतं संपादयन्तीति। लोके च पदार्थानां सम्बन्धग्रहणसमय एव विदितत्वाद्वाक्यान्तरे चान्वयान्तरस्यैव प्रतिपन्नत्वात् तत्परतैव वाक्यस्येति वाक्यार्थशब्देन भाष्यकारोऽन्वयमाह। वेदे त्वपूर्वत्वाद् वाक्यार्थ इति वक्ष्यामः। तस्य च स्वरूपमप्यनवगतमित्यन्वयस्यैव वाक्यार्थत्वात्। एवमुक्तेन न्यायेन विशेषेणैवान्विताभिधानं समर्थितम्॥

येऽन्विताभिधान एवमाहुः— वृद्धव्यवहारो प्रसिद्धसम्बन्धः शब्दोऽर्थस्य वाचकः । अन्वयव्यतिरेकाभ्यां च सम्बन्धावधारणम् । न च विशेषान्वयविषयौ तौ सम्भवतः। क्रियापदं हि कारकसामान्यव्यभिचारिण्या क्रियया सहान्वयव्यतिरेकौ भजते । विशेषान्तरान्वयव्यभिचारात् । एवं कारकपदेऽपि योज्यमिति ।

तन्निराकरणायाह—

सामान्येनान्वितं वाच्यं पदानां ये प्रचक्षते ।
नियतेन विशेषेण तेषां स्यादन्वयः कथम् ॥

दर्शितमिदं विशेषान्वयेऽप्याकाङ्क्षासन्निधियोग्यतोपाधिवशेन सम्बन्धग्रहणं सुकरमिति तदभिधायकतैव युक्ता पदानाम् । यदि चासौ नेष्यते, तदा वाक्यार्थप्रतिपत्तिरेव नोपपद्यते । विशेषान्वयरूपत्वाद्वाक्यार्थस्य ॥

ननु च सामान्यान्वयोऽभिहितो विशेषान्वयमाक्षेप्स्यतीति । निर्विशेषस्य सामान्यस्य प्रत्येतुमशक्तेरिति विशेषान्वयप्रतिपत्तिरुपपन्नैवेत्यत्राह—

यद्यप्याक्षिप्यते नाम विशेषो व्यक्तिजातिवत् ।
निर्धारितविशेषस्तु तद्वदेव न गम्यते ॥

यथा जातिर्व्यक्तिमाक्षिपत्यपि न प्रतिनियतं विशेषमाक्षिपति, तथात्राऽपि प्रतिनियतविशेषाभावान्नियतविशेषात्मकवाक्यार्थप्रतिपत्तिरनुपहस्या ॥

अथ विशेषमात्राक्षेपेऽप्याकाङ्क्षितसन्निहितयोग्यश्च विशेषः पदान्तरेण समर्प्यते,स एव गृह्यते । तदतिरिक्ते प्रमाणाभावादित्याह—

यद्यप्याकाङ्क्षितो योग्यो विशेषः सन्निधौ श्रुतः ।
सम्बन्धबोधकाभावो गृह्यते न तथाप्यसौ ॥

सामान्यान्विताभिधानवादिनो मते पदानि तावत् तन्मात्र एव पर्यवसितशक्तीनि । पदार्थानामप्यन्वयबोधनशक्तिर्नाङ्गीक्रियते । न च सामान्याक्षेपोऽपि नियतविशेषमास्कन्दति । तेनाकाङ्क्षितेऽपि योग्ये च विशेषे पदार्थान्तरेण सन्निधापितेऽपि तदन्वयबोधकप्रमाणाभावात् तदन्वयो न प्रतीयेतैव । अत आकाङ्क्षासन्निधियोग्यत्वादीन्यनुपयोगीन्येव । विशेषान्वयवादिनस्तु मते सम्बन्धग्रहणं प्रत्युपाधित्वेन प्रविष्टानि वाक्यार्थप्रतिपत्तावुपयुज्यन्ते । तदाह—

सम्बन्धबोधव्युत्पत्तावुपाधित्वे समाविशेत् ।
विशेषान्वयवादे तु योग्यत्वाद्युपकारकम् ॥

पदानां पदार्थान्तरसम्बन्धः स्वार्थो बोध्य इत्यस्यां व्युत्पत्तावुपाधित्वेन योग्यत्वादिकमनुप्रविशेत् । विशेषान्विताभिधानवादिपक्षे उपकारकं न सामान्यान्विताभिधान इति दर्शितं प्राक् ॥

दूषणान्तरं चाह—

किञ्च वस्तुबलेनैव सिद्धे सामान्यसङ्गमे ।
तस्या वाच्यत्वमिच्छद्भिर्वृथा शब्दः प्रवेशितः ॥

क्रियाकारकस्वभावालोचनयाऽपि कारकमात्रेण क्रियामात्रेण चाऽन्वयावगमसिद्धेर्वृथा सामान्याऽन्वयाभिधायकता शब्दस्याङ्गीक्रियत इति ॥

वाक्यमेकं न निर्भागं वाक्यान्त्योऽवयवोऽपि वा ।
पदवृन्दं स्मृतिस्थं वा प्रथमं पदमेव वा ॥
आख्यातपदमात्रं वा पदार्था वाऽप्यनन्विताः ।
सामान्यान्वयबोधे यो हेतुर्वाक्यार्थबोधने ॥
पदान्येव समर्थानि वाक्यार्थस्यावबोधने ।
विशेषान्वयवादीनि भागशो भागशालिनः, इति सङ्ग्रहश्लोकाः ॥

तथाचोक्तम् । अस्ति वा पदस्यार्थः । बाढमस्ति । कथं तर्हि वाक्यवाक्यार्थयोरौत्पत्तिकत्वम् । वृद्धव्यवहारात् । सत्यम् । स त्ववयववश इत्युक्तम् ॥ इति श्रीमहोपाध्यायशालिकनाथमिश्रविरचितायां वाक्यार्थमातृकावृत्तौ उपोद्घातपरिच्छेदः प्रथमः ॥ १ ॥

'अथ द्वितीयः परिच्छेदः ॥ २ ॥

उपोद्घातभूतमन्विताभिधानं प्रसाध्यापूर्वं कार्यं वेदवाक्यानामस्तीति साधयितुकामः पूर्वपक्षं तावदाह—

ननु व्युत्पत्त्यपेक्षेषु शब्देष्वर्थाभिधायिषु ।
कथं मानान्तरावेद्यं कार्यमाहुर्लिङादयः ॥

अपूर्वाधिकरणे लिङाद्यर्थोऽपूर्वमित्युक्तम् । प्रमाणान्तरायोग्यं चापूर्वमिष्यते । यच्च प्रमाणान्तरायोग्यं तत्र सम्बन्धग्रहणमशक्यम् । सम्बन्धिग्रहणपूर्वकत्वात् । तस्य विशिष्टार्थव्यवहारदर्शनेनैतद्विषया शब्दशक्तिरनुमीयते । तदेव च सम्बन्धग्रहणम् । यत्र न प्रतीतौ तद्विषयो व्यवहारोऽवसीयते । तदनवसायेन च तद्विषया बुद्धिरनुमीयते । तदनुमाने च कुतः शब्दस्य शक्तिः कल्प्यते । अपूर्वं च न प्रमाणान्तरगोचरः । न च शब्दादेव तदवगम्य सम्बन्धाऽवधारणम् । इतरेतराश्रयत्वात् । अवसितशक्तेरेव बोधकत्वात् । अवबोधकत्वादेव शक्त्यवगमात् । स्यान्मतम् । लिङादेः शब्दस्याऽयं महिमा,यदनवसितशक्तिरपि स्वार्थमवगमयतीति।तदिदमप्रमाणम् । क्रियामात्रकार्याऽवबोधकत्वाङ्गीकारेण लिङादेर्लौकिको व्युत्पत्तिसम्भवे शब्दान्तरवैलक्षण्येनागृहीतसम्बन्धस्यैव वाचकत्वकल्पनानुपपत्तेः । वेदवाक्यादपूर्वकार्यावगतेरेवं कल्प्यत इतिचेन्न । तस्या एवासिद्धत्वात् । क्रियैव कार्यतया वेदवाक्येभ्योऽवगम्यत इति व्युत्पत्तिबलेन प्रामाणिकं मनोरथमात्रविजृम्भितत्वपूर्वं कार्यं प्रतीयत इति । तस्मादगृहीतसम्बन्धो लिङादिः कथमपूर्वं कार्यमभिधत्ते । तथाच कथं वाक्यार्थः । अभिधेय एव ह्यर्थोऽभिभवति । एवं,

शब्दान्तराण्यपि कथं तेनादृष्टेन कुत्रचित् ।
वदिष्यन्त्यन्वितं स्वार्थं व्युत्पत्तिपथदूरगम् ॥

तस्मिन्नप्रतीयमाने तदन्वितस्याप्रतीतेः सूत्रसंबन्धावधारणानुपपत्तेर्दूरानिरस्तं शब्दान्तराणां तदन्वितस्वार्थबोधकत्वमिति ॥

राद्धान्तमुपक्रमते—

अत्रोच्यते यदा नाम वृद्धेनैकेन भाषिते ।
जलं चैत्राहरस्वेति चैत्र आहरते यदा ॥
तदा व्युत्पित्समानोऽन्यस्तत्रैवमवगच्छति ॥

बुद्धिपूर्वा प्रवृत्तिरियमीदृशी। लिङादियुक्तवाक्यश्रवणात् प्रयोज्य-वृद्धस्य विशिष्टार्थविषयां प्रवृत्तिं दृष्ट्वा व्युत्पित्समानो बाल एवमाकालयति । सेयं स्वाधीनास्य प्रवृत्तिः, सा मद्वद् बुद्धिपूर्विके-ति । पुनश्च तस्यायं विमर्शो जायते अहं बुद्ध्वा प्रवृत्तो यत् तदेषो-ऽपि । यस्याः प्रवृत्तेर्हेतुभूता बुद्धिः, सा यद्विषया सती मम प्र-वृत्तिहेतुः, तद्विषयैवास्यापीति व्युत्पित्सोरनुमा जायते । तदेवमनु-मानद्वयमेतद् वृद्धस्य स्वतन्त्रा प्रवृत्तिधर्मिणी बुद्धिपूर्विकेति साध्यो धर्मः । स्वतन्त्रप्रवृत्तित्वात्। मदीयस्वतन्त्रप्रवृत्तिवदिति । तथा वृद्ध-स्य प्रवृत्तिहेतुभूता बुद्धिधर्मिणी यद्विषया बुद्धिर्मम प्रवृत्तिहेतुभूता, तद्विषयैवास्यापीति साध्यो धर्मः । प्रवृत्तिहेतुभूतबुद्धित्वात्। मदीय-प्रवृत्तिहेतुभूतबुद्धिवत् । पुनश्च तस्यायं विमर्शः प्रवर्त्तते । पदस्य तु शब्देन बोध्यते । अनेन मम मानान्तरेण तु यद्विषया सा बुद्धिः प्रवृत्तिहेतुभूता, तद्वत् स्वस्यानेन शब्देन बोध्यते । तद्भावे सति अवगमात् । मम तु मानान्तरेण तद् बोध्यते इत्ययमावयोर्विशेषः । येन यद् बुद्ध्वा प्रवृत्तिर्मम तदस्यानेन शब्देन बोद्ध्यते इति शब्दस्य प्रवृत्तिहेतुभूतार्थो बोधकतामवधारयति ॥

पुनश्च कोऽसौ प्रवृत्तिहेतुभूतोऽर्थः शब्दाभिधेय इति निर्धार-यितुं स्वात्मनि प्रतिपन्नं प्रवृत्तिहेतुभूतमर्थमनुसन्धत्ते—

तत्र बुद्ध्वा प्रवृत्तोऽहं किं तावत् स्वयमन्यदा ॥

शब्दनिरपेक्षः स्वयमहं प्रवर्त्तमानः किं बुद्ध्वा प्रवृत्त इति जिज्ञासते । अन्यदेत्यनेन व्युत्पत्तितः प्रागवस्थोच्यते । अव्युत्पन्नेन बालेन यदात्मनि प्रतीतिकारणतया प्रतीतं, तदेव व्युत्पन्नस्यापि तेन कल्प्यते, नान्यदित्यर्थः । तेन शब्द एव प्रवृत्तिहेतुभूतो विधिस्तद्-व्यापारो वेति निरस्तं भवति । तयोर्बालेनात्मनि प्रवृत्तिकारणत्वेन दर्शनात् । अतिमन्दतया चेमौ पक्षौ न साक्षादुपन्यस्य निरस्तौ । तथाहि । लिङादिशब्दस्वरूपस्य प्रवर्त्तकत्वे सर्व एव तच्छ्राविणो नियमेन प्रवर्त्तेरन्, नचैवं दृश्यते, कस्यचित् कदाचित् प्रवृत्तिः । लिङादिव्यापारस्य तु प्रवृत्तिहेतुत्वाश्रयणं देवाः प्रतिपद्यन्ताम् । पिशितचक्षुषो मानुषा वयं नेयतीं प्रमाणभूमिमवगाहितुं क्षमाः ॥

शब्दभावना लिङादिव्यापाररूपा पुरुषप्रवृत्तिभवनानुकूला स्व-ज्ञापितकरणिकार्थवादोदितप्राशस्त्यलक्षणेतिकर्त्तव्यतायोगिनीप्रेरणा-

ऽऽत्मिका कल्प्यते । स्वाध्यायाध्ययनविधिना हि सर्वे विधायकाः स्वाध्यायशब्दवाच्याः स्वात्मा च नियुज्यन्ते भावयेदिति । तत्र किमित्यपेक्षायां पुरुषप्रवृत्तिः सम्बद्ध्यते। केनेत्याकाङ्क्षायां विधिज्ञानमेव योग्यतया करणत्वेनाङ्गीक्रियते । ज्ञाता हि शब्दभावना प्रवृत्तिं प्रसूते, योग्यतयैवार्थवादसमुत्थप्राशस्त्यज्ञानमितिकर्त्तव्यतांशे निविशते । अवसीदन्ती हि विधिशक्तिः प्राशस्त्यज्ञानेनोत्तभ्यत इति तस्याः पुरुषव्यापाररूपस्वर्गादिभाव्यावच्छिन्ना भावार्थकरणिका श्रौतस्मार्त्ताचारप्राप्तपदार्थावगमजनितकरणोपकारवती अर्थभावना समानप्रत्ययवाच्या विषयभूता । तत्र लिङादेस्तादृशो व्यापारो विद्यत इत्यत्र, न किञ्चन प्रमाणम् । लिङादिशब्दानन्तरभाविनी प्रवृत्तिरेव प्रमाणमिति चेन्न । तन्निबन्धनत्वेन प्रवृत्तेरन्यत्रादृष्टत्वात् । तन्निबन्धना हि प्रवृत्तिर्दृष्टा। तदेव तां दृष्ट्वा शक्यमनुमातुम् । न पुनरप्रतिपन्नपूर्वकारणभावं शब्दव्यापारविशेषः ॥

प्राचीनदुर्लभग्रन्थसमुद्धरणबद्धपरिकर-श्रीयुतगोविन्ददासमहाशय-संपादितपुस्तकाधारेण पूरितेयं प्रकरणपञ्चिकात्रुटिः । पृष्ठम् । १७१ ।

॥ श्रीः ॥

मीमांसासारसङ्ग्रहः

श्रीशङ्करभट्टकृत

वाराणसेयसेंट्रलहिन्दूकालेजसम्बन्धिरणवीरसंस्कृतपाठ-
शालायां वेदान्तशास्त्राध्यापनपदमलङ्कुर्वाणेन द्राविड-
श्रीलक्ष्मणशास्त्रिणा परिशोधितः ।

काश्याम्

विद्याविलासनाम्नियन्त्रालये, हरिदासगुप्तेन,
मुद्रयित्वा प्रकाशितः ।
सन् १९०४ ईस्वी
वैक्रम संवत् १९६१

शुभम् ।

॥ श्रीगुरुः शरणम् ॥

भूमिका ।

अस्ति पूर्वमीमांसाशास्त्रं नाम वेदवाक्यार्थतत्त्वावधारणापेक्षितन्यायकलापसन्दृब्धं सर्वदर्शनशीर्षण्यतया पुरस्क्रियमाणं महर्षिजैमिन्याचार्यस्य सर्वस्वभूतमिति सर्वसम्प्रतिपन्नोऽयमर्थः ।

न ज्ञातु जैमिनीयन्यायावतारमन्तरा केचिदपि वेदवाक्यानां वाक्यान्तराणाञ्च सामञ्जस्यमुपपादयितुमीशते इति भवति सर्वेषां तत्तदपेक्षितांशव्याकरणायैतदपेक्षेत्येतदपि न परोक्षं शास्त्ररमिकानाम् । तदेवमतिप्रामाणिकमौपनिषदानामपि स्वापेक्षितवाक्यार्थनिर्धारणविधाववश्याभ्यर्हिततया सर्वेभ्यः समुत्कर्षशालि मीमांसादर्शनं शबरस्वामिप्रभृतिभिराचार्यैर्भाष्यादिनिबन्धप्रणयनद्वारा सुविवृतमप्यतिविस्तरतयाऽत्यन्तदुरूहार्थजटिलतया चाऽनाघ्रातमीमांसागन्धानां ततः कथमप्युपकारलेशमसम्भाव्य केवलमापाततस्तत्तदधिकरणगतप्रधानविषयकथनमात्रेणैवैतच्छास्त्रप्रतिपाद्यमर्थजातं मनस्याकलय्य क्रमेणैतच्छास्त्रे प्रविविक्षूणां सुखावबोधायातिसङ्क्षेपेण* सर्वाण्यधिकरणान्यतिसरलैः पद्यैः सङ्कलयन् प्रणिनाय मीमांसासारसङ्ग्रहं नाम प्रकरणं विद्वदग्रेसरः श्रीमान् शङ्करभट्टः ।

तमिमं ग्रन्थमुपदर्शितरीत्या विषयसूचनिकामुद्रया सर्वजनोपयोगिनमवधार्य मुद्रणद्वारा प्रचिकाशयिषुश्चौखम्बासीरीजपुस्तकावलीकार्यसम्पादकः श्रीयुतहरिदासगुप्तः पुस्तकावल्या संयोज्य प्रकाशयितुमुदयुङ्क्त । आसादितवाँश्चायं नानाविधदुर्लभग्रन्थसम्पादनरासकात्काशिस्थसुप्रसिद्धश्रीयुतश्रीगोविन्ददासमहाशयात्पुस्तकमेकम् । अथाहं तदीयप्रार्थनयैतत्संशोधने प्रवृत्तो मदीयपुस्तकमपि पाठभेदनिर्धारणायोपयोज्य पुस्तकद्वयसाहाय्यात्सम्पादितशोधनकार्यः प्रार्थये विपश्चिद्वरान् महाशयान् यदत्र प्रमादात्स्खलितानि समीकृत्योदारचरितैर्महाशयैर्विधेयो हृदि प्रसाद इति शम् ।

आश्विनकृष्ण १० बुधे संवत् १९६०	}	जटापाठ्युपनामको लक्ष्मणशास्त्री द्राविड

---

* यद्यपि लोके जैमिनीयाधिकरणानि सहस्रसङ्ख्याकानीति प्रसिद्धिस्तथाऽपि तानि सङ्ख्यायमानानि न तावतीं संख्यामासादयन्ति परं भाष्य-वार्तिक- शास्त्रदीपिका- अधिकरणरत्नमाला- दिनिबन्धपरिदर्शितविषयपूर्वपक्षादिभेदं पुरस्कृत्य कथञ्चित्सहस्रसङ्ख्यापरिपूर्तिरिति प्रसिद्धप्रदीपः प्रदर्शितश्चास्य प्रसङ्गतोऽप्यत्र सप्तमे दशमे च अधिकरणान्तरत्वमिति मतं च [illegible] ।

श्रीगणेशाय नमः ।

मीमांसासारसङ्ग्रहः ।

नत्वा गणेशवाग्रामगुर्वङ्घ्रीन्भट्टशङ्करः ।
सहस्रं वक्ति सिद्धान्तान् सार्द्धश्लोकशतद्वयात् ॥

अधीतिरत्र दृष्टार्था १
१ *धर्ममानं च चोदना । २
२ धर्मो ऽर्थश्चोदनागम्यो ३
न तन्मानापरीक्ष्यता ॥ १ ॥ ४
प्रत्यक्षलक्षणोक्तिश्च ५
१ स्वतः प्रामाण्यवर्णनम् । ६
२ शब्दार्थान्वयनित्यत्वम् ७
३ उपवर्षमतं ततः ॥ २ ॥ ८
४ निरालम्बनवादोऽथ ९
५ शून्यवादस्य दूषणम् । १०
६ अनुमानपरिच्छेदः ११
७ शब्दप्रामाण्यवर्णनम् ॥ ३ ॥ १२
८ प्रामाण्यमुपमानस्या १३
९ ऽप्यर्थापत्तेश्च वर्णनम् । १३
१० प्रामाण्योक्तिर(१)भावस्य १५
११ स्फोटवादनिराक्रिया ॥ ४ ॥ १६
१२ आकृतिस्थापनं चाथा १७

---

* दक्षिणपार्श्वगता अङ्काः भाष्यवार्तिकगतप्रधानविषयवर्णकादिभेदं सूत्रसूचितमुपजीव्याऽधिकरणसङ्ख्यापूर्तिरिति ज्ञापका इति ज्ञेयम् ।

(१) अभावस्य अनुपलब्धेरित्यर्थः ।

इति प्रथमाध्यायस्य प्रथमः पादः ।

इति प्रथमाध्यायस्य द्वितीयः पादः ।

(१) भाष्यमते इदमुदाहरणम् ।

(२) वार्तिकमते इदमुदाहरणम् ।

इति प्रथमाध्यायस्य तृतीयः पादः।

इति प्रथमाध्यायस्य चतुर्थः पादः।

---

(१) सा – गौणता।

पादाधिकरणानां सङ्ख्या

२५-५-१९-२०

अध्यायाधिकरणसङ्ख्या ६९*

अथ द्वितीयोऽध्यायः।

१ धर्मः प्रतिपदं न तु। १
२ भावार्थस्य फलार्थत्वम् २
अपूर्वं द्वारमस्ति नः॥ १८॥ ३
१ आख्यातद्वैधमिष्टं नः ४
२ प्रधानं कर्म वक्ति तत्। ५
३ गुणकर्मापरं वक्ति ६
संमार्गो गुणकर्म च॥ १९॥ ७
स्तोत्रशस्त्रप्रधानत्वम् ८
मन्त्राः स्युरभि(१)धायकाः। ९
मन्त्रलक्षणमन्त्रोक्तम् १०
लक्षणं ब्राह्मणस्य च॥ २०॥ ११
ऊहादेश्चाप्यमन्त्रत्वम् १२
ऋग्लक्षणमथोदितम्। १३
सामलक्षणमप्युक्तम् १४
यजुषां लक्षणं तथा॥ २१॥ १५
निगदानां यजुष्ट्वं स्यात् १६
परिमाणं यजुर्मनोः। १७
यजुर्भेद इषेत्वादौ १८
१ अनुषङ्गो ऽथ वर्णितः॥ २२॥ १९
२ चित्पत्यादौ चानुषङ्गो २०
व्यवाये(२)स न सम्मतः। २१

इति द्वितीयाध्यायस्य प्रथमः पादः।

---

* अधिकरणरत्नमालानुसारेणाधिकरणसङ्ख्या ४१।

(१) वि इति पु० पा०। (२) सः अनुषङ्गः।

भिन्नं शब्दान्तरात्कर्म १
ऽभ्यासादपि कर्मभित् ॥ २३ ॥ २
विद्वद्वाक्ये ऽनुवादः स्या ३
दन्तरा यज्विधिर्मतः । ४
तथाऽऽघाराग्निहोत्रे च ५
पशुसोमवचोस्तथा ॥ २४ ॥ ६
सङ्ख्यया कर्मभेदो ऽथ ७
संज्ञया च स इष्यते । ८
गुणाच्च कर्मभेदः स्यात् ९
अग्निहोत्रे तु नास्त्ययं ॥ २५ ॥ १०
इन्द्रियार्थे दध्यादि नः ११
कर्मान्यद्रेवतीश्रुतौ । १२
१ हीषादे र्न फलार्थत्वम् १३
२ व्यवस्था निधनेषु च ॥ २६ ॥ १४

इति द्वितीयाध्यायस्य द्वितीयः पादः ।

बृहत्सामाद्यभिन्नत्वम् १
अवेष्टेर्हि भिदा मता । २
वसन्ताधानविधिता ३
दाक्षायणगुणात्फलम् ॥ २७ ॥ ४
वायव्यादौ यजिविधिः ५
वत्सालम्भो यजिर्न तु । ६
चरूपधाने ऽप्येवं स्यात् ७
पात्नीवतयजिर्न च ॥ २८ ॥ ८
अश्वदाभ्यौ ग्रहावेवा ऽ ९
ग्निर्गुणो न यजिर्मतः । १०
प्रक्रियान्तरतो भेदः ११
फलसंस्कार्ययोस्तथा ॥ २९ ॥ १२
सन्निधौ कर्मभेदो ना १३
ऽऽग्नेयेऽमामा(१)त्रयुज्यपि । १४

---

(१) अमामात्रयुज्यपि, आग्नेयोऽष्टाकपालोऽमावास्यायां भवतीत्यत्र कर्मभेदोनेत्यर्थः ।

इति द्वितीयाध्यायस्य तृतीयः पादः ।

यावज्जीवे कर्मविधिः	१
शाखाभेदे न कर्मभित् ॥ ३० ॥	२

॥ इति द्वितीयाध्यायस्य चतुर्थः पादः ॥

पादाधिकरणानां संख्या

२१–१४–१४–२

अध्यायाधिकरणसङ्ख्या ५१ *

सर्वसङ्ख्यैक्यं १२०

अथ द्वितीयो ऽध्यायः

तृतीयार्थप्रतिज्ञा ऽर्थः	१
पारार्थ्यं शेषलक्षणम् ।	२
निरस्तो बादरेः पक्षो	३
ऽवघातादेर्न सङ्करः ॥ ३१ ॥	४
व्यवस्थितं स्फ्यादिकार्यं	५
मारुण्यं च व्यवस्थितम् ।	६
ग्रहैकत्वविवक्षा न	७
चमसेषु न संमृजिः ॥ ३२ ॥	८
अनर्थके ऽङ्गावतारः	९
प्रयाजाङ्गमभिक्रमः ।	१०
दर्शाङ्गमुपवीतं स्यात्	११
नेष्टयङ्गं वारणादि च ॥ ३३ ॥	१२
वार्त्रघ्न्यौ न प्रधानाङ्गम्	१३
उत्तराङ्गं न वाग्यमः ।	१४
चतुर्धाऽऽग्नेय एव स्यात्	१५

इति तृतीयाध्यायस्य प्रथमः पादः ।

* अधिकरणरत्नमालाऽनुसारेणाधिकरणसङ्ख्या ४७ ।

१ गौण्या वृत्तेस्तथा(१)ऽस्तिता ॥ ३४ ॥ १
२ मुख्यार्थाङ्गं मनुर्लिङ्गाद् २
गौणार्थाङ्गं श्रुतेर्मतम् । ३
हविष्कृल्लक्षयेत्कालम् ४
वाग्विसर्गे तथैव च ॥ ३५ ॥ ५
सूक्तवाकेऽङ्गत्वमिष्टम् ६
विभागः सूक्तवाकके । ७
मा(२)नान्तरे प्रमा लिङ्गम् ८
श्रुतिश्च सति सम्भवे ॥ ३६ ॥ ९
भक्षमन्त्रे·विभागः स्यात् १०
तृप्तिमन्त्राविभक्तता। ११
प्रास्थिता देवता नोह्या १२
तथा पात्नीवते ग्रहे ॥ ३७ ॥ १३
त्वष्टा नोह्येत तत्रैव १४
त्रयस्त्रिंशद्पीश्वराः । १५
देवश्चानुवषट्कारे १६
नैन्द्राग्ने त्विन्द्रपीतवाक् ॥ ३८ ॥ १७
नानाछन्दस्त्वयं मन्त्रो १८
नैन्द्रे नोहो न नास्तिता । १९

इति तृतीयाध्यायस्य द्वितीयः पादः ।

वेदधर्मस्तूच्चतादिः १
उपांश्वाधानसाम च ॥ ३९ ॥ २
उ(३)भयश्रुति भूयस्त्वात् ३
प्रक्रिया विनियोक्त्र्यपि । ४
क्रमश्च विनियोक्ता स्यात् ५
समाख्या विनियोजिका ॥ ४० ॥ ६
१ श्रुत्या लिङ्गस्य बाधः स्यात् ७
२ वाक्यस्यापि च लिङ्गतः । ८

(१) सर्थादितेति पु० पा० ।

(२) मानान्तरे सत्येव लिङ्गं प्रमाणं न तु निरपेक्षमित्यर्थः ।

(३) उभयोः यजुः सामवेदयोः श्रुतिर्यस्य तत् भूयस्त्वान्निर्णेयमित्यर्थः।

३ वाक्यात्प्रकरणं बाध्यम् ९
४ स्थानं प्रकरणेन च ॥ ४१ ॥ १०
५ स्थानात्समाख्या बाध्या स्यात् ११
६ प्राप्तबाधस्तथेरितः । १२
अहीनता च प्रकृतेः १३
द्विबहुप्रतिपत्तथा ॥ ४२ ॥ १४
जाघन्युत्कर्षणं नैवो- १५
त्कर्षः सन्तर्दने मतः । १६
नाद्ये प्रयोगे प्रवृंज्यात् १७
पूष्ण्युत्कृष्या प्रपिष्टता ॥ ४३ ॥ १८
चरावेव तु सोत्कृष्या १९
नैन्द्रापौष्णे तु सामता । २०

इति तृतीयाध्यायस्य तृतीयः पादः ।

निवीतं न विधेयं स्यात् १
विधौ(१)तत्पुंप्रधानके ॥ ४४ ॥ २
उपवीतं तु दर्शाङ्गम् ३
१ उपवीते विधिर्मतः । ४
२ यज्ञोपवीतिनोनासौ ५
पुरोदक्के विधिर्न तु ॥ ४५ ॥ ६
विधेया तूपरि धृतिः ७
दिग्विभागो निवीतवत् । ८
पूर्णता द्वि च तद्वत्स्यात् ९
विधिर्नानृतमित्ययम् ॥ ४६ ॥ १०
जृम्भामन्त्रः क्रतोरङ्गम् । ११

(१) मनुष्यप्रधाने कर्मणि निवीतं स्तुत्या विहितमित्यर्थः। निवीतं मनुष्याणामित्यत्रोल्लेखस्तु मनुष्यप्रधानविषयत्वाद्दैवकर्मणि निवीतमयोग्यमुपवीतं तु योग्यमिति उपवीतस्तुत्यर्थम् । अयं स्तुतिप्रकारोऽधिकरणान्ते वार्तिके प्रदर्शितः तन्त्ररत्नाकरे च निवीतस्य स्तुत्या मनुष्यप्रधाने कर्मणि विहितत्वं स्पष्टीकृतम् तदनुसारेणाऽत्र सिद्धान्तभेदः प्रदर्शितः ।

ना(१)वगोरणवर्जनम् । १२
उदक्या भाषा हानं च १३
स्वर्णधारणमेव च ॥ ४७ ॥ १४
अथाश्लेतावत्कर्माङ्गम् १५
अश्वदानेष्टिरेव च । १६
दातुः सैवेष्टिरुदिता १७
कर्माङ्गवमने यजिः ॥ ४८ ॥ १८
सा(२)यष्टृवमने कार्या १९
नाग्नेये सर्वदानता । २०
नैकस्माच्छेषकार्यं स्यात् २१
एकस्माच्चेत्तदाद्यतः ॥ ४९ ॥ २२
चतुर्धाकरणे भक्षः २३

इति तृतीयाध्यायस्य चतुर्थः पादः ।

शेषकार्यं न चाज्यतः । १
साकंप्रस्थाय्ये च तद्व(३)त् २
सौत्रामण्यां ग्रहेषु च ॥ ५० ॥ ३
तन्त्रं तत्सर्वपृष्ठायाम् ४
तन्त्रं तच्चैन्द्रवायवे । ५
१ सोमे(४)भक्षो भवत्येव ६
२ स समाख्यानिमित्तकः ॥ ५१ ॥ ७
३ उद्गातृभक्षः स्तोतॄणाम् ८
४ भक्षो ग्रावस्तुतो भवेत् । ९
५ वषट्कारो भक्षहेतुः १०
६ होमश्चाभिषवस्तथा ॥ ५२ ॥ ११
समुच्चयो भक्षणानाम् १२
व(५)षट्कर्ताऽऽदितः पिबेत् । १३
अनुज्ञाप्य च भक्षस्स्यात् १४

(१) क्षतङ्ग' नेत्यर्थः ।
(२) यजमानवमने सा इष्टिः कार्येत्यर्थः ।
(३) शेषकार्यं नेत्यर्थः ।
(४) अधिकरणमालानुसारेणाऽधिकरणभेदः ।
(५) वषट्कर्ता होता आदौ पिबेत् ।

मन्त्रेण च तदिष्यते ॥ ५३ ॥ १५
तन्मन्त्रस्य विभागः स्यात् १६
पात्रैक्ये चोपहूतता । १७
भक्षापनेत्री याज्येष्टा १८
स्तिभिनी चमसोयजौ ॥ ५४ ॥ १९
ब्रा(१)ह्मणा दश भक्षेयुः २०

इति तृतीयाध्यायस्य पञ्चमः पादः ।

प्रकृतौ पर्णतादि च । १
सामद्वयं तु विकृतौ २
१ नित्यं(२)नैमित्तिकं जपेत् ॥ ५५ ॥ ३
२ काम्यं(३)तयोर्बाधकं वा ४
ऽऽधानं नेष्टयर्थमिष्यते । ५
न क्रत्वङ्गं तदङ्ग्यङ्गम् ६
इष्टयर्था नेष्टयो मताः ॥ ५६ ॥ ७
पशुसामान्यविध्यन्तः ८
समानो दोहयोर्विधिः । ९
ग्रहधर्माश्च सर्वार्थाः १०
रशनायूपयोस्तथा ॥ ५७ ॥ ११
ग्रहाङ्गमश्ववालार्थम् १२
चित्रिण्याद्यग्निधर्मकम् । १३
स्तिभिन्यः सोमविकृतिः १४
साम्यं प्रतिनिधौ विधेः ॥ ५८ ॥ १५
पूतिकेष्वप्येवमेव १६
संस्थानां न समो विधिः १७

इति तृतीयाध्यायस्य षष्ठः पादः ।

अङ्गाङ्गिनोर्बर्हिरादिः १
फलार्थं वचनादि च ॥ ५९ ॥ २

---

(१) राजन्यो नैतन्नमसी इति पु० पा० ।

(२) ग्रन्थानुसारेणेदम् ।

(३) भाष्यानुसारादिदम् ।

साङ्गार्थौ सौमिकी वेदिः ३
अभिमर्शमनू(१)तथा। ४
सोमाङ्गं दक्षिणा दीक्षा ५
वेदेर्यूपाङ्गता न च ॥ ६० ॥ ६
हविर्धानं देशपरम् ७
दक्षिणावत्सु चर्त्विजः ८
भिन्नाः स्युस्ते च वरणैः ९
चमसाध्वर्यवस्तथा ॥ ६१ ॥ १०
बहुश्रुतेस्ते ऽपि नाना ११
तत्रापि दश ते मताः। १२
ऋत्विग्भ्यः शमिता नान्यः १३
उपगाश्च तथा मताः ॥ ६२ ॥ १४
सोमविक्रय्यन्य इष्टः १५
स्युः सप्तदश चर्त्विजः। १६
नियता दक्षिणाभिस्ते १७
स्वामी सप्तदशो मतः ॥ ६३ ॥ १८
स(२)मानविधिताऽग्नीनाम् १९
१ सामाख्या पुंनियामिका। २०
२ तद्वा(३)थश्च विशेषेण: २१
प्रशास्ता क्व चिदेव तु ॥ ६४ ॥ २२
चमसे ऽध्वर्युबाधो न २३
समाख्या चोदकावरा। २४

इति तृतीयाध्यायस्य सप्तमः पादः।

१ परिक्रयः स्वामिकर्म १
२ वचनात्तु स(४)ऋत्विजाम् ॥ ६५ ॥ २
१ पुंसंस्कारा याजमानाः ३
२ वचनादृत्विजामपि। ४

---

(१) अभिमर्शमन्वौ साङ्गार्थावित्यर्थः।

(२) अरणमते वर्णकमिदम्।

(३) पूर्वाधिकरणांश इति शास्त्रदीपिका।

(४) अधिकरणभेदे विवादः एवमुत्तरत्राऽपि।

Xx 5.6

१ तपश्च याजमानं स्यात् ५
२ वचनादृत्विजामपि ॥ ६६ ॥ ६
सर्वर्त्विजां हेममाला ७
याजमानस्यार्त्विज्यं न गुणात्फलम् । ८
प्रत्यगाशीर्मनुर्येषु: ९
याम्नात स्तूभयोर्मनुः ॥ ६७ ॥ १०
स एव वाच्यः क्लृप्तीश्च ११
द्वन्द्वान्याध्वर्यवाणि नः । १२
विरोधे करणं होता १३
प्रैषाप्रैषार्थकर्तृभित् ॥ ६८ ॥ १४
प्रेषिता ऽध्वर्युरत्र स्यात् १५
करणे स्वामिगं फलम् । १६
असन्तापाद्यार्त्विजं तु १७
व्यपदेशे च तद्भवेत् ॥ ६९ ॥ १८
बर्हिर्धर्मोऽङ्गाङ्गिनोः स्यात् १९
न यूपावटबर्हिषः । २०
पवित्रविधृती तद्वत् २१
शकले प्रकृतग्रहः ॥ ७० ॥ २२
काम्यं प्रधानं तूपांशु २३
श्येनाङ्गे नवनीतयुक् । २४
१ असुत्याकाले ऽप्यङ्गे तत् २५
२ सुत्यायां पशुसंहतिः ॥ ७१ ॥ २६
तरसं सवनीयाङ्गम् २७

इति तृतीयाध्यायस्याष्टमः पादः ।

पादाधिकरणानां सङ्ख्या ।

१५—१९—२०—२३—२०—१७—२४—२७

अध्यायाधिकरणसङ्ख्या १६५*

सर्वसङ्ख्यैक्यं २८५

---

* अधिकरणरत्नमालानुसारेणाध्यायाधिकरणसङ्ख्या १५२ ।

अथ चतुर्थोऽध्यायः ।

तुर्याध्यायप्रतिश्रवः । १
१ लक्षणं पुरुषार्थस्य २
२ विधेयं न फलं मतम् ॥ ७२ ॥ ३
३ काम्यो गुणो न क्रत्वर्थः ४
४ पुमर्थे द्रविणार्जनम् । ५
पर्युदासो ऽनीक्षणादौ ६
प्रदेयं स्फ्यादि नो यजौ ॥ ७३ ॥ ७
पश्वेकत्वं तु यागाङ्गम् ८
लिङ्गमप्येवमिष्यते । ९
अपूर्वमाश्रयिष्वस्ति १०
साम्यं वैषम्यमर्थगम् ॥ ७४ ॥ ११
वाजिनार्थं न दध्यादि १२
पदकर्माप्रयोजकम् । १३
अर्थाभिधानकर्मैवम् १४
शकृल्लोहितकर्म च ॥ ७५ ॥ १५
आग्नेयादेः स्विष्टकृच्च १६
हविष्षु क्षारणं तथा । १७
प्रयाजयोरौपभृतम् १८
नानुयाजाङ्गमेव तत् ॥ ७६ ॥ १९
अष्टत्वे च चतुष्टे द्वे २०

इति चतुर्थाध्यायस्य प्रथमः पादः ।

स्वर्वर्थं खादिरादि न । १
प्राचीशाखा न दिग्वादौ २
मूलवाक्ये ऽग्रमेव सा ॥ ७७ ॥ ३
हरतौ प्रतिपाद्या सा ४
प्रणीतानिनये तथा । ५
दण्डदानन्त्वर्थकर्म ६
विषाणाप्रासनं तु न ॥ ७८ ॥ ७
प्रतिपाद्यं सोमलिप्तम् ८

इतिचतुर्थाध्यायस्यद्वितीयः पादः ।

(१) वार्तिककारव्याख्यानानुसारेणेदम् ।

बृहस्पतिसवो ऽप्येवम् २९

इति चतुर्थाध्यायस्य तृतीयः पादः ।

राजसूये यजेः फलम् ॥ ८६ ॥ १
विदेवनादि तस्याङ्गम् २
सौम्ये नापसदङ्गता । ३
आमनाः साङ्ग्रहण्यङ्गम् ४
नित्य एव दधिग्रहः ॥ ८७ ॥ ५
वैश्वानरो निमित्तं स्यात् ६
षष्ठी नैमित्तिकी चितिः । ७
पितृयज्ञो न दर्शाङ्गम् ८
यूपाङ्गं रशना परा ॥ ८८ ॥ ९
स्वरुःपश्वञ्जनाङ्गं स्यात् १०
दर्शे कालयुजां फलम् ११
ज्योतिष्टोमे सोमय(१)जेः १२

इति चतुर्थाध्यायस्य चतुर्थः पादः ।

पादाधिकरणानां संख्या

२० । १८ । २० । १२ ।

अध्यायाधिकरणसङ्ख्या ७०*

सर्वसङ्ख्यैक्यं ३५५

अथ पञ्चमोऽध्यायः ।

१ क्रमः श्रुत्या नियम्यते ॥ ८९ ॥ १
२ क्रमो वैधः पाञ्चमिकः २
३ सत्रे दीक्षाक्रमः श्रुतेः ३
पाकाग्निहोत्रयोरर्थो ४
नियतो न स्वमानतः ॥ ९० ॥ ५

---

(१) फलमित्यनुवर्तते ।

* अधिकरणरत्नमालाऽनुसारिण्यध्यायाधिकरणसङ्ख्या ६२ ।

पाठक्रमाक्रमश्च स्यात् ६
द्विपश्वादौ प्रवृत्तितः ७
१ स्या(१)न्नास्नाद्यस्कपशुषु ८
२ क्रमश्चेतरयोस्ततः ॥ ९१ ॥ ९
मुख्यक्रमात्तदङ्गानाम् १०
पाठो मुख्यक्रमाद् बली ११
विधिपाठान्मन्त्रपाठः १२
क्रमान्मौख्याच्च चोदकः ॥ ९२ ॥ १३
प्रातरादिश्रुतौ सद्य १४
१ उत्कर्षे च तदादिता । १५
२ तदन्तस्यापकर्षः स्यात् १६
सौमिकाः प्रोक्षणाद्यनु ॥ ९३ ॥ १७
यूपे श्रुतापकर्षः स्यात् १८
एवं प्रासङ्गिके मतः । १९
अपूर्वे च स एवेष्टो २०
ऽग्निहोत्रोत्कर्षणं न च ॥ ९४ ॥ २१
षोडश्युत्कर्षकं चोक्थ्यं २२

इति पञ्चमाध्यायस्य प्रथमः पादः ।

पदार्थो ऽनुसमीयते । १
काण्डानुसमयश्चोक्तो २
मु(२)ख्यादौ स च वर्णितः ॥ ९५ ॥ ३
चतुःखण्डितहोमे ऽसौ ४
यूपानैक्ये ऽञ्जनादिषु । ५
पशुष्ववत्ते साजात्यात् ६
नानाबीजेषु चाप्ययम् ॥ ९६ ॥ ७
पृषदाज्ये पात्रभेद ८
आगन्त्वन्तनिवेशनम् । ९
देवनाद्यपकृष्येत १०

(१) नाधिकरणान्तरं किन्त्वर्थसिद्धम् ।
(२) माधवमतेनाधिकरणभेदः ।

दीक्षा साचित्रतः परा ॥ ९७ ॥ ११
ततो दीक्षितसंस्काराः १२

इतिपञ्चमाध्यायस्यद्वितीयः पादः।

प्रयाजैकादशैः पशोः। १
तत्र स्वस्थानवृद्धिः स्यात् २
नान्ते धाय्या निवेश्यते ॥ ९८ ॥ ३
आज्यं तृचोन्ते पर्यासात् ४
गायत्र्यादिषु सामसु। ५
ग्रहेष्टकं तु सोमाग्न्योः ६
चित्रिण्याद्यास्तु नान्ततः ॥ ९९ ॥ ७
लोकम्पृणा तदन्ते वा ८
ऽग्निहोत्रादीष्टितः परम् ९
क्रत्वन्ते त्वग्निचिद्धर्मा १०
इष्ट्यन्ते दीक्षितस्य ते ॥ १०० ॥ ११
पाठक्रमः क्रतूनां ना १२
ग्निष्टोमविकृतिः परा। १३
सा च सर्वान्तसंस्थैव १४
नैकस्तोमग्रहो ऽत्र च ॥ १०१ ॥ १५

इति पञ्चमाध्यायस्य तृतीयः पादः।

श्रुत्यर्थाभ्यां पाठबाधः १
प्रवृत्तेर्मुख्यतस्तथा। २
विकल्पः सोमपूर्वत्वे ३
सो ऽपि वर्णत्रयस्य च ॥ १०२ ॥ ४
सोमे ऽप्यृत्वादिबाधः स्यात् ५
नाज्योत्कर्षश्च सोमतः। ६
सद्यस्काला च विकृतिः ७
सोमोर्ध्वं दोहवैकृतं ॥ १०३ ॥ ८
दर्शोर्ध्वा सोमविकृतिः ९

इति पञ्चमाध्यायस्य चतुर्थः पादः।

पादाधिकरणानांसङ्ख्या

२२ । १२ । १५ । ९

अध्यायाधिकरणसङ्ख्या ५८ *

सर्वसङ्ख्यैक्यं ४१३

अथ षष्ठोऽध्यायः

स्वर्गः साध्यो न साधनम् । १
तिर्यगादेर्नाधिकारः २
स्यात्स्त्रिया अप्याधिक्रिया ॥ १०४ ॥ ३
दंपत्योश्च सहैवासौ ४
आधाने पुंद्वयस्य सा । ५
यावदुक्तेः स्त्रियाः सेयम् ६
अपशूद्रं च सा मता ॥ १०५ ॥ ७
प्रतीकारेऽङ्गव्यवतो ८
ऽप्यङ्गाभाववतस्तथा । ९
नाङ्गाभावाप्रतीकारे १०
नित्ये(१)साग्नेरधिक्रिया ॥ १०६ ॥ ११
आर्षेयवरणात्सा स्यात् १२
रथकारस्य चाहितौ । १३
स्थपतेश्च निषादस्य १४

इति षष्ठाध्यायस्य प्रथमः पादः ।

सत्रे प्रत्येकमेव च ॥ १०७ ॥ १
विवक्षिता कर्तृसङ्ख्या २
प्रारब्धस्य समापनम् । ३
लौकिके नैव नियमः ४
कलञ्जप्रतिषेधनम् ॥ १०८ ॥ ५
नियमा उपनीत्यूर्ध्वम् ६

---

* अधिकरणरत्नमालानुसारेणाधिकरणसङ्ख्या ५४ ।

(१) इदं च नाधिकरणान्तरम् ।

नाशक्त्या कालहापनम् । ७
जीवने जीवने कर्म ८
होमश्च प्रतिभेदतः ॥ १०९ ॥ ९
एवं गुर्वनुगत्यादौ १०
सोमादेश्चापि नित्यता । ११

इति षष्ठाध्यायस्य द्वितीयः पादः ।

अशक्त्या त्वङ्गहानं स्यात् १
काम्ये तु न तदिष्यते ॥ ११० ॥ २
कर्मभेदो द्रव्यभेदे ३
द्रव्यादेः प्रतिनिध्ययः । ४
न देवतादेः समतः ५
प्रतिषिद्धस्य नापि सः ॥ १११ ॥ ६
स्वामिनो न प्रतिनिधिः ७
सत्रे स च मृतस्य तु । ८
आनीतो ऽसौ न च स्वामी ९
फलिसंस्कारभाक्तु सः ॥ ११२ ॥ १०
सदृगेव प्रतिनिधिः ११
यथा न व्रीह्युपक्रमे । १२
पूतीकश्च प्रतिनिधिः १३
नासौ प्रतिनिधेर्मतः ॥ ११३ ॥ १४
पूतीकसदृगग्राह्यम् १५
नीवारे मुख्यमेव तत् । १६
संस्कारेषु कृतेष्वेवम् १७
प्रयोजनकृतौ न तु ॥ ११४ ॥ १८
संस्कारयोग्यं मुख्यं स्यात् १९
न तु कार्याक्षमं तथा । २०
शेषकार्याक्षमं मुख्यम् २१

इति षष्ठाध्यायस्य तृतीयः पादः ।

नाशेऽवत्तस्य चाज्यतः ॥ ११५ ॥ १
एवं शेषावत्तनाशे २
सर्वे भक्षास्तथर्त्विजाम् । ३

होमः किं चित्कृत्स्नभेदे ५
सर्वक्षाम(१)निमित्तता ॥ ११६ ॥ ५
उभयार्थ्यविवक्षा स्यात् ६
होमाभिषवयोर्न सा। ७
अग्निहित्वविवक्षा स्यात् ८
हविरार्तौ क्रियाविधिः ॥ ११७ ॥ ९
सा च क्रिया स्याद्दर्शाङ्गम् १०
सर्वत्यागे च विश्वजित्। ११
वत्सकाले व्रतं च स्यात् १२
असान्नाय्य ऽप्यसौ भवेत् ॥ ११८ ॥ १३
प्रतिपाद्याहुतौ शाखा १४

इति षष्ठाध्यायस्य चतुर्थः पादः।

ऽभ्युदये च न कर्मभित्। १
देवतापनयस्त्वाज्ये २
निर्वापश्चाविवक्षितः ॥ ११९ ॥ ३
अविवक्षा तण्डुलानाम् ४
तूष्णीमर्धेनिरुप्तके। ५
असान्नाय्ये ऽपीयमिष्टिः ६
अक्रीते ऽपि च विश्वजित् ॥ १२० ॥ ७
दीक्षाविक(२)ल्पः प्रकृतौ ८
द्वादश द्वादशाहके। ९
गव्यदीक्षा पुरा माध्या १०
दीक्षितो ऽवभृथावधि ॥ १२१ ॥ ११
प्रतिहोमस्तत्र नास्ति १२
उ*त्कर्षे(३)चाग्नि होत्रकम्। १३
प्रतिहोमश्च नो तत्र १४

---

(१) सर्वनिमित्ततेति पु० पा०।

(२) वार्तिकमतमिदम्।

* नास्तीष्टुत्कर्षे इति पु० पा०।

(३) उदवसानीयोत्कर्षे अग्निहोत्रं च उत्कृष्टम् इत्यधिकरणार्थोऽयम्।

† सा – अविवक्षा।

प्रकृतौ सायमादितः ॥ १२२ ॥ १५
षोडशिनि प्रातरादि १६
भिन्ने होमो न सर्वगः। १७
व्यापन्नमार्याभोज्यं स्यात् १८
सर्वच्छेदे निमित्तता ॥ १२३ ॥ १९
यौगपद्ये विकल्पः स्यात् २०
क्रमे पूर्वं तु बाध्यते। २१
परोऽङ्गान्ते सर्वधनम् २२
कृत्स्ना(१)वृत्तिरहर्गणे ॥ १२४ ॥ २३

इति षष्ठाध्यायस्य पञ्चमः पादः।

सत्रं कुर्युस्तुल्यकल्पाः १
कुलायेन तथा भवेत्। २
सत्रे धिकारी विप्रः स्यात् ३
वैश्वामित्रश्च तत्समः ॥ १२५ ॥ ४
आधानाधिकृतः सत्रे ५
पात्राण्यन्यानि तत्र च। ६
वैश्यस्यैव न पश्वादि ७

इति षष्ठाध्यायस्य षष्ठः पादः।

सर्वस्वे जनकादि न ॥ १२६ ॥ १
देया भूमण्डलं नापि २
न देयः केसरी तथा। ३
उपार्ज्यापि न देयं च ४
१ धर्मदासस्तथैव च ॥ १२७ ॥ ५
२ क्रीता(२)दिर्देय एव स्यात् ६
दानकाले च यद्भवेत्। ७
दक्षिणार्थं च सर्वं स्यात् ८
१ तत्र*विश्वजिदन्तरे ॥ १२८ ॥ ९

(१) कृत्स्नानाङ्गावृत्तिरिति पु॰ पा॰।

(२) इदं नाधिकरणान्तरम्। क्रीतादिर्देय इति पु॰ पा॰।

* भाष्यमतमेतदम्।

इति षष्ठाध्यायस्य सप्तमः पादः।

इति षष्ठाध्यायस्याष्टमः पादः।

पादाधिकरणानां संख्या।

१४।११।२१।१४।२३।७।१६।११

अध्यायाधिकरणसङ्ख्या ११७†

सर्वसङ्ख्यैक्यं ५२०

** वार्तिकमतमेवेदम्।

(१) नाधिकरणान्तरं किन्तु पक्षान्तरम्।

(२) वत्सरशब्दस्य दिनपरत्वादिति शेषः।

(३) माधवमतेनेदमधिकरणम्।

† अधिकरणरत्नमालाऽनुसारेणाधिकरणसङ्ख्या १०८।

अथ सप्तमोऽध्यायः ।

पारिप्लवा न धर्माः स्युः १
वचनाच्चातिदेशनम् ॥ १३३ ॥ २
स्यात्पञ्चसञ्चरेष्वेवम् ३
चैन्द्राग्नैककपालयोः । ४
द्वितीयपर्वैतच्छब्दम् ५

इति सप्तमाध्यायस्य प्रथमः पादः ।

गीतिः साम तु नर्क्मता ॥ १३४ ॥ १

इति सप्तमाध्यायस्य द्वितीयः पादः ।

नामातिदेशकं चाथ १
प्रायणीयपदं न तु । २
सर्वपृष्ठे ऽतिदेशः स्यात् ३
तुषावभृथकर्मभित् ॥ १३५ ॥ ४
तद्द्रव्यं न पुरोडाशो ५
वैष्णवादि·न नामवत् । ६
निर्मथ्यनातिदेशः स्यात् ७
द्वयोः प्रण(१)यनान्तरम् ॥ १३६ ॥ ८
तत्पर्वणो मध्यमयोः ९
स्वरसामातिदेशकम् । १०
वासो नसोर्न क्रियाऽङ्गम् ११
स्तोत्रे ऽग्निर्लौकिको मतः ॥ १३७ ॥ १२
स्तुतिस्तूपशयो यूपः १३
पृष्ठैः साधनलक्षणा । १४

इति सप्तमाध्यायस्य तृतीयः पादः ।

लिङ्गातिदेशः सौर्यादौ १
विध्य(२)न्तो वैदिकस्तु सः ॥ १३८ ॥ २

---

(१) वार्तिकमतमेदम् ।

(२) वैदिका: स च सम्मत इति पा० । माधवमतानुसारेण चा-धिकरणभेदः ।

चोदकाद्दलवन्नामा ३

इति सप्तमाध्यायस्य चतुर्थः पादः।

पादाधिकरणानां सङ्ख्या

५। १। १४। ३।

अध्यायाधिकरणसङ्ख्या २३ *

सर्वं सङ्ख्यैक्यं ५५३।

अथाष्टमोऽध्यायः

ऽष्टमा(१)र्थस्य प्रतिश्रुतिः। १
एकस्मिन्नेकविध्यन्तो २
यस्य लिङ्गं च तस्य सः॥ १३९॥ ३
इष्टेः सोमेनातिदेशः ४
दर्शादिष्टिष्वसौ मतः। ५
सो ऽग्नीषोमीय इष्टेः स्यात् ६
दैक्षाद्वान्यपशुष्वयम्॥ १४०॥ ७
सौत्यादेकादशिन्यांस्यात् ८
तस्याः पशुगणेषु सः। ९
अव्यक्तचोदिते सोमाद् १०
द्वादशाहादहर्गणे॥ १४१॥ ११
गव्यात्तदादिसत्रेषु १२
निकाय्याद्यात्परेषु सः। १३
फलादेर्नातिदेशः स्यात् १४
फलार्थस्य गुणस्य च॥ १४२॥ १५
सौर्ये मन्त्रव्यवस्था न १६
तस्याग्नेयाच्च चोदकः। २७
देवतातो बलिहविः १८
कृष्णले च सधर्मता॥ १४३॥ १९

---

(१) प्रतिज्ञामात्रं नाधिकरणान्तरम्।

* अधिकरणरत्नमालाऽनुसारेणाऽधिकरणसङ्ख्या २२।

आज्यान्मधूदके चासौ २०

इत्यष्टमाध्यायस्य प्रथमः पादः ।

पयसो वाजिने च सः । १
पशौ सान्नाय्यतश्चासौ २
तत्रापि पयसो मतः ॥ १४४ ॥ ३
आमिक्षायां पयस्तोऽसौ ४
सत्राहीनेषु तादृशात् । ५
कौण्डपायि(१)नसत्रत्वम् ६

इत्यष्टमाध्यायस्य द्वितीयः पादः ।

स्थानसाम्यात्र चोदकः ॥ १४५ ॥ १
त्रिवृत्साम्यान्नातिदेशः २
षडहेषु गवात्वतः । ३
द्वादशाहाच्छतोक्थ्ये सः ४
प्राकृतोक्थ्याच तत्र सः ॥ १४६ ॥ ५
गायत्रीवर्णलोपाच ६

इति अष्टमाध्यायस्य तृतीयः पादः ।

१ दर्विहोमे च नामता । १
२ नामैतद्वैदिकानाम २
३ प्यत्र स्याद्धोमनामता ॥ १४७ ॥ ३
४ नातिदेशो दार्विहोमे ४
५ ष्वसौ वचनतः(२)क्वचित् । ५

इत्यष्टमाध्यायस्य चतुर्थः पादः ।

पादाधिकरणानां सङ्ख्यां

२० । ६ । ६ । ५ ।

अध्यायाधिकरणसङ्ख्या ३७*

---

(१) कुण्डपाय्ययनस्य सत्रविकारत्वमित्यर्थः ।

(२) राष्ट्रभृद्धोमादेः प्राकरणिकत्वेऽपि विवाहादौ राष्ट्रभृतोजुहो-तीत्यादिवचनादतिदेशः । इदमधिकरणान्तरत्वेन भाष्यादौ न दृश्यते ।

* अधिकरणरत्नमालानुसारेणाधिकरणसङ्ख्या २५ ।

सर्वसङ्ख्यैक्यं ५९७

अथ नवमाऽध्यायः ।

१ सप्तमाद्यार्थस्मरणम् १
२ श्री*(१)हित्वाद्यविवविक्षतम् ॥ १४८ ॥ २
२ य(२)ऽयर्थत्वनिरासो वा ३
२ संनिपा(३)तिषु चात्र सः । ४
३ नि†मि१त्ततोक्ता ऽपूर्वस्य ५
३ स२न्निपातिषु वा तथा ॥ १४९ ॥ ६
१ वाक्यीयेऽपूर्वशेषत्वम् ७
२ दीक्षणीयाङ्गता स्वरे । ८
लैङ्गिके ऽपूर्वशेषत्वम् ९
देवताविग्रहादि न ॥ १५० ॥ १०
श्रौताङ्गापूर्वशेषत्वम ११
१ उपांशुत्वं पदार्थगम् । १२
२ वाग्यमो दर्शगस्तद्वत् १३
नाग्निधर्मः प्रतीष्टकम् ॥ १५१ ॥ १४
पक्षीय(३)ऽयन्तता ऽस्येन १५
त्रिरभ्यासस्त्वृचां न च । १६
आरम्भणीयाऽनावृत्तिः १७
सावित्रादेरनूहनम ॥ १५२ ॥ १९
१ निर्वापमन्त्रे ऽग्न्यूहः स्यात् २०
२ त(४)रसे धान्यशब्दगः । २१
१ न यज्ञपतिशब्दे(५)ऽसौ २२
२ यजमानपदे तु सः ॥ १५३ ॥ २३
१ न स्याद्धरिवदाद्यूहः २४

---

* द्वितीयवर्णकस्य व्याख्यापर्वमिदम् ।

† तृतीयवर्णकस्य व्याख्यायम् । इदं वार्तिके द्रष्टव्यम् ।

(३) पक्षीयजन्तताऽस्येन इति पु० पा० ।

(४) तरसे – मांसे । (५) असौ – ऊहः ।

२ साण्डे क्रयम(१)नौ तथा। २४
मेष्यामभिगुबाधः स्यात् २५
गिराबाधस्त्विरापदात् ॥ १५४ ॥ २६
इरापदे प्रगाथां स्यात् २७

इति नवमाध्यायस्य प्रथमः पादः।

१ गीतेः सामादिरूपता। १
२ ऊहग्रन्थो न नित्यः स्यात् २
साम संस्कारकर्मं च ॥ १५५ ॥ ३
प्रत्यृचं च समाप्तं तत् ४
समासु च तदिष्यते। ५
१ रूढः स्यादुत्तराशब्दः ६
२ प्रैशोक्तं विषमासु तु ॥ १५६ ॥ ७
१ पृष्ठसाम्नोः प्रगाथः स्यात् ८
२ यौधाजयमुखेषु च। ९
३ श्यावाश्वान्धीगवेष्वेव १०
४ गव्ये चैन्द्रेषु सदृश्यृचे ॥ १५७ ॥ ११
गीतिभेदाद्विकल्पः स्यात् १२
१ यद्वचेत्यादिका स्तुतिः १३
२ प्रगीता(२)ऽयं सहस्रेति' १४
३ यज्ञमंत्रेषु तानता ॥ १५८ ॥ १५
उत्तरादिषु सामोहः १६
तत्र स्तोभातिदेशनम्। १७
स्तोभो(३)ऽधिकं विवर्णनं च १८
१ प्रत्यक्षात्कार्यकारिता ॥ १५९ ॥ १९
२ अभावविधिना तद्वत् २०
३ विकारेण च सामता। २१
४ स्वशब्दादपि सा ज्ञेया २२
५ सा निषेधानुवादतः ॥ १६० ॥ २३

---

(१) क्रयमन्ये उक्ते नास्तीत्यर्थः।

(२) प्रगीतोऽयं सहस्रेति पु० पा०।

(३) स्तोभादिकमिति पु० पा०।

परिधौ यूपधर्माः स्युः २४
प्रणीताधर्मवच्छृतम् । २५
पृष्ठसाम्नोरङ्गभेदः २६
कण्वादौ तद्विकल्पनम् ॥ १६१ ॥ २७
द्विसाम्नि चाङ्गभेदः स्यात् २८
पार्वणानतिदेशनम् । २९
व्यवस्थोक्ता पार्वणयोः ३०
प्रयाजा अर्थकर्म च ॥ १६२ ॥ ३१

इति नवमाध्यायस्य द्वितीयः पादः ।

व्रीह्यादिमन्त्रऊह्यः स्यात् १
पुण्डरीके च दर्भवान् । २
लोके यूपस्पृशौ दोषः ३
ऊह्यौ पाशमनू द्विवत् ॥ १६३ ॥ ४
बहुपाशार्थः प्रकृतौ ५
नोह्यः पत्न्यैक्यवान्मनुः । ६
विकृतावप्यसौ नोह्यः ७
नोक्थ्यादावध्रिगुस्तथा ॥ १६४ ॥ ८
१ अनूहश्च प्रतिनिधौ ९
२ प्रियङ्गा(१)वूहनित्यता । १०
संसर्गिष्वङ्घ्रिगौ नोह्यो ११
ऽप्यस्यं तत्रैकधेति च ॥ १६५ ॥ १२
देवतात्वान्मेधपतिः १३
बहुष्वैक्यस्य नोह्यता । १४
देवताभेदे ऊहः स्यात् १५

इति नवमाध्यायस्य तृतीयः पादः ।

समासोहश्च वंक्रिषु ॥ १६६ ॥ १
चतुर्स्त्रिं(२)शाद्दगव्यश्वे २
समासो ऽपि विकल्पतः । ३

---

(१) अयं शिङ्गाम्नी वार्तिके प्रदर्शितो न त्वत्र ।

(२) चतुर्विंशद्दगिति पु० पा० ।

अग्नि(१)गौ च वपोरु*कम ४
प्रशंसा च प्रशस्तता ॥ १६७ ॥ ५
श्येनादौ चापि साकल्यम ६
ज्योतिष्मत्यग्निसंस्क्रिया । ७
नेष्टिर्गतश्रीधार्ये ऽग्नौ ८
नेष्टिर्वाचा(२)दिमन्त्रिका ॥ १६८ ॥ ९
पयः प्रदेयं नादित्ये १०
ऽप्युदयेष्टौ प्रदेयता । ११
पशुकामेष्टौ तु नैवम १२
अहंषु श्रप(३)णे तथा ॥ १६९ ॥ १३
यागः परस्वत्स्वैशाने १४
स्वाज्यशेषवचस्यपि । १५

इति नवमाध्यायस्य चतुर्थपादः ।

पादाधिकरणानां सङ्ख्या

२७ । ३१ । १५ । १५—

अध्यायाधिककरणसङ्ख्या ८८*

सर्वसङ्ख्यैक्यं ६७८ ।

अथ दशमाध्यायः ।

१ लुप्तार्थबाधो विकृतौ १
२ कृष्णलेष्ववघातागः ॥ १७० ॥ २
३ उरुक्रमस्तु नावाह्यः ३
सोमेष्ट्यारम्भवारणम् । ४
राजसूयेष्टिष्वप्येवम् ५

---

(१) अधिगौचरयोरुकमिति पु॰ पा॰ .

* वपा उरुकमिति छेदः ।

(२) वाचाशब्दः आदिर्यस्मिन् मन्त्रे इति बहुव्रीहिगर्भो बहुव्रीहिः ।

(३) श्रवणे इति पु॰ पा॰ ।

† बाध इति शेषः तेन अपत्वं भवतीति फलितम् ।

* अधिकरणरत्नमालानुसारिणोऽध्यायाधिकरणसङ्ख्या ८७ ।

आरम्भेष्टिर्न चात्मनि ॥ १७१ ॥ ६
यूपाहुतिर्न साद्यस्के ७
तत्र स्वाणव्राहुतिर्न च। ८
स्वाहा†कारः सन्निपाती ९
नाज्यभागो ऽग्निदैवतः ॥ १७२ ॥ १०
नैवं पशुपुरोडाशः ११
सौर्ये चरुरिहोदनः। १२
सौर्ये बाधः कपालानाम् १३
पेषणादि च बाध्यते ॥ १७३ ॥ १४

इति दशमाध्यायस्य प्रथमः पादः।

पाकः स्यात्कृष्णलचरौ १
नोपस्तराभिघारणे। २
भक्षस्तु तत्र स्याद्दैवे ३
कथेति तु सहत्वगीः ॥ १७४ ॥ ४
भक्षाः(१)सर्वे ब्रह्मणः स्युः ५
स्वकालास्ते तु सम्मताः। ६
स्यादेशो न चतुर्धाऽत्रा(२) ७
नत्यर्था दक्षिणर्त्विजाम् ॥ १७५ ॥ ८
भक्षास्तु प्रतिपत्त्यर्थाः ९
सत्रे वरणबाधनम्। १०
दक्षिणायाश्च बाधो ऽत्रो ११
ह्यवसाने यजेः फलम् ॥ १७६ ॥ १२
तत्राधिकारः प्रत्येकम् १३
चेत्स्तहैत्वं तदृर्त्विजः। १४
ऋत्विजो नैव कामेष्टौ १५
द्वेष्य ऋत्विक्कु नो मतः। १६
सत्रे मृतो नाधिकारी १७
१ तथा(३)त्वे ऽपि न दीक्षितः। १८

† स्वाहाकारः—उत्तमः प्रयाजः।
(१) कृष्णलचराविति शेषः।
(२) चमेति पूर्वान्वयि, चामसर्थेति उत्तरान्वयि।
(३) क्लाविम्ना।

२	अपभ्रंवपनं बाध्यम्	१९
	शुक्लान्वारम्भणादि**न ॥ १७८ ॥	२०
	गुणकामास्तु बाध्याः स्युः	२१
	सूक्तवाकफलानि च।	२२
	बाध्याः स्युर्होतृकामाश्च	२३
	सर्वस्वा(१)रः समाप्यते ॥ १७९ ॥	२४
	मृते ऽस्मियज्ञवत्कर्मा	२५
	शुराशी(२)स्त्वत्र जीवति।	२६
	सत्रे दानमदृष्टार्थम्	२७
	निर्वापो निर्गुणे ऽपि च ॥ १८० ॥	२८
	मुष्टेर्लोपो न सङ्ख्याया	२९
	धेन्वादावजबाधनम्।	३०
	श्वेतादौ नाजबाधः स्यात्	३१
	अव्रीहा अपि तण्डुलाः ॥ १८१ ॥	३२
	लुप्तार्थे न खले वाल्याम्	३३
	अलुप्तार्थे भवेदिह(३)।	३४
	पेषणं धर्मवन्मन्थे	३५

इति दशमाध्यायस्य द्वितीयः पादः।

पश्वादौ चोदको ऽस्ति च ॥ १८२ ॥	१
परार्थे मन्त्रविधिः	२
मोत्करादौ क्रियाविधिः।	३
दीक्षामन्त्रेष्वबाधो ऽग्नौ	४
पुनर्निष्कृत(४)एव च ॥ १८३ ॥	५
वासोवत्से प्राप्तबाधः	६
तत्रान्वाहार्यधर्मता।	७
वत्से पाकस्य बाधः स्यात्	८
पाकबाधश्च वाससि ॥ १८४ ॥	९

** बाधार्मिति शेषः। (१) सर्वसार इति पु० पा०।
(२) आयुराशीरिति छेदः। (३) खलेवाल्याम्।
(४) पुनर्निष्कृत एव दधिघर्मा नाम्ना।
† इदं नाधिकरणान्तरम्।

उभयोरभिचारस्य(१) १०
स्याद्वादशशतं गवाम् । ११
विभज्य दक्षिणा देया १२
स विभागो ऽसमो मतः ॥ १८५ ॥ १३
धेनुर्गवां बाधिका स्यात् १४
एका पंचेति धेनुवत् । १५
त्रिवत्सो प्येऽव मेव स्यात् १६
प्राकाशौ भागबाधकौ ॥ १८६ ॥ १७
श्यावाश्वे कृत्स्नबाधः स्यात् १८
स(२)सोमचमसे ऽपि च । १९
वा(३)क्यैक्यं भागबाधः स्यात् २०
यजुर्युक्ते मतोन सः(४) ॥ १८७ ॥ २१

इति दशमाध्यायस्य तृतीयः पादः ।

उपहोमे न नारिष्टा(५) १
१ बाध्या(६)स्त्विह शरैः कुशाः । २
२ रथघोषान्मन्त्रदर्मौ ३
शुक्रादेर्न ग्रहान्तरम्(७) ॥ १८८ ॥ ४
प्राजापत्यैः क्रतुपशुः ५
नानुयाजास्तथा ऽऽमनैः । ६
पत्नीभिर्गानकर्त्तर्त्विक् ७
नवनीतं च गुग्गुलोः ॥ १८९ ॥ ८
बाध्यं न वा सत्तार्येण ९
प्राकृती वैकृतस्तुतेः । १०
कौत्सेन प्राकृतं बाध्यम् ११

---

(१) बाध इतिसम्बध्यते ।

(२) तच्छब्देन बाधःऽपरामृश्यते ।

(३) न्यायमालायामिदं पृथङ्नास्ति ।

(४) सः – भागबाधः । (५) बाध्या इत्यपकृष्यते ।

(६) यदेत्यादिना अधिकरणान्तरत्वमस्य प्रदर्शितं शास्त्रदीपिकायाम् ।

† एवं चेत्यादिना वर्णकान्तरमारचितम् ।

(७) बाध्यमिति सम्बध्यते ।

तत्रापि समसङ्ख्यकम् ॥ १९० ॥ १२
स्तोमवृद्धौ न बाधः स्यात् १३
बाधाबाधौ न सर्वगौ । १४
विधिशब्दो देवतायाम् १५
विकृतावपि तत्तथा ॥ १९१ ॥ १६
सगुणायां गुणस्यापि १७
वृ*धन्वान्देवता न च । १८
उ†न्नेत्येवानुबन्धे वा १९
ऽवभृथे स्विष्टकृद्गुणः ॥ १९२ ॥ २०
तल्लोपस्तु प्रयोगे(१)चा २१
नुयाजोऽन्त्यस्तु संस्क्रिया । २२
याज्यानुवाक्या चैवं(२)स्यात् २३
मनोताग्नेरनूहनम् ॥ १९३ ॥ २४
कण्वादिसाम्नि स्वायोनिः २५
तत्र स्वे एव चोत्तरे २६
मोहः स्तोत्रे च शस्त्रे वा ६७
ऽऽज्य§पान्त्स्यात्पृषदाज्यके ॥ १९४ ॥ २८

इति दशमाध्यायस्य चतुर्थः पादः ।

लोपोन्त्यस्यैव विकृतौ १
एकत्रिकतृचे ऽन्त्ययोः । २
एकस्यामृचि धूर्गानम् ३
दशाहो मध्यगो गणे ॥ १९५ ॥ ४
विकल्पो ऽपूर्वसङ्ख्यासु ५
स्तोमे सामागमो ऽधिके । ६
पवमाने त्वाद्यऋचा ७
सामिधेनीषु चागमः ॥ १९६ ॥ ८
षोडशी प्रकृतावेव ९

---

* वृधन्वानिति पु॰ पा॰ ।   † उरसेत्यं वेति पु॰ पा॰ ।

(१) षंग्नीषोमीये ।   (२) एवं संस्कारकर्मस्यात् ।

§ ज्यायायाम्स्यापृषदाज्यके इति पु॰ पा॰ ।

तृतीयसवने स(१)च । १०
सचाग्रयणतो ग्राह्यः ११
स च स स्तुतशस्त्रकः ॥ १९७ ॥ १२
१ द्विरात्रे ऽङ्गिरसां नित्यः १३
२ सोऽन्येष्वपि मतान्तरे । १४
चतुर्थवीप्सा ना(२)हीने १५
१ विषुवाग्रयणाग्रता ॥ १९८ ॥ १६
२ जगत्सामा च विषुवान् १७
द्वयसामा स्वधर्मयुक् । १८
स्वमैन्द्रवायवस्थानम् १९
तथा कामे तदग्रता ॥ १९९ ॥ २०
काम्या शुक्राग्रतायां न २१
सा तु धाराग्रहाश्रया । २२
सादनं चापि तत्रैव २३
प्रदानं तत्र नैव हि ॥ २०० ॥ २४
नित्यं ऽयनीका शुक्राग्राः २५
अनङ्गं व्यूढ इष्यते । २६
ऽयनीकावृत्तिः स्वस्थानात् २७
छन्दोऽन्यस्थानता मतौ ॥ २०१ ॥ २८

इति दशमाध्यायस्य पञ्चमः पादः ।

तृचे स्तोत्राङ्गसामानि १
कालार्थः स्वर्गन्वयः । २
पृष्ठ्ये साम्नोर्विभज्योक्तिः ३
तथैकादशिनेष्वपि ॥ २०२ ॥ ४
विश्वजित्सर्वपृष्ठे सा ५
वैरूप्यं पृष्ठ एव च । ६
त्रिवृच्छन्दो नवर्चार्थः ७
पृष्ठे संसवणे उभे ॥ २०३ ॥ ८

---

(१) चनयोः शास्त्रदीपिकायां वैपरीत्यम् ।

(२) चोष्णव्याहीने इति पु० पा० ।

षडहान्ते मध्वशनम् ९
सकृत्तत्षडहे पुनः। १०
पुनः पुनर्व्यवाये तु ११
सत्रे मध्वशनं भवेत् ॥ २०४ ॥ १२
नाहरन्यन्मानसं स्याद् १३
बहूनां सत्रकर्तृता। १४
बाधस्तत्र त्विजामिष्टः १५
१ सत्रलक्षणमेव च ॥ २०५ ॥ १६
२ अहीनलक्षणं चैका १७
पौण्डरीकस्य दक्षिणा। १८
विभज्य प्रत्यहं नेया १९
यावत्सङ्ख्यं मनोत्रचः ॥ २०६ ॥ २०
मानाहुती वाससा स्तो २१
ऽहर्गणेवाससो भिदा। २२
काले सात्वाहुतेः* कार्या २३

इति दशमाध्यायस्य षष्ठः पादः।

हृदयादिपशो हविः ॥ २०७ ॥ १
तचैकादशसङ्ख्यं स्यात् २
तदन्यैः स्विष्टकृत्रिभिः। ३
अध्यू(१)ध्न्येडाभक्षबाधो ४
वनिष्ठुरपि बाधकः ॥ २०८ ॥ ५
इडाभक्षः प्रशास्तुः स्यात् ६
भागस्तस्यैक एव च। ७
प्रतिप्रस्थातुर्नो भक्षो ८
ऽपूर्वत्वं प्राकृतश्रुतौ ॥ २०९ ॥ ९
तत्रापि यावदुक्तं स्यात् १०
स्विष्टकृच्छेषकार्यहृत्। ११
शंयुविडान्तादिर्नित्यं स्यात् १२

---

* आहुतेः काले इत्यन्वयः।

(१) अध्व्र्येडाभक्षबाध इति पु० पा०।

सान्ततापूर्वतो भवेत् ॥ २१० ॥ १३
स्युस्त्वपूर्वा उपसदो १४
ऽवभृथश्च तथैव नः। १५
वैकल्पिकैकनियमः १६
प्रत्याम्नानाच्च बाधनम् ॥ २११ ॥ १७
समुच्चयो यू(१)पयोर्न १८
शुक्लव्रीह्यविकल्पनम्। १९
पश्चावर्त्तः पशुः सर्वो २०

इति दशमाध्यायस्य सप्तमः पादः।

१ नार्षेये पर्युदासता ॥ २१२ ॥ १
२ न तौ पशाविति न सा २
न सौम्य* इति नु स्तुतिः। ३
विकल्पः षोडशिन्युक्तः ४
जर्त्तिलादेर्विधिर्न च ॥ २१३ ॥ ५
होमाभिघारणे नित्ये ६
अग्न्याधेये च सामायत्। ७
२ दीक्षिते पर्युदासाः(२) स्युः ८
२ निषेधा इति के(३)चन ॥ २१४ ॥ ९
बाध्यो विशेषात्सामा(४)न्य १०
स्योपसंहारवर्णनं। ११
स्वाहाकारः सर्वहोमे १२
ऽन्यतिग्राह्यातिदेशनम् ॥ २१५ ॥ १३
हविश्चतुरवद्ये स्रो १४
पांशुयाजो ऽपि तद्भवेत्। १५
प्रागेव सोमाश्वैन्द्राग्नौ १६

(१) यूपयार्योर्न इति पु॰ पा॰।

* सौमे इति पाठो दृश्यते शास्त्रदीपिकायाम्।

† नित्ये इति वचनव्यत्ययेन सम्बध्यते नित्यमित्यर्थः।

(२) आर्ष्यमतमिदम्।

(३) वार्तिककाराः।

(४) सामान्यस्य विशेषादिष्टुभयथाऽपि।

ध्रौवे चोपांशुयाजके ॥ २१६ ॥ १७
देवता नियता तत्र १८
पौर्णमास्यां तथैव च । १९
आग्नेयमात्रेऽपि स च २०

इति दशमाध्यायस्याष्टमः पादः ।

पादाधिकरणानां सङ्ख्या
१४।३५।२१।२८।२८।२३।२०।२०
अध्यायाधिकरणसङ्ख्या १८८†
सर्वसङ्ख्यैक्यं ८६७

अथैकादशोऽध्यायः ।

प्रकृतीष्टौ फलं सह ॥ २१७ ॥ १
१ एकोपकाराण्यङ्गानि २
२ तेषां*च स्यात्समुच्चयः । ३
काम्याभ्यासः प्रतिफलम ४
१ अवघातः सकृन्न च ॥ २१८ ॥ ५
२ सर्वौषधे(१)तु स सकृत् ६
नाङ्गावृत्त्या फलं बहु । ७
कपिञ्जलेषु त्रित्वं स्यात् ८
उत्तरादोहनेन तत् ॥ २१९ ॥ ९
कालाद्यैक्ये ऽङ्गतन्त्रं चा १०
न्तः(२)सौम्याग्नेययोर्न तत् । ११

इति एकादशाध्यायस्य प्रथमः पादः ।

१ कालाद्यैक्यं प्राकृतेष्टेः १
२ अङ्गेषु च तदङ्गिभिः ॥ २२० ॥ २
प्रतित्रिकं त्वङ्गभेदो ३

---

* वृत्तिकारमते अधिकरणान्तरं न भाष्यमते ।

(१) शास्त्रदीपिकायां नाधिकरणान्तरमिदम् ।

(२) अन्तःसौम्यौ ययोराग्नेययोस्तन्त्रं नेत्यर्थः ।

† अधिकरणरत्नमालानुसारेणाऽध्यायाधिकरणसङ्ख्या १७८ ।

ऽध्वरकल्पापि तद्विधा । ४
वसाहोमैक्यं पशुषु ५
कालभेदे भिदा मता ॥ २२१ ॥ ६
अन्ते यूपाहुतिस्तद्व(१)त् ७
साङ्गो ऽवभृथो मतः । ८
विहारयो रङ्गावृत्तिः ९
कर्तृतन्त्रं तयोर्मतम् ॥ २२२ ॥ १०
आपराह्णिकभेदो ऽत्र ११
ब्रह्मसाम्नि न कर्मभित् । १२
स्यात्पञ्चशारदीये सा(२) १३
सह सोमक्रयेऽङ्गभित् ॥ २२३ ॥ १४
तुषयागो ऽर्थकर्मेत्थम् १५
निष्कासे तु न निर्वपः । १६

इति एकादशाध्यायस्य द्वितीयः पादः ।

अङ्गाङ्गिनोः कालभेदो १
ऽङ्गत्वे ऽप्याधानतन्त्रता ॥ २२४ ॥ २
सोमाङ्गपशुयूपैक्यम् ३
तत्र संस्कारतन्त्रता । ४
यूपैक्ये स्वरुतन्त्रत्वम् ५
विषाणाया अह*र्गणे ॥ २२५ ॥ ६
नानाबीजे(३)वाग्विसर्गे ७
पशुकाले स(४)नार्च्यचित् । ८
साङ्गा(५)न्ते ऽग्निविमोको ह ९
गणेष्वेको(६)पसत्सु या ॥ २२६ ॥ १०

(१) तन्त्रं चेत्यर्थः ।
(२) सा – कर्मभिदा ।
* तन्त्रत्वमिति सम्बध्यते ।
(३) अत्राऽपि तत्सम्बध्यते ।
(४) स – वाग्विसर्गः ।
(५) एतद्वार्तिकमतम् । भाष्यमते तु प्रधानमात्रान्ते विमोकः ।
(६) उपसत्सु या सुब्रह्मण्या सा षड्गणेषु एकेत्यर्थः ।

सुब्रह्मण्या(१)न चान्यैवम् ११
ऋत्विग्देशा(२)भिदापि च । १२
१ आन्तात्पात्रधृतिस्त्विष्टा १३
२ पवमानेष्टितस्तु सा ॥ २२७ ॥ १४
कृत्स्नसोमोर्ध्वाः पशवः १५
सूक्तवाकेन्द्र उत्कर्षिः । १६

इति एकादशाध्यायस्य तृतीयः पादः ।

कर्तुर्दक्षिणया भेदः १
राजसूये तु तन्त्रता ॥ २२८ ॥ २
नावेष्टावेकतन्त्रत्वम् ३
न सेष्टिषु गुणात्फले । ४
द्वादशाहः षट्त्र्य(३)हः स्यात् ५
सुत्याकालाङ्गभित्त्विह ॥ २२९ ॥ ६
सुब्रह्मण्याहः शब्दतन्त्रम् ७
कुम्भ्यादेश्च पशुष्विद(४)म् । ८
१ नानादेवेष्वप्येवं स्यात् ९
२ वसा(५)भेदे ऽप्यभिन्नता ॥ २३० ॥ १०
जातिभेदपशोस्त(६)द्भित् ११
अश्वेष्टिषु कपालभित् । १२
अवघाते सकृन्मन्त्रः १३
नानाबीजेषु तद्भिदा ॥ २३१ ॥ १४
प्रतिमुष्टि स निर्वापे १५
वेद्यस्त्रिः प्रोक्षणे सकृत् । १६
स*कृत्कण्डूवां सकृन्मन्त्रः १७

(१) अन्या सुत्याकालीना सुब्रह्मण्या नैवम् एका नेत्यर्थः ।

(२) ऋत्विग्देशानां भेदो ऽभेदश्च ऐच्छिक इत्यर्थः ।

(३) षट्त्र्यहः २६ ।

(४) तन्त्रम् ।

(५) अधिकरणान्तरं भेदं शास्त्रदीपिकायाम् ।

(६) तन्त्रभेदः ।

* सकृत्कर्म सकृन्मन्त्र इति पु० पा० ।

इति एकादशाध्यायस्य चतुर्थः पादः ।

पादाधिकरणानां सङ्ख्या

११ । १६ । १६ । २१

अध्यायाधिकरणसङ्ख्या ६४

सर्वसङ्ख्यैक्यं ९३१ ।

अथ द्वादशाध्यायः ।

---

(१) समानतन्त्रत्वे मीदाहते भाष्यकारेण चित्रायामे एककर्मता-त्तदनुपपत्तिमाशङ्क्य भिन्नकर्मत्वं साधितम् ।

* अधिकरणरत्नमालाऽनुसारेणाऽध्यायाधिकरणसङ्ख्या ६४ ।

(२) सोमे इत्यनुवर्तते ।

सोमे नैवैष्टिकं व्रतम्। १५
य(१)ष्टभक्षाः पृथक्तु स्युः १६
सोमाङ्गे दक्षिणा न च ॥ २३७ ॥ १७
ऋत्विक्भक्षास्त्वैष्टिकाः स्युः १८
होतुर्वरणमेव च। १९
बर्हिरैक्ये(२)तदङ्गं न २०
देशभेदे भिदा मनोः ॥ २३८ ॥ २१
नाहह(३)ति मनू नैवम् २२

इति द्वादशाध्यायस्य प्रथमः पादः।

त्रेता(४)पाकाद्यसाधनम्। १
नित्यः पशुपरोडाशः २
हविष्कृच्चेत्पशौ सकृत् ॥ २३९ ॥ ३
सौम्यादावपि सा नैव ४
निशीष्टिश्च प्रसङ्गिनी। ५
आरम्भणीया विकृतौ ६
भूयांसः स्युः सधर्मकाः ॥ २४० ॥ ७
मुख्यं स्वधर्मकं साम्ये ८
ह्यङ्गिनोरङ्गि तादृशम्। ९
परिधिर्द्वयधर्मा स्यात् १०
विरोधे यौप्यबाधनम् ॥ २४१ ॥ ११
सवने पशुतन्त्रित्वम् १२
विकृतेः प्रकृतिं प्रति। १३
बर्हिः सूनं त्वाग्रयणे १४
सर्वेषां तन्त्रितेह च ॥ २४२ ॥ १५

इति द्वादशाध्यायस्य द्वितीयः पादः।

---

(१) यष्ट इति पु० पा०।

(२) पृथगित्यनुवर्तते। बर्हिरैक्ये प्रतिकर्म बर्हिरङ्गं प्रोक्षणादिकं पृथक् न कर्तव्यमित्यर्थः।

(३) संवहन हरणमन्त्रौ।

(४) त्रेता – अग्नित्रयम्। त्रिता इति० पु० पा०।

वत्सत्वचाहता बाधः १
देवसूषु प्रसङ्गिता। २
सर्वमूर्ध्वादि चाघारे ३
यवव्रीहिविकल्पनम् ॥ २४३ ॥ ४
दोषे प्रायश्चित्तयोश्च ५
दोषाभावे समुच्चयः। ६
कर्मण्यधर्मका मन्त्रा ७
ब्राह्मणस्वरतो न ते ॥ २४४ ॥ ८
तत्रोत्पन्नास्तत्स्वरेण ९
मन्त्रान्ते कर्म चारभेत्। १०
सन्ततां च वसोर्धाराम् ११
सन्तताघारकर्म च ॥ २४५ ॥ १२
विकल्पाः करणामन्त्राः १३
सङ्ख्यायुक्तसमुच्चयः। १४
ब्राह्मणेविहितेष्वेव(१)म् १५
क्रिय(२)माणानुवादिषु ॥ २४६ ॥ १६

इति द्वादशाध्यायस्य तृतीयः पादः।

जयाशीरादिषु च सो(३) १
ऽनुवाक्यायाज्ययोश्च सः। २
क्रयणेषु च सन्याय्यः ३
पशुसङ्गुदेषु च ॥ २४७ ॥ ४
ना(४)ग्न्याधेये दक्षिणासु ५
जाघनीषु समुच्च(५)यः। ६
अग्नावुख्यः काम्यबाध्यः ७
काम्यो नाहवनीय(६)कः ॥ २४८ ॥ ८

---

(१) विकल्पः। त्रिविहितेष्वेव इति पु० पा०।

(२) समुच्चयः।

(३) सः - समुच्चयः।

(४) समुच्चयो न।

(५) नेत्यनुवर्तते।

(६) नीयके इति पु० पा०।

नास्याधानादि कर्म स्यात् ९

गतश्रीधारणं न च। १०

यष्टैकस्तुपरार्थानि ११

सत्रादौ स च कश्चन ॥ २४९ ॥ १२

सत्रे गृहपतिः स स्यात् १३

१ स्वाम्यर्थे सर्वकर्तृता। १४

२ आर्त्विज्यं बलिसंस्कारात् १५

विप्राणामेव तच्च नः ॥ २५० ॥ १६

इति द्वादशाध्यायस्य चतुर्थः पादः।

पादाधिकरणानां सङ्ख्या

२२।१५।१६।१६

अध्यायाधिकरणसङ्ख्या ६९*

सर्वसङ्ख्यैक्यं १०००

इति द्वादशाध्यायः।

आचार्यैरधिकरणान्युक्तानि सहस्रसङ्ख्यानि।
तत्सिद्धान्तान्पादैः तत्सङ्ख्यैर्भट्टशंकरोऽबध्नात् ॥ १ ॥
इदं भवतु मीमांसासारसंग्रहपञ्जरम्।
शिवयोः पादपद्मानां पूजार्थं लिखितं मया ॥ २ ॥

इति शङ्करभट्टकृतमीमांसासारसङ्ग्रहः समाप्तः।

श्रीगुरुर्जयति।

* अधिकरणरत्नमालाऽनुसारेणाध्यायाधिकरणसङ्ख्या ७०।